THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY
OU_184013
UNIVERSAL
LIBRARY

OUP—43—30-1-71—5,000

OSMANIA UNIVERSITY LIBRARY

Call No. S294.592 B81 - Accession No. P.G. S2341

Author

Title ब्रह्मसूत्राणि . 1903 .

This book should be returned on or before the date last marked below.

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः २१

श्रीमद्द्वैपायनप्रणीतब्रह्मसूत्राणि

आनन्दगिरिकृतटीकासंवलितशांकरभाष्यसमेतानि ।

(पादाधिकरणविषयानुक्रमण्या सूत्राणामकारादिवर्णानुक्रमण्या च सनाथीकृतानि ।)

(द्वितीयाध्यायान्तिमपाददयसमेतौ तृतीयचतुर्थाध्यायौ)

एकसंबेकरेत्युपाह्वैः वे० शा० रा० रा० नारायण-शास्त्रिभिः संशोधितानि ।

तानि च

हरि नारायण आपटे

इत्यनेन

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितानि ।

शालिवाहनशकाब्दाः १८२९

खिस्ताब्दाः १९०२

द्वितीयेयमङ्कनावृत्तिः ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः)

मूल्यं रूपकषट्कम् (रु० ६)।

ब्रह्मसूत्रीयषोडशपादार्थदर्शनं

निर्घण्टपत्रम् ।

प्रतिपाद्यविषयाः ।	अध्यायाङ्काः।	पादाङ्काः ।	पृष्ठाङ्काः।
पूर्वभागेण पञ्चमहाभूतश्रुतीनामुत्तरभागेण च जीवश्रुतीनां परस्परविरोधपरिहारः, ...	२	३	१
लिङ्गशरीरश्रुतीनां विरोधपरिहारः, ...	२	४	९५
जीवस्य परलोकगमनागमनविचारपूर्वकवैराग्यनिरूपणम्, ...	३	१	१३५
पूर्वभागेण त्वंपदार्थस्योत्तरभागेण च तत्पदार्थस्य च शोधनम्, ...	३	२	१७७
सगुणविद्यासु गुणोपसंहारस्य, निर्गुणे ब्रह्मण्यपुनरुक्तपदोपसंहारस्य च निरूपणम्, ...	३	३	२४५
निर्गुणज्ञानस्य बहिरङ्गसाधनभूतानामाश्रमयज्ञादीनामन्तरङ्गसाधनभूतानां च शमदमश्रवणमननादीनां निरूपणम्, ...	३	४	३९१
श्रवणाद्यावृत्त्या निर्गुणमुपासनया सगुणं वा ब्रह्म साक्षात्कृतवतो जीवतः पुण्यपापलेपविनाशलक्षणाया मुक्तेरभिधानम्, ...	४	१	४५७
म्रियमाणस्योत्क्रान्तिप्रकारदर्शनम्, ...	४	२	४९९
सगुणब्रह्मविदो मृतस्योत्तरमार्गाभिगमनम्	४	३	५२२
पूर्वभागेण निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तेः, उत्तरभागेण च सगुणब्रह्मविदो ब्रह्मलोकस्थितेर्निरूपणम्, ...	४	४	५५२

अथ व्यासाधिकरणार्थदर्शनं निर्घण्टपत्रम् ।

अविरोधाख्यद्वितीयाध्यायस्य तृतीयपादे ।

प्रतिपाद्यविषयाः ।	सूत्राङ्काः ।	अधि० ।	पृष्ठाङ्काः ।
वैदान्तवादिमत आकाशस्यानित्यत्वकथनम्, ...	१-७	१	१

प्रतिपाद्यविषयाः ।	सूत्राङ्काः ।	अधि० ।	पृष्ठाङ्काः ।
स्वरूपवतो ब्रह्मणो वायोरुत्पत्तिकथनम्, ...	८	२	२०
सद्रूपस्य ब्रह्मणोऽजन्यत्वं जगज्जनकत्वं च, ...	९	३	२२
कार्यकारणयोरभेदेन वायुभूतस्य ब्रह्मणस्तेजःसृष्टिः,	१०	४	२४
वेदोक्ततेजोरूपब्रह्मणो जलोत्पत्तिसिद्धिः,....	११	५	२७
छान्दोग्योपनिषदुक्तजलोत्पन्नान्नशब्दस्य पृथिव्यर्थकत्वम्,	१२	६	२८
पूर्वपूर्वकार्योपाधिकाद्ब्रह्मण उत्तरोत्तरकार्योत्पत्तिसिद्धिः,	१३	७	३०
प्रलयकाले पृथिव्यादीनां विपरीतक्रमकल्पनम्, ...	१४	८	३२
प्राणादीनां भूतेष्वन्तर्भावान्न तेषां सृष्टिक्रमभङ्गः, ...	१५	९	३४
वपुषो जन्ममरणयोर्मुख्यत्वेन जीवस्यैतयोर्भोक्तृत्वम्,	१६	१०	३६
जीवजन्मन औपाधिकत्वेन तस्य वस्तुतो नित्यत्वम्,	१७	११	३८
जीवस्याचिद्रूपत्वखण्डनपूर्विका तच्चिद्रूपत्वसिद्धिः,	१८	१२	४३
जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्,	१९-३२	१३	४६
जीवस्याकर्तृत्वनिरसनपूर्वकं तत्कर्तृत्वप्रतिपादनम्,	३३-३९	१४	६४
जीवकर्तृत्वस्याध्यस्तत्वेनावास्तविकत्वम्, ...	४०	१५	६८
जीवस्येश्वरप्रवृत्तत्वेन न रागप्रवृत्तत्वम्, ...	४१-४२	१६	७२
औपाधिककल्पनैर्जीवेशयोर्जीवानां च परस्परं व्यवहारव्यवस्था	४३-५३	१७	८०

उक्ताध्यायस्य चतुर्थपादे ।

इन्द्रियाणामनादित्वनिराकरणपूर्वकं तेषामात्मसमुत्पन्नत्वम्	१-४	१	९५
इन्द्रियाणामेकादशसंख्याकत्वस्य वेदान्तसंमतत्वम्,	५-६	२	१०३
सांख्यसंमतेन्द्रियसर्वगत्वनिराकरणपूर्वकं तेषां परिच्छिन्नत्वकथनम्, ...	७	३	११०
प्राणस्यानादित्वखण्डनपूर्वकं तदुत्पत्तिसमाधानम्....	८	४	१११
प्राणवायोः स्वतन्त्रताकथनम्, ...	९-१२	५	११३
प्राणस्य समष्टिरूपेणाऽऽधिदैविकी विभुताऽऽध्यात्मिकी तु तस्याल्पताऽदृश्यता चेन्द्रियवदिति, ...	१३	६	१२०
इन्द्रियगणस्य देवताविशेषाधीनत्वकथनम्, ...	१४-१६	७	१२१
विलक्षणत्वेन प्राणादिन्द्रियाणां पृथक्त्वम्, ...	१७-१९	८	१२५

प्रतिपाद्यविषयाः ।	सूत्राङ्काः ।	अधि० ।	पृष्ठाङ्काः ।
सर्वजगत्सर्जने जीवस्याशक्तत्वादीशस्यैव सर्वशक्तिमत्त्वात्तस्यैव तन्निर्मातृत्वम्, ...	२०-२२	९	१२९

इति द्वितीयोऽध्यायः ॥

साधनाख्यतृतीयाध्यायस्य प्रथमपादे ।

जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम्	१-७	१	१३५
कर्मान्तरैः सानुशयस्य जीवस्य लोकान्तरारोहणम्,	८-११	२	१४९
पापिनां याम्यलोकगमनम्, ...	१२-२१	३	१६०
अवरोहिणो जीवस्य वियदादिसमानत्वम्, ...	२२	४	१६७
स्वर्गादवतरणकाले स्वर्ग-वृष्टि-पृथिवी-पुरुष-योषित्सु क्रमशो जनिष्यतो जीवस्य स्वर्गे वृष्टौ च जन्मनि त्वरा, तदितरेषु च जन्मनि विलम्ब इति, ...	२३	५	१६९
सस्यादौ जीवस्य न मुख्यजन्म किंतु संश्लेषमात्रमिति,	२४-२७	६	१७१

उक्ताध्यायस्य द्वितीयपादे ।

स्वप्नदृष्टेर्मिथ्यात्वकथनम्	१-६	१	१७७
सुषुप्तिस्थानरूपस्य हृत्स्थब्रह्मण एकत्वस्थापनम्,....	७-८	२	१८९
स्वभावस्थितस्यैव जीवस्य तस्मात्समुद्बोधो नापरस्येति, ...	९	३	१९७
सुषुप्त्या जाग्रदाद्यवस्थान्तरभिन्नत्वम्, ...	१०	४	२००
ब्रह्मणो निरूपभावस्य वेदान्तसंमतत्वम्, ...	११-२१	५	२०४
ब्रह्मणो निषेधातीतत्वेन सत्यत्वस्थापनम्, ...	२२-३०	६	२२२
ब्रह्मणोऽन्यस्यावस्तुत्वव्यवस्थापनम्, ...	३१-३७	७	२३३
कर्मफलोत्पत्तिं प्रतीश्वरस्यैव कर्तृत्वं नापूर्वस्येति, ...	३८-४१	८	२४१

उक्ताध्यायस्य तृतीयपादे ।

छान्दोग्यबृहदारण्यकश्रुत्युक्तयोः पञ्चाग्निविद्योपासनयोर्विध्यनुष्ठानफलसाम्येनैकत्वम्	१-४	१	२४५
गुणोपसंहारस्य कर्तव्यत्वम्, ...	५	२	२५७
छान्दोग्यकाण्वशाखयोरुद्गीथविद्याभेदकथनम्	६-८	३	२५८
ब्रह्मदृष्टेर्हेतुत्वेनाक्षरोद्गीथयोरेकत्वसंपादनम्	९	४	२६६

प्रतिपाद्यविषयाः ।	सूत्राङ्काः ।	अधि० ।	पृष्ठाङ्काः ।
वसिष्ठत्वादिगुणानामुपसंहर्तव्यत्वम्	१०	५	२७०
आनन्दसत्यत्वादीनां ब्रह्मगुणानां प्रतिपत्तिफलत्वेन सर्वशाखासु समानत्वाद्व्यवस्थापकविध्यभावाच्च तेषामुपसंहर्तव्यत्वम्, ...	११-१३	६	२७३
पुरुषज्ञानस्य संसारकारणाज्ञाननिवर्तकत्वात्पुरुषस्यैव वेद्यत्वम्, ...	१४-१५	७	२७६
ईश्वरस्यैवाऽऽत्मशब्दवाच्यत्वं न विराज इति, ...	१६-१७	८	२७९
काण्वच्छान्दोग्यषष्ठयोर्द्वयोर्वस्त्वेकत्वम्, ...	१८	९	२८७
प्राणोपासनं प्रति प्राणविद्याप्राप्तयोरनग्नताबुद्ध्याच मनयोरनग्नताबुद्धेरेव विधेयत्वम्, ...	१९	१०	२९२
काण्वानामग्निरहस्यब्राह्मणबृहदारण्यकयोः पठितायाः शाण्डिल्यविद्याया एकविधात्वम्, ...	२०-२२	११	२९४
अहरित्यादित्यगतस्याहमित्यक्षिगतस्य च वेद्यपुरुषस्यैकत्वेऽपि स्थानविशेषे तन्नामविशेषस्य युक्तत्वम्, ...	२३	१२	२९८
विद्यैकत्वाभावात्संभृत्यादीनां गुणानां शाण्डिल्यविद्यादिष्वनुपसंहार्यत्वम्	२४	१३	३००
तैत्तिरीयकताण्डिनोः पुरुषविद्यायाः पृथक्त्वम्	२५	१४	३०३
वेदमन्त्रप्रवर्ग्यादीनां विद्यानङ्गत्वम्,....			
अर्थवादत्वेन पापपुण्ययोरुपायनस्य हानावुपसंहर्तव्यत्वम्.... .... (१ वर्णकम्) पापपुण्यविधूननस्य हानार्थकत्वमेव न चालनार्थकत्वम् .... (२ वर्णकम्)	....	२६-२७	१५	३११
मरणात्प्रागुपास्ये साक्षात्कृते सुकृतदुष्कृतक्षयः,....	....	२७-२८	१६	३१८
उपासकस्यैवार्चिरादिमार्गो न ज्ञानिन इत्यस्य व्यवस्था, ...	२९-३०	१७	३२०
सर्वासूपासनासूत्तरमार्गविधानम्	३१	१८	३२२
ब्रह्मतत्त्वज्ञानिनां मुक्तिर्नियता न तु पाक्षिकीत्यस्य प्रतिपादनम्, ...	३२	१९	३२५
आत्मस्वरूपलक्षकाणां निषेधानां परस्परोपसंहर्तव्यत्वम्, ...	३३	२०	३३०

प्रतिपाद्यविषयाः ।	सूत्राङ्काः ।	अधि० ।	पृष्ठाङ्काः ।
ऋतं पिबन्ताविति द्वा सुपर्णाविति च मन्त्रयोर्वेद्यै-कत्वम्, ...	३४	२१	३३३
एकशाखास्थयोरुषस्तकहोलयोर्ब्राह्मणयोर्विद्यैक्यप्र-तिपादनम्, ...	३५-३६	२२	३३५
उपासनार्थं पृथक्त्वेनोपास्यस्य द्वैधज्ञानम्, ...	३७	२३	३३७
सत्यविद्याया एकत्वप्रतिपादनम्, ...	३८	२४	३३९
दहराकाशहार्दाकाशयोरुपसंहर्तव्यत्वम्, ...	३९	२५	३४२
उपासकस्य भोजने प्राणाहुतिलोपापत्तिः, ...	४०-४१	२६	३४४
उद्गीथकर्माङ्गीभूतदेवतोपासनाया अनियतत्वम्	४२	२७	३४९
संवर्गविद्योक्ताधिदैववाय्वध्यात्मप्राणयोरनुचिन्तनस्य पृथक्त्वम्, ...	४३	२८	३५३
मनश्चिदादीनां स्वतन्त्रविद्यात्वस्वीकारः,....	४४-५२	२९	३५९
भौतिकस्याऽऽत्मत्वनिराकरणपूर्वकतदन्यस्याऽऽत्मत्व-प्रतिपादनम्, ...	५३-५४	३०	३७०
ऐतरेयगतोक्थोपासनायां पृथिव्यादिदृष्टेः कौषीत-क्यामपि समानत्वम्, ...	५५-५६	३१	३७५
विराड्रूपवैश्वानरस्य कृत्स्नस्यैव ध्यातव्यत्वं न तदं-शस्य इति	५७	३२	३७९
अक्षरशाण्डिल्यदहरादिविद्यानां वेद्यब्रह्माभिन्न-त्वेन भिन्नत्वम्,....	५८	३३	३८२
आत्मनः सगुणोपासनायामेकस्य द्वयोर्बहूनां चोपा-सनानां वैकल्पिकनियमकथनम्, ...	५९	३४	३८५
विकल्पेन समुच्चयेन वा प्रतीकोपासनाया ऐच्छिकत्वम्,	६०	३५	३८६
विकल्पसमुच्चययोर्यथाकाम्यम्, ...	६१-६६	३६	३८७

उक्ताध्यायस्य चतुर्थपादे ।

आत्मज्ञानस्य स्वतन्त्रत्वं न ऋत्वर्थत्वम्	१-१७	१	३९१
ऊर्ध्वरेतोरूपाश्रमाणामस्तित्वव्यव-स्थापनम् .... (१ वर्णकम्)	१८-२०	२	४०५
लोककामिनामाश्रमिणां ब्रह्मनिष्ठा-नर्हत्वम् .... (२ वर्णकम्)			
उद्गीथावयवस्योंकारस्य ध्येयत्वम्	२१-२२	३	४१४

प्रतिपाद्यविषयाः ।	सूत्राङ्काः ।	अधि० ।	पृष्ठाङ्काः ।
औपनिषदाख्यानानां विद्यास्तावकत्वम्	२३-२४	४	४१७
आत्मबोधस्य कर्मानपेक्षत्वम्	२५	५	४१९
विद्यायाः स्वोत्पत्तौ कर्मसापेक्षत्वम्, ...	२६-२७	६	४२०
आपदि सर्वान्नाभ्यनुज्ञानम्....	२८-३१	७	४२४
विद्यार्थानामाश्रमधर्माणां च यज्ञादीनां सकृदनुष्ठानम्	३२-३५	८	४२८
अनाश्रमिणो ज्ञानसंभावनम्, ...	३६-३९	९	४३२
आश्रमिणामवरोहाभावनिरूपणम्,....	४०	१०	४३४
भ्रष्टोर्ध्वरेतसः प्रायश्चित्तसद्भावः, ...	४१-४२	११	४३८
भ्रष्टोर्ध्वरेतसः प्रायश्चित्तस्याऽऽमुष्मिकशुद्धिजनकत्वं तादृशशुद्धिमतो व्यवहारानर्हत्वं च, ...	४३	१२	४४०
उपासनस्य ऋत्विक्कर्मत्वम्,....	४४-४६	१३	४४१
मौनस्य विधेयत्वम्,....	४७-४९	१४	४४३
बाल्यस्य भावशुद्धित्वं न वयःकामचारोभयत्वम्,....	५०	१५	४४७
इह वा जन्मान्तरे वा ज्ञानोत्पत्तिरिति ज्ञानोत्पत्तेः पाक्षिकत्वम्, ...	५१	१६	४४९
सालोक्यादिमुक्तीनां जन्यत्वेन सातिशयत्वं निर्वाणमुक्तेश्च निरतिशयत्वम्	५२	१७	४५३
इति तृतीयोऽध्यायः ॥			३०

अथ फलाख्यचतुर्थाध्यायस्य प्रथमपादे ।

श्रवणादीनामावर्तनीयत्वम्,....	१-२	१	४५७
ज्ञाचा जीवेन स्वात्मतया ब्रह्मणो ग्राह्यत्वम्	३	२	४६५
प्रतीकेऽहंदृष्ट्यभावः,....	४	३	४६९
अब्रह्मणि प्रतीके ब्रह्मधियः कर्तव्यत्वम्,....	५	४	४७०
कर्माङ्गेष्वादित्यादिदृष्टीनां कर्तव्यत्वम्	६	५	४७४
उपासनायामासनस्य नियतत्वम्, ...	७-१०	६	४७९
ध्यानसाधनस्यैकाग्र्यस्य प्रधानत्वेन दिग्देशकालानामनियमः, ...	११	७	४८१
उपास्तीनामामरणमावृत्तिः,....	१२	८	४८३
ज्ञानिनः पापलेपाभावः, ...	१३	९	४८५
ज्ञानिनः पुण्यलेपाभावः, ...	१४	१०	४८९

प्रतिपाद्यविषयाः ।	सूत्राङ्काः ।	अधि० ।	पृष्ठाङ्काः ।
संचितयोरिवाऽऽरब्धयोः पुण्यपापयोर्ज्ञानोदयसमये विनाशाभावः, ...	१५	११	४९०
अग्निहोत्रादिनित्यकर्मणो विद्योपयोग्यंशस्याविनाशः,	१६-१७	१२	४९३
सोपासनस्य निरुपासनस्य च नित्यकर्मणस्तारतम्येन विद्यासाधनत्वम्, ...	१८	१३	४९६
अधिकारिणां मुक्तिसङ्गावः, ...	१९	१४	४९७
उक्ताध्यायस्य द्वितीयपादे ।			
वागादीनां मनसि वृत्तिप्रविलयो न स्वरूपेण	१-२	१	४९९
मनसः प्राणे वृत्त्या प्रविलयः	३	२	५०१
प्राणस्य जीवे लयानन्तरं पुनर्भूतेषु लयः,....	४-६	३	५०३
ज्ञान्यज्ञानिनोरुत्क्रान्तेरपि साम्यम्	७	४	५०६
तेजःप्रभृतीनां भूतानां परमात्मनि वृत्त्या लयः, ...	८-११	५	५०८
देहादेव प्राणोत्क्रान्तेर्निषेधः, ...	१२-१४	६	५१०
तत्त्वज्ञानिनो वागादीनां परमात्मनि लयः	१५	७	५१४
तत्त्वविदो वागादीनां निःशेषेण परमात्मनि लयः	१६	८	५१५
उपासकस्योत्क्रान्तेर्विशेषवत्त्वम्	१७	९	५१६
निशायामपि मृतानां रश्मिप्राप्तिः,....	१८-१९	१०	५१८
दक्षिणायनमृतस्योपासकस्य ज्ञानफलप्राप्तिः, ...	२०-२१	११	५२०
उक्ताध्यायस्य तृतीयपादे ।			
अर्चिरादिकस्य ब्रह्मलोकमार्गस्यैकत्वम्, ...	१	१	५२२
संवत्सरादित्ययोर्मध्ये देवलोकवायुलोकौ संनिवेशयितव्यौ, ...	२	२	५२६
वरुणादीनां संनिवेशादर्चिरादिमार्गस्य व्यवस्थापितत्वम्, ...	३	३	५२९
अर्चिरादीनामातिवाहिकत्वम्, ...	४-६	४	५३०
उत्तरमार्गेण कार्यब्रह्मगमनम्, ...	७-१४	५	५३४
प्रतीकोपासकानां ब्रह्मलोकाप्रापणम्, ...	१५-१६	६	५४९
उक्ताध्यायस्य चतुर्थपादे ।			
मुक्तिरूपस्य वस्तुनः पुरातनत्वम्,....	१-३	१	५५२
मुक्तस्य ब्रह्मणोऽभिन्नत्वम्, ...	४	२	५५५

प्रतिपाद्यविषयाः ।	सूत्राङ्काः ।	अधि० ।	पृष्ठाङ्काः ।
मुक्तस्वरूपभूतस्य ब्रह्मणो युगपत्सविशेषत्वनिर्विशेषत्वे, ...	५-७	३	५५६
अर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तस्योपासकस्य भोग्यवस्तूनां सृष्टौ मानससंकल्पस्यैव हेतुत्वम्	८-९	४	५५८
एकस्यापि पुरुषस्य देहभावाभावयोरैच्छिकत्वम्	१०-१४	५	५६०
सर्वेषां देहानां सात्मकत्वम्....	१५-१६	६	५६३
ब्रह्मलोकगतानामुपासकानां जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यसिद्धिः, ...	१७-२२	७	५६६

इति चतुर्थोऽध्यायः ॥

॥ समाप्तमिदं व्यासाधिकरणार्थदर्शननिर्घण्टपत्रकम् ॥

ॐ तत्सद्ब्रह्मणे नमः ।

श्रीमद्द्वैपायनप्रणीतब्रह्मसूत्राण्यानन्दगिरिकृतटीकासंव-लितशांकरशारीरकभाष्यसमेतानि ।

(अविरोधाख्यद्वितीयाध्यायस्य तृतीयः पादः ।)

(पञ्चमहाभूतश्रुतीनां जीवश्रुतीनां च परस्परविरोधपरिहारः ।)

(वेदान्तवादिमत आकाशस्यानित्यत्वकथनम्, अधि० १)

न वियदश्रुतेः ॥ १ ॥

वेदान्तेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यन्ते । केचिदाकाशस्योत्पत्तिमामनन्ति केचिन्न तथा केचिद्वायोरुत्पत्तिमामनन्ति केचिन्न । एवं जीवस्य प्राणानां च । एवमेव क्रमादिद्वारकोऽपि[1] विप्रतिषेधः श्रुत्यन्तरेषु लक्ष्यते । विप्रतिषेधाच्च परपक्षाणामनपेक्षितत्वं[2] स्थापितं[3] तद्वत्स्वपक्षस्यापि विप्रति-

अतिक्रान्ते पादे समन्वयस्थापनाय परपक्षाणां भ्रान्तिमूलत्वमुक्तम् । इदानीमपि समन्वयस्थित्यै भूतभोक्तृविषयसृष्ट्यादिश्रुतिविगानं निराक्रियते । तत्रानुत्पत्तिप्रसङ्गेन वियतोऽपि तदसंभवमाशङ्क्य परिहरन्नादावेकदेशिमतमाह—**न वियदिति** । आकाशोत्पत्त्यनुत्पत्तिश्रुत्योर्मिथो विरोधादप्रामाण्ये शङ्किते तन्निरासेन समन्वयदृढीकरणादस्य पादादिसंगतिरित्यभिप्रेत्य पूर्वोत्तरपादसंगतिं व्यक्तीकुर्वन्नापाततः सृष्टिश्रुतिविमतिं दर्शयति—**वेदान्तेष्विति** । तत्र तत्रेति सृष्टिप्रकरणोक्तिः । तासां भिन्नप्रस्थानत्वमेव प्रकटयन्प्रथममाकाशोत्पत्त्यनुत्पत्तिभ्यां तैत्तिरीयच्छान्दोग्यश्रुत्योर्विमतिमाह—**केचिदिति** । नभोवद्वायोरप्युत्पत्त्यनुत्पत्तिभ्यामपि तयोरेवास्ति विमतिरित्याह—**तथेति** । न केवलं भूतविषयसृष्टिश्रुतिविमतिरपि तु भोक्तृभोगोपकरणविषयाऽपि साऽस्तीत्याह—**एवमिति** । यथा नभसो वायोश्चोत्पत्तिमधीयते तैत्तिरीयास्तथा जीवस्य सर्व एत आत्मानो व्युच्चरन्तीति जन्माऽऽमनन्ति माध्यंदिना नैवमितरे । तथा प्राणानाम् " एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च " इत्युत्पत्तिं पठन्त्याथर्वणा नैवमन्ये । अतोऽस्ति धर्मिणो विमतिरित्यर्थः । धर्मद्वाराऽपि विगानमाह—**एवमेवेति** । क्रमादीत्यादिशब्देनाक्रमसंख्ये गृह्येते । श्रुत्यन्तरेषु श्रुतिविशेषेष्विति यावत् । सृष्टिश्रुतीनामस्वार्थपरत्वान्मिथो विरोधेऽपि तात्पर्यवद्वाक्यप्रामाण्यादस्मत्पक्षसिद्धिरित्याशङ्क्याऽऽह—**विप्रतिषेधाच्चेति** । सर्वत्र परपक्षेषु स्वोक्तिविरोधाभावादत्र श्रुतिविरोधो विवक्षितः ।

१ क. °को वि° । २ ज. °पेक्षत्वं । ३ क. °क्षित्वं । ४ क. ख. धर्मिणि । ५ क. °रोधवद° ।

षेधादेवानपेक्षितत्वमाशङ्क्येतेत्यतः सर्ववेदान्तगतसृष्टिश्रुत्यर्थ-निर्मलत्वाय परः प्रपञ्च आरभ्यते। तदर्थनिर्मलत्वे च फलं यथोक्ताशङ्कानिवृत्तिरेव। तत्र प्रथमं तावदाकाशमाश्रित्य चिन्त्यते किमस्याऽऽकाशस्योत्पत्तिरस्युत नास्तीति। तत्र तावत्प्रतिपाद्यते "न वियदश्रुतेः" इति। न खल्वाकाशमुत्पद्यते। कस्मात्। अश्रुतेः। न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति। छान्दोग्ये हि "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" [छा० ६-२-१] इति सच्छब्दवाच्यं ब्रह्म प्रकृत्य "तदैक्षत" "तत्तेजोऽसृजत" [छा० ६-२-३] इति च पञ्चानां महाभूतानां मध्यमं तेज आदि

स्वपक्षो ब्रह्मकारणवादः। विप्रतिषेधश्रुतीनामेवान्योन्यमिति द्रष्टव्यम्। सृष्टिश्रुतिष्वापातिकविरोधोक्त्या तत्फलमुक्त्वाऽनन्तरपादावतारयति—इत्यत इति। तदर्थनिर्मलत्वमर्थाभासनिवृत्त्या सम्यगर्थधीः। प्रपञ्चोऽनन्तरपादद्वयम्। ननु मुमुक्षूणामुक्तसमन्वयादेव तत्त्वधीलाभात्कृतमेतन्निर्मलत्वेनेति तत्राऽऽह—तदर्थेति। वेदैकदेशस्य विरोधादप्रामाण्ये तदेकदेशान्तरस्यापि तथैवाप्रामाण्यशङ्कया तत्समन्वयात्तत्त्वज्ञानासिद्धेर्ब्रह्मकारणपक्षस्यानपेक्षणीयत्वशङ्कानिवृत्तिस्तदर्थनिर्मलत्वे फलतीत्यर्थः। इत्थं पादद्वयसंबन्धे स्थिते भूतभोक्तृसृष्ट्यादिश्रुतिविवादापवादार्थे च तृतीये पादे सत्याद्याधिकरणतात्पर्यमाह—तत्रेति। आकाशोत्पत्त्यनुत्पत्तिवादिवाक्ययोरनेकवाक्यत्वैकवाक्यत्वाभ्यां मिथो विरोधसंदेहे विरोधनिरासेनाविरोधं संसाध्य समन्वयदार्ढ्यमत्र विवक्षितम्। सर्वेषु चाधिकरणेषु पादद्वयगतेषु पूर्वपक्षेषु श्रुतीनां विरोधादप्रामाण्यं सिद्धान्ते तासामविरोधात्प्रामाण्यं फलम्। अत्र चाऽऽद्येऽधिकरणे श्रुत्योर्मिथो विरोधादप्रामाण्ये वियदादिकारणे ब्रह्मणि समन्वयासिद्धिरेकत्रान्यत्र तयोरेकवाक्यतया विरोधाभावात्प्रामाण्यसिद्धेस्तत्सिद्धिरिति भावः। पादद्वये पूर्वपक्षे श्रुतीनां मिथो विरोधः सिद्धान्ते त्वविरोधः साध्यते। तेन विरोधाविरोधाभ्यां संदेहे वाच्ये गौणवाद्यभिप्रायेणाऽऽह—किमस्येति। तैत्तिरीयच्छान्दोग्यश्रुतिभ्यां संदिह्य गौणवाद्यभिप्रायं प्रकटयितुं सूत्रमादत्ते—तत्रेति। तदक्षराणि व्याचष्टे—न खल्विति। तैत्तिरीये वियदुत्पत्तिश्रुतेरन्यत्र तदश्रुतेर्मिथो विरोधे पर्यवसानमाशङ्क्य वक्ष्यमाणप्रमाणविरोधाज्जन्मश्रुतेर्गौणत्वात्तेजोमुखैव सृष्टिरिति कुतो विरोधाशङ्केत्याशयेनाऽऽह—छान्दोग्ये हीति। आकाशस्य जन्माश्रवणेऽपि कथमनुमानसिद्धा तदुत्पत्तिरपह्नूयेतेत्याशङ्क्याऽऽह—

---

१ क. ज. °पेक्षत्व°। २ झ.° थोक्तश°। ३ झ, ट, °ति प°। ४ क, ज, झ, ञ, ट, आदिं। ५ ठ, ड, °त्याद्यधि°। ६ ठ, ड, °नां वि°।

(वेदान्तवादिमत आकाशस्यानित्यत्वकथनम्, अधि० १)

कृत्वा त्रयाणां तेजोबन्नानामुत्पत्तिः श्राव्यते । श्रुतिश्च नः प्रमाणमतीन्द्रियार्थविज्ञानोत्पत्तौ । न चात्र श्रुतिरस्त्याकाशस्योत्पत्तिप्रतिपादिनी । तस्मान्नाऽऽकाशस्योत्पत्तिरिति ॥ १ ॥

अस्ति तु ॥ २ ॥

तुशब्दः पक्षान्तरपरिग्रहे। मा नामाऽऽकाशस्य च्छान्दोग्ये भूदुत्पत्तिः श्रुत्यन्तरे त्वस्ति । तैत्तिरीयका हि समामनन्ति–" सत्यं ज्ञानमनन्तं ब्रह्म " [तै० २-१-१] इति प्रकृत्य " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " [तै० २-१-१] इति । ततश्च श्रुत्योर्विप्रतिषेधः क्वचित्तेजःप्रमुखा सृष्टिः क्वचिदाकाशप्रमुखेति । नन्वेकवाक्यताऽनयोः श्रुत्योर्युक्ता । सत्यं सा युक्ता न तु साऽवगन्तुं शक्यते । कुतः । " तत्तेजोऽसृजत " [छा० ६-२-३] इति सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन संबन्धानुपपत्तेः 'तत्तेजोऽसृजत' ' तदाकाशमसृजत ' इति । ननु सकृच्छ्रुतस्यापि कर्तुः कर्तव्यद्वयेन संबन्धो दृश्यते। यथा सूपं पक्त्वौदनं पचतीत्येवं तदाकाशं सृष्ट्वा तत्तेजोऽसृजतेति योजयिष्यामि । नैवं युज्यते । प्रथमजत्वं हि च्छान्दोग्ये तेजसोऽवगम्यते तैत्ति-

---

श्रुतिश्चेति । तर्हि श्रुतिरेवास्तीत्याशङ्क्य सा गौणीति सूचितमित्याह–न चेति । तैत्तिरीयश्रुतेर्गौणत्वादन्यस्यामुख्यत्वान्न मिथो विरोधोऽस्तीत्युपसंहरति—तस्मादिति ॥ १ ॥

पूर्वपक्षयति—अस्ति त्विति । सूत्रं व्याकुर्वन्पूर्वपक्षं विवृणोति—तुशब्द इति । श्रुत्यन्तरे त्वाकाशस्योत्पत्तिरस्तीत्युक्तं तदेव व्यनक्ति—तैत्तिरीयका हीति । सर्वनामार्थज्ञापनार्थं पूर्ववाक्यानुक्रमणम् । श्रुत्योराकाशोत्पत्त्यनुत्पत्तिवादित्वे फलितमाह–ततश्चेति । प्रामाण्यस्यौत्सर्गिकत्वाद्विरोधेन प्रामाण्यायोगादेकवाक्यतया कथंचित्प्रामाण्यमेष्टव्यमिति शङ्कते—नन्विति । संभवत्येकवाक्यत्वे तद्भेदो नेष्यते मिथो विरुद्धयोः श्रुत्योर्नैकवाक्यतेति परिहरति—सत्यमिति । तदाकाशं सृष्ट्वा तेजोऽसृजतेत्येकवाक्यत्वं ज्ञातुं शक्यमिति शङ्कते—कुत इति । छान्दोग्यानुसारेणैकवाक्यत्वायोगं दर्शयति—तत्तेज इति । एकवाक्यतावादी दृष्टान्तेन शङ्कते—नन्विति । विप्रतिषेधवादी दूषयति—नैवमिति । किमिह व्यापारः सूपादिपाकवत्किं वा युगपदेकस्माद्बीजान्मूलाङ्कुरोत्पत्तिवत्तदक्रमो नाऽऽद्यो द्वयोः प्रथमजश्रुतिविरोधादित्याह—प्रथमेति ।

---

१ क. ज. °रीया हि । २ क. ज. °त्यं यु° । ३ क. °ते । स सृ° । ४ ज. ट. ° या स सृ° । ५ ङ. ञ. °ष्यामः । नै° । ६ ङ. °रीया ही° । ७ ख. ठ. ड. °धेनाप्रा° । ८ ठ. ड. °जत्वश्रु° ।

रीयके चाऽऽकाशस्य । न चोभयोः प्रथमजत्वं संभवति । एतेनेतरश्रुत्यक्षरविरोधोऽपि व्याख्यातः । " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " [तै० २-१-१] इत्यत्रापि तस्मादाकाशः संभूतस्तस्मात्तेजः संभूतमिति सकृच्छ्रुतस्यापादानस्य संभवनस्य च वियत्तेजोभ्यां युगपत्संबन्धानुपपत्तेः । वायोरग्निरिति च पृथगाम्नानात् ॥ २ ॥

अस्मिन्विप्रतिषेधे कश्चिदाह—

गौण्यसंभवात् ॥ ३ ॥

नास्ति वियत उत्पत्तिरश्रुतेरेव । या त्वितरा वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा " गौणी " भवितुमर्हति । कस्मात् । "असंभवात्"। न ह्याकाशस्योत्पत्तिः संभावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु । ते हि कारणसामग्र्यसंभवादा-

---

न द्वितीयः पाठक्रमात्क्रमसृष्टेरिष्टत्वादित्याह—**न चेति** । छान्दोग्यानुसारेणैकवाक्यतायोगमुक्त्वा तैत्तिरीयानुसारेणापि तदयोगमाह—**एतेनेति** । एतच्छब्दार्थमेव स्फुटयति—**तस्मादित्यादिना** । इतश्च नैकवाक्यतेत्याह—**वायोरिति** । छान्दोग्ये हि सदुपादानं तेजसो निर्दिश्यते । तैत्तिरीये त्वात्मनः सच्छब्दवाच्यादन्यो वायुस्तदुपादानमाम्नायते तन्नैकवाक्यतेत्यर्थः ॥ २ ॥

प्रथमजत्वेनाऽऽकाशतेजसोरसहायत्वे सिद्धे तद्विरोधेन ससहायत्वकल्पनायोगाद्भूतानि विकल्पानुपपत्तेरिदानींतनसर्गवद्भूतसर्गस्यापि तथात्वानुमाने सर्गभेदेनापि व्यवस्थासिद्धेर्मिथो विरुद्धतया प्रकृतश्रुत्यप्रामाण्यान्न ब्रह्म कारणमिति पूर्वपक्षमनुभाष्य गौणवादिनोऽभिप्रायमाविष्कर्तुं सूत्रान्तरमवतारयति—**अस्मिन्निति** । ये त्वतिक्रान्तसूत्रद्वयं मतद्वयमुपन्यस्य विप्रतिषेधमभिदधत्पूर्वपक्षसंगतमिति व्याचक्षते तान्व्यावर्त्य गौणवाद्येव पूर्वत्रापि वियदनुत्पत्तिवादीति प्रत्यभिज्ञापयन्व्याचष्टे—**नास्तीति** । तदुत्पत्तिश्रुतेरपि दर्शितत्वाद्विप्रतिषेधे कः समाधिरित्याशङ्क्याऽऽह—**या त्विति** । तेजःप्राथम्यानुरोधेनाऽऽकाशस्योत्पत्तिः प्राथम्यं चेति द्वयबाधनमयुक्तमाकाशप्राथम्यानुरोधेन तेजसि प्राथम्यस्यैव बाधनमिति मन्वानश्चोदयति—**कस्मादिति** । न वयं तेजःप्राथम्यमनुरुन्धाना द्वयबाधं शिष्मः किंतु मानान्तरविरोधादित्याह—**असंभवादिति** । वैशेषिकाधिकरणे तन्मतस्य निरस्तत्वात्तदवष्टम्भेन कथमसंभवकथेत्याशङ्क्याऽऽह—**न हीति** । कणभुगभिप्रायमेव प्रकटयति—**ते हीति** । आकाशं नोत्प-

---

१ ङ. ञ. °ल्यन्तर° । २ ज. °न्यभावा° । ३ झ. °न्तराधि° ।

(वेदान्तवादिमत आकाशस्यानित्यत्वकथनम्, अधि० १)

काशस्योत्पत्तिं वारयन्ति । समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वमुत्पद्यमानं समुत्पद्यते । द्रव्यस्य चैकजातीयकमनेकं च द्रव्यं समवायिकारणं भवति । न चाऽऽकाशस्यैकजातीयकमनेकं च द्रव्यमारम्भकमस्ति । यस्मिन्समवायिकारणे सत्यसमवायिकारणे च तत्संयोग आकाश उत्पद्येत। तदभावात्तु तदनुग्रहमवृत्तं निमित्तकारणं दूरापेतमेवाऽऽकाशस्य भवति[1] । उत्पत्तिमतां च तेजःप्रभृतीनां पूर्वोत्तरकालयोर्विशेषः संभाव्यते प्रागुत्पत्तेः[2] प्रकाशादिकार्यं न बभूव पश्चाच्च भवतीति । आकाशस्य पुनर्न पूर्वोत्तरकालयोर्विशेषः संभावयितुं शक्यते । किं हि प्रागुत्पत्तेरनवकाशमसुषिरमच्छिद्रं बभूवेति शक्यतेऽध्यवसातुम्[3] । पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिः। तस्माद्यथा लोक आकाशं कुर्वाकाशो जात इत्येवंजातीयको

द्यते कारणैस्त्रयशून्यत्वादात्मवदित्यर्थः । हेतुसमर्थनार्थं सामान्यन्यायमाह—**समवायीति** । परप्रसिद्धिद्योतनार्थो हिशब्दः । तत्र स्वानभ्युपगमं दर्शयितुं किलेति। आकाशस्यापि तर्हि त्रीणि कारणानि भविष्यन्तीत्याशङ्क्य समवायिकारणविशेषस्वरूपमाह—**द्रव्यस्येति** । तदभावमाकाशे दर्शयति—**न चेति** । समवायिकारणे निरस्ते सत्यसमवायिकारणमपि निरस्तमेवेत्याह—**यस्मिन्निति** । कारणद्वयनिरासेन निमित्तकारणनिरसनं सुकरमित्याह—**तदभावात्त्विति** । कारणशून्यत्वादाकाशस्यानुत्पत्तिमनुमाय तत्रैवानुमानान्तरमाह—**उत्पत्तिमतां चेति** । ये जायन्ते तेषामनुभवार्थक्रिये प्रागुत्पत्तेर्नोपलभ्येते यथा तेजःप्रभृतीनाम् । न चाऽऽकाशस्य तादृशो विशेषोऽस्ति तस्मात्तन्नोत्पद्यते कार्यलक्षणविकलत्वादात्मवदित्यर्थः । प्रकाशनं प्रकाशोऽनुभवः । आदिशब्देनार्थक्रिया गृह्यते । अभूत्वा भावित्वं हि कार्यलक्षणं तदाकाशस्यापि संभवतीति कथं हेतुसिद्धिरित्याशङ्क्याऽऽह—**आकाशस्येति** । तदेव स्फुट्यते—**किं हीति** । महाद्रव्याश्रयत्वयोग्यो देशोऽवकाशः । तद्विरुद्धद्रव्याश्रयत्वयोग्यं सुषिरम् । अणुद्रव्यतत्संयोगाश्रयत्वयोग्यं छिद्रम् । एतत्त्रयरहितं न किंचित्प्रागासीदिति विशेषणानामर्थः । किंचाऽऽकाशो न जायते विभुत्वान्निरवयवद्रव्यत्वादस्पर्शद्रव्यत्वाच्चाऽऽत्मवदित्यनुमानत्रयमाह—**पृथिव्यादीति** । उक्तानुमानानामुत्पत्तिश्रुतिविरोधमाशङ्क्य तस्या गौणत्वं सदृष्टान्तमुपसंहरति—**तस्मादिति** । आलोकादिवदाकाशस्य प्रदेश-

---

१ क. ज. भवेत् । २ ञ. °त्पत्तेराकां° । ३ ञ. °मशुषिं° । ४ ख. झ. ठ. °णशूं° ।

गौणः प्रयोगो भवति। यथा च घटाकाशः करकाकाशो गृहाकाश इत्येकस्याप्याकाशस्यैवंजातीयको भेदव्यपदेशो गौणो भवति। वेदेऽपि "आरण्यानाकाशेष्वालभेरन्" [शतप० १३-१-५-१५] इत्येवमुत्पत्तिश्रुतिरपि गौणी द्रष्टव्या ॥ ३ ॥

शब्दाच्च ॥ ४ ॥

शब्दः खल्वाकाशस्याजत्वं ख्यापयति यत आह " वायुश्चान्तरिक्षं चैतदमृतम् " [बृ० २-३-३] इति। न ह्यमृतस्योत्पत्तिरुपपद्यते। 'आकाशवत्सर्वगतश्च नित्यः' इति चाऽऽकाशेन ब्रह्म सर्वगतत्वनित्यत्वाभ्यां धर्माभ्यामुपमिमान आकाशस्यापि तौ धर्मौ सूचयति। न च तादृशस्योत्पत्तिरुपपद्यते। "स यथाऽनन्तोऽयमाकाश एवमनन्त आत्मा वेदितव्यः" इति चोदाहारणम् " आकाशशरीरं ब्रह्म " [तै० १-६-२] " आकाश आत्मा " [तै० १-७-१] इति च। न ह्याकाशस्योत्पत्तिमत्त्वे ब्रह्मणस्तेन विशेषणं संभवति नीलेनेवोत्पलस्य। तस्मान्नित्यमेवाऽऽकाशेन साधारणं ब्रह्मेति गम्यते ॥ ४ ॥

भेदवत्त्वान्मुख्यं जन्मेत्याशङ्क्य जन्मप्रयोजकप्रदेशभेदस्यापि गौणत्वमेवेत्याह—**यथा चेति**। लौकिकव्यपदेशस्य गौणत्वेऽपि वैदिकव्यपदेशस्य मुख्यत्वमेवेत्याशङ्क्याऽऽह—**वेदेऽपीति**। इतिशब्दादुपरिष्टाद्गौणो भेदव्यपदेशो भवतीति संबन्धः ॥ ३ ॥

न केवलमनुमानादाकाशस्याजत्वं किंतु श्रुतितोऽपीत्याह—**शब्दाच्चेति**। तद्व्याचष्टे—**शब्दः खल्विति**। अमृतत्वमेवात्र श्रूयते न त्वनुत्पत्तिरित्याशङ्क्याऽऽह—**न हीति**। श्रुतार्थापत्त्यन्तरमाह—**आकाशवदिति**। तथाऽपि कथमनुत्पत्तिस्तत्राऽऽह—**न चेति**। तदनुत्पत्तौ वाक्यमपि मानमित्याह—**स यथेति**। आदिमध्यावसानवैधुर्यमानन्त्यं तदाकाशस्याऽऽदिमत्त्वे नोपपद्येताऽऽत्मनोऽपि तत्प्रसङ्गादित्यर्थः। किंच नीलमुत्पलमितिवदाकाशेन ब्रह्मणो विशेषणं दृष्टं तदाकाशस्यानुत्पत्तिमत्त्वं साधयतीत्याह—**आकाशेति**। चकारादुदाहरणमित्यनुकृष्यते। आकाशस्योत्पत्तिमत्त्वेऽपि तेन ब्रह्मणो विशेषणत्वं किं न स्यादित्याशङ्क्य बहुव्रीहिणा तादात्म्यावगमान्नैवमित्याह—**न हीति**। शब्दसामर्थ्यसिद्धमुपसंहरति—**तस्मादिति** ॥ ४ ॥

---

१ क. ज. ञ. ट. °शो भ°। २ ञ. °तश्चाऽऽह। ३ ज. भवति।

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ९ ॥

इदं पदोत्तरं सूत्रम् । स्यादेतत् । कथं पुनरेकस्य संभूतशब्दस्य " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " [तै० २-१] इत्यस्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्तमानस्य मुख्यत्वं संभवत्याकाशे च गौणत्वमिति । अत उत्तरमुच्यते—"स्याच्चैकस्य" अपि संभूतशब्दस्य विषयविशेषवशाद्गौणो मुख्यश्च प्रयोगो " ब्रह्मशब्दवत् " । यथैकस्यापि ब्रह्मशब्दस्य " तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्म" [तै० ३-२] इत्यस्मिन्नधिकारेऽन्नादिषु गौणः प्रयोग आनन्दे च मुख्यः । यथा च तपसि ब्रह्मविज्ञानसाधने ब्रह्मशब्दो भक्त्या प्रयुज्यतेऽञ्जसा तु विज्ञेये ब्रह्मणि तद्वत् । कथं पुनरनुत्पत्तौ नभसः "एकमेवाद्वितीयम् [छा० ६-२-१] इतीयं प्रतिज्ञा समर्थ्यते । ननु नभसा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति । कथं च ब्रह्मणि विदिते सर्वं विदितं स्यादिति । तदुच्यते—एकमेवेति तावत्स्वकार्यापेक्षयोपपद्यते । यथा लोके कश्चित्कुम्भकारकुले पूर्वेद्युर्मृद्दण्डचक्रादीनि चोपलभ्यापरेद्युश्च नानाविधान्यमत्राणि प्रसारितान्युपलभ्य ब्रूयान्मृदेवैकाकिनी पूर्वेद्युरासीदिति,

---

संभूतशब्दमधिकृत्य संभाविताशङ्कामुच्छिनत्ति—**स्याच्चेति** । पदविषयचोद्योत्तरमिदं सूत्रमिति तात्पर्यमाह—**इदमिति** । तदेव चोद्यं दर्शयति—**स्यादेतदिति** । एकवाक्यस्थस्यैकस्य पदस्यैकस्मिन्नेव प्रकरणे यत्रानुवृत्तिस्तत्र मुख्यत्वं यत्र प्रयोगस्तत्र गौणतेत्ययुक्तमित्यर्थः । चोद्योत्तरत्वेन सूत्रमवतार्य व्याकरोति—**अत इति** । दृष्टान्तं व्याचष्टे—**यथेति** । दार्ष्टान्तिके संभूतशब्दस्यैकस्यैव मुख्यत्वगौणत्वे दृष्टान्ते तु शब्दभेदोऽस्तीति वैषम्यमित्याशङ्क्य प्रकरणाभेदे शब्दप्रवृत्तेरेकरूपत्वस्यौत्सर्गिकत्वेऽपि तदसंभवेन गौणत्वमुख्यत्वे दृष्टान्तदृष्टे तथाऽत्रापीत्येतावन्मात्रस्य विवक्षितत्वान्नैवमित्याह—**यथा चेति** । अद्वितीयश्रुतिविरोधादवधारणश्रुतिविरोधाच्चाऽऽकाशानुत्पत्तिरयुक्तेति शङ्कते—**कथमिति** । का पुनः श्रुत्योरनुपपत्तिरित्याशङ्क्याऽऽक्षेप्तैव ब्रूते—**नन्विति** । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधाच्चाऽऽकाशानुत्पत्तिरयुक्तेत्याह—**कथं चेति** । चोद्यद्वयं परिहरति—**तदुच्यत इति** । तत्रावधारणश्रुतेरुपपत्तिमाकाशानुत्पत्तिपक्षेऽपि दर्शयति—**एकमिति** । आपेक्षिकमवधारणमित्यत्र दृष्टान्तमाह—**यथेति** । कुलं गृहम् । अमत्राणि घट-

---

१ ङ. ङ्म जिं । २ क. ख. चोद्यं द्वं ।

स च तयाऽवधारणया मृत्कार्यजातमेव पूर्वेद्युर्नाऽऽसीदित्यभिप्रेयान्न दण्डचक्रादि तद्वदद्वितीयश्रुतिरधिष्ठात्रन्तरं वारयति । यथा मृदोऽमत्रप्रकृतेः कुम्भकारोऽधिष्ठाता दृश्यते नैवं ब्रह्मणो जगत्प्रकृतेरन्योऽधिष्ठाताऽस्तीति । न च नभसाऽपि द्वितीयेन सद्वितीयं ब्रह्म प्रसज्यते लक्षणान्यत्वनिमित्तं हि नानात्वम् । न च प्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति क्षीरोदकयोरिव संसृष्टयोर्व्यापित्वामूर्तत्वादिधर्मसामान्यात् । सर्गकाले तु ब्रह्म जगदुत्पादयितुं यतते स्तिमितमितरत्तिष्ठति तेनान्यत्वमवसीयते । तथा च " आकाशशरीरं ब्रह्म " [तै० १-६-२] इत्यादिश्रुतिभ्योऽपि ब्रह्माकाशयोरभेदोपचारसिद्धिः । अत एव च ब्रह्मविज्ञानेन सर्वविज्ञानसिद्धिः । अपि च सर्वं कार्यमुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणा चाव्यतिरिक्तदेशकालमेवाऽऽकाशं भवतीत्यतो ब्रह्मणा तत्कार्येण च विज्ञातेन सह विज्ञातमेवाऽऽकाशं भवति । यथा क्षीरपूर्णे घटे

शरावादीनि पात्राणि । तत्रापि कथमवधारणेत्याशङ्क्याऽऽह—**स चेति** । अन्यथा मृदादिप्रत्यक्षविरोधः स्यादिति भावः । प्रकृतेऽपि स्वकार्यापेक्षमवधारणमविरुद्धम् । तदकार्यं तु तदतिरिक्तमपि प्रागवस्थायामस्तु का हानिरित्याह—**तद्वदिति** । अवधारणश्रुतिवदद्वितीयश्रुतेरविरोधमाह—**अद्वितीयेति** । प्राप्त्यभावे किमर्थं तन्निवारणमित्याशङ्क्य प्राप्तिदर्शनपूर्वकं तन्निवारणमेव विवृणोति—**यथेति** । यदुक्तं नभसा द्वितीयेन सद्वितीयं ब्रह्म स्यादिति तत्राऽऽह—**न चेति** । नभश्चेद्वितीयं कथं तेन ब्रह्म सद्वितीयं नेत्याशङ्क्याऽऽह—**लक्षणेति** । शब्दवदाकाशमशब्दादिमद्ब्रह्मेत्यस्ति प्रस्तुतेऽपि लक्षणान्यत्वमित्याशङ्क्याऽऽह—**न चेति** । निरवयवत्वारूपत्वादिसंग्रहार्थमादिपदम् । लक्षणभेदाभावे कथं पृथक्त्वमनयोरित्याशङ्क्याऽऽह—**सर्गेति** । लक्षणानन्यत्वनिमित्ताभेदोपचारादद्वितीयत्वमित्युक्तेऽर्थे श्रुतिमनुग्राहिकामाह—**तथेति** । आकाश आत्मा खं ब्रह्मेत्याद्या श्रुतिरादिशब्दार्थः । लक्षणान्यत्वाभावेनाऽऽकाशस्य ब्रह्मानन्यत्वं हेतूकृत्य चोद्यान्तरमपाकरोति—**अत एवेति** । इतश्च ब्रह्मविज्ञानेन सर्वविज्ञानमविरुद्धमित्याह—**अपि चेति** । ब्रह्मणि तत्कार्ये च ज्ञाते तदेकदेशकालमाकाशमपि सहज्ञातमित्यत्र दृष्टान्तमाह—**यथेति** । दृष्टान्तेऽपि कथमन्यस्य ग्रहाद-

---

१ क. ज. °थाऽऽका° । २ झ. ट. °ह्मज्ञा° । ३ झ. सर्वका° । ४ क. °लमाका° । ५ क. °पूर्णघ° । ६ क °न्निराकर° ।

(वेदान्तवादिमत आकाशस्यानित्यत्वकथनम्, अधि० १)

कतिचिदब्बिन्दवः प्रक्षिप्ताः सन्तः क्षीरग्रहणेनैव गृहीता भवन्ति। न हि क्षीरग्रहणादब्बिन्दुग्रहणं परिशिष्यते। एवं ब्रह्मणा तत्कार्यैश्चाव्यतिरिक्तदेशकालत्वाद्गृहीतमेव ब्रह्मग्रहणेन नभो भवति। तस्माद्धाक्तं नभसः संभवश्रवणमिति ॥ ५ ॥

एवं प्राप्त इदमाह—

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

" येनाश्रुतꣳ श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम् " [छा० ६-१-३] इति " आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् " [बृ० ४-५-६] इति " कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति " [मुण्ड० १-१-३] इति " न काचन मद्धहिर्धा विद्याऽस्ति" इति चैवंरूपा प्रतिवेदान्तं प्रतिज्ञा विज्ञायते। तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्याद्यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्यात्। व्यतिरेके हि सत्येकविज्ञानेन सर्वं विज्ञायत इतीयं प्रतिज्ञा हीयेत। स चाव्यतिरेक एवमुपपद्यते यदि कृत्स्नं वस्तुजातमेकस्माद्ब्रह्मण उत्पद्येत। " शब्देभ्यश्च " प्रकृतिविकाराव्यतिरेकन्यायेनैव प्रतिज्ञा-

---

न्यस्य ग्रहणमित्याशङ्क्याऽऽह—न हीति। दृष्टान्ते निविष्टमर्थं दार्ष्टान्तिके योजयति—एवमिति। गौणवादी स्वमतमुपसंहरति—तस्मादिति ॥ ५ ॥

वियदुत्पत्तिश्रुतेर्गौणत्वात्तदनुत्पत्तिश्रुत्या विरोधाभावान्नाप्रामाण्यमिति गौणवादिमतमनूद्य सिद्धान्तयति—एवमिति। सूत्रं व्याकुर्वन्प्रतिज्ञास्वरूपमाह—येनेति। प्रतिवाक्यमितिशब्दोपादानं शाखाभेदख्यापनार्थम्। तस्या विवक्षितत्वसिद्ध्यर्थं विशिनष्टि—प्रतिवेदान्तामिति। सर्वस्य ब्रह्ममात्रत्वप्रयुक्त्या प्रतिज्ञानुपरोधं साधयति—तस्या इति। अत एव ब्रह्मविज्ञानेनेत्यादिना पूर्वोक्तन्यायेन व्यतिरेकेऽपि प्रतिज्ञा सिध्यति चेत्किमव्यतिरेकेणेत्याशङ्क्याऽऽह—व्यतिरेके हीति। यदुत्पत्तिस्थितिलयत्वेन तदभेदादेकविज्ञानेन सर्वविज्ञानं वक्तव्यं नान्यथा तन्मुख्यत्वम्। संभवति मुख्यत्वे कुतस्तदौपचारिकतेत्यर्थः। ननु प्रतिज्ञा सर्वस्य ब्रह्मणि कल्पितत्वेनोपपद्यते न तदुत्पत्त्याद्यपेक्षते तत्र कल्पितत्वमन्तरेणाविद्यातत्कार्ययोस्तदुत्पत्त्याद्यभावादित्याशङ्क्याविद्यातत्संबन्धातिरिक्तत्वे सति तदुत्पत्त्याद्यतिरेकेण तत्र कल्पितत्वासिद्धेर्नैवमित्याह—स चेति। अवशिष्टं सूत्रावयवं व्याचष्टे—शब्देभ्यश्चेति। प्रकृतेर्विकाराणामव्यतिरेक एव

---

१ क. °शिष्टसूं।

सिद्धिरवगम्यते । तथाहि " येनाश्रुतꣳ श्रुतं भवति " [छा० ६-१-३] इति प्रतिज्ञाय मृदादिदृष्टान्तैः कार्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते । तत्साधनायैव चोत्तरे शब्दाः "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" [छा० ६-२-१] "तदैक्षत तत्तेजोऽसृजत " [छा० ६-२-३] इत्येवं कार्यजातं ब्रह्मणः प्रदर्श्याव्यतिरेकं प्रदर्शयन्ति "ऐतदात्म्यमिदꣳ सर्वम् " [छा० ६-८-७] इत्यारभ्याऽऽ प्रपाठकपरिसमाप्तेः । तद्यद्याकाशं न ब्रह्मकार्यं स्यान्न ब्रह्मणि विज्ञात आकाशं विज्ञायेत ततश्च प्रतिज्ञाहानिः स्यात् । न च प्रतिज्ञाहान्या वेदस्याप्रामाण्यं युक्तं कर्तुम् । तथा हि प्रतिवेदान्तं ते ते शब्दास्तेन तेन दृष्टान्तेन तामेव प्रतिज्ञां स्थापयन्ति " इदं सर्वं यदयमात्मा " [बृ० २-४-६] " ब्रह्मैवेदममृतं पुरस्तात् " [मुण्ड० २-२-११] इत्येवमादयः । तस्माज्ज्वलनादिवदेव गगनमप्युत्पद्यते ।

यदुक्तमश्रुतेर्न वियदुत्पद्यत इति । तदयुक्तं वियदुत्पत्तिविषयश्रुत्यन्तरस्य दर्शितत्वात् " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " [तै० २-१] इति । सत्यं दर्शितम् । विरुद्धं तु " तत्तेजोऽसृजत " इत्यनेन श्रुत्यन्तरेण । नैकवाक्यत्वात्सर्वश्रुतीनाम् । भवत्वेकवाक्यत्वमविरुद्धानामिह तु विरोध उक्तः

न्यायस्तेनैवेति[२] यावत् । शब्दानेवोदाहरति—तथाहीति । सदेवेत्यादिशब्दानां प्रतिज्ञाविषयत्वाभावान्न सा[३] तत्र विवक्षितेत्याशङ्क्याऽऽह—तत्साधनायेति । शब्दानां प्रतिज्ञापरत्वेऽपि कथमाकाशस्य ब्रह्मकार्यतेत्याशङ्क्याऽऽह—तद्यदीति । प्रतिज्ञाहानिमनुमोदमानं प्रत्याह—न चेति । किंच प्रतिज्ञा चेदियमेका स्यात्तदा कथंचिदविवक्षिता शङ्केत[४] तास्तु भूयस्यो युक्तिसहिताश्च गम्यन्ते तन्नाविवक्षितत्वशङ्केत्याह—तथा चेति । तेन तेन दृष्टान्तेन दुन्दुभिशङ्खवीणामृदादिनेति यावत् । ते ते शब्दा इत्युक्तं व्यनक्ति—इदमिति । श्रौतप्रतिज्ञासामर्थ्यसिद्धमुपसंहरति—तस्मादिति ।

स्वपक्षसाधकं प्रमाणमुक्त्वा छान्दोग्यानुसारेण परोक्तमनुवदति—यदुक्तमिति । तैत्तिरीयकश्रुत्यनुरोधेन परिहरति—तदयुक्तमिति । एकदेशिनि दूषिते पूर्वपक्षी स्वपक्षे श्रुतीनां मिथो विरोधमुक्तं स्मारयति—सत्यमिति । विरुद्धत्वेनाप्रामाण्याङ्गीकारादेकवाक्यतया प्रामाण्यमेवाङ्गीकर्तुं युक्तमित्याह—नेत्यादिना । श्रुतीनामेकवाक्यत्वस्याविरोधापेक्षत्वात्प्रकृते च श्रुतिद्वयविरोधस्योक्तत्वान्नैकवाक्यतेति शङ्कते—भवत्विति ।

---

१ ज. ञ. ट. था च प्र° । २ ठ. ड. °स्तेनेति । ३ ठ. ड. साऽत्र । ४ क. शङ्क्येत ।

(वेदान्तवादिमत आकाशस्यानित्यत्वकथनम्, अधि० १)

सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसंबन्धासंभवाद्द्वयोश्च प्रथमजत्वासंभवाद्विकल्पासंभवाच्चेति। नैष दोषः। तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात् " तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः " [तै० २-१] इति। अशक्या हीयं श्रुतिरन्यथा परिणेतुम्। शक्या तु परिणेतुं छान्दोग्यश्रुतिः। तदाकाशं वायुं च सृष्ट्वा 'तत्तेजोऽसृजत' इति। न हीयं श्रुतिस्तेजोजनिप्रधाना सती श्रुत्यन्तरप्रसिद्धामाकाशस्योत्पत्तिं वारयितुं शक्नोति। एकस्य वाक्यस्य व्यापारद्वयासंभवात्। स्रष्टा त्वेकोऽपि क्रमेणानेकं स्रष्टव्यं सृजेत्। इत्येकवाक्यत्वकल्पनायां संभवन्त्यां न विरुद्धार्थत्वेन श्रुतिर्हा-

---

उक्तं विरोधमेव स्फोरयति—**सकृदिति**। तत्तेजोऽसृजतेति स्रष्टा तच्छब्दार्थः सकृदेव श्रुतस्तस्य स्रष्टव्यद्वयेनाऽऽकाशेन तेजसा च संबन्धस्तदाकाशमसृजत तत्तेजोऽसृजतेति नोपपद्यते तत्कथमेकवाक्यतेत्यर्थः। स सूपं पक्त्वौदनं पचतीतिवदेकस्यापि स्रष्टुः स्रष्टव्यद्वयसंबन्धसिद्धिरित्याशङ्क्य दृष्टान्ते क्रमसंबन्धेऽपि दार्ष्टान्तिके प्राथम्यदृष्टेरुभयोः सृष्टिक्रमस्य चेष्टत्वाद्युगपदनुत्पत्तेर्न विरोधसमाधिरित्याह—**द्वयोश्चेति**। शाखाभेदेन प्रथमजत्वं विकल्प्यतामित्याशङ्क्य वस्तुनि तदयोगान्नैवमित्याह—**विकल्पेति**। तेजःसृष्टिप्राथम्ये वियत्सृष्टिस्तत्प्राथम्यं चेत्युभयं बाध्यमाकाशसृष्टिप्राथम्ये तु प्राथम्यमेव तेजःसृष्टेर्बाध्यं न तत्सृष्टिर्वायोरग्निरिति तस्याः स्थानान्तरत्वप्रतिलम्भात्तत्र श्रुतर्धीमबाधकल्पनादुभयबाधप्रसङ्गकाद्धर्मबाधकल्पनमेव युक्तमित्याह—**नैष इति**। किंच श्रुत्योरन्यथोपपद्यमानानुपपद्यमानयोरन्यथानुपपद्यमाना श्रुतिर्बलीयसीति तैत्तिरीयश्रुतिरेवानुसर्तव्येत्याह—**अशक्येति**। छान्दोग्यश्रुतेरन्यथोपपद्यमानत्वेन दुर्बलत्वमाह—**शक्येति**। अन्यथापरिणयनमेवाभिनयति—**तदाकाशमिति**। किंच तत्तेजोऽसृजतेति श्रुतिः साक्षादेवाऽऽकाशस्योत्पत्तिं वारयेदर्थाद्वेति विकल्प्याऽऽद्यं दूषयति—**न हीति**। न द्वितीय आर्थिकश्रुतेर्दुर्बलत्वादित्याह—**श्रुत्यन्तरेति**। तेजःश्रुतिस्तेजोजन्म वियदनुत्पत्तिश्चेत्युभयं साक्षादेव बोधयति चेत्का हानिरित्याशङ्क्याऽऽह—**एकस्येति**। एकस्य स्रष्टुरनेकव्यापारवदेकस्यापि वाक्यस्य किं न स्यादित्याशङ्क्याऽऽह—**स्रष्टा त्विति**। वृद्धप्रयोगाधीनं शब्दसामर्थ्यविधारणं न चाऽऽवृत्तिरहितस्य शब्दस्यानेकत्रार्थे व्यापारो दृष्टो दृष्टं तु क्रमाक्रमाभ्यामेकस्यापि कर्तुरनेकव्यापारवत्त्वमित्यर्थः। उक्तन्यायेन श्रुत्योरेकवाक्यत्वेनाविरुद्धार्थतया प्रामाण्यं युक्तमित्युपसंहरति—**इत्येकेति**। एकं वाक्यमावृत्तिरहितमनेकव्यापारवन्न चेत्कथं

---

१ ङ. ज. ट. 'क्या प'। २ क. ज. झ. ट. 'क्यक'। ३ झ. °रप्र°। ४ क. °नेकार्थत्वे व्या'।

तव्या । न चास्माभिः सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसंबन्धोऽभिप्रेयते श्रुत्यन्तरवशेन स्रष्टव्यान्तरोपसंग्रहात् । यथा च "सर्वं खल्विदं ब्रह्म तज्जलान्" [छा० ३-१४-१] इत्यत्र साक्षादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशान्तरविहितं तेजःप्रमुखमुत्पत्तिक्रमं वारयति । एवं तेजसोऽपि ब्रह्मजत्वं श्रूयमाणं न श्रुत्यन्तरविहितं नभःप्रमुखमुत्पत्तिक्रमं वारयितुमर्हति ।

ननु[1] शमविधानार्थमेतद्वाक्यम् "तज्जलानिति शान्त उपासीत" [छा० ३-१४-१] इति श्रुतेर्नैतत्सृष्टिवाक्यं तस्मादेतन्न प्रदेशान्तरप्रसिद्धं क्रममनुरोद्धुमर्हतीति । "तत्तेजोऽसृजत" इत्येतत्सृष्टिवाक्यम् । तस्मादत्र यथाश्रुति क्रमो ग्रहीतव्य इति । नेत्युच्यते । न हि तेजःप्राथम्यानुरोधेन श्रुत्यन्तरप्रसिद्धो वियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्मत्वात्क्रमस्य । अपि च "तत्तेजोऽसृजत" इति नात्र क्रमस्य वाचकः कश्चिच्छब्दोऽस्ति । अर्थात्तु क्रमो गम्यते स[2] च वायोरग्निरित्यनेन

तर्हि तत्तेजोऽसृजतेत्यत्राऽऽकाशस्योत्पत्तिरुपसंहर्तव्येत्याशङ्क्य नास्मिन्नर्थे वाक्यस्यैकस्य व्यापारोऽपि तु भिन्नानां वाक्यानामित्याह—न चेति । श्रुत्यन्तरसिद्धोऽपि क्रमः श्रुत्यन्तरे संग्राह्यो भवतीत्येतद्दृष्टान्तेन स्पष्टयति—यथा चेति ।

दृष्टान्तवैषम्यं शङ्कते—नन्विति । तत्र विशेषणश्रुतिं प्रमाणयति—तज्जलानितीति । व्यावर्त्यं कीर्तयति—नैतदिति । यत्परः शब्दः स शब्दार्थो न चायं शब्दः सृष्टिपरोऽतो न प्रसिद्धं क्रमं बाधितुमलमिति फलितमाह—तस्मादिति । दार्ष्टान्तिके विशेषमाह—तत्तेज इति । तस्य सृष्टिपरत्वेऽपि श्रुत्यन्तरप्रसिद्धक्रमानुरोधित्वमाशङ्क्याऽऽह—तस्मादिति । तत्परत्वात्तत्परत्ववैषम्येऽपि तत्तेजोऽसृजतेत्यस्य न श्रुत्यन्तरसिद्धक्रमनिवारकतेत्याह—नेत्युच्यत इति । किंच गुणभूतक्रमविरोधान्न प्रधानभूतपदार्थत्यागो युक्तो गुणप्रधानविरोधे प्रधानानुरोधस्यैव युक्तत्वादित्याह—न हीति । इतोऽपि तेजःप्राथम्यानुरोधेन वियत्पदार्थत्यागानुपपत्तिरित्याह—अपि चेति । छान्दोग्ये तत्प्राथम्यं शाब्दमार्थं वा नाऽऽद्य इत्याह—तत्तेज इति । न द्वितीयोऽर्थसिद्धक्रमस्य श्रौतक्रमविरोधे बाधकत्वायोगादित्याह—अर्थात्त्विति । वियत्पवनयोः श्रुतिं विना प्रथमतस्तेजःश्रुतिवशात्तस्य सृष्टौ प्राथम्यं भाति तच्च श्रुत्यन्तरे तृतीयत्वश्रुत्या व्याह-

---

१ ङ. ब. 'नु सम' । २ क. ज. ट. स वा' । ३ क. ख. 'रत्वे वै' । ४ क. 'नुत्पत्ति' । ५ ठ. ड. 'म्ये प्रा' । ६ ठ. 'म्यं शब्देनाऽऽर्थं । ७ क. ख. 'मार्थिकं वा ।

(वेदान्तवादिमत आकाशस्यानित्यत्वकथनम्, अधि० १)

श्रुत्यन्तरप्रसिद्धेन क्रमेण निवार्यते। विकल्पसमुच्चयौ तु वियत्तेजसोः प्रथमजत्वविषयावसंभवानभ्युपगमाभ्यां निवारितौ। तस्मान्नास्ति श्रुत्योर्विप्रतिषेधः। अपि च च्छान्दोग्ये "येनाश्रुतं श्रुतं भवति" इत्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुमसमाम्नातमपि वियदुत्पत्तावुपसंख्यातव्यं किमङ्ग पुनस्तैत्तिरीयके समाम्नातं नभो न संगृह्यते।

यच्चोक्तमाकाशस्य सर्वेणानन्यदेशकालत्वाद्ब्रह्मणा तत्कार्यैश्च सह विदितमेव तद्भवत्यतो न प्रतिज्ञा हीयते। न च "एकमेवाद्वितीयम्" इतिश्रुतिकोपो भवति। क्षीरोदकवद्ब्रह्मनभसोरव्यतिरेकोपपत्तेरिति। अत्रोच्यते। न क्षीरोदकन्यायेनेदमेकविज्ञानेन सर्वविज्ञानं नेतव्यम्। मृदादिदृष्टान्तप्रणयनाद्धि प्रकृतिविकारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते। क्षीरोदकन्यायेन च सर्वविज्ञानं कल्प्यमानं न

तमित्यर्थः। शाखाभेदेन विकल्पो वा स्यादुभयप्राथम्यस्योभयत्रोपसंहृतेः समुच्चयो वेत्याशङ्क्याऽऽह—**विकल्पेति**। प्रथमजत्वे सिद्धवस्तुत्वाद्विकल्पासंभवान्निरस्तः। वायोरग्निरिति श्रुतिविरोधान्नोभयोरुभयत्र प्रथमजत्वं न च क्रमसृष्टाविष्टायामुभयोरुभयत्र प्राथम्यमुपसंहर्तुं शक्यं तेन द्वाभ्यां द्वावपि निरस्तावित्यर्थः। तैत्तिरीयश्रुत्यनुरोधेन च्छान्दोग्यश्रुतिनयनान्न तयोर्विरोधोऽस्तीत्युपसंहरति—**तस्मादिति**। न केवलमविरोधोऽपि तु च्छन्दोगश्रुतेरनुकूलैव तैत्तिरीयश्रुतिरित्याह—**अपि चेति**।

उत्पत्तौ वियदुपसंहारं विनाऽपि प्रतिपादितत्वात्प्रतिज्ञाया न च्छान्दोग्यश्रुत्यनुकूला तैत्तिरीयश्रुतिरित्याशङ्क्य पूर्वोक्तमनुवदति—**यच्चेति**। अतो न प्रतिज्ञेत्यत्राऽऽकाशस्योत्पत्त्यभावेऽपीति शेषः। एकमेवाद्वितीयमितिश्रुतिसमाधानमनुद्रवति—**न चेति**। अन्यथाप्रतिज्ञोपपादनं तावद्दूषयति—**अत्रेति**। क्षीरपूर्णघटे प्रक्षिप्ता नीरबिन्दवस्तद्ग्रहणेनैव गृह्यन्ते न पृथक्पाथोबिन्दूनां ग्रहणमवशिष्यते। तथा ब्रह्मणि सकार्ये ज्ञाते तदभिन्नदेशकालं नभो विज्ञातमेव तदनेन दृष्टान्तेन नेदं प्रतिज्ञानं नेतुं युक्तं दृष्टान्तानुरोधित्वाद्दार्ष्टान्तिकस्य दृष्टान्तस्य च प्रकृतिविकाररूपत्वाद्दार्ष्टान्तिकेऽपि तथात्वस्य युक्तत्वात्तस्मादाकाशादेर्ब्रह्मविकारत्वे तत्प्रकृतिभूतब्रह्मणोऽनन्यत्वमित्यनेनैव न्यायेनेदं नेयमित्यर्थः। इतश्च न क्षीरोदकदृष्टान्तेनैतन्नेतव्यमित्याह—**न क्षीरेति**। तत्र

---

१ ज. न गृ°। २ क. ज. ट. °शत्वा°। ३ क. °न स°। ४ ठ. ड. °दुपक्रमप्रा°। ५ ट. °तिनियमान्न। ६ क. ख. ठ. ड. तु च्छान्दो°। ७ क. ख °पूर्णे घ°। ८ क. ख. ठ. ड. °दृप्रहेणैव। ९ क. °त्वेन त°।

सम्यग्विज्ञानं स्यात्। न हि क्षीरज्ञानगृहीतस्योदकस्य सम्यग्विज्ञानगृहीतत्वमस्ति। न च वेदस्य पुरुषाणामिव मायालीकवञ्चनादिभिरर्थावधारणमुपपद्यते। साऽवधारणा चेयम् "एकमेवाद्वितीयम्" इति श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत। न च स्वकार्यापेक्षयेदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकमेवाद्वितीयतावधारणं चेति न्याय्यं मृदादिष्वपि हि तत्संभवात्। न तदपूर्ववदुपन्यसितव्यं भवति "श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति" [छा० ६·१·२] इत्यादिना। तस्मादशेषवस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्यतापेक्षयोपन्यस्यत इति द्रष्टव्यम् ॥ ६ ॥

यत्पुनरेतदुक्तमसंभवाद्द्यौर्नी गगनस्योत्पत्तिश्रुतिरिति। अत्र ब्रूमः—

यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥ (१)

तुशब्दोऽसंभवाशङ्काव्यावृत्त्यर्थः। न खल्वाकाशोत्पत्तावहेतुमाह—न हीति। मा भूदेकविज्ञानेन सर्वविज्ञानं सम्यग्ज्ञानं तत्राऽऽह—न चेति। मायया भ्रान्तिरूपया यदलीकं मिथ्याभाषणं तेन वञ्चनमन्यथाबोधनं तेन वा विप्रतिलिप्सादिभिर्वा नार्थावधारणमपौरुषेयस्य वेदस्योपपद्यते तेषां पुरुषधर्मत्वाद्वेदेऽसंभवादित्यर्थः। यत्तु क्षीरनीरवद्ब्रह्मनभसोरव्यतिरेकादद्वितीयश्रुतिरिति तत्राऽऽह—साऽवधारणेति। यद्यद्वितीयपदमौपचारिकं तर्हि कथमवधारणं न हि माणवके सिंहत्वोपचारेण सिंहादन्यो माणवको नेति प्रयोगोऽस्तीत्यर्थः। यत्तु स्वकार्यापेक्षया सर्वमिदमुपपन्नमिति तत्राऽऽह—न चेति। तत्संभवाद्ब्रह्मणि विशेषणवैयर्थ्यमिति पूरयितुं हिशब्दः। मृदादिष्वपि स्वकार्यापेक्षया वस्त्वेकदेशविषयं सर्वविज्ञानमिच्छन्तं प्रति दोषान्तरमाह—न तदिति। कथमपूर्ववदुपन्यासस्तत्राऽऽह—श्वेतकेतो इति। त्वत्पक्षे वा कथमिदं प्रतिज्ञानं तत्राऽऽह—तस्मादिति। स्वकार्यापेक्षया वस्त्वेकदेशविषयत्वासंभवादिति यावत् ॥ ६ ॥

सावधारणाद्वितीयश्रुतेरेकविज्ञानेन सर्वविज्ञानप्रतिपादनाच्च नभसोऽपि ब्रह्मकार्यत्वं पृथिव्यादिवदित्युक्तम्। इदानीमनुमानविरोधादाकाशोत्पत्तेरसंभवात्तदुत्पत्तिश्रवणं गौणमित्युक्तमनुवदति—यत्पुनरिति। अनुमानस्य मानान्तरविरोधेनामानत्वान्नाऽऽकाशोत्पत्तिश्रुतेर्गौणत्वापादनसामर्थ्यमिति सूत्रमवतारयति—अत्रेति। अक्षरोक्तमर्थं कथयति—तुशब्द इति। व्यावृत्तिप्रकारमभिनयति—न खल्विति। तत्र विभक्तत्वहेतु-

१ क. ज. °म्यग्ज्ञानं। २ क. ज. °म्यग्ज्ञान°। ३ क. घ. झ. ट. °वचना°। ४ क. ङ. ज. ञ. °मेकाद्वि°। ५ क. हि संभ°। ६ क. न हि त°। ७ क. ङ. ञ. °प्राक्षो ये°। ८ ङ. ञ. तत्र। ९ क. ख. ठ °प्रलि°। १० ङ. °तिपत्त्यादि°। ११ क. ख. ठ. ड. °ह्नवि°। १२ क. °पेक्षाया।

संभवाशङ्का कर्तव्या । यतो यावत्किंचिद्विकारजातं दृश्यते घटघटिकोदञ्चनादि वा कटककेयूरकुण्डलादि वा सूचीनाराचनिस्त्रिंशादि वा तावानेव विभागो लोके लक्ष्यते । न त्वविकृतं किंचित्कुतश्चिद्विभक्तमुपलभ्यते । विभागश्चाऽऽकाशस्य पृथिव्यादिभ्योऽवगम्यते । तस्मात्सोऽपि विकारो भवितुमर्हति । एतेन दिक्कालमनःपरमाण्वादीनां कार्यत्वं व्याख्यातम् । नन्वात्माऽप्याकाशादिभ्यो विभक्त इति तस्यापि कार्यत्वं घटादिवत्प्राप्नोति । न । "आत्मन आकाशः संभूतः" [तै० २-१] इति श्रुतेः । यदि ह्यात्माऽपि विकारः स्यात्तस्मात्परमन्यन्न श्रुतमित्याकाशादि सर्वं कार्यं निरात्मकमात्मनः कार्यत्वे स्यात् । तथा च शून्यवादः प्रसज्येत । आत्मत्वाच्चाऽऽत्मनो निराकरणशङ्कानुपपत्तिः । न ह्यात्माऽऽगन्तुकः कस्यचित्स्वयंसिद्धत्वात् । न ह्यात्माऽऽ-

---

कमनुमानं हेतुं कुर्वन्व्याप्तिमाह—यत इति । यद्विभक्तं तत्कार्यं यथा च घटादीत्यन्वयमुक्त्वा व्यतिरेकमाह—न त्विति । यन्न कार्यं तन्न विभक्तं यथाऽऽत्मेत्यर्थः । व्याप्तस्य हेतोः पक्षधर्मतामाह—विभागश्चेति । विमतं कार्यमविद्याव्यतिरिक्तत्वे सति विभक्तत्वात्सामान्यवत्त्वाद्गुणित्वाच्च घटवदित्यभिप्रेत्याऽऽह—तस्मादिति । दिगादिषु व्यभिचारमाशङ्क्य पक्षतुल्यत्वान्नैवमित्याह—एतेनेति । आत्मा गगनादिभ्यो विभक्तो न वा । आद्ये विभक्तोऽपि विकारो नेति व्यभिचारः । द्वितीये तदभिन्नत्वात्तद्वदेव तस्यापि कार्यतेति मत्वा चोदयति—नन्विति । न तावदात्मनि व्यभिचारः सति मातरि बाधविधुरे विभागाभावात् । न च तस्य प्रातीतिकविभागेन कार्यत्वं सर्वकारणत्वश्रुतिविरोधात् । न च तद्वदेवाऽऽकाशस्यापि न कार्यता तत्कार्यतायाः श्रुतत्वादित्यभिप्रेत्याऽऽह—नाऽऽत्मन इति । आत्मनोऽपि वस्तुत्वाद्घटवत्कार्यत्वानुमानान्न सर्वकारणतेत्याशङ्क्यार्थापत्तिविरोधान्नैवमित्याह—यदि हीति । निरात्मकत्वं निरुपादानत्वम् । तत्प्राप्तिफलमाह—तथा चेति । इष्टापत्तिं निराचष्टे—आत्मत्वाच्चेति । निराकर्ताऽस्ति न वा । आद्ये निराकर्तैवाऽऽत्मेत्यात्मनो नित्यसत्त्वम् । द्वितीये तदभावे निराकरणासिद्धेर्नित्यत्वमित्यर्थः । आत्मकारणस्यैवाऽऽकाशादिकारणत्वान्न सर्वस्य निरात्मकत्वमित्याशङ्क्याऽऽह—न हीति । सत्तास्फूर्त्योरन्यानपेक्षत्वादात्मनोऽनागन्तुकत्वं तत्कथं तत्कारणमाकाशादिकारणमित्यर्थः । प्रमाणापेक्षया सिध्यन्नात्मा कथं निरपेक्षस्फूर्तिरित्याशङ्क्याऽऽह—न हीति । तस्यापि स्वयमेव साधकत्वादित्यर्थः ।

---

१ क. ज. °माणूनां । २ ङ. ज. ञ. °त्वादेवाऽऽत्म° । ३ क. हेतुकु° । ४ क. ख. झ. °त्वाच्च गुणि° । ५ क. ख. झ. °त्वाद्घट° । ६ क. न त° । ७ ठ. ड. °णश्रु° । ८ क. °त्वात्पट° ।

त्मनः प्रमाणमपेक्ष्य सिध्यति । तस्य हि प्रत्यक्षादीनि प्रमाणान्यसिद्धप्रमेयसिद्धय उपादीयन्ते । न ह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः स्वयंसिद्धाः केनचिदभ्युपगम्यन्ते । आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात्प्रागेव प्रमाणादिव्यवहारात्सिध्यति। न चेदृशस्य निराकरणं संभवति । आगन्तुकं हि वस्तु निराक्रियते न स्वरूपम् । य एव हि निराकर्ता तदेव तस्य स्वरूपम् । न ह्यग्नेरौष्ण्यमग्निना निराक्रियते । तथाऽहमेवेदानीं जानामि वर्तमानं वस्त्वहमेवातीतमतीततरं चाज्ञासिषमहमेवानागतमनागततरं च ज्ञास्यामीत्यतीतानागतवर्तमानभावेनान्यथा भवत्यपि ज्ञातव्ये न ज्ञातुरन्यथाभावोऽस्ति सर्वदा वर्तमानस्वभावत्वात् । तथा भस्मीभवत्यपि देहे नाऽऽत्मन उच्छेदो वर्तमानस्वभावादन्यस्वभावत्वं वा न संभावयितुं शक्यम् ।

प्रत्यक्षाद्व्यतिरेकेणाऽऽत्मनः सिद्धत्वे तेषामानर्थक्यमित्याशङ्क्याऽऽह—**तस्य हीति** । आत्मनः स्वयंसिद्धत्वे वस्तुत्वाविशेषादाकाशादीनामपि तथा संभवात्प्रमाणवैयर्थ्यतादवस्थ्यमित्याशङ्क्याऽऽह—**न हीति** । जडत्वादनभ्युपगमाच्च न स्वतः सिद्धता तेषामित्यर्थः । आत्मनोऽपि स्वप्रकाशत्वं वादिनो नोपगच्छन्तीत्याशङ्क्याऽऽह—**आत्मा त्विति** । प्रमाणादिसाक्षित्वान्न तदधीनाऽऽत्मसिद्धिरित्यर्थः । आत्मनः स्वप्रकाशस्वेऽपि कथमनिराकरणमित्याशङ्क्याऽऽह—**न चेति** । निराकरणत्वमपि तदधीनात्मलाभं तद्विरुद्धं नोदेतीत्यर्थः । अहमस्मि ब्रह्मेति तत्त्वज्ञानान्नाहं कर्ता भोक्ता चेत्यात्मनोऽपि निराकरणं दृष्टमित्याशङ्क्याऽऽह—**आगन्तुकं हीति** । जीवत्वमनागन्तुकमपि निराक्रियमाणमिष्टमित्याशङ्क्याऽऽह—**नेति** । किं तर्हि स्वरूपं तदाह—**य एवेति** । तदपि निराक्रियतामित्याशङ्क्य निराकर्त्रन्तराभावान्नैवमित्याह—**न हीति** । आत्मनः सत्तास्फूर्त्योरन्यानपेक्षत्वमनागन्तुकत्वे कारणमुक्त्वा स्फूर्तावन्यानपेक्षत्वमुपपाद्य सत्तायामपि तदुपपादयति—**तथेति** । सदाऽहमित्यपरोक्षैकरूपानुभवान्नाऽऽत्मनः सत्ताव्यभिचारो येनान्यतः सत्तामाकाङ्क्षेदित्यर्थः । जीवतो मातुरन्यथाभावाभावेऽपि मृतस्य स्यादित्याशङ्क्याऽऽह—**तथेत्यादिना** । यत्स्वभावत्वमनुभवसिद्धं तस्यान्यथात्वं बाधकादवसातव्यं बाधकं च घटादीनां स्वभावाद्विचलनं मानोपनीतं यस्य तु न तदस्ति तस्याऽऽत्मनोऽनुभवसिद्धस्य नान्यथात्वमिति भावः । आत्मनः स्वतःसिद्धत्वे-

---

१ क. °रं वाऽज्ञा° । २ ङ. ज. °न्यथास्व° । ३ क. °क्षादिव्यति° । ४ क. सत्त्वाव्य° ।

(वेदान्तवादिमत आकाशस्यानित्यत्वकनम्, अधि० १)

एवमप्रत्याख्येयस्वभावत्वादकार्यत्वमात्मनः कार्यत्वं चाऽऽकाशस्य।

यत्तूक्तं समानजातीयमनेकं कारणद्रव्यं व्योम्नो नास्तीति। तत्प्रत्युच्यते। न तावत्समानजातीयमेवाऽऽरभते न भिन्नजातीयमिति नियमोऽस्ति। न हि तन्तूनां तत्संयोगानां च समानजातीयत्वमस्ति द्रव्यगुणत्वाभ्युपगमात्। न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोऽस्ति। स्यादेतत्समवायिकारणविषय एव समानजातीयत्वाभ्युपगमो न कारणान्तरविषय इति। तदप्यनैकान्तिकम्। सूत्रगोवालैर्[1]नेकजातीयैरेका रज्जुः सृज्यमाना दृश्यते। तथा सूत्रैरूर्णादिभिश्च विचित्रान्कम्बलान्वितन्वते। सत्त्वद्रव्यत्वाद्यपेक्षया वा समानजातीय[2]त्वे कल्प्यमाने नियमानर्थक्यं सर्वस्य सर्वेण समानजातीय[3]कत्वात्।

नाप्यनेकमेवाऽऽरभते नैकमिति नियमोऽस्ति। अणुमनसो-

नानागन्तुकत्वे फलितमाह—**एवमिति**। विभक्तत्वहेतोरव्यभिचारेऽपि बाधकतर्काभावादप्रयोजकतेत्याशङ्क्याऽऽह—**कार्यत्वं चेति**। अकार्यस्याऽऽत्मनः स्वरूपोपाधावबाधितभेदशून्यत्वान्न मुख्यं विभक्तत्वम्। आकाशस्य तथाविधभेदवत्त्वान्मुख्यविभागित्वेन कार्यत्वमन्यथा मुख्यविभागानुपपत्तिरिति कुतोऽप्रयोजकतेत्यर्थः।

आकाशानुत्पत्त्यनुमानानां प्रत्यनुमानविरोधमुक्त्वा समवायिकारणशून्यत्वं विशेषतो दूषयितुमनुभाषते—**यत्त्विति**। तत्र समानजातीयस्याऽऽरम्भकत्वमयोगव्यवच्छेदेनान्ययोगव्यवच्छेदेन वेति विकल्प्याऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—**तत्प्रतीति**। नियमो हि कारणमात्रनिष्ठो वा निमित्तकारणनिष्ठो वा समवायिकारणनिष्ठो वेति विकल्प्याऽऽद्यं प्रत्याह—**न हीति**। न द्वितीय इत्याह—**न चेति**। तृतीयमादत्ते—**स्यादेतदिति**। समवायिकारणस्यापरजात्या वा परजात्या वा समानजातीयत्वमिति विकल्प्याऽऽद्यं निरस्यति—**तदपीति**। अनैकान्तिकान्तरमाह—**तथेति**। न च रज्ज्वादेः सूत्रवालादिसमुदायमात्रत्वं पटादेरपि तथात्वापत्ताववयविसमुदायमात्रापाकरणप्रसङ्गादिति भावः। द्वितीये समानजातीयविशेषवैयर्थ्यमद्रव्यस्यासतश्चानारम्भकत्वेन सर्वस्यापि समानजातीयत्वसंभवादित्याह—**सत्त्वेति**।

समानजातीयमेवाऽऽरम्भकमिति नियमं निराकृत्यानेकेषामारम्भकत्वनियमं निराकरोति—**नापीति**। तन्नियमो हि कार्यमात्रारम्भे वा द्रव्यारम्भे वा नाऽऽद्य इत्याह—**अणुमनसोरिति**। ययोः संयोगस्तौ संहत्य कर्माऽऽरभेते चेत्तस्योभयसमवेतत्वादेक-

---

१ क. °र्णं द्र°। २ क. ज. °र्णाभि°। ३ क. ज. °यकत्वे। ४ क. ज. °यत्वा°।

राद्यकर्मारम्भाभ्युपगमात् । एकैको हि परमाणुर्मनश्चाऽऽद्यं कर्माऽऽरभते न द्रव्यान्तरैः संहत्येत्यभ्युपगम्यते । द्रव्यारम्भ एवानेकारम्भकत्वानियम इति चेत् । न । परिणामाभ्युपगमात् । भवेदेष नियमो यदि संयोगसचिवं द्रव्यं द्रव्यान्तरस्याऽऽरम्भकमभ्युपगम्येत । तदेव तु द्रव्यं विशेषवदवस्थान्तरमापद्यमानं कार्यं नामाभ्युपगम्यते । तच्च क्वचिदनेकं परिणमते मृद्बीजाद्यङ्कुरादिभावेन । क्वचिदेकं परिणमते क्षीरादि दध्यादिभावेन । नेश्वरशासनमस्त्येकमेव कारणं कार्यं जनयतीति । अतः श्रुतिप्रामाण्यादेकस्माद्ब्रह्मण आकाशादिमहाभूतोत्पत्तिक्रमेण जगज्जातमिति निश्चीयते । तथा चोक्तम् " उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि " [ब्र० सू० २-१२-४] इति ।

यच्चोक्तमाकाशस्योत्पत्तौ न पूर्वोत्तरकालयोर्विशेषः संभावयितुं शक्यत इति । तदयुक्तम् । येनैव हि विशेषेण पृथिव्या-

---

द्रव्यत्वव्याहतिरित्याशङ्क्य सति कर्मणि संयोगः सति च तस्मिन्कर्मेति परस्पराश्रयत्वान्नैवमित्याह—**एकैको हीति** । द्व्यणुकारम्भकसंयोगासमवायिकारणमात्ममनःसंयोगजनकं च कर्माऽऽद्यं कर्म द्वितीयमवलम्बते—**द्रव्येति** । आरम्भवादानभ्युपगमेन दूषयति—**न परिणामेति** । तदेव प्रपञ्चयति—**भवेदिति** । न त्वेवमभ्युपगम्यते तस्मान्नैष नियम इति शेषः । तदनभ्युपगमे कथं कार्योत्पत्तिरित्याशङ्क्याऽऽह—**तदेवेति** । परिणामपक्षेऽपि तुल्यमनेकेषां कारणत्वमित्याशङ्क्याऽऽह—**तच्चेति** । यत्र क्षीरं दधिभावेन परिणमते तत्र नावयवानामनेकेषामुपादानत्वमविभक्तस्यैव क्षीरस्य दध्यात्मना परिणामोपलम्भाद्यथा परमाणुवादिनां क्षीरवद्द्व्यणुकं त्र्यणुकं वा द्रव्यान्तरासंयोगेऽपि दधि जनयति तथा परिणामपक्षेऽपीति विवक्षन्नाह—**क्वचिदिति** । पक्षद्वयेऽपि कारणत्वमनेकेषामित्यस्मिन्नियमे न कारणमस्तीत्याह—**नेश्वरेति** । एकस्मादनेकस्माच्च कार्योत्पत्तिदर्शनान्निर्णयासिद्धिरित्याशङ्क्याऽऽह—**अत इति** । एकस्यापि परिणामिनः सहकार्यपेक्षादर्शनात्तद्विरहिणो ब्रह्मणो जगत्कारणत्वमयुक्तमित्याशङ्क्याऽऽह—**तथा चेति** ।

कारणशून्यत्वादाकाशमात्मवदनुत्पत्तिमदित्येतन्निरस्तम् । इदानीमभूत्वाभावित्वाभावान्न तदुत्पत्तिमदित्युक्तमनुवदति—**यच्चोक्तमिति** । हेत्वसिद्धा परिहरति—**तदयुक्तमिति** । शब्दाधारत्वं विशेषः । आकाशस्य मूर्ताभावान्मूर्तविरोधिनश्चार्थान्तरत्वात्तदभावेऽपि न प्रागवस्थायां काठिन्यप्रसक्तिरिति भावः । ' आकाश-

---

१ ङ. ञ. °र्थं स्वक° । २ क. °तः शास्त्रप्रमाणादे° ।

(वेदान्तवादिमत आकाशस्यानित्यत्वकथनम्, अधि० १)

दिभ्यो व्यतिरिच्यमानं नभः स्वरूपवदिदानीमध्यवसीयते स एव विशेषः प्रागुत्पत्तेर्नाऽऽसीदिति गम्यते। यथा च ब्रह्म न स्थूलादिभिः पृथिव्यादिस्वभावैः स्वभाववत् " अस्थूलमनणु " [बृ० ३·८·८] इत्यादिश्रुतिभ्यः। एवमाकाशस्वभावेनापि न स्वभाववदनाकाशमिति [बृ० ३·८·८] श्रुतेरवगम्यते। तस्मात्पागुत्पत्तेरनाकाशमिति स्थितम्। यदप्युक्तं पृथिव्यादिवैधर्म्यादाकाशस्याजत्वमिति। तदप्यसत्। श्रुतिविरोधे सत्युत्पत्त्यसंभवानुमानस्याऽऽभासत्वोपपत्तेः। उत्पत्त्यनुमानस्य च दर्शितत्वात्। अनित्यमाकाशमनित्यगुणाश्रयत्वाद्घटादिवदित्यादिप्रयोगसंभवाच्च। आत्मन्यनैकान्तिकमिति चेत्। न। तस्यापि निषेद्धं प्रत्यनित्यगुणाश्रयत्वासिद्धेः। विभुत्वादीनां चाऽऽकाशस्योत्पत्तिवादिनं प्रत्यसिद्धत्वात्।

यच्चोक्तमेतच्छब्दाच्चेति तत्रामृतत्वश्रुतिस्तावत् " वियत्यमृता दिवौकसः" इतिवद्गुण्या। उत्पत्तिप्रलययोरुपपादितत्वात्।

शरीरं ब्रह्म ' इति श्रुतेराकाशाभावे कथं ब्रह्मणोऽनवस्थानमित्याशङ्क्याऽऽकाशवच्छरीरमस्येति व्युत्पत्त्या श्रुत्युपपत्तिं मत्वाऽऽह—**यथा चेति**। अवकाशान्तरमन्तरेणाऽऽकाशस्थितिवद्ब्रह्मणोऽपि तत्कारणस्य तदतिरेकेण सुषुप्त्यवस्थायामिवावस्थितिरविरुद्धेति हेत्वसिद्धिमुपसंहरति—**तस्मादिति**। उक्तानुमानान्तराण्यनूद्य कालात्ययापदिष्टतामाह—**यदपीति**। न्यायशून्या श्रुतिरनुमानमपबाधितुमसमर्थेत्याशङ्क्याऽऽह—**उत्पत्तीति**। इतश्चाऽऽकाशस्य न नित्यत्वमित्याह—**अनित्यमिति**। वस्तुतस्तु गुणाश्रयत्वमेव हेतुः। आकाशो जायते महाभूतत्वादस्मदादिबाह्येन्द्रियग्राह्यगुणाधारत्वाद्वा पृथिव्यादिवदित्यनुमानमादिशब्दार्थः। आद्यस्य हेतोरन्यतरानैकान्तिकत्वं चोदयति—**आत्मनीति**। निर्गुणत्वश्रुतिमाश्रित्य परिहरति—**न तस्येति**। न चाऽऽकाशमनित्यविशेषगुणाधिकरणविभुभिन्नं मेयत्वादिति तत्सिद्धिः। आकाशं श्रोत्रग्राह्यविशेषगुणाधिकरणविभ्वन्यन्मेयत्वादित्यपि प्रसङ्गादात्मनि सर्वविशेषनिराकरणविविधश्रुतिविरोधाच्चेति भावः। इतश्च त्वदुक्ता हेतवः साधका न भवन्तीत्याह—**विभुत्वादीनां चेति**।

आकाशस्य नित्यत्वे नानुमानमस्तीत्युपपाद्य यच्चैतदुक्तं शब्दान्नित्यत्वमिति तदनूद्य दूषयति—**यच्चैतदिति**। किमित्यमृतत्वश्रुतिरापेक्षिकी व्याख्यायते मुख्यार्थैव किं न स्यादित्याशङ्क्याऽऽह—**उत्पत्तीति**। आकाशस्यानित्यत्वं चेदात्मनि

---

१ ब. 'शमच्छिद्रमि'। ज. शत्वमि'। २ क ज. 'त्मनाऽनै'। ३ ठ. ड. 'णश्रु'।

" आकाशवत्सर्वगतश्च नित्यः " इत्यपि प्रसिद्धमहत्त्वेनाऽऽकाशोपमानं क्रियते निरतिशयमहत्त्वाय नाऽऽकाशसमत्वाय । यथेषुरिव सविता धावतीति क्षिप्रगतित्वायोच्यते नेषुतुल्यगतित्वाय तद्वत् । एतेनानन्तत्वोपमानश्रुतिर्व्याख्याता । " ज्यायानाकाशात् " [शत० १०-३-६-२] इत्यादिश्रुतिभ्यश्च ब्रह्मण आकाशस्योनपरिमाणत्वसिद्धिः । " न तस्य प्रतिमाऽस्ति " [श्वे०४-१९] इति च ब्रह्मणोऽनुपमानत्वं दर्शयति " अतोऽन्यदार्तम् " [बृ०३-४-२] इति च ब्रह्मणोऽन्येषामाकाशादीनामार्तत्वं दर्शयति । तपसि ब्रह्मशब्दवदाकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसंभवश्रुत्यनुमानाभ्यां परिहृतम् । तस्माद्ब्रह्मकार्यं वियदिति सिद्धम् ॥ ७ ॥ (१)

(स्वरूपतो ब्रह्मणो वायोरुत्पत्तिकथनम्, अधि० २)

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥ (२)

अतिदेशोऽयम् । एतेन वियद्व्याख्यानेन मातरिश्वाऽपि विय-

तत्तुल्यत्वश्रुतिर्व्याहन्येतेत्याशङ्क्याऽऽह—**आकाशवदिति** । समत्वाभावे न क्वचिदुपमानत्वमुपलब्धमित्याशङ्क्याऽऽह—**यथेति** । स यथाऽनन्तोऽयमाकाश एवमनन्त आत्मेति श्रुतिस्तर्हि कथमित्याशङ्क्याऽऽह—**एतेनेति** । उत्पत्तिविनाशयोरुपपादितत्वेन न्यूनेनोपमानायोगाच्चेत्यर्थः । कथमाकाशस्य ब्रह्मणः सकाशान्न्यूनपरिमाणत्वमित्याशङ्क्य पूर्वोक्तयुक्त्या श्रुतिं समुच्चिनोति—**ज्यायानिति** । इतश्च ब्रह्मणि नोपमानोपपत्तिरित्याह—**न तस्येति** । इतोऽपि नित्यत्वमाकाशस्य नाऽऽशङ्कितव्यमित्याह—**अतोऽन्यादिति** । यदुक्तं स्याच्चैकस्य ब्रह्मशब्दवदिति तद्दूषयति—**तपसीति** । युक्तं तपसि ब्रह्मशब्दस्य गौणत्वं तस्य ब्रह्मज्ञानसाधनत्वादाकाशे तु संभूतशब्दस्य ज्वलनादिवद्बाधकाभावादनुग्राहकसद्भावाच्च मुख्यत्वमेवेत्यर्थः । श्रुतियुक्तिसिद्धमुपसंहरति—**तस्मादिति** । आकाशसृष्टिश्रुत्यनुसारेण तेजःसृष्टिश्रुतिनयनात्तयोरेकवाक्यतया प्रामाण्योपपत्तेराकाशकारणे ब्रह्मणि समन्वयः सिध्यतीत्यधिकरणार्थं निगमयति—**इति सिद्धमिति** ॥ ७ ॥ (१)

वियदुत्पत्तिमुक्त्वा पवनोत्पत्तिमतिदेशेन साधयति—**एतेनेति** । अत्र पूर्ववत्पादादिसंगतयो न पृथग्वक्तव्या भवन्तीत्यभिप्रेत्य तात्पर्यमाह—**अतिदेशोऽयमिति** । फलभेदमपि पूर्ववदुपेत्य सूत्राक्षरार्थं कथयति—**एतेनेति** । वियदुत्पत्तिकथनानन्तरं तेजआद्यतिक्रम्य वायोरुत्पत्तिमत्त्वेन व्याख्याने कारणमाह—**वियदाश्रय इति** । तत्तेजोऽसृजतेति श्रुतिराकाशाद्वायुरिति श्रुत्या विरुध्यते न वेत्येकवाक्यत्वासंभवसंभवाभ्यां

---

१ क. ङ. ञ. 'काशेनोप' । २ ञ. 'ह्मणः सकाशादाका' ।

(स्वरूपवतो ब्रह्मणो वायोरुत्पत्तिकथनम्, अधि० २)

दाश्रयो वायुर्व्याख्यातः। तत्राप्येते यथायोगं पक्षा रचयितव्याः। न वायुरुत्पद्यते छन्दोगानामुत्पत्तिप्रकरणेऽनाम्नानादित्येकः पक्षः। अस्ति तु तैत्तिरीयाणामुत्पत्तिप्रकरण आम्नानमाकाशाद्वायुरिति पक्षान्तरम्। ततश्च श्रुत्योर्विप्रतिषेधे सति गौणी वायोरुत्पत्तिश्रुतिरसंभवादित्यपरोऽभिप्रायः। असंभवश्च "सैषाऽनस्तमिता देवता यद्वायुः" [बृह० १-५-२२] इत्यस्तमयप्रतिषेधादमृतत्वादिश्रवणाच्च [बृह० २-३-३]। प्रतिज्ञानुपरोधाच्यावद्विकारं चैं विभागाभ्युपगमादुत्पद्यते वायुरिति सिद्धान्तः। अस्तमयप्रतिषेधोऽपरविद्याविषय आपेक्षिकः। अग्न्यादीनामिव वायोरस्तमयाभावात्। कृतप्रतिविधानं चामृतत्वादिश्रवणम्। ननु वायोराकाशस्य च तुल्ययोरुत्पत्तिप्रकरणे श्रवणाश्रवणयोरेकमेवाधिकरणमुभयविषयमस्तु किमतिदेशेना-

---

संशये सत्यतिदेशं विशदीकर्तुं तुल्यन्यायत्वमाह—तत्रापीति। बहूक्त्या वियदधिकरणेऽपि पक्षत्रयमस्तीति सूचितं तदेव पक्षत्रयं संक्षिपन्प्रथमं गौणवादिपक्षमाह—न वायुरिति। पूर्वपक्षं संक्षिपति—अस्ति त्विति। छान्दोग्ये तेजसस्तत्तेजोऽसृजतेति प्रथमजत्वश्रवणात्तैत्तिरीयके चाऽऽकाशाद्वायुरिति वायोस्तेजःसकाशात्पूर्वजत्वश्रुतेरुभयोस्तदनुपपत्त्या मिथोविरोधे श्रुत्योरप्रामाण्यादाकाशद्वारा वायुकारणे ब्रह्मणि समन्वयासिद्धिरित्यर्थः। गौणवादिनोऽभिप्रायं संगृह्णाति—ततश्चेति। आकाशवद्वायोरकारणत्वाभावात्कथमसंभवाशङ्केत्याशङ्क्याऽऽह—असंभवश्चेति। दर्शितश्रुत्या वायुनित्यत्वमापेक्षिकमित्याशङ्क्याभ्यस्यमानत्वान्नैवमित्याह—अमृतत्वादीति। वायुश्चान्तरिक्षं चैतदमृतमिति श्रूयते। आदिशब्देन वायुरेव व्यष्टिर्वायुः समष्टिरित्यभ्यासो गृह्यते। प्रतिज्ञाश्रुतेरनुमानाच्च पवनोत्पत्तेरावश्यकत्वे श्रुत्योरेकवाक्यतया विरोधाभावादाकाशद्वारा वायुकारणे ब्रह्मणि समन्वयः सिध्यतीति सिद्धान्तमाह—प्रतिज्ञेति। यत्तु वायोरस्तमयप्रतिषेधादुत्पत्तेरसंभव इति तत्राऽऽह—अस्तमयेति। अमृतत्वादिश्रवणं तर्हि कथं तत्राऽऽह—कृतेति। प्रतिज्ञावाक्यार्थप्राधान्यात्तदुपपादकवायूत्पत्तिप्रतिपादकवाक्यानां च बहुत्वान्मुख्यभूयस्त्वाभ्यां बलीयस्त्वादमृतत्वास्तमयनिषेधावापेक्षिकत्वेन नेयावभ्यासस्तूपास्यादरार्थत्वान्न वायोरमृतत्वमात्यन्तिकं गमयत्यप पुनर्मृत्युं जयतीत्यपमृत्युजयस्यैव वाक्यशेषे श्रवणादिति भावः। अधिकाशङ्काभावेनातिदेशमाक्षिपति—

---

१ क. °त्येकप°। २ ङ. ञ. °श्च दर्शितः सैं। ३ झ. ट. तु। ४ क. ख. °त्वान्मैव°।

सति विशेष इति । उच्यते । सत्यमेवमेतत्तथाऽपि मन्दधियां शब्दमात्रकृताशङ्कानिवृत्त्यर्थोऽयमतिदेशः क्रियते । संवर्गविद्यादिषु [छा० ४-३-१] ह्युपास्यतया वायोर्महाभागत्वश्रवणात् । अस्तमयप्रतिषेधादिभ्यश्च भवति नित्यत्वाशङ्का कस्यचिदिति ॥ ८ ॥ (२)

(सद्रूपस्य ब्रह्मणोऽजन्यत्वं जगज्जनकत्वं च, अधि० ३)

असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥ (३)

वियत्पवनयोरसंभाव्यमानजन्मनोरप्युत्पत्तिमुपश्रुत्य ब्रह्मणोऽपि भवेत्कुतश्चिदुत्पत्तिरिति स्यात्कस्यचिन्मतिः । तथा विकारेभ्य एवाऽऽकाशादिभ्य उत्तरेषां विकाराणामुत्पत्तिमुपश्रुत्याऽऽ-

---

नन्विति । अधिकां[1] शङ्कां दर्शयन्नुत्तरमाह—**उच्यत इति** । यदुक्तमसति विशेषे नातिदेशोऽर्थवानिति तदङ्गी करोति—**सत्यमिति** । तर्हि पूर्वेणैवाधिकरणेन गतत्वादिदमधिकरणमनारभ्यमिति तत्राऽऽह—**तथाऽपीति** । शब्दानुरोधिन्यपि शङ्का न वस्त्वनुरोधिनीति मात्रशब्दार्थः । शब्दमात्रकृतामाशङ्कामेव दर्शयति—**संवर्गेति** । स यो वायुं दिशां वत्सं वेदेत्यादिविद्यासंग्रहार्थमादिपदम् । द्वितीयमादिपदममृतत्वश्रवणमभ्यासं च संगृह्णाति । अमृतत्वादिश्रवणस्य कृतप्रतिविधित्वात्कथं तद्वशादाशङ्केति तत्राऽऽह—**कस्यचिदिति** । प्रतिज्ञानुरोधादिना[2] वायोर्नित्यत्वानुपपत्तेरुक्तत्वात्तत्कारणे ब्रह्मणि समन्वयः सिध्यतीत्युपसंहर्तुमितिशब्दः ॥ ८ ॥ (२)

ब्रह्मणो वियत्पवनकारणत्वं पूर्वाधिकरणयोरुक्तम् । इदानीमग्नेरेव विस्फुलिङ्गोऽग्नेर्यथोत्पद्यते तथा ब्रह्मान्तराद्ब्रह्मोत्पद्यतामित्याशङ्क्याऽऽह—**असंभवस्त्विति** । न चास्य कश्चिज्जनितेत्यादेर्ब्रह्मणोऽजत्वं प्रतिपादयतः समन्वयस्य त्वं जातो भवसीत्यादिश्रुत्या विरोधोऽस्त्युत नेत्येकवाक्यत्वासंभवसंभवाभ्यां संदेहे पूर्वपक्षमाह—**वियदिति** । दर्शितश्रुतिविरोधपरिहारद्वारा समन्वयदृढीकरणात्पादादिसंगतयः । पूर्वपक्षे विरोधादप्रामाण्ये नित्यसिद्धे ब्रह्मणि समन्वयासिद्धिः । सिद्धान्ते वाक्यैक्यादविरोधात्प्रामाण्ये तैत्र[3] तत्सिद्धिः । संभावनामात्रादर्थसिद्धावतिप्रसङ्गात्प्रमाणमेव साधकं वक्तव्यमित्याशङ्क्याऽऽह—**तथेति** । ब्रह्म कस्यचित्कार्यं कारणत्वादाकाशवत् । न चाजत्वश्रुतिविरोधोऽनुमानानुगृहीतजन्मश्रुत्या तस्या विरोधात् । न चानवस्थानुगृहीताजत्वश्रुतिर्बलवती कार्यकारणपरम्पराया बीजाङ्कुरवदनादित्वादन्धपरम्परया[4] तदनुगृहीतत्वेऽपि तत्रानुमानानुगृहीतत्वेनाविशेषादस्ति विरोधः श्रुत्योरिति[5] भावः । ब्रह्म न कार्यं कारणशून्यत्वान्नरविषाणवदित्यनुमानानुगृहीताजत्वश्रुत्या ब्रह्मणो नित्यत्वाज्जन्मश्रुते-

---

१ ज्ञ. °धिकाश° । २ क. ख. °रोधित्वादि । ३ क. तत्सि° । ४ ज्ञ. ड. °म्परया । ५ ज्ञ. श्रुतेरि ।

(सद्रूपस्य ब्रह्मणोऽजन्यत्वं जगज्जनकत्वं च, अधि० ३)

काशस्यापि विकारादेव ब्रह्मण उत्पत्तिरिति कश्चिन्मन्येत। तमाशङ्कामपनेतुमिदं सूत्रम् "असंभवस्तु" इति। न खलु ब्रह्मणः सदात्मकस्य कुतश्चिदन्यतः संभव उत्पत्तिराशङ्कितव्या। कस्मात्। "अनुपपत्तेः"। सन्मात्रं हि ब्रह्म न तस्य सन्मात्रादेवोत्पत्तिः संभवत्यसत्यतिशये प्रकृतिविकारभावानुपपत्तेः। नापि सद्विशेषाद्दृष्टविपर्ययात्। सामान्याद्विशेषा उत्पद्यमाना दृश्यन्ते मृदादेर्घटादयो न तु विशेषेभ्यः सामान्यम्। नाप्यसतो निरात्मकत्वात्। "कथमसतः सज्जायेत" [छा० ६-२-२] इति चाऽऽक्षेपश्रवणात्। "स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः" [श्वे० ६-९] इति च ब्रह्मणो जनयितारं वारयति। वियत्पवनयोः पुनरुत्पत्तिः प्रदर्शिता न तु ब्रह्मणः साऽस्तीति वैषम्यम्। न च विकारेभ्यो विकारान्तरोत्पत्तिदर्शनाद्ब्रह्मणोऽपि विकारत्वं भवितुमर्हतीति मूलप्रकृत्यनभ्युपगमेऽनवस्थाप्रसङ्गात्। या मूलप्रकृतिरभ्युपगम्यते तदेव च नो ब्रह्मेत्यविरोधः॥९॥(३)

रौपाधिकजन्मविषयत्वेनाविरोधान्नित्यसिद्धे ब्रह्मणि समन्वयसिद्धिरिति सिद्धान्तमाह—**तामिति**। तत्र प्रतिज्ञाभागं विभजते—**न खल्विति**। कारणशून्यत्वं विशदीकुर्वन्प्रश्नपूर्वकं सौत्रं हेतुमादत्ते—**कस्मादिति**। ब्रह्मणो हि कार्यत्वं ब्रुवता सन्मात्रं वा सद्विशेषो वा तस्यासद्वा कारणमिति वक्तव्यं नाऽऽद्य इत्याह—**सन्मात्रं हीति**। न द्वितीय इत्याह—**नापीति**। दृष्टविपर्ययमेव साधयति—**सामान्यादिति**। न तृतीय इत्याह—**नापीति**। श्रुतिविरोधाच्चायं पक्षो न संभवतीत्याह—**कथमिति**। युक्त्या हेतुमुपपाद्य श्रुत्योपपादयति—**स कारणमिति**। यदुक्तं वियत्पवनयोरसंभाव्यमानजन्मनोरपीत्यादि तत्राऽऽह—**वियदिति**। विभक्तत्वमुत्पत्तावुपपत्तिः। ब्रह्मण्यपि तुल्यं विभक्तत्वमित्याशङ्क्य ब्रह्म त्वविरोधान्मैवमित्याह—**न त्विति**। यत्तु तथेत्यादावनुमानमुक्तं तदूषयति—**न चेति**। तस्य कार्यत्वं वदता मूलप्रकृतिरुपगम्यते न वेति विकल्प्य द्वितीयं प्रत्याह—**मूलेति**। न चानादित्वान्नानवस्था ब्रह्मणोऽपि कार्यत्वे तत्तदुपादानपरम्परायौगपद्ये प्रलयाभावप्रसङ्गादिति भावः। प्रथमे तुल्यबाधापत्तिरित्याशयेनाऽऽह—**या मूलेति**। एवं कार्यत्वानुमानस्यौऽऽभासत्वाज्जन्मश्रुतेश्चौपाधिकविषयत्वादकार्यत्वानुमानानुगृहीताजत्वश्रुतेर्बलीयस्त्वादितरस्यास्तदनुरोधित्वादितरेतराविरोधान्नित्याद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयः संभवतीत्युपसंहरति—**इत्यविरोध इति॥ ९॥ (३)**

---

१ झ. न तु खं°। २ क. ज. °ति ब्रं°। ३ क. ज. °र्हति। ४ क. ज. °व नो। ५ क. ख. °स्यासत्त्वाज्ज°।

(कार्यकारणाभेदेन वायुभूतब्रह्मणस्तेजःसृष्टिः, अधि० ४)

तेजोऽतस्तथा ह्याह ॥ १० ॥ (४)

छान्दोग्ये सन्मूलत्वं तेजसः श्रावितं तैत्तिरीयके[1] तु वायुमूलत्वं तत्र तेजोयोनिं प्रति श्रुतिविप्रतिपत्तौ सत्यां प्राप्तं तावद्ब्रह्मयोनिकं[2] तेज इति । कुतः । "सदेव" इत्युपक्रम्य "तत्तेजोऽसृजत" [छा० ६ २-३] इत्युपदेशात् । सर्वविज्ञानप्रतिज्ञायाश्च ब्रह्मप्रभवत्वे सर्वस्य संभवात् । "तज्जलान्" [छा० ३-१४-१] इति चाविशेषश्रुतेः । "एतस्माज्जायते प्राणः" [मुण्ड० २-१-३] इति चोपक्रम्य श्रुत्यन्तरे सर्वस्याविशेषेण ब्रह्मजत्वोपदेशात् । तैत्तिरीयके च "स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किंच" [तै०

अध्यस्तस्याधिष्ठानत्वायोगान्न कुतश्चिदपि ब्रह्मणो जन्मेत्युक्तम् । इदानीं वायोरपि तर्हि कार्यत्वेनाध्यस्तत्वात्तेजसस्ततो जन्मानुपपत्तेर्ब्रह्मण एव तज्जन्मेति प्रत्यवस्थाने प्रत्याह—**तेजोऽत इति** । तैत्तिरीये छान्दोग्ये च जायमानत्वेन श्रुतं तेजो विषयस्तत्किं ब्रह्मकार्यं किं वा वायुकार्यमिति संशयस्य बीजं दर्शयन्पूर्वपक्षमाह—**छान्दोग्य इति** । तत्रेति शाखाद्वयोक्तिः । न च तत्तेजोऽसृजतेति श्रुतेर्निमित्तविषयत्वाद्वायोरग्निरिति श्रुतेरुपादानविषयत्वादविप्रतिपत्तिर्वहु स्यामिति बहुभवनाशंसनलिङ्गेनोपादानत्वावगमादिति भावः । अत्रापि श्रुत्योर्विरोधनिराकरणद्वारा वायुभावमापन्ने ब्रह्मणि तेनोयोनौ समन्वयदृढीकरणात्पादादिसंगतयः । पूर्वपक्षे श्रुत्योरनेकवाक्यत्वेन विरोधादप्रामाण्ये तेजोहेतौ ब्रह्मणि समन्वयासिद्धिः । सिद्धान्ते तदेकवाक्यत्वेनाविरोधात्प्रामाण्ये तत्र तत्सिद्धिः । सत्यां विप्रतिपत्तौ विशेषकारणमन्तरेणान्यतरनिश्चयासिद्धिरिति शङ्कते—**कुत इति** । उपक्रान्तस्य सन्मात्रस्यैकमेवाद्वितीयमित्यवधारिताद्वितीयत्वनिर्धारणाय तत्तेजोऽसृजतेति वचनादुपादानादेवोपादेयस्याव्यतिरेकादुपादानत्वमेव तेजः प्रति ब्रह्मणो विवक्षितमित्याह—**सदेवेति** । किंचाऽऽद्येऽधिकरणे सर्वविज्ञानप्रतिज्ञानुगृहीतोत्पत्तिश्रुतेर्ब्रह्मजत्वं वियतो वर्णितं तेनैव न्यायेन तेजसोऽपि ब्रह्मजत्वमेष्टव्यमित्याह—**सर्वविज्ञानेति** । इतश्च ब्रह्मजत्वं तेजसो युक्तमित्याह—**तज्जलानिति चेति** । अथर्वणश्रुत्या च तेजसो ब्रह्मजत्वसिद्धिरित्याह—**एतस्मादिति** । तथाऽपि तैत्तिरीयश्रुत्यालोचनायां न ब्रह्मजत्वं तेजसः स्यादित्याह—**तैत्तिरीयके चेति** । ननु वायोरग्निरिति श्रुतेर्वायुद्वारा तेजसो ब्रह्मजत्वेऽपि दर्शितश्रुतयो न विरुध्यन्तेऽन्यथा वायोरग्निरिति श्रुतिर्बाध्येत तत्राऽऽह—

---

१ झ. ट. °के वा° । २ क. ज. ञ. ट °नि ते° । ३ झ. °र्निमितवि° । ४ ठ. ड. °त्वादि° । ५ ड. °जोयोनौ ब्र° । ६ ड. °जसो ब्र° । ७ ठ. ड. °यो निरु० ।

(कार्यकारणाभेदेन वायुमूतब्रह्मणस्तेजःसृष्टिः, अधि० ४)

२-६-१] इत्यविशेषश्रवणात्। तस्माद्वायोरग्निरिति क्रमोपदेशो द्रष्टव्यः। वायोरनन्तरमग्निः संभूत इति। एवं प्राप्त उच्यते—"तेजोऽतः" मातरिश्वनो जायत इति। कस्मात्। "तथा ह्याह" "वायोरग्निः"[तै०२-१] इति। अव्यवहिते हि तेजसो ब्रह्मजत्वे सत्यसति वायुजत्वे "वायोरग्निः" इतीयं श्रुतिः कदर्थिता स्यात्। ननु क्रमार्थैषा भविष्यतीत्युक्तम्। नेति ब्रूमः। "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" [तै०२-१-१] इति पुरस्तात्संभवत्यपादानस्याऽऽत्मनः पञ्चमीनिर्देशात्तस्यैव[1] च संभवतेरिहाधिकारात्परस्तादपि तदधिकारे "पृथिव्या ओषधयः" [तै०२-१-१] इत्यपादानपञ्चमीदर्शनाद्वायोरग्निरित्यपादानपञ्चम्यैवैषेति[2] गम्यते। अपि च वायोरूर्ध्वमग्निः संभूत इति कल्प्य उपपदार्थयोगः कृत्स्नस्तु कारकार्थयोगो वायोरग्निः संभूत इति। तस्मादेषा

तस्मादिति। यद्यपि वायोरग्निरित्यपादानपञ्चमी कारकविभक्तिर्वायोरनन्तरमित्युपपदविभक्तेर्बलीयसी तथाऽपि बहुश्रुतिविरोधादुर्बलाऽपि सैवोचितेति मत्वा क्रमोपदेशमेव विशदयति—**वायोरिति**। यदि पुनरित्थमस्याः श्रुतेरर्थो नाऽऽश्रीयते तर्हि विरुद्धार्थैव श्रुतिरियं पूर्वोक्तश्रुतिभिरिति पूर्वपक्षमनुभाष्य सिद्धान्तमाह—**एवं प्राप्त इति**। तत्र प्रश्नपूर्वकं हेतुमाह—**कस्मादिति**। हेतुमेव व्यतिरेकद्वारा विवृणोति—**अव्यवहिते हीति**। कदर्थिता पीडिता बाधितेति यावत्। तेजसो वायुयोनित्वं पञ्चमीश्रुत्या निर्धारितं ब्रह्मयोनित्वं तु तस्य बहुभवनाशंसनलिङ्गादवगतमतः श्रुत्या लिङ्गं बाधित्वा वायुयोनित्वं मुख्यमादाय लिङ्गपरम्परया ब्रह्मयोनित्वविषयं विवक्षमाणेन न्यायेन ब्रह्मवायुसमुच्चयमेवाभ्युपगमयतीति भावः। पञ्चमीश्रुतेरुक्तां गतिं पूर्ववादी स्मारयति—**नन्विति**। न क्रमार्थत्वं पञ्चम्या युक्तं पूर्वोत्तरवाक्योपादानेनापादानार्थत्वप्रतीतेरिति परिहरति—**नेतीति**। उत्तरवाक्यमिहेत्युच्यते। इतश्चापादानार्थत्वमेव पञ्चम्या न क्रमार्थत्वमित्याह—**अपि चेति**। प्रकरणादुपादानाख्यापादानकारकाभिधायित्वं पञ्चम्याः सिद्धं परित्यज्य पदार्थान्तरयोगोऽसिद्धो न कल्पयितुं शक्यते कृत्स्नकल्पययोर्मध्ये कृत्स्नस्यैव बलीयस्त्वादित्यर्थः। पञ्चमीश्रुतेरक्रमार्थत्वे फलितमाह—**तस्मादिति**। श्रुतिबलात्तेजसो वायुजत्वे तद्बलादेव ब्रह्मजत्वमपि तस्याऽऽस्थेयमतः

---

१ ट. 'व सं'। २ क. 'भीनिर्देशाद्वा'। ३ ज. ञ 'दाने प'। ४ ट. 'म्येषे'। ५ क. ख. ठ. ड. 'नाऽऽस्थीय'। ६ क. ख. 'त्वं त'। ७ क. ख. 'लिङ्गं प'। ८ क. ख. 'पयमवगतं सद्विवं'।

श्रुतिर्वायुयोनित्वं तेजसोऽवगमयति । नन्वितराऽपि श्रुतिर्ब्रह्मयोनित्वं तेजसोऽवगमयति " तत्तेजोऽसृजत " इति । न । तस्याः पारम्पर्यजत्वेऽप्यविरोधात् । यदाऽपि ह्याकाशं वायुं च सृष्ट्वा वायुभावापन्नं ब्रह्म तेजोऽसृजतेति कल्प्यते तदाऽपि ब्रह्मजत्वं तेजसो न विरुध्यते । यथा " तस्याः शृतं तस्या दधि तस्या आमिक्षा " इत्यादि [शत० ३-३-३-२] । दर्शयति च ब्रह्मणो विकारात्मनाऽवस्थानं " तदात्मानं स्वयमकुरुत " [तै० २ ७-१] इति । तथाचेश्वरस्मरणं भवति " बुद्धिर्ज्ञानमसंमोहः " [भ० गी० १०-४] इत्याद्यनुक्रम्य—

" भवन्ति भावा भूतानां मत्त एव पृथग्विधाः "

[भ० गी० १०-५] इति । यद्यपि बुद्ध्यादयः स्वकारणेभ्यः प्रत्यक्षं भवन्तो दृश्यन्ते तथाऽपि सर्वस्य भावजातस्य साक्षात्प्रणाड्या वेश्वरवंश्यत्वात् । एतेनाक्रमसृष्टिवादिन्यः श्रुतयो व्याख्याताः । तासां सर्वथोपपत्तेः ।

श्रुत्योर्मिथो विरोधः स्यादिति शङ्कते—**नन्विति** । वायोरग्निरिति साक्षात्तेजसो वायुजत्वमुच्यते तत्तेजोऽसृजतेति त्वाकाशवायुद्वारा तस्य ब्रह्मजत्वमिति विरोधसमाधिरिति समाधत्ते—**न तस्या इति** । अविरोधमेव साधयति—**यदाऽपीति** । साक्षात्पारम्पर्याभ्यां कारणत्वे दृष्टान्तमाह—**यथेति** । तस्या धेनोः शृतं तप्तं क्षीरं विवक्षितम् । तदेव दधिसंसृष्टमामिक्षेति भेदः । तत्र क्षीरस्य दध्नि साक्षात्कारणत्वेऽपि गव्यं दधीति प्रयोगो दृष्टस्तथाऽत्रापीत्यर्थः । तर्हि ब्रह्मणो वायुभावापत्तौ किं प्रमाणमित्याशङ्क्याऽऽह—**दर्शयति चेति** । पारम्पर्यजस्यापि तज्जत्वव्यपदेशयोग्यत्वे प्रमाणमाह—**तथाचेति** । अन्तःकरणादिभ्यः स्वकारणेभ्यो बुद्ध्यादीनामयशोन्तानामुत्पत्तिदर्शनान्मत्त एवेत्यवधारणमयुक्तमित्याशङ्क्याऽऽह—**यद्यपीति** । प्रणाड्या परम्परयेति यावत् । ईश्वरवंश्यत्वात्तद्वंशोद्भवत्वादिदमवधारणस्मरणमिति शेषः । सर्वस्येत्यस्मादर्वाक्तथाऽपीति वक्तव्यम् । पारम्पर्यविषयत्वं तत्तेजोऽसृजतेति श्रुतेरुक्तम् । इदानीमिदं सर्वमसृजतेत्यादिश्रुतेरपि पारम्पर्यविषयत्वमेषितव्यमित्याह—**एतेनेति** । सर्वस्य साक्षाद्ब्रह्मजत्वाभावे कथं तासामुपपत्तिस्तत्राऽऽह—**तासामिति** । सर्वथा साक्षात्परम्परया वा सर्वस्य ब्रह्मजत्वमात्रेणाक्रमवादिनीनां श्रुतीनामुपपत्तेरितरश्रुतिवशात्पारम्पर्यमेवाऽऽऽ-

---

१ क. ज. झ. ट. 'सो ग°' । २ क. ज. झ. ट. 'सो ग°' । ३ क. ज. झ. ट. 'मयेत्तत्ते°' । ४ क. ज. °ल्याद्युपक्रं° । ५ ज. झ. ट. 'मवत्सृष्टिं' । ६ ख. ठ. ड. 'वंशत्वा°' ।

(वेदोक्ततेजोरूपब्रह्मणो जलोत्पत्तिसिद्धिः, अधि० ५)

क्रमवत्सृष्टिवादिनीनां त्वन्यथाऽनुपपत्तेः। प्रतिज्ञाऽपि सद्वीक्ष्यत्वमात्रमपेक्षते नाव्यवहितजन्यत्वमित्यविरोधः॥ १० ॥ (४)

(वेदोक्ततेजोरूपब्रह्मणो जलोत्पत्तिसिद्धिः, अधि० ५)

आपः ॥ ११ ॥ (५)

"अतस्तथा ह्याह" इत्यनुवर्तते। आपोऽतस्तेजसो जायन्ते। कस्मात्तथा ह्याह। "तदपोऽसृजत" [छा० ६-२-३] इति "अग्नेरापः" [तै० २-१] इति च। सति वचने नास्ति संशयः। तेजसस्तु सृष्टिं व्याख्याय पृथिव्या व्याख्यास्यन्नपोऽन्तरियामिति "आपः" इति सूत्रयांबभूव॥ ११ ॥ (५)

श्रयणीयमित्यर्थः। क्रमश्रुतीनामेवाक्रमश्रुतिवशान्नयनं किं न स्यादित्याशङ्क्याऽऽह—**क्रमवदिति**। अन्यथा पारम्पर्यमन्तरेणेति यावत्। न साक्षात्कारणविषयत्वमिति शेषः। अव्यवधानेन ब्रह्मजत्वाभावे कथं प्रतिज्ञेत्याशङ्क्याऽऽह—**प्रतिज्ञाऽपीति**। अक्रमश्रुतीनां क्रमश्रुत्यनुसारित्वेन मिथो विरोधाभावात्तेजसो वियत्पवनद्वारा कारणे ब्रह्मणि समन्वयः सिध्यतीत्युपसंहरति—**इत्यविरोध इति**॥ १० ॥ (४)

तेजसो वायुकार्यत्वमुक्त्वाऽनन्तरनिर्दिष्टानामपां तेजसो जन्मातिदेशेन निरूपयति—**आप इति**। वाक्यं हि सूत्रं न पदमात्रं तत्कुतोऽस्य सूत्रतेत्याशङ्क्य सूत्रं पूरयति—**अत इति**। एतस्माज्जायत इत्युपक्रम्य खं वायुर्ज्योतिराप इत्यग्नेराप इति तदपोऽसृजतेति च श्रूयते। तत्र किमापः सतो जायन्ते किं वा तेजस इति श्रुतिविप्रतिपत्तेः संदेहे सत्यपामग्निदाह्यत्वादग्नेरुत्पत्त्ययोगादग्नेरापस्तदपोऽसृजतेति च श्रुती गौण्यावन्यथाऽऽथर्वणश्रुतिविरोधान्न ब्रह्मणि समन्वयसिद्धिरिति पूर्वपक्षे सिद्धान्तमाह—**आपोऽत इति**। अपां कारणत्वे तेजसः श्रुतेऽपि प्रत्यक्षविरोधान्निश्चयासिद्धिरित्याशङ्क्याऽऽह—**सतीति**। त्रिवृत्कृतयोरग्नेजसोर्विरोधेऽपि तयोरत्रिवृत्कृतयोरतीन्द्रियत्वाद्विरोधाप्रतीतेर्वचने सति निश्चयोपपत्तिरित्यर्थः। संदेहाभावे विचारस्य निरवकाशत्वात्कथमिदं सूत्रमित्याशङ्क्याऽऽह—**तेजसस्त्विति**। महाभूतसर्गव्याख्याने प्रक्रान्ते क्रमप्राप्तानामपामतिक्रमणं मा भूदित्यभिप्रेत्य प्रत्यक्षविरोधादाप एवाग्र आसुरिति च पूर्वसद्भावश्रवणादाथर्वणश्रुतेश्चाग्नेराप इत्याद्या श्रुतिर्गौणीति मन्दा शङ्कां निरासितुमिदं सूत्रम्। पूर्ववत्क्रमश्रुत्यनुरोधेनाक्रमश्रुतेर्नेतव्यत्वात्पूर्वसद्भावश्रुतेश्च भूतसूक्ष्ममात्रविषयत्वेनाविरोधात्तेजोभावमापन्ने ब्रह्मण्यपां कारणे तदपोऽसृजतेत्यादिश्रुतेः समन्वयसिद्धौ न गौणार्थतेति भावः। तत्र च तैत्तिरीयादिश्रुतेराथर्वणादिश्रुतेश्च मिथोविरोधनिराकरणद्वारा ब्रह्मण्येवाबादिकारणे समन्वयप्रतिपादनात्पादादिसंगतिस्तथैव फलभेदश्चेति द्रष्टव्यम्॥ ११ ॥ (५)

---

१ ज. 'स्यन्नापोऽ'। २ क. 'पो नान्त'। ३ क ख. मवतीं'। ४ क. ठ. ड. 'पां कर'।

(छान्दोग्योक्तजलोत्पन्नान्नशब्दस्य पृथिव्यर्थकत्वम् , अधि० ६)

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥ (६)

" ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त " [छा० ६-२-४] इति श्रूयते । तत्र संशयः किमनेनान्नशब्देन व्रीहियवाद्यभ्यवहार्यं वौदनाद्युच्यते किं वा पृथिवीति । तत्र प्राप्तं तावद्व्रीहियवाद्योदनादि वा परिग्रहीतव्यमिति। तत्र ह्यन्नशब्दः प्रसिद्धो लोके। वाक्यशेषोऽप्येतमर्थमुपोद्बलयति— " तस्माद्यत्र क्वं[1] च वर्षति तदेव भूयिष्ठमन्नं भवति " [छा० ६-२-४] इति । व्रीहियवाद्येव हि सति वर्षणे बहु भवति न पृथिवीति । एवं प्राप्ते ब्रूमः—पृथिव्येवेयमन्नशब्देनाद्यो जायमाना विवक्ष्यत इति । कस्मात् । अधिकाराद्रूपाच्छब्दान्तराच्च । अधिकारस्तावत् " तत्तेजोऽसृजत " " तदपोऽसृजत " इति

तेजःकार्यत्वेनोक्तानामपां कार्यत्वेन ता अन्नमसृजन्तेति श्रुतस्यान्नस्य पृथिवीत्वं साधयति—**पृथिवीति** । अधिकरणस्य विषयमाह—**ता इति** । अन्नशब्दान्महाभूतप्रकरणाच्च दर्शितश्रुतिं विषयीकृत्य विचारप्रयोजकं संदेहमाह—**तत्रेति** । अभ्यवहार्यं भक्षणयोग्यमिति यावत्। अप्कार्यविगानद्वारा कारणसमन्वये विगानं दर्शयन्पूर्वपक्षयति—**तत्र प्राप्तमिति** । ता अन्नमसृजन्तेति श्रुतेरद्भ्यः पृथिवीति श्रुतेश्च विरोधनिराकरणद्वारेण परम्परया पृथिवीकारणे ब्रह्मणि समन्वयप्रतिपादनादत्र पादादिसंगतिसौलभ्यमिति मन्तव्यम् । उक्तश्रुत्योरनेकवाक्यतया विरोधादप्रामाण्ये पूर्वपक्षे समन्वयासिद्धिः । सिद्धान्ते त्वेकवाक्यत्वेनाविरोधात्प्रामाण्ये तत्सिद्धिः । प्रकरणादिना पृथिवीप्रतीतौ कथमन्नशब्देन व्रीह्यादि ग्राह्यमित्याशङ्क्य श्रुतेस्ततो बलीयस्त्वादित्याह—**तत्र हीति** । अन्नशब्देन व्रीह्यादि ग्राह्यमित्यत्र लिङ्गमपि दर्शयति—**वाक्यशेषोऽपीति** । तस्मादित्यद्भ्योऽन्नस्य सृष्टत्वादिति यावत् । तदेव तत्रैवेत्यर्थः । वर्षणे सत्यन्नस्य बहुभवनं श्रुतमित्येतावता कथमन्नशब्दस्य पृथिवीव्यावृत्तिरित्याशङ्क्याऽऽह—**व्रीहीति** । श्रुतिलिङ्गाभ्यामन्नशब्दस्य प्रसिद्धार्थत्वे सिद्धे ता अन्नमसृजन्तेत्यादिश्रुतेः श्रुत्यन्तरेणाद्भ्यः पृथिवीत्यादिना विरोध इति पूर्वपक्षोपसंहार इतिशब्दार्थः । पूर्वपक्षमनूद्य सिद्धान्तसूत्रमवतार्य प्रतिज्ञाभागं व्याचष्टे—**एवं प्राप्त इति** । श्रुतिलिङ्गाभ्यामन्नशब्दस्य व्रीह्यादिविषयत्वे दर्शिते पृथिवीविषयत्वं हेत्वभावादयुक्तमिति शङ्कते—**कस्मादिति** । अन्नशब्दस्य पृथिवीविषयत्वे सूत्रोक्तं हेतुत्रयं विभज्यावतारयति—**अधिकारादिति** । अधिकारशब्दितं प्रकरणमादौ विवृणोति—**अधिकार इति** ।

---

[1] ङ. ञ. क्वचन वै ।

(छान्दोग्योक्तजलोत्पन्नान्नशब्दस्य पृथिव्यर्थकत्वम्, अधि० ६)

महाभूतविषयो वर्तते। तत्र क्रमप्राप्तां पृथिवीं महाभूतं विलङ्घ्य नाकस्माद्व्रीह्यादिपरिग्रहो न्याय्यः। तथा रूपमपि वाक्यशेषे पृथिव्यनुगुणं दृश्यते " यत्कृष्णं तदन्नस्य " [छा० ६-४-१] इति। न ह्योदनादेरभ्यवहार्यस्य कृष्णत्वनियमोऽस्ति नापि व्रीह्यादीनाम्। ननु पृथिव्या अपि नैव कृष्णत्वनियमोऽस्ति पयःपाण्डुरस्याङ्गाररोहितस्य च क्षेत्रस्य दर्शनात्। नायं दोषो बाहुल्यापेक्षत्वात्। भूयिष्ठं हि पृथिव्याः कृष्णं रूपं न तथा श्वेतरोहिते। पौराणिका अपि पृथिवीछायां शर्वरीमुपदिशन्ति। सा च कृष्णाभासेत्यतः कृष्णं रूपं पृथिव्या इति श्लिष्यते। श्रुत्यन्तरमपि समानाधिकारम् "अद्भ्यः पृथिवी" [तै० २-१] इति भवति। " तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्यभवत् "। [बृ० १-२-२] इति च। पृथिव्यास्तु व्रीह्यादेरुत्पत्तिं दर्शयति " पृथिव्या ओषधय ओषधीभ्योऽन्नम् " [तै० २-१] इति च। एवमधिकारादिषु पृथिव्याः प्रतिपादकेषु

प्रकरणस्य महाभूतविषयत्वेऽपि परम्परया व्रीह्यादिविषयत्वमन्नशब्दस्य किं न स्यादित्याशङ्क्य प्रबलप्रमाणं विना परम्पराकल्पनमनुचितमित्याह—**तत्रेति**। प्रकरणवल्लिङ्गमपि सिद्धान्ते साधकमस्तीत्याह—**तथेति**। लिङ्गस्यान्यथासिद्धिं शङ्कित्वा दूषयति—**न हीति**। कृष्णत्वनियमराहित्यं पृथिव्यामपि तुल्यमित्यसिद्धिं लिङ्गस्य चोदयति—**नन्विति**। पृथिवीप्रदेशानामकृष्णानामपि प्रथनात्तत्र कृष्णत्वनियमाभावादसंभवि लिङ्गमिति तन्निराकरोति—**नायमिति**। बाहुल्यमेव प्रकटयति—**भूयिष्ठं हीति**। वाक्यशेषे यदन्नस्य कृष्णत्वं श्रुतं तत्तस्य पृथिवीत्वं गमयतीत्यत्र पौराणिकसंमतिमाह—**पौराणिका अपीति**। प्रकरणलिङ्गे दर्शयित्वा स्थानमपि सिद्धान्ते दर्शयति—**श्रुत्यन्तरमपीति**। समानाधिकारं महाभूतसृष्टिविषयत्वेन समानप्रकरणमिति यावत्। तत्रैव बृहदारण्यकश्रुतिमुदाहरति—**तद्यदिति**। तत्तत्र सृष्टिकाले यदपां यस्तासां शरो मण्डो घनीभावोऽभूदिति प्रकृतः शरो निरुच्यते स हि समहन्यत संघातात्मना परिणतः सोऽपां कठिनाकारपरिणामः पृथिव्यभवत्। विशेष्यपृथिव्यपेक्षया सेत्युक्तम्। चकारस्तु श्रुत्यन्तरमितिपदानुकर्षणार्थम्। तैत्तिरीयके तेज आरभ्य चतुर्थपर्यायपठितस्यैव व्रीह्यादिरूपत्वात्तृतीयपर्यायस्य पृथिवीविषयत्वाच्छान्दोग्येऽपि तस्य तद्विषयत्वं युक्तमिति स्थानमेव प्रकटयति—**पृथिव्यास्त्विति**। प्रमाणत्रयफलं निगमयति—**एवमिति**। अन्नशब्दश्रुत्या व्रीह्यादिप्रतिपत्तिरुक्तेत्याशङ्क्याऽऽह—**प्रसि-**

---

१ ड. 'भूतसृष्टि वि'। २ क. कृष्णेत्य'। ३ ठ. ड. सोऽयं क'।

(पूर्वपूर्वकार्योपाधिकाद्ब्रह्मण उत्तरोत्तरकार्योत्पत्तिसिद्धिः, अधि० ७)

सत्सु कुतो व्रीह्यादिप्रतिपत्तिः । प्रसिद्धिरप्यधिकारादिभिरेव बाध्यते । वाक्यशेषोऽपि पार्थिवत्वादन्नाद्यस्य तद्द्वारेण पृथिव्या एवाद्भ्यः प्रभवत्वं सूचयतीति द्रष्टव्यम् । तस्मात्पृथिवीयमन्नशब्देति ॥ १२ ॥ (६)

(पूर्वपूर्वकार्योपाधिकाद्ब्रह्मण उत्तरोत्तरकार्योत्पत्तिसिद्धिः, अधि० ७)

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥ (७)

किमिमानि वियदादीनि भूतानि स्वयमेव स्वविकारान्सृजन्त्याहोस्वित्परमेश्वर एव तेन तेनाऽऽत्मनाऽवतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति संदेहे सति प्राप्तं तावत्स्वयमेव सृजन्तीति । कुतः । " आकाशाद्वायुर्वायोरग्निः " [तै० २-१] इत्यादिस्वान्त्र्यश्रवणात् । नन्वचेतनानां स्वतन्त्राणां प्रवृत्तिः

द्धिरपीति । लिङ्गानुगृहीता श्रुतिर्बलवती कुतो बाध्यतेत्याशङ्क्य त्वदुक्तं लिङ्गं सिद्धान्तानुकूलमित्याह—वाक्यशेषोऽपीति । प्रकरणादिभिर्यदा पृथिवी परिगृह्यते तदा श्रुतिलिङ्गयोर्नात्यन्तबाधः स्वार्थापरित्यागेन तदाकारपरिणतायां पृथिव्यां प्रवृत्त्युपपत्तेः श्रुतिलिङ्गाभ्यामन्नमात्रपरिग्रहे हेतुलिङ्गप्रकरणादीनामत्यन्तबाधः स्यात्तेषां पृथिवीविषयत्वात्तदनुपादाने निरवकाशत्वात्तत्र प्रमाणसमुदाययोरितरेतरविरोधेऽन्यतरस्यात्यन्तबाधेनान्यतरोपादानाद्वरमन्यतरस्याल्पबाधेनान्यतरोपादानमिति श्रुतिलिङ्गयोरन्नमात्रनिष्ठत्वं बाधित्वा प्रकरणादिभिरन्नाकारपरिणता पृथिव्येव ग्रहीतव्येति मन्वानः सिद्धान्तमुपसंहरति—तस्मादिति । तैत्तिरीयश्रुत्यनुसारेण च्छन्दोगश्रुतिनयनात्तयोरविरोधादन्नभावमापन्ने पृथिवीकारणे ब्रह्मणि समन्वयोपपत्तिरिति निगमयितुमितीत्युक्तम् ॥ १२ ॥ (६)

पूर्वेष्वधिकरणेषु महाभूतानां पूर्वस्मात्पूर्वस्मादुत्तरस्योत्तरस्य सृष्टिरुपदिष्टा संप्रति भूतानां स्वकार्ये स्वातन्त्र्याद्ब्रह्मणः सर्वकारणत्वश्रुतिविरोधः स्यादित्याशङ्क्याऽऽह—तदभिध्यानादिति । विषयप्रदर्शनपूर्वकमाकाशादिशब्दानां चेतनाचेतनविषयत्वाभ्यां संदेहमुक्त्वा पूर्वपक्षं गृह्णाति—किमिमानीति । अत्र च भूतसृष्टत्वश्रुतेर्ब्रह्मस्रष्टृत्वश्रुतेश्च विरोधनिराकरणद्वारेण सर्वस्रष्टरि ब्रह्मणि समन्वयदृढीकरणात्पादादिसंगतयः । पूर्वपक्षे श्रुत्योर्विरोधादनेकवाक्यत्वान्न तत्र ब्रह्मणि समन्वयः । सिद्धान्ते तु तयोरेकवाक्यतयाऽविरोधात्प्रामाण्यात्तत्सिद्धिः । आकाशादेव समुत्पद्यन्त इत्येवकारश्रुत्या ब्रह्मणः स्वातन्त्र्ये समधिगते भूतस्वातन्त्र्यमयुक्तमिति शङ्कते—कुत इति । मूलकारणत्वापेक्षया ब्रह्मणः स्वातन्त्र्यश्रवणमित्याशयवानाह—आकाशादिति । पूर्वपक्षमाक्षिपति—नन्विति ।

---

१ क्ष ट. °णादिति । न° ।

(पूर्वपूर्वकार्योपाधिकाद्ब्रह्मण उत्तरोत्तरकार्योत्पत्तिसिद्धिः, अधि० ७)

प्रतिषिद्धा । नैष दोषः । "तत्तेज ऐक्षत" "ता आप ऐक्षन्त" [छा०६-२-३,४] इति च भूतानामपि चेतनत्वश्रवणादिति । एवं प्राप्तेऽभिधीयते । स एव परमेश्वरस्तेन तेनाऽऽत्मनाऽवतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति । कुतः । "तल्लिङ्गात्" । तथा हि शास्त्रम् "यः पृथिव्यां तिष्ठन्यः पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति" [बृ० ३-७-३] इत्येवंजातीयकं साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति । तथा "सोऽकामयत बहु स्यां प्रजायेय" [तै० २-६-१] इति प्रस्तुत्य "सच्च त्यच्चाभवत्" "तदात्मानं स्वयमकुरुत" [तै० २-६-१,२-७-१] इति च तस्यैव सर्वात्मभावं दर्शयति । यत्त्वीक्षणश्रवणमप्तेजसोस्तत्परमेश्वरावेशवशादेव द्रष्टव्यम् "नान्योऽतोऽस्ति द्रष्टा" [बृ० ३-७-२३] इतीक्षित्रन्तरप्रतिषे-

---

आकाशादिशब्दैराकाशाद्यभिमानिनीनां देवतानां मनुष्यादिशब्दैरिव तदभिमानिनां जीवानां विवक्षितत्वात्पञ्चमीनां च निमित्तार्थत्वादाकाशाद्यात्मनेश्वरस्य वाय्वाद्युपादानत्ववत्तदभिमानिदेवतात्मनाऽधिष्ठातृत्वं चाविरुद्धमिति परिहरति—**नैष दोष इति** । भूतानामपीति भूताभिमानिदेवताभिप्रायम् । सोऽकामयतेति परमेश्वरं प्रस्तुत्य तदात्मानं स्वयमकुरुतेति कर्तृत्वं श्रुतं यः पृथिव्यां तिष्ठन्नित्यादिना चेश्वरस्य नियन्तृत्वमुक्तं तत्कुतो देवतानां स्वातन्त्र्येण कार्ये नियन्तृत्वमित्याशङ्क्य प्रस्तावलिङ्गाभ्यामवद्योतितं ब्रह्मणः सर्वनियन्तृत्वमभिमानिदेवताद्वारा पारम्पर्येणापि सिध्यत्यन्यथा ब्रह्मकारणत्वश्रुतेर्भूतकारणत्वश्रुतेश्च मिथो विरोधः स्यादित्युपसंहर्तुमितिशब्दः । आकाशादिशब्दैर्न देवतालक्षणा मुख्यार्थबाधाभावात्पञ्चम्यश्चापादानार्थास्तत्र रूढतरत्वादिति सिद्धान्तयति—**एवं प्राप्त इति** । भूतानां स्वातन्त्र्यश्रवणान्नास्ति स्वविकारसृष्टावीश्वरापेक्षेत्युक्तत्वादुक्तप्रतिज्ञानुपपत्तिरिति शङ्कते—**कुत इति** । सौत्रं हेतुमादाय विभजते—**तल्लिङ्गादिति** । इतश्च भूतानामयुक्ता स्वातन्त्र्येण प्रवृत्तिरित्याह—**तथेति** । ब्रह्माकाशयोरन्यतरपदार्थोपादानेऽन्यतरपदार्थबाधप्रसङ्गात्पञ्चम्येवकारश्रुतिभ्यामवगतस्वातन्त्र्ययोस्तयोरेकतरस्याप्यबाधेन समुच्चयोपादानेन नैरपेक्ष्यमात्रं बाधित्वा पूर्वपूर्वभूताकारपरिणतं ब्रह्मोत्तरोत्तरभूतोपादानमुपेयमिति भावः । पूर्वपक्षबीजमनूद्य तदभिध्यानादेवेति सूत्रावयवयोजनया निराकरोति—**यत्त्विति** । परमेश्वरस्य भूतेषु प्रवेशात्तदीयमेवाभिध्यानमप्तेजसोरुपचर्यते तन्न भूतानां चेतनत्वाशङ्क्येत्यर्थः । भूतानां तदभिमानिचेतनदेवताद्वारेणेक्षणसिद्धौ किमीश्वरेणेत्याशङ्क्याऽऽह—**नान्य इति** । भवतु वा चेतनानां देवता-

---

१ ङ. ञ. °ते । स्वयमेव । २ ङ. °ष्ठन्पृ° । ३ झ. आन्तरो । ४ ङ. ञ. °ति तं° । ट. °ति चेतनस्यै° । ५ घ. झ. ट. °व च स° । ६ ठ. ड. °कार्यनि° । ७ ठ. ड. तत्तद° ।

(प्रलयकाले पृथिव्यादीनां विपरीतक्रमकल्पनम्, अधि० ८)

धात्। प्रकृतत्वाच्च सत ईक्षितुः "तदैक्षत बहु स्यां प्रजायेय" [छा० ६-२-६] इत्यत्र ॥ १३ ॥ (७)

(प्रलयकाले पृथिव्यादीनां विपरीतक्रमकल्पनम्, अधि० ८)

विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १४ ॥ (८)

भूतानामुत्पत्तिक्रमश्चिन्तितः। अथेदानीमप्ययक्रमश्चिन्त्यते। किमनियतेन क्रमेणाप्यय उतोत्पत्तिक्रमेणाथवा तद्विपरीतेनेति। त्रयोऽपि चोत्पत्तिस्थितिप्रलया भूतानां ब्रह्मायत्ताः श्रूयन्ते "यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति" [तै० ३-१-१] इति। तत्रानियमोऽविशेषादिति प्राप्तम्। अथवोत्पत्तेः क्रमस्य श्रुतत्वात्प्रलयस्यापि क्रमाकाङ्क्षिणः स एव क्रमः स्यादिति।

त्मनां भिन्नत्वं तथाऽपि किं कारणमिति विशये[1] परमेश्वरस्य कारणत्वेन कृत्स्नत्वात्स एव द्विधाकारणमित्याह—**प्रकृतत्वादिति**। ब्रह्मणः[2] स्वरूपेण पररूपेण सर्वकारणत्वे सर्वस्रष्टृब्रह्मसमन्वयस्य भूतस्वातन्त्र्यस्रष्टृत्वश्रुतिविरोधो नेति सिद्धमिति भावः ॥१३॥(७)

सृष्टिक्रममभिधाय लयक्रममभिधत्ते—**विपर्ययेणेति**। यद्यप्यत्र श्रुतिविप्रतिषेधो न साक्षात्परिहियते तथाऽप्युत्पत्तिक्रमे निरूपिते लयक्रमो बुद्धिस्थत्वाद्विचार्यत इति प्रासङ्गिकी संगतिरित्यभिप्रेत्याऽऽह—**भूतानामिति**। वस्तुतस्तु सर्वप्रलयाधारब्रह्मसमन्वयस्य कारणनाशात्कार्यनाश इति न्यायानुगृहीतसृष्टिक्रमश्रुतिविरोधो निरस्यत इति संगतयः। पूर्वपक्षे भूतलयस्य श्रौतसंनिहितक्रमलाभादशेषलयाधारब्रह्मसमन्वयस्य न्यायोपेतसृष्टिक्रमविरोधादसिद्धिः। सिद्धान्ते लोकानुरोधिन्याः श्रुतेः श्रुतिसंनिहितादपि लौकिकक्रमस्य संनिहिततरत्वात्तेन तद्बाधकतेत्युक्ते ब्रह्मणि तत्सिद्धिः। 'अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छ' इत्यादौ कार्यलिङ्गकानुमानप्रदर्शनाद्यत्प्रयन्तीत्यादौ च लयमात्रश्रवणेऽपि क्रमस्याश्रुतत्वादाकाङ्क्षायाश्च द्विधाऽपि शान्तेश्चिन्ताप्रकारमेवाभिनयति—**किमनियतेनेति**। सति प्रलये क्रमश्चिन्तनीयः स एव नास्तीति केचित्तान्प्रत्याह—**त्रयोऽपीति**। उपक्रममात्रेण पूर्वपक्षमाह—**तत्रेति**। श्रुतोत्पत्तिक्रमादेव नियमे सत्यनियमो न युक्तिमानित्याशङ्क्य पक्षान्तरमाह—**अथवेति**। महाभूतप्रलयोऽपि क्रममपेक्षते तदुत्पत्तिप्रलययोरन्यतरत्वात्तदुत्पत्तिवदित्यभिप्रेत्याऽऽह—**क्रमाकाङ्क्षिण इति**। तथाँचासौ श्रौतसंनिहितक्रमवान्न स्मार्तं व्यवहितं क्रममवलम्बते तस्य बहिरङ्गत्वादिति भावः। महाभूतानामुत्पत्तिक्रमेण प्रलये क्रमवति सति

---

१ ख. ङ. विषये। २ ख. °ह्मस्व°। ३ ख. ठ. ड श्रुत्योत्प°। ४ क. ख ठ. ड. °थाऽसौ।

(प्रलयकाले पृथिव्यादीनां विपरीतक्रमकल्पनम् , अधि० ८)

एवं प्राप्तं ततो ब्रूमः—" विपर्ययेण तु " प्रलयक्रमः "अतः " उत्पत्तिक्रमाद्भवितुमर्हति । तथाहि लोके दृश्यते येन क्रमेण सोपानमारूढस्ततो विपरीतेन क्रमेणावरोहतीति। अपि च दृश्यते मृदो जातं घटशरावाद्यप्ययकाले मृद्भावमप्येत्यद्भ्यश्च जातं हिमकरकाद्यब्भावमप्येतीति । अतश्चोपपद्यत एतत् । यत्पृथिव्यद्भ्यो जाता सती स्थितिकालव्यतिक्रान्तावपोऽपीयादापश्च तेजसो जाताः सत्यस्तेजोऽपीयुः । एवं क्रमेण सूक्ष्मं सूक्ष्मतरं चानन्तरमनन्तरं कारणमपीत्य सर्वं कार्यजातं परमकारणं परमसूक्ष्मं च ब्रह्माप्येतीति वेदितव्यम् । न हि स्वकारणव्यतिक्रमेण कारणकारणे कार्याप्ययो न्याय्यः । स्मृतावप्युत्पत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्र तत्र दर्शितः [महाभा० १२-३४१-२९] ।

" जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते "

सर्वप्रलयाधारे ब्रह्मणि समन्वयो न्यायानुगृहीतसृष्टिक्रमश्रुतिविरोधो न सिध्यतीत्युपसंहरति—एवमिति । सिद्धान्तसूत्रमवतार्य व्याकरोति—तत इति । लोकदृष्टपदार्थबोधाधीना हि श्रुतिरतः श्रुतिसंनिहितादपि लौकिकक्रमस्य संनिहिततरत्वात्तेन तद्बाधनं युक्तमित्युपपद्यत इति सूत्रावयवं व्याचष्टे—तथाहीति । चकारसूचितमुपपत्त्यन्तरमाह—अपि चेति । सत्यपीत्थं लौकिके दर्शने प्रकृते किमायातमित्याशङ्क्य फलपरत्वेनापि सूत्रावयवं योजयति—अतश्चेति । पृथिव्यादीनामब्वादौ लयश्चेद्ब्रह्मणः सर्वकार्यलयाधारत्वं कथमित्याशङ्क्य तत्तत्कारणात्मके ब्रह्मणि तत्तत्कार्यलयाभ्युपगमात्तत्रैव पर्यवसानमिति मत्वाऽऽह—एवं क्रमेणेति । पारम्पर्यं परित्यज्य साक्षाद्ब्रह्मणि सर्वकार्यलयाभ्युपगमो बलीयानित्याशङ्क्याऽऽह—न हीति । घटादेर्मृत्कार्यस्य परमाणुषु लयानभ्युपगमादन्यथा घटादिनाशे परमाणूनामतीन्द्रियत्वान्न किंचिदुपलभ्येतेति भावः । लौकिकन्यायवशादुत्पत्तिक्रमविपरीतं प्रलयक्रमं प्रदर्श्य तत्रैव स्मृतिं संवादयति—स्मृतावपीति ।

" वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते "

इति वाक्यमादिशब्दार्थः । स्मार्तक्रमाल्लौकिकन्यायाच्च श्रौतक्रमस्य संनिकृष्टत्वादा-

---

१ ज. ट. प्राप्ते । २ क. °च मृ° । ३ क. ज. घटाद्य° । ४ झ °त् । पृथि° । ५ ङ. ञ. °न्तरतरं । ६ ज. सर्वका° । ७ क. ज. °क्ष्मं ब्र° । ८ ट. °ण मुख्यकारणे । ९ क. °णेऽप्य° । १० क ठ. ड. °विरुद्धो न । ११ झ. °माण्वाणू° । १२ ठ. ड. °यत्वं न किं° ।

इत्येवमादौ । उत्पत्तिक्रमस्तूत्पत्तावेव श्रुतत्वान्नाप्यये भवितुमर्हति । न चासावयोग्यत्वादप्ययेनाऽऽकाङ्क्ष्यते । न हि कार्ये ध्रियमाणे कारणस्याप्ययो युक्तः कारणाप्यये कार्यस्यावस्थानानुपपत्तेः । कार्याप्यये तु कारणस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात् ॥ १४ ॥ (८)

(प्राणादीनां भूतेष्वन्तर्भावान्न तेषां सृष्टिक्रमभङ्गः, अधि० ९)

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ १५ ॥ (९)

भूतानामुत्पत्तिप्रलयावनुलोमप्रतिलोमक्रमाभ्यां भवत इत्युक्तमात्मादिरुत्पत्तिः प्रलयश्चाऽऽत्मान्त इत्यप्युक्तम् । सेन्द्रियस्य तु मनसो बुद्धेश्च सद्भावः प्रसिद्धः श्रुतिस्मृत्योः ।

" बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।
इन्द्रियाणि हयानाहुः "

काङ्क्षासंनिधिभ्यां तस्यैवोपादेयत्वमित्याशङ्क्य योग्यत्वाभावान्नैवमित्याह—**उत्पत्तौ**इति । आकाङ्क्षाऽपि तत्र नास्तीत्याह—**न चे**ति । अयोग्यविषयाभ्यामाकाङ्क्षासंनिधिभ्यां विप्रकृष्टविषयेऽप्याकाङ्क्षायोग्यत्वे बलवत्तरे संबन्धस्य योग्यतानिमित्तत्वादिति भावः । अयोग्यत्वादित्युक्तं साधयति—**न ही**ति । कार्यकारणयोरभेदे कार्याभावे कारणवत्तदभावेऽपि कार्यं स्यादित्याशङ्क्याऽऽह—**कार्ये**ति । तदेवं ब्रह्मणः सर्वप्रलयाधारत्वात्तत्र समन्वयस्य कारणनाशात्कार्यनाश इति न्यायानुगृहीतसृष्टिक्रमश्रुत्या न विरोधोऽस्तीति सिद्धमिति भावः ॥ १४ ॥ (८)

पूर्वोक्तभूतोत्पत्तिप्रलयक्रमस्य करणसृष्ट्या बाधमाशङ्क्य परिहरति—**अन्तरे**ति । भूतोत्पत्तिप्रलयक्रमो विषयः स किं करणसृष्टिक्रमेण बाध्यते न वेति करणानां भौतिकत्वाभौतिकत्वाभ्यां संदेहे पूर्वपक्षयितुं वृत्तं कीर्तयति—**भूताना**मिति । उक्तोत्पत्तिप्रलयक्रमस्य विरोधद्योतनार्थमुक्तमर्थान्तरमनुद्रवति—**आत्मादि**रिति । अत्र च क्रमवद्भूतोत्पत्तिप्रलयाधारे ब्रह्मणि समन्वयस्य करणसृष्टिश्रुत्या विरोधपरिहारद्वारा दृढीकरणात्पादादिसंगतयः । पूर्वपक्षे करणसर्गश्रुतिविरोधादुक्तसमन्वयासिद्धिः । सिद्धान्ते तदविरोधात्तत्सिद्धिः । देहप्रदेशातिरिक्तेन्द्रियाभावात्कथं यथोक्तः संदेहः स्यादित्याशङ्क्याऽऽह—**सेन्द्रिय**स्येति । श्रुतिस्मृत्योरुक्ता प्रसिद्धिस्तत्र श्रुतिमुदाहरति—**बुद्धिं त्वि**ति ।

" इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिः " ॥

---

१ क. 'स्य कार' ।

(प्राणादीनां भूतेष्वन्तर्भावान्न तेषां सृष्टिक्रमभङ्गः, अधि० ९)

[कठ० ३-३] इत्यादिलिङ्गेभ्यः। तयोरपि कस्मिंश्चिदन्तराले क्रमेणोत्पत्तिप्रलयावुपसंग्राह्यौ सर्वस्य वस्तुजातस्य ब्रह्मजत्वाभ्युपगमात्। अपि चाऽऽथर्वण उत्पत्तिप्रकरणे भूतानामात्मनश्चान्तराले करणान्यनुक्रम्यन्ते—

" एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी "

[मुण्ड० २-१-३] इति। तस्मात्पूर्वोक्तोत्पत्तिप्रलयक्रमभङ्गप्रसङ्गो भूतानामिति चेत्। न। अविशेषात्। यदि तावद्भौतिकानि करणानि ततो भूतोत्पत्तिप्रलयाभ्यामेवैषामुत्पत्तिप्रलयौ भवत इति नैतयोः क्रमान्तरं मृग्यम्। भवति च भौतिकत्वे लिङ्गं करणानाम् " अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्" [छा० ६-५-४] इत्येवंजातीयकम्। व्यपदेशोऽपि क्वचिद्भूतानां करणानां च ब्राह्मणपरिव्राजकन्यायेन नेतव्यः। अथ त्वभौतिकानि करणानि तथाऽपि भूतोत्पत्ति-

---

इत्याद्या स्मृतिरुदाहर्तव्या। करणानां सत्त्वेऽपि तेषामाहंकारिकत्वात्तदुत्पत्तिक्रमेण कुतो भूतोत्पत्त्यादिक्रमस्य[1] विरोधाशङ्कित्याशङ्क्याऽऽह—तयोरिति। तेषामाहंकारिकत्वे मानाभावाद्ब्रह्मजत्वस्याऽऽवश्यकत्वे तत्कार्येष्वेव कस्मिंश्चिदन्तराले बुद्धिसेन्द्रियमनसोरुत्पत्तिलयौ ग्राह्यावित्यर्थः। तथाऽपि भूतोत्पत्त्यनन्तरं तदुत्पत्त्यङ्गीकारतया भूतोत्पत्त्यादिक्रमस्याविरुद्धतेत्याशङ्क्य क्रमाकाङ्क्षायां करणोत्पत्तेः श्रुत्यन्तरसिद्धक्रमसिद्धेर्नाविरोधोऽस्तीत्याह—अपि चेति। अन्नमयश्रुतौ करणानां भौतिकत्वे[2] सिद्धे भूतानन्तर्यं तेषामित्याशङ्क्याऽऽपोमयः प्राण इत्यत्र तद्विकारत्वाभाववदिहापि तद्विकारत्वाभावात्करणोत्पत्तिश्रुत्या क्रमवद्भूतोत्पत्त्यादिश्रुतेर्विरोधोऽस्तीत्युपसंहरति—तस्मादिति। सिद्धान्तमादत्ते—नेति। इन्द्रियाणामुत्पत्तिक्रमस्य भूतोत्पत्त्यादिक्रमाविरुद्धविशेषासिद्धेर्न विरोधोऽस्तीत्यर्थः। किं भौतिकत्वं करणानामुताभौतिकत्वमाद्यं प्रत्याह—यदीति। द्वितीयं दूषयति—भवतीति। न चाऽऽपोमय इतिवन्मयटो न विकारार्थता करणानां विभक्तत्वात्कार्यत्वे कारणापेक्षायामन्नमयमित्यादिश्रुतेरपेक्षितोक्त्यर्थमसति बाधके मयटो विकारार्थताया युक्तत्वादिति भावः। भौतिकत्वे करणानां भूतानन्तरं तदुत्पत्तेर्न पृथक्तद्व्यपदेशः स्यादित्याशङ्क्याऽऽह—व्यपदेशोऽपीति। क्वचिदित्याथर्वणं वाक्यमुक्तम्। प्रौढवादेन तेषामभौतिकत्वमुपेत्यापि ब्रवीति—अथ त्विति। अभौतिकत्वेऽपि पूर्वोत्तरत्वेन विशेषणविशेष्यत्वे मानाभा-

---

१ क. ट. सौम्य। २ ख. °कारत्वा° ३ क. °मवि°। ४ ख. ठ. ड. °यां कार°। ५ ख. ट °कत्वासिद्धेर्भूता°। ६ क. ख. °मभूतो। ७ क. °त्वं कार°।

(वपुषो जन्ममरणयोर्मुख्यत्वेन जीवस्यैतयोर्भोक्तृत्वम्, अधि० १०)

क्रमो न करणैर्विशेष्यते प्रथमं करणान्युत्पद्यन्ते चरमं भूतानि प्रथमं वा भूतान्युत्पद्यन्ते चरमं करणानीति। आथर्वणे तु समाम्नायक्रममात्रं करणानां भूतानां च न तत्रोत्पत्तिक्रम उच्यते। तथाऽन्यत्रापि पृथगेव भूतक्रमात्करणक्रम आम्नायते—"प्रजापतिर्वा इदमग्र आसीत्स आत्मानमैक्षत स मनोऽसृजत तन्मन एवाऽऽसीत्तदात्मानमैक्षत तद्वाचमसृजत" इत्यादिना। तस्मान्नास्ति भूतोत्पत्तिक्रमस्य भङ्गः ॥ १५ ॥ (९)

(वपुषो जन्ममरणयोर्मुख्यत्वेन जीवस्यैतयोर्भोक्तृत्वम्, अधि० १०)

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥१६॥(१०)

वाङ्मूतोत्पत्तिक्रमो न करणक्रमेण विरुध्यत इत्यर्थः। ननु यथा समिधो यजतीत्यादौ पाठक्रम एवानुष्ठानक्रमे मानं तथैतस्मादित्यादिपाठक्रम एवाऽऽदौ करणान्युत्पद्यन्ते पश्चाद्भूतानीत्यत्र मानं नेत्याह—आथर्वणेति। तत्र तेषां क्रममात्रमाम्नायोत्पत्तिरुक्तेति योजना। श्रुत्यर्थाविरुद्धो हि पाठोऽनुष्ठाने मानमिह त्वात्मन आकाश इत्यादिश्रुत्यर्थविरोधादग्निहोत्रहोमयवागूपाकवत्पाठक्रमभङ्गेन भूतानन्तरं करणोत्पत्तिरित्यर्थः। करणानां भूतानां चैककार्यत्वे क्रमाकाङ्क्षायां पूर्वविशिष्टस्यैवोत्तरजनकत्वात्करणप्राथम्यमित्याशङ्क्य भिन्नपरिकरत्वान्नैवमित्याह—तथेति। प्रजापतिः सर्वभूतसूक्ष्मात्मकः सूत्रात्मा। स्थूलं कार्यमिदमुच्यते। तदुत्पत्तिप्राक्कालोऽग्रशब्दार्थः। अत्र प्रजापतिसृष्टिवचनाद्भूतसृष्टिप्राथम्यं ततश्च मनआदिसृष्टिरुक्तेति करणसर्गस्य पाश्चात्यमिति विवेकः। भूतकरणोत्पत्त्योरेवं सिद्धे क्रमे क्रमवद्भूतोत्पत्तिलयाधारे ब्रह्मणि समन्वयस्य करणोत्पत्तिश्रुत्या विरोधो नेत्युपसंहरति—तस्मादिति ॥ १५ ॥ (९)

पूर्वाधिकरणेषु तत्पदार्थकारणत्वसिद्धये भूतोत्पत्तिश्रुतिविरोधो निरस्तः संप्रत्या पदसमाप्तेस्त्वंपदार्थशुद्ध्यै जीवविषयश्रुतिविरोधो निरस्यते। तत्र करणोत्पत्तिश्चेन्न भूतोत्पत्तिक्रममन्यथयति तर्हि जीवोत्पत्तिस्तदन्यथयेदित्याशङ्क्य सैव नास्तीत्याह—चराचरेति। इह जीवजननिमृतिनिमित्तवैश्वानरीयेष्ट्यादिशास्त्राणां तन्नित्यत्वशास्त्राणां चाविरोधद्वारा नित्यसिद्धप्रत्यग्ब्रह्मणि समन्वयदृढीकरणात्पादादिसंगतयः। पूर्वपक्षे शास्त्रद्वयविरोधात्तादृग्ब्रह्मसमन्वयासिद्धिः। सिद्धान्ते तदविरोधात्तत्सिद्धिः। जीवो विषयस्तस्य किं देहोत्पादनाशयोरनौपाधिकमुत्पत्त्यादि न वेति श्रुतिविप्रतिपत्तेः संदेहे पूर्वपक्ष-

---

१ क. ज्ञ. 'र्विशिष्य'। २ क. 'न्नप्रकरणत्वा'। ख. 'न्नकारणत्वा'। ठ. ड. 'न्नकारणकत्वा'। ३ ज्ञ. स्थूलका'। ४ ख. 'ति कार'।

(वपुषो जन्ममरणयोर्मुख्यत्वेन जीवस्यैतयोर्भाक्तत्वम्, अधि० १०)

स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवंजातीयकाल्पौकिकव्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात्कस्यचिद्भ्रान्तिस्तामपनुदामः । न जीवस्योत्पत्तिप्रलयौ स्तः शास्त्रफलसंबन्धोपपत्तेः । शरीरानुविनाशिनि हि जीवे शरीरान्तरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्याताम्। श्रूयते च "जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते" [छा०६-११-३] इति । ननु लौकिको जन्ममरणव्यपदेशो जीवस्य दर्शितः, सत्यं दर्शितो भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः । किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त इति । उच्यते— "चराचरव्यपाश्रयः" । स्थावरजङ्गमशरीरविषयौ जन्ममरणशब्दौ स्थावरजङ्गमानि हि भूतानि जायन्ते च म्रियन्ते चातस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ तत्स्थे जीवात्मन्युपचर्येते । "तद्भावभावित्वात्" । शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतो नासतोः । न हि शरीरसंबन्धादन्यत्र

माह—स्त इति । देहगामित्वादयं व्यपदेशो न जीवजन्मादि साधयेदित्याशङ्क्य चेतनोद्देशेन जातकर्मादिविधानादयमपि व्यपदेशो न देहमात्रगामीत्याह—जातेति । न चोपाध्यपरामर्शादौपाधिकौ तस्य जन्मनाशौ नापि देहस्य संस्कारविधिः पुरुषविषयत्वेन प्रसिद्धत्वादतो जीवस्यानौपाधिकोत्पत्तिनाशसिद्धेरजामृतप्रत्यग्ब्रह्मसमन्वयासिद्धिरित्याह— इति स्यादिति । उत्सूत्रं सिद्धान्तमाह—तामिति । उपपत्तिमेव दर्शयति—शरीरेति । उद्देश्योपादेययोर्मिथो विरोधे सत्युपादेयजन्मान्तरफलसाधनविधिविरोधिनोरुद्देश्यचेतनजन्ममरणयोर्देहोपाधित्वेनोपचरितत्वाज्जन्मान्तरसाधनकर्मसंबन्धयोग्यो जन्ममृतिरहितः सन्नात्मा सिध्यतीत्यर्थः । आत्मनो जन्माद्यभाव एव शास्त्रीयस्वर्गादिसंबन्धसिद्धिस्तदन्यथानुपपत्त्या नित्यत्वं तस्येत्युक्तम् । इदानीं श्रुतिसिद्धं चैतदित्याह—श्रूयते चेति । जीवेनापेतं त्यक्तं वाव किलेत्यवधारणार्थौ निपातौ । जीवो न म्रियत एवेत्यर्थः । पूर्वपक्षबीजमनुभाषते—नन्विति । तदुत्तरत्वेन सूत्रं पातयितुं योजनिकामाह—सत्यमिति । भाक्तो व्यपदेशो मुख्यापेक्षीति मत्वा पृच्छति—किमिति । तत्र सूत्रमवतार्य व्याकरोति—उच्यत इति । तयोस्तद्विषयत्वेन मुख्यत्वे हेतुमाह—स्थावरेति । उपचारे कारणमाह—तदिति । देहगामित्वेन जन्मादिशब्दस्य मुख्यत्वे सौत्रं हेतुमादाय व्याचष्टे—तदिति । देहयोगमनपेक्ष्य साक्षादेव जीवगतौ जन्मनाशशब्दौ किं न स्यातां तत्राऽऽह—न हीति ।

१क. ज. ट. प्रदर्शितः। २क. 'षयो ज'। ३क. 'शब्दः स्था'। ४ट.ड. उक्तसूत्रं। ५ज्ञ. उत्पत्ति'।

(जीवजन्मन औपाधिकत्वेन तस्य वस्तुतो नित्यत्वम्, अधि० ११)

जीवो जातो मृतो वा केनचिल्लक्ष्यते । " स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः स उत्क्रामन्म्रियमाणः " [बृ० ४-३-८] इति च शरीरसंयोगवियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति । जातकर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यम् । अभावाज्जीवप्रादुर्भावस्य । जीवस्य परस्मादात्मन उत्पत्तिर्विषयदादीनामिवास्ति नास्ति वेत्येतदुत्तरेण सूत्रेण वक्ष्यति । देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्त इत्येतदनेन सूत्रेणावोचत् ॥ १६ ॥ (१०)

(जीवजन्मन औपाधिकत्वेन तस्य वस्तुतो नित्यत्वम्, अधि० ११)

नाऽऽत्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥ (११)

अस्त्यात्मा जीवाख्यः शरीरेन्द्रियपञ्जराध्यक्षः कर्मफलसंबन्धी । स किं व्योमादिवदुत्पद्यते ब्रह्मण आहोस्विद्ब्रह्मवदेव नोत्पद्यत इति श्रुतिविप्रतिपत्तेर्विशयः । कासुचिच्छ्रुतिष्वग्निविस्फुलिङ्गादिनिदर्शनैर्जीवात्मनः परस्माद्ब्रह्मण उत्पत्तिराम्नायते, कासुचित्त्वविकृतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो

न केवलमन्वयव्यतिरेकाभ्यामयमर्थोऽवगम्यते किं तु श्रुत्याऽपीत्याह—स वा इति । कथं नित्यस्य जायमानत्वं तत्राऽऽह—शरीरमिति । कथं म्रियमाणत्वं तत्राऽऽह—उत्क्रामन्निति । श्रुतेस्तात्पर्यमाह—शरीरेति । यत्तु जातकर्मादिविधानाज्जीवस्यानौपाधिकौ जन्मनाशाविति तत्राऽऽह—जातेति । पूर्वोत्तराधिकरणयोरेकार्थतया पौनरुक्त्यमाशङ्क्यार्थभेदमाह—जीवस्येति । तदेवमात्मनो देहोत्पत्त्यादावनौपाधिकोत्पत्त्याद्यभावाज्जातेष्ट्यादिशास्त्राणामौपाधिकतद्विषयत्वादात्मनित्यत्वशास्त्राणां मुख्यार्थत्वादनाद्यनन्तप्रत्यग्ब्रह्मसमन्वयसिद्धिरिति भावः ॥ १६ ॥ (१०)

देहोत्पत्तिनाशयोरात्मोत्पत्तिनाशौ निरस्य कल्पाद्यन्तयोर्जन्मनाशौ तस्य निरस्यति—नाऽऽत्मेति । अधिकरणविषयमाह—अस्तीति । असंभवस्त्वित्यत्र ब्रह्मजन्मनिषेधात्तदभिन्नजीवजन्माशङ्का निरवकाशेत्याशङ्क्याऽऽह—जीवेति । शरीरादेरेव सप्राणस्य जीवत्वमिति प्राकृतास्तान्प्रत्याह—शरीरेति । कर्माध्यक्षः साक्षीत्यादिश्रुतेरीश्वरत्वादस्य कुतो जीवत्वं तत्रोक्तम्—कर्मेति । विषयं विविच्य सहेतुं संशयमाह—स इति । श्रुतिविप्रतिपत्तिं विशदयति—कासुचिदिति । यथा सुदीप्तात्पावकादित्याद्या जीवोत्पत्तिवादिन्यः श्रुतयः । कासुचिदिति । तत्सृष्ट्वा तदेवानुप्राविशदित्याद्यास्त्वित्यर्थः । प्रवेशवाक्येऽपि जन्मधीरस्तीत्याशङ्क्याऽऽह—

---

१ क. ज. ञ. 'चिदुपलक्ष्य' । २ क. वेति तदु' । ३ क. ङ. ञ. 'विषयः ।

(जीवजन्मन औपाधिकत्वेन तस्य वस्तुतो नित्यत्वम्, अधि० ११)

विज्ञायते, न चोत्पत्तिराम्नायत इति। तत्र प्राप्तं तावदुत्पद्यते जीव इति। कुतः। प्रतिज्ञानुपरोधा[1]देव। "एकस्मिन्विदिते सर्व[2]मिदं विदितम्" इतीयं प्रतिज्ञा सर्वस्य वस्तुजातस्य ब्रह्मप्रभवत्वे सति नोपरु[3]ध्येत, तत्त्वान्तरत्वे तु जीवस्य प्रतिज्ञेयमुपरु[4]ध्येत। न चाविकृतः परमात्मैव जीव इति शक्यते विज्ञातुं लक्ष[5]णभेदात्। अपहतपाप्मत्वादिधर्मको हि परमात्मा तद्विपरीतो हि जीवः। विभागाच्चास्य विकारत्वसिद्धिः। यावान्ह्याकाशादिः प्रविभक्तः स सर्वो विकारस्तस्य चाऽऽकाशादेरुत्पत्तिः समधिगता। जीवात्माऽपि पुण्यापुण्यकर्मा सुखदुःख[6]युक्तप्रतिशरीरं प्रविभक्त इति तस्यापि प्रपञ्चोत्पत्त्यवसर उत्पत्तिर्भवितुमर्हति। अपि च "यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः

न चेति। श्रुतिविप्रतिपत्त्या शङ्कामुक्त्वा पूर्वपक्षयति—तत्रेति। अत्र चोक्तश्रुतिविप्रतिपत्तिनिरासेन समन्वयदृढीकरणात्पादादिसंगतयः। पूर्वपक्षे श्रुतीनां विप्रतिपत्तेरनेकवाक्यत्वेन विरोधादप्रामाण्ये समन्वयासिद्धिः। सिद्धान्ते श्रुतीनामविप्रतिपत्तेरेकवाक्यत्वादविरोधे नित्ये प्रत्यग्ब्रह्मणि समन्वयसिद्धिः। जन्मप्रयोजकजाड्यविशेषत्वविरहान्नोत्पत्तिरित्याह—कुत इति। आत्मनस्तद्विरहे विवदमानो वियदुत्पत्तिन्यायेन प्रत्याह—प्रतिज्ञेति। तदनुपरोधं साधयति—एकस्मिन्निति। अकार्यत्वेऽपि प्रतिज्ञासिद्धिश्चेत्किं तत्कार्यत्वेनेत्याशङ्क्य तस्य परस्माद्भिन्नत्वमभिन्नत्वं वेति विकल्प्याऽऽद्यं दूषयति—तत्त्वान्तरत्वे त्विति। द्वितीयं निरस्यति—न चेति। लक्षणभेदं साधयति—अपहतेति। नित्यत्वश्रुतिविरोधमाशङ्क्यानुमानानुगृहीतानित्यत्वश्रुतिविरोधात्तासामुपचरितार्थतेति मत्वाऽऽह—विभागाच्चेति। तत्त्वमस्यादिवाक्यापेक्षितार्थावेदकत्वान्नित्यत्वश्रुतीनां नोपचरितार्थतेत्याशङ्क्य नित्यानित्ययोरपि कार्यकारणयोर्मृद्घटवत्तादात्म्यसंभवादविरुद्धं महावाक्यमित्यभिप्रेत्यानित्यत्वश्रुत्यनुग्राहकानुमानाङ्गव्याप्तिमाह—यावानिति। आकाशादेर्विभक्तत्वेऽपि विकारत्वासिद्धेरसिद्धा व्याप्तिरित्याशङ्क्याऽऽह—तस्येति। व्याप्तस्य हेतोः पक्षधर्मतामाह—जीवेति। प्रतिदेहमात्मविभागे कर्मतत्फलव्यवस्थानुपपत्तिं प्रमाणयितुं विशेषेण व्याप्तिं पक्षधर्मतां चोक्त्वाऽनुमानमाह—तस्येति। यदनुग्राहकमनुमानमुक्तं तां श्रुतिमाह—अपि चेति। जीवस्य मुख्योत्पत्तिरत्र नेष्टेत्याशङ्क्य प्राणादीनां तथोत्पत्तिदृष्टेः समभिव्याहाराज्जीव-

---

१ ङ. ञ. °धात्। ए°। ट. °धात्। एवमेक°। २ क. ज सर्व वि°। ३ क. ज. °रुध्यते त°। ४ क °रुध्यते। न। ५ क. °क्षणे भे°। ६ क. ज. °खभुक्प्र°। ङ. ञ. °खभाक्प्र°। ७ ङ. ञ °रं वि°। ८ क. ख. ठ. ड. °त्या संशयमु°।

(जीवजन्मन औपाधिकत्वेन तस्य वस्तुतो नित्यत्वम्, अधि० ११)

सर्वे प्राणाः " इति प्राणादेर्भोग्यजातस्य सृष्टिं शिष्ट्वा " सर्व एत आत्मानो व्युच्चरन्ति " [बृह० माध्य० २-१-२३] इति भोक्तॄणामात्मनां पृथक्सृष्टिं शास्ति ।

" यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति " [मुण्ड० २-१-१]

इति च जीवात्मनामुत्पत्तिलयावुच्येते सरूपवचनात् । जीवात्मानो हि परमात्मना सरूपा भवन्ति चैतन्ययोगात् । न च क्वचिदश्रवणमन्यत्र श्रुतं वारयितुमर्हति । श्रुत्यन्तरगतस्याप्यविरुद्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्तव्यत्वात् । प्रवेशश्रुतिरप्येवं सति विकारभावापत्त्यैव व्याख्यातव्या " तदात्मानं स्वयमकुरुत " इत्यादिवत् । तस्मादुत्पद्यते जीव इति ।

एवं प्राप्ते ब्रूमः—" नाऽऽत्मा " जीव उत्पद्यत इति । कस्मात् । " अश्रुतेः " न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयःसु प्रदेशेषु । ननु क्वचिदश्रवणमन्यत्र श्रुतं न वारयतीत्युक्तम् । सत्यमुक्तम् ।

स्यापि तादृश्येव सेति मत्वाऽऽह—प्राणादेरिति । किंचौपाधिकं जन्म चेदुपाधेरेव तद्वाच्यं नोभयोरित्याशयेनाऽऽह—सर्व एत इति । जन्ममात्रार्थां श्रुतिमुक्त्वा जन्मनाशार्थं श्रुत्यन्तरमाह—यथेति । भावानामेवोत्पत्तिलयावत्रोक्तौ न जीवानामित्याशङ्क्याऽऽह—सरूपेति । भावशब्दो जीववाचीति शेषः । अन्यत्रापि सत्त्वेन सारूप्यमाशङ्क्याऽऽह—जीवेति । भूतोत्पत्त्यधिकारे जीवोत्पत्तेरश्रवणान्न तदुत्पत्तिरित्याशङ्क्याऽऽह—न चेति । तत्र तार्तीयन्यायेन हेतुमाह—श्रुत्यन्तरेति । जीवोत्पत्तौ परस्यैव कथं प्रवेशश्रवणमित्याशङ्क्याऽऽह—प्रवेशेति । यथा मृदादि स्वविकारे घटादौ चूर्णादिविकारान्तरेण प्रविशति तथा ब्रह्म शरीरं सृष्ट्वा जीवाख्यविकारेण प्रविष्टमित्यर्थः । ब्रह्मणो विकारोत्पत्तौ दृष्टान्तमाह—तादिति । अनुमानानुगृहीतश्रुतिफलमाह—तस्मादिति ।

जीवनित्यत्वानित्यत्वश्रुतीनां मुख्यत्वे मिथो विरोधादसिद्धिः समन्वयस्येति पूर्वपक्षमनूद्य सिद्धान्तसूत्रमवतार्य प्रतिज्ञां योजयति—एवमिति । अनुमानोपेतश्रुत्या जीवोत्पत्तेरुक्तेरयुक्ता प्रतिज्ञेत्याह—कस्मादिति । सौत्रं हेतुमुक्त्वा व्याकरोति—अश्रुतेरिति । गुणोपसंहारन्यायेनोक्तं स्मारयति—नन्विति । न्यायाधीनामुक्तिमङ्गीकृत्य जीवोत्पत्तिश्रुतेस्तदनुत्पत्तिश्रुत्या वारणान्नात्र न्यायोऽस्तीत्याह—सत्यमिति ।

---

१ ज. °वन्ति स° । २ ज. सौम्य ।

(जीवजन्मन औपाधिकत्वेन तस्य वस्तुतो नित्यत्वेम्, अधि० ११)

उत्पत्तिरेव त्वस्य न संभवतीति वदामः । कस्मात् । नित्यत्वाच्च ताभ्यः । चशब्दादजत्वादिभ्यश्च । नित्यत्वं ह्यस्य श्रुतिभ्योऽवगम्यते तथाऽजत्वमविकारित्वमविकृतस्यैव ब्रह्मणो जीवात्मनाऽवस्थानं ब्रह्मात्मनेना चेति । न चैवंरूपस्योत्पत्तिरुपपद्यते । ताः काः श्रुतयः । " न जीवो म्रियते " [छा० ६-११-३] " स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म " [बृ० ४-४-२५] " न जायते म्रियते वा विपश्चित् " [कठ० २-१८] " अजो नित्यः शाश्वतोऽयं पुराणः " [कठ० २-१८] " तत्सृष्ट्वा तदेवानुप्राविशत् " [तै० २-६-१] "अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि " [छा० ६-३-२] " स एष इह प्रविष्ट आ नखाग्रेभ्यः " [बृ० १-४-७] " तत्त्वमसि " [छा० ६-८-७] " अहं ब्रह्मास्मि " [बृ० १-४-१०] " अयमात्मा ब्रह्म सर्वानुभूः " [बृ० २-५-१९] इत्येवमाद्या नित्यत्ववादिन्यः सत्यो जीवस्योत्पत्तिं प्रतिबध्नन्ति ।

ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यत इत्युक्तम् । अत्रोच्यते—नास्य प्रविभागः स्वतोऽस्ति । " एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा " [श्वे० ६-११] इति श्रुतेः । बुद्ध्याद्युपाधिनिमित्तं त्वस्य प्रविभागप्रतिभानमाकाशस्येव घटादिसंबन्धनिमित्तम् । तथा च शास्त्रम् "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः " [बृ०

जीवजन्मायोगे प्रश्नपूर्वकं सौत्रं हेतुमाह—**कस्मादिति** । हेतुद्वयं विवृणोति—**नित्यत्वं हीति** । नित्यत्वाजत्वादिभानेऽपि जन्माभावो न भातीत्याशङ्क्याऽऽह—**न चेति** । या नित्यत्वादिवादिन्यो जीवोत्पत्तिं न मृष्यन्ति ताः श्रुतीराकाङ्क्षाद्वारोद्दाहरति—**ताः का इति** ।

उत्पत्तिश्रुतेरनुमानानुग्रहादनुत्पत्तिश्रुत्यपेक्षया प्राबल्यमुक्तं स्मारयति—**नन्विति** । स्वाभाविकं वा विभक्तत्वमौपाधिकं वेति विकल्पयति—**अत्रेति** । नाऽऽद्योऽसिद्धेरित्याह—**नेति** । औपाधिकं विभक्तत्वमौपाधिकं स्वाभाविकं वा विकारमात्मनो गमयेदाद्ये सिद्धसाधनत्वं मत्वोक्तम्—**बुद्ध्यादीति** । द्वितीये कालातीतत्वं विवक्षन्नौपाधिकं विभागभानमित्यत्र मानमाह—**तथा चेति** । ब्रह्मविकारत्वं जीवस्य निरस्यता बुद्धिविकारत्वं

---

१ क. ङ. अ. ट. 'त्मता चे' । २ ज. 'रोऽमृ' ।

(जीवजन्मन औपाधिकत्वेन तस्य वस्तुतो नित्यत्वम्, अधि० ११)

४-४-५] इत्येवमादि ब्रह्मण एवाविकृतस्य सतोऽस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति । तन्मयत्वं चास्य विविक्तस्वरूपानभिव्यक्त्या तदुपरक्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवद्द्रष्टव्यम् । यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपाधिसंबन्धान्नेतव्यम् । उपाध्युत्पत्त्याऽस्योत्पत्तिस्तत्प्रलयेन च प्रलय इति । तथा च दर्शयति—" प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञाऽस्ति " [बृ० ४-५-१३] इति । तथोपाधिप्रलय एवायं नाऽऽत्मविलय इत्येतदपि "अत्रैव मा भगवान्मोहान्तमापीपदन्न वा अहमिमं विजानामि न प्रेत्य संज्ञाऽस्ति " [बृ० माध्य० ४-५-१४] इति प्रश्नपूर्वकं प्रतिपादयति । " न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवति " [बृ० माध्य० ४-५-१५] इति । प्रतिज्ञानुपरोधोऽप्यविकृतस्यैव ब्रह्मणो जीवभावाभ्युपगमात् । लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव । " अत ऊर्ध्वं विमोक्षायैव ब्रूहि " [बृ० ३-३-१४] इति च

तन्मयत्वोक्त्या स्वीकृतमित्याशङ्क्याऽऽह—तन्मयत्वमिति । जाल्मो जडात्मा प्राकृतः पुरुषः स यथा स्त्रीपरतन्त्रः स्त्रीमयो व्यपदिश्यते तथा जीवस्याप्रपञ्चपूर्णत्वाप्रतिपत्त्या बुद्ध्याद्युपरक्तपरिच्छिन्नरूपत्वं बुद्ध्याद्यधीनमिति तन्मयत्वोक्तिरित्यर्थः । अनुग्राहकमनुमानमपोद्यानुग्राह्यश्रुतेर्गतिमाह—यदपीति । अत एवेत्यस्य व्याख्यानमुपाधीति । नयनमभिनयति—उपाधीति । तत्र मैत्रेयिब्राह्मणं संवादयति—तथा चेति । प्रज्ञानघन एवेत्युक्त्वा न प्रेत्य संज्ञाऽस्तीति वदतो विरोधः स्यादित्याशङ्क्याऽऽह—तथेति । पूर्वापरविरोधसमाधिद्वारेति यावत् । न प्रेत्येत्युक्तस्यायमिति परामर्शः । एतदपि प्रश्नपूर्वकं प्रतिपादयतीति संबन्धः । प्रश्नमनुक्रामति—अत्रेति । मोहान्तं मोहमध्यमापीपददापादितवानिममित्यर्थनिर्देशः । प्रतिपादनप्रकारं प्रकटयति—न वेति । मोहं मोहैंकरं वाक्यम् । अविनाशित्वे परिणामित्वाभावं हेतुमाह—अनुच्छित्तीति । कथं तर्हि न प्रेत्येत्यादि तत्राऽऽह—मात्रेति । यत्तु प्रतिज्ञया ब्रह्मकार्यता जीवस्येति तत्राऽऽह—प्रतिज्ञेति । यत्तु लक्षणभेदान्नैक्यमिति तत्राऽऽह—लक्षणेति । बिम्बप्रतिबिम्बादिवदौपाधिको भेदो न स्वाभाविक इत्यत्र हेतुमाह—अत इति । प्रधानवाक्येन फलवताऽऽक्षिप्तनित्यत्वबोधकावान्तरवाक्यानुरोधेन प्रधानवाक्यविरुद्धकार्यत्ववा-

---

१ ज. 'त्पत्तावस्यो' । २ ज. 'ये च । ३ क. ज. 'मिदं वि' । ४ ड. 'हकारं । ५ ठ. ड. 'त्यत्वावा' ।

(जीवस्याचिद्रूपत्वखण्डनपूर्विका तच्चिद्रूपत्वसिद्धिः, अधि० १२)

प्रकृतस्यैव विज्ञानमयस्याऽऽत्मनः सर्वसंसारधर्मप्रत्याख्यानेन परमात्मभावप्रतिपादनात् । तस्मान्नैवाऽऽत्मोत्पद्यते प्रविलीयते चेति ॥ १७ ॥ (११)

(जीवस्याचिद्रूपत्वखण्डनपूर्विका तच्चिद्रूपत्वसिद्धिः, अधि० १२)

ज्ञोऽत एव ॥ १८ ॥ (१२)

स किं काणभुजानामिवाऽऽगन्तुकचैतन्यः स्वतोऽचेतन आहोस्वित्सांख्यानामिव नित्यचैतन्यस्वरूप एवेति वादिविप्रतिपत्तेः संशयः । किं तावत्प्राप्तम् । आगन्तुकमात्मनश्चैतन्यमात्ममनःसंयोगजमग्निघटसंयोगजरोहितादिगुणवदिति प्राप्तम् । नित्यचैतन्यत्वे हि सुप्तमूर्छितग्रहाविष्टानामपि चैतन्यं स्यात् । ते पृष्टाः सन्तो न किंचिद्वयमचेतयामहीति जल्पन्ति स्वस्थाश्च चेतयमाना

दिवाक्यानां दुर्बलत्वेनोपचरितार्थत्वान्मिथो विरोधाभावान्नित्यप्रत्यग्ब्रह्मसमन्वयसिद्धिरित्युपसंहरति—तस्मादिति ॥ १७ ॥ (११)

आत्मनो नित्यत्वमुक्त्वा तदनुत्पत्तिहेतोः स्वप्रकाशत्वमाह—ज्ञ इति । अनुत्पत्तौ हि स्वप्रकाशं ब्रह्मैवोपहितं जीव इति तत्स्वप्रकाशता । न चैवं गतार्थत्वमनुत्पन्नस्यापि जीवस्यानित्यज्ञानत्वश्रुत्या ब्रह्मान्यत्वशङ्कायां ब्रह्मैक्ययोग्यत्वायात्र जीवस्य स्वप्रकाशतोक्तेरिति भावः । विषयसंशयतत्कारणानि दर्शयति—स इति । विमृश्य पूर्वपक्षं गृह्णाति—किमिति । अत्र चाऽऽत्मैवास्य ज्योतिरित्यादिश्रुतीनां पश्यंश्चक्षुरित्यादिश्रुतिभिर्जीवानित्यैधीत्ववादिनीभिर्विरोधसमाधानद्वारा चिद्रूपप्रत्यग्ब्रह्मणि समन्वयसाधनात्पादादिसंगतयः । पूर्वपक्षे यथोक्तश्रुतीनां मिथो विरोधादनैकमत्यादप्रामाण्यादुक्ते ब्रह्मणि समन्वयासिद्धिः । सिद्धान्ते तासामविरोधादेकवाक्यतया प्रामाण्यात्तत्र तत्सिद्धिः । आत्मनश्च चैतन्यमागन्तुकं किं तर्हि तस्य कारणमागन्तुकस्य तदपेक्षत्वात्तत्राऽऽह—आत्मेति । आत्मा कादाचित्कज्ञानस्तदर्थमादीयमानसाधनत्वादीश्वरवदिति व्यतिरेकीत्यर्थः । समवाय्यसमवायिविषयं विशेषणम् । निमित्तं त्वदृष्टादि । आत्ममनःसंयोगादसमवायिनश्चैतन्यमात्मगुणो भवतीत्यत्र पिठरपाकप्रक्रियया दृष्टान्तमाह—अग्नीति । किं चाऽऽत्मा ज्ञानान्तरप्रकाश्यो वस्तुत्वाद्घटवदिति मत्वाऽऽह—इति प्राप्तमिति । आत्मा न नित्यचैतन्यस्तद्व्यभिचारित्वाद्घटवदित्याह—नित्येति । इष्टापत्तिं निराचष्टे—ते पृष्टा इति । तदा तेषामसत्त्वादेव चैतन्यव्यभिचारित्वमित्याशङ्क्याऽऽह—स्वस्थाश्चेति । तथाऽपि कथं चैतन्यस्याऽऽगन्तुकत्वं तत्राऽऽह—चेतयमाना इति । आत्मा न ज्ञानस्वभावः स्वसंसर्गिसर्वानवभासकत्वादादित्यवदिति

---

१ ज. °यस्यैवाऽऽत्म° । २ क. ज. प्रली° । ३ ड. ञ. 'ते वेति । ४ ठ. °त्यत्वधीवा° । ५ क. °नश्चेचैत° । ठ. ड. 'नश्चैत° । ६ ठ. °मन्वयस° । ड. °मन्व्यस° । ७ ख. 'वायास° ।

दृश्यन्ते । अतः कादाचित्कचैतन्यत्वादागन्तुकचैतन्य आत्मेति । एवं प्राप्तेऽभिधीयते—" ज्ञः " नित्यचैतन्योऽयमात्मा " अत एव " यस्मादेव नोत्पद्यते परमेव ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठते । परस्य हि ब्रह्मणश्चैतन्यस्वरूपत्वमाम्नातम्—" विज्ञानमानन्दं ब्रह्म " [बृ० ३-९-२८] " सत्यं ज्ञानमनन्तं ब्रह्म " [तै० २-१-१] " अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव " [बृ० ४-५-१३] इत्यादिषु श्रुतिषु । तदेव चेत्परं ब्रह्म जीवस्तस्माज्जीवस्यापि नित्यचैतन्यस्वरूपत्वमग्न्यौष्ण्यप्रकाशवदिति गम्यते । विज्ञानमयप्रक्रियायां च श्रुतयो भवन्ति " असुप्तः सुप्तानभिचाकशीति " [बृ० ४-३-११] " अत्रायं पुरुषः स्वयं ज्योतिर्भवति " [बृ० ४-३-९] इति " न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते " इत्येवंरूपाः । " अथ यो वेदेदं जिघ्राणीति स

व्यतिरेकेणोपसंहरति—**अत इति** । भाष्ये हेतुसाध्यनिरुक्त्या साध्याविशिष्टत्वं निरसनीयम् । आत्मनः स्वप्रकाशत्वश्रुतीनामनित्यधीत्वश्रुतीनां च विरोधे समन्वयासिद्धिरिति पक्षमनूद्य सिद्धान्तयति—**एवमिति** । सूत्रं योजयति—**ज्ञ इति** । अत एवेत्युक्तं व्यनक्ति—**यस्मादिति** । उत्पत्त्यभावे हेतुमाह—**परमिति** । तस्य कुतो जीवत्वं तत्राऽऽह—**उपाधीति** । येन ब्रह्माभिन्नत्वेनोत्पत्तिरात्मनो निरस्ता तेनैव तस्य नित्यचैतन्यताऽपि सुप्रतिपदा । विमतं चैतन्यस्वभावं ब्रह्माभिन्नत्वात्तद्वदित्यर्थः । दृष्टान्तस्य साध्यवैकल्यमुद्धरति—**परस्येति** । हेत्वसिद्धिं प्रत्याह—**तदेवेति** । चेच्छब्दो निश्चयार्थः । प्रकृतिविकारत्वहीनद्रव्यार्थपदसामानाधिकरण्यमेकद्रव्यनिष्ठमुक्तसामानाधिकरण्यत्वात्सोऽयमितिवदित्यनुमानात्प्रवेशश्रुतेश्च ब्रह्मैव जीवो निश्चित इति हेतुसिद्धिरित्यर्थः । ब्रह्माभिन्नत्वफलं निगमयति—**तस्मादिति** । न केवलं नित्यचैतन्यब्रह्मत्वाज्जीवस्य नित्यचैतन्यत्वं किंतु स्वप्रकाशत्वश्रवणादपीत्याह—**विज्ञानेति** । योऽयं विज्ञानमयः प्राणेष्वित्यारभ्य तत्प्रकरणस्थाः श्रुतीरात्मस्वप्रकाशत्वसाधनायोपन्यस्यन्नुक्तानुमानानां कालात्ययापदिष्टत्वमाह—**असुप्त इति** । स्वयमसुप्तो भासमान एवाऽऽत्मा सुप्तान्वागादीनुपरतव्यापारानभिपश्यतीति यावत् । अत्रेति स्वप्नोक्तिः । न च तत्र मनसो भावात्तन्निमित्तमात्मनो ज्योतिष्ट्वं तदा तस्य कर्मत्वादकरणत्वादिति भावः । व्यभिचारिकरणजन्यबुद्धीनामव्यभिचारिचैतन्यं विना नियतानुसंधानासिद्धेरात्मनो नित्यचैतन्यत्वमित्याह—**अथेति** । आत्मा नित्यचैतन्यस्वभावः स्वसत्तायां तद्व्यतिरेकशून्य-

---

१ ङ. ज. ञ. ट. 'ति " इति " अ' । २ ठ. ड. 'साध्यानि' । ३ क. 'न्यभावत्वा' ।

(जीवस्या चिद्रूपत्वखण्डनपूर्विका तच्चिद्रूपत्वसिद्धिः, अधि० १२)

आत्मा " [छा० ८-१२-४] इति च सर्वैः करणद्वारैरिदं वेदेदं वेदेति विज्ञानेनानुसंधानात्तद्रूपत्वसिद्धिः । नित्यस्वरूप-चैतन्यत्वे घ्राणाद्यानर्थक्यमिति चेत् । न । गन्धादिविषय-विशेषपरिच्छेदार्थत्वात् । तथाहि दर्शयति—"गन्धाय घ्राणम्" इत्यादि । यत्तु सुप्तादयो न चेतयन्त इति तस्य श्रुत्यैव परिहा-रोऽभिहितः । सुषुप्तं प्रकृत्य—" यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् " [बृ० ४-३-२३] इत्यादिना । एतदुक्तं भवति—विषयाभावादियमचेतयमानता न चैतन्याभावादिति । यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्या-भावादनभिव्यक्तिर्न स्वरूपाभावात्तद्वत् । वैशेषिकादितर्कश्च श्रुतिविरोध आभासी भवति । तस्मान्नित्यचैतन्यस्वरूप एवाऽऽ-त्मेति निश्चिनुमः ॥ १८ ॥ (१२)

त्वादीश्वरसंवेदनवदिति भावः । प्रतिकूलतर्कपराहतिं शङ्कते—**नित्येति** । आत्मनो नित्यचैतन्यत्वेऽपि स्वतोऽसङ्गतया विषयासंसर्गात्तद्विशेषयोगद्वारा तत्परिच्छेदार्थम-न्तःकरणाद्यपेक्षणान्न तद्वैयर्थ्यमित्याह—**नेति** । न चासंसर्गित्वादेव विषयविशेषासंसर्गे कुतस्तद्ज्ञानं मिथो योगेऽपि द्वयोरेकान्तःकरणसंसर्गाद्युक्तत्वेन भानसंभवान्मुखरक्ति-मगुणयोर्मिथो योगेऽपि स्फटिकोपरागाधीनसंबन्धवदिति भावः । गन्धादिविषय-विशेषस्य परिच्छेदस्तदवच्छिन्नश्चित्प्रकाशस्तद्व्यञ्जकजडप्रकाशान्तःकरणपरिणामोदया-र्थत्वाद्घ्राणादीनां नाऽऽनर्थक्यमित्यत्र श्रौतं लिङ्गमाह—**तथाहीति** । स्वस-त्तायां तदव्यभिचारित्वादिति हेतोरसिद्धिं परिहर्तुं परोक्तं तद्व्यभिचारित्वहेतुमनुव-दति—**यत्त्विति** । स्वकीयहेतोरसिद्धिमुद्धरन्परकीयहेतोरागमविरोधमाह—**तस्येति** । पश्यन्नित्येतदुपपादयति—**न हीति** । न पश्यतीत्युक्तं व्यनक्ति—**न त्विति** । पश्यन्न पश्यतीति विरोधमाशङ्क्याऽऽह—**एतदिति** । विषयाभावादचेतयमा-नत्वं दृष्टान्तेन स्पष्टयति—**यथेति** । वस्तुत्वादिहेतोरनित्यचैतन्यत्वसिद्धावात्म-नश्चिद्रूपता कुतः स्यादित्याशङ्क्याऽऽह—**वैशेषिकादीति** । आत्मचैतन्यस्याऽऽ-गन्तुकत्वे मानाभावात्तस्य नित्यचैतन्यत्वे पश्यन्नित्यादिश्रुतीनां स्वप्रकाशत्वश्रुत्यनु-सारेण नयनादन्योन्यमविरोधान्नित्यचैतन्ये प्रत्यग्ब्रह्मणि समन्वयसिद्धिरित्युपसंहरति—**तस्मादिति** ॥ १८ ॥ (१२)

---

१ क. ज. °त्यचैतन्यस्वरूपत्वे । २ क. ज. °रोधादाभा° । ३ क. °रतज्ज्ञानं । ४ क. च. झ. °रिहे° । ५ ठ. ड. °सारान्नय° ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

इदानीं तु किंपरिमाणो जीव इति चिन्त्यते । किमणुपरिमाण उत मध्यमपरिमाण आहोस्विन्महापरिमाण इति । ननु च नाऽऽत्मोत्पद्यते नित्यचैतन्यश्चायमित्युक्तम् । अतश्च पर एवाऽऽत्मा जीव इत्यापतति परस्य चाऽऽत्मनोऽनन्तत्वमाम्नातं तत्र कुतो जीवस्य परिमाणचिन्तावतार इति । उच्यते—सत्यमेतत् । उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयन्ति । स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते । तस्य सर्वस्यानाकुलत्वोपपादनायायमारम्भः । तत्र प्राप्तं तावदुत्क्रान्तिगत्यागतीनां श्रवणात्परिच्छिन्नोऽणुपरिमाणो जीव इति । उत्क्रान्तिस्तावत् " स यदाऽस्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति " [कौषीत० ३-३] इति । गतिरपि

ब्रह्मैक्ययोग्यत्वायाऽऽत्मनः स्वप्रकाशत्वमुक्तम् । इदानीं तस्य स्वाभाविकाणुत्वनिरासेन वस्तुतो महत्त्वं चैतन्यादीषद्बृहिष्ठं साधयति—**उत्क्रान्तीति** । अधिकरणस्य विषयसंशयौ दर्शयति—**इदानीमिति** । किमणुपरिमाणो जीव आहो महापरिमाण इत्येवं विप्रतिपत्तेः संदिह्यते । मध्यमपरिमाणत्वं निरस्तमेवात्र तथाऽणुत्वं निरस्तप्रायमिति वक्तुमतीताधिकरणारम्भमाक्षिपति—**ननु चेति** । तथाऽपि जीवस्याऽऽनन्त्यनिरूपणार्थमधिकरणमित्याशङ्क्याऽऽह—**अतश्चेति** । तुल्यलक्षणत्वादित्यर्थः । तथाऽपि विचारारम्भस्य किं जातं तदाह—**परस्येति** । तथाऽपि जीवस्य तन्नोक्तं तत्राऽऽह—**तत्रेति** । पराभिन्नतया तद्वदानन्त्ये सतीति यावत् । आरम्भं समाधत्ते—**उच्यत इति** । यदुक्तं जीवस्य नित्यत्वादि तदङ्गी करोति—**सत्यमिति** । तर्हि परममहत्त्वमपि तस्य सिद्धमेव किमनया चिन्तयेत्याशङ्क्याऽऽह—**उत्क्रान्तीति** । न केवलं श्रुतार्थापत्तिसिद्धमात्मनोऽणुत्वं किंतु श्रौतमपीत्याह—**स्वशब्देनेति** । आत्माणुत्वश्रुतिकलापस्य तदानन्त्यश्रुतिजातस्य वा(चा)नाकुलत्वमन्योन्यमविरुद्धत्वं तत्प्रतिपादनेनापरिच्छिन्ने ब्रह्मणि समन्वयसाधकमधिकरणमर्थवदित्युपसंहरति—**तस्येति** । एतेन पादादिसंगतिरुक्ता । पूर्वपक्षे चाऽऽत्माणुत्वमहत्त्वश्रुत्योर्विरुद्धत्वेनाप्रामाण्यादुक्ते ब्रह्मणि समन्वयासिद्धिः । सिद्धान्ते तयोरविरुद्धत्वात्प्रामाण्यात्तत्सिद्धिः । अधिकरणारम्भमेवमुक्त्वा सूत्रं व्याकुर्वन्पूर्वपक्षयति—**तत्रेति** । उक्तं हेतुं विवृणोति—**उत्क्रान्तीति** । स पुरुषो मुमू-

---

१ ड. झ. ञ. ट. °न्महत्परि° । २ ड. ञ. °नु नाऽऽ° । ३ क. °भेवमेत° । ४ क. ज. °णादणुर्जीव । ५ क. ठ. °हिष्ठं सा° । ६ क ठ. ड, °क्तुमानीता° । ७ क. ख. तदाह ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

" ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति [कौषीत० १-२] इति । आगतिरपि " तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणे " [बृ० ४-४-६] इति । आसामुत्क्रान्तिगत्यागतीनां श्रवणात्परिच्छिन्नस्तावज्जीव इति प्राप्नोति । न हि विभोश्चलनमवकल्पत इति । सति परिच्छेदे[1] शरीरपरिमाणत्वस्याऽऽर्हतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते॥१९॥

स्वात्मना चोत्तरयोः ॥ २० ॥

उत्क्रान्तिः कदाचिदचलतोऽपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या कर्मक्षयेणावकल्पेत । उत्तरे तु गत्यागती नाचलतः संभवतः । " स्वात्मना " हि तयोः संबन्धो भवति गमेः कर्तृस्थक्रियत्वात्[2] । अमध्यमपरिमाणस्य च गत्यागती अणुत्व एव

र्षुरारब्धकर्मावसाने यदाऽस्मादभिमानतो गृहीतादिति यावत् । सहैवेत्यत्र तदेति वक्तव्यम् । एतच्छब्दो वागादिविषयः । तस्माल्लोकादित्यागमनापादानत्वेन चन्द्रलोको गृह्यते । तत्र भोक्तव्यकर्मक्षयानन्तर्यं पुनरित्युच्यते । अस्मै लोकायेत्येतं लोकं प्रतीत्यर्थः । कर्मशब्देन तदनुष्ठानं लक्ष्यते । हेतुमनूद्य तत्फलमाह—**आसामिति** । ननु जीवस्योत्क्रान्तिगत्यागतिभिश्चलनमेव गम्यते न परिच्छेदस्तत्राऽऽह—**न हीति** । सर्वगतस्य स्वाश्रयसंयोगविभागहेतुश्चलनम् । नभोवच्चलनं न चेत्तथाऽपि कुतोऽणुत्वं परिशेषादित्याह—**सतीति** ॥ १९ ॥

नाऽऽत्मनो देहादपसर्पणमुत्क्रमणं किंतु स्वाम्यनिवृत्तिमात्रम् । मन एव तूत्क्रम्य भोगदेशं गच्छतीत्येके तत्राऽऽह—**स्वात्मनेति** । सूत्रं व्याचिख्यासुः स्वाम्यनिवृत्तिमात्रमुत्क्रमणमित्यङ्गी करोति—**उत्क्रान्तिरिति** । देहे स्वाम्यनिवृत्तौ हेतुमाह—**कर्मेति** । तथाऽपि गत्यागतिभ्यामणुत्वमात्मनः स्यादपरिच्छिन्नस्य सतस्तदयोगादित्याह—**उत्तरे त्विति** । घटगमनागमनाभ्यां नभसस्तद्भ्रान्तिवदुपाधेरात्मनोऽपि गत्यागतिभ्रान्तिः स्यादित्याशङ्क्य दृष्टान्ते दृष्टत्वात्तथात्वेऽपि कथमागमिकस्य तथात्वमित्याह—**स्वात्मनेति** । पचतीत्यादौ पाकाद्यनाश्रयस्यापि कर्तृत्वोक्तिवदात्मनो गत्याद्यनाश्रयस्यापि तत्कर्तृत्वमुच्यतामित्याशङ्क्याऽऽह—**गमेरिति** । श्रुतिप्रामाण्याद्गत्यागत्योर्जीवेनैव संबन्धे फलितमाह—**अमध्यमेति** । जीवोऽणुरमध्यमपरिमाणत्वे सति गत्यागतिमत्त्वात्परमाणुवदित्यर्थः । स्वाम्यनिवृत्तिमात्रमुत्क्रान्तिरित्युपेत्योक्तम् । संप्रति सूत्रोक्तोत्क्रान्तेस्तर्हि पूर्वोत्तरपक्षानुपयोगितेत्याशङ्क्याऽऽह—

---

१ ङ. ञ. °दे शरी° । २ ङ. ज. झ. ञ. ट. °क्रियात्वा° ।

संभवतः । सत्योश्च गत्यागत्योरुत्क्रान्तिरप्यपसृप्तिरेव देहादिति प्रतीयते । न ह्यनपसृप्तस्य देहाद्गत्यागती स्याताम् । देहप्रदेशानां चोत्क्रान्तावपादानत्ववचनात् । " चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः " [बृ० ४-४-२] इति । " स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति " [बृ० ४-४-१] " शुक्रमादाय पुनरैति स्थानम् " [बृ० ४-३-११] इति चान्तरेऽपि शरीरे शारीरस्य गत्यागती भवतः । तस्मादप्यस्याणुत्वसिद्धिः ॥ २० ॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥

अथापि स्यान्नाणुरयमात्मा । कस्मात् । "अतच्छ्रुतेः" अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः । " स वा एष महानज आत्मा । योऽयं विज्ञानमयः प्राणेषु" [बृ०४-४-२२] " आकाशवत्सर्वगतश्च नित्यः" । " सत्यं ज्ञानमनन्तं ब्रह्म" [तै० २-१-१] इत्येवंजातीयका हि श्रुतिरात्मनोऽणुत्वे विप्रतिषिध्येतेति चेत् । नैष दोषः । कस्मात् " इतराधिकारात् " । परस्य ह्यात्मनः प्रक्रियायामेषा परिमाणान्तरश्रुतिः । परस्यैवाऽऽत्मनः प्राधान्येन वेदान्तेषु वेदि-

---

सत्योश्चेति । तत्र हेतुः—न हीति । इतश्च देहादपसर्पणमेवोत्क्रान्तिरित्याह—देहेति । अपादानत्वं विश्लेषावधित्वम् । अन्येभ्यो वा मुखादिभ्यस्तं जीवमुत्क्रामन्तं प्राणोऽनूक्रामतीति शेषः । किंच स्वदेहमध्येऽपि गत्यागतिभावात्परिच्छिन्नो जीव इत्याह—स इति । जीवश्चक्षुरादीन्द्रियाणि गृहीत्वा स्वापादौ हृदयं प्रविशति । शुक्रं ज्योतिष्मत्करणजातमादाय पुनर्जागरितमागच्छतीत्यर्थः । बाह्यादिवाऽऽन्तरादपि गत्यादेरात्मनोऽणुत्वमित्याह—तस्मादिति ॥ २० ॥

सर्वगतत्वश्रुतिविरोधमाशङ्क्य विषयान्तरोक्त्या प्रत्याह—नाणुरिति । चोद्यं विवृणोति—अथापीति । उक्तहेतुभिरात्मनोऽणुत्वे दृष्टेऽपीति यावत् । अणुत्वश्रुतेरुक्तत्वादसिद्धो हेतुरित्याशङ्क्याऽऽह—अणुत्वेति । परिमाणान्तरश्रवणं विवृणोति—स वा इति । परिहारमवतार्य व्याचष्टे—नेति । महापरिमाणश्रवणं परमात्मविषयं तत्प्रकरणस्थत्वादित्युक्तं साधयति—परस्येति । कथमस्य परविषयतेत्याशङ्क्य प्राधान्येन तस्य प्रतिपाद्यत्वादुत्सर्गतस्तथेत्याह—परस्यैवेति । न केव-

---

१ क. ज. °रप° । २ ज. ट. °क्षुषो वा । ३ ज. ट. °न्तरपि । ४ ठ. ड. °ति । प्रथ° ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

तव्यत्वेन प्रकृतत्वात्। "विरजः पर आकाशात्" इत्येवंविधाच्च परस्यैवाऽऽत्मनस्तत्र तत्र विशेषाधिकारात्। ननु "योऽयं विज्ञानमयः प्राणेषु" [बृ० ४-४-२२] इति शारीर[1] एव महत्त्वसंबन्धित्वेन प्रतिनिर्दिश्यते। "शास्त्रदृष्ट्या तु" एष निर्देशो "वामदेववत्" [ब्र० सू० १-१-३०] द्रष्टव्यः। तस्मात्प्राज्ञविषयत्वात्परिमाणान्तरश्रवणस्य न जीवस्याणुत्वं विरुध्यते ॥ २१ ॥

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥

इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववाची शब्दः श्रूयते "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश" [मुण्ड० ३-१-९] इति प्राणसंबन्धाच्च जीव एवायमणुरभिहित[2] इति गम्यते। तथोन्मानमपि जीवस्याणिमानं गमयति—

"बालाग्रशतभागस्य शतधा कल्पितस्य च[3]।
भागो जीवः स विज्ञेयः" [श्वे० ५-९] इति।

लमौत्सर्गिकं परप्रकरणत्वमारभ्याधीतिबलादपि तद्धीरित्याह—विरज इति। परिमाणान्तरश्रुतेः श्रुत्या जीवगामित्वे सिद्धे प्रकरणस्य दौर्बल्यान्न परविषयतेति शङ्कते—नन्विति। यथा वामदेवस्य गर्भस्थस्यैवाहं मनुरभवं सूर्यश्चेति शास्त्रदृष्ट्या व्यपदेशो दृष्टस्तथा जीवस्य परमार्थभेददृष्ट्या महत्त्वनिर्देशस्तथा च तस्य स्वतोऽणुत्वमविरुद्धमित्याह—शास्त्रेति। अणोर्जीवस्य ब्रह्मणो भिन्नाभिन्नत्वेनात्यन्तभेदाभावात्तद्भेदस्य चाध्यक्षत्वाद्भेद एव शास्त्रीयस्तदपेक्षया च जीवंमहत्त्वोक्तिरिति भावः। परिमाणान्तरश्रुतेरन्यविषयत्वाज्जीवस्याणुत्वं युक्तमित्युपसंहरति—तस्मादिति ॥ २१ ॥

गत्यादिश्रुत्यनुपपत्तेरनुमानस्य च श्रुत्यन्तरविरोधनिरासेनाणुत्वसाधकत्वमुक्तम्। इदानीं तत्रैव श्रुतिमाह—स्वशब्देति। चशब्दं योजयति—इतश्चेति। स्वशब्दं व्याकुर्वन्नितःशब्दार्थं स्फुटयति—यत इति। दृष्टान्तत्वविवक्षया परमात्मैवाणुरित्याणुरुक्त इत्याशङ्क्याऽऽह—प्राणेति। वृत्तिभेदेन पञ्चधा प्राणो यस्मिन्संनिविष्टः स प्राणाधारो जीव एवाणुर्वेदितव्य उच्यते परस्याप्राणसंबन्धादित्यर्थः। उन्मानं विभजते—तथेति। स्वशब्दवदित्यर्थः। उद्धृतं मानमुन्मानमत्यन्तापकृष्टपरिमाणमित्यर्थः। तदुदाहरति—बालेति।

---

१ क. °रीरो मं। २ ब. °ति। बाला°। ३ क. ज ञ. ट. तु। ४ ट. ड. ब्दं प्रयो। ५ ठ. °ति। बाले°।

" आराग्रमात्रो ह्यवरोऽपि दृष्टः " [श्वे०५-८] इति चोन्मानान्तरम् ॥ २२ ॥

नन्वणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्यते । दृश्यते च जाह्नवीहृदनिमग्नानां सर्वाङ्गशैत्योपलब्धिर्निदाघसमये च सकलशरीरपरितापोपलब्धिरिति । अत उत्तरं पठति—

अविरोधश्चन्दनवत् ॥ २३ ॥

यथा हि हरिचन्दनबिन्दुः शरीरैकदेशसंबद्धोऽपि सन्सकलदेहव्यापिनमाह्लादं करोत्येवमात्माऽपि देहैकदेशस्थः सकलदेहव्यापिनीमुपलब्धिं करिष्यति । त्वक्संबन्धाच्चास्य सकलशरीरगता वेदना न विरुध्यते । त्वगात्मनोर्हि संबन्धः कृत्स्नायां त्वचि वर्तते । त्वक्च कृत्स्नशरीरव्यापिनीति ॥ २३ ॥

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २४ ॥

अत्राऽऽह—यदुक्तम् "अविरोधश्चन्दनवत्" इति तदयुक्तं दृष्टा-

आराग्रादुद्धृतं मानं मात्रा यस्य स जीवस्तथा ॥ २२ ॥

सूत्रान्तरार्थं शङ्कते—नन्विति । उपलब्धिरपि न सर्वदेहगता किंतु प्रदेशगतेत्याशङ्क्याऽऽह—दृश्यते चेति । देहव्यापिकार्यान्यथानुपपत्त्या जीवो नाणुरिति चोद्यं सूत्रेण प्रत्याह—अत इति । परिच्छिन्नस्यापि स्वभाववशाद्व्यापि कार्यं स्यादित्यन्यथोपपत्तिं दर्शयन्दृष्टान्तं व्याचष्टे—यथेति । दार्ष्टान्तिकमाह—एवमिति । देहव्यापकत्वमात्मसंबन्धस्य सर्वाङ्गीणशैत्यज्ञाने शक्तत्वाद्युक्तं प्रादेशिकस्याऽऽत्मनो व्यापि कार्यमित्युक्तेऽर्थे युक्तिं ब्रुवन्नवशिष्टं सूत्रभागं व्याचष्टे—त्वगिति । प्रादेशिकस्याऽऽत्मनः संबन्धः समस्तां त्वचं कथं व्याप्नुयात्तत्राऽऽह—त्वगात्मनोरिति । संबन्धस्य त्वगवयविनिष्ठत्वादवयविनश्चैकत्वात्तद्व्याप्तिरित्यर्थः । तथाऽपि कथं त्वचः सर्वाङ्गीणशैत्यसंगतिस्तत्राऽऽह—त्वक्चेति । अर्थापत्तेरन्यथाऽप्युपपत्तिं दृष्टान्तेनोक्तामुपसंहर्तुमितिशब्दः ॥ २३ ॥

वैषम्यं शङ्कित्वा प्रत्याह—अवस्थितीति । तत्र शङ्कां विवृणोति—अत्रेति । जीवस्याणोरपि देहव्यापिकार्यं स्यादिति दृष्टान्तेनोक्ते सतीति यावत् । अतुल्यत्वमेव

---

१ क. हि चं । २ क. ज. ञ. °बन्धोऽपि ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

न्तदार्ष्टान्तिकयोरतुल्यत्वात्। सिद्धे ह्यात्मनो देहैकदेशस्थत्वे चन्दनदृष्टान्तो भवति। प्रत्यक्षं तु चन्दनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनं च। आत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्तित्वम्। अनुमेयं तु तदिति यदप्युच्येत। न चात्रानुमानं संभवति। किमात्मनः सकलशरीरगता वेदना त्वगिन्द्रियस्येव सकलदेहव्यापिनः सतः किं वा विभोर्नभस इवाऽऽहोस्विच्चन्दनबिन्दोरिवाणोरेकदेशस्थस्येति संशयानतिवृत्तेरिति। अत्रोच्यते—नायं दोषः। कस्मात्। "अभ्युपगमात्"। अभ्युपगम्यते ह्यात्मनोऽपि चन्दनस्येव देहैकदेशवृत्तित्वमवस्थितिवैशेष्यम्। कथमित्युच्यते—हृदि ह्येष आत्मा पठ्यते वेदान्तेषु। "हृदि ह्येष आत्मा" [प्रश्न० ३-६] "स वा एष आत्मा हृदि" [छा०८-३-३] "कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" [बृ० ४-३-७] इत्याद्युपदेशेभ्यः। तस्मादृष्टान्तदार्ष्टान्तिकयोरवैषम्याद्युक्तमेवैतदविरोधश्चन्दनवदिति ॥ २४ ॥

गुणाद्वा लोकवत् ॥ २५ ॥

चैतन्यगुणव्याप्तेर्वाऽणोरपि सतो जीवस्य सकलदेहव्यापि

व्यतिरेकेण साधयति—सिद्धे हीति। न चाऽऽत्मनो देहैकदेशस्थत्वं प्रत्यक्षमित्युक्तदृष्टान्तासिद्धिरिति शेषः। दृष्टान्ते विशेषं दर्शयति—प्रत्यक्षं त्विति। अवस्थितिविशेषमेव विशदयति—एकेति। कार्यमपि तर्हि तथैव स्यादित्याशङ्क्योक्तम्—सकलेति। आत्मन्यपि तुल्यमेतदित्याशङ्क्याऽऽह—आत्मन इति। प्रत्यक्षतोऽल्पीयसश्चन्दनबिन्दोस्त्वगव्याप्त्या व्यापि कार्यं युक्तम्। यस्य तु संदिग्धमणुत्वं सर्वाङ्गीणं कार्यं तस्य व्यापित्वमौत्सर्गिकं तु हित्वा नेयं कल्पना युक्तेत्यर्थः। आत्मनो देहैकदेशस्थत्वमप्रत्यक्षमपि चन्दनबिन्दुदृष्टान्तेनाणुत्वहेतुनाऽनुमेयमिति शङ्कते—अनुमेयमिति। संदिग्धासंदिग्धत्वेन संदिग्धं दूषयति—नेत्यादिना। परिहारमवतार्य व्याकरोति—अत्रेति। प्रत्यक्षानुमानयोरभावादात्मनो देहैकदेशस्थत्वं निरस्तमिति शङ्कते—कथमिति। श्रुतिमाश्रित्य सूत्रावयवेन समाधत्ते—हृदीति। यो वेद निहितं गुहायामित्याद्युपदेशसंग्रहार्थमादिपदम्। सिद्धे तुल्यत्वे फलितमाह—तस्मादिति ॥ २४ ॥

अणोरात्मनश्चैतन्यं स्वभावतोऽणुपरिमाणं देहतुल्योपलब्ध्याकारपरिणतमित्युक्त्वा पक्षान्तरमाह—गुणाद्वेति। प्रतिज्ञां व्याचष्टे—चैतन्येति। जीवस्याणुत्वे तद्गुणस्य

---

१ क. 'यं त'। २ ज. यदुच्ये'। ३ क. ज. 'शवर्तित्व'। ४ क. 'ति वैशेष्यमे'। ५ ठ. ड. 'णि नथै'। ६ ट. ड. 'णं च का'। ७ क. ख. ठ. ड. 'न दू'।

कार्यं न विरुध्यते । यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्तिनामपि प्रभाऽपवरकव्यापिनी सती कृत्स्नेऽपवरके कार्यं करोति तद्वत् । स्यात्कदाचिच्चन्दनस्य सावयवत्वात्सूक्ष्मावयवविसर्पणेनापि सकलदेह आह्लादयितृत्वं न त्वणोर्जीवस्यावयवाः सन्ति यैरयं सकलदेहं विप्रसर्पेदित्याशङ्क्य " गुणाद्वा लोकवत् " इत्युक्तम् ॥ २५ ॥

कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्तेत । न हि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्तमानो दृश्यते । प्रदीपप्रभावद्भवेदिति चेत् । न । तस्या अपि द्रव्यत्वाभ्युपगमात् । निबिडावयवं हि तेजोद्रव्यं प्रदीपः । प्रविरलावयवं तु तेजोद्रव्यमेव प्रभेति । अत उत्तरं पठति—

व्यतिरेको गन्धवत् ॥ २६ ॥

यथा गुणस्यापि सतो गन्धस्य गन्धवद्द्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गन्धवत्सु कुसुमगन्धोपलब्धेः, एवमणोरपि सतो जीवस्य चैतन्यगुणव्यतिरेको भविष्यति । अतश्चानैकान्तिकमेतद्गुणत्वाद्रूपादिवदाश्रयविश्लेषानुप-

---

चैतन्यस्य कुतो देहव्याप्तिस्तत्राऽऽह—यथेति । सूत्रस्यापरितुष्टा पक्षान्तरार्थत्वादपरितुष्टिहेतुमाह—स्यादिति । जीवस्यापि स्वावयवद्वारा सर्वदेहविप्रसर्पणमाशङ्क्य तदवयवानामचेतनत्वे तदयोगाच्चैतन्येऽपि प्रत्येकं चैतन्ये युगपदेकस्यानेकभोक्त्रधिष्ठितस्य देहस्याव्यवस्थापातान्मिलितचैतन्ये मेलनस्यावयवानतिरेकात्तेषां वा चैतन्यान्न जीवस्य स्वावयवैर्देहे विप्रसर्पणमिति मत्वाऽऽह—न त्विति ॥ २५ ॥

सूत्रान्तरमवतारयितुमाक्षिपति—कथमिति । चैतन्यं गुणत्वान्न गुणिनोऽन्यत्रेत्यत्र दृष्टान्तमाह—न हीति । यथा दीपस्य गुणोऽपि प्रभा तदतिरेकेणाशेषमपवरकोदरं व्याप्नोति तथा चैतन्यमात्मगुणोऽपि तमतिक्रम्य सर्वं देहं व्याप्नुयादतो व्यभिचारान्नानुमेति शङ्कते—प्रदीपेति । प्रभाया गुणत्वाभावान्नैवमित्याह—नेति । द्वयोरपि तेजोद्रव्यत्वे कथमवान्तरभेदस्तत्राऽऽह—निबिडेति । गुणत्वस्य गन्धे व्यभिचारमाह—अत इति । दृष्टान्तं व्याचष्टे—यथेति । तत्र हेतुमाह—अप्राप्तेष्विति । सूत्रावयवं व्याकुर्वन्दार्ष्टान्तिकमाह—एवमिति । परानुमाने फलितं दोषमाह—अतश्चेति ।

---

१ क. ङ. अ. °कलं दे° । २ क. °द्रव्यं प्र° । ३ क. ख. °विस° । ४ क. ख. °त्मनो गु° ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

पत्तिरिति । गुणस्यैव सतो गन्धस्याऽऽश्रयविश्लेषदर्शनात् । गन्धस्यापि सहैवाऽऽश्रयेण विश्लेष इति चेन्न । यस्मान्मूलद्रव्याद्विश्लेषस्तस्य क्षयप्रसङ्गात् । अक्षीयमाणमपि तत्पूर्वावस्थातो गम्यते । अन्यथा तत्पूर्वावस्थैर्गुरुत्वादिभिर्हीयेत । स्यादेतत् । गन्धाश्रयाणां विश्लिष्टानामवयवानामल्पत्वात्सन्नपि विशेषो नोपलक्ष्यते । सूक्ष्मा हि गन्धपरमाणवः सर्वतो विप्रसृता गन्धबुद्धिमुत्पादयन्ति नासिकापुटमनुप्रविशन्त इति चेन्न । अतीन्द्रियत्वात्परमाणूनां स्फुटगन्धोपलब्धेश्च नागकेसरादिषु । न च लोके प्रतीतिर्गन्धवद्द्रव्यमाघ्रातमिति गन्ध एवाऽऽघ्रात इति तु लौकिकाः प्रतियन्ति । रूपादिष्वाश्रयव्यतिरेकेणानुपलब्धेर्गन्धस्याप्ययुक्त आश्रयव्यतिरेक इति चेन्न । प्रत्यक्ष-

---

अतःशब्दोक्तं हेतुं स्पष्टयति—**गुणस्येति** । उक्तहेत्वसिद्धिं ब्रुवन्व्यभिचारं वारयति—**गन्धस्येति** । किमिदमनुमेयं किं वाऽध्यक्षमिति विकल्प्याऽऽद्यं प्रत्याह—**नेति** । विश्लिष्टावयवानामल्पत्वादपक्षयो न भातीत्याशङ्क्याऽऽह—**अक्षीयमाणमिति** । तथात्वेनानुभूयमानमिति यावत् । विमतमवियुक्तावयवं पूर्वावस्थातो गुरुत्वाद्यपचयहीनत्वात्संमतवदित्यर्थः । हेतोरन्यथासिद्धिरिति शङ्कते—**स्यादिति** । विश्लिष्टानामल्पत्वादित्युपलक्षणं द्रव्यान्तराणूनामनुप्रविष्टत्वादित्यपि द्रष्टव्यम् । विश्लेषानुप्रवेशाभ्यां सन्नपि विश्लेषो गुरुत्वाद्यपचयरूपः सौक्ष्म्यान्नोपलक्ष्यत इत्यर्थः । नासिकापुटं प्रति गतानां गन्धवदवयवानामध्यक्षेणाग्रहादागतिरयुक्तेत्याशङ्क्यायोग्यत्वादग्रहणमित्याह—**सूक्ष्मा हीति** । परमाणुशब्देन परकीया वा परमाणवस्त्रसरेणवो वा गृह्येरन्नाद्ये तद्गतरूपादिवद्गन्धस्यापि नोपलब्धिः स्यादित्याह—**नेति** । द्वितीयं प्रत्याह—**स्फुटेति** । त्रसरेणुग्रहेऽपि नागकेसरादिष्वपि दूरेषु स्फुटगन्धधीर्भवति न भवेन्नासिकापुटं प्रविष्टानां गन्धवतां त्रसरेणुमात्रत्वादित्यर्थः । गन्धस्याऽऽश्रयेण सह गतिरनुमेयेति प्रतिक्षिप्य प्रत्यक्षपक्षं प्रत्याह—**न चेति** । कथं तर्हि लौकिकी धीस्तत्राऽऽह—**गन्ध इति** । गन्धो नाऽऽश्रयादन्यत्र वर्तते गुणत्वाद्रूपादिवदित्यनुमानान्नेदं व्यभिचारस्थलमिति शङ्कते—**रूपेति** । आश्रयेण सहैव गतिर्वा तदभावे गन्धस्यापि तद्राहित्यं वा साध्यमाद्ये पूर्वोक्तदोषं मत्वा द्वितीयं प्रत्याह—**नेति** । प्रत्यक्षविरोधा-

---

१ ङ. ज. प्रतीय° । २ झ, ट. °रेकेणानु° । ३ ख. °केशरा° । ४ क. °दूपव° ।

त्वादनुमानामवृत्तेः । तस्माद्यद्यथा लोके दृष्टं तत्तथैवानुमन्तव्यं निरूपकैर्नान्यथा । न हि रसो गुणो जिह्वयोपलभ्यत इत्यतो रूपादयोऽपि गुणा जिह्वयैवोपलभ्येरन्निति नियन्तुं शक्यते ॥ २६ ॥

तथा च दर्शयति ॥ २७ ॥

हृदयायतनत्वमणुपरिमाणत्वं चाऽऽत्मनोऽभिधाय[1] तस्यैव " आ लोमभ्य आ नखाग्रेभ्यः " [छा० ८-८-१] इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं " दर्शयति " ॥ २७ ॥

पृथगुपदेशात् ॥ २८ ॥

"प्रज्ञया शरीरं समारुह्य" [कौषी० ३-६] इति चाऽऽत्मप्रज्ञयोः कर्तृकरणभावेन पृथगुपदेशाच्चैतन्यगुणेनैवास्य शरीरव्यापितां[2] गम्यते । " तदेषां प्राणानां विज्ञानेन विज्ञानमादाय " [बृ० २-१-१७] इति च कर्तुः[3] शारीरात्पृथग्विज्ञानस्योपदेश एतमेवाभिप्रायमुपोद्बलयति । तस्मादणुरात्मेति ॥ २८ ॥

एवं प्राप्ते ब्रूमः—

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

तुशब्दः पक्षं व्यावर्तयति । नैतदस्त्यणुरात्मेति । उत्पत्त्यश्र-

---

दनुमानानुत्थाने फलितमाह—तस्मादिति । तद्विरोधेऽपि[4] तदुत्थितावतिप्रसक्तिं वक्ति—न हीति ॥ २६ ॥

गन्धस्य गुणिनं विनाऽपि वृत्तेश्चैतन्यस्यापि तद्योगादणुत्वेऽपि देहव्यापिकार्यसिद्धिरित्युक्तम् । इदानीं चैतन्येनैवाऽऽत्मनो देहव्यापित्वमित्यत्र श्रुतिमाह—तथा चेति । सूत्रं व्याचष्टे—हृदयेति ॥ २७ ॥

चैतन्यगुणेनाऽऽत्मनो देहव्यापी हेत्वन्तरमाह—पृथगिति । सूत्रं व्याचष्टे—प्रज्ञयेति । विधान्तरेण सूत्रार्थमाह—तदिति । एतमेवाभिप्रायं चैतन्येनाऽऽत्मनो देहव्यापित्वविषयं बाधकाभावं साधकभावं च परामृश्य पूर्वपक्षमुपसंहरति—तस्मादिति ॥ २८ ॥

तदनुवादेन सिद्धान्तं सूत्रयति—एवमिति । तदक्षरार्थमाह—तुशब्द इति । पक्षमनुभाष्य तद्व्यावर्तनं प्रतिजानीते—नैतदिति । तत्र हेत्वर्थमुक्तं स्मारयति—उत्पत्तीति । कार्यकारणत्वानुपपत्तौ सत्यां सामानाधिकरण्यश्रुतेश्चेति तृतीयहेत्वर्थः । जीवब्रह्मणोर-

---

१ क. °नो विधा° । २ ङ. ञ. °ताऽवग° । ३ ङ. ज. ञ. °र्तुः शरी° । ४ क. ख. °रोधोऽपि ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

वणाद्धि परस्यैव तु ब्रह्मणः प्रवेशश्रवणात्तात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तम्। परमेव चेद्ब्रह्म जीवस्तस्माद्यावत्परं ब्रह्म तावानेव जीवो भवितुमर्हति। परस्य च ब्रह्मणो विभुत्वमाम्नातं तस्माद्विभुर्जीवः। तथा च "स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु" [बृ० ४-४-२२] इत्येवंजातीयका जीवविषया विभुत्ववादाः श्रौताः स्मार्ताश्च समर्थिता भवन्ति। न चाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते। त्वक्संबन्धात्स्यादिति चेत्। नै। त्वक्कण्टकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत। त्वक्कण्टकयोर्हि संयोगः कृत्स्नायां त्वचि वर्तते त्वैक्च कृत्स्नशरीरव्यापिनीति। पादतल एव तु कण्टकनुं(तु)न्नो वेदनां प्रति लभेते। न चाणोर्गुणव्याप्तिरुपपद्यते गुणस्य गुणिदेशत्वात्। गुणत्वमेव हि गुणिनमनाश्रित्य गुणस्य हीयेत। प्रदीपप्रभायाश्च द्रव्यान्तरत्वं व्याख्यातम्। गन्धोऽपि

भेदेऽपि प्रकृते किं जातमित्याशङ्क्य जीवो महान्ब्रह्माभिन्नत्वात्तद्वदित्याह—**परमिति**। दृष्टान्तस्य साध्यवैकल्यं सत्यं ज्ञानमित्यादिश्रुत्या निराचष्टे—**परस्येति**। अनुमानफलमाह—**तस्मादिति**। जीवस्य विभुत्वे तन्महत्त्ववादिश्रुतिस्मृतिवाक्यान्यपि मुख्यार्थानि भवन्तीत्यनुमानानुग्राह्यमागममाह—**तथा चेति**। नित्यः सर्वगतः स्थाणुरित्यादयः स्मार्तवादाः। तत्त्वमस्यादिप्रधानवाक्याज्जीवस्य महत्त्वं तदणुत्वार्थगुणभूतवाक्यानां श्रुतिलिङ्गानां च तद्विरोधादौपाधिकार्थत्वसिद्धेरिति भावः। किंचार्थवादवाक्यानां लौकिकादपि न्यायाद्दौर्बल्यमिति न्यायेन सर्वदेहव्यापिशैत्योपलम्भान्यथानुपपत्तिनिमित्तमहत्त्वेनाणुत्वश्रुतीनां बाधः स्यादित्याह—**न चेति**। त्वगात्मसंबन्धस्य त्वग्व्यापित्वात्त्वत्रश्च सर्वदेहव्याप्तेस्तद्वारा जीवस्याणोरपि व्यापिकार्यमित्युक्तं शङ्कते—**त्वगिति**। अतिप्रसक्त्या प्रत्याह—**नेति**। पादतलमात्रे कण्टकस्य संयुक्तत्वाकुतोऽन्यत्र वेदनेत्याशङ्क्याऽऽह—**त्वगिति**। तथाऽपि कथं देहमात्रे वेदनाधीस्तत्राऽऽह—**त्वक्चेति**। अतिप्रसङ्गमुपसंहर्तुमितिशब्दः। अस्तु देहमात्रे वेदनाधीरित्यतिप्रसङ्गस्येष्टत्वमाशङ्क्याऽऽह—**पादेति**। यदुक्तं गुणाद्वेति तत्राऽऽह—**न चेति**। हेतुं व्यतिरेकेण स्फोरयति—**गुणत्वमिति**। लोकवदित्युक्तं प्रत्याह—**प्रदीपेति**। यत्तु व्यतिरेको गन्धवदिति तत्राऽऽह—**गन्धोऽपीति**। निराश्रयस्यैव

---

१ ज. °स्य ब्र°। २ क ञ. न। कण्ट°। ३ क. त्वक्कृत्स्न° । ४ ङ. ज. ञ. °नुन्ना वे° । ज. ञ. °भन्ते। न।

गुणत्वाभ्युपगमात्साश्रय एव संचरितुमर्हति । अन्यथा गुणत्वहानिप्रसङ्गात् । तथा चोक्तं द्वैपायनेन[महाभा० १२-२३२-९]

" उपलभ्याप्सु चेद्गन्धं केचिद्ब्रूयुरनैपुणाः ।
पृथिव्यामेव तं विद्यादपो वायुं च संश्रितम् " इति ॥

यदि च चैतन्यं जीवस्य समस्तशरीरं व्याप्नुयान्नाणुर्जीवः स्यात् । चैतन्यमेव ह्यस्य स्वरूपमग्नेरिवौष्ण्यप्रकाशौ । नात्र गुणगुणिविभागो विद्यत इति । शरीरपरिमाणत्वं च प्रत्याख्यातम् । परिशेषाद्विभुर्जीवः ।

कथं तर्ह्यणुत्वादिव्यपदेश इत्यत आह—" तद्गुणसारत्वात्तु तद्व्यपदेशः " इति । तस्या बुद्धेर्गुणास्तद्गुणा इच्छा द्वेषः सुखं दुःखमित्येवमादयस्तद्गुणाः सारः प्रधानं यस्याऽऽत्मनः संसारित्वे संभवति स तद्गुणसारस्तस्य भावस्तद्गुणसारत्वम् । न हि बुद्धेर्गुणैर्विना केवलस्याऽऽत्मनः संसारित्वमस्ति ।

संचरणं तस्योक्तमित्याशङ्क्याऽऽह—अन्यथेति । गन्धस्याऽऽश्रयनियमे युक्तिमुक्त्वा वृद्धसंमतिमाह—तथा चेति । न चाध्यक्षविरुद्धौ युक्त्यागमौ तेनाऽऽश्रयशून्यत्वाग्रहान्महतां च त्रसरेणूनामनुद्भूतरूपस्पर्शानामागतिरिति स्फुटोपलम्भसंभवान्मूलद्रव्ये चाविशेषोऽवयवान्तरयोगादिति भावः । चैतन्यस्य गुणत्वमुपेत्य गुणस्य गुणिनं विनाऽन्यत्रागतेः सर्वदेहव्यापिकार्ययोगान्नाणुर्जीव इत्युक्तम् । इदानीं न गुणत्वमपि तस्येत्याह—यदीति । चैतन्यव्याप्तौ जीवाणुत्वासिद्धिं ब्रुवतो वैयधिकरण्यमित्याह—चैतन्यमिति । औष्ण्यप्रकाशयोर्गुणत्वाच्चैतन्यस्य स्वरूपत्वेनोदाहरणतेत्याशङ्क्य रूपादिवद्गुणगुणित्वाभावान्नैवमित्याह—नात्रेति । औष्ण्यप्रकाशावग्निश्च सप्तम्यर्थः । औष्ण्याद्यतिरिक्ताग्निस्वरूपाभावं हेतुं कर्तुमितिशब्दः । जीवस्याणुत्वं न चेदस्तु मध्यमपरिमाणत्वं नेत्याह—शरीरेति । परिमाणद्वयायोगे परिशिष्टमाह—परिशेषादिति ।

विभुत्वे जीवस्याणुत्वादिव्यपदेशासिद्धिरित्युक्तमनुस्मारयति—कथमिति । तदुत्तरत्वेन सूत्रावयवं पातयति—अत इति । अभ्युपगमाद्धृदि हीति हृदयस्य प्रकृतत्वात्तन्निष्ठा बुद्धिरेवात्र तच्छब्देत्यक्षरार्थमाह—तस्या इति । पदार्थमुक्त्वा समासमाह—तद्गुणा इति । पारमार्थिकमात्मनः संसारित्वं किं बुद्धिगुणैरित्याशङ्क्याऽऽह—न हीति । असङ्गत्वेनापरिणामित्वं सूचयति—केवलस्येति । बुद्धिधर्मा-

---

१ क. ज. ट. °भस्तं श° । २ ङ. ज. ञ. °म् । पारिशेष्याद्धिं° । ३ ठ. द्रव्यत्वादि° । ४ क. °च्ये वाऽवि° ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्तुरभोक्तुश्चासंसारिणो नित्यमुक्तस्य सत आत्मनः। तस्मात्तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः। तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्यपदेशो न स्वतः। तथा च—

" वालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चाऽऽनन्त्याय कल्पते " [श्वे० ५ ९]

इत्यणुत्वं जीवस्योक्त्वा तस्यैव पुनरानन्त्यमाह। तच्चैवमेव समञ्जसं स्याद्यद्यौपचारिकमणुत्वं जीवस्य भवेत्पारमार्थिकं चाऽऽनन्त्यम्। न ह्युभयं मुख्यमवकल्पेत। न चाऽऽनन्त्यमौपचारिकमिति शक्यं विज्ञातुं सर्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात्। तथेतरस्मिन्नप्युन्माने " बुद्धेर्गुणेनाऽऽत्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः " [श्वे० ५ ८] इति च बुद्धिगुणसंबन्धेनैवाऽऽराग्रमात्रतां शास्ति न स्वेनैवाऽऽत्मना। " एषोऽणुरात्मा चेतसा वेदितव्यः" [मुण्ड०

णामात्मगतत्वासिद्धेः सांख्यवदात्मनः संसारित्वायोगमाशङ्क्याऽऽह—बुद्धीति। आत्मनो बुद्धितद्धर्माध्यासद्वारा संसारित्वेऽपि प्रकृतेऽणुत्वादिवादे किं जातमित्याशङ्क्याऽऽह—तस्मादिति। किंच जीवस्याणुत्ववादीनि यानि वाक्यान्युक्तानि तान्यपि पौर्वापर्यालोचनायां महत्त्वमेव तस्य गमयन्तीति मत्वोन्मानश्रुतिं प्रत्याह—तथा चेति। अणुत्वे च महत्त्वे च श्रुते किमित्युभयं नेष्टमित्याशङ्क्यान्यतरद्वा द्वयमपि वा तत्त्वमाद्येऽपि महत्त्वस्याणुत्वस्य वा वस्तुतेति विकल्प्य प्रथममङ्गीकुर्वन्नाह—तच्चेति। द्वयमपि तत्त्वमिति पक्षं विरोधेन प्रत्याह—न हीति। कल्पान्तरं निराह—न चेति। तत्त्वमसीत्यत्र त्वमर्थोद्देशेनानन्तब्रह्मभावस्य विधित्सितत्वाद्विधित्सितानन्त्यविरोधादुद्देश्यस्थमणुत्वमविवक्षितमिति भावः। उन्मानान्तरं प्रत्याह—तथेति। बुद्ध्यध्यासेन तद्गुणेनाऽऽत्मन्यध्यस्तेन तस्मिन्मिथ्यागुणान्तरमुत्पद्यते तेनाऽऽत्मगुणेनाऽऽराग्रपरिमाणोऽपकृष्टश्च जीवो दृष्टः। वस्तुतस्तु नायं गुणाधारो न चापकर्षवानित्यर्थः। श्रुतेस्तात्पर्यमाह—बुद्धीति। यत्तु स्वशब्दादणुत्वं तद्दूषयति—एष इति। दुर्ज्ञानत्वज्ञापकप्रकरणापेक्षया श्रुतेरेव प्राबल्यादणुत्वमित्याशङ्क्य काल्पनिकं तदिष्टं

---

१ क. ज. ट. 'त्वं भ'। २ ज. 'कल्प्येत। ३ क. 'द्धिधर्मा'। ४ ठ. 'क्यानि। ५ ठ. ड. '[illegible]'। ६ ठ. ड. 'नाऽऽरा'।

३-१ ९] इत्यत्रापि न जीवस्याणुपरिमाणत्वं शिष्यते परस्यैवाऽऽत्मनश्चक्षुराद्यनवग्राह्यत्वेन ज्ञानप्रसादगम्यत्वेन च प्रकृतत्वात् । जीवस्यापि च मुख्याणुपरिमाणत्वानुपपत्तेः । तस्माद्बुद्ध्यानत्वाभिप्रायमिदमणुत्ववचनमुपाध्यभिप्रायं वा द्रष्टव्यम् ।

तथा " प्रज्ञया शरीरं समारुह्य " [कौषी० ३-६] इत्येवंजातीयकेष्वपि भेदोपदेशेषु बुद्ध्यैवोपाधिभूतया जीवः शरीरं समारुह्येत्येवं योजयितव्यम् । व्यपदेशमात्रं वा शिलापुत्रकस्य शरीरमित्यादिवत् । न ह्यत्र गुणगुणिविभागोऽपि विद्यत इत्युक्तम् । हृदयायतनत्ववचनमपि बुद्धेरेव तदायतनत्वात् । तथोत्क्रान्त्यादीनामप्युपाध्यायत्ततां दर्शयति " कस्मिन्नु वयमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति " [प्रश्न० ६-३] " स प्राणमसृजत " [प्र० ६-४] इति । उत्क्रान्त्यभावे हि गत्यागत्योरप्यभावो विज्ञायते । न ह्यनपसृप्तस्य देहाद्गत्यागती स्याताम् । एवमुपाधिगुणसारत्वाज्जीवस्याणुत्वादिव्यपदेशः " प्राज्ञवत् " । यथा प्राज्ञस्य परमात्मनः

वास्तवमयुक्तमित्याह—**जीवस्येति** । परमात्मदृष्टान्तार्थोऽपिशब्दः । तदभिन्नत्वादित्युक्तो हेतुः । परस्य प्रकरणिनो विभुत्वात्तदभिन्नत्वाच्च जीवस्य न चेदणुत्वं तर्हि कथमणुत्वश्रुतिस्तत्राऽऽह—**तस्मादिति** । अणुशब्दस्यात्यन्तसूक्ष्मे प्रयोगात्कथमुक्तार्थतेत्याशङ्क्याऽऽह—**उपाधीति** ।

यत्तु पृथगुपदेशादिति तत्राऽऽह—**तथेति** । यथा स्वशब्दोन्माने जीवस्य नाणुत्वमावेदयतस्तथा पृथगुपदेशोऽपि तस्याणोरेव चैतन्यस्य देहव्याप्तिमाहेत्यर्थः । समारुह्य वागादिना नामाद्याप्नोतीति शेषः । प्रज्ञाशब्दस्य चैतन्यार्थत्वात्कुतो बुद्धिविषयतेत्याशङ्क्याऽऽह—**व्यपदेशेति** । गुणगुणित्वेन तस्य मुख्यत्वे किमित्यौपचारिकत्वं तत्राऽऽह—**न हीति** । अत्रेति चैतन्यात्मनोरुक्तिः । उक्तं यदि तु चैतन्यं जीवस्येत्यादाविति शेषः । यत्तु तथा च दर्शयतीति तत्राऽऽह—**हृदयेति** । यच्चोत्क्रान्त्यादिश्रुतेर्जीवोऽणुरिति तत्राऽऽह—**तथेति** । इतीक्षित्वेति शेषः । यत्तु स्वात्मना चोत्तरयोरिति तत्राऽऽह— **उत्क्रान्तीति** । तत्र हेतुमाह—**न हीति** । दार्ष्टान्तिकमुपसंहरति—**एवमिति** । दृष्टान्तमादाय व्याचष्टे—**प्राज्ञवदिति** । उक्तदृष्टान्तानुसारेण

---

१ झ. °णत्वमिष्य° । २ क. भेदव्यप° । ३ क. ङ. ज. ञ. °गो वि° । ४ ङ. ञ. °स्मिन्नह° । ५ ज. °णुत्वव्य° । ६ झ. °त्वायुक्तो ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम् , अधि० १३)

सगुणेषूपासनेषूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशः " अणीयान्व्रीहेर्वा यवाद्वा " [छा० ३-१४-३] "मनोमयः प्राणमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसंकल्पः " [छा० ३-१४ २] इत्येवंप्रकारस्तद्वत् ॥ २९ ॥

स्यादेतद्यदि बुद्धिगुणसारत्वादात्मनः संसारित्वं कल्प्येत ततो बुद्ध्यात्मनोर्भिन्नयोः संयोगावसानमवश्यंभावीत्यतो बुद्धिवियोगे सत्यात्मनो विभक्तस्यानालक्ष्यत्वादसत्त्वमसंसारित्वं वा प्रसज्येतेति । अत उत्तरं पठति—

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्॥३०॥

नेयमनन्तरनिर्दिष्टदोषप्राप्तिराशङ्कनीया । कस्मात् । "यावदात्मभावित्वात्" बुद्धिसंयोगस्य । यावदयमात्मा संसारी भवति यावदस्य सम्यग्दर्शनेन संसारित्वं न निवर्तते[1] तावदस्य बुद्ध्या संयोगो न शाम्यति। यावदेव चायं बुद्ध्युपाधिसंबन्धस्तावज्जीवस्य[2] जीवत्वं संसारित्वं च । परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेणास्ति । न हि नित्यमुक्तस्वरूपात्सर्वज्ञादीश्वरादन्यश्चेतनो धातुर्द्वितीयो वेदान्तार्थनिरूपणायामुपलभ्यते । " नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता " [बृ०

जीवस्यापि बुद्धिर्गुणसारत्वादणुत्वादिव्यपदेश इत्याह—**तद्वदिति** ॥ २९ ॥

सूत्रान्तरनिरस्यां शङ्कामाह—**स्यादेतदिति** । कथमसत्त्वं स्वरूपेण सत्त्वादित्याशङ्क्याऽऽह—**संसारित्वं वेति** । सूत्रमवतारयति—**अत इति** । न दोष इति प्रतिज्ञात्वेन योजयति—**नेयमिति** । प्रश्नपूर्वकं हेतुमाह—**कस्मादिति** । बुद्धियोगस्यानाद्यित्वे तत्त्वधीवैयर्थ्यं वा तस्यान्तवत्त्वेनाऽऽगन्तुकतया संसारस्याऽऽदिमत्त्वादकृतागमादिप्रसङ्गो वा तदुभयमपि नास्तीति हेतुं विवृणोति—**यावदिति**। तदेव स्पष्टयति—**यावदस्येति** । संसारनिवृत्त्युत्तरकालमपि जीवस्वरूपनिर्वाहकत्वेन बुद्धियोगोऽभ्युपगन्तव्य इत्याशङ्क्याऽऽह—**यावदेव चेति** । जीवस्य वस्तुत्वान्नोपाधियोगापेक्षेत्याशङ्क्य वाच्यस्य लक्ष्यस्य वा वस्तुत्वमिति विकल्प्याऽऽद्यं दूषयति—**परमार्थेति** । द्वितीयं निराह—**न हीति** । लक्ष्यस्य ब्रह्मान्यतिरेके वेदान्तार्थनिरूपणायामित्यत्र

---

१ क. ज. °वर्त्यते । २ क. बुद्ध्याद्युपा° । ३ क. ज. °वदेव जीव° । ङ. ञ. °वदेवास्य जीव° । ४. °गुणानुसा° ।

३-७-२३] " नान्यदतोऽस्ति द्रष्टृ श्रोतृ मन्तृ विज्ञातृ "[बृह० ३-८-११] "तत्त्वमसि" [छा० ६-८-७] " अहं ब्रह्मास्मि" [बृ० १-४-१०] इत्यादिश्रुतिशतेभ्यः । कथं पुनरवगम्यते यावदात्मभावी बुद्धिसंयोग इति । "तद्दर्शनात्" इत्याह । तथा हि शास्त्रं दर्शयति " योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव " [बृ०४ ३-७] इत्यादि । तत्र विज्ञानमय इति बुद्धिमय इत्येतदुक्तं भवति । प्रदेशान्तरे " विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः"[बृह०४-४-५] इति विज्ञानमयस्य मनआदिभिः सह पाठात् । बुद्धिमयत्वं च तद्गुणसारत्वमेवाभिप्रेयते । यथा लोके स्त्रीमयो देवदत्त इति स्त्रीरागादिप्रधानोऽभिधीयते तद्वत् । "स समानः सन्नुभौ लोकावनुसंचरति " [बृ० ४-३-७] इति च लोकान्तरगमनेऽप्यवियोगं बुद्ध्या दर्शयति । केन समानस्तयैव बुद्ध्येति गम्यते संनिधानात् । तच्च दर्शयति "ध्यायतीव लेलायतीव" [बृ०४-३-७] इति । एतदुक्तं भवति—नायं स्वतो

सूचितं हेतुमाह—नेत्यादिना । सूत्रावयवमाकाङ्क्षाद्वारा निक्षिपति—कथमिति । तस्यार्थमाह—तथा हीति । बुद्धिं तु सारथिं विद्धीत्यादि ग्रहीतुमादिपदम् । कथमत्र यावदात्मभावित्वधीरित्याशङ्क्य तदर्थं विज्ञानमयपदार्थमाह—तत्रेति । विज्ञानस्य ब्रह्मत्वात्तन्मयत्वं तत्कार्यत्वं तदात्मत्वं वेत्याशङ्क्याऽऽह—प्रदेशान्तर इति । विज्ञानं बुद्धिरस्तु तथाऽपि कथमात्मनस्तद्विकारत्वं मयटो विकारार्थत्वात्तत्राऽऽह—बुद्धीति । कथं विकारार्थस्य मयटोऽर्थान्तरं शङ्क्यते तत्राऽऽह—यथेति । इह लोके बुद्ध्यवियोगेऽप्यात्मनो लोकान्तरसंचारे तद्वियोगः स्यादित्याशङ्क्याऽऽह—स समान इति । नात्र बुद्ध्या सहावियोगो भातीत्याशङ्क्याऽऽकाङ्क्षाद्वारा समानपदं पूरयति—केनेति । येन केनापि समानत्वे कुतो विशेषोक्तिस्तत्राऽऽह—संनिधानादिति । योऽयं विज्ञानमयः प्राणेष्वित्यत्रेति शेषः । परिच्छिन्नस्यैव गतेरात्मनस्तदभावात्कथमुभयलोकसंचारित्वं तत्राऽऽह—तच्चेति । बुद्धिवदात्मनो ध्यानादियोगित्वमत्र भातीवशब्दस्योपमार्थत्वादित्याशङ्क्याऽऽह—एतदिति । इवशब्दस्याऽऽभासार्थत्वान्नोपमार्थेतेति भावः । न केवलमागमाद्बुद्धिसंबन्धस्य यावत्संसार्यात्मभावित्वं किंतु युक्तेरपीत्याह—

---

१ ब्र. °तेऽस्ति या° । २ ड. ब. °द्ध्यादेर्दर्श° ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

ध्यायति नापि चलति ध्यायन्त्यां बुद्धौ ध्यायतीव चलन्त्यां बुद्धौ चलतीवेति। अपि च मिथ्याज्ञानपुरःसरोऽयमात्मनो बुद्ध्युपाधिसंबन्धः। न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्तीत्यतो यावद्ब्रह्मात्मतानवबोधस्तावदयं बुद्ध्युपाधिसंबन्धो न शाम्यति। दर्शयति च—

" वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय "
[श्वेता० ३-८] इति ॥ ३० ॥

ननु सुषुप्तप्रलययोर्न शक्यते बुद्धिसंबन्ध आत्मनोऽभ्युपगन्तुम्। " सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति " [छा० ६ -८-१] इति वचनात्। कृत्स्नविकारप्रलयाभ्युपगमाच्च। तत्कथं यावदात्मभावित्वं बुद्धिसंबन्धस्येत्यत्रोच्यते—

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाल्यादिष्वनुपलभ्यमानान्यविद्यमानवदभिप्रेयमाणानि यौवनादिष्वावि-

---

अपि चेति। मिथ्याज्ञानस्य सत्येव संसारिणि कर्मणा निवृत्तिस्तन्निमित्तबुद्धिसंबन्धस्यापि तत्सिद्धेर्न यावदात्मभावितेत्याशङ्क्याऽऽह—न चेति। सम्यग्ज्ञानादेव मिथ्याज्ञाननिवृत्तिरित्यत्र मानमाह—दर्शयतीति। आदित्यवर्णं प्रकाशरूपं तमसः परस्तादविद्यासंस्पर्शशून्यमित्यर्थः ॥ ३० ॥

यावदात्मभावित्वहेतोरसिद्धिं शङ्कते—नन्विति। तत्र बुद्धिसंबन्धासंभवे हेतुमाह—सतेति। किंच कार्यत्वाद्बुद्धेरात्मनस्तद्योगस्य च तथात्वात्तत्र नाशध्रौव्यादसिद्धिर्भवेत्याह— कृत्स्नेति। परिहारत्वेन सूत्रमवतारयति—अत्रेति। तत्र दृष्टान्तं व्याचष्टे—यथेति। पुंस्त्वं पुरुषस्य प्रजोत्पादनसामर्थ्यम्। आदिशब्देन स्त्रियाः स्त्रीत्वं बीजस्याङ्कुरजनकत्वमित्यादि गृहीतम्। बाल्यादिष्वित्यादिपदेनावस्थाविशेषा गृह्यन्ते। यौवनादिष्वित्यत्रापि स एवाऽऽदिशब्दार्थः। कस्मादविद्यमानवदिष्टाना-

---

१ क. ज. त्र. ट. न्त्यां च°। २ क्ष. बुद्धयादिसं°। ३ क. ड. ध. बुद्ध्यायुपा°। ४ क्ष. °षुप्तिप्र°। ५ ड. ध. °वत्तस्य। ६ क्ष °ज्ञाने स°। ७ ठ. ड. °वृत्तेस्त°। ८ ठ. °त्वान्नाश°। ९ ड. °ज°।

भवन्ति नाविद्यमानान्युत्पद्यन्ते षण्ढादीनामपि तदुत्पत्तिप्रसङ्गात्। एवमयमपि बुद्धिसंबन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति। एवं ह्येतद्युज्यते। न ह्याकस्मिकी कस्यचिदुत्पत्तिः संभवति। अतिप्रसङ्गात्। दर्शयति च सुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितम् " सति संपद्य न विदुः सति संपद्यामह इति " [छा० ६-९-२] " त इह व्याघ्रो वा सिंहो वा " [छा० ६-९-३] इत्यादिना। तस्मात्सिद्धमेतद्यावदात्मभावी बुद्ध्याद्युपाधिसंबन्ध इति ॥ ३१ ॥

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥ ३२ ॥ (१३)

तच्चाऽऽत्मन उपाधिभूतमन्तःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिलप्यते। क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते निश्चयादिवृत्तिकं बुद्धिरिति।

माविर्भावोऽविद्यमानानामेव पुनरुत्पत्तिः किं न स्यात्तत्राऽऽह—**नेति**। [१]तैलकलुषितबीजादिग्रहार्थमादिपदम्। एतेन तुशब्दो व्याख्यातः। अस्य सत इति दार्ष्टान्तिकं व्याचष्टे—**एवमिति**। अभिव्यक्तियोगादिति व्याकरोति—**एवं हीति**। तदेव व्यतिरेकतः स्फोरयति—**न हीति**। कारणं विनाऽपि कार्यं स्यादित्यतिप्रसङ्गः। स्वापे बीजात्मना सतो बुद्धियोगस्य प्रबोधे व्यक्तिरित्यत्र मानमाह—**दर्शयतीति**। न विदुरित्यविद्यात्मकबीजसत्त्वोक्तिः। तत्कृतत्वं स्वापादुत्थानस्य कथयति—**त इति**। पूर्वबोधः सप्तम्यर्थः। स्वापे लये च बुद्धियोगस्य बीजात्मनाऽवस्थाने फलितमाह—**तस्मादिति** ॥ ३१ ॥

बुद्धिसद्भावे मानमाह—**नित्येति**। तद्व्याख्यातुमन्तःकरणगतानवान्तरभेदानाह—**तच्चेति**। तत्र तत्र मनसा ह्येव पश्यति मनसा शृणोति। बुद्धेर्गुणेनाऽऽत्मगुणेन चैव। बुद्धिश्च न विचेष्टते। विज्ञानेन विज्ञानमादाय। विज्ञानं यज्ञं तनुते। चेतसा वेदितव्य इत्यादिप्रदेशेष्वित्यर्थः। एकमेवान्तःकरणं कथमनेकधोच्यते तत्राऽऽह—**क्वचिच्चेति**। अभिमानप्रधानोऽहंकारो विज्ञानम्। चिदाकारप्रधानं चित्तम्। अथ यथोक्तमन्तःकरणमेव नास्ति न च श्रुत्या तदस्तित्वं तत्प्रामाण्येऽपि केषां

---

१ क. ङ. ञ. षण्डादी° । २ झ. °षुप्तिप्र° । ३ क. ख. तैलादिक° ।

(जीवस्याणुत्वखण्डनपूर्वकं तत्सर्वगतत्वप्रतिपादनम्, अधि० १३)

तच्चैवंभूतमन्तःकरणमवश्यमस्तीत्यभ्युपगन्तव्यम् । " अन्यथा" ह्यनभ्युपगम्यमाने तस्मिन् " नित्योपलब्ध्यनुपलब्धिप्रसङ्गः " स्यात् । आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां संनिधाने सति नित्यमेवोपलब्धिः प्रसज्येत । अथ सत्यपि हेतुसमवधाने फलाभावस्ततो[1] नित्यमेवानुपलब्धिः प्रसज्येत । न चैवं दृश्यते । अथ वाऽन्यतरस्याऽऽत्मन इन्द्रियस्य वा शक्तिप्रतिबन्धोऽभ्युपगन्तव्यः । न चाऽऽत्मनः शक्तिप्रतिबन्धः संभवति । अविक्रियत्वात् । नापीन्द्रियस्य । न हि तस्य पूर्वोत्तरयोः क्षणयोरप्रतिबद्धशक्तिकस्य[3] सतोऽकस्माच्छक्तिः प्रतिबध्येत । तस्माद्यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः । तथा च श्रुतिः " अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति " [बृ० १.५-३] इति[4] कामादयश्चास्य वृत्तय इति दर्शयति " कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरि-

---

चिद्विसंवादात्तत्राऽऽह—तच्चेति । तत्र हेतुत्वेन सूत्रावयवं व्याकरोति—अन्यथेति । नित्योपलब्धिप्रसङ्गं प्रकटयति—आत्मेति । कारणे सति कार्यं भवत्येवेत्यनियमान्न नित्योपलब्धिप्रसक्तिरिति शङ्कते—अथेति । तर्हि नित्यमेवानुपलब्धिः स्यादपेक्षणीयान्तराभावादित्याह—तत इति । प्रसङ्गस्येष्टत्वमाशङ्क्याऽऽह—न चेति । आत्मेन्द्रियार्थसांनिध्येऽपि कदाचिदेव ज्ञानोदयादन्तःकरणमस्तीत्युक्तम् । इदानीं तदनुपगमे दोषान्तरापत्तेरपि तदस्तीति ब्रुवन्नन्यतरनियमो वेत्येतद्योजयति—अथ वेति । अन्यतरस्य शक्तिप्रतिबन्धे का हानिस्तत्राऽऽह—न चेति । अवधानमनुभवितुं स्मर्तुं वा वाञ्छा न च साऽऽत्मनो धर्मस्तस्याविक्रियत्वान्नापीन्द्रियाणामन्धादीनामेकैकेन्द्रियाभावेऽपि तद्दर्शनादान्तरत्वाच्च बाह्येन्द्रियधर्मत्वायोगात्तेन परिशेषाद्यस्यावधानानवधाने तदन्तःकरणमस्तीत्याह—तस्मादिति । अनुबुभूषा साश्रया गुणत्वाद्रूपवदित्यनुमानात्तदधिकरणमन्तःकरणं परिशेषतो लब्धमिति भावः । न केवलमन्तःकरणमौपपत्तिकं श्रौतमपीत्याह—तथा चेति । मनः स्वग्राह्यजातिमद्विशेषगुणाधिकरणं प्रत्यक्षज्ञानकरणत्वाच्चक्षुर्वदित्यभिप्रेत्याऽऽह—कामादयश्चेति । बुद्धिसद्भा-

---

१ क. °सङ्गात् । २ ङ. ञ °तोऽपि नि° । ३ ङ. ञ. °स्य ततोऽ° । ४ ङ. ञ. °ति च । ञ. °रश° । ६ क, ख. °त्वाद्वा° ।

त्येतत्सर्वं मन एव " [बृ० १-५-३] इति । तस्मा-
द्युक्तमेतत् " तद्गुणसारत्वात्तद्व्यपदेशः "[ब्र० सू० २-३-२९]
इति ॥ ३२ ॥ (१३)

(जीवस्याकर्तृत्वनिरसनपूर्वकं तत्कर्तृत्वप्रतिपादनम्, अधि० १४)

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्मः प्रपञ्च्यते। "कर्ता"
चायं जीवः स्यात् । कस्मात् । " शास्त्रार्थवत्त्वात् " । एवं च
"यजेत जुहुयादद्यात्"इत्येवंविधं विधिशास्त्रमर्थवद्भवति। अन्यथा
तदनर्थकं स्यात्तद्धि कर्तुः सतः कर्तव्यविशेषमुपदिशति ।

वस्य मानयुक्तिसिद्धत्वे फलितमाह—**तस्मादिति** ॥ ३२ ॥ (१३)

स्वाभाविकमणुत्वं पराणू(णु)च्य वस्तुतो महत्त्वं चैतन्यादीषद्बहिष्ठं प्रतिष्ठापितम् । इदानीं ततोऽपि बहिष्ठं कर्तृत्वं बुद्धिकर्तृत्वव्यावर्तनेनाऽऽत्मनि साधयति—**कर्तेति** । आत्मा किमकर्ता कर्ता वेति विप्रतिपत्तेः संदेहे तद्गुणसारत्वादित्यनेनैव तत्कर्तृत्वादिसिद्धेर्न संशीतिरित्याशङ्क्याऽऽह—**तद्गुणेति** । अधिकारः प्रसङ्गः । यद्यपि कर्तृत्वस्य न स्वयं पुमर्थता नापि प्रतिपाद्यवाक्यार्थोपयोगिता यद्यपि[1] चौपाधिकं कर्तृत्वमात्मनि प्रागेव सिद्धं तथाऽपि निरस्यपक्षसंभवात्तन्निरासायाऽऽरम्भः संभवतीति भावः । अत्र च विध्यादिश्रुतीनामसङ्गतादिश्रुतीनां चाऽऽत्मकर्तृत्वाकर्तृत्वार्थानां बन्धमोक्षविषयत्वेन मिथो विरोधं विधूय नित्यमुक्त ब्रह्मणि समन्वयाधानात्पादादिसंगतयः । पूर्वपक्षे श्रुतीनाममूषां विरुद्धत्वेनाप्रामाण्यात्तत्र समन्वयासिद्धिः । सिद्धान्ते तासामविरोधेन व्यवस्थया प्रामाण्यात्तत्सिद्धिरिति मन्वानः सिद्धान्तं प्रतिजानीते—**कर्ता चेति** । सत्येव मनसि जागरादौ कर्तृत्वोपलम्भादसति स्वापे तदभावादन्वयव्यतिरेकाभ्यां कर्तृत्वस्य मनोनिष्ठत्वदृष्टेस्तत्सत्ताहेतुविषयत्वसंभवे च तयोस्तद्विशिष्टार्थधीमात्रहेतुत्वकल्पनाया बहिरङ्गत्वादहं कर्तेति धियश्चाऽऽत्मनः साधारण्यान्न कर्तृत्वमात्मनोऽस्तीत्याह—**कस्मादिति** । स्वर्गाद्यर्थिनो यागादिविध्यन्यथानुपपत्त्या कर्तृत्वमात्मनो दुर्वारमित्याह—**शास्त्रेति** । तदेव व्याकरोति—**एवमिति** । ऐक्यश्रुतिविरोधे विधिशास्त्रमन्यपरतया दुर्बलमित्याशङ्क्य संपत्परत्वेन तस्याः सावकाशत्वाद्विधिश्रुतेश्च निरवकाशत्वान्नैवमित्याह—**अन्यथेति** । कर्त्री बुद्धिरित्युपगमात्तद्विषयत्वेन विधिशास्त्रं सावकाशमित्याशङ्क्य विधेः प्रतिपत्तुरेव कर्तृतेत्याह—**तद्धीति** । ममेदं कर्तव्यमिति धीसमर्थस्य चेतनस्य विधिसंबन्धमाह विधिशास्त्रमित्यर्थः । तथाऽपि कथं

---

१ क. ख. द्भत्वात्क' । २ ठ. ड. 'पि चैवोपा' ।

(जीवस्याकर्तृत्वनिरसनपूर्वकं तत्कर्तृत्वप्रतिपादनम्, अधि० १४)

न चासति कर्तृत्वे तदुपपद्येत । तथेदमपि शास्त्रमर्थवद्भवति " एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः " [प्र० ४-९] इति ॥ ३३ ॥

विहारोपदेशात् ॥ ३४ ॥

इतश्च जीवस्य कर्तृत्वं यज्जीवप्रक्रियायां " संध्ये स्थाने " [बृह ४-३-९] विहारमुपदिशति " स ईयतेऽमृतो यत्र कामम् " [बृ० ४-३-१२] इति " स्वे शरीरे यथाकामं परिवर्तते " [बृ० २-१-१८] इति च ॥ ३४ ॥

उपादानात् ॥ ३५ ॥

इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं संकीर्तयति " तदेषां प्राणानां विज्ञानेन विज्ञानमादाय " [बृ० २-१-१७] इति " प्राणान्गृहीत्वा " [बृ० २-१-१८] इति च ॥ ३५ ॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३६ ॥

इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशति[2] शास्त्रम् " विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि

तस्य कर्तृत्वधीरित्याशङ्क्याऽऽह—न चेति । तस्य विधेयार्थकर्तृतां विनाऽनुपपन्नं विधिशास्त्रं चेतनस्य तदर्थानुपपत्त्या गमयति । बुद्धेरेव कर्तृत्वे यस्य भोक्तुरपेक्षितोपायो विधिर्न तस्य कर्तृत्वं यस्य कर्तृत्वं न तस्यापेक्षितोपाय इत्यसंगतिरिति भावः । अनश्नन्नित्यादिश्रुतिविरोधे श्रुतार्थापत्तिर्दुर्बलेत्याशङ्क्य श्रुतिमाह—तथेति ॥ ३३ ॥

विहारो विहरणं संचारस्तदुपदेशानुपपत्त्याऽपि जीवस्य कर्तृतेत्याह—विहारेति । सूत्रस्य हेत्वन्तरपरत्वमाह—इतश्चेति । जीवप्रक्रियायामिति बुद्धिप्रस्तावव्यासेधार्थमुक्तम् । संध्ये स्थाने स्वप्नावस्थायामिति यावत् । ईयते गच्छति ॥ ३४ ॥

अकर्तुरुपादानानुपपत्त्याऽपि कर्तृत्वमित्याह—उपादानादिति । तद्व्याकरोति—इतश्चेति । प्राणानामिन्द्रियाणां विज्ञानेन बुद्ध्या विज्ञानं ग्रहणशक्तिमादाय स्वापे जीवो हृदयमेतीति योजना । उपादानान्तरमाह—प्राणानिति । योजना पूर्ववत् ॥ ३५ ॥

कर्तृवाचकाख्यातश्रुत्याऽपि जीवस्य कर्तृत्वमित्याह—व्यपदेशाच्चेति । विज्ञानशब्दस्य जीवार्थत्वं गृहीत्वा सूत्रावयवं योजयति—इतश्चेति । न चेदित्यादेर्व्याचष्टे

---

१ ड. ज. ञ. °पद्यते । त° । २ क. ज झ. ट. °ति । वि° ।

च " [तै० २-५-१] इति । ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्यत इति । नेत्युच्यते । जीवस्यैवैष निर्देशो न बुद्धेः । "न चेत्" जीवस्य स्यात् "निर्देशविपर्ययः" स्यात् । "विज्ञानेनेति" एवं निरदेक्ष्यत् । तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो दृश्यते "तदेषां प्राणानां विज्ञानेन विज्ञानमादाय" [बृ०२-१-१७] इति । इह तु "विज्ञानं यज्ञं तनुते" [तै० २-५-१] इति कर्तृसामानाधिकरण्यनिर्देशाद्बुद्धिव्यतिरिक्तस्यैवाऽऽत्मनः कर्तृत्वं सूच्यत इत्यदोषः ॥ ३६ ॥

अत्राऽऽह । यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात्स स्वतन्त्रः सन्प्रियं हितं चैवाऽऽत्मनो नियमेन संपादयेन्न विपरीतम् । विपरीतमपि तु संपादयन्नुपलभ्यते । न च स्वतन्त्रस्याऽऽत्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यत इत्यत उत्तरं पठति—

उपलब्धिवदनियमः ॥ ३७ ॥

यथाऽयमात्मोपलब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टं चोपलभत एवमनियमेनैवेष्टमनिष्टं च संपादयिष्यति । उपलब्धावप्य-

---

शङ्कामाह—नन्विति। नात्र बुद्धिर्विज्ञानमिति सूत्रभागेनाऽऽ(णाऽऽ)ह—नेतीति । तदेव स्फुटयितुं प्रतिजानीते—जीवस्येति । प्रतिज्ञार्थं सूत्रावयवं व्याकुर्वन्व्यतिरेकेण स्फोरयति—नेति । विपर्ययमभिनयति—विज्ञानेनेति । अस्मन्मते बुद्धेरेव कर्तृत्वात्तत्र तद्व्यपदेशसिद्धिरित्याशङ्क्य केवलाया बुद्धेः करणत्वेनैव व्यपदेशदर्शनान्नैवमित्याह—तथेति । तैत्तिरीयश्रुतौ विशेषमाह—इहेति । कर्तृसामानाधिकरण्यमाख्यातेन कर्तृवाचिना विज्ञानपदस्याभिव्याहारः प्रकृते वाक्ये विज्ञानस्य कर्तृत्वमन्यत्र करणत्वेऽपीति निगमयति—इत्यदोष इति ॥ ३६ ॥

सूत्रान्तरव्यावर्त्यमाह—अत्रेति । तथैव संपादयति नेत्याह—विपरीतमिति । सहकारिवशादिष्टानिष्टोपादानेषु पुरुषप्रवृत्तिरित्याशङ्क्याऽऽह—न चेति । तस्यास्वातन्त्र्ये लक्षणाभावादकर्तृत्वं स्वातन्त्र्ये बुद्धिपूर्वकारिणो नानियता प्रवृत्तिरित्यर्थः । सूत्रमवतारयति—अत इति। सत्यपि स्वातन्त्र्ये स्यादनियता प्रवृत्तिरिति सूत्रं व्याकुर्वन्परिहरति—यथेति । दृष्टान्ते विवदमानः सन्नाह—उपलब्धाविति । चक्षुरादीनां विषयोपनायकत्वात्तदुपलब्धौ चाऽऽत्मनश्चेतनत्वेन स्वातन्त्र्यादुदाहरणसिद्धिरित्याह—

---

१ क. °वस्यास्य निर्दे । २ क. ज. झ. ट. °पद्येतेत्यं ।

(जीवस्याकर्तृत्वनिरसनपूर्वकं तत्कर्तृत्वप्रतिपादनम्, अधि० १४)

स्वातन्त्र्यमुपलब्धिहेतूपादानोपलम्भादिति चेत् । न। विषयप्रकल्पनामात्रप्रयोजनत्वादुपलब्धिहेतूनाम् । उपलब्धौ त्वनन्यापेक्षत्वमात्मनश्चैतन्ययोगात् । अपि चार्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात् । न च सहायापेक्षस्य कर्तुः कर्तृत्वं निवर्तते । भवति ह्योदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वम् । सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते ॥ ३७ ॥

शक्तिविपर्ययात् ॥ ३८ ॥

इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति । यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्ययः स्यात् । करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चाऽऽपद्येत । सत्यां च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यम् । अहंकारपूर्विकाया एव प्रवृत्तेः सर्वत्र दर्शनात्। अहं गच्छाम्यहमागच्छाम्यहं भुञ्जेऽहं पिबामीति च । तस्याश्च कर्तृशक्तियु-

---

नेत्यादिना । विषयोपनयनद्वारा तज्ज्ञाने करणापेक्षाध्रौव्यान्नाऽऽत्मनः स्वातन्त्र्यमित्याशङ्क्याऽऽह—अपि चेति । इतश्च दृष्टान्तदार्ष्टान्तिकयोर्न वैषम्यमिति यावत् । उपलब्धाविवेत्यपेरर्थः । देशाद्यपेक्षायां लक्षणाभावादकर्तृत्वं स्यादित्याशङ्क्याऽऽह—न चेति । तत्र हेतुमाह—भवतीति । यदुक्तं धीपूर्वकारिणो नानियता प्रवृत्तिरिति तत्राऽऽह—सहकारीति । कर्ता हि करणादीनि कारकान्तराणि प्रयुङ्क्ते न तैरयं प्रयुज्यते तेन तस्य स्वातन्त्र्यं न कारकान्तरानपेक्षत्वात्कापि तथा स्वातन्त्र्यायोगात् । तथा चायमदृष्टवशादिष्टमेव प्रेप्सुस्तदुपायभ्रमादनिष्टहेतुमनुतिष्ठन्ननिष्टमाप्नुयादित्यनियता प्रवृत्तिः कर्तृत्वानियमश्चेत्यर्थः ॥ ३७ ॥

बुद्धेरेव कर्तृत्वे कारकविभक्तिविपर्ययो न चेदित्यत्रोक्तः । संप्रति तच्छक्तिविपर्ययमाह—शक्तीति । सूत्रं व्याख्यातुं प्रतिज्ञां व्याकरोति—इतश्चेति । हेतुमेव व्यतिरेकद्वारा विवृणोति—यदीति । शक्तिविपर्ययमुदाहरति—करणेति । बुद्ध्यतिरिक्तकर्त्रभावादित्यर्थः । बुद्धेरस्तु कर्तृशक्तिस्तत्राऽऽह—सत्यां चेति । कर्तृत्वे बुद्धेरहंधीविषयत्वेनाऽऽत्मत्वं किमित्युपेयं तत्राऽऽह—अहंकारेति । अन्तःकरणाधिष्ठातुरेवाऽऽत्मत्वात्कुतो बुद्धेरेवाऽऽत्मत्वं तत्राऽऽह—तस्याश्चेति । कर्तुः स्वयमेव शक्तेर्न

---

१. °कापे। २ ठ, ड. °र्ता क। ३ ख. °र्तृत्वेऽनि° । ठ, ड. °र्तृत्वनि° । ४ ठ, ड. °विप°।

क्तार्याः सर्वार्थकारिकरणमन्यत्कल्पयितव्यम् । शक्तोऽपि हि सन्कर्ता करणमुपादाय क्रियासु प्रवर्तमानो दृश्यते[1]। ततश्च संज्ञामात्रे विवादः स्यान्न वस्तुभेदः कश्चित्। करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमात् ॥ ३८ ॥

समाध्यभावाच्च ॥ ३९ ॥ (१४)

योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदान्तेषु " आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः " [बृ० २-४-५] " सोऽन्वेष्टव्यः स विजिज्ञासितव्यः " [छा० ८-७-१] " ओमित्येवं ध्यायथ आत्मानम् " [मुण्ड० २-२-६] इत्येवंलक्षणः सोऽप्यसत्यात्मनः कर्तृत्वे नोपपद्येत[2]। तस्मादप्यस्य कर्तृत्वासिद्धिः ॥ ३९ ॥ (१४)

(जीवकर्तृत्वस्याध्यस्तत्वेनावास्तविकत्वम्, अधि० १५)

यथा च तक्षोभयथा ॥ ४० ॥ (१५)

एवं तावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वं शारीरस्य प्रदर्शितं तत्पुनः स्वाभाविकं वा स्यादुपाधिनिमित्तं वेति चिन्त्यते।

करणापेक्षेत्याशङ्क्याऽऽह—**शक्तोऽपि हीति**। लोकवदिहापि कर्तुरपेक्षितमेव करणमिति वक्तुमितिशब्दः। अस्तु तर्हि कर्त्र्या बुद्धेरन्यदेव करणं तत्राऽऽह—**ततश्चेति** ॥ ३८ ॥

ज्ञानसाधनविध्यन्यथानुपपत्त्याऽपि कर्तृत्वमात्मनः स्वीकार्यमित्याह—**समाधीति**। सूत्रं विवृणोति—**योऽपीति**। ज्ञानोपायं समाधिमधितिष्ठन्नकर्ताऽऽत्मेति दुर्वचनमित्यर्थः। शास्त्रार्थवत्त्वादिहेतूनां फलमुपसंहरति—**तस्मादिति**। उक्तहेतुषु प्रत्येकं साधकत्वं संभावयितुमपिशब्दः ॥ ३९ ॥ (१४)

सांख्यमतनिरासेनोक्तात्मकर्तृत्वस्य स्वाभाविकत्वं निरस्यति—**यथा चेति**। संगतिं दर्शयन्वृत्तं कीर्तयति—**एवमिति**। उक्ते कर्तृत्वे विप्रतिपत्त्या संशयमाह—**तदिति**। संगतिफले पूर्ववत्। अत्रापि समाप्तौ सर्वं व्यक्तं भविष्यतीति मत्वा पूर्वपक्षयति—**तत्रेति**। न च तर्हि पूर्वाधिकरणमनर्थकमारोप्य प्रापकत्वान्न च स्वातन्त्र्येण संबन्धाद्यभावे तस्यैतदवान्तरसूत्रत्वम्। तत्रापि कर्तृत्वे समर्थिते सत्यसङ्गागमस्य स्तुत्याऽपि नेतुं शक्यत्वे विरोधपरिहारेण समन्वयदार्ढ्यसिद्धौ साक्षादपि संगत्यादेः सुवचत्वात्। ननु कर्तृत्वसत्त्वमात्रमुक्ता हेतवः साधयन्ति न तस्य स्वाभाविकत्वं न हि तस्योपाध्य-

---

१ ङ. ञ. °याः सर्वार्थकारिण्याः स°। २ क. ज. °श्यत इति। त°। ३ क. ज. °पद्यते। त°। ४ क. ख. ठ. ङ. °मनुति°। ५ क. °ति। °यादादिसं°।

तत्रैतैरेव शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकं कर्तृत्वमपवादहेत्वभावादित्येवं प्राप्ते ब्रूमः—न स्वाभाविकं कर्तृत्वमात्मनः संभवत्यनिर्मोक्षप्रसङ्गात् । कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः संभवति । अग्नेरिवौष्ण्यात् । न च कर्तृत्वादनिर्मुक्तस्यास्ति पुरुषार्थसिद्धिः कर्तृत्वस्य दुःखरूपत्वात् । ननु स्थितायामपि कर्तृत्वशक्तौ कर्तृत्वकार्यपरिहारात्पुरुषार्थः सेत्स्यति । तत्परिहारश्च निमित्तपरिहारात् । यथाऽग्नेर्दहनशक्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्याभावस्तद्वत् । न, निमित्तानामपि शक्तिलक्षणेन संबन्धेन संबद्धानामत्यन्तपरिहारासंभवात् । ननु मोक्षसाधनविधानान्मोक्षः सेत्स्यति । न । साधनायत्तस्यानित्यत्वात् । अपि च नित्यशुद्धबुद्धमुक्तात्मप्रतिपादनान्मोक्षसिद्धिरभिमता तादृगात्मप्रतिपादनं च न स्वाभाविके कर्तृत्वेऽवकल्पेत । तस्मादुपाधिधर्मा-

---

नपेक्षत्वमुक्तं तत्राऽऽह—अपवादेति । न चान्वयव्यतिरेकाभ्यां विशिष्टस्य कर्तृत्वं शङ्कनीयं तदुत्पत्तौ मनसो निमित्तत्वादपि तदुपपत्तेरिति मत्वा पूर्वपक्षमुपसंहर्तुमितिशब्दः । पूर्वपक्षमनूद्य सूत्राद्बहिरेव सिद्धान्तयति—एवमिति । स्वाभाविकं कर्तृत्वमपवादकाभावादित्ययुक्तं मुक्त्यनुपपत्तेरपवादकत्वादित्याह—नेति । उक्तं विवृण्वन्कर्तृत्वमात्मनः स्वभावो धर्मो वेति विकल्प्याऽऽद्यं प्रत्याह—कर्तृत्वेति । कर्तृत्वे सत्येव पुरुषार्थसंभवात्किं तन्निवृत्त्येत्याशङ्क्याऽऽह—न चेति । द्वितीयमाश्रित्य शङ्कते—नन्विति । सत्यां शक्तौ कार्यपरिहारोऽपि कथं तत्राऽऽह—तदिति । शक्तस्यैव निमित्तपरिहारात्कार्यपरिहारं दृष्टान्तेन दर्शयति—यथेति । कर्तृत्वस्य धर्मादीनि निमित्तानि तेषां ज्ञानानिवर्त्यत्वे मुक्तावपि संभवात्कर्तृत्वं स्याज्ज्ञानेन तन्निवृत्तौ तेषामज्ञानकार्यत्वात्तत्कृतं कर्तृत्वमपि तथा स्यात् । शक्तेश्च शक्तशक्यसापेक्षतया सैन्निमित्तक्रियालक्षणशक्याक्षेपकत्वादनिर्मोक्षस्तस्मान्निमित्तपरिहारस्य दुरनुष्ठानत्वान्न शक्तिवादे मुक्तिरित्याह—नेत्यादिना । शक्तिलक्षणेन शक्त्याक्षिप्तेन शक्येन सह यः संबन्धस्तेनेति व्यधिकरणे तृतीये । मनुष्यदेहस्य शास्त्रसामर्थ्याद्देवत्वाप्तिवत्कर्तृभूतस्याकर्तृरूपमोक्षाप्तिः शास्त्रवशादेवेति शङ्कते—नन्विति । किं सन्नेव मोक्षोऽज्ञानावृतो ज्ञानात्तन्निवृत्त्याऽऽप्यत उतासन्नपूर्वो हेतुशक्त्या लभ्यते । आद्ये कर्तृत्वस्य भ्रान्तित्वम् । द्वितीयं दूषयति—नेति । मुक्तेः साधनाय तत्त्वमुपेत्योक्तं तदेव नेत्याह—अपि चेति । तथाऽपि कथं स्वाभाविकं कर्तृत्वमपह्नूयते तत्राऽऽह—तादृगिति । का तर्हि कर्तृत्वदृष्टेरात्मनि गतिस्तत्राऽऽह—तस्मादिति । आत्मन्यौपाधिकमारोपितं

---

१. °भिहिता । २ ठ. ड. 'सनिमि' । ३ ख. ठ. °शक्त्याक्षे° । ४ ख. ठ. ड. भ्रान्तत्वम् ।

ध्यासेनैवाऽऽत्मनः कर्तृत्वं न स्वाभाविकम्। तथा च श्रुतिः " ध्यायतीव लेलायतीव " [बृ० ४-३-७] इति " आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः " [कठ० ३-४] इति चोपाधिसंपृक्तस्यैवाऽऽत्मनो भोक्तृत्वादिविशेषलाभं दर्शयति। न हि विवेकिनां परस्मादन्यो जीवो नाम कर्ता भोक्ता वा विद्यते। " नान्योऽतोऽस्ति द्रष्टा " [बृह० ३-७-२३] इत्यादिश्रवणात्।

पर एव तर्हि संसारी कर्ता भोक्ता च प्रसज्येत। परस्मादन्यश्चेच्चितिमाञ्जीवः कर्ता बुद्ध्यादिसंघातव्यतिरिक्तो न स्यात्। न, अविद्याप्रत्युपस्थापितत्वात्कर्तृत्वभोक्तृत्वयोः। तथा च शास्त्रम् " यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति " [बृ० ४-५-१५] इत्यविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां त एव कर्तृत्वभोक्तृत्वे निवारयति " यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् " [बृ० ४-५-१५] इति। तथा स्वप्नजागरितयोरात्मन उपाधिसंपर्ककृतं श्रमं श्येनस्येवाऽऽकाशे विपरिपततः श्रावयित्वा तदभावं सुषुप्तौ प्राज्ञेनाऽऽत्मना संप-

---

कर्तृत्वमित्यत्र मानमाह—तथा चेति। उक्तश्रुत्योस्तात्पर्यमाह—उपाधीति। विद्वदनुभवविरुद्धा च स्वाभाविकी कर्तृतेत्याह—न हीति। विवेकिनामित्युक्तेरवस्थाभेदापेक्षमैक्यमित्याशङ्क्याऽऽह—नान्य इति।

बुद्ध्यादिसंघातादतिरिक्तो यदि परस्मादन्यश्चेतनो न स्यात्तदा पर एव संसारी कर्ता च प्रसज्येत। न च तद्युक्तं नित्यशुद्धत्वादिविरोधात्। यदि परस्मादन्यश्चेतनस्तर्हि नासौ बुद्ध्यादिव्यतिरिक्तः स्यादिति शङ्कते—पर एवेति। न तावत्केवलस्य चेतनस्य मुक्तिबन्धौ तस्य नित्यमुक्तत्वात्। नापि केवलस्य बुद्ध्यादेस्तौ तस्य जडत्वात्। किं त्वनाद्यनिर्वाच्याविद्योत्थबुद्ध्याद्युपाधिद्वारा चेतनस्यैव तौ कल्प्येते। न च व्यवस्थानुपपत्तिरेकस्मिन्नपि चिद्धातौ काल्पनिकभेदाधीनव्यवस्थास्थापनाद्भस्तुतस्तदभावस्येष्टत्वात्तस्मात्परस्मादन्यस्य चितिमतोऽभावेऽपि वस्तुतः संसारित्वस्य तस्मिन्नप्रसङ्गात्कल्पनया चोपगमान्नैवमित्याह—नाविद्येति। उक्तेऽर्थे श्रौतावन्वयव्यतिरेकौ दर्शयति—तथा चेति। उपाध्युद्भवाभिभवाभ्यां कर्तृत्वस्योद्भवाभिभवश्रवणादपि तदौपाधिकमित्याह—तथेति। परमानन्दत्वेनाऽऽ-

---

१ ङ. अ. °संयुक्त°। २ क. ज. °मान्बुद्ध्या°। ३ ब. ठ. °ञ्जीवो बु°। ४ ट. सुप्ते प्रा। ५ क. ङ. ज. अ. °षुप्ते प्रा°। ६ क. ठ. ङ. °पेक्ष्यमै°। ७ ठ. ङ. परः सं°। ८ झ. चैतन्यस्य। ९ ठ. ङ. °स्थाना°।

(जीवकर्तृत्वस्याध्यस्तत्वेनावास्तविकत्वम्, अधि० ' ५)

रिष्वक्तस्य श्रावयति । " तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम् " [बृ० ४-३-२१] इत्यारभ्य " एषाऽस्य परमा गतिरेषाऽस्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनन्दः " [बृ० ४-३-३२] इत्युपसंहारात् ।

तदेतदाहाऽऽचार्यः—" यथा च तक्षोभयथा " इति । त्वर्थे चायं चः पठितः । नैवं मन्तव्यं स्वाभाविकमेवाऽऽत्मनः कर्तृत्वमग्नेरिवौष्ण्यमिति । यथा तु तक्षा लोके वास्यादिकरणहस्तः कर्ता दुःखी भवति स एव स्वगृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थो निर्वृतो[1] निर्व्यापारः सुखी भवत्येवमविद्याप्रत्युपस्थापितद्वैतसंपृक्त[2] आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य[3] विमुक्तकार्यकरणसंघातोऽकर्ता सुखी भवति संप्रसादावस्थायाम् । तथा मुक्त्यवस्थायामप्यविद्याध्वान्तं विद्याप्रदीपेन विधूयाऽऽत्मैव

प्तकामत्वं साधयति—**आत्मेति** । कामयितव्याभावादपि तथेत्याह—**अकाममिति** । अशेषशोकसंस्पर्शशून्यत्वादपि तथेत्याह—**शोकान्तरमिति** । उक्तस्य सौषुप्तात्मरूपस्य परमपुरुषार्थतामाह—**एषेति** । प्रेप्सितमैश्वर्यमतिरिक्तमस्तीत्याशङ्क्याऽऽह—**एषाऽस्येति** । लोकविशेषस्यापेक्षणीयत्वमाशङ्क्योक्तम्—**एष इति** । परमानन्दस्यातिरिक्तस्यापेक्षैकत्वमाशङ्क्याऽऽह—**एषोऽस्येति** ।

उक्तेऽर्थे सूत्रमवतारयति—**तदेतदिति** । तदक्षराणि व्याकरोति—**त्वर्थे चेति** । चकारोऽवधारणे । तुशब्दार्थमेव स्फोरयति—**नैवमिति** । तत्र दृष्टान्तं व्याचक्षाणो हेतुमाह—**यथेति** । अन्यैरप्रेर्यत्वं स्वस्थत्वम् । मानसप्रयत्नराहित्यं निर्वृतत्वम् । कायचेष्टाशून्यत्वं निर्व्यापारत्वम् । बुद्ध्यादिसंपिण्डितैकद्रव्ये सत्येव जागरादौ क्रियादर्शनादसति तस्मिन्केवलात्मनि स्वापादौ तददर्शनाद्विशिष्टस्य क्रियाकारणत्वम् । तत्रापि निमित्तादुपादानस्य कार्यान्वयित्वेनान्तरङ्गत्वादुपादानत्वमन्वयव्यतिरेकाभ्यामुक्तन्यायवद्भ्यां ब्रह्मात्मत्वशास्त्रोपबृंहिताभ्यां लभ्यमिति भावः । संप्रसादे कर्तृत्वरहितस्यापि जागरादौ कर्तृत्वं चेन्मुक्तावपि तथैव स्यादित्याशङ्क्याऽऽह—**तथेति** । तत्र कारणसद्भावाद्युक्तं कर्तृत्वमिह तदभावान्नेति भावः । यथा कर्तृत्वादिशक्तियुक्तस्य तक्षणो वास्यादिप्रेरकत्वेन कर्तृत्वमेवमिहापि स्यादृष्टान्तदार्ष्टान्तिकयोस्तुल्यत्वादित्याशङ्क्याऽऽह—

---

१ क. ङ. ज. ञ. °र्वृत्तो निं° । २ ङ. ञ. °संयुक्त । ३ क. ज. ञ. ट. °रं प्र° । ४ क. °ब्रह्म प्र° । ५ क. ख. ठ. ड. °क्षत्वं' । ६ ख. झ. निवृत्तत्वं' ।

केवलो निर्वृतः सुखी भवति । तक्षदृष्टान्तश्चैतावतांऽशेन द्रष्टव्यः । तक्षा हि विशिष्टेषु तक्षणादिव्यापारेष्वपेक्ष्यैव प्रतिनियतानि करणानि वास्यादीनि कर्ता भवति स्वशरीरेण त्वकर्तैव । एवमयमात्मा सर्वव्यापारेष्वपेक्ष्यैव मनआदीनि करणानि कर्ता भवति स्वात्मना त्वकर्तैवेति । न त्वात्मनस्तक्ष्ण इवावयवाः सन्ति यैर्हस्तादिभिरिव वास्यादीनि तक्षा मनआदीनि करणान्यात्मोपाददीत न्यस्येद्वा ।

यत्तूक्तं शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकमात्मनः कर्तृत्वमिति । तत्र विधिशास्त्रं तावद्यथाप्राप्तं कर्तृत्वमुपादाय कर्तव्यविशेषमुपदिशति न कर्तृत्वमात्मनः प्रतिपादयति । न च स्वाभाविकमस्य कर्तृत्वमस्ति ब्रह्मात्मत्वोपदेशादित्यवोचाम । तस्मादविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्तिष्यते । " कर्ता विज्ञानात्मा पुरुषः " [प्र० ४-९] इत्येवंजातीयकमपि शास्त्रमनुवादरूपत्वाद्यथाप्राप्तमेवाविद्याकृतं कर्तृत्वमनुवदिष्यति । एतेन विहारोपादाने परिहृते । तयोरप्यनुवादरूपत्वात् । ननु " संध्ये स्थाने " प्रसुप्तेषु करणेषु " स्वे शरीरे यथाकामं परिवर्तते " [बृह० २-१-१८] इति विहार उपदिश्यमानः केवलस्याऽऽत्मनः कर्तृत्वमावहति । तथोपादानेऽपि " तदेषां प्राणानां विज्ञानेन विज्ञानमादाय " [बृह० २-१-१७] इति करणेषु कर्मकरणविभक्तौ श्रूयमाणे केवलस्याऽऽत्मनः कर्तृत्वं

तक्षेति । इतोऽपि विवक्षितांशेन साम्यं न त्वत्यन्तमित्याह—न त्विति ।

एवं सिद्धान्तमुपपाद्य पूर्वपक्षबीजमनुभाषते—यत्त्विति । शास्त्रार्थवत्त्वमादौ दूषयति—तत्रेति । यत्परं शास्त्रं स एव तदर्थ इत्युपगमात्तस्य च कर्त्रपेक्षितोपायतापरत्वात्कर्तुः स्वरूपपरत्वाभावात्कर्ता लोकसिद्धो न शास्त्रसिद्ध इत्यर्थः । प्रसिद्धस्योद्देश्यत्वात्प्रसिद्धेश्च मानत्वात्प्रामाणिकं कर्तृत्वमित्याशङ्क्याऽऽह—न चेति । विधिशास्त्रस्य स्वाभाविककर्तृत्वे तात्पर्याभावे फलितमाह—तस्मादिति । श्रुतार्थापत्ती निरस्यति—कर्तेति । तदुभयनिरासन्यायेन लिङ्गद्वयमपि निरस्तमित्याह—एतेनेति । अनुवादरूपत्वात्पारमार्थिककर्तृत्वासाधकत्वादिति शेषः । विहारोपदेशः स्वाभाविकमेव कर्तृत्वं साधयति करणविरहे श्रुतकर्तृत्वस्य स्वाभाविकत्वधौव्यादित्याह—नन्विति । उपादानमपि स्वाभाविकं कर्तृत्वं गमयतीत्याह—तथेति । विशिष्टस्य कर्तृत्वे कर-

---

१ क. ङ. ज. °दिषु व्या°। २ ङ. ट. न्यसेद्वा । ३ ङ. ज. ञ. °लस्यैवाऽऽत्म°।

(जीवकर्तृत्वस्याध्यस्तत्वेनावास्तविकत्वम् , अधि० १५)

गमयत इति। अत्रोच्यते—न तावत्संध्ये स्थानेऽत्यन्तमात्मनः करणविरमणमस्ति "सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति" [बृ० ४-३-७] इति तत्रापि धीसंबन्धश्रवणात्। तथा च स्मरन्ति—[म० भा० १२-२७६-२४]

"इन्द्रियाणामुपरमे मनोऽनुपरतं यदि।
सेवते विषयानेव तद्विद्यात्स्वप्नदर्शनम्" इति।

"कामादयश्च मनसो वृत्तयः" इति श्रुतिः। ताश्च स्वप्ने दृश्यन्ते। तस्मात्समना एव स्वप्ने विहरति। विहारोऽपि च तत्रत्यो वासनामय एव न तु पारमार्थिकोऽस्ति। तथा च श्रुतिरविकारानुबद्धमेव स्वप्नव्यापारं वर्णयति—"उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन्" [बृ० ४-३-१३] इति। लौकिका अपि तथैव स्वप्नं कथयन्ति—आरुरुक्षमिव गिरिशृङ्गमद्राक्षमिव वनराजिमिति।

तथोपादानेऽपि यद्यपि करणेषु कर्मकरणविभक्तिनिर्देशस्तथाऽपि तत्संपृक्तस्यैवाऽऽत्मनः कर्तृत्वं द्रष्टव्यम्। केवले कर्तृत्वासंभवस्य दर्शितत्वात्। भवति च लोकेऽनेकप्रकारा विवक्षा योधा युध्यन्ते योधै राजा युध्यत इति। अपि चास्मिन्नुपादाने

णानामपि कर्त्रन्तर्भावात्तेष्वपि कर्तृविभक्तिः स्यान्न चैवमस्ति तेषु कर्मकरणविभक्त्योरेव श्रवणोत्तस्मात्केवलस्यैवाऽऽत्मनः कर्तृतेत्यर्थः। परिहरति—अत्रेति। तत्राऽऽदौ विहारोपदेशस्य स्वाभाविककर्तृत्वसाधकत्वं प्रत्याह—**न तावदिति**। तत्रेति स्वप्नोक्तिः। जाग्रदवस्थायामिवेत्यपेरर्थः। स्वप्नावस्थायामात्मनो मनसः संबन्धे स्मृतिमाह—**तथा चेति**। सेवते तेनैव मनसा वासनामयान्विषयान्यदीति योजना। स्वप्ने मनःसत्त्वे युक्तिमाह—**कामादयश्चेति**। तथा च धर्मित्वेन मनोऽपि तत्रास्तीति शेषः। श्रुतिस्मृतियुक्तिसिद्धं निगमयति—**तस्मादिति**। विहारस्य वास्तवत्वमुपेत्योक्तमिदानीं तदपि नास्ति कुतस्तद्वशादात्मनो वास्तवकर्तृतेत्याह—**विहारोऽपीति**।

यत्तूपादानादात्मनो वास्तवकर्तृत्वमिति तत्राऽऽह—**तथेति**। करणसहितस्य कर्तृत्वे करणेऽपि कर्तृविभक्तिः स्यादित्युक्तं प्रत्याह—**भवतीति**। करणविशिष्टस्योपादानकर्तृत्वमुपेत्योक्तं तदपि नास्तीत्याह—**अपि चेति**। करणव्यापारोपरमस्य बुद्धिपूर्वक-

---

१ ज. स्वप्ने। २ क. मनोषृ°। ३ ङ. ञ. °त्संयुक्त°। ४ क. °कारावे°। ५ ठ. ड. °णात्के°। ६ ञ. ठ. ड. °स्तवं क°।

करणव्यापारोपरममात्रं विवक्ष्यते न स्वातन्त्र्यं कस्यचिदबुद्धिपूर्वकस्यापि स्वापे करणव्यापारोपरमस्य दृष्टत्वात् । यस्त्वयं व्यपदेशो दर्शितो "विज्ञानं यज्ञं तनुते" [तै० २-५] इति स बुद्धेरेव कर्तृत्वं प्रापयति । विज्ञानशब्दस्य तत्र प्रसिद्धत्वात् । मनोनन्तरं[1] पाठाच्च । "तस्य श्रद्धैव शिरः" [तै० २-४] इति च विज्ञानमयस्याऽऽत्मनः श्रद्धाद्यवयवत्वसंकीर्तनात् । श्रद्धादीनां च बुद्धिधर्मत्वप्रसिद्धेः । "विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते" [तै० २-५-१] इति च वाक्यशेषात् । ज्येष्ठत्वस्य च प्रथमजत्वस्य बुद्धौ प्रसिद्धत्वात् । "स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञः" इति च श्रुत्यन्तरे यज्ञस्य वाग्बुद्धिसाध्यत्वावधारणात् । न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति । सर्वकारकाणामेव स्वेस्वव्यापारेषु[3] कर्तृत्वस्यावश्यंभावित्वात् । उपलब्ध्यपेक्षं त्वेषां करणानां करणत्वं

त्वात्तस्मिन्निष्टे तत्राऽऽत्मनः स्वातन्त्र्यमपीष्टमेवेत्याशङ्क्याऽऽह—अबुद्धीति । व्यपदेशाच्च क्रियायामित्युक्तमनूद्य प्रत्याह—यस्त्विति । बुद्धौ विज्ञानशब्दस्य प्रसिद्धत्वं विज्ञानेन विज्ञानमादायेत्यादौ द्रष्टव्यम् । मनोमयानन्तरं विज्ञानमयोक्तेश्च विज्ञानशब्दस्य बुद्ध्यर्थत्वं संनिधेरित्याह—मनोनन्तरेति । तस्य तदर्थत्वे हेत्वन्तरमाह—तस्येति । श्रद्धावयवत्वेऽपि कुतो विज्ञानमयस्य बुद्ध्यव्यातिरेकस्तत्राऽऽह—श्रद्धादीनां चेति । मन्त्रशेषालोचनायामपि विज्ञानशब्दस्य बुद्ध्यर्थतेत्याह—विज्ञानमिति । इन्द्रियाणि देवाः । तथाऽपि कथं बुद्धिसिद्धिस्तत्राऽऽह—ज्येष्ठत्वस्येति । महद्यक्षं प्रथमजं वेद यो ह वै ज्येष्ठं च श्रेष्ठं च वेदेति बुद्धेरेव हिरण्यगर्भभेदेन ज्येष्ठत्वोक्तेर्वाक्यशेषे बुद्धिसिद्धिरित्यर्थः । किंच श्रुत्यन्तरे यज्ञस्य बुद्धिसाध्यत्वसिद्धेर्यज्ञकर्तुर्विज्ञानं बुद्धिरेवेत्याह—स एष इति । चित्तेन ध्यात्वा वाचा मन्त्रोक्त्या यज्ञो जायते तेन चित्तस्य वाचः पूर्वोत्तरभावो यज्ञ इति यज्ञकर्तुर्बुद्धित्वसिद्धेस्तत्सामान्यादत्रापि बुद्धिरेव विज्ञानमित्यर्थः । न चेन्निर्देशविपर्यय इत्युक्तं शक्तिविपर्यायादित्युक्तेन सह दूषयति—न चेति । विक्लिद्यन्ति तण्डुलाः । ज्वलन्ति काष्ठानि । बिभर्ति स्थालीति कारकान्तराणामपि स्वव्यापारेषु कर्तृत्वस्वीकारादित्याह—सर्वेति । तर्हि बुद्ध्यादीनां कर्तृत्वमेव न करणत्वं नेत्याह—उपलब्धीति । तत्रापि बुद्धेरेव

---

१ क. ङ. ञ. ट. °न्तरपा° । २ क. ज. ञ. °त्तारिक° । ३ क. ङ. ज. ञ. स्वव्या° । ४ क. ख. ठ. ड. °कर्तृविज्ञा° ।

(जीवस्येश्वरप्रवृत्तत्वेन न रागप्रवृत्तत्वम्, अधि० १६)

सा चाऽऽत्मनः । न च तस्यामप्यस्य कर्तृत्वमस्ति । नित्योपलब्धिस्वरूपत्वात् ।

अहंकारपूर्वकमपि कर्तृत्वं नोपलब्धुर्भवितुमर्हति । अहंकारस्याप्युपलभ्यमानत्वात् । न चैवं सति करणान्तरकल्पनाप्रसङ्गः । बुद्धेः करणत्वाभ्युपगमात् । समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः । यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधानात् । तस्मात्कर्तृत्वमप्यात्मन उपाधिनिमित्तमेवेति स्थितम् ॥४०॥(१९)

(जीवस्येश्वरप्रवृत्तत्वेन न रागप्रवृत्तत्वम्, अधि० १६)

परात्तु तच्छ्रुतेः ॥ ४१ ॥

कर्तृत्वमित्याशङ्क्योक्तम्—**सा चेति** । तर्हि केवलस्याऽऽत्मनस्तां प्रति कर्तृत्वं नेत्याह—**न चेति** । न चोपलब्धेर्नित्यत्वे कुतो बुद्धेस्तत्र करणतेति वाच्यं विषयोपरक्ततया तस्या जन्यत्वात्तत्र करणत्वसिद्धिरिति भावः ।

यत्तु बुद्धेः कर्तृत्वे कर्तुरहमित्युपलभ्य प्रवृत्तिदृष्टेरुपलब्धौ करणान्तरस्यान्वेष्यत्वाच्च केवलस्यैवाऽऽत्मनः कर्तृत्वमिति तत्राऽऽह—**अहंकारेति** । सत्यमहंकारपूर्वकं कर्तृत्वं तथाऽपि न तदुपलब्धुः साक्षिणोऽस्तीत्यत्र हेतुमाह—**अहंकारस्येति** । अहंकारवत्तद्विशिष्टस्यैव चेतनस्य कर्तृत्वं साक्षिणोपलभ्यते तस्मान्न केवलस्याऽऽत्मनः कर्तृत्वम् । विशिष्टस्य च कर्तृत्वे ज्ञातुरेव कर्तृत्वं कर्तुरेव भोक्तृत्वमित्येतदपि सिध्यतीत्यर्थः । उपलब्धौ बुद्धेरकर्तृत्वे बुद्धेरुपलब्धृत्वे करणान्तरं कल्प्यमित्यपि प्रत्युक्तमित्याह—**न चेति** । बुद्धेरुपलब्धृत्वाभावे सतीति यावत् । किंच बुद्धेरुपलब्धौ करणत्वमात्मनश्च कर्तृत्वं नेष्टं तदाऽऽत्मा बुद्ध्या जानातीत्ययुक्तं नेत्याह—**बुद्धेरिति** । आत्मस्वरूपोपलब्धौ नित्यत्वात्कर्त्राद्यभावेऽपि तस्यास्तत्तदर्थावच्छेदे बुद्ध्यादीनां करणत्वादात्मनश्च तदुपाधिनाऽहंकारपूर्वकं कर्तृत्वादविरुद्धा प्रसिद्धिरित्यर्थः । यत्तु समाध्यभावाच्चेति तत्राऽऽह—**समाधीति** । उक्तहेतूनामात्मनि स्वाभाविककर्तृत्वासाधकत्वे सिद्धे विध्यादिश्रुतीनां कल्पितकर्तृत्वोपजीवित्वादसङ्गताश्रुतीनां च वास्तवासङ्गत्ववादित्वान्मिथोविरोधाभावान्नित्यशुद्धे ब्रह्मणि समन्वयसिद्धिरित्युपसंहरति—**तस्मादिति** ॥ ४० ॥ (१९)

औपाधिकमपि पूर्वोक्तं कर्तृत्वमीश्वरायत्तमित्याह—**परात्त्विति** । विषयमनूद्य

---

१ क. ज. °निबन्धनमें° । २ झ. 'लस्याऽऽत्म' । ३ ख. ठ. ड. किं बु° । ४ ठ. ड. °त्वे वि° ।

यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्तृत्वं जीवस्याभिहितं तत्किमनपेक्ष्येश्वरं भवत्याहोस्विदीश्वरापेक्षमिति भवति विचारणा । तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्व इति । कस्मात् । अपेक्षाप्रयोजनाभावात् । अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारकान्तरसामग्रीसंपन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति । न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियास्वनडुहा(दा)दिवदीश्वरोऽपरोऽपेक्षितव्य इति । क्लेशात्मकेन च कर्तृत्वेन जन्तून्संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत विषमफलं चैषां कर्तृत्वं विदधतो वैषम्यम् । ननु " वैषम्यनैर्घृण्ये न सापेक्षत्वात् " [सू० २-१-३४] इत्युक्तम् । सत्यमुक्तं सति त्वीश्वरस्य सापेक्षत्वसंभवे । सापेक्षत्वं चेश्वरस्य संभवति सतोर्जन्तूनां धर्माधर्मयोस्तयोश्च सद्भावः सति जीवस्य कर्तृत्वे तदेव

जीवस्य करणादिपौष्कल्यादीश्वरस्य कारयितृत्वश्रुतेश्च संशयमाह—यदिति । कर्ममीमांसकपक्षं गृह्णाति—तत्रेति । अत्र चैष ह्येवेत्यादिश्रुतीनां विधिश्रुत्यादिभिर्विरोधसमाधानेन सर्वनियामके ब्रह्मणि समन्वयसमाधानात्पादादिसंगतयः । पूर्वपक्षे दर्शितश्रुतीनां मिथोविरोधादप्रामाण्यादुक्ते ब्रह्मणि समन्वयासिद्धिः । सिद्धान्ते तासामविरोधेन प्रामाण्यात्तत्र तत्सिद्धिः । शास्त्रादीश्वरस्यापेक्षणीयतेति शङ्कते—कस्मादिति । कर्तृत्वसामग्र्यामीश्वरोऽन्तर्भूतो न वेति विकल्प्य द्वितीयं निरस्यति—अपेक्षेति । आद्यं प्रत्याह—अयं हीति । कारकान्तराणि तत्तत्कार्यनिर्माणकारणानि करणादीनि तेषां सामग्री संपूर्णता तया संपन्नः सहितः सन्निति यावत् । एवं कर्तृत्वे संभवति नेश्वरापेक्षा केवलव्यतिरेकाभावादित्याह—तस्येति । मा भूदीश्वरस्य शास्त्रवशादपेक्ष्यत्वं मानान्तरात्तु भविष्यति तत्राऽऽह—न चेति । किंचेश्वरो द्वेषपक्षपातरहितः साध्वसाधुनोर्न कर्मणोर्जीवान्प्रवर्तयेत्तस्य स्वतन्त्रस्य कारुणिकत्वात्कर्मणि साधुन्येव प्रवर्तकत्वादतो विचित्रसर्गासिद्धिरित्याह—क्लेशेति । उक्तोत्तरत्वादनवकाशं चोद्यमिति शङ्कते—नन्विति । तत्रेश्वरस्य जगत्कारणत्वकृतदोषाभावश्चिन्तितोऽत्र तु जीवस्य कर्तृत्वेऽपीश्वरस्य प्रयोजकत्वकृतदोषाभावं सापेक्षत्वमाक्षिप्य चिन्तयतीत्यर्थः । भेदमुपेत्याऽऽह—सत्यमिति । ईश्वरस्य कारयितृत्वे जीवस्य कर्तृत्वं ततस्तदधीनकर्मापेक्षमीश्वरस्य कारयितृत्वमिति चक्रकादिदोषप्रसङ्गान्नेश्वरस्य सापेक्षत्वादित्यर्थः । ईश्वरायत्ते जीवस्य कर्तृत्वे पूर्वपूर्वकर्मवासनासापेक्षमुत्तरोत्तरकर्तृत्वमित्यपि

---

१ ङ. ञ. °त्वं नेश्व° । २ ठ. ड. °र्गापत्ति° ।

(जीवस्येश्वरप्रवृत्तत्वेन न रागप्रवृत्तत्वम् , अधि० १६)

चेत्कर्तृत्वमीश्वरापेक्षं स्यात्तिकविषयमीश्वरस्य सापेक्षत्वमुच्येत । अकृताभ्यागमश्चैवं जीवस्य प्रसज्येत । तस्मात्स्वत एवास्य कर्तृत्वमिति । एतां प्राप्तिं तुशब्देन व्यावर्त्य प्रतिजानीते "परात्" इति । अविद्यावस्थायां कार्यकरणसंघाताविवेकदर्शिनो जीवस्याविद्यातिमिरान्धस्य सतः परस्मादात्मनः कर्माध्यक्षात्सर्वभूताधिवासात्साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिस्तदनुग्रहहेतुकेनैव च विज्ञानेन मोक्षसिद्धिर्भवितुमर्हति । कुतः । 'तच्छ्रुतेः' । यद्यपि दोषप्रयुक्तः सामग्रीसंपन्नश्च जीवो यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं तथाऽपि सर्वास्वेव प्रवृत्तिष्वी-

---

न सिध्यतीत्याह—अकृतेति । जीवस्येश्वरापेक्षाभावे फलितमाह—तस्मादिति । स्वतश्चेदस्य कर्तृत्वं विध्यादिश्रुतिसिद्धं तदैव ह्येवेत्यादिश्रुतिविरोधे समन्वयासिद्धिरित्युपसंहर्तुमितिशब्दः । सिद्धान्तयति—एतामिति । प्रतिज्ञां विवृणोति—अविद्येति । जीवस्येश्वरादेव संसारस्य मोक्षस्य च सिद्धिर्भवितुमर्हतीति संबन्धः । तस्य परस्मादत्यन्तान्यत्वं निरस्यति—अविद्येति । सैव तिमिरं विद्याप्रकाशमन्तरेणानिराकरणात्तेनान्धः स्वरूपज्ञानहीनश्चिदात्मा तस्यावच्छिन्नस्वभावस्य देहादिसमुदायविषयाविवेकदर्शनं विभ्रमस्तच्छीलस्य विक्षिप्तस्य जीवस्य सतोऽविद्यादशायां संसारस्य पृथक्त्वेन कल्पितादीश्वरात्सिद्धिरिति यावत् । तस्य वास्तवपररूपमाह—परस्मादिति । सर्वविषयज्ञानाभावे कथं कारयितृत्वं तत्राऽऽह—कर्मेति । तथाऽपि सर्वत्र संनिध्यभावे कारयितृत्वासिद्धिस्तत्राऽऽह—सर्वेति । तथाऽपि तज्ज्ञानाभावे तदसिद्धिस्तत्राऽऽह—साक्षिण इति । तदुपपादयति—चेतयितुरिति । ईश्वरस्य कारयितृत्वे स्वगतव्यापारवत्त्वमाशङ्क्योक्तम्—तादिति । संसारस्यानर्थत्वेन हेयत्वार्थं विशिनष्टि—कर्तृत्वेति । कथं बन्धहेतुरीश्वरस्तद्विरुद्धमोक्षहेतुः स्यात्तत्राऽऽह—तदनुग्रहेति । जीवस्य दोषप्रयुक्तत्वात्कारकान्तरसामग्रीमत्त्वादीश्वरस्य कृष्यादिषु कारणत्वाप्रसिद्धेश्च न तदपेक्षं कर्तृत्वमित्याह—कुत इति । सौत्रं हेतुमवतार्य व्याचष्टे—तदिति । केवलव्यतिरेकाभावेऽपि श्रुतेरीश्वरस्य सुखादौ धर्मादेरिव कारणत्वं केवलव्यतिरेकस्य दृष्टकारणकृप्तिविषयत्वादागमस्यादृष्टकारणकल्पकत्वेन

---

१ ङ. ञ. एव जीवस्य । २ क. ज. °केन च । ३ क. ङ. ज. °क्षस्य सि° । ४ ङ. ञ. °पि रोगादिदो° । ५ ख. °स्तवं प° ।

श्वरो हेतुकर्तेति श्रुतेरवसीयते । तथाहि श्रुतिर्भवति—" एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते " [कौषी० ३-८] इति । " य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति " [बृह० माध्य० ३-७-३०] इति चैवंजातीयका ॥ ४१ ॥

नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्याताम-कृताभ्यागमौ च जीवस्येति । नेत्युच्यते—

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावै-यर्थ्यादिभ्यः ॥ ४२ ॥ (१६)

तुशब्दश्चोदितदोषव्यावर्तनार्थः । कृतो यः प्रयत्नो जीवस्य धर्माधर्मलक्षणस्तदपेक्ष एवैनमीश्वरः कारयति । अतश्चैते चोदिता दोषा न प्रसज्यन्ते । जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्तत्फलानि विषमं विभजेत्पर्जन्यवदीश्वरो निमित्तत्वमात्रेण । यथा लोके नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां चासाधारणेभ्यः स्वस्वबीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः । न ह्यसति पर्जन्ये रसपुष्पफलपलाशादिवैषम्यं तेषां जायते नाप्यसत्सु स्वस्वबीजेषु । एवं जीवकृतप्रयत्नापेक्ष

व्यवस्थानादिति भावः । तामेव श्रुतिमाह—तथाहीति ॥ ४१ ॥

चोद्यान्तरमनुद्रवति—नन्विति । उत्तरत्वेन सूत्रमवतारयति—नेतीति । तदक्षराणि व्याकरोति—तुशब्द इति । ईश्वरस्य प्रवर्त्यादृष्टापेक्षया प्रवर्तकत्वे फलितमाह—अतश्चेति । दोषाणामप्रसङ्गमेव प्रकटयति—जीवेति । धर्माधर्माभ्यामेव फलवैषम्यसिद्धेरलमीश्वरेणेत्याशङ्क्य पर्जन्यवदित्युक्तं तद्विवृणोति—यथेति । अतिदीर्घा वह्वयो गुच्छाः । ह्रस्वा गुल्मा इति भेदः । बीजेभ्यो जायमानव्रीह्यादीनां कृतं पर्जन्येनेत्याशङ्क्याऽऽह—न हीति । कृतं तर्हि बीजैरित्याशङ्क्याऽऽह—नापीति । दार्ष्टान्तिकं विवृणोति—एवमिति । यदि जीवेन कृतः स्वेच्छया कश्चित्प्रयत्नस्तदा तदपेक्षः सन्नीश्वरो विषमं कर्तृत्वं कुर्यान्न तु तदस्ति

---

१ क. हेतुः कं । २ क °ष उ वाऽ° । ३ क. °मप्रसङ्गश्च । ४ ङ. ञ. ट. °ति । तत° । ५ ङ. ञ. °भजते पर्जं° । ६ क. ज. स्वबी° । ७ क. °त्सु बी° । ८ ज. स्वबी° । ९ ट. °वप्र° । १० ठ. ड. °ति । अक्ष° । ११ ठ. °न्न तं° ।

(जीवस्येश्वरप्रवृत्तत्वेन न रागप्रवृत्तत्वम्, अधि० १६)

ईश्वरस्तेषां शुभाशुभं विदध्यादिति श्लिष्यते। ननु कृतप्रयत्नापेक्षत्वमेव जीवस्य परायत्ते कर्तृत्वे नोपपद्यते। नैष दोषः। परायत्तेऽपि हि कर्तृत्वे करोत्येव जीवः कुर्वन्तं हि तमीश्वरः कारयति। अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति पूर्वतरं च प्रयत्नमपेक्ष्य पूर्वमकारयदित्यनादित्वात्संसारस्येत्यनवद्यम्। कथं पुनरवगम्यते "कृतप्रयत्नापेक्षः" ईश्वर इति। "विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" इत्याह। एवं[2] हि "स्वर्गकामो यजेत" [आप०श्रौत०१०-२-१] "ब्राह्मणो न हन्तव्यः" इत्येवंजातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति। अन्यथा तदनर्थकं स्यात्। ईश्वर एव विधिप्रतिषेधयोर्नियुज्येत। अत्यन्तपरतन्त्रत्वाज्जीवस्य। तथा विहितकारिणमप्यनर्थेन संसृजेत्प्रतिषिद्धकारिणमप्यर्थेन। ततश्च प्रामाण्यं वेदस्यास्तमियात्। ईश्वरस्य चात्यन्तानपेक्षत्वे लौकिक-

---

चक्रकापत्तेरिति शङ्कते—नन्विति। किमीश्वरस्य कारयितृत्वे जीवस्य कर्तृत्वमेव नेत्यापाद्यते किंवा तस्य कर्तृत्वे कारयितृत्वमीश्वरस्य नेति तत्राऽऽद्यं प्रत्याह—नेति। न हि गुर्वधीनो माणवको नाध्ययनस्य कर्तेति भावः। द्वितीयं दूषयति—कुर्वन्तं हीति। अध्ययनशक्तं प्रत्येवाध्यापकत्वोपलम्भात्क्रियाशक्तिमन्तं जीवं प्रत्यपि कारयितृत्वमीश्वरस्य युक्तमिति भावः। चक्रकापत्तिं निरस्यति—अपि चेति। अनवद्यं जीवस्य कर्तृत्वं तत्कृतधर्माधर्मापेक्षया च कारयितृत्वमीश्वरस्येति शेषः। तस्य सापेक्षत्वे मानं पृच्छति—कथमिति। तत्र मानोक्तिपरं सूत्रावयवमादत्ते—विहितेति। ईश्वरस्य सापेक्षत्वे विहितस्य निषिद्धस्य चावैयर्थ्यं तस्य चेन्नैरपेक्ष्यं तदा तयोरानर्थक्यमतस्तयोरर्थवत्त्वानुपपत्तिरीश्वरस्य सापेक्षत्वसाधिकेत्याह—एवमिति। किमितीश्वरस्य[3] नैरपेक्ष्ये विहितादिवैयर्थ्यं तत्राऽऽह—ईश्वर इति। तयोः स्थाने स एव नियुज्येत यत्ताभ्यां कार्यं तदसावेव कुर्यादिति तयोरानर्थक्यमित्यर्थः। जीवं प्रति प्रवर्तकत्वेन निवर्तकत्वेन च तदर्थवत्त्वमाशङ्क्याऽऽह—अत्यन्तेति। सर्वात्मना जीवस्येश्वराधीनत्वात्तत्प्रेरितस्य प्रवृत्तिनिवृत्तिभाक्त्वात्कृतं विधिनिषेधाभ्यामित्यर्थः। आदिशब्दार्थमाह—तथेति। अत्यन्तं स्वातन्त्र्यादेवं कुर्वन्नपीश्वरो न पर्यनुयोगमर्हतीत्याशङ्क्याऽऽह—ततश्चेति। ईश्वरस्य स्वातन्त्र्येण फलहेतुत्वे समीहितासमीहितहेतुभेदविधायि शास्त्रममानं स्यादित्यर्थः। आदिशब्दगृहीतं दोषान्तरमाह—ईश्वरस्येति। पुरुषकारस्येष्टानिष्टाप्तिहानानुकूलस्य यत्नस्येति यावत्। पुरुषकारवै-

---

१ क. ज. ञ. °रस्यान्। २ क. ज. °वं स्व°। ३ क °रनै°।

(औपाधिककल्पनैर्जीवेशयोर्जीवानां च परस्परं व्यवहारव्यवस्था, अधि० १७)

स्यापि पुरुषकारस्य वैयर्थ्यं तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसङ्गश्चेत्येवंजातीयकं दोषजातमादिग्रहणेन दर्शयति ॥४२॥(१६)

(औपाधिककल्पनैर्जीवेशयोर्जीवानां च परस्परं व्यवहारव्यवस्था, अधि० १७)

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥४३॥

जीवेश्वरयोरुपकार्योपकारकभाव उक्तः। स च संबद्धयोरेव लोके दृष्टो यथा स्वामिभृत्ययोर्यथा वाऽग्निविस्फुलिङ्गयोः। ततश्च जीवेश्वरयोरप्युपकार्योपकारकभावाभ्युपगमात्किं स्वामिभृत्यवत्संबन्ध आहोस्विदग्निविस्फुलिङ्गवदित्यस्यां विचिकित्सायामनियमो वा प्राप्नोति। अथवा स्वामिभृत्यप्रकारेष्वेवेशित्रीशितव्यभावस्य प्रसिद्धत्वात्तद्विध एव संबन्ध इति प्राप्नोति। अतो ब्रवीति— "अंशः" इति। जीव ईश्वरस्यांशो भवितुमर्हति यथाऽग्नेर्विस्फु-

---

यर्थ्यं दृष्टान्तयितुं तथेत्युक्तम्। तेषां वैयर्थ्यमिति संबन्धः। पूर्वोक्तदोषोऽकृताभ्यागमादिः। तदेवमेष हीत्यादिश्रुतीनां विध्यादिश्रुतिभिरविरोधात्परस्मिन्नशेषनियन्तरि समन्वयसिद्धिरिति ॥ ४२ ॥ (१६)

जीवात्मन्यारोपितं कर्तृत्वमीश्वरायत्तमित्युक्तम्। इदानीं निर्धारितयोग्यत्वस्य तस्य ब्रह्मैक्यं साधयति—**अंश इति**। विषयं वक्तुं वृत्तं कीर्तयति—**जीवेति**। तस्य संबन्धापेक्षकत्वमाह—**स चेति**। सिद्धान्तानुसारिणमपि दृष्टान्तमाह—**यथा वेति**। उपकार्योपकारकत्वाक्षिप्तं जीवेश्वरसंबन्धं विषयीकृत्योभयथा दृष्टि हेतुं कृत्वा विचारप्रयोजकं संदेहमाह—**ततश्चेति**। नियामकाभावेन पूर्वपक्षाभासं संगृह्णाति—**अनियम इति**। जीवेश्वरयोरनंशत्वेन प्रदेशवृत्तेः संयोगस्यानुपपत्तेः समवायस्य च निरस्तत्वात्कार्यकारणत्वादिहीनतया तादात्म्यस्यापि दुःसंपादत्वान्निरंशे चांशासंभवात्पादोऽस्येत्यादिश्रुतेरौपचारिकत्वाद्भृत्यस्वामिसंबन्धस्य च प्रसिद्धत्वादनियमस्य च जघन्यत्वान्नियमेन भृत्यस्वामिलक्षणः संबन्धस्तयोरित्याह—**अथवेति**। अत्रैं च जीवब्रह्मभेदाभेदश्रुतिविरोधनिरासेनैकरसे ब्रह्मणि समन्वयसाधनात्पादादिसंगतयः। पूर्वपक्षे भेदाभेदश्रुतीनां विरोधादप्रामाण्यादुक्तसमन्वयासिद्धिः। सिद्धान्ते तासामविरोधात्प्रामाण्यात्तत्सिद्धिः। पूर्वपक्षमनूद्य प्रतिज्ञामवतार्य व्याकरोति—**अत इति**। अग्नेः सांशत्वादंशांशित्वेऽपि प्रकृते न सांशतेति प्रतिज्ञासिद्धिमाशङ्क्याऽऽह—**अंश इति**। सूत्रसामर्थ्यान्मुख्यमे-

---

१ क. दासकिं। २ झ. ट. 'योरुप'। ३ ङ. ञ. 'स्विद्विस्फु'। ४ क. वाऽऽग्नो'। ५ ठ. ङ. निगृह्णाति। ६ ठ. ङ. 'स्य नि'। ७ झ. 'त्र जी'।

लिङ्गः। अंश इवांशो न हि निरवयवस्य मुख्योंऽशः संभवति। कस्मात्पुनर्निरवयवत्वात्स एव न भवति "नानाव्यपदेशात्"। "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" [छा० ८-७ १] "एतमेव विदित्वा मुनिर्भवति" [बृ० ४-४-२२] "य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति" [बृ० मा० ३-७-३०] इति चैवंजातीयको भेदनिर्देशो नासति भेदे युज्यते। ननु चायं नानाव्यपदेशः सुतरां स्वामिभृत्यसारूप्ये युज्यत इत्यत आह— "अन्यथा चापि" इति। न च नानाव्यपदेशादेव केवलादंशत्वप्रतिपत्तिः। किं तर्ह्यन्यथा चापि व्यपदेशो भवत्यनानात्वस्य प्रतिपादकः। तथाहि "एके" शाखिनो दाशकितवादिभावं ब्रह्मण आमनन्त्याथर्वणिका ब्रह्मसूक्ते "ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमे कितवाः" इत्यादिना। दाशा य एते कैवर्ताः प्रसिद्धाः। ये चामी दासाः स्वामिष्वात्मानमुपक्षपयन्ति। ये चान्ये कितवा द्यूतकृतस्ते सर्वे ब्रह्मैवेति हीनजन्तूदाहरणेन सर्वेषामेव नामरूपकृतकार्यकरणसंघातप्रविष्टानां जीवानां ब्रह्मत्वमाह। तथाऽन्यत्रापि ब्रह्मप्रक्रियायामेवायमर्थः प्रपञ्च्यते—

वांशत्वं जीवस्य किं न स्यात्तत्राऽऽह—न हीति। चोद्यद्वारा सूत्रावयवमादत्ते—कस्मादिति। व्यतिरेकेण व्याकरोति—स इति। आत्यन्तिकाभेदे भेदोक्त्यसिद्धिश्चेत्तदर्थमात्यन्तिको भेदः स्यादिति शङ्कते—ननु चेति। कथंचिद्भेदेऽपि यस्य सिद्धिस्तस्यातिशयेन सिद्धिरात्यन्तिके भेदे स्यादित्युक्तम्—सुतरामिति। सूत्रावयवेनोत्तरमाह—अत इति। तस्यार्थमाह—न चेति। अभेदव्यपदेशं विशदयन्दाशकितवादित्वमित्यादि व्याचष्टे—तथाहीति। दाशादिपदार्थोक्तिपूर्वकमुद्देश्यविधेयत्वं प्रकटयन्हीनजन्तूदाहरणतात्पर्यमाह—दाशा इति। उक्तार्थस्फुटीकरणार्थमुदाहरणान्तरमाह—तथेति। वञ्चसि गच्छसि। सूत्रात्मैवात्र सर्वात्मत्वेन स्तूयते न परमात्मे-

---

१ क. ज. 'छन्य आत्मा'। २ क. दासकि'। ३ ज. दासा। ४ ज. दाशा। ५ क. ज. ञ. ट. ब्रह्मेमे। ६ क. ज. ञ. ट. 'वा उत" इ'। ७ ङ. ञ. 'मिन्यात्मा'। ८ ङ. ज. ञ. ट. 'पक्षिपन्ति। ९ क. ज. 'ति निही'। १० क ज 'यामयमेवार्थः। ११ क. ख. 'यन्निही'। १२ क. ठ. ड. 'त्मे'।

(औपाधिककल्पनैर्जीवेशयोर्जीवानां च परस्परं व्यवहारव्यवस्था, अधि० १७)

" त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः "
[श्वे० ४-३] इति ।

" सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते " [तै० आर० ३-१२-७] इति च । " नान्योऽतोऽस्ति द्रष्टा " [बृ० ३-७-२३] इत्यादिश्रुतिभ्यश्चास्यार्थस्य सिद्धिः । चैतन्यं चाविशिष्टं जीवेश्वरयोर्यथाऽग्निविस्फुलिङ्गयोरौष्ण्यम् । अतो भेदाभेदावगमाभ्यामंशत्वावगमः ॥ ४३ ॥

कुतश्चांशत्वावगमः ।

मन्त्रवर्णाच्च ॥ ४४ ॥

मन्त्रवर्णश्चैतमर्थमवगमयति—

" तावानस्य महिमा ततो ज्यायाँश्च पूरुषः ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि "
[छा० ३-१२-६] इति ।

अत्र भूतशब्देन जीवप्रधानानि स्थावरजङ्गमानि निर्दिशति। " अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः " [छा० ८-१५]

त्याशङ्क्य श्रुत्यन्तरमाह—**सर्वाणीति** । यदास्ते यो नामरूपे निर्मायाभिवदनादि कुर्वन्वर्तते तं विद्वानिहैवामृतो भवतीति संबन्धः । न केवलं विधिद्वारैवाभेदो बोध्यते किं तु निषेधद्वाराऽपीत्याह—**नेति** । न केवलं श्रुतितोऽभेदो न्यायतश्चेत्याह—**चैतन्यं चेति** । जीवो नात्यन्तं ब्रह्मणो भिद्यते चिद्रूपत्वाद्ब्रह्मवदेवेत्यर्थः । व्यपदेशाभ्यामुपपत्तेश्च फलितमाह—**अत इति** ॥ ४३ ॥

अंशत्वसिद्धौ हेत्वन्तरत्वेनानन्तरसूत्रमवतारयति—**कुतश्चेति** । तद्व्याचष्टे—**मन्त्रेति** । अस्य सहस्रशीर्ष्णः पुरुषस्य तावान्महिमा विभूतिर्न स्वरूपं यावानेष प्रपञ्चस्ततस्तस्मात्प्रपञ्चाज्ज्यायान्महत्तर एवायं प्रकृतः पुरुषः । आद्यपादार्थं विवृणोति—**पादोऽस्येति** । द्वितीयपादार्थं प्रपञ्चयति—**त्रिपादिति** । भूतशब्देन रूढियोगाभ्यां महाभूतानां जनिमन्मात्रस्य ज्ञाने कुतो जीवोक्तिरित्याशङ्क्याऽऽह—**अत्रेति** । वृद्धव्यवहाराभावे कथं भूतशब्दस्योक्तार्थतेत्याशङ्क्य वैदिकव्यवहारं दर्शयति—**अहिंसन्निति** । तीर्थानि शास्त्रोक्तानि कर्माणि तेभ्योऽन्यत्र सर्वाणि भूतान्यहिंसन्वर्ततेत्यत्र भूतशब्दो जीवप्रधानेषु स्थावरजङ्गमेषु प्रयुज्यते तत्र प्राप्तहिंसानिषेधस्य फलवत्त्वादतो युक्तं प्रकृतेऽपि भूतशब्दस्य जीवविषयत्वमित्यर्थः । तथाऽपि भूतानां पादत्वमेवोच्यते न

इति प्रयोगात् । अंशः पादो भाग इत्यनर्थान्तरम् । तस्मादप्यंशत्वावगमः ॥ ४४ ॥

कुतश्चांशत्वावगमः—

अपि च स्मर्यते ॥ ४५ ॥

ईश्वरगीतास्वपि चेश्वरांशत्वं जीवस्य स्मर्यते—

" ममैवांशो जीवलोके जीवभूतः सनातनः "

[भ० गी० १५-७] इति । तस्मादप्यंशत्वावगमः । यत्तूक्तं स्वामिभृत्यादिष्वेवेशित्रीशितव्यभावो लोके प्रसिद्ध इति । यद्यप्येषा लोके प्रसिद्धिस्तथाऽपि शास्त्रात्त्वत्रांशांशित्वमीशित्रीशितव्यभावश्च निश्चीयते । निरतिशयोपाधिसंपन्नश्चेश्वरो निहीनोपाधिसंपन्नाञ्जीवान्प्रशास्तीति न किंचिद्विप्रतिषिध्यते ॥ ४५ ॥

अत्राऽऽह ननु जीवस्येश्वरांशत्वाभ्युपगमे तदीयेन संसारदुःखोपभोगेनांशिन ईश्वरस्यापि दुःखित्वं स्यात् । यथा लोके हस्तपादाद्यन्यतमाङ्गगतेन दुःखेनाङ्गिनो देवदत्तस्य दुःखित्वं तद्वत् । ततश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयात् । अतो वरं

त्वंशत्वमित्याशङ्क्याऽऽह—अंश इति । मान्त्रवर्णिकमर्थमुपसंहरति—तस्मादिति॥४४॥

न केवलं श्रुतेरेव जीवस्येश्वरांशत्वं किंतु स्मृतेरपीति सूत्रान्तरमुत्थापयति—कुतश्चेति । तद्व्याकरोति—ईश्वरेति । स्मृतिसिद्धमर्थं निगमयति—तस्मादिति । जीवेश्वरयोरीशित्रीशितव्यभावात्तस्य स्वामिभृत्यादिष्वेव प्रसिद्धत्वात्तयोः स्वामिभृत्यभावः संबन्धो नांशांशित्वं लोकप्रसिद्धिविरोधादित्याशङ्क्योक्तमनुवदति—यत्त्विति । यववराहाधिकरणन्यायेन लोकप्रसिद्धिः शास्त्रीयप्रसिद्धया बाध्येत्याह—यद्यपीति । जीवेश्वरयोरौपाधिकत्वाविशेषे कस्मादीशित्रीशितव्यभावो विपरीतो न स्यादित्याशङ्क्याऽऽह—निरतिशयेति । एकस्मिन्नेव पूर्णे चिदात्मन्यनाद्यनिर्वाच्याविद्याकल्पितो जीवेश्वरजगद्भेदस्तत्र कल्पितोपाध्युत्कर्षनिकर्षवशादीशित्रीशितव्यव्यवस्था वस्तुतस्तु सर्वकल्पनातीतं चिदेकतानमद्वितीयं तत्त्वमिति भावः ॥ ४५ ॥

उत्तरसूत्रव्यावर्त्यां शङ्कामाह—अत्रेति । जीवेश्वरयोरंशांशित्वं सप्तम्यर्थः । दुःखित्वं स्यात्ततश्चानीश्वरत्वमिति शेषः । अंशगतेन दुःखेनांशिनो दुःखित्वं दृष्टान्तेन स्पष्टयति—यथेति । ईश्वरस्य दुःखित्वे दोषान्तरमाह—ततश्चेति । ब्रह्मप्राप्तानां महत्तरे दुःखे प्राप्ते मोक्षस्यापुरुषार्थतेत्याह—अत इति । तस्यापुँमर्थत्वे सम्यग्धीसा-

---

१ क. ज. इति चान' । २ क. 'तव्यादिभा' । ३ ङ. ञ. जीवेश्च' । ४ क. 'वलश्रु' । ५ ठ. ड. 'रेवास्ये' । ६ ठ. ड. 'त्वं प्र' । ७ क. 'पुरुषार्थ' ।

(औपाधिककल्पनैर्जीवेशयोर्जीवानां च परस्परं व्यवहारव्यवस्था, अधि० १७)

पूर्वावस्थः संसार एवास्त्विति सम्यग्दर्शनानर्थक्यप्रसङ्गः स्यादिति । अत्रोच्यते—

प्रकाशादिवन्नैवं परः ॥ ४६ ॥

यथा जीवः संसारदुःखमनुभवति "नैवं परः" ईश्वरोऽनुभवतीति प्रतिजानीमहे । जीवो ह्यविद्यावेशवशादेहाद्यात्मभावमिव गत्वा तत्कृतेन दुःखेन दुःख्यहमित्यविद्यया[1] कृतं दुःखोपभोगमभिमन्यते नैवं परमेश्वरस्य देहाद्यात्मभावो दुःखाभिमानो वाऽस्ति । जीवस्याप्यविद्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानो न तु पारमार्थिकोऽस्ति । यथा च स्वदेहगतदाहच्छेदादिनिमित्तं दुःखं तदभिमानभ्रान्त्याऽनुभवति तथा पुत्रमित्रादिगोचरमपि दुःखं तदभिमानभ्रान्त्यैवानुभवत्यहमेव पुत्रोऽहमेव मित्रमित्येवं स्नेहवशेन पुत्रमित्रादिष्वभिनिविशमानः । ततश्च निश्चितमेतदवगम्यते मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभव इति । व्यतिरेकदर्शनाच्चैवमवगम्यते । तथाहि—पुत्रमित्रादिमत्सु बहुपूपविष्टेषु[2] तत्संबन्धाभिमानिष्वितरेषु च पुत्रो मृतो मित्रं मृतमित्येवमाद्युद्घोषिते येषामेव पुत्रमित्रादिमत्त्वाभिमानस्तेषामेव तन्निमित्तं दुःखमुत्पद्यते नाभिमानहीनानां परिव्राजकादीनाम्[3] । अतश्च लौकिकस्यापि पुंसः

धनविधायिशास्त्रवैयर्थ्यमित्याह—इति सम्यगिति । सूत्रमवतारयति—अत्रेति । नैवं पर इति भागं विभजते—यथेति । प्रतिज्ञाते विभागे हेतुमाह—जीवो हीति । जीवस्य दुःखित्वे तदंशित्वादीश्वरस्यापि दुःखित्वमित्याशङ्क्य तस्यापि वस्तुतोऽदुःखित्वान्नैवमित्याह—जीवस्येति । न चानिर्वाच्यमेव दुःखं ब्रह्मण्यपीति वाच्यं तदुपनायकदृष्टत्वभावात्कल्पितस्य च दृष्टिमात्रदेहत्वाज्जीवद्वारा च ब्रह्मणि तदुपगमान्न चैवं ब्रह्मप्राप्तानां महत्तरदुःखप्राप्तिरज्ञानतज्जध्वस्तेरेव तत्प्राप्तित्वादिति भावः । मिथ्याभिमानकृतं दुःखमित्ययुक्तं पुत्रादौ विवेकबुद्ध्याऽऽत्माभिमानाभावेऽपि तद्वत्तदुःखस्याऽऽत्मन्यारोपादित्याशङ्क्याऽऽह—यथा चेति । अनुभवितारं विशिंषन्भ्रान्तिमभिनयति—अहमिति । अन्वयेनोक्तं निगमयति—ततश्चेति । तमेवार्थं व्यतिरेकेण स्फोरयति—व्यतिरेकेति । तदेव विवृणोति—तथा हीति । उक्तं व्यतिरेकमुपजीव्य सम्यग्दर्शनानर्थक्यप्रसङ्गं प्रत्यादिशति—अतश्चेति । लौकिकस्य शास्त्रोत्थतत्त्वधीशू-

---

१ क. ङ. ज. ञ. ट विद्याकृ° । २ क. ज. मादिभाषि° । ज. ञ. °माघोषि° । ३ ट. पुत्रादिममत्वाभि° । ४ ज. °महाभि° । ५ क ज. ञ. ट. °काना° । ६ क. ङ. विभागं ।

(औपाधिकैकल्पनैर्जीवविशेषयोर्जीवानां च परस्परं व्यवहारव्यवस्था, अधि० १७)

सम्यग्दर्शनार्थवत्त्वं दृष्टं किमुत विषयशून्यादात्मनोऽन्यद्वस्त्वन्तरमपश्यतो नित्यचैतन्यमात्रस्वरूपस्येति । तस्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसङ्गः । प्रकाशादिवदिति निदर्शनोपन्यासः । यथा प्रकाशः सौरश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसंबन्धात्तेष्वृजुवक्रादिभावं प्रतिपद्यमानेषु तत्तद्भावमिव प्रतिपद्यमानोऽपि न परमार्थतस्तद्भावं प्रतिपद्यते । यथा चाऽऽकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोऽपि न परमार्थतो गच्छति । यथा चोदशरावादिकम्पनात्तद्गते सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान्सूर्यः कम्पते । एवमविद्याप्रत्युपस्थापिते बुध्याद्युपहिते जीवाख्येऽंशे दुःखायमानेऽपि न तद्वानीश्वरो दुःखायते । जीवस्यापि दुःखप्राप्तिरविद्यानिमित्तैवेत्युक्तम् । तथा चाविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्रतिपादयन्ति वेदान्ताः " तत्त्वमसि " इत्येवमादयः । तस्मान्नास्ति जैवेन दुःखेन परमात्मनो दुःखित्वप्रसङ्गः ॥ ४६ ॥

न्यस्येत्यर्थः । सम्यग्दर्शनं विवेकज्ञानमात्रम् । विषयशून्यादविषयादिति यावत् । तस्य सम्यग्दर्शनं शास्त्रीयं तत्त्वसाक्षात्करणं तस्यार्थवत्त्वमिति किमु वक्तव्यमिति योजना । कैमुतिकन्यायफलमाह—तस्मादिति । ईश्वरः स्वांशगतैर्दुःखैर्दुःखी स्यादंशित्वाद्देवदत्तवदित्यत्र तन्निमित्तभ्रमैवत्त्वोपाधेरप्रयोजको हेतुरित्युक्तम् । इदानीं तात्त्विकं प्रातीतिकं वा दुःखित्वमीश्वरे साध्यमिति विकल्प्याऽऽद्ये यदंशाश्रितं तदंशिनि वस्तुतः स्यादित्यत्र व्यभिचारमाह—प्रकाशेति । प्रकाशदृष्टान्तं व्याचष्टे—यथेति । आत्मन्युपाधितो दुःखादिप्रतीतिरेव वस्तुतस्तु न प्राप्तिरित्यत्र दृष्टान्तमुक्त्वा लोकद्वयसंचारस्यापि तस्मिन्प्रतीतिमात्रं न वस्तुतेत्यत्र दृष्टान्तमाह—यथा चेति । क्रियामात्रस्याऽऽत्मनि वस्तुतो नास्ति प्राप्तिरित्यत्रोदाहरणम्—यथा चेति । दृष्टान्तत्रयगतमर्थं दार्ष्टान्तिके योजयति—एवमिति । वास्तवे दुःखित्वे साध्ये व्यभिचारमुक्त्वा दृष्टान्तस्य साध्यवैकल्यमाह—जीवस्येति । प्रातीतिके दुःखित्वे साध्ये जीवद्वारा परस्मिन्नपि तत्प्रतीतेरिष्टत्वेन सिद्धसाध्यतां मत्वोभयत्रापि नास्ति वस्तुतो दुःखित्वमागमविरोधादित्याह—तथा चेति । परकीयानुमाननिरासफलमुपसंहरति—तस्मादिति ॥ ४६ ॥

---

१ क. ज. ट. तद्भा° । २ ङ. ज. ञ. °द्युपाध्युप° । ३ क. इत्याद° । ४ ख. योजनम् । ५ ञ. °मत्वोपा° ।

स्मरन्ति च ॥ ४७ ॥

स्मरन्ति च व्यासादयो यथा जैवेन दुःखेन न परमात्मा दुःखायत इति।

" तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः।
न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा।
कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते।
स सप्तदशकेनापि राशिना युज्यते पुनः "
[महाभा० १२-३५३-१४-१६] इति।

चशब्दात्समामनन्ति चेति वाक्यशेषः।

" तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति "
[श्वे० ४-६] इति।

" एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः "
[कठ० ५-११] इति च ॥ ४७ ॥

अत्राऽऽह यदि तर्ह्येक एव सर्वेषां भूतानामन्तरात्मा स्यात्कथमनुज्ञापरिहारौ स्यातां लौकिकौ वैदिकौ चेति। ननु चांशो जीव ईश्वरस्येत्युक्तम्। तद्भेदाच्चानुज्ञापरिहारौ तदाश्रयावव्य-

---

परानुमाने श्रुतिस्मृतिविरुद्धतया कालात्ययापदेशं दर्शयति—**स्मरन्तीति**। तत्र स्मृतिविरोधं विभजते—**स्मरन्ति चेत्यादिना**। काऽसौ स्मृतिस्तामाह—**तत्रेति**। निर्धारणार्था सप्तमी। फलैश्चापीति चकारात्कर्मभिरपीत्यर्थः। कर्मात्मा कर्माश्रयो जीवः। पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च वायवो मनो बुद्धिश्चेति सप्तदशसंख्यावच्छिन्नः समूहः सप्तदशको राशिस्तेनेति यावत्। सूत्रे स्मृतिविरोध उद्भाव्यते श्रुतिविरोधस्तु न भातीत्याशङ्क्याऽऽह—**चशब्दादिति**। यथाऽऽदित्यः सर्वप्रकाशको न प्रकाश्यदोषैः स्पृश्यते तथेति यावत् ॥ ४७ ॥

अंशांशित्वमुपेत्यांशित्वहेतोरप्रयोजकत्वाद्युक्तमिदानीमंश इत्युक्तमाक्षिप्य समाधातुं स्वरूपैक्यमादायाऽऽक्षिपति—**अत्रेति**। कथमित्यस्मादुपरिष्टात्तर्हीति संबध्यते। अनुज्ञादिव्यवस्थानुपपत्त्या स्वरूपभेदः स्यादित्यर्थः। आक्षेप्तुर्विवक्षितमज्ञात्वा शङ्कते—**नन्विति**। अंशांशित्वे फलितमाह—**तादिति**। तेषामंशानां जीवानामंशिनः परस्मान्मिथश्च भेदादिति यावत्। अनुज्ञादेरेवं सिद्धौ चोद्यासिद्धिरनुज्ञादिविषये फलती-

---

१ ड. 'र्मांशयो। २ ठ. ड. 'वानां प'।

(औपाधिककल्पनैर्जीवेशयोर्जीवानां च परस्परं व्यवहारव्यवस्था, अधि० १७)

तिकीर्णाद्युपपद्यते किमत्र चोद्यत इति। उच्यते—नैतदेवमनंशत्वमपि हि जीवस्याभेदवादिन्यः श्रुतयः प्रतिपादयन्ति "तत्सृष्ट्वा। तदेवानुप्राविशत्" [तै० २-६-१] "नान्योऽतोऽस्ति द्रष्टा" [बृ० ३-७-२३] "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" [बृ० ४-४-१९] "तत्त्वमसि" [छा० ६-८-७] "अहं ब्रह्मास्मि" [बृह० १-४-१०] इत्येवंजातीयकाः। ननु भेदाभेदावगमाभ्यामंशत्वं सिध्यतीत्युक्तम्। स्यादेतदेवं यद्युभावपि भेदाभेदौ प्रतिपिपादयिषितौ स्यातामभेद एव त्वत्र प्रतिपिपादयिषितो ब्रह्मात्मत्वप्रतिपत्तौ पुरुषार्थसिद्धेः। स्वभावप्राप्तस्तु भेदोऽनूद्यते न च निरवयवस्य ब्रह्मणो मुख्योंऽशो जीवः संभवतीत्युक्तम्। तस्मात्पर एवैकः सर्वेषां भूतानामन्तरात्मा जीवभावेनावस्थित इत्यतो वक्तव्याऽनुज्ञापरिहारोपपत्तिः। तां ब्रूमः—

अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्॥ ४८॥

"ऋतौ भार्यामुपेयात्" इत्यनुज्ञा। "गुर्वङ्गनां नोपगच्छेत्" इति परिहारः। तथा "अग्नीषोमीयं पशुं संज्ञपयेत्" इत्यनुज्ञा। "न हिंस्यात्सर्वा भूतानि" इति परिहारः। एवं लोकेऽपि मित्रमुपसेवितव्यमित्यनुज्ञा। शत्रुः परिहर्तव्य इति

त्याह—किमिति। आक्षेप्ता प्रत्याह—उच्यत इति। जीवस्येश्वरांशत्वमाश्रित्यानुज्ञादेः सिद्धिरुक्ता तां निरस्यति—नैतदिति। अभेदवादिनीः श्रुतीरनुक्रामति—तदित्यादिना। व्यपदेशद्वयमादायोक्तं सिद्धान्ती स्मारयति—नन्विति। उभयदृष्ट्यांऽशत्वमुभयोः प्रतिपाद्यत्वे स्यान्न च तदस्तीत्याह—स्यादिति। भेदाभेदयोरभेदं निर्धारयितुमत्रेत्युक्तम्। तस्यैव प्रतिपाद्यत्वे हेतुमाह—ब्रह्मेति। भेदोऽपि प्रतिपाद्यतामभेदवदित्याशङ्क्याऽऽह—स्वभावेति। अविद्या स्वभावः। इतश्चाभेदस्यैव प्रतिपाद्यतेत्याह—न चेति। तस्यैव प्रतिपाद्यत्वे फलितमाह—तस्मादिति। स्वरूपैक्ये स्थिते पूर्वोक्तानुपपत्तितादवस्थ्यमित्याह—इत्यत इति। अनुज्ञासिद्धये स्वरूपभेदे वाच्ये सिद्धान्ती सूत्रेणोत्तरमाह—तामिति। वैदिकानुज्ञापरिहारौ ज्ञानसौकर्यार्थमुदाहरति—ऋताविति। लौकिकावपि तौ दर्शयति—एवमिति। लौकिकवैदि-

---

१ झ. ट. °पि जी। २ ङ. ञ. मा। ३ क. झ. °त्सर्वभू। ४ ट °के मि। ५ ठ. ड. °पि द।

परिहारः । एवंप्रकारौ " अनुज्ञापरिहारौ " एकत्वेऽप्यात्मनो " देहसंबन्धात् " स्याताम् । देहैः संबन्धो देहसंबन्धः । कः पुनर्देहसंबन्धः । देहादिरयं संघातोऽहमेवेत्यात्मनि विपरीतप्रत्ययोत्पत्तिः । दृष्टा च सा सर्वप्राणिनामहं गच्छाम्यहमागच्छाम्यहमन्धोऽहमनन्धोऽहं मूढोऽहममूढ इतीत्येवमात्मिका । न ह्यस्याः सम्यग्दर्शनादन्यन्निवारकमस्ति । प्राक्तु सम्यग्दर्शनात्प्रततैषा भ्रान्तिः सर्वजन्तुषु । तदेवमविद्यानिमित्तदेहाद्युपाधिसंबन्धकृताद्विशेषादैकात्म्याभ्युपगमेऽप्यनुज्ञापरिहारावकल्प्येते । सम्यग्दर्शिनस्तर्ह्यनुज्ञापरिहारानर्थक्यं प्राप्तम् । न । तस्य कृतार्थत्वान्नियोज्यत्वानुपपत्तेः । हेयोपादेययोर्हि नियोज्यो नियोक्तव्यः स्यात् । आत्मनस्त्वतिरिक्तं हेयमुपादेयं वा वस्त्वपश्यन्कथं नियुज्येत । न चाऽऽत्माऽऽत्मन्येव नियोज्यः स्यात् । शरीरव्यति-

---

कानुज्ञादेरुक्तरूपत्वेऽपि कथमैकात्म्ये तयोः सिद्धिरित्याशङ्क्याऽऽह—**एवमिति** । आत्मनो देहेन संबन्धेऽपि कथमुभयोः सिद्धिस्तत्राऽऽह—**देहैरिति** । आत्मनोऽसङ्गस्य न तैः संगतिरित्याह—**क इति** । असङ्गत्वेऽपि तस्य देहादिसंबन्धं दर्शयति—**देहादिरिति** । उक्ते संबन्धे मानमाह—**दृष्टा चेति** । तस्या अविद्यात्मकत्वेन निवृत्तत्वान्नानुज्ञादिप्रयोजकतेत्याशङ्क्य सम्यग्ज्ञानात्प्रागूर्ध्वं वा तस्या निवृत्तिरिति विकल्प्याऽऽद्यं दूषयति—**न हीति** । अविद्यात्मकत्वात्तस्याः सम्यग्ज्ञानातिरिक्तविरोध्यभावादित्यर्थः । निवारकान्तराभावं तुशब्देन परामृश्य सर्वत्रासंकुचद्वृत्तित्वमुक्तसंबन्धस्याऽऽह—**प्राक्त्विति** । अज्ञानावस्थायां देहादियोगस्यानिवृत्तत्वे फलितमाह—**तदेवमिति** । विशेषो भेदः । द्वितीयमालम्बते—**सम्यगिति** । सम्यग्दर्शनं किमात्मैक्यधीः किं वा देहातिरिक्तधीः । नाऽऽद्यः । तद्वतो देहादिसंबन्धनिवृत्तेरनुज्ञाद्यानर्थक्यस्येष्टत्वादित्याह—**नेति** । अनुपपत्तिमेव वक्तुं सामान्यन्यायमाह—**हेयेति** । तथाऽपि कथमात्मैक्यदर्शिनो नियोज्यत्वासिद्धिस्तत्राऽऽह—**आत्मनस्त्विति** । आत्मानतिरिक्ते विषये नियोज्यत्वमाशङ्क्याहेयोपादेयत्वादात्मनो नैवमित्याह—**न चेति** । द्वितीयं शङ्कते—**शरीरेति** । व्यतिरेकादर्शने नियोज्यत्वासिद्धेः सति तस्मिन्देहासंबन्धान्नियोगायोगादनुज्ञाद्यानर्थक्यमित्यर्थः । देहाद्यतिरेकदर्शिनोऽपि तत्संहतत्वाभिमानिनो

---

१ ङ. ञ. 'देहे सं' । २ ट. 'मानुग' । ३ ज. 'न्धोऽहं । ४ क. 'ढोऽहं पण्डित इ' । ५ क. ज. ट. प्राक्तस्य' । ६ ञ. 'जन्तूनाम् । त' । ७ क. ज. ञ. ट. 'कल्पेते । ८ ञ. देहसं' ।

(औपाधिककल्पनैर्जीवेशयोर्जीवानां च परस्परं व्यवहारव्यवस्था, अधि० १७)

रेकदर्शिन एव नियोज्यत्वमिति चेन्न । तत्संहतत्वाभिमानात् । सत्यं व्यतिरेकदर्शिनो नियोज्यत्वं तथाऽपि व्योमादिवदेहाद्यसंहतत्वमपश्यत एवाऽऽत्मनो नियोज्यत्वाभिमानः । न हि देहाद्यसंहतत्वदर्शिनः कस्यचिदपि नियोगो दृष्टः । किमुतैकात्म्यदर्शिनः । न च नियोगाभावात्सम्यग्दर्शिनो यथेष्टचेष्टाप्रसङ्गः । सर्वत्राभिमानस्यैव प्रवर्तकत्वादभिमानाभावाच्च सम्यग्दर्शिनः । तस्मादेहसंबन्धादेवानुज्ञापरिहारौ "ज्योतिरादिवत्" । यथा ज्योतिष एकत्वेऽप्यग्निः क्रव्यात्परिहियते नेतरः । यथा च प्रकाश एकस्यापि सवितुरमेध्यदेशसंबद्धः परिहियते नेतरः शुचिभूमिष्ठः । तथा भौमाः प्रदेशा वज्रवैदूर्यादय उपादीयन्ते । भौमा अपि सन्तो नरकलेवरादयः परिहियन्ते । तथा मूत्रपुरीषं गवां पवित्रतया परिगृह्यते तदेव जात्यन्तरे परिवर्ज्यते तद्वत् ॥ ४८ ॥

असंततेश्चाव्यतिकरः ॥ ४९ ॥

स्यातां नामानुज्ञापरिहारावेकस्यात्मनो देहविशेषयो-

नियोज्यत्वयोगादनुज्ञादेरर्थवत्तेत्याह—नेत्यादिना । तदेव विभजते—सत्यमिति । अङ्गीकृतं भागं दर्शयति—व्यतिरेकेति । तर्हि देहादियोगस्य निवृत्तेरनुज्ञाद्यसिद्धिस्तत्राऽऽह—तथाऽपीति । असंहतत्वेऽपि तद्दर्शनाभावे दृष्टान्तमाह—व्योमादिवदिति । व्यतिरेकदर्शिनो नियोज्यत्वं चेदविशेषादैक्यदर्शिनोऽपि स्यादित्याशङ्क्याऽऽह—न हीति । देहादिष्वसंहतत्वदर्शिनः संहतत्वधीशून्यस्य सुषुप्तस्येति यावत् । तर्हि सम्यग्दर्शिनो विधिनिषेधाभावाद्यथेष्टचेष्टापत्तिर्नेत्याह—न चेति । विषयाभिनिविष्टचेतसो ज्ञानानुदयादवश्यं साधकावस्थायामेवाभिनिवेशत्यागेन भवितव्यं तस्य पुनः सम्यग्ज्ञानोदयेऽपि पूर्ववासनातो विषयाभिनिवेशाभावान्नियतप्रवृत्तेर्न यथेष्टचेष्टेत्यर्थः । प्रसङ्गागतं त्यक्त्वा प्रकृतमुपसंहरति—तस्मादिति । उपाधिवशादनुज्ञापरिहाराविति दृष्टान्तमाह—ज्योतिरिति । क्रव्यं मांसमत्तीति श्मशानादिसंबन्धी वह्निरत्र क्रव्यादित्युच्यते ॥ ४८ ॥

अनुज्ञादेरुक्तनीत्या सिद्धिमुपेत्य कर्मफलसंबन्धव्यतिकरमाशङ्क्य परिहरति—असंततेश्चेति । सूत्रव्यावर्त्यां शङ्कामाह—स्यातामिति । यद्यपि स्थूलदेहावच्छेदाद-

---

१ ङ. ज. ञ. °ध्यप्रदे° । २ ङ. ज. ञ. ट. °संबन्धः प° । ३ क. ज. °मिप्रतिष्ठः । ञ. °मिप्रविष्टः । त° । ४ क ज. झ. ट. 'वैडूर्या° । ५ क. °वां परि° । ६ क. ज. °तां तावन्नामा° । ७ ज. ट. °स्याऽऽत्म° । ८ ख. ठ. ड सुप्त° । ९ क. °चेष्टतेत्य° ।

गात् । यस्त्वयं कर्मफलसंबन्धः स चैकात्म्याभ्युपगमे व्यतिकीर्येत स्वाम्येकत्वादिति चेत् । नैतदेवम् "असंततेः" । न हि कर्तुर्भोक्तुश्चाऽऽत्मनः संततः सर्वैः शरीरैः संबन्धोऽस्ति । उपाधितन्त्रो हि जीव इत्युक्तम् । उपाध्यसंतानाच्च नास्ति जीवसंतानः । ततश्च कर्मव्यतिकरः फलव्यतिकरो वा न भविष्यति ॥ ४९ ॥

आभास एव च ॥ ५० ॥

आभास एव चैष जीवः परस्याऽऽत्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः । न स एव साक्षान्नापि वस्त्वन्तरम् । अतश्च यथा नैकस्मिञ्जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते । एवं नैकस्मिञ्जीवे कर्मफलसंबन्धिनि जीवान्तरस्य तत्संबन्धः । एवमव्यतिकर एव कर्मफलयोः । आभासस्य चाविद्याकृतत्वात्तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरिति । तद्व्युदासेन च पारमार्थिकस्य ब्रह्मात्मभावस्योपदेशोपपत्तिः। येषां तु बहव आत्मा-

---

नुज्ञापरिहारौ युज्येते तथाऽपि कर्मफलसंकरो दुर्वार एतद्देहविशिष्टस्य स्वर्गादिभोगायोगे स्वरूपस्यैव तद्योगप्रौव्यादतः स्वर्गीतरादिव्यवस्थानुपपत्त्या स्वरूपभेद इत्यर्थः । किं परमात्मापेक्षयैकत्वं किं वा जीवापेक्षया । आद्ये परस्याभोक्तुरपि सर्वाश्रयत्वान्न व्यतिकराशङ्केत्याह—नैतदिति । द्वितीयं सूत्रावयवेन निरस्यति—असंततेरिति । तदेव विवृणोति—न हीति । स्थूलदेहयोगव्यभिचारेऽप्यविद्यातदुत्थान्तःकरणयोगस्यासंसारमोक्षादव्यभिचारात्तदवच्छिन्नस्यैव स्वर्गादिभोगित्वान्न व्यवस्थायाः स्वरूपभेदधीरित्यर्थः । औपाधिकभेदेन व्यवस्थोपपत्तिं सूत्रावयवार्थं दर्शयति—ततश्चेति ॥ ४९ ॥

आद्ये सूत्रे जीवस्यांशत्वमवच्छेदबुद्ध्योक्तमधुना रूपं रूपमित्यादिश्रुतिसिद्धं प्रतिबिम्बपक्षमुपन्यस्यति—आभास इति । तद्व्याचष्टे—आभास एवेति । एवकारार्थमाह—नेत्यादिना । नं हि जीवः साक्षात्परमात्मैवोपाधिव्यवधानान्नापि वस्त्वन्तरं तत्सृष्ट्वेत्यादिश्रुतिस्मृतिविरोधादित्यर्थः । आभासपक्षे स्वर्गीतरादिव्यवस्थाऽपि सुस्थेत्याह—अतश्चेति । अस्मिन्पक्षे बन्धोऽज्ञानाज्ज्ञानान्मुक्तिरित्येतदपि सिध्यतीत्याह—आभासस्येति । स्वरूपैक्येऽपि नास्ति दुःखादिसंकर इत्युक्त्वा चकारसूचितं वक्तुमुपक्रमते—येषां त्विति । आत्मभेदात्परमते व्यतिकरो नेति शङ्कते—

---

१ क. ट. स ऐका° । २ ड. ब. ट °ततिः स° । ३ क. °मप्यव्य° । ४ क. °पत्तिः । त° । ५ ज. ट. °त्तिरतस्तद्व्यु° । ६ क. ब्रह्मभा° । ७ क. न जी° । ८ क. झ. ठ. ड. °रोधः स्यादि° । ९ झ. ठ. ड. °पैक्ये ना° ।

(औपाधिककल्पनैर्जीवेशयोर्जीवानां च परस्परं व्यवहारव्यवस्था, अधि० १७)

नस्ते च सर्वे सर्वगतास्तेषामेवैष व्यतिकरः प्राप्नोति । कथं, बहवो विभवश्चाऽऽत्मानश्चैतन्यमात्रस्वरूपा निर्गुणा निरतिशयाश्च तदर्थं साधारणं प्रधानं तन्निमित्तैषां भोगापवर्गसिद्धिरिति सांख्याः । सति बहुत्वे विभुत्वे च घटकुड्यादिसमाना द्रव्यमात्रस्वरूपाः स्वतोऽचेतना आत्मानस्तदुपकरणानि चाणूनि मनांस्यचेतनानि तत्राऽऽत्मद्रव्याणां मनोद्रव्याणां च संयोगान्नवेच्छादयो वैशेषिका आत्मगुणा उत्पद्यन्ते ते चाव्यतिरेकेण प्रत्येकमात्मसु समवयन्ति स संसारः । तेषां नवानामात्मगुणानामत्यन्तानुत्पादो मोक्ष इति काणादाः । तत्र सांख्यानां तावच्चैतन्यस्वरूपत्वात्सर्वात्मनां संनिधानाद्यविशेषाच्चैकस्य सुखदुःखसंबन्धे सर्वेषां सुखदुःखसंबन्धः प्राप्नोति । स्यादेतत् । प्रधानप्रवृत्तेः पुरुषकैवल्यार्थत्वाद्व्यवस्था भविष्यति । अन्यथा हि स्वविभूतिख्यापनार्था प्रधानप्रवृत्तिः स्यात् । तथा चानिर्मोक्षः प्रसज्येतेति । नैतत्सारम् । न ह्यभिलषितसिद्धिनि-

---

कथमिति । परपक्षे व्यतिकरं प्रसञ्जयितुं सांख्याभिप्रायं तावदाह—**बहव इति** । कथं तर्हि तेषां भोगापवर्गौ तत्राऽऽह—**तदर्थमिति** । वैशेषिकप्रक्रियामाह—**सतीति** । घटादिसाम्यमेव स्फोरयति—**द्रव्येति** । मात्रचो विवक्षितं दर्शयति—**स्वत इति** । कथं तर्हि तेषु भोगापवर्गौ तत्राऽऽह—**तदिति** । तथाऽपि कथं बन्धमोक्षावित्याशङ्क्य बन्धस्वरूपमाह—**तत्रेति** । मुक्तिस्वरूपमाह—**तेषामिति** । स्वापादिव्यावृत्त्यर्थमत्यन्तपदम् । पक्षद्वयमनूद्य सांख्यपक्षे व्यवस्थानुपपत्तिमाह—**तत्रेति** । संनिधानाद्यविशेषादित्यादिशब्दादौदासीन्यमुक्तम् । सांख्याभिप्रायमाशङ्क्ते—**स्यादिति** । सर्वेषां पुंसां संनिधिनिर्विशेषत्वयोरविशेषेऽपि प्रधानमेव तेषां मोक्षार्थं प्रवर्तते तथा च कंचित्कालं नर्तकीवत्स्वात्मानं दर्शयित्वा स्वयमेवोपरमते सविकारप्रधानदर्शनमेव पुंसां बन्धस्तदुपरमे तदृष्टयभावान्मुक्तिरुपचर्यतेऽतो नियतप्रधानप्रवृत्त्या व्यवस्थासिद्धिरित्यर्थः । प्रतिनियतप्रधानप्रवृत्त्यनङ्गीकारे स्वविभूतिख्यापनाय तत्प्रवृत्तिरिति पुंसां मोक्षो न स्यादित्याह—**अन्यथेति** । प्रधानप्रवृत्तेर्मोक्षार्थत्वेऽपि सर्वेषामपर्यायमेव कस्मान्मोक्षो न भवेत्कस्यचिन्मोक्षो बन्धश्च कस्यचिदिति व्यवस्थायां मानाभावादित्याह—**नैतदिति** । प्रधानस्य स्वविभूतिख्यापनपरिहाराय प्रतिनियतप्रवृत्तिरित्युक्तं तत्राऽऽह—**न हीति** । नियमस्यानादित्वान्नात्र युक्तिरन्वेष्येत्याशङ्क्यानियमस्यैवा-

---

१ ट. सर्वे । २ क. °वश्चैवाऽऽत्मा° । ३ क. च पट° । ४ क. °मा द्र° । ५ ज. झ. ट. °र्मोक्षप्रसङ्गः प्र° । ६ क. तदाह । ७ क. °भेण दृष्टय° । ८ ख. पुंसो । ९ झ. °शङ्क्य नि° ।

बन्धना व्यवस्था शक्या विज्ञातुम्। उपपत्त्या तु कयाचिद्व्यवस्थोच्येत। असत्यां पुनरुपपत्तौ कामं मा भूदभिलषितं पुरुषकैवल्यं प्राप्नोति तु व्यवस्थाहेत्वभावाद्व्यतिकरः। काणादानामपि यदैकेनाऽऽत्मना मनः संयुज्यते तदाऽऽत्मान्तरैरपि नान्तरीयकः संयोगः स्यात्संनिधानाद्यविशेषात्। ततश्च हेत्वविशेषात्फलाविशेष[1] इत्येकस्याऽऽत्मनः सुखदुःखसंयोगे सर्वात्मनामपि समानं सुखदुःखित्वं प्रसज्येत ॥ ५० ॥

स्यादेतददृष्टनिमित्तो नियमो भविष्यतीति। नेत्याह—

अदृष्टानियमात् ॥ ५१ ॥

बहुष्वात्मसु स्वाकाशवत्सर्वगतेषु प्रतिशरीरं बाह्याभ्यन्तराविशेषेण संनिहितेषु मनोवाक्कायैर्धर्माधर्मलक्षणमदृष्टमुपार्ज्यते। सांख्यानां तावत्तदनात्मसमवायि प्रधानवर्ति प्रधानसाधारण्यान्न प्रत्यात्मं सुखदुःखोपभोगस्य नियामकमुपपद्यते। काणादानामपि पूर्ववत्साधारणेनाऽऽत्ममनःसंयोगेन निर्वर्तितस्यादृष्टस्याप्यस्यैवाऽऽत्मन इदमदृष्टमिति नियमे हेत्वभावादेष एव दोषः ॥ ५१ ॥

नादित्वान्मैवमित्याह—**असत्यामिति**। वैशेषिकसमयेऽपि व्यवस्थासिद्धिमाह—**काणादानामिति**। संनिधानादीत्यादिशब्देन द्रव्यत्वादि गृहीतम्। हेतुर्मनःसंयोगः। फलं सुखादि ॥ ५० ॥

यददृष्टकृतो मनःसंयोगस्तस्यैव तत्कृतं सुखादीति व्यवस्थां शङ्कते—**स्यादेतदिति**। सूत्रेणोत्तरमाह—**नेत्याहेति**। अनियमं व्याख्यातुं पक्षद्वयसाधारणं तज्जन्मप्रकारमाह—**बहुष्विति**। एवमदृष्टोत्पत्तावपि तन्निमित्ता व्यवस्था किं न स्यादित्याशङ्क्य सांख्यान्प्रत्याह—**सांख्यानामिति**। पक्षान्तरेऽप्यदृष्टानियमं व्याचष्टे—**काणादानामिति**। पूर्ववदिति सुखाद्युत्पादकमनःसंयोगवदित्यर्थः। यद्वा नियम्यत्वेन प्रकृतसुखादिवदित्यर्थः। एष एव दोष इत्यदृष्टस्य नियामकत्वायोगो गृह्यते ॥ ५१ ॥

---

१ ङ. °शेषः। एक°। २ क. ङ. ज. ञ. °खसंयो°। ३ क. ङ. ज. ञ. °नामेव स°। ४ क. ञ. °मानसु°। ५ ङ. °नं दुःखसुखि°। ६ क. ज. ञ, °दुःखत्वं। ७ क °त्मसु सर्वे°। ८ क. ञ. °ह्याभ्यान्त°। ९ ज. ट °मुत्पद्यते। १० ङ. °वद°। ११ क. °त्तत्तद°। १२ क. °नस्य सा°। १३ क. ज. ञ. ट. °यमहे°। १४ ख. ठ. ड. प्रस्तुत°।

स्यादेतदहमिदं फलं प्राप्नवानीदं परिहराणीत्थं प्रयंता इत्थं करवाणीत्येवंविधा अभिसंध्यादयः प्रत्यात्मं प्रवर्तमाना अदृष्टस्याऽऽत्मनां च स्वस्वामिभावं नियंस्यन्तीति नेत्याह--

अभिसंध्यादिष्वपि चैवम् ॥ ५२ ॥

अभिसंध्यादीनामपि साधारणेनैवाऽऽत्ममनःसंयोगेन सर्वात्मसंनिधौ क्रियमाणानां नियमहेतुत्वानुपपत्तेरुक्तदोषानुषङ्ग एव ॥ ५२ ॥

प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥ (१७)

इति महर्षिव्यासप्रणीतब्रह्मसूत्राद्वितीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

अथोच्येत विभुत्वेऽप्यात्मनः शरीरमतिष्ठेन मनसा संयोगः शरीरावच्छिन्न एवाऽऽत्मप्रदेशे भविष्यत्यतः प्रदेशकृता व्यवस्थाऽभिसंध्यादीनामदृष्टस्य सुखदुःखयोश्च भविष्यतीति । तदपि नोपपद्यते । कस्मात् । अन्तर्भावात् । विभुत्वाविशेषाद्धि सर्व एवाऽऽत्मानः सर्वशरीरेष्वन्तर्भवन्ति । तत्र न वैशेषिकैः शरीरावच्छिन्नोऽप्यात्मनः प्रदेशः कल्पयितुं शक्यः । कल्प्यमानोऽप्ययं निष्प्रदेशस्याऽऽत्मनः प्रदेशः काल्पनिकत्वादेव न पारमार्थिकं कार्यं नियन्तुं शक्नोति । शरीरमपि सर्वात्मसंनिधावुत्पद्यमानमस्यैवाऽऽत्मनो नेतरेषामिति न नियन्तुं शक्यम् ।

अदृष्टहेत्वसाधारण्येन तस्यापि तथात्वं शङ्कते—स्यादेतादिति । सूत्रेण परिहरति—नेत्याहेति । तद्विभजते—अभिसंधीति । अदृष्टं दृष्टान्तयितुमपिशब्दः । उक्तो दोषोऽदृष्टस्य सुखादेश्चानियमः ॥ ५२ ॥

प्रकारान्तरेणासाधारण्यमाशङ्क्य दूषयति—प्रदेशादिति चेदिति । चोद्यं विवृणोति—अथेति । परिहारं विभजते—तदपीत्यादिना । सर्वेषामात्मनां सर्वदेहेष्वन्तर्भावे फलितमाह—तत्रेति । प्रदेशकल्पनामुपेत्यापि दूषयति—कल्प्येति । कार्यमभिसंध्यादि यस्याऽऽत्मनः शरीरं तस्यैव तत्रैं वृत्तिलाभो नान्येषामित्याशङ्क्याऽऽह—शरीरमिति । न च पूर्वादृष्टवशाद्देहनियमस्तस्यापि नियमश्च देहसंबन्धादित्यनादित्वाददोषोऽन्धपरम्परापातादागमानुरोधे चाऽऽत्मैक्यप्रसङ्गादिति भावः।

---

१ ङ. ञ. ब. ट. °यत इ° । २ क. ज. °त्मप्र° । ३ क. ज. °मस्याऽऽत्म° । ४ ठ. °त्र प्रवृ° । ५ ख. °दोषान्ध° ।

प्रदेशविशेषाभ्युपगमेऽपि च द्वयोरात्मनोः समानसुखदुःखभाजोः कदाचिदेकेनैव तावच्छरीरेणोपभोगसिद्धिः स्यात्। समानप्रदेशस्यापि द्वयोरात्मनोरदृष्टस्य संभवात्। तथाहि—देवदत्तो यस्मिन्प्रदेशे सुखदुःखमन्वभूत्तस्मात्प्रदेशादपक्रान्ते तच्छरीरे यज्ञदत्तशरीरे च तं[1] प्रदेशमनुप्राप्ते तस्यापीतरेण समानः सुखदुःखानुभवो दृश्यते स न स्याद्यदि देवदत्तयज्ञदत्तयोः समानप्रदेशमदृष्टं न स्यात्। स्वर्गाद्यनुपभोगप्रसङ्गश्च प्रदेशवादिनः स्यात्। ब्राह्मणादिशरीरप्रदेशेष्वदृष्टनिष्पत्तेः प्रदेशान्तरवर्तित्वाच्च स्वर्गाद्युपभोगस्य। सर्वगतत्वानुपपत्तिश्च बहूनामात्मनां दृष्टान्ताभावात्। वदतावत्त्वं के बहवः समानदेशाश्चेति। रूपादय इति चेन्न। तेषामपि धर्म्यंशेनाभेदाल्लक्षणभेदाच्च। न तु बहूनामात्मनां लक्षणभेदोऽस्ति। अन्त्यविशेषवशाद्भेदोपपत्तिरिति चेन्न। भेदकल्पनाया अन्त्यविशेषकल्पनायाश्चेतरेतराश्रयत्वात्। आकाशादीनामपि

किंच प्रदेशभेदं विनाऽपि सुखादिव्यवस्थाया दृष्टत्वान्न तस्य व्यवस्थापकतेत्याह—**प्रदेशेति**। द्वयोरात्मनोस्तुल्यदेशमदृष्टं कथमित्याशङ्क्याऽऽह—**तथाहीति**। किंच प्रदेशभेदेऽपि कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यान्न तस्य व्यवस्थापकतेत्याह—**स्वर्गादीति**। बहूनां सर्वगतत्वमुपेत्याव्यवस्थोक्ता संप्रति तदपि नास्तीत्याह—**सर्वेति**। बहूनां विभुत्वे दृष्टान्ताभावेऽपि तुल्यदेशत्वे तद्भावादात्मनां पारिशेष्याद्विभुत्वमित्याशङ्क्याऽऽह—**वदेति**। रूपादीनां बहूनामेक एव घटो देशो दृष्टो न च मिथोविरोधो निरवयवत्वात्तथाऽऽत्मनामपि निरवयवानामेकदेशतेति शङ्कते—**रूपेति**। तेषामपि तेजोजलादिभिः स्वधर्मिभिरभेदात्तदतिरिक्तघटाभावात्[3]कुतो दृष्टान्ततेत्याह—**नेति**। किंचाऽऽत्मनां बहुत्वमपि लक्षणभेदादन्त्यविशेषवशाद्वा। नाऽऽद्यः। अन्यत्र लक्षणभेदात्। भेदेऽपि प्रकृते तदभावादित्याह—**लक्षणेति**। नाऽऽत्मनां तद्भेदोऽस्ति[4] तेषां भिन्नलक्षणानुपलम्भात्ततश्चायुक्तं बहुत्वमित्यर्थः। द्वितीयं शङ्कित्वा दूषयति—**अन्त्येत्यादिना**। नित्यद्रव्याः स्वरूपसन्तो विशेषास्तद्वशादात्मसु व्यावृत्तिरित्ययुक्तं न हि तेषां निर्भिन्ने व्यावृत्तिधीहेतुत्वं स्वरूपादपि तत्प्रसक्तावेकाभावप्रसङ्गादतो भेदे सिद्धेऽन्त्यविशेषसिद्धिस्ततिसिद्धौ[5] च भेदसिद्धिरित्यन्योन्याश्रयान्नैकस्यापि सिद्धिरित्यर्थः। यत्तु बहूनामात्मनां विभुत्वासिद्धिर्दृष्टान्ताभावादिति तन्न। आकाशादीनामेव तथात्वादित्याशङ्क्याऽऽह—**आकाशा-**

---

१ ज्ञ. अ. तं दे°। २ क. °वाचिनः। ३ ख. ङ. °वान्न द°। ४ ख. ठ. ङ. °द्भेदाद्भेदोऽ°। ५ ठ. °द्रव्या रू°। ६ ख. ज्ञ. ठ. ङ. °द्धौ भे°।

(इन्द्रियाणामनादित्वनिराकरणपूर्वकं तेषामात्मसमुत्पन्नत्वम् , अधि० १)

विभुत्वं ब्रह्मवादिनोऽसिद्धं कार्यत्वाभ्युपगमात् । तस्मादात्मैक-त्वपक्ष एव सर्वदोषाभाव इति सिद्धम् ॥ ५३ ॥ (१७)

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ श्रीमच्छारीरकमीमांसाभाष्येऽविरोधाख्यद्वितीयाध्यायस्य तृतीयः पादः समाप्तः ॥ ३ ॥

अथाविरोधाख्यद्वितीयाध्यायस्य चतुर्थः पादः ।

लिङ्गशरीरश्रुतीनां विरोधपरिहारः ।

(इन्द्रियाणामनादित्वनिराकरणपूर्वकं तेषामात्मसमुत्पन्नत्वम् , अधि० १)

तथा प्राणाः ॥ १ ॥

वियदादिविषयश्रुतिविप्रतिषेधस्तृतीयेन पादेन परिहृतः ।

दीनामिति । परपक्षं निराकृत्य स्वपक्षमुपसंहरति—तस्मादिति । यो बहून्कैलयति कल्पयत्यसावेकमिति न्यायादेकस्तावदात्मा सर्वसंमतस्तस्मिंश्चाऽऽकाशकल्पे परोपाधिना व्यवहारसिद्धौ न तात्त्विकभेदकल्पनायां किंचिन्मानं फलं वाऽस्तीति भावः । तदेवं भूतभोक्तृविषयश्रुतिविरोधव्यासेधेन समन्वयः सिद्धो ब्रह्मणीति पादार्थमुपसंहरति—इति सिद्धमिति ॥ ५३ ॥ (१७)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञान-विरचितायां शारीरकव्याख्यायां न्यायनिर्णये द्वितीयाध्यायस्य तृतीयः पादः समाप्तः ॥ ३ ॥

भूतभोक्तृविषयश्रुतिविरोधं पूर्वपादे परिहृत्य भौतिकेन्द्रियादिश्रुतिविरोधं परिहर्तुं पादान्तरमवतारयन्पूर्वाधिकरणे कर्तृस्वरूपं विचार्य तदुपकरणानामिन्द्रियाणामुत्पत्तिं साधयति—तथेति । पूर्वोत्तरपादसंगतिमाह—वियदादीति । प्राणविषयः प्राणोत्पत्तिसंख्यार्तत्वादिविषय इत्यर्थः । सति विरोधे तत्परिहाराय प्रयतितव्यमिति मत्वा प्रथमं

---

१ क. °त्मैक्यप° । २ क. °न्कल्पयति संकल्प° । ख. °न्कल्पयति कलयत्य° । ३ क. कर्तुः स्व° । ४ क. ठ. ड. °तद्वादि° ।

चतुर्थेनेदानीं प्राणविषयः परिहियते । तत्र तावत् " तत्तेजोऽसृजत " [छान्दो० ६-२-३] इति " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " [तैत्ति० २-१-१] इति चैवमादिषूत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिर्नाऽऽम्नायते । क्वचिच्चानुत्पत्तिरेषामाम्नायते—" असद्वा इदमग्र आसीत् । तदाहुः किं तदसदासीदित्यृषयो वाव तेऽग्रेऽसदासीत् । तदाहुः के ते ऋषय इति । प्राणा वा ऋषयः " [शत० ६-१-१-१] इत्यत्र प्रागुत्पत्तेः प्राणानां सद्भावश्रवणात् । अन्यत्र तु प्राणानामप्युत्पत्तिः पठ्यते " यथाऽग्नेर्ज्वलतः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणाः " [बृह० २-१-२०] इति " एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च " [मुण्ड० २-१-३] इति " सप्त प्राणाः प्रभवन्ति तस्मात् " [मु० २-१-८] इति " स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नम् " [प्र० ६-४] इति चैवमादिष्वपदेशेषु । तत्र तत्र श्रुतिविप्रतिषेधादन्यतरनिर्धारणकारणानिरूपणाच्चाप्रतिपत्तिः प्राप्नोति । अथवा प्रागुत्पत्तेः सद्भावश्रवणाद्यौणी प्राणा-

---

प्राणोत्पत्तिविषयं विरोधमुदाहरति—तत्रेति । क्वचिदुत्पत्त्यश्रवणमाकाशस्येवोत्पत्त्यभावसाधकत्वात्किमित्युद्भावितमित्याशङ्क्यानुत्पत्तिवाक्यसहायत्वेनेत्याह—क्वचिच्चेति । शून्यवादमाशङ्क्याऽऽह—तदिति । प्रसिद्धानामृषीणां प्रसङ्गं प्रत्याह—तदित्यादिना । कथमत्र प्राणानामनुत्पत्त्याम्नानं तद्वाचकपदाभावात्तत्राऽऽह—प्रागिति । विप्रतिपत्त्यर्थमुत्पत्तिवाक्यं दर्शयति—अन्यत्रेति । विप्रतिपत्तेरेकादशेन्द्रियाणामुत्पत्तिरस्ति न वेति संशीतावनध्यवसायेन पूर्वपक्षयति—तत्रेति । न च वियदधिकरणन्यायेन निर्णयः प्राणानां प्रलये सत्त्वश्रुतेर्वियदमृतत्वादिश्रुतिवदवान्तरप्रलयाभिप्रायेण नयनप्रकाराज्ञानादिति भावः । श्रुतीनाममानत्वे शङ्कते गौणवाद्याह—अथवेति । प्रलये प्राणव्यवहारामावादुत्पत्तिकाले तद्भावात्तद्विषयतया जन्मश्रुतिरन्यथासिद्धा प्राणानां प्रागवस्थानश्रवणं तु तेषां जन्माभावे लिङ्गमनन्यथासिद्धतया बलीयस्त्वात्तज्जन्माभावसाधकमिति भावः । अत्र च प्राणोत्पत्त्यनुत्पत्तिश्रुतीनां मिथोविरोधनिषेधेन मूलकारणे ब्रह्मणि समन्वयसाधनात्पादादिसंगतयः । पूर्वपक्षे तासां विरोधादप्रामाण्यात्तत्र

---

१ क. 'नामुत्प' । २ क. ज. ञ. ट. 'थाऽग्नेः क्षु' । ३ क. ज. 'मेवास्मा' । ४ क. ज. 'दिषु प्र' । ५ क. ज. 'त्र श्रु' । ६ क. लये ।

नामुत्पत्तिश्रुतिरिति प्राप्नोति । अत इदमुत्तरं पठति—तथा प्राणा इति ।

कथं पुनरत्र तथेत्यक्षरानुलोम्यं प्रकृतोपमानाभावात् । सर्वगतात्मबहुत्ववादिदूषणमतीतानन्तरपादान्ते प्रकृतं तत्तावन्नोपमानं संभवति सादृश्याभावात् । सादृश्ये हि सत्युपमानं स्यात् । यथा सिंहस्तथा बलवर्मेति । अदृष्टसाम्यप्रतिपादनार्थमिति यद्युच्येत यथाऽदृष्टस्य सर्वात्मसंनिधावुत्पद्यमानस्यानियतत्वमेवं प्राणानामपि सर्वात्मनः प्रत्यनियतत्वमिति । तदपि देहानियमेनैवोक्तत्वात्पुनरुक्तं भवेत् । न च जीवेन प्राणा उपमीयेरन्सिद्धान्तविरोधात् । जीवस्य ह्यनुत्पत्तिराख्याता प्राणानां तूत्पत्तिराचिख्यासिता । तस्मात्तथेत्यसंबद्धमिव प्रतिभाति । न, उदाहरणोपात्तेनाप्युपमानेन संबन्धोपपत्तेः । अत्र प्राणोत्पत्तिवादिवाक्यजातमुदाहरणम् " एतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति" [बृ० २-१-२०] इत्येवंजातीयकम् । तत्र यथा लोकादयः परस्माद्ब्रह्मण उत्पद्यन्ते तथा प्राणा अपीत्यर्थः । तथा—

समन्वयासिद्धिः । सिद्धान्ते त्वविरोधेन तत्सिद्धिः । पूर्वपक्षमनुभाष्य सिद्धान्तयति—अत इति ।

सौत्रं तथाशब्दमाक्षिपति—कथमिति । आनुलोम्यमाञ्जस्यम् । कथं प्रकृतोपमानाभावस्तत्र किं परदूषणं प्राणानामुपमानमाहोस्विददृष्टमथवा जीवो नाऽऽद्य इत्याह—सर्वेति । परपक्षदूषणस्य प्राणानां च सादृश्याभावेऽपि किमित्युपमानोपमेयभावो न स्यात्तत्राऽऽह—सादृश्येति हीति । कल्पान्तरमाह—अदृष्टेति । तेन साम्यप्रतिपादनमेव प्रकटयति—यथेति । पुनरुक्त्या दूषयति—तदपीति । तृतीयं प्रत्याह—न चेति । सिद्धान्तविरोधं स्फोरयति—जीवस्येति । आक्षेपमुपसंहरति—तस्मादिति । सूत्राक्षराक्षेपं परिहरति—नेति । किं तदुदाहरणं तदाह—अत्रेति । कथं तदुपात्तेनोपमानं तदाह—तत्रेति । उक्तन्यायमातर्वणादिवाक्येष्वपि योजयति—तथेति ।

---

१ क. ज. ञ. ट. इदं प' । २ ज. 'त्तिर्व्याचि' । ३ झ. ट. 'त्तिराक्य' । ४ क. ज. 'म् " अस्मा' । ५ ड. ञ. 'नि च व्यु' । ६ ठ. ड. परं दू' । ७ क. ठ. ड. कल्पनान्त' । ८ ख. तत्राऽऽह ।

(इन्द्रियाणामनादित्वनिराकरणपूर्वकं तेषामात्मसमुत्पन्नत्वम्, अधि० १)

" एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी "
[मुण्ड० २-१-३] इत्येवमादिष्वपि खादिवत्प्राणानामुत्पत्तिरिति द्रष्टव्यम् ।

अथवा " पानव्यापच्च तद्वत् " [पू० मी० सू० ३-४-३२] इत्येवमादिषु व्यवहितोपमानसंबन्धस्याप्याश्रितत्वात् ।

संनिहितमेवोपमानमित्यङ्गीकृत्यैकवाक्योपात्तत्वेन सांनिध्यमुक्तमिदानीं नायं नियमो व्यवहितोपमानस्यापि मीमांसकैरिष्टत्वादित्याह—**अथवेति** । अस्ति तावदश्वदाननिमित्तेष्टिर्वरुणो वा एनं गृह्णाति योऽश्वं[1] प्रतिगृह्णाति यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदित्याम्नाता । सा किं लौकिकेऽश्वदाने वैदिकेऽश्वदाने वेति संदेहे " दोषात्त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यात् " [पू० मी० सू० ३-४-२८] इति पूर्वपक्षसूत्रम् । अस्यार्थः—अश्वदाने लौकिके दोषनिर्घातार्था प्रकृतेष्टिरेष्टव्या, तत्रैव न केसरिणो ददातीति निषेधातिक्रमकृतस्य दोषस्य संभवात् । वैदिकेऽश्वदाने सामान्यनिषेधानवकाशान्न तत्कृतो दोषः स्यात् । पौण्डरीकेऽश्वसहस्रं दक्षिणेत्यादिविशेषशास्त्राद्वैदिकाश्वदानस्य निर्दोषत्वसिद्धेरिति । राद्धान्तसूत्रम्—" अर्थवादोऽनुपपातात्तत्समाद्यज्ञे प्रतीयते[3] " [पू० मी० सू० ३-४-२९] इति । तस्यार्थः—लौकिकेऽश्वदाने[4] सति जलोदररूपवरुणग्रहदोषो नोपपतति मानाभावात् । न चेदमेव वाक्यमत्र मानमश्वदाने जलोदराख्यो दोषस्तन्निर्घातार्था चेष्टिरित्यर्थभेदे वाक्यभेदात् । न च वरुणशब्दो वृणोतीति निषेधातिक्रमकृतदोषानुवादीति कुतो वाक्यभेदस्तथा सति प्रसिद्धित्यागप्रसङ्गात्तस्त्यागे च वैदिकेऽपि दाने तुरगत्यागजं क्लेशमात्रमुक्तव्युत्पत्त्या वरुणशब्दवाच्यं स्यात्तस्माद्यावद्वरुणगृहीतस्य वरुणोन्मोचने श्रेयस्तावदस्यामिष्टाविति[2]त्यर्थवादोऽयम् । तथा च यज्ञसंबन्धिन्यश्वदाने प्रतीयते वारुणीष्टिरिति । स्थिते चैवं प्रतिग्रहीतुर्दातुर्वा सेष्टिरिति संदेहे पूर्वपक्षितम् " अचोदितं च कर्म भेदात् " [पू० मी० सू० ३-४-३०] इति । तस्यार्थः—दातुरचोदितामिष्टिकर्म यः प्रतिगृह्णाति स निर्वपेदिति प्रतिग्रहीत्रा तस्य भेदाद्विशेषणादिति । " सा लिङ्गादार्त्विजे स्यात् " [पू० मी० सू० ३-४-३१] इति सिद्धान्तसूत्रम् । ऋत्विजामयमित्यार्त्विजो यजमानस्तस्मिन्कर्तरि सा वारुणीष्टिः स्यात्प्रजापतिर्वरुणायाश्वमनयदित्युपक्रमे दातुः संकीर्तनाल्लिङ्गात् । न च दातरि प्रतिगृह्णातीति विरुद्धं संप्रदानप्रेरणादिना तस्यापि प्रतिग्रहकर्तृत्वादित्यर्थः । एवं दातुरिष्टिरिति व्यवस्थाप्योक्तम् " पानव्यापच्च तद्वत् " [पू० मी०

---

१ ठ. ड. 'श्वं गृ' । २ ख. ठ. ड. 'ष्ठाद्वैदि' । ३ क. ङ. 'तीयेतेति । ४ ठ. 'ने ज' ।

(इन्द्रियाणामनादित्वनिराकरणपूर्वकं तेषामात्मसमुत्पन्नत्वम्, अधि० १)

यथाऽतीतानन्तरपादाद्युक्ता वियदादयः परस्य ब्रह्मणो विकाराः समधिगतास्तथा प्राणा अपि परस्य ब्रह्मणो विकारा इति योजयितव्यम् । कः पुनः प्राणानां विकारत्वे हेतुः, श्रुतत्वमेव । ननु केषुचित्प्रदेशेषु न प्राणानामुत्पत्तिः श्रूयत इत्युक्तं, तदयुक्तं, प्रदेशान्तरेषु श्रवणात् । न हि क्वचिदश्रवणमन्यत्र श्रुतं निवारयितुमुत्सहते । तस्माच्छ्रुतत्वाविशेषादाकाशादिवत्प्राणा अप्युत्पद्यन्त इति सूक्तम् ॥ १ ॥

गौण्यसंभवात् ॥ २ ॥

सू० ३-४-३२] इति । सौमेन्द्रं चरुं निर्वपेच्छ्यामाकं सोमवामीत्यत्र लौकिकसोमपानवमने वा वैदिकसोमपानवमने वा सौमेन्द्रश्चरुरिति संदेहे सति प्रतिग्रहेष्ट्याद्यधिकरणपूर्वपक्षवल्लौकिके धातुसाम्यार्थं सोमस्य पाने यदि व्यापद्वमनं भवति तदा तस्मिँल्लौकिके वमने यागो विधीयते । इन्द्रियेण वीर्येण व्यृध्यते यः सोमं वमतीति दोषाद्वमननिमित्तेन्द्रियशोषस्य च दर्शनान्न वरुणग्रहणवदप्राप्तिः । वैदिके तु सोमपाने शेषप्रतिपत्तेर्जातत्वाद्वमनेऽपि न दोष इति पूर्वपक्षयित्वा राद्धान्तितम्—" दोषात्तु वैदिके स्यादर्थाद्धि लौकिके न दोषः स्यात् " [पू० मी० सू० ३-४ ३२] इति । वैदिके हि सोमपानवमने सौमेन्द्रश्चरुः स्यात् । मा मे वाङ्नाभिमातिगा इति मन्त्रलिङ्गाद्वमने कर्मवैगुण्याद्दोषावगमात् । लौकिके तु सोमपानवमने न कश्चिद्दोषः स्यात्तस्य धातुसाम्यार्थत्वात्तज्जन्येन्द्रियशोषस्य धातुसाम्यकरत्वेन गुणत्वात् । श्रूयते चेन्द्रियेणेत्यादिना वैदिकस्य पानस्य व्यापदि दोषः स च वमनेन सोमसंस्कारे विनष्टे सत्युपपद्यते तस्माद्वैदिके वमने याग इत्यर्थः । " तत्सर्वत्राविशेषात् " [पू० मी० सू० ३-४-३४] " स्वामिनो वा तदर्थत्वात् " [पू० मी० सू० ३-४-३५] इत्येवंविधानि पूर्वोत्तरपक्षसूत्राण्यादिशब्देन गृह्यन्ते । तेषु व्यवहितोपमानसंबन्धस्याभियुक्तैरिष्टत्वादत्रापि व्यवहितोपमानसंबन्धः संभवतीति भाष्यार्थः । व्यवहितोपमानसंबन्धितया तथाशब्दार्थमुक्त्वा सूत्रं योजयति—**यथेति** । प्रतिज्ञामात्रस्य सूत्रे दृष्टेरिष्टं हेतुं प्रश्नपूर्वकमाह—**कः पुनरिति** । पूर्ववादी पूर्वोक्तं स्मारयति—**नन्विति** । अश्रवणं श्रवणानुसारेण नेयमिति गुणोपसंहारन्यायेन दूषयति—**तदिति** । कुतस्तेनैव न्यायेन श्रवणमश्रवणानुरोधेन[3] न नीयते वियदधिकरणविरोधादित्याह—**न हीति** । श्रुत्यनुरोधेनाश्रुतेर्नेतव्यत्वे फलितमाह—**तस्मादिति** ॥ १ ॥

विरोधवादिनं प्रतिबोध्य गौणवादिनं प्रत्याह—**गौणीति** । सूत्रव्यावर्त्यमनूद्य

---

१ क. ज. ट. 'दादावुक्ता । २ क. ज. निवर्तार्थि' । ३ ख. झ. ट. 'न नी' ।

(इन्द्रियाणामनादित्वनिराकरणपूर्वकं तेषामात्मसमुत्पन्नत्वम्, अधि० १)

यत्पुनरुक्तं प्रागुत्पत्तेः सद्भावश्रवणाद्गौणी प्राणानामुत्पत्तिश्रुतिरिति तत्प्रत्याह—"गौण्यसंभवात्" इति। गौण्या असंभवो गौण्यसंभवः। न हि प्राणानामुत्पत्तिश्रुतिर्गौणी संभवति। प्रतिज्ञाहानिप्रसङ्गात्। "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" [मुण्ड० १-१-३] इति ह्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्साधनायेदमाम्नायते—"एतस्माज्जायते प्राणः" [मुण्ड० २-१-३] इत्यादि। सा च प्रतिज्ञा प्राणादेः समस्तस्य जगतो ब्रह्मविकारत्वे सति प्रकृतिव्यतिरेकेण विकाराभावात्सिध्यति। गौण्यां तु प्राणानामुत्पत्तिश्रुतौ प्रतिज्ञेयं हीयेत। तथा च प्रतिज्ञातार्थमुपसंहरति—"पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्" [मुण्ड० २-१-१०] इति "ब्रह्मैवेदं विश्वमिदं वरिष्ठम्" [मुण्ड० २-२-११] इति च। तथा "आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्" [बृह० २-४-५] इत्येवंजातीयकासु श्रुतिष्वेषैव प्रतिज्ञा योजयितव्या। कथं पुनः प्रागुत्पत्तेः प्राणानां सद्भावश्रवणम्। नैतन्मूलप्रकृतिविषयम्। "अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः" [मुण्ड०२-१-२] इति। मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वावधारणात्। अवान्तरप्रकृतिविषयं त्वेतत्स्वविकारापेक्षं प्रागुत्पत्तेः प्राणानां सद्भा-

---

तदुत्तरत्वेनावतार्य विभजते—**यदित्यादिना**। काऽसौ प्रतिज्ञा कथं वा प्राणानामुत्पत्तेर्गौणत्वे तद्धानिस्तत्राऽऽह—**कस्मिन्निति**। कथमेतस्मादित्यादिना प्रतिज्ञा समर्थ्यते तत्राऽऽह—**सा चेति**। विपक्षे दोषमाह—**गौण्यां त्विति**। प्रतिज्ञाऽपि गौणीति न तदर्थं प्राणोत्पत्तिर्मुख्या वाच्येत्याशङ्क्योपक्रमोपसंहारालोचनया विवक्षिताद्वितीयत्वानुरोधेन प्रतिज्ञाया गौणत्वायोगान्मुख्यैव प्राणोत्पत्तिरित्याह—**तथा चेति**। प्रतिज्ञाया मुख्यत्वसिद्धये भूयःसु प्रदेशेषु दृष्टत्वं हेत्वन्तरमाह—**तथेति**। प्राणानामुत्पत्तिश्चेत्प्रागवस्थायां सत्त्वश्रुतिर्विरुध्येतेति शङ्कते—**कथमिति**। नैतद्वाक्यं ब्रह्मणो मूलकारणस्य प्राणसद्भावार्थं तस्य श्रुत्या सर्वविशेषराहित्यसिद्धेरित्याह—**नैतदिति**। किंविषयं तर्हि वाक्यं तत्राऽऽह—**अवान्तरेति**। हिरण्यगर्भोऽवान्तरप्रकृतिस्तत्प्राणास्तित्वविषयमेतद्वाक्यमिति योजना। हिरण्यगर्भस्याऽपि विकारत्वात्कथं विकारासत्त्वोक्तिपूर्वकं प्राणसत्त्वावधारणं तत्राऽऽह—**स्वविकारेति**। अवान्तरलये हिरण्यगर्भका-

---

१ क. ज. प्राणस°। २ ठ. ड. °ज्ञामु°। ३ ङ. ढ. प्रागस°।

(इन्द्रियाणामनादित्वनिराकरणपूर्वकं तेषामात्मसमुत्पन्नत्वम्, अधि० १)

वावधारणमिति द्रष्टव्यम् । व्याकृतविषयाणामपि भूयसीनामवस्थानां श्रुतिस्मृत्योः प्रकृतिविकारभावप्रसिद्धेः । वियदधिकरणे [ब्र० सू० २-३-१-७] हि " गौण्यसंभवात् " इति [सू० २-३-३] पूर्वपक्षसूत्रत्वाद्गौणी जन्मश्रुतिरसंभवादिति व्याख्यातम् । प्रतिज्ञाहान्या च तत्र सिद्धान्तोऽभिहितः । इह तु सिद्धान्तसूत्रत्वाद्गौण्या जन्मश्रुतेरसंभवादिति व्याख्यातम् । तदनुरोधेन त्विहापि गौणी जन्मश्रुतिरसंभवादिति व्याचक्षाणैः प्रतिज्ञाहानिरुपेक्षिता स्यात् ॥ २ ॥

तत्प्राक्श्रुतेश्च ॥ ३ ॥

इतश्चाऽऽकाशादीनामिव प्राणानामपि मुख्यैव जन्मश्रुतिः । "यज्जायते" इत्येकं जन्मवाचिपदं प्राणेषु प्राक्श्रुतं सदुत्तरेष्वाकाशादिष्वनुवर्तते । "एतस्माज्जायते प्राणः" [मु० २-१-३]

र्यसमुदायासत्त्वापेक्षया तदीयप्राणसत्त्वावधारणमित्यर्थः । एतस्माज्जायते प्राण इत्यादाविन्द्रियाणां श्रुत्यैव जन्मोक्तम् । तदाहुरित्यादौ तु प्रागुत्पत्तेस्तेषामवस्थानं जन्माभावे लिङ्गं तत्र लिङ्गस्य श्रुत्या बाधायामन्यतरस्यात्यन्तबाधकल्पनाद्वरं प्रबलानुरोधेन दुर्बलस्य विषयव्यवस्थाकल्पनमिति न्यायेन वियदादिभिः सहेन्द्रियाणामुत्पत्त्याम्नानान्महाप्रलये तदुत्पत्तिरवान्तरप्रलये त्वनुत्पत्तिरिति श्रुतिलिङ्गयोर्विषयव्यवस्थेति भावः । ब्रह्मण एव सर्वप्रकृतित्वान्नावान्तरप्रकृतौ मानमित्याशङ्क्याऽऽह—व्याकृतेति । " हिरण्यगर्भः समवर्तताग्रे" "आदिकर्ता स भूतानाम्" इत्यादिश्रुतिस्मृत्योः कार्यावच्छिन्नानामपि मूलकारणावस्थाविशेषाणां हिरण्यगर्भादीनां प्रकृतिविकारभावेन प्रसिद्धेरवान्तरप्रकृतिरस्तीत्यर्थः । तदेवं प्राणसत्त्वश्रुतेरवान्तरप्रलयविषयत्वान्महाप्रलयानन्तरं प्राणोत्पत्तिश्रुतेर्न गौणतेति स्वाभिप्रायेण सूत्रं व्याख्याय वियदधिकरणवदिहापि किं न व्याख्यातमित्याशङ्क्य विशेषमाह—वियदिति । एकस्य सूत्रस्यैकार्थत्वयोगे किमर्थद्वयोक्त्येत्याशङ्क्याऽऽह—तादिति ॥ २ ॥

प्राणानां मुख्यं जन्मेत्यत्र हेत्वन्तरमाह—तत्प्रागिति । तस्य जायत इति जन्मवाचिपदस्याऽऽकाशादिषु मुख्यस्य पाठापेक्षया प्राचीनेषु प्राणेषु श्रुतत्वाच्च प्राणानां मुख्यं जन्मेति योजना । चकारार्थमाह—इतश्चेति । तदेव स्पष्टयन्नवशिष्टं व्याचष्टे—यदिति । तथाऽपि कथं प्राणेषु मुख्या जन्मश्रुतिस्तत्राऽऽह—आकाशादिष्विति । तत्सामान्यात्तैराकाशादिभिः सह जायमानत्वेन तुल्यत्वादित्यर्थः । एकस्यापि शब्दस्य

---

१ क. ज. °रेष्वप्याका° । २ क. ठ. ड. प्रलयानु° ।

इत्यत्राऽऽकाशादिषु मुख्यं जन्मेति प्रतिष्ठापितं तत्सामान्यात्प्राणेष्वपि मुख्यमेव जन्म भवितुमर्हति । न ह्येकस्मिन्प्रकरण एकस्मिंश्च वाक्य एकः शब्दः सकृदुच्चरितो बहुभिः संबध्यमानः क्वचिन्मुख्यः क्वचिद्गौण इत्यध्यवसातुं शक्यम् । वैरूप्यप्रसङ्गात् । तथा " स प्राणमसृजत प्राणाच्छ्रद्धाम् " [प्रश्न० ६-४] इत्यत्रापि प्राणेषु श्रुतः सृजतिः परेष्वप्युत्पत्तिमत्सु श्रद्धादिष्वनुषज्यते । यत्रापि पश्चाच्छ्रुत उत्पत्तिवचनः शब्दः पूर्वैः संबध्यते तत्राप्येष एव न्यायः । यथा " सर्वाणि भूतानि व्युच्चरन्ति" [बृह० २-१-२०] इत्ययमन्ते पठितो व्युच्चरन्तिशब्दः पूर्वैरपि प्राणादिभिः संबध्यते ॥ ३ ॥

तत्पूर्वकत्वाद्वाचः ॥ ४ ॥ (१)

यद्यपि " तत्तेजोऽसृजत " इत्येतस्मिन्प्रकरणे प्राणानामुत्पत्तिर्न पठ्यते तेजोबन्नानामेव त्रयाणां भूतानामुत्पत्तिश्रवणात् । तथाऽपि ब्रह्मप्रकृतिकतेजोबन्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसां

विषयभेदादन्यादिशब्दवद्गौणत्वमुख्यत्वे स्यातामित्याशङ्क्याऽऽह—न हीति । एकस्मिन्नपि प्रकरणेऽन्नं ब्रह्माऽऽनन्दो ब्रह्मेत्यादौ ब्रह्मशब्दस्यानेकार्थत्ववदिहापि स्यादित्याशङ्क्याऽऽह—एकस्मिन्निति । तथाऽपि तपसा ब्रह्मेत्यादिवदनेकार्थत्वमाशङ्क्योक्तम्—एक इति । ब्रह्मशब्दस्यापि तुल्यमेकत्वमित्याशङ्क्याऽऽह—सकृदिति । एतस्मादित्यादावुक्तन्यायं वाक्यान्तरेऽप्यतिदिशति—तथेति । तस्य जन्मवाचिनः शब्दस्य पूर्वश्रवणात्तस्य चोत्तरेषु मुख्यत्वात्तत्सामान्यात्प्राणेष्वपि मुख्यतेत्युक्तम् । इदानीं मुख्यजन्मवाचिनः शब्दात्प्राक्प्राणादीनां श्रुतेस्तद्योगिनामितरेषामिव तेषामपि तत्साहचर्यान्मुख्यं जन्मेति व्याख्यान्तरमाह—यत्रेति । न्यायः सह पठितेषु जन्मनो मुख्यत्वाविशेषस्तत्रोदाहरणं यथेति ॥ ३ ॥

छान्दोग्ये प्राणानामुत्पत्त्यश्रवणमङ्गीकृत्यान्यत्रोत्पत्तिश्रवणादुत्पत्तिः साधिता । संप्रति तत्रापि तदुत्पत्त्यश्रवणमसिद्धमित्याह—तत्पूर्वकत्वादिति । तच्छब्देन तेजोबन्नान्युच्यन्ते । प्राणेन मनसा च सहिताया वाचस्तेजोबन्नकार्यत्वादस्ति तदुत्पत्तिश्रुतिरित्यर्थः । तेजःप्रभृतीनां सृष्टिप्रकरणे प्राणानामुत्पत्तिर्न श्रुता तेषामेव सृष्टेः शिष्टत्वादित्याशङ्कामनुवदति—यद्यपीति । सूत्रव्याख्यानेनोत्तरमाह—तथाऽपीति ।

---

१ ज. °त्यत्र चाऽऽका° । २ झ. ट. °दुच्चारि° । ३ झ. ट. शक्यः । ४ ठ. ड. ब्रह्मे° । ५ ठ. ड. °रेष्वति° । ६ ठ. ड. पूर्वं श्र° ।

(इन्द्रियाणामेकादशसंख्याकत्वस्य वेदान्तसंमतत्वम्, अधि० २)

तत्सामान्याच्च सर्वेषामेव प्राणानां ब्रह्मप्रभवत्वं सिद्धं भवति। तथाह्यस्मिन्नेव प्रकरणे तेजोबन्नपूर्वकत्वं वाक्प्राणमनसामाम्नायते "अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्" [छा० ६-५-४] इति। तत्र यदि तावन्मुख्यमेवैषामन्नादिमयत्वं ततो वर्तत एव ब्रह्मप्रभवत्वम्। अथ भाक्तं तथाऽपि ब्रह्मकर्तृकायां नामरूपव्याक्रियायां श्रवणात् "येनाश्रुतं श्रुतं भवति" [छा ०६-१-३] इति चोपक्रमात् "ऐतदात्म्यमिदं सर्वम्" [६-८-७] इति चोपसंहाराच्छ्रुत्यन्तरप्रसिद्धेश्च ब्रह्मकार्यत्वप्रपञ्चनार्थमेव मनआदीनामन्नादिमयत्ववचनमिति गम्यते । तस्मादपि प्राणानां ब्रह्मविकारत्वसिद्धिः ॥ ४ ॥ (१)

(इन्द्रियाणामेकादशसंख्याकत्वस्य वेदान्तसंमतत्वम्, अधि० २)

सप्त गतेर्विशेषितत्वाच्च ॥ ५ ॥

उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः संख्याविषय इदानीं परिहियते । तत्र मुख्यं प्राणमुपरिष्टाद्वक्ष्यति । संप्रति तु कतीतरे प्राणा इति संप्रधारयति । श्रुतिविप्रतिपत्तेश्चात्र विशयः । क्वचित्सप्त प्राणाः संकीर्त्यन्ते "सप्त प्राणाः प्रभवन्ति

वागादीनां त्रयाणां प्रणाड्या ब्रह्मजन्मत्वेऽपि कुतो हस्तादीनां तथेत्याशङ्क्याऽऽह—तादिति। तैर्वागादिभिः सामान्यं हस्तादीनां प्राणत्वम्। उक्तमेव प्रपञ्चयति—तथाहीति । कथमेषां ब्रह्मजत्वं किमेषामन्नादिमयत्वं मुख्यं गौणं वा प्रथमं प्रत्याह—तत्रेति । तेजआदीनां तज्जत्वादिति शेषः । द्वितीयमनूद्य तत्रापि ब्रह्मजत्वमत्याज्यमित्याह—अथेत्यादिना । स प्राणमसृजतेत्यादि श्रुत्यन्तरम् । प्राणोत्पत्तिश्रुतेर्मुख्यार्थत्वेऽपि विरोधाभावादश्रुतेश्चासिद्धत्वान्मूलकारणे ब्रह्मणि समन्वयसिद्धिरित्युपसंहरति—तस्मादिति ॥ ४ ॥ (१)

करणानामुत्पत्तिनिरूपणेन तद्विलक्षणं त्वंपदार्थं निरूप्य तेषामेव संख्यां निर्णेतुं पूर्वपक्षयति—सप्तेति । पूर्वोत्तरसंगतिमाह—उत्पत्तीति । सर्वप्राणसंख्याविषयत्वं व्यावर्त्य वागादिसंख्याविषयत्वमस्याधिकरणस्य दर्शयति—तत्रेति । मुख्यादितरान्प्राणान्विषयत्वेनोक्त्वा सहेतुं संशयमाह—श्रुतीति । श्रुतिविप्रतिपत्तिमेवोपन्यस्यति—क्वचिदित्यादिना । चक्षुर्घ्राणं रसनं श्रोत्रं वाङ्मनस्त्वगिति सप्त प्राणा ग्रहत्वेन बन्ध-

---

१ ट. °ति क° । २ क. ख. ठ. ड. °जत्वेऽ° । ३ ख. °ति । तथाऽपि क° । ४ क. °ति । (१) कार° । ५ क. ख. ठ. ड °क्षणत्वं° ।

तस्मात् " [मुण्ड० २-१-८] इति । क्वचिदष्टौ प्राणा ग्रहत्वेन गुणेन संकीर्त्यन्ते " अष्टौ ग्रहा अष्टावतिग्रहाः " [बृ० ३-२-१] इति । क्वचिन्नव " सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ " [तै० सं० ५-३-२-५] इति । क्वचिद्दश " नव वै पुरुषे प्राणा नाभिर्दशमी" तै० सं० [५-३-२-३] इति । क्वचिदेकादश "दशेमे पुरुषे प्राणा आत्मैकादशः " [बृ० ३-९-४] इति । क्वचिद्द्वादश " सर्वेषां स्पर्शानां त्वगेकायनम् " [बृ० २-४-११] इत्यत्र । क्वचित्त्रयोदश " चक्षुश्च द्रष्टव्यं च " [प्र० ४-८] इत्यत्र । एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः । किं तावत्प्राप्तं सप्तैव प्राणा इति । कुतः । गतेः । यतस्तावन्तोऽवगम्यन्ते " सप्त प्राणाः प्रभवन्ति तस्मात् " [मुण्ड०२-१-८] इत्येवंविधासु श्रुतिषु । विशेषिताश्चैते " सप्त वै शीर्षण्याः प्राणाः " [तै० सं० ५-३-२-५] इत्यत्र । ननु "प्राणा गुहाशया निहिताः सप्त सप्त " [मुण्ड० २-१-८] इति वीप्सा

त्वेनेति यावत् । त एव सहस्राधिकाः सन्तोऽष्टौ । तेषां च ग्रहत्वं बन्धनहेतुत्वादेतेषां विषया रूपादयोऽतिग्रहास्ते हि रागमुत्पाद्येन्द्रियाकर्षकत्वाद्ग्रहानतिशेरते । द्वे श्रोत्रे द्वे चक्षुषी द्वे घ्राणे वागिति सप्त शीर्षण्य भवाः शीर्षण्याः प्राणाः । द्वाववाञ्चौ पायूपस्थौ बुद्धिमनसी चेति नव । पुरुषे तदाकारे देहे शिरःपाण्यादिमत्युक्ता नव प्राणा नाभिश्च दशमी दशानां पूरणीति श्रुत्यर्थः । पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चाऽऽप्नोतीत्यात्मेत्येकादश प्राणाः । त एव सहृदया द्वादश । त एव साहंकारास्त्रयोदश । श्रुतिविप्रतिपत्तिमुपसंहरति—**एवमिति** । प्रश्नपूर्वकं पूर्वपक्षसूत्रं योजयति—**किमिति** । अत्र च प्राणसंख्याश्रुतिविवादव्युदासेन तत्कारणे ब्रह्मणि समन्वयव्यवस्थापनात्पादादिसंगतयः । पूर्वपक्षे सप्तप्राणकारणे ब्रह्मणि समन्वयेऽप्येकादशप्राणकारणे तत्र तदासिद्धिः । सिद्धान्ते तदनुसारित्वादितरश्रुतीनामेकादशप्राणकारणे ब्रह्मणि तत्सिद्धिः । गतेरिति हेतुं प्रश्नद्वारा व्याचष्टे—**कुत इति** । न केवलं श्रुतितोऽधिगतेः सप्तैव प्राणाः किंतु विशेषणादपीत्यवशिष्टं व्याचष्टे—**विशेषिताश्चेति** । दक्षिणेनाक्ष्णा पश्यतीत्युक्ते वामेन न पश्यतीतिवत्प्राणाः शीर्षण्याः सप्तेत्युक्ते हस्तादीनामशीर्षण्यानामप्राणत्वं भातीत्यर्थः । प्राणानां सप्तत्वं वीप्साविरुद्धमिति शङ्कते—**नन्विति** । गुहायां हृदये शेरत इति गुहाशयाः स्वस्थानेषु निहिता निक्षिप्ता इति यावत् । वीप्सा पुन-

---

१ क. °चिच्च दश । २ झ शीर्ष्ण्याः ।

(इन्द्रियाणामेकादशसंख्याकत्वस्य वेदान्तसंमतत्वम्, अधि० २)

श्रूयते सप्तभ्योऽतिरिक्तान्प्राणान्नामयतीति । नैष दोषः । पुरुषभेदाभिप्रायेयं वीप्सा प्रतिपुरुषं सप्त सप्त प्राणा इति न तत्त्वभेदाभिप्राया सप्त सप्तान्येऽन्ये प्राणा इति । नन्वष्टत्वादिकाऽपि संख्या प्राणेषूद्राहृता कथं सप्तैव स्युः । सत्यमुद्राहृता । विरोधात्त्वन्यतमा संख्याऽध्यवसातव्या । तत्र स्तोककरणानुरोधात्सप्तसंख्याध्यवसानम् । वृत्तिभेदापेक्षं च संख्यान्तरश्रवणमिति मन्यते ॥ ५ ॥

अत्रोच्यते—

हस्तादयस्तु स्थितेऽतो नैवम् ॥ ६ ॥ २ ॥

"हस्तादयस्तु" अपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते—"हस्तो वै ग्रहः स कर्मणाऽतिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति" [बृ० ३-२-८] इत्येवमाद्यासु श्रुतिषु । "स्थिते" च सप्तत्वातिरेके सप्तत्वमन्तर्भावाच्छक्यते संभावयितुम् । हीनाधिकसंख्याविप्रतिपत्तौ ह्यधिका संख्या संग्राह्या भवति तस्यां

र्वचनमन्यथाऽपि स्यादिति पूर्ववाद्याह—नेति । पुरुषभेदकृतवीप्साप्रवृत्तिं प्रकटयति—प्रतीति । व्यावर्त्यमंशमाह—नेत्यादिना । संख्यान्तरश्रुतिविरोधं शङ्कते—नन्विति । संख्यान्तरश्रुतिमङ्गी करोति—सत्यमिति । तर्हि संख्यान्तरमपि ग्राह्यं नेत्याह—विरोधात्त्विति । सप्तत्वावच्छिन्नानामेवाष्टत्वाद्यवच्छेदायोगादन्यतमत्यागावश्यंभावे कतमा संख्याऽऽदेयेति विवक्षायां लाघवान्निश्चितं सप्तत्वमित्यर्थः । न्यूनाधिकसंख्ययोरधिका ग्राह्या तस्यां न्यूनान्तर्भावादित्याशङ्क्यैकादशसंख्यां गृहीत्वा वृत्तिभेदेन नवद्वादशत्रयोदशसंख्यावदिहापि प्राथम्याल्लाघवाच्च सप्तत्वस्यैव युक्तत्वाद्वृत्त्यपेक्षया संख्यान्तरमित्याह—वृत्तीति । वक्ष्यमाणयुक्त्या मन्यतेरुक्तिः ॥ ५ ॥

सिद्धान्तयति—अत्रेति । तत्प्रतिज्ञां विभजते—हस्तादयस्त्विति । गृह्णाति पुरुषं बध्नातीति ग्रहस्तत्रेन्द्रियाणामर्थद्वारा पुरुषबन्धने हेतुत्वमित्यतिग्रहत्वमर्थानां ततोऽतिग्रहेण कर्मणा हस्तनिर्वर्त्यादानेन हस्तो गृहीतः संबद्धः । तदेव स्पष्टयति—हस्ताभ्यामिति । सप्तत्वादतिरेकश्रुतेर्न सप्तत्वनियतिरित्यर्थः । सप्तत्वमपि श्रुतमेवेत्याशङ्क्य सूत्रावयवं व्याचष्टे—स्थिते चेति । अन्तर्भावेन सप्तत्वं साधयति—हीनेति ।

---

१ क. ज. °यति । २ ङ. ञ. ट. ल्वनोपरो° । ३ ङ. ञ. गम्यते । ४ ङ. ज. ञ. °तिग्रहे° । ५ ङ. °माणादियु° । ६ ठ. °निर्वृत्यादा° ।

हीनाऽन्तर्भवति न तु हीनायामधिका । " अतश्च " " नैवं " मन्तव्यं स्तोककल्पनानुरोधात्सप्तैव प्राणाः स्युरिति । उत्तरसंख्यानुरोधात्त्वेकादशैव ते प्राणाः स्युः । तथा चोदाहृता श्रुतिः " दशेमे पुरुषे प्राणा आत्मैकादशः " [बृ० ३-९-४] इति। आत्मशब्देन चात्रान्तःकरणं परिगृह्यते करणाधिकारात् । नन्वेकादशत्वादप्यधिके द्वादशत्रयोदशत्वे उदाहृते । सत्यमुदाहृते नत्वेकादशभ्यः कार्यजातेभ्योऽधिकं कार्यजातमस्ति यदर्थमधिकं करणं कल्प्येत । शब्दस्पर्शरूपरसगन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्च बुद्धीन्द्रियाणि । वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्मभेदास्तदर्थानि च पञ्च कर्मेन्द्रियाणि । सर्वार्थविषयं त्रैकाल्यवृत्ति मनस्त्वेकमनेकवृत्तिकम्। तदेव वृत्तिभेदात्कचिद्भिन्नवद्व्यपदिश्यते मनो बुद्धिरहंकारश्चित्तं चेति । तथा च श्रुतिः कामाद्या नानाविधा वृत्तीरनुक्रम्याऽऽह– " एतत्सर्वं मन एव " [बृ० १-५-३] इति । अपि च सप्तैव शीर्षण्यान्प्राणानभिमन्यमानस्य चत्वार एव प्राणा अभिमताः

अतो नेत्यादि योजयति—अतश्चेति । प्राणास्तर्हि कतीत्यपेक्षायामाह—उत्तरेति । तर्हि गौरवमित्याशङ्क्य प्राणानामेकादशत्वं न कल्प्यते येन लाघवमन्वेष्यमित्याह—तथेति । आत्मशब्दस्य प्रतीचि रूढेर्न प्राणभेदविषयतेत्याशङ्क्याऽऽह—आत्मेति । एकादशत्वस्य श्रुतत्वाद्ग्रहणे द्वादशत्वत्रयोदशत्वयोरपि तथा ग्रहः स्यादिति शङ्कते—नन्विति । श्रुतीनां मिथोविरोधादर्थव्यवस्थासिद्धौ मानान्तरवशेन व्यवस्था वाच्या तथा च कार्यलिङ्गकानुमानानुगृहीतैकादशप्राणश्रुतिरेवाऽऽदरणीयेत्याह—सत्यमिति। कार्यलिङ्गकमनुमानं विशदयति—शब्देति । बाह्येन्द्रियाणामित्थमनुमानेऽपि कथं मनसोऽनुमानं तत्राऽऽह—सर्वेति । इन्द्रियाणां वर्तमानतत्तदेकार्थनियतत्वादतीतादिसर्वार्थज्ञानाच्च तदर्थमिन्द्रियान्तरं कल्प्यमित्यर्थः । संकल्पादिदृष्टेस्तदर्थं करणान्तरमपि कल्प्यमित्याशङ्क्याऽऽह—अनेकेति । मनसश्चैकत्वं तर्हि कथं भेदोक्तिस्तत्राऽऽह—तदेवेति । एकस्यैव वृत्तिभेदात्किमित्यनेकधात्वं धर्मिभेद एव कुतो न स्यादित्याशङ्क्य धर्म्यभेदश्रुतिविरोधादित्याह–तथा चेति । विशेषितत्वादित्युक्तं प्रत्याह–अपि चेति ।

---

१ क. ज. हीतराऽना° । २ झ. ट. °णाः स्युरिति । तं° । ३ क °दभ्यधि° । ४ क. वदना°। ५ क. ज. झ. °नि प° । ६ क. ज. °ल्यवार्ति मं°। ७ क. ज. ञ. °न एकम°। ८ क. °श्चित्तमिति । ९ झ. ट. °था श्रु° ।

(इन्द्रियाणामेकादशसंख्याकत्वस्य वेदान्तसंमतत्वम्, अधि० २)

स्युः। स्थानभेदाद्ध्यते चत्वारः सन्तः सप्त गण्यन्ते द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके एका वागिति। न च तावतामेव वृत्तिभेदा इतरे प्राणा इति शंक्यते वक्तुं हस्तादिवृत्तीनामत्यन्तविजातीयत्वात्। तथा "नव वै पुरुषे प्राणा नाभिर्दशमी" [तै० सं० ५-३-२-३] इत्यत्रापि देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते न प्राणतत्त्वभेदाभिप्रायेण। नाभिर्दशमीति वचनात्। न हि नाभिर्नाम कश्चित्प्राणः प्रसिद्धोऽस्ति। मुख्यस्य तु प्राणस्य भवति नाभिरप्येकं विशेषायतनमित्यतो नाभिर्दशमीत्युच्यते। क्वचिदुपासनार्थं कतिचित्प्राणा गण्यन्ते क्वचित्प्रदर्शनार्थम्। तदेवं विचित्रे प्राणेयत्ताम्नाने सति क्व किंपरमाम्नानमिति विवेक्तव्यम्। कार्यजातवशात्त्वेकादशत्वाम्नानं प्राणविषयं प्रमाणमिति स्थितम्।

इयमपरा सूत्रद्वययोजना—सप्तैव प्राणाः स्युर्यतः सप्तानामेव गतिः श्रूयते। "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" [बृ० ४-४-२] इत्यत्र। ननु

कथं तर्हि सप्तत्वं तत्राऽऽह—**स्थानेति**। रूपादिधीरूपकार्यभेदादेकमेवेन्द्रियं स्थानभेदाद्भिन्नमिवोपचारितमित्यर्थः। यत्तु वृत्तिभेदापेक्षं संख्यान्तरश्रवणं तत्राऽऽह—**न चेति**। अन्धादेरप्यादानादिकार्यदर्शनादितरेषां चक्षुरादिवृत्तित्वे तदसंभवादिति भावः। तथाऽपि श्रुत्यन्तरेषु सत्सु कथमेकादशत्वं तत्र दशत्वश्रुतेर्गतिमाह—**तथेति**। स्थानभेदात्सप्त वै शीर्षण्या इति सप्तत्वोक्तिवदिति यावत्। नाभिर्दशमीत्युक्तत्वात्प्राणत्वं तस्या अपीत्याशङ्क्याऽऽह—**न हीति**। कथं तर्हि तत्र प्राणशब्द इत्याशङ्क्य लक्षणयेत्याह—**मुख्यस्येति**। सप्त प्राणाः प्रभवन्तीत्यादेर्गतिमाह—**क्वचिदिति**। अष्टौ ग्रहा इत्यादेर्गतिं सूचयति—**क्वचिदिति**। किं[3] तर्हि वाक्यमुपासनादिविषयं किं वा तत्त्वविषयमित्युक्ते विचारस्य सावकाशत्वमाह—**तदेवमिति**। कथं तर्हि निर्णयस्तत्राऽऽह—**कार्येति**। एवं प्राणसंख्याविषयश्रुतिविवादाभावादेकादशप्राणकारणे ब्रह्मणि समन्वयसिद्धिरित्युपसंहरति—**इति स्थितमिति**।

वर्णकान्तरमाह—**इयमिति**। इन्द्रियाण्येव विषयस्तानि किं सप्त किं वैकादशेति श्रुतिविमत्या संदेहे पूर्वपक्षमाह—**सप्तेति**। येषां सहगमनं तेषामेव जन्मान्तरीयभोगोपायत्वादिन्द्रियत्वमिह तु सप्तानामेव गतिः श्रूयते तस्मात्तेषामेवेन्द्रियत्वमित्यर्थः। सप्त गतेरिति व्याख्याय शङ्कोत्तरत्वेन पदान्तरमादत्ते—**नन्वित्यादिना**। तद्व्याकरोति—

---

१ क. ऽकथं। २ झ, ट. 'तत्त्वामि'। ३ क. कथं।

सर्वशब्दोऽत्र पठ्यते तत्कथं सप्तानामेव गतिः प्रतिज्ञायत इति । विशेषितत्वादित्याह । सप्तैव हि प्राणाश्चक्षुरादयस्त्वक्पर्यन्ता विशेषिता इह प्रकृताः " स यत्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्ततेऽथारूपज्ञो भवति " [बृ० ४-४-१] " एकी भवति न पश्यतीत्याहुः " [बृ० ४-४-२] इत्येवमादिनाऽनुक्रमणेन । प्रकृतगामी च सर्वशब्दो भवति । यथा सर्वे ब्राह्मणा भोजयितव्या इति ये निमन्त्रिताः प्रकृता ब्राह्मणास्त एव सर्वशब्देनोच्यन्ते नान्ये । एवमिहापि ये प्रकृताः सप्त प्राणास्त एव सर्वशब्देनोच्यन्ते नान्य इति । नन्वत्र विज्ञानमष्टममनुक्रान्तं कथं सप्तानामेवानुक्रमणम् । नैष दोषः । मनोविज्ञानयोस्तत्त्वाभेदाद्वृत्तिभेदेऽपि सप्तत्वोपपत्तेः । तस्मात्सप्तैव प्राणा इत्येवं प्राप्ते ब्रूमः—

हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयन्ते "हस्तौ वै ग्रहः " [बृ० ३-२-८] इत्यादिश्रुतिषु । ग्रहत्वं च बन्धनभावो गृह्यते बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बन्धनेनेति । स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते शरीरान्तरेष्वपि तुल्य-

---

सप्तैवेति । चक्षुरादय इत्यादिशब्देन घ्राणरसनात्वक्श्रोत्रत्वङ्मनांसि गृह्यन्ते । इहेत्युत्क्रान्तिप्रकरणोक्तिः । यत्र यस्यामवस्थायां चक्षुरधिष्ठातृदेवतांशः स एष पुरुषशब्दितः पराङ्पर्यावर्तते बहिर्देशात्स्वस्थानं प्रति व्यावर्तते तदानीमरूपज्ञो जीवो भवति हृदये चक्षुरेकी भवति पार्श्वस्थाश्च नायं पश्यतीत्याहुः । न जिघ्रति न रसयते न वदति न शृणोति न मनुते न स्पृशतीत्येवं सप्तैव विशेषिता इत्यर्थः । तथाऽपि सर्वश्रुत्या सर्वप्राणगमनमाशङ्क्य प्रकरणात्तस्याः संकोचमाह—प्रकृतेति । प्रकरणेन श्रुतिसंकोचं दृष्टान्तेन स्पष्टयति— यथेत्यादिना । एकी भवति न विजानातीत्याहुरिति बुद्धेरपि पाठादसिद्धं सप्तानामेवानुक्रमणमित्याह —नन्विति । बुद्धेरनुक्रमणं न सप्तत्वविघातकमित्याह–नेति । पूर्वपक्षमुपसंहरति—तस्मादिति । तदनूद्यादेन सिद्धान्तयति– एवमिति ।

अक्षरार्थाविशेषेऽपि तात्पर्यार्थे विशेषं दर्शयितुमक्षरार्थं संक्षिपति—हस्तादयस्त्विति । यदुक्तमनुयायिनामेवेन्द्रियत्वं तदङ्गीकृत्यानुयायित्वमेकादशानामस्तीत्याह—ग्रहत्वं चेति । कथमेतावता सर्वदेहानुयायित्वमित्याशङ्क्य जीवस्य सर्वदेहेषु बद्धत्वसिद्धेस्तद्धीरित्याह—स चेति । सर्वेषु देहेषु जीवस्य बद्धत्वेऽपि

---

१ क. ङ. ज. ञ. ट. ते कथं । २ क. ञ. भोजिता । ३ क. श्रूयन्ते । ४ क. ज. ट. हस्तौ । ५ ख. ठ. ड. °ये च च° । ६ ख °नुगामिना° ।

त्वाद्बन्धनस्य । तस्माच्छरीरान्तरसंचारीदं ग्रहसंज्ञकं बन्धनमित्यर्थादुक्तं भवति । तथा च स्मृतिः—

" पुर्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते ।
तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन च " [ब्र० पु०]

इति प्राङ्मोक्षाद्ग्रहसंज्ञकेन बन्धनेनावियोगं दर्शयति । आथर्वणे च विषयेन्द्रियानुक्रमणे " चक्षुश्च द्रष्टव्यं च " [प्र० ४-८] इत्यत्र तुल्यवद्धस्तादीनीन्द्रियाणि सविषयाण्यनुक्रामति " हस्तौ चाऽऽदातव्यं चोपस्थश्चाऽऽनन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च " [प्र० ४-८] इति । तथा " दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति " [बृ० ३-९-४] इत्येकादशानां प्राणानामुत्क्रान्तिं दर्शयति । सर्वशब्दोऽपि च प्राणशब्देन संबध्यमानोऽशेषान्प्राणानभिदधानो न प्रकरणवशेन सप्तस्वेवावस्थापयितुं शक्यते प्रकरणाच्छब्दस्य बलीयस्त्वात् । सर्वे ब्राह्मणा भोजयितव्या इत्यत्रापि सर्वेषामेवाविनिवर्तिनां ब्राह्मणानां ग्रहणं न्याय्यं सर्वशब्दसामर्थ्यात् । सर्वभोजनासं-

---

कुतो ग्रहसंज्ञकस्य हस्तादेरनुयायित्वं तत्राऽऽह—तस्मादिति । हृदयग्रहसंज्ञकहस्तादिबन्धस्याऽऽमोक्षादात्मानुयायित्वे स्मृतिमाह—तथा चेति । पुर्यष्टकं विशिनष्टि—प्राणाद्येनेति । प्राणादिपञ्चकं भूतसूक्ष्मपञ्चकं कर्मेन्द्रियपञ्चकं ज्ञानेन्द्रियपञ्चकं मनआद्यन्तःकरणचतुष्कमविद्या कामः कर्म चेति पुर्यष्टकम् । तच्चानेनाऽऽत्मा लिङ्ग्यते ज्ञायत इति लिङ्गम् । प्रकृतोपयोगितात्पर्यं स्मृतेर्दर्शयति—प्रागिति । सार्थेन्द्रियप्रस्तावे हस्तादीनां सार्थानामुक्तेरपि तेषामिन्द्रियत्वं देहान्तरसंचारित्वं च प्रसिद्धमित्याह—आथर्वणे चेति । इतश्च हस्तादीनामस्तीन्द्रियत्वं देहान्तरसंचारित्वं चेत्याह—तथेति । यत्तु सर्वशब्दः प्रकृतगामीति तत्राऽऽह—सर्वेति । अनुयायिनामेवेन्द्रियत्वे वाच्ये प्राणमनूत्क्रामन्तमित्यत्र सर्वशब्देन प्राकरणिकसप्तप्राणोक्तिर्वा दशेमे पुरुषे प्राणा आत्मैकादश इति श्रुत्यन्तरसिद्धैकादशप्राणानां सर्वे प्राणा इति प्राणश्रुत्युक्तानामुक्तिर्वेति विमर्शे प्राकरणिकसप्तग्रहाद्वरं श्रौतैकादशग्रहः संनिकर्षादिति भावः । परोक्तं दृष्टान्तं विघटयति—सर्वे इति । कथं तर्हि संकोचस्तत्राऽऽह—सर्वेति । उत्क्रान्तिवाक्येऽपि तथा संकोचः

---

१ क. ङ. ज ञ. केनाने । २ ङ. ञ. स्वेव व्यव । ३ ङ. ञ. स्य च वं । ४ क. ञ. भोजिता । ज. भोजनीया । ५ ख. च सिं । ६ क. 'रोक्तद' ।

(सांख्यसंमतेंन्द्रियसर्वगतत्वनिराकरणपूर्वकं तेषां परिच्छिन्नत्वकथनम्, अधि० ३)

भवात्तु तत्र निमन्त्रितमात्रविषया सर्वशब्दस्य वृत्तिराश्रिता । इह तु न किंचित्सर्वशब्दार्थसंकोचेने कारणमस्ति । तस्मात्सर्वशब्देनात्राशेषाणां प्राणानां परिग्रहः । प्रदर्शनार्थं च सप्तानामनुक्रमणमित्यनवद्यम् । तस्मादेकादशैव प्राणाः शब्दतः कार्यतश्चेति सिद्धम् ॥ ६ ॥ (२)

(सांख्यसंमतेन्द्रियसर्वगतत्वनिराकरणपूर्वकं तेषां परिच्छिन्नत्वकथनम्, अधि० ३)

अणवश्च ॥ ७ ॥ (३)

अधुना प्राणानामेव स्वभावान्तरमभ्युच्चिनोति।"अणवश्चैते" प्रकृताः प्राणाः प्रतिपत्तव्याः । अणुत्वं चैषां सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं कृत्स्नदेहव्यापिकार्यानुपपत्तिप्रसङ्गात् । सूक्ष्मा एते प्राणाः स्थूलाश्चेत्स्युर्मरणकाले शरीरान्निर्गच्छन्तो बिलाद्धिरिवोपलभ्येरन्म्रियमाणस्य पार्श्वस्थैः।परिच्छिन्नाश्चैते प्राणाः, सर्वगताश्चेत्स्युरुत्क्रान्तिगत्यागतिश्रुतिव्याकोपः स्यात् । तद्गुण-

---

स्यान्नेत्याह—इह त्विति । अनुपपत्तिके संकोचे प्राकरणिकः संख्यानियमो युक्तो दार्ष्टान्तिके तु नानुपपत्तिरिति कुतः संकोच इत्यर्थः । संकोचाभावे फलितमाह—तस्मादिति । एकादशानां ग्रहे कुतः सप्तानामनुक्रमणं तत्राऽऽह—प्रदर्शनार्थं चेति। संख्यायां न्यूनाधिकत्वायोगमुपपाद्य प्रकृतमुपसंहरति—तस्मादिति ॥ ६ ॥ (२)

एकादशप्राणानामुत्क्रान्तिरुक्ता सा न मुख्या तेषां व्यापित्वादित्याशङ्क्याऽऽह—अणवश्चेति । संक्षेपतोऽधिकरणतात्पर्यमाह—अधुनेति । उत्पत्तिसंख्याश्रुत्यविरोधोक्त्यनन्तरं परिमाणश्रुतिविरोधो निरस्यत इत्यर्थः । उक्तप्राणानामुत्क्रान्त्यानन्त्यश्रुतिभ्यां परिच्छिन्नत्वविभुत्वसंदेहे सिद्धान्तं तावदाह—अणवश्चैत इति । अत्रोत्क्रान्त्यानन्त्यश्रुत्योरविरोधेन परिच्छिन्नप्राणकारणे ब्रह्मणि समन्वयस्थापनात्पादादिसंगतिः। पूर्वपक्षे दर्शितश्रुत्योर्मिथोविरोधादुक्ते ब्रह्मणि समन्वयासिद्धिः । सिद्धान्ते तदविरोधात्तत्सिद्धिः । अणुशब्दात्परमाणुपरिमाणत्वं प्राप्तं प्रत्याह—अणुत्वं चेति । सौक्ष्म्यं द्रव्याणामुद्भूतरूपस्पर्शानाधारत्वम् । परिच्छेदो मध्यमपरिमाणत्वम् । परमाणुतुल्यत्वमेवाणुत्वं किं न स्यात्तत्राऽऽह—कृत्स्नेति । सौक्ष्म्यं प्रपञ्चयति—सूक्ष्मा इति । परिच्छेदं साधयति—परिच्छिन्नाश्चेति । विभुत्वे चेन्द्रियाणामन्तःकरणावच्छेदादणुत्वमात्मनो यदुत्क्रान्त्यधिकरणे सिद्धं तदपि न सिध्येदित्याह—तद्गुणेति । प्राणाः सर्वगताः सर्वत्र दृष्टकार्यत्वादाकाशवदित्यनुमानात्सर्वेऽनन्ता इत्यादिश्रुतेश्च तेषां विभुत्वाद्देह एवाभिव्यक्तेश्च सर्वत्र दृष्टयप्रसङ्गात्कुतोऽणुत्वमिति पूर्वपक्षमाह—सर्वगता-

---

१ क. ज. ंसंकोचे का । २ ज. ट. ंचका । ३ ङ. ज. ंर्थे स । ४ ख. ंदशाना ।

(प्राणस्यानादित्वखण्डनपूर्वकं तदुत्पत्तिसाधनम्, अधि० ४)

सारत्वं च जीवस्य न सिध्येत् । सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेत् । न । वृत्तिमात्रस्य करणत्वोपपत्तेः । यदेवं[1] ह्युपलब्धिसाधनं वृत्तिरन्यद्वा तस्यैव नः करणत्वं[2] संज्ञामात्रे विवाद इति करणानां व्यापित्वकल्पना निरर्थिका । तस्मात्सूक्ष्माः परिच्छिन्नाश्च[3] प्राणा इत्यध्यवस्यामः ॥ ७ ॥ (३)

(प्राणस्यानादित्वखण्डनपूर्वकं तदुत्पत्तिसाधनम्, अधि० ४)

श्रेष्ठश्च ॥ ८ ॥ (४)

मुख्यश्च प्राण इतरप्राणवद्ब्रह्मविकार इत्यतिदिशति[5] । तच्चाविशेषेणैव सर्वप्राणानां ब्रह्मविकारत्वमाख्यातम् । " एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च " [मुण्ड० २-१-३] इति सेन्द्रियमनोव्यतिरेकेण[6] प्राणस्योत्पत्तिश्रवणात् " स प्राणमसृजत " इत्यादिश्रवणेभ्यश्च । किमर्थः पुनरतिदेशः[7] । अधिकाशङ्कावारणार्थः । नासदासीये हि ब्रह्मप्रधाने सूक्ते मन्त्रवर्णो भवति—

नामिति । हेतोरसिद्धेरुपासनापरत्वाच्च श्रुतेरिन्द्रियाणां विभुत्वे मानाभावाद्यद्वृत्तित्वेनेष्टं तदेवास्माकं साधकतमत्वात्करणमित्याह—नेत्यादिना । तदेव स्पष्टयति—यदेवेति । वृत्तिमदेव करणं न वृत्तिमात्रमित्याशङ्क्याऽऽह—अन्यद्वेति । वृत्तेर्वा वृत्तिमतो वा देहावच्छिन्नस्यैव वृत्तिसाधनस्य करणत्वे फलितमाह—इतीति । अनर्थकेत्युपलक्षणमप्रामाणिकी चेति वाच्यम् । सांख्यपक्षायोगे फलितमाह—तस्मादिति ॥ ७ ॥ (३)

मुख्यप्राणातिरिक्तप्राणानां सृष्ट्यादि शिष्ट्वा मुख्येऽपि प्राणे प्रथमाधिकरणन्याय इत्यतिदिशति—श्रेष्ठश्चेति । ज्ञाते चक्षुरादौ तद्व्यापारात्प्राणस्य भेदचिन्ता सुकरेति चक्षुरादिनिरूपणानन्तरमतिदेशो न विरुध्यते । मुख्यप्राणो विषयस्तस्य किं जन्म नास्ति किं वाऽस्तीति श्रुतिविप्रतिपत्त्या संशयेऽतिदेशं विशदयति—मुख्यश्चेति । अत्र चाऽऽद्याधिकरणवत्पादादिसंगतिफलभेदौ । कुतस्तर्हि ब्रह्मविकारत्वं तत्राऽऽह—तच्चेति । पूर्वोक्तन्यायेनैव ब्रह्मविकारत्वसिद्धौ किमतिदेशेनेत्याह—किमर्थ इति । अतिदेशफलमाह—अधिकाशङ्केति । तामेवाधिकां[10] शङ्कां दर्शयति—नासदासीये हीति । नासदासीदित्यारभ्य प्रवृत्ते सूक्ते ब्रह्मपरे मन्त्र एव वर्णयतीति वर्णो दृष्टोऽस्तीति यावत् । तर्हि तस्मिन्महाप्रलये मृत्युमारको मृत्युमद्वा कार्यं नाऽऽसीदमृतमपि देवोपभोगयोग्यममृतत्वाधिकरणं वा नाऽऽसीत्तथा रात्र्या रात्रेरह्नो दिवसस्य च प्रकेत-

---

१ ज. °देवोप° । २ ङ. ञ. °व तूप° । ३ ङ. ञ. °त्वं तेन सं° । ४ क. ङ. ञ. °न्नाश्चैते प्रा° । ५ क. ज. ञ. °ति । नन्ववि° । ६ क. ङ. ञ. °केणापि प्रा° । ७ क. °शः । आश° । ८ ख. ठ. ड. °णभे° । ९ ठ. ड. °ह । आश° । १० ड. °धिकश° ।

" न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किंचनाऽऽस "
[ऋ० सं० १०-१२९-२] इति ।

"आनीत्" इति प्राणकर्मोपादानात्प्रागुत्पत्तेः सन्तमिव प्राणं सूचयति । तस्मादजः प्राण इति जायते कस्यचिन्मतिः । तामतिदेशेनापनुदति । आनीच्छब्दोऽपि न प्रागुत्पत्तेः प्राणसद्भावं सूचयति । "अवातम्" इति विशेषणात् । "अप्राणो ह्यमनाः शुभ्रः" [मुण्ड० २-१-२] इति च मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वस्य दर्शितत्वात् । तस्मात्कारणसद्भावप्रदर्शनार्थ एवायमानीच्छब्द इति । " श्रेष्ठः " इति " च" मुख्यं प्राणमभिदधाति " प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च " [छान्दो० ५-१-१] इति श्रुतिनिर्देशात् । ज्येष्ठश्च प्राणः शुक्रनिषेककालादारभ्य

श्रिद्भूतश्चन्द्रः सविता च नाऽऽस्तां स्वधया सहेति संबन्धः । स्वधेति पितृभ्यो दीयमानमन्नं, पित्राद्यर्चनमपि नाऽऽसीदित्यर्थः । यद्वा स्वधया स्वया धारणया स्वकीयस्थित्या तदेकमवातं वातवर्जितमानीच्चेष्टां कृतवदिति यावत् । तस्माच्चेष्टावतः सकाशाद्ध किलान्यर्तिकंचन किंचिदपि परः परं प्रकृष्टं नाऽऽस न बभूवेत्यर्थः । अस्मिन्मन्त्रे विवक्षितमंशमाह—प्रागिति । अत्र प्राणवाचकाभावात्कथं तदस्तित्वधीरित्याशङ्क्याऽऽह—आनीदिति । प्राणोत्पत्तिन्यायेनैव मुख्यस्यापि जन्मसिद्धौ किं पुनरुक्त्येत्याशङ्क्यावान्तरप्रकृतिविषयत्वेन व्यवस्था तत्रोक्ता । प्रकृते महाप्रलयविषयत्वान्न पूर्वन्यायसिद्धिरिति मत्वाऽऽह—तस्मादिति । अधिकां शङ्कामुक्त्वा सिद्धान्तयति—तामिति । एतस्माज्जायते प्राण इति प्राणजन्म श्रुतम् । आनीदित्यननं प्राणव्यापारः प्रागवस्थायां प्राणसत्त्वे लिङ्गम् । तत्र द्वयोर्महाप्रलयावान्तरप्रलयभेदेन व्यवस्थानुपपत्तावन्यतरस्य गौणत्वे श्रुतिविरोधे लिङ्गस्यैव गौणत्वादानीच्छब्दस्य मूलकारणसत्तावाचित्वकल्पनया प्राणस्य जन्मोपेयमिति शङ्कानिरासमेव सूचयति—आनीदिति । प्रमाणान्तरवदित्यपेरर्थः । इतश्च प्रागवस्थायां न प्राणस्य सत्त्वमित्याह—अवातमिति । इतोऽपि महाप्रलये प्राणसत्ता नास्तीत्याह—अप्राणो हीति । आनीच्छब्दस्तार्हि कथमित्याशङ्क्य धातूनामनेकार्थत्वमाश्रित्याऽऽह—तस्मादिति । एवं शङ्कानिरासेऽपि प्राणे श्रेष्ठशब्दाप्रसिद्धौ कथं सूत्रमित्याशङ्क्याऽऽह—श्रेष्ठ इति । श्रौतं ज्येष्ठत्वं साधयति—ज्येष्ठश्चेति । तदेव व्यति-

---

१ क. ज. 'षविरहस्य । २ क. ज. 'प्रतिपादना' । ३ ङ. ज. ञ. ज्येष्ठः श्रे' । ४ क. ज. ज्येष्ठः प्रा' । ५ क. ज. तथा । ६ क. ख. 'श्रुतिः । आ' । ७ ख. 'पत्त्या स्वन्य' ।

(प्राणवायोः स्वतन्त्रताकथनम्, अधि० ५)

तस्य वृत्तिलाभात् । न चेत्तस्य तदानीं वृत्तिलाभः स्याद्योनौ निषिक्तं शुक्रं पूयेत न संभवेद्वा । श्रोत्रादीनां तु कर्णशष्कुल्यादिस्थानविभागनिष्पत्तौ वृत्तिलाभान्न ज्येष्ठत्वम् । श्रेष्ठश्च प्राणो गुणाधिक्यात् " न वै शक्ष्यामस्त्वदृते जीवितुम् " [बृ० ६-१-१३] इति श्रुतेः ॥ ८ ॥ (४)

(प्राणवायोः स्वतन्त्रताकथनम्, अधि० ५)

न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥

स पुनर्मुख्यः प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते । तत्र प्राप्तं तावच्छ्रुतेर्वायुः प्राण इति । एवं हि श्रूयते—" यः प्राणः स वायुः स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानः " इति । अथवा तत्रान्तरीयाभिप्रायात्समस्तकरणवृत्तिः प्राण इति प्राप्तम् । एवं हि तत्रान्तरीया आचक्षते— " सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च " [सां० कारि०

रेकद्वारा स्फोरयति—न चेदिति । न संभवेदिति श्रुतेरेवानुकरणमिन्द्रियाणामपि तुल्यं ज्यैष्ठ्यं तत्राऽऽह—श्रोत्रादीनां त्विति । श्रेष्ठत्वं साधयति—श्रेष्ठश्चेति । कथं गुणाधिक्यं तत्रोक्तम्—न वा इति । तदेवं मुख्यप्राणोत्पत्तिश्रुतीनामन्योन्यमविरोधान्मुख्यप्राणकारणे ब्रह्मणि समन्वय इति ॥ ८ ॥ (४)

मुख्यप्राणोत्पत्तिं[1] चिन्तानन्तरं तत्स्वरूपं चिन्तयति—नेत्यादिना । अधिकरणतात्पर्यमाह—स इति । मुख्यप्राणो वायुमात्रं वा करणवृत्तिर्वा तत्त्वान्तरं वेति विप्रतिपत्त्या संदिह्य तत्त्वान्तरत्वं निर्धार्यत इत्यर्थः । अत्र च भेदाभेदश्रुतिविरोधनिषेधेन वाय्वाद्यतिरिक्तप्राणकारणे ब्रह्मणि समन्वयसाधनात्पादादिसंगतिः । पूर्वपक्षे भेदाभेदश्रुत्योर्मिथोविरोधादुक्तसमन्वयासिद्धिः । सिद्धान्ते तदविरोधात्तत्सिद्धिः । यद्वा पूर्वपक्षे वायुमात्रादिन्द्रियमात्राद्वा त्वमर्थस्य विवेकः । सिद्धान्ते तत्त्वान्तरात्प्राणात्तद्विवेक इत्यङ्गीकृत्य पूर्वपक्षमाह—तत्रेति । अभेदश्रुतिरिव भेदश्रुतिरपि स वायुनेत्याद्या प्राणस्य वायोरस्तीत्याशङ्क्योभयोर्मुख्यत्वासिद्धेस्तोककल्पनानुरोधाद्द्वौणी भेदश्रुतिरिति मत्वाऽऽह—एवं हीति । भेदश्रुत्यवष्टम्भेऽपि " धर्मिभेदाद्धर्मभेदो लघीयान् " इति न्यायेन वागादीनां संभूय देहचालनादिहेतुसामान्यव्यापारसंभवान्न प्राणाख्यं पदार्थान्तरं कल्प्यं गौरवादिन्द्रियवृत्तितया तद्भेदस्यापि वक्तुं शक्यत्वादिति पक्षान्तरमाह—अथवेति । तत्रान्तरीयाभिप्रायं विवृणोति—एवं हीति । वायुमात्रादिन्द्रियमात्राद्वा त्वमर्थस्य

---

१ क. ज. तथा । २ ज. °नां क° । ३ ङ. ञ. श्रुतेश्च । न । ४ झ. °न्तराभि° । ५ ङ. ञ. ट. इतीति । ६ घ. ज. झ. ञ. ट. °मान्या क° । ७ क. °चिन्तनान° ।

२९] इति । अत्रोच्यते—न वायुः प्राणो नापि करणव्यापारः । कुतः । " पृथगुपदेशात् " । वायोस्तावत्प्राणस्य पृथगुपदेशो भवति " प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च " [छान्दो० ३-१८-४] इति । न हि वायुरेव सन्वायोः पृथगुपदिश्येत । तथा करणवृत्तेरपि पृथगुपदेशो भवति वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक्प्राणस्यानुक्रमणात् । वृत्तिवृत्तिमतोरभेदात् । न हि करणव्यापार एव सन्करणेभ्यः पृथगुपदिश्येत । तथा—

" एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुः " [मुण्ड० २-१-३]

इत्येवमादयोऽपि वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशा अनुसर्तव्याः । न च समस्तानां करणानामेका वृत्तिः

विवेक इति प्राप्तमनूद्य सिद्धान्तयति—**अत्रेति** । न वायुः प्राण इत्यत्र पृथगुपदेशहेतुं विशदयति—**वायोरिति** । मनो ब्रह्मेत्युपासीतेत्युपक्रम्य मनोब्रह्मणो वाक्प्राणचक्षुःश्रोत्रैः पादैश्चतुष्पात्त्वमुक्तम् । मनो हि वागादिभिः स्वविषयेषु गौरिव पादैः प्रवर्तते । तत्र प्राण एव मनोब्रह्मणो वागाद्यपेक्षया चतुर्थपादः । स च वायुनाऽऽधिदैविकेन भात्यभिव्यज्यते स्वव्यापारे च तपत्युद्गच्छतीत्यर्थः । यद्यपि च्छान्दोग्यभाष्ये घ्राणेन्द्रियमिन्द्रियप्रकरणात्प्राण इत्युक्तं तथाऽपि प्राणश्रुतिवशादत्र मुख्यप्राणो गृह्यते । अंशांशित्वेन भेदश्रुतिरित्याशङ्क्योपचारप्रसङ्गान्नैवमित्याह—**न हीति** । नापि करणव्यापार इत्यत्र पृथगुपदेशं हेतुं विभज्य व्याचष्टे—**तथेति** । प्राणस्य वागादीनां च मिथःसंवादलिङ्गेनोत्पत्तिभेदलिङ्गेन चेन्द्रियतद्व्यापारेभ्यो भिन्नत्वसिद्धेर्न लाघवात्तद्वृत्तित्वमित्यर्थः । पृथगनुक्रमणं वृत्तिवृत्तिमतोर्भेदादित्याशङ्क्याऽऽह—**वृत्तीति** । तादात्म्याद्भेदोऽप्यस्तीत्याशङ्क्य भेदवादस्याफलत्वान्नैवमित्याह—**न हीति** । प्रतिज्ञाद्वयेऽपि हेतुं विभज्य व्याख्यायाविभागेनापि व्याख्याति—**तथेति** । श्रुत्यवष्टम्भेन पक्षद्वयं निराकृत्य करणवृत्तित्वे दोषान्तरमाह—**न चेति** । या चक्षुःसाध्या वृत्तिः सैव न श्रोत्रसाध्या चक्षुरादीनां प्रत्येकमेवैकरूपग्रहणादिवृत्तौ स्वातन्त्र्यादतो न प्राणः सामान्यकरणवृत्तिरित्यर्थः । समुदायस्य करणत्वमुपेत्योक्तं तदेव नास्त्यवस्तुत्वात् । द्वित्रि(त्र)करणविकलानां च प्राणनाभावप्रसङ्गादतोऽपि न करणवृत्तिः

---

१ क. ज. °वत्पृथ° । २ क. ङ. ज. ञ. °तोश्चाभे° । ३ क. ख. ठ. ड. °तुर्थः पा° । ४ ञ. नः । ५ क. ख. ठ. ड. °मान्या क° । ६ क. °स्य कारकत्व° ।

(प्राणवायोः स्वतन्त्रताकथनम्, अधि० ५)

संभवति प्रत्येकमेकैकवृत्तित्वात्समुदायस्य चाकारकत्वात्। ननु पञ्जरचालनन्यायेनैतद्भविष्यति। यथैकपञ्जरवर्तिन एकादश पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः संभूयैकं पञ्जरं चालयन्ति। एवमेकशरीरवर्तिन एकादश प्राणाः प्रत्येकं प्रतिनियतवृत्तयः सन्तः संभूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यन्ते, इति नेत्युच्यते—युक्तं तत्र प्रत्येकवृत्तिभिरवान्तरव्यापारैः पञ्जरचालनानुरूपैरेवोपेताः पक्षिणः संभूयैकं पञ्जरं चालयेयुरिति। तथा दृष्टत्वात्। इह तु श्रवणाद्यवान्तरव्यापारोपेताः प्राणा न संभूय प्राण्युरिति युक्तम्। प्रमाणाभावात्। अत्यन्तविजातीयत्वाच्च श्रवणादिभ्यः प्राणनस्य। तथा प्राणस्य श्रेष्ठत्वाद्युद्घोषणं गुणभावोपगमश्च तं प्रति वागादीनां न करणवृत्तिमात्रे प्राणेऽवकल्पते। तस्मादन्यो वायुक्रियाभ्यां प्राणः। कथं तर्हीयं श्रुतिः " यः प्राणः स वायुः " इति। उच्यते—वायुरेवायमध्यात्ममापन्नः पञ्चव्यूहो विशेषात्मनाऽवतिष्ठमानः प्राणो नाम भण्यते न तत्त्वान्तरं नापि वायुमात्रम्। अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते ॥ ९ ॥

प्राण इत्याह—**समुदायस्येति**। दृष्टान्तेन समुदितानां करणानां करणत्वं शङ्कते—**नन्विति**। एकादशत्वं पक्षिषु दार्ष्टान्तिकानुरोधादुक्तं वैषम्यं दर्शयन्परिहरति—**इति नेति**। तत्रेति दृष्टान्तोक्तिः। दार्ष्टान्तिकेऽपि किमित्यवान्तरव्यापारवतां प्राणानां प्राणाख्यसामान्यवृत्तिर्न स्यादित्याशङ्क्याऽवान्तरव्यापारस्तेषां श्रवणादिर्वा वृत्त्यन्तरं वेति विकल्प्याऽऽद्ये श्रोत्रादीनां श्रवणादिव्यापारयौगपद्ये मानायोगान्नैवमित्याह—**इह त्विति**। कल्पान्तरं प्रत्याह—**प्रमाणेति**। किंच श्रवणादीनामपरिस्पन्दत्वात्तत्प्रधानव्यापाराननुरूपत्वान्न तदवान्तरव्यापारतेत्याह—**अत्यन्तेति**। किंच वागादिवृत्तित्वे प्राणस्य वागादिपारतन्त्र्यं वाच्यं तद्वैपरीत्यं चात्र दृष्टं तन्न प्राणस्य वागादिवृत्तितेत्याह—**तथेति**। पृथगुपदेशयुक्तिफलमुपसंहरति—**तस्मादिति**। अपृथगुपदेशस्य गतिं पृच्छति—**कथमिति**। यथा मृदोऽवस्थाविशेषो घटो मृदात्मा तथा वायोरवस्थाविशेषः प्राणो वाय्वात्मेत्याह—**उच्यत इति**। अध्यात्मापन्नः शरीरे प्रतिष्ठितः पञ्चव्यूहः प्राणापानव्यानोदानसमानाख्यावस्थाविशेषवान्विशेषात्मना व्यावृत्तरूपेणेति यावत्। कथं तर्हि पृथगुपदेशस्तत्राऽऽह—**नापीति**। तत्त्वान्तरत्वस्य तन्मात्रत्वस्य चास्वीकारे फलितमाह—**अतश्चेति**। यः प्राणः स वायुरिति सामा-

---

१ क. ज. 'त्तिं परिल'। २ क ङ. ज. ञ. 'कवर्तिभि'। ३ क. ज. ञ. ट. 'णः सह सं'। ४ ङ. ञ. 'ष्ठताशु'। ज. ट. 'ष्ठतादिघोष'। ५ ठ. 'रीरप्र'।

स्यादेतत् । प्राणोऽपि तर्हि जीववदस्मिञ्शरीरे स्वातन्त्र्यं प्राप्नोति श्रेष्ठत्वाद्गुणभावोपगमाच्च तं प्रति वागादीनामिन्द्रियाणाम् । तथा ह्यनेकविधा विभूतिः प्राणस्य श्राव्यते सुप्तेषु वागादिषु प्राण एको[1] हि जागर्ति प्राण एको[2] मृत्युनाऽनाप्तः प्राणः संवर्गो वागादीन्संदधाति[3] प्राण इतरान्प्राणान्रक्षति मातेव पुत्रानिति । तस्मात्प्राणस्यापि जीववत्स्वातन्त्र्यप्रसङ्गः । तं परिहरति—

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ १० ॥

तुशब्दः प्राणस्य जीववत्स्वातन्त्र्यं व्यावर्तयति । यथा चक्षुरादीनि राजप्रकृतिवज्जीवस्य कर्तृत्वं भोक्तृत्वं च प्रत्युपकरणानि[4] न स्वतन्त्राणि तथा मुख्योऽपि प्राणो राजमन्त्रिवज्जीवस्य[5] सर्वार्थकरत्वेनोपकरणभूतो न स्वतन्त्रः । कुतः । "तत्सहशिष्ट्यादिभ्यः" । तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते प्राणसंवादादिषु । समानधर्मणां[6] च सह शासनं युक्तं बृहद्रथंतरादि-

---

नाधिकरण्यवाक्येन प्राणस्य वायुत्वं सिद्धमेतस्माज्जायते प्राण इत्युत्पत्तिभेदलिङ्गेन स्वरूपभेदो दृष्टो द्वयोश्च वाक्यलिङ्गयोर्विरोधे वाक्यं समीरणस्वभावताविषयं लिङ्गं व्यक्तिभेदविषयमिति व्यवस्थाया वायोः प्राणस्य च विषयभेदो युक्तो लिङ्गस्य च बलीयस्त्वादिति भावः ॥ ९ ॥

प्राणो वागादिवृत्तिर्न चेत्तर्हि तस्येन्द्रियवत्करणत्वानङ्गीकाराज्जीववद्धोक्तृतेति शङ्कते—**स्यादिति** । प्राणस्य श्रेष्ठत्वमितरेषां तं प्रति गुणत्वं च साधयति—**तथाहीति** । श्रेष्ठत्वफलमाह—**तस्मादिति** । प्राणस्यापि जीववदत्र भोक्तृत्वे विरुद्धाभिप्रायानेकभोक्त्रधिष्ठिततया देहस्य गमनादि न भवेदिति भावः । प्राणस्य चक्षुरादिवदत्यन्तोपसर्जनत्वाभावेऽपि परिचारकवतः सामन्तादेः राजानं प्रति गुणत्ववद्गुणत्वं जीवं प्रति स्यादित्याह—**तमिति** । सूत्राक्षराणि व्याचष्टे—**तुशब्द इत्यादिना** । प्राणो न स्वतन्त्रो भोगसाधनत्वाच्चक्षुरादिवदित्यर्थः । प्राणसंवादादिष्वित्यादिशब्देनान्येऽपि ज्ञानध्यानप्रदेशा गृह्यन्ते । सहशासनेऽपि कथं प्राणस्य चक्षुरादिसाम्यं तत्राऽऽह—**समानेति** । तत्र दृष्टान्तमाह—**बृहदिति** । ते हि सामनी सहैव सर्वत्र

---

१ ङ. ञ. एवैको जा° । २ क. ज. °को जा° । ३ ङ. ञ एवैको । ४ झ. ट. °वृक्ते प्रा° । ५ क. प्रति क° । ६ क. ज. ञ. ट. °र्थत्वे° । ७ क. ज. झ. ञ. ट. °धर्माणां । ८ ठ. ड. °ष्ठफलत्वमा° । ९ क. झ. °णस्यापि च° ।

वत् । आदिशब्देन संहतत्वाचेतनत्वादीन्प्राणस्य स्वातन्त्र्यनिराकरणहेतून्दर्शयति ॥ १० ॥

स्यादेतत् । यदि चक्षुरादिवत्प्राणस्य जीवं प्रति करणभावोऽभ्युपगम्येत विषयान्तरं रूपादिवत्प्रसज्येत । रूपाद्यालोचनादिभिर्वृत्तिभिर्यथाऽस्वं चक्षुरादीनां जीवं प्रति करणभावो भवति। अपि चैकादशैव कार्यजातानि रूपालोचनादीनि परिगणितानि यदर्थमेकादश प्राणाः संगृहीताः । न तु द्वादशमपरं कार्यजातमेवगम्यते यदर्थमयं द्वादशः प्राणः प्रतिज्ञायत इति । अत उत्तरं पठति—

अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ ११ ॥

'न' तावद्विषयान्तरप्रसङ्गो 'दोषः' । "अकरणत्वात्" प्राणस्य । न हि चक्षुरादिवत्प्राणस्य विषयपरिच्छेदेन करणत्वमभ्युपगम्यते । न चास्यैतावता कार्याभाव एव । कस्मात् । "तथा हि" श्रुतिः प्राणान्तरेष्वसंभाव्यमानं मुख्यप्राणस्य वैशेषिकं

पठ्येते तयोश्च कर्मणि सहैव प्रयुज्यमानत्वं दृष्टं सामत्वं वा साम्यम् । तथा प्राणस्यापि चक्षुरादिभिः सह पठितस्य जीवोपकरणता तुल्येत्यर्थः । संहतत्वाचेतनत्वादीत्यादिशब्देन परिच्छिन्नत्वाद्यन्तवत्त्वादिग्रहणम् ॥ १० ॥

सूत्रान्तरव्यावर्त्यमाह—स्यादिति । प्राणस्य करणत्वेऽपि कुतः सविषयत्वप्रसक्तिरित्याशङ्क्य चक्षुरादिषु तथादृष्टत्वादित्याह—रूपेति । यज्जीवस्य भोगकरणं तत्सविषयं दृष्टं यथा चक्षुरादि तथा प्राणस्यापि विषयो वाच्यस्तदभावात्तस्य स्वतन्त्रतेत्यर्थः । तर्हि प्राणेऽपि कश्चिद्विषयोऽस्तु तत्राऽऽह—अपि चेति । प्राणसाध्यफलाभावादपि चक्षुरादिवत्प्राणात्मकं तत्त्वं जीवभोगोपकरणं द्वादशेन्द्रियवन्नोपेयमित्यर्थः । चोद्योत्तरं सूत्रं पातयति—अत इति । प्राणस्य जीवभोगोपकरणत्वे सविषयत्वप्रसक्तिमुक्तां प्रत्याह—न तावदिति । प्राणस्याकरणत्वे कथं जीवस्य सर्वार्थत्वेनोपकरणभूतोऽसावित्युक्तमाशङ्क्याऽऽह—न हीति । विषयपरिच्छेदाभावे प्राणस्याप्रमाणत्वान्न सत्त्वधीरित्याशङ्क्याऽऽह—न चेति । कार्यलिङ्गकमनुमानं प्राणे संभवतीत्युक्तं प्रश्नपूर्वकं सूत्रावयवेन स्फुटयति—कस्मादिति । अन्वयव्यतिरेकसिद्धं प्राणानामसंभाव्यं कार्यं मुख्यप्राणस्य दर्शयति—प्राणान्तरेष्विति । प्राणोपास्तिप्रक्रमार्थोऽथ-

---

१ क. ङ. ञ. °पालो° । २ क. °नाद्याभि° । ३ ङ. ञ. °था चक्षुरादीनां स्वं जी° । ४ ञ. ट. °र्थम° । ५ क. °मधिग° ।

कार्यं " दर्शयति " प्राणसंवादादिषु । अथ ह प्राणा अहंश्रेयंसि व्यूदिरे " [छा० ५-१-६] इत्युपक्रम्य " यस्मिन्व उत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठः " [छा०५-१-७] इति चोपन्यस्य प्रत्येकं वागाद्युत्क्रमणेन तद्वृत्तिमात्रहीनं यथापूर्वं जीवनं दर्शयित्वा प्राणोच्चिक्रमिषायां वागादिशैथिल्यापत्तिं शरीरपातप्रसङ्गं च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति । " तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत्पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामि " [प्र० २-३] इति चैतमेवार्थं श्रुतिराह । " प्राणेन रक्षन्नवरं कुलायम् " [बृ० ४-३-१२] इति च सुप्तेषु चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति । " यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यति " [बृ० १-३-१९] " तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवति " [छा० १-२-९] इति च प्राणनिमित्तां शरीरेन्द्रियपुष्टिं दर्शयति । "कस्मिन्नवहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति । स प्राणमसृजत " [प्र० ६-३-४] इति च प्राणनिमित्ते जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति ॥ ११ ॥

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥ (५)

शब्दः । अहंश्रेयसीति स्वस्य श्रेष्ठतानिमित्तं व्यूदिरे विवादं चक्रिरे । तद्वृत्तिमात्रहीनं मूकादित्वेन स्थितमिति यावत् । न केवलं प्राणस्योत्क्रमणेच्छायां वागादिशैथिल्यापत्तिलिङ्गेन प्राणनिमित्ता देहस्थितिः किंतु यथोक्तमर्थं श्रुतिः स्वयमेव निर्वक्तीत्याह—तानिति । तत्रैव श्रुत्यन्तरमाह—प्राणेनेति । अवरं निकृष्टमनेकाशुचिनीडं कुलायं देहाख्यं गृहं प्राणानुपसंहारेण रक्षञ्जीवः सुप्तिं याति प्राणस्याप्युपसंहारे मृतभ्रान्तिः स्यादित्यर्थः । प्राणस्य कार्यान्तरं श्रुत्यन्तरेण दर्शयति—यस्मादिति । तेन प्राणेन यदश्नाति जीवस्तेनाशनादिनेति यावत् । प्राणस्य कार्यान्तरं वाक्यान्तरेणोपन्यस्यति—कस्मिन्निति ॥ ११ ॥

प्राणस्य प्राणान्तरेष्वसंभाव्यमानकार्यसत्त्वे हेत्वन्तरमाह—पञ्चेति । सूत्रं व्याक-

---

१ ङ. ज. झ. ञ ट. °यसे व्यू° । २ ङ. ञ. ट. दृश्यते स । ३ ङ. ञ. °नं मुख्यप्राणस्य वैशेषिकं कार्यं द° । ४ ट. तदैव ।

(प्रायवायोः स्वतन्त्रताकथनम्, अधि० ५)

इतश्चास्ति मुख्यस्य प्राणस्य वैशेषिकं कार्यं यत्कारणं पञ्चवृत्तिरयं व्यपदिश्यते श्रुतिषु " प्राणोऽपानो व्यान उदानः समानः " [बृ० १-५-३] इति। वृत्तिभेदश्चायं कार्यभेदापेक्षः। प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा। अपानोऽवाग्वृत्तिर्निश्वासादिकर्मा। व्यानस्तयोः संधौ वर्तमानो वीर्यवत्कर्महेतुः। उदान ऊर्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः। समानः समं सर्वेष्वङ्गेषु योऽन्नरसान्नयतीति। एवं पञ्चवृत्तिः प्राणो 'मनोवत्'। यथा मनसः पञ्च वृत्तय एवं प्राणस्यापीत्यर्थः। श्रोत्रादिनिमित्ताः शब्दादिविषया मनसः पञ्च वृत्तयः प्रसिद्धाः। न तु " कामः संकल्पः" [बृह० १-५-३] इत्याद्याः परिपठिता गृह्येरन्। पञ्चसंख्यातिरेकात्। नन्वत्रापि श्रोत्रादिनिरपेक्षा भूतभविष्यदादिविषयाऽपरा मनसो वृत्तिरस्तीति समानः पञ्चसंख्यातिरेकः। एवं तर्हि " परमतमप्रतिषिद्धमनुमतं भवति " इति न्यायादिहापि योगशास्त्रप्रसिद्धा मनसः पञ्च वृत्तयः परिगृह्यन्ते "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः " [पात० योग० सू० १-६] नाम।

रोति—इतश्चेति। कथमेतावताऽन्यत्रासंभविकार्यविशेषसिद्धिस्तत्राऽऽह—वृत्तीति। तदेव विवृणोति—प्राण इति। उच्छ्वासादीत्यादिशब्देन देहधारणादि गृह्यते। एतेन निश्वासादीत्यादिशब्दो व्याख्यातः। उत्क्रान्त्यादीत्यादिपदेन गत्यागती गृह्येते। प्राणस्य पञ्चवृत्तित्वमुपसंहरति—एवमिति। दृष्टान्तं व्याचष्टे—यथेति। कास्ता मनसः पञ्च वृत्तयस्तत्राऽऽह—श्रोत्रादीति। लोकप्रसिद्ध्यपेक्षया श्रुतिप्रसिद्धेर्बलवत्त्वात्कामाद्या मनोवृत्तयः स्युरित्याशङ्क्याऽऽह—न त्विति। पञ्चसंख्याधिक्याच्चेत्कामाद्या वृत्तयो नेष्यन्ते तर्हि ज्ञानेऽपि पञ्चत्वनियमासिद्धेः श्रोत्रादिनिमित्ता इत्याद्ययुक्तमिति शङ्कते—नन्विति। उक्ते पञ्चवृत्तित्वे मनसोऽरुचिकारणमुक्त्वा प्रकारान्तरेण तस्य पञ्चवृत्तित्वमाह—एवमिति। इहेति प्रकृतसूत्रोक्तिः। योगशास्त्रप्रसिद्धा मनोवृत्तीरेवानुक्रामति—प्रमाणेति। प्रमासाधनं प्रमाणम्। मिथ्याध्यवसायो विपर्ययः। " शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः " [पात० योग० सू० १-१-९] अग्रहणं निद्रा। अनुभूतमात्रज्ञानं स्मृतिः। परसिद्धेन परो बोधनीय इत्यस्मिन्नंशे विरोधाभावादप्रतिषिद्धत्वमुक्तं न त्विदमेवाभिप्रेतम्। विपर्ययादीनामविद्यावृत्तित्वोपगमादिन्द्रियव्यापारोपरममात्रत्वान्निद्राया मनोवृत्तित्वासिद्धिरित्यपरितोषात्पक्षान्तरमाह—

---

१ क. संधिर्वीर्य° । २ क. ज. °दिह यो° ।

(प्राणस्य समष्टिरूपेणाऽऽधिदैविकी विभुताऽऽध्यात्मिकी त्वल्पता दृश्यता चेति कथनम्, अधि० ६)

बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यम्। जीवोपकरणत्वमपि प्राणस्य पञ्चवृत्तित्वात् " मनोवत् " इति योजयितव्यम् ॥ १२ ॥ (५)

(प्राणस्य समष्टिरूपेणाऽऽधिदैविकी विभुताऽऽध्यात्मिकी त्वल्पताऽदृश्यता चेति कथनम्, अधि० ६)

अणुश्च ॥ १३ ॥ (६)

अणुश्चायं मुख्यः प्राणः प्रत्येतव्य इतरप्राणवत्। अणुत्वं चेहापि सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वम्। पञ्चभिर्वृत्तिभिः कृत्स्न-शरीरव्यापित्वात्। सूक्ष्मः प्राणः उत्क्रान्तौ पार्श्वस्थेनानुपल-भ्यमानत्वात्। परिच्छिन्नश्चोत्क्रान्तिगत्यागतिश्रुतिभ्यः। ननु विभुत्वमपि प्राणस्य समाम्नायते " समः ध्रुविणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण " [बृ०

बहिति। मनोवत्पञ्चवृत्तित्वादुपकरणत्वं प्राणस्येत्येतदपि सूत्रार्थत्वेन द्रष्टव्यमित्याह—**जीवेति**। तदेवं वायोरिन्द्रियवत्तेश्च प्राणस्य भेदाभेदश्रुत्योरविरोधाद्यथोक्तप्राणकारणे ब्रह्मणि समन्वयः सिध्यतीति सिद्धम् ॥ १२ ॥ (९)

मुख्यस्य प्राणस्य सृष्टिं स्वभावविशेषं च निरूप्य परिमाणमतिदेशेन निरूपयति—**अणुश्चेति**। मुख्यप्राणो महान्परिच्छिन्नो वेति श्रुतिविप्रतिपत्तेः संशये सिद्धान्तमाह—**अणुरिति**। इहापीति सूत्रस्य मुख्यस्य प्राणस्य चोक्तिः। परमाणुतुल्यत्वमणुत्वं नेत्यत्र हेतुमाह—**पञ्चेति**। सौक्ष्म्यपरिच्छेदौ क्रमेण साधयति—**सूक्ष्म इत्यादिना**। अत्रापि व्यापित्वपरिच्छिन्नत्वश्रुत्योर्विरोधनिरासेन परिच्छिन्नप्राणकारणे ब्रह्मणि समन्वयसाधनात्पादादिसंगतिः। पूर्वपक्षे श्रुत्योर्विरोधादुक्तसमन्वयासिद्धिः। सिद्धान्ते तदविरोधात्तत्सिद्धिः। सर्वत्र दृष्टकार्यत्वादाकाशवत्प्राणो महानित्यत्र हेत्वसिद्धेर्यत्र शरीरं तत्रेति विशेषणे शरीरतद्रूपादिष्वनैकान्त्यादनुमानेन प्राणस्य महत्त्वासिद्धावपि समोऽनेन सर्वेणेति श्रौतलिङ्गेन तत्सिद्धिरित्यधिकाशङ्कां दर्शयन्पूर्वपक्षमाह—**नन्विति**। ध्रुविर्मशकादपि सूक्ष्मो जन्तुः पुत्तिकेत्युच्यते। नागो हस्ती। परिच्छिन्नत्वमुत्क्रान्त्यादिभिर्भाति समोऽनेनेत्यादिना विभुत्वं ततश्च परिच्छिन्नत्वस्य मुख्यत्वे विभुत्वस्यात्यन्तबाधः स्यादपरिच्छिन्नत्वस्य मुख्यत्वे परिच्छिन्नत्वमौपाधिकं युक्तम्। यद्यपि सर्वेऽनन्ता इतिवत्प्राणानन्त्यश्रुतिरापि नेतुमुचिता तथाऽपि विधान्तरेण तन्नयनार्थमाशङ्क्येत्यर्थः। तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीति परिच्छेदेऽपि प्राणस्य लिङ्गदर्शनाद्वयोर्लि-

---

१ ज. त्तिमत्त्वा न्मनो'। २ झ. ट 'णुश्च मु'। ३ क ख्यप्रा'। ४ ख. ठ. ड. 'ख्यप्रा'। ५ क. 'गतयः। पू'। ६ ख. ठ. 'धिकां श'। ७ झ. 'ल्यन्तं बा'।

(इन्द्रियगणस्य देवताविशेषाधीनत्वकथनम्, अधि० ७)

१-३-२२] इत्येवमादिपदेशेषु । तदुच्यते—आधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण प्राणात्मनैतद्भिुत्वमाम्नायते नाऽऽध्यात्मिकेन । अपि च " समः प्लुषिणा" इत्यादिना साम्यवचनेन प्रतिप्राणिवर्तिनः प्राणस्य परिच्छेद एव प्रदर्श्यते तस्माददोषः ॥ १३ ॥ (६)

(इन्द्रियगणस्य देवताविशेषाधीनत्वकथनम्, अधि० ७)

ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥

ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै स्वस्मै कार्याय प्रभवन्त्याहोस्विदेवताधिष्ठिताः प्रभवन्तीति विचार्यते । तत्र प्राप्तं तावद्यथा स्वकार्यशक्तियोगात्स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति । अपि च देवताधिष्ठितानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां

ङ्गयोर्विरोधे सत्याध्यात्मिकाधिदैविकरूपाभ्यां व्यवस्थेति परिहरति—तदिति । समष्टिव्यष्टिरूपेणानुवृत्तव्यावृत्तरूपेणेत्यर्थः । उभयथा लिङ्गयोर्व्यवस्थासिद्धावपीयमेव कुतो व्यवस्थेत्याशङ्क्य त्वदुक्तलिङ्गस्य प्राणमात्रपरिच्छेदासाधकत्वादाधिदैविकविषयत्वेन समोऽनेनेत्याद्यास्थेयमित्याह—अपि चेति । मुख्यप्राणस्य व्यापित्वपरिच्छिन्नत्वश्रुत्योरित्थमविरोधात्परिच्छिन्नप्राणकारणे ब्रह्मणि समन्वयधीरित्युपसंहरति—तस्मादिति ॥ १३ ॥ (६)

प्राणस्याध्यात्माधिदैवतविभागेनाणुत्वविभुत्वनिरूपणप्रसङ्गेनाऽऽध्यात्मिकानां प्राणानामाधिदैविकादित्याद्यपेक्षां चेष्टामाचष्टे—ज्योतिरादीति । अधिकरणस्य विषयसंशयौ दर्शयति—ते पुनरिति । अन्वयव्यतिरेकाभ्यामाद्यो विकल्पो द्वितीयो देवताधिष्ठितत्वोक्तेरिति विवेक्तव्यम् । चक्षुषा हि रूपाणि पश्यतीत्यादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदित्यादिश्रुतेरविरोधद्वारा देवताधिष्ठितचक्षुरादिकारणे ब्रह्मणि समन्वयसाधनात्पादादिसंगतिः । पूर्वपक्षे श्रुत्योर्विरोधादुक्तसमन्वयासिद्धिः । सिद्धान्ते तदविरोधात्तत्सिद्धिः । केवलव्यतिरेकाभावादेवताया नाधिष्ठातृत्वमिति पूर्वपक्षयति—तत्रेति । न च दृष्टकारणकृप्तावन्वयव्यतिरेकापेक्षायामपि देवतायाः श्रुतेरधिष्ठातृत्वोक्तेर्न तदपेक्षेति वाच्यं देवतायास्तत्राधिष्ठातृत्वादृष्टेर्वागादिभावस्यैव भानान्न च चेतनस्याचेतनभावासिद्धेरधिष्ठातृत्वमेवेति युक्तमचेतनस्याग्न्यादेरचेतनवागादिभावसिद्धेरिति भावः । इतश्च स्वमहिम्नैव प्राणानां प्रवृत्तिरित्याह—अपि चेति । देवताश्चक्षुरादिजन्यकर्मतत्फलयोगिन्यश्चक्षुराद्यभिमानेन प्रवर्तकत्वाज्जीववदित्यनुमित्या तदेव स्फुटयति—

---

१ क. °नैवैत° ।

तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसङ्गाच्छारीरस्य भोक्तृत्वं प्रलीयेत । अतः स्वमहिम्नैवैषां प्रवृत्तिरित्येवं प्राप्त इदमुच्यते— "ज्योतिराद्यधिष्ठानं तु " इति । तुशब्देन पूर्वपक्षो व्यावर्त्यते । ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिराधिष्ठितं वागादि करणजातं स्वकार्येषु प्रवर्तत इति प्रतिजानीते । हेतुं[1] च व्याचष्टे "तदामननात्" इति । तथाह्यामनन्ति—"अग्निर्वाग्भूत्वा मुखं प्राविशत् " [ऐत० २-४] इत्यादि । अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवतात्मनोऽधिष्ठातृत्वमङ्गीकृत्योच्यते । न हि देवतासंबन्धं प्रत्याख्यायाग्नेर्वाचि मुखे वा कश्चिद्विशेषसंबन्धो दृश्यते । तथा " वायुः प्राणो भूत्वा नासिके प्राविशत् " [ऐत० २-४] इत्येवमाद्यपि योजयितव्यम् । तथाऽन्यत्रापि " वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च " [छा० ३-१८-३] इत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्वादिवच[3]-

---

देवतेति । सिद्धसाध्यत्वमाशङ्क्य विरोधाभिप्रायेणाधिष्ठिततया शरीरस्य गमनाद्यसंभवापत्तेः शारीरस्य भोक्तृत्वं न स्यादित्याह—शारीरस्येति । न ह वै देवान्पापं गच्छतीत्यादिना देवताया भोक्तृत्वं निरस्तमित्याशङ्क्य पुण्यफलमेव देवता भुञ्जते न पापफलमित्येतावन्मात्रस्य तत्रेष्टत्वान्नैवमिति मत्वोपसंहरति—अत इति । पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति । तत्र पूर्वपक्षनिषेधं विभजते—तुशब्देनेति । उत्तरपक्षप्रतिज्ञां प्रकटयति—ज्योतिरादिभिरिति । हेतुमवतार्य विवृणोति—हेतुं चेति । तद्भाव एवात्र भाति न च तदधिष्ठातृत्वमित्याशङ्क्य चेतनानामचेतनत्वासिद्धेरधिष्ठातृत्वमेवात्रेष्टमित्याह—अग्नेश्चेति । अधिष्ठानाधिष्ठेयत्वं हित्वोपादानोपादेयत्वमुपेत्याग्न्यादीनामचेतनानामेव वागादिभावेन मुखादिषु प्रवेशः स्यादित्याशङ्क्याऽऽह—न हीति । वाक्चक्षुषोस्तैजसत्वेन तेजोमात्रत्वे सत्यग्न्यादित्यशब्दयोरैकार्थ्येन पौनरुक्त्याद्व्यक्तिभेदेन कारणभेदे चक्षुरादेरादित्यमण्डलादिव्यतिरिक्तस्थले कार्यानुपलब्धिप्रसङ्गाद्देवतानां चेतनानामेवाग्न्यादीनामधिष्ठातृत्वेन संबन्धो वागादिषु विवक्षितो न संबन्धान्तरं सदप्यत्राभिप्रेतमित्यर्थः । अग्निर्वाग्भूत्वेत्याद्युक्तमन्यत्राप्यतिदिशति—तथेति । अग्न्यादीनामधिष्ठातृत्वं वागादीनामधिष्ठेयतेत्यत्रैव हेत्वन्तरमाह—तथेति ।

---

१ ज. ट. 'तुं न्या' । २ क. ङ. ज. ञ. 'त्मनाऽधि' । ३ क. ङ. ञ. 'तिष्ठ्व' । ४ ख. ठ. ड. 'रग' ।

(इन्द्रियगणस्य देवताविशेषाधीनत्वकथनम्, अधि० ७)

नेनैतमेवार्थं द्रढयति। " स वै वाचमेव प्रथमामत्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत् " [बृ० १-३-१२] इति चैवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं द्योतयति। सर्वत्र चाध्यात्माधिदैवतविभागेन वागाद्यग्न्याद्यनुक्रमणमनयैव प्रत्यासत्त्या भवति। स्मृतावपि—

" वागध्यात्ममिति प्राहुर्ब्राह्मणास्तत्त्वदर्शिनः।
वक्तव्यमधिभूतं तु वह्निस्तत्राधिदैवतम् "

इत्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं सप्रपञ्चं[2] दर्शितम्। यदुक्तं स्वकार्यशक्तियोगात्स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति। तदयुक्तम्। शक्तानामपि शकटादीनामनड्वाहा(दा)द्यधिष्ठितानां प्रवृत्तिदर्शनात्। उभयथोपपत्तौ चाऽऽगमादेवताधिष्ठितत्वमेव निश्चीयते ॥ १४ ॥

यदप्युक्तं देवतानामेवाधिष्ठात्रीणां भोक्तृत्वप्रसङ्गो न शारीरस्येति तत्परिहियते—

प्राणवता शब्दात् ॥ १५ ॥

सतीष्वपि प्राणानामधिष्ठात्रीषु देवतासु " प्राणवता " कार्यकरणसंघातस्वामिना शारीरेणैवैषां प्राणानां संबन्धः श्रुतेरवगम्यते। तथाहि श्रुतिः—" अथ यत्रैतदाकाशमनुविषण्णं चक्षुः

तत्रैव लिङ्गान्तरमाह—स वा इति। स प्राणो वाचं प्रथमामुद्गीथकर्मणि प्रधानां मृत्युमतीत्यावहत्प्रापयत्। किं प्रापितवानित्युच्यते यदा हि मुक्ता तदा सा पूर्वमप्यग्निरेव सती मृत्युवियोगे प्रतिबन्धाभावादग्निरेवाभवदित्यर्थः। इतश्चाग्न्यादीनां वागादीनां चाधिष्ठानाधिष्ठेयत्वमित्याह—सर्वत्रेति। उक्तेऽर्थे स्मृतिमपि संवादयति—स्मृताविति। पूर्वपक्षबीजमनुभाषते—यदिति। प्राणानां स्वकार्यशक्तियोगेऽपि चेतनाधिष्ठितानामेव प्रवृत्तिरित्याह—तदिति। शकटादीनां बलीवर्दाद्यधिष्ठितानां प्रवृत्तिर्दृष्टा क्षीरादीनामनधिष्ठितानामपि दध्यादिप्रवृत्तिसिद्धिस्तथाचोभयथासंभवे कथं निर्णयस्तत्राऽऽह—उभयथेति ॥ १४ ॥

उक्तं युक्त्यन्तरं निराकर्तुं सूत्रमवतारयति—यदपीत्यादिना। सूत्रं व्याचष्टे—सतीष्विति। शारीरेणैव भोक्त्रेति शेषः। प्राणानां भोगसाधनत्वेनेति वक्तव्यम्। संबन्धः स्वस्वामिभावः। तामेव श्रुतिमाह—तथाहीति। देहे प्राणप्रवेशानन्तर्यमथशब्दार्थः। यत्र गोलकगतकृष्णसारे छिद्रमाकाशमनुविषण्णमनुगतं चक्षुस्तत्र स आत्मा

---

१ क. °वर्वि°। २ क. ङ. ञ. °ञ्चं प्रद°। ३ क. °र्यकार°। ४ ञ. °नुप्रवि°। ट. °नुप्रविष्टं च°। ५ क. ख. ठ. ड. उक्तयु°। ५ ख. °ष्णतारे।

स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम् " [छा० ८.१२.४] इत्येवंजातीयका शारीरेणैव प्राणानां संबन्धं श्रावयति । अपि चानेकत्वात्प्रतिकरणमधिष्ठात्रीणां देवतानां न भोक्तृत्वमस्मिञ्शरीरेऽवकल्पते । एको ह्यस्मिञ्शरीरे शारीरो भोक्ता प्रतिसंधानादिसंभवादवगम्यते ॥ १५ ॥

तस्य च नित्यत्वात् ॥ १६ ॥ (७)

" तस्य च " शारीरस्यास्मिञ्शरीरे भोक्तृत्वेन नित्यत्वं पुण्यपापोपलेपसंभवात्सुखदुःखोपभोगसंभवाच्च न देवतानाम् । ता हि परस्मिन्नैश्वर्ये पदेऽवतिष्ठमाना न हीनेऽस्मिञ्शरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्ति । श्रुतिश्च भवति " पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति " [बृ० १.५.२०] इति । शारीरेणैव च नित्यः प्राणानां संबन्ध उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात् । " तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे

चक्षुषि भवश्चाक्षुषस्तस्य दर्शनाय चक्षुर्न चैतन्यायेति यावत् । अथशब्दोऽप्यर्थः । दर्शनाद्यर्थं चक्षुराद्यपेक्षायामपि जिघ्राणीति संकल्पं स्वत एव यो वेद स आत्मा तस्य गन्धज्ञानाय घ्राणमिति द्वितीयवाक्यार्थः । विमता देवता नैतच्चक्षुरादिजन्यैधर्मतत्फलयोगिन्य एतच्चक्षुरादिसाधनोत्थरूपादिज्ञानानाश्रयत्वात्पुरुषान्तरवदिति मत्वा श्रुतेस्तात्पर्यमाह—**शारीरेणेति** । इतश्चास्मिन्देहे देवतानां न भोक्तृतेत्याह—**अपि चेति** । अनेकत्वेऽपि तासामत्र भोक्तृत्वे का क्षतिस्तत्राऽऽह—**एको हीति** । योऽहं रूपमद्राक्षं सोऽहं शृणोमीत्येकस्यैव प्रत्यभिज्ञानं प्रतिसंधानम् । बहूनां भोक्तृत्वे विरुद्धक्रियस्य शरीरस्योन्मथनमादिशब्दार्थः ॥ १५ ॥

कदाचिद्देवतानामत्र भोक्तृत्वं कदाचिज्जीवस्येत्यवस्थामाशङ्क्याऽऽह—**तस्येति** । स्वकर्मार्जिते देहे जीवस्य भोक्तृतानियमान्नैवमित्यर्थः । सूत्रार्थं विवृणोति—**तस्येत्यादिना** । न देवतानामत्र भोक्तृतेत्यत्र हेतुमाह—**ता हीति** । देवतानामिह देहे भोगाभावे श्रुतिमप्यनुकूलयति—**श्रुतिश्चेति** । सूत्रव्याख्यान्तरमाह—**शारीरेणेति** । उत्क्रमणादिषु जीवस्य प्राणान्यभिचारात्तस्यैव प्राणस्वामित्वं देवतानां तु परस्वामिकरथसा-

---

१ झ. नियतत्वा° । २ क. °पलम्भसं° । ३ ज. °श्वर्यप° । ४ ट. °त्क्रान्तं । ५ ख. ठ. ड. °न्यकर्म° । ६ ख. झ. ठ. ड. °नाश्र° । ७ क. °रुद्धादिक्रि° ।

(विलक्षणत्वेन प्राणादिन्द्रियाणां पृथक्त्वम् , अधि० ८)

प्राणा अनूत्क्रामन्ति " [बृ० ४-४-२] इत्यादिश्रुतिभ्यः । तस्मात्सतीष्वपि करणानां नियन्त्रीषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति । करणपक्षस्यैव हि देवता न भोक्तृपक्षस्येति ॥ १६ ॥ (७)

(विलक्षणत्वेन प्राणादिन्द्रियाणां पृथक्त्वम्, अधि० ८)

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥

मुख्यश्चैक इतरे चैकादश प्राणा अनुक्रान्तास्तत्रेदमपरं संदिह्यते—किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आहोस्वित्तत्त्वान्तराणीति । किं तावत्प्राप्तं मुख्यस्यैवेतरे वृत्तिभेदा इति । कुतः । श्रुतेः । तथाहि श्रुतिर्मुख्यमितरांश्च प्राणान्संनिधाप्य मुख्यात्मतामितरेषां ख्यापयति " हन्तास्यैव सर्वे रूपमसामेति तँ एतस्यैव सर्वे रूपमभवन् " [बृ० १-५-२१] इति । प्राणैकशब्दत्वाच्चैकत्वाध्यवसायः । इतरथा ह्यन्याप्यमनेकार्थत्वं प्राण-

---

रथिषदधिष्ठातृत्वमात्रमित्यर्थः । देवतानामत्राभोक्तृत्वे फलितमाह—**तस्मादिति** । हेतुमेव स्फोरयति—**करणेति** । आलोकवत्करणोपकारकत्वमेव देवतानां न तज्जन्यभोगवत्त्वमित्यर्थः । तदेवं चक्षुषा हि रूपाणीत्यादिश्रुतेरादित्यश्चक्षुर्भूत्वेत्यादिश्रुतेश्चाऽऽदित्यादिदेवताधिष्ठितचक्षुरादिकारणे ब्रह्मणि समन्वयसिद्धिरित्युपसंहर्तुमितिशब्दः ॥ १६ ॥ (७)

सत्स्विन्द्रियेषु तदधिष्ठातृचिन्ता तान्येव प्राणवृत्तिव्यतिरेकेण नेति चोदिते प्रत्याह—**त इति** । उक्तमनूद्य भेदाभेदश्रुतिभ्यां संदेहमाह—**मुख्यश्चेति** । तत्रेत्येकादशप्राणेष्विति यावत् । पूर्ववदाम्नानबलेन पूर्वपक्षयति—**किमित्यादिना** । अत्र भेदाभेदश्रुत्योरविरोधेन तत्त्वान्तरे मूलकारणे ब्रह्मणि समन्वयोक्त्या पादादिसंगतिः । पूर्वपक्षे श्रुत्योर्विरोधात्तदसिद्धिः । सिद्धान्ते तदविरोधात्तत्सिद्धिः । श्रुतिमेवाऽऽह—**तथाहीति** । हन्तेदानीमस्यैव मुख्यप्राणस्य सर्वे वयं रूपमसाम भवामेत्याशिषं दत्त्वा ते वागादय एतस्यैव मुख्यस्य रूपं बभूवुरिति श्रुत्यर्थः । वाचकशब्दैक्याच्चैकत्वमित्याह—**प्राणेति** । अक्षादिशब्दवदनेकार्थत्वं प्राणशब्दस्य किं न स्यादित्याशङ्क्याऽगतिका हीयं गतिरित्याह—**इतरथेति** । गङ्गादिशब्दवदनेकार्थत्वमाशङ्क्य भेदे

---

१ क. ङ. ज. ञ. °कृत्वप° । २ ङ. ञ. अनूत्क्रान्ता° । ३ ज. °रे प्राणा वृ° । ४ क. तत्रैत° । ञ. तत्र त° ।

शब्दस्य प्रसज्येत। एकत्र वा मुख्यस्येतरत्र लाक्षणिकत्वमापद्येत। तस्माद्यथैकस्यैव प्राणस्य प्राणाद्याः पञ्च वृत्तय एवं वागाद्या अप्येकादशेत्येवं प्राप्ते ब्रूमः—तत्त्वान्तराण्येव प्राणाद्वागादीनीति। कुतः। व्यपदेशभेदात्। कोऽयं व्यपदेशभेदः। ते प्रकृताः प्राणाः श्रेष्ठं वर्जयित्वाऽवशिष्टा एकादशेन्द्रियाणीत्युच्यन्ते श्रुतावेवं व्यपदेशदर्शनात्। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" [मुण्ड० २-१-३] इति ह्येवंजातीयकेषु प्रदेशेषु पृथक्प्राणो व्यपदिश्यते पृथक्चेन्द्रियाणि। ननु मनसोऽप्येवं सति वर्जनमिन्द्रियत्वेन प्राणवत्स्यात्। "मनः सर्वेन्द्रियाणि च" इति पृथग्व्यपदेशेदर्शनात्। सत्यमेतत्। स्मृतौ तु "एकादशेन्द्रियाणि" [मनु० २-८९] इति मनोऽपीन्द्रियत्वेन श्रोत्रादिवत्संगृह्यते। प्राणस्य त्विन्द्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति। व्यपदेशभेदश्चायं तत्त्वभेदेपक्ष उपपद्यते। तत्त्वैकत्वे तु स एवैकः सन्प्राण इन्द्रियव्यपदेशं लभते न लभते चेति विप्रतिषिद्धम्। तस्मात्तत्त्वान्तरभूता मुख्यादितरे ॥ १७ ॥

मानाभावान्मुख्यसंभवे कुतो लक्षणेत्याह—एकत्रेति। नन्वेतस्माज्जायते प्राण इत्यादौ भेदवादाद्वागादीनां प्राणात्तत्त्वान्तरत्वम्। न च मनः सर्वेन्द्रियाणीतिवद्भेदोक्तेर्भेदासाधकत्वम्। तदिन्द्रियत्वस्य स्मृतिसिद्धत्वाद्ब्राह्मणपारिव्राजकवद्भेदवादेऽपि प्रकृते प्रथगुक्तेरेव तत्त्वान्तरत्वधीरित्याशङ्क्याह—अप्यभेदश्रुतेरभेदस्यैव सिद्धेर्भेदोक्तिर्ब्राह्मणपरिव्राजकवदिति मत्वाऽऽह—तस्मादिति। पूर्वपक्षमनूद्य सूत्राद्धेतिरेव प्रतिजानीते—एवमिति। तत्र प्रश्नपूर्वकं हेतुमाह—कुत इति। आकाङ्क्षापूर्वकं हेतुं विवृण्वन्नेव सूत्राक्षराणि योजयति—क इत्यादिना। व्यपदेशभेदं विशदयति—एतस्मादिति। उक्तव्यपदेशभेदस्यातिप्रसङ्गित्वं शङ्कते—नन्विति। एवं सत्युक्तहेतुना वागादीनां मुख्यात्तत्त्वान्तरत्वे सतीति यावत्। उत्सर्गतो भेदव्यपदेशस्य तत्त्वान्तरस्य साधकत्वमङ्गी करोति—सत्यमिति। कथं तर्हीन्द्रियत्वं मनसः सिद्धं तत्राऽऽह—स्मृतौ त्विति। श्रुतिस्मृतिभ्यामपवादाद्भेदव्यपदेशस्यौपचारिकत्वमित्यर्थः। प्राणस्यापि मनोवदिन्द्रियत्वं किं न स्यात्तत्राऽऽह—प्राणस्येति। तत्रापि भेदाभेदवादस्यौपचारिकत्वमाशङ्क्यापवादाभावान्नेत्याह—व्यपदेशेति। उपपत्तिमेव व्यतिरेकेण स्फोरयति—तत्त्वेति। व्यपदेशभेदानुपपत्त्योक्तं भेदमुपसंहरति—तस्मादिति ॥ १७ ॥

---

१ घ. ज. झ. एकस्य। २ ङ. ञ 'ख्यत्वमित'। ३ ङ. ञ. 'त्र वा ला'। ४ क. 'तः। तद्व्यप'। ५ ङ. ञ. च" इत्येवं। ६ क. 'षु पृ'। ७ ज. 'त्वे प्रा'। ८ क. ज. 'ति व्यप'। ९ क. ज. म. 'शभेदद'। १० ज. 'णस्येन्द्रि'। ११ क. ज. 'द ङ'। १२ ख. ठ. ड. भेदवा'।

(विलक्षणत्वेन प्राणादिन्द्रियाणां पृथक्त्वम्, अधि० ८)

कुतश्च तत्त्वान्तरभूताः ।

भेदश्रुतेः ॥ १८ ॥

भेदेन[1] वागादिभ्यः प्राणः सर्वत्र श्रूयते । "ते ह वाचमूचुः" [बृ० १-३-२] इत्युपक्रम्य वागादीनसुरपाप्मविध्वस्तानुपन्यस्योपसंहृत्य वागादिप्रकरणम् " अथ हेममासन्यं प्राणमूचुः " [बृह १-३-७] इत्यसुरविध्वंसिनो मुख्यस्य प्राणस्य पृथगुपक्रम[3]णात्। तथा "मनो वाचं प्राणं तान्यात्मनेऽकुरुत " [१-५-३] इत्येवमाद्या अपि भेदश्रुतय उदाहर्तव्याः । तस्मादपि तत्त्वान्तर[4]भूता मुख्यादितरे ॥ १८ ॥

कुतश्च तत्त्वान्तरभूताः ।

वैलक्षण्याच्च ॥ १९ ॥ (८)

वैलक्षण्यं च भवति मुख्यस्येतरेषां च । सुषु[7]प्तेषु वागादिषु मुख्य एको जागर्ति स एव चैको मृत्युनाऽनाप्त आप्ता[8]स्त्वितरे । तस्यैवं च स्थित्युत्क्रान्तिभ्यां देहधारणपतनहेतुत्वं नेन्द्रियाणाम्।

तत्रैव हेत्वन्तरं पृच्छति—कुत इति । प्राणस्य वागादिभ्यः साक्षाद्भेदोक्तेरपि भेदधीरित्याह—भेदेति । सूत्रं विभजते—भेदेनेति । इन्द्रियवृत्तयः शास्त्रोद्भासिता देवाः स्वाभाविक्यस्ता एवासुरास्तयोः सदाऽन्योन्यमभिभवरूपः सङ्ग्रामस्तत्रासुरपराजयायौद्गात्रं कर्म देवाः प्रारेभिरे ते च देवा वाचमूचुस्त्वं न उद्गायेत्युपक्रम्य तां वाचमसुराः पाप्मनाऽविध्यन्नित्यादिना वागादीनसुरैः पाप्मना कल्याणासङ्गनिमित्तेन विद्धानुक्त्वा वागादिप्रकरणमुपसंहृत्याथेति प्रकरणविच्छेदेन प्रसिद्धमास्ये भवं मुख्यप्राणमूचुर्वागादयस्त्वं न उद्गायेत्युक्त्वा तेन चोद्गाने प्रारब्धे पूर्ववद्भेदायोपक्रममात्रेणाभेद्यपाषाणक्षिप्तलोष्टवदसुरा नष्टा इत्यसुरविध्वंसिनो मुख्यप्राणस्य पृथगुक्तेर्भेदसिद्धिरित्याह—ते हेत्यादिना । भेदे श्रुत्यन्तरमाह—तथेति । तानि त्रीण्यन्नान्यात्मने स्वार्थं प्रजापतिरकुरुत कृतवानिति यावत् । भेदश्रुतिसिद्धमुपसंहरति—तस्मादिति ॥ १८ ॥

तत्रैव हेत्वन्तरं प्रश्नपूर्वकमाह—कुतश्चेति । विरुद्धधर्मवत्त्वादपि भेदधीरिति सूत्रार्थः । तमेवार्थं विवृणोति—वैलक्षण्यं चेति । किमिदं वैलक्षण्यं तदाह—सुषु[11]प्तेष्विति । अर्थक्रियाकृतं वैलक्षण्यान्तरमाह—तस्यैवेति । लक्षणभेदे[12]कृतं फलमु-

---

१ ङ. ञ. 'भूता मुख्यादितरे । भे' । २ क. ङ. ज. ञ. 'न च वा' । ३ ङ. ञ. 'क्रमात् । ४ ङ. ञ. 'भूता मुख्यादितरे । वै' । ५ ङ. ञ. 'ख्यप्राणस्ये' । ६ ङ. ञ. ट. सुप्ते' । ७ क. ज 'सा. इत' । ८ ङ. ञ. 'व प्राणस्य स्थि' । ९ ठ. ङ. 'रूपस' । १० ठ. ङ. 'र्मत्वाद' । ११ ख. ङ. सुप्ते' । १२ क. 'दश्रुतिकृ' ।

विषयालोचनहेतुत्वं चेन्द्रियाणां न प्राणस्येत्येवंजातीयको भूयाल्लँक्षणभेदः प्राणेन्द्रियाणाम्। तस्मादप्येषां तत्त्वान्तरभावसिद्धिः। यदुक्तम् "त एतस्यैव सर्वे रूपमभवन्" [बृ०१-५-२१] इति श्रुतेः प्राण एवेन्द्रियाणीति तदयुक्तम्। तत्रापि पौर्वापर्यालोचनाद्भेदप्रतीतेः। तथाहि "वदिष्याम्येवाहमिति वाग्दध्रे" [बृ० १-५-२१] इति वागादीनीन्द्रियाण्यनुक्रम्य "तानि मृत्युः श्रमो भूत्वोपयेमे" "तस्माच्छ्राम्यत्येव वाक्" इति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभिधाय "अथेममेव नाऽऽघ्रोऽयं मध्यमः प्राणः" [बृ० १-५-२१] इति पृथक्प्राणं मृत्युनाऽनभिभूतं तमनुक्रामति। "अयं वै नः श्रेष्ठः" [बृ० १-५-२१] इति च श्रेष्ठतामस्यावधारयति। तस्मात्तदविरोधेन वागादिषु परिस्पन्दलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न[३] तादात्म्यम्। अत एवं[३] च प्राणशब्द-

---

पसंहरति—**तस्मादिति**। अभेदश्रुतेरुक्तमभेदमनुवदति—**यदिति**। अभेदे तस्यास्तात्पर्याभावान्नैवमित्याह—**तदिति**। अभेदश्रुतिः सप्तम्यर्थः। भेदप्रतीतिं प्रकटयति—**तथाहीति**। दध्रे धारणाभिप्रायं चक्रे। तस्मान्मृत्युना श्रमेणाऽऽक्रान्तत्वादिति यावत्। प्रकारान्तरेण भेदप्रतीतिमाह—**अयमिति**। अभेदश्रुतेस्तर्हि का गतिस्तामाह—**तस्मादिति**। एतस्यैव सर्वे रूपमभवन्निति वाक्यात्तस्मादेत एतेनाऽऽख्यायन्ते प्राणा इति च प्राणश्रुतेरिन्द्रियाणां प्राणवृत्तित्वे प्राप्ते प्राणसंवादादिगतैर्बहुभिर्भेदलिङ्गैरर्थान्तरत्वे च लिङ्गैर्बलीयोभिरबलं वाक्यं बाध्यते। श्रुतिरपीन्द्रियाणां प्राणसंज्ञार्थेत्यन्यपरा लिङ्गैर्बहुभिर्बाध्येति भावः। यत्तु प्राणशब्दस्य मुख्यत्वसंभवे न लक्षणेति तत्राऽऽह—**अत इति**। प्राणस्येन्द्रियेभ्यो भेदो यस्मात्प्रामाणिकस्तस्मादेव तच्छब्दस्य तेषु मुख्ये[५]तायोगाद्युक्ता लक्षणेत्यर्थः। श्रुत्यालोचनातोऽपि प्राणशब्दस्य लक्षणासिद्धिरि-

---

१ क. ङ. ज. ञ. 'भूत'। २ ङ. ञ. न तु ता'। ३ ङ. ञ. 'व प्रा'। ४ क. 'त्वे प्राण'। ५ क. 'ख्यत्वायो'।

(सर्वजगत्सर्जने जीवस्याशक्तत्वादीशस्यैव तन्निर्मातृत्वम्, अधि० ९)

स्येन्द्रियेषु लाक्षणिकत्वसिद्धिः। तथा च श्रुतिः–" त एतस्यैव सर्वे रूपमभवन्। तस्मादेत एतेनाऽऽख्यायन्ते प्राणाः " [बृ० १-५-२१] इति मुख्यप्राणविषयस्यैव प्राणशब्दस्येन्द्रियेषु लाक्षणिकीं वृत्तिं दर्शयति। तस्मात्तत्त्वान्तराणि प्राणादीन्द्रियाणीति ॥ १९ ॥ (८)

(सर्वजगत्सर्जने जीवस्याशक्तत्वादीशस्यैव तन्निर्मातृत्वम्, अधि० ९)

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥

सत्प्रक्रियायां तेजोबन्नानां सृष्टिमभिधायोपदिश्यते। " सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति। तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति " [छा० ६-३-२] तत्र संशयः, किं जीव-

---

त्याह—तथा चेति। अभेदश्रुतेर्गतिमुक्त्वोपसंहरति—तस्मादिति। तदेवं भेदाभेदश्रुत्योरविरोधात्तत्त्वान्तरभूतवागादिमूलकारणे ब्रह्मणि समन्वयधीरित्युपसंहर्तुमितीत्युक्तम् ॥ १९ ॥ (८)

उत्पत्तिरुत्पादनेति व्यापारावुत्पद्यमानोत्पादकगतौ [3]सिद्धौ। तत्र जगदुत्पत्तिश्रुतिविरोधोऽतीतेन संदर्भेण निरस्तः। संप्रत्युत्पादनाविषयश्रुतिविरोधो निरस्यते। तत्रापि भूतसूक्ष्मोत्पादनं पारमेश्वरमेवेति श्रुतिष्वविप्रतिपन्नम्। भौतिकनिर्माणश्रुतिषु विप्रतिपत्तिरिति तन्निरासार्थमाह—संज्ञेति। नामरूपाभेदात्करणानां प्राणाभेदशङ्कानिरासप्रसङ्गेन नामरूपव्याकरणं किंकर्तृकमिति निरूपयतीति विशेषसंगतिं गृहीत्वाऽधिकरणस्य विषयमाह—सदिति। उपदेशमेव दर्शयति–सेयमिति। ईक्षणप्रयोजनं यद्बहुभवनमुक्तं तदद्यापि न सिद्धमिति पुनरीक्षां कृतवती सदाख्या देवतेत्यर्थः। ईक्षणप्रकारमभिनयति—हन्तेति। इदानीमहमिमा यथोक्तास्तेजोबन्नाख्यास्तिस्रो देवता व्यवहारापेक्षायामनेन पूर्वसृष्टावनुभूतेनाधुना स्मृतेन जीवेनाऽऽत्मना बुद्ध्यादिभूतमात्रायामादर्शे मुखवदनुप्रविश्य नाम[4] च रूपं च ते व्याकरवाणीदमस्य नामेदं च रूपमिति [5]स्पष्टं करवाण्येवमीक्षित्वा पुनरपि देवताव्यवहारार्थमीक्षां चकारेत्याह—तासामिति। तिसृणां देवतानामेकैकां देवतां त्रिवृतं त्रिवृतं तेजोबन्नात्मना व्यात्मिकां व्यात्मिकां करवाणि तथाच स्थूलभूतेषु व्यवहारसिद्धिरित्यर्थः। नामरूपव्याकरणं विषयीकृत्यानेन जीवेनेत्यस्य व्याकरवाणीत्यनेन वाऽनुप्रविश्येत्यनेन वा संबन्धसंभावनया संदेहमाह—तत्रेति। भौतिकसृष्टिश्रुतिविरोधनिरासेन परस्मि-

---

१ क. ज. इतीति। २ ङ. ञ. 'णाद्वागादीन्द्रि'। ३ ख. प्रसिद्धौ। ४ ठ. 'म रू'। ५ क. 'दं रू'। ६ क ख. विस्पष्टं।

कर्तृकमिदं नामरूपव्याकरणमाहोस्वित्परमेश्वरकर्तृकमिति । तत्र प्राप्तं तावज्जीवकर्तृकमेवेदं नामरूपव्याकरणमिति । कुतः । अनेन जीवेनाऽऽत्मनेति विशेषणात् । यथा लोके चारेणाहं परसैन्यमनुप्रविश्य संकलयानीत्येवंजातीयके प्रयोगे चारकर्तृकमेव तत्सैन्यसंकलनं हेतुकर्तृत्वाद्राजाऽऽत्मन्यध्यारोपयति संकलयानीत्युत्तमपुरुषप्रयोगेण । एवं जीवकर्तृकमेव सन्नामरूपव्याकरणं हेतुकर्तृत्वाद्देवताऽऽत्मन्यध्यारोपयति व्याकरवाणीत्युत्तमपुरुषप्रयोगेण । अपि च डित्थडवित्थादिषु नामसु घटशरावादिषु च रूपेषु जीवस्यैव व्याकर्तृत्वं दृष्टम् । तस्माज्जीवकर्तृकमेवेदं नामरूपव्याकरणमित्येवं प्राप्तेऽभिधत्ते—"संज्ञामूर्तिक्लृप्तिस्तु" इति। तुशब्देन पक्षं व्यावर्तयति । संज्ञामूर्तिक्लृप्तिरिति नामरूपव्याक्रियेत्येतत् । " त्रिवृत्कुर्वतः " इति परमेश्वरं लक्षयति त्रिवृत्करणे तस्य निरपवादकर्तृत्वनिर्देशात् । येयं संज्ञाक्लृप्तिर्मूर्तिक्लृप्तिश्चाग्निरादित्यश्चन्द्रमा विद्युदिति तथा कुशकाशपलाशादिषु पशुमृग-

---

न्नेव तत्कारणे ब्रह्मणि समन्वयसाधनात्पादादिसंगतिः । पूर्वपक्षे जीवस्यैव भौतिकसृष्टिकारणत्वात्तस्मिन्नेव समन्वयाद्ब्रह्मणि तदसिद्धिः । सिद्धान्ते परस्यैव तद्धेतुत्वात्तत्रैव तत्सिद्धिरित्यभिसंधाय पूर्वपक्षमाह—तत्रेत्यादिना । जीवेनेत्यस्य प्रविश्येत्यनेन संबन्धान्न जीवस्य व्याकर्तृत्वमिति शङ्कते—कुत इति । क्रियापदस्य प्राधान्यात्तेनान्येषामन्वयाज्जीवेनेत्यस्य व्याकरवाणीत्यनेन संगतिरित्याह—अनेनेति । सेयं देवतेत्युपक्रम्य व्याकरवाणीत्युत्तमपुरुषप्रयोगाद्देवताया व्याकर्तृत्वं न जीवस्येत्याशङ्क्योपचारादुत्तमपुरुषप्रयोगं दृष्टान्तेन दर्शयति—यथेत्यादिना । उपचारान्मुख्यग्रहणं युक्तमित्याशङ्क्य जीवेनेति विशेषणवैयर्थ्यान्मैवमिति मत्वा दार्ष्टान्तिकमाह—एवमिति । जीवस्य प्रवेष्टृत्वं ब्रह्मणो व्याकर्तृत्वमित्यङ्गीकारे समानकर्तृकत्वाभावात्क्त्वाप्रत्ययविरोधः स्यादिति भावः । नदीसमुद्रादिव्याकरणे जीवस्यायोग्यत्वाद्ब्रह्मणस्तत्र कर्तृतेत्याशङ्क्यानुमानमाह—अपि चेति । विप्रतिपन्नमिदमा परामृश्यते । भौतिकसृष्टिश्रुतिषु विरोधान्न सर्वकारणे ब्रह्मणि समन्वयसिद्धिरिति पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति । सूत्रं पदशो विभजते—तुशब्देनेति । पदार्थमुक्त्वा प्रतिज्ञावाक्यार्थं स्फुटयति—येयमिति । अधिदैवविषयमन्यद्व्युहारणम् । अधिभूतविषयं कुशादि । पश्चाद्यध्यात्मविषयमिति भेदः । न केवलं जात्युपाधावनेकप्रकारं किंतु व्यक्त्युपाधाव-

---

१ ब. °यामीत्ये° । २ ब. °यामीत्यु° । ३ क. °च क्रिश्वकुमित्या° । ४ क. °टकरकादि° । ५ ख. ठ. ड. °णे स° ।

(सर्वजगत्सर्जने जीवस्याशक्तत्वादीशस्यैव तन्निर्मातृत्वम्, अधि० ९)

मनुष्यादिषु च प्रत्याकृति प्रतिव्यक्ति चानेकप्रकारा सा खलु परमेश्वरस्यैव तेजोबन्नानां निर्मातुः कृतिर्भवितुमर्हति। कुतः। "उपदेशात्"। तथाहि "सेयं देवता" इत्युपक्रम्य "व्याकरवाणि" इत्युत्तमपुरुषप्रयोगेण परस्यैव ब्रह्मणो व्याकर्तृत्वमिहोपदिश्यते। ननु "जीवेन" इति विशेषणाज्जीवकर्तृकत्वं व्याकरणस्याध्यवसितम्। नैतदेवं "जीवेन" इत्येतत् "अनुप्रविश्य" इत्यनेन संबध्यत आनन्तर्यान्न "व्याकरवाणि" इत्यनेन। तेन हि संबन्धे व्याकरवाणीत्ययं देवताविषय उत्तमपुरुष औपचारिकः कल्प्येत। न च गिरिनदीसमुद्रादिषु नानाविधेषु नामरूपेष्वनीश्वरस्य जीवस्य व्याकरणसामर्थ्यमस्ति। येष्वपि चास्ति सामर्थ्यं तेष्वपि परमेश्वरायत्तमेव तत्। न च जीवो नाम परमेश्वरादत्यन्तभिन्नश्चार इव राज्ञ आत्मनेति विशेषणात्। उपाधिमात्रनिबन्धनत्वाच्च जीवभावस्य। तेन तत्कृतमपि नामरूपव्याकरणं परमेश्वरकृतमेव भवति। परमेश्वर एव च नामरूपयोर्व्याकर्तेति सर्वोपनिषत्सिद्धान्तः। "आकाशो ह वै नाम नामरूपयोर्निर्वहिता" [छा० ८-१४-१] इत्यादिश्रुतिभ्यः। तस्मात्परमेश्वरस्यैव त्रिवृत्कुर्वतः कर्म नामरूप-

---

पीत्याह—प्रतीति। कारणविषयविप्रतिषेधनिषेधायावधारणम्। तत्र सौत्रं[1] हेतुं प्रश्नपूर्वकमादाय व्याचष्टे—कुत इति। परोक्तमनुवदति—नन्विति। आकाङ्क्षासंनिधियोग्यतावशेनान्वयाज्जीवेनेत्यस्य प्रविशेत्यनेन संनिधानाज्जीवस्य च सर्वनामरूपव्याकरणे योग्यत्वाभावात्तस्य प्रवेशेनैव संबन्धो नान्येनेत्याह—नैतदिति। उपसर्जनस्योपसर्जनेनासंबन्धात्प्रधानेन क्रियापदेनैव जीवपदस्य[2] संगतिरुक्तेत्याशङ्क्य व्याकरवाणीत्युत्तमपुरुषस्यौपचारिकत्वापत्तेर्भैवमित्याह—तेनेति। परोक्तमनुमानं योग्यानुपलब्धिविरोधेन निरस्यति—न चेति। आगमविरोधाच्चायुक्तमनुमानमित्याह—येष्विति। यत्तु कर्तृभेदे क्त्वाप्रत्ययविरोध इति तत्राऽऽह—न चेति। कथं तर्हि व्यपदेशभेदस्तत्राऽऽह—उपाधीति। औपाधिके भेदे वास्तवे चाभेदे फलितमाह—तेनेति। जीवब्रह्मणोरैक्याज्जीवकर्तृकमपि व्याकरणं ब्रह्मकर्तृकं चेत्तर्हि जीवकर्तृकमेव सद्ब्रह्मकर्तृकं किं न स्यादित्याशङ्क्य ब्रह्मकर्तृकत्वस्यैव वेदान्तेषु प्रसिद्धेर्भैवमित्याह—परमेश्वर इति। सूत्रार्थमुपसंहरति—तस्मादिति। भूतविषयनामरूपव्याकरणस्य त्रिवृत्करणात्पूर्वमपि संभवात्त्रिवृत्कुर्वतो नामरूपव्याकरणं कर्मेति कथमुक्तमित्याशङ्क्य भौति-

---

१ ब. सौत्रहे'। २ क. जीवेनेत्यस्य प'।

व्याकरणम् । त्रिवृत्करणपूर्वकमेवेदमिह नामरूपव्याकरणं विवक्ष्यते प्रत्येकं नामरूपव्याकरणस्य तेजोबन्नोत्पत्तिवचनेनैवोक्तत्वात् । तच्च त्रिवृत्करणमग्न्यादित्यचन्द्रविद्युत्सु श्रुतिर्दर्शयति " यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य " [छा० ६-४-१] इत्यादिना । तत्राग्निरितीदं रूपं व्याक्रियते । सति च रूपव्याकरणे विषयप्रतिलम्भादग्निरितीदं नाम व्याक्रियते । एवमेवाऽऽदित्यचन्द्रविद्युत्स्वपि द्रष्टव्यम् । अनेन चाग्न्याद्युदाहरणेन भौमाम्भसतैजसेषु त्रिष्वपि द्रव्येष्वविशेषेण त्रिवृत्करणमुक्तं भवति । उपक्रमोपसंहारयोः साधारणत्वात् । तथाह्यविशेषेणैवोपक्रमः " इमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति " [छा० ६-३-४] इति । अविशेषेणैव चोपसंहारः " यदु रोहितमिवाभूदिति तेजसस्तद्रूपम् " [छा० ६-४-६] इत्येवमादिः " यद्वविज्ञातमिवाभूदित्येतासामेव देवतानां समास इति " [छा० ६-४ ७] एवमन्तः ॥ २० ॥

तासां तिसृणां देवतानां बहिस्त्रिवृत्कृतानां सतीनामध्यात्ममपरं त्रिवृत्करणमुक्तम् " इमास्तिस्रो देवताः पुरुषं प्राप्य

कविषयमेतदिति विशेषणसिद्धिमाह—त्रिवृदिति । इहेति व्याकरणवाक्योक्तिः । किं तत्त्रिवृत्करणं यद्व्याकरणात्पूर्वभावीत्याशङ्क्याऽऽह—तच्चेति । यथा छान्दोग्ये भूतत्रयसृष्टिस्तैत्तिरीयश्रुत्यनुरोधाद्भूतपञ्चकविषयोक्ता तथाऽत्रापि त्रिवृत्करणं पञ्चीकरणाभिप्रायं द्रष्टव्यं श्रुत्यन्तरे पञ्चानां भूतानां सृष्टेरुक्तत्वात् । किं पुनर्नामरूपव्याकरणं तदाह—तत्रेति । अन्नाद्युक्तन्यायमतिदिशति—एवमिति । आदित्यादीनां तैजसानामेव श्रुत्योक्तेर्न सर्वत्र त्रिवृत्करणमित्याशङ्क्याऽऽह—अनेनेति । यस्य त्रिवृत्करणं गम्यते तस्यैवास्तु किमतिदेशेनेत्याशङ्क्याऽऽह—उपक्रमेति । तिस्रस्तावदिमास्तेजोबन्नाख्या देवतास्तासामेकैका देवता त्रिवृत्त्रिवृत्त्रयात्मिका त्र्यात्मिका भवतीत्युपक्रमार्थः । उपसंहारस्थावितिशब्दौ क्रमेण यच्छब्दाभ्यां संबध्येते । अविज्ञातं विशेषरूपेणादृष्टम् । इवकारावुभयत्र दृष्टरूपस्याऽऽभासत्वार्थौ । एतासां तिसृणामेव देवतानां समासः समुदाय इति यावत् ॥ २० ॥

बाह्यं त्रिवृत्करणमुक्त्वाऽऽध्यात्मिकेऽस्मिन्मानं वदन्नुत्तरसूत्रसंगतिमाह—तासामिति । अध्यात्मं देहे त्रिवृत्करणमपरं कार्यत्रयरूपेण वर्तनमिति यावत् । याः खल्विमा देवतास्तिस्रो बहिस्त्रिवृत्कृता दर्शितास्तासामेकैका देवता पुरुषं शरीरं प्राप्य

---

१ क. ज. °षेणोप° । २ क. °वुक्तं न्या° । ३ ख. ठ. ड. °त्मिके तस्मि° । ४ क. झ. °तैमान° ।

(सर्वज्ञगत्सर्जने जीवस्याशक्तत्वादीशस्यैव तन्निर्माढृत्वम्, अधि० ९)

त्रिवृत्त्रिवृदेकैका भवति " [छा० ६-४-७] इति । तदिदानीमाचार्यो यथाश्रुत्येवोपदर्शयत्याशङ्कितं कंचिद्दोषं परिहरिष्यन् ।

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥

भूमेर्मांसत्रिवृत्कृतायाः पुरुषेणोपभुज्यमानाया मांसादिकार्यं यथाशब्दं निष्पद्यते । तथाहि श्रुतिः " अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः " [छा० ६-५-१] इति । त्रिवृत्कृता भूमिरेवैषा व्रीहियवाद्यन्नरूपेणाद्यत इत्यभिप्रायः । तस्याश्च स्थविष्ठं रूपं पुरीषभावेन बहिर्निर्गच्छति । मध्यममध्यात्मं मांसं वर्धयति । अणिष्ठं तु मनः । एवमितरयोरप्तेजसोर्यथाशब्दं कार्यमवगन्तव्यं मूत्रं लोहितं प्राणश्चापां कार्यम् । अस्थि मज्जा वाक्तेजस इति ॥ २१ ॥

अत्राऽऽह यदि सर्वमेव त्रिवृत्कृतं भूतभौतिकमविशेषश्रुतेः " तासां त्रिवृतं त्रिवृतमेकैकामकरोत् " [छा० ६ ३-४] इति । किंकृतस्तर्ह्ययं विशेषव्यपदेशः, इदं तेज इमा आप इदमन्नमिति ।

त्रिवृत्कार्यत्रयरूपेण व्यात्मिका व्यात्मिका भवतीत्यर्थः । तदित्याध्यात्मिकं त्रिवृत्करणमुच्यते । सर्वस्य त्रिवृत्कृतत्वाविशेषे कथं व्यवहारविशेषः स्यादित्याशङ्क्याऽऽह—**आशङ्कितमिति** । उत्तरसूत्रेण शङ्कितं दोषमुद्भाव्य परिहरिष्यन्नादौ त्रिवृत्करणं विषयं दर्शयतीति योजना । ननु वैशेषिका मनसो नित्यत्वं सांख्या वाङ्मनसयोराहंकारिकत्वमाहुरन्नमयता च मनसोऽन्नसबन्धाल्लक्षणार्था तदुपयोगे तत्स्वास्थ्यात् । वाचोऽपि तेजोमयत्वं पाटवेन तेजःसाम्यमेव तत्राऽऽह—**मांसादीति** । मनआदि भौमादीति वक्तव्ये मांसादिवचनं सिद्धेन सह साध्यस्य मनआदेर्दृष्टान्तार्थम् । यथा मांसादि भौममेवं वाङ्मनसे अपि तैजसभौमे शब्दवशाज्ज्ञेये इत्यर्थः । सूत्राक्षराणि व्याचष्टे—**भूमेरिति** । यथाशब्दमित्युक्तं विशदयति—**तथाहीति** । भूमेर्मांसादिभावः सूत्रितस्तदयुक्तमोदनस्यैव तथात्वदृष्टेरित्याशङ्क्याऽऽह—**त्रिवृदिति** । सूत्रतात्पर्यमुक्त्वा श्रुतितात्पर्यमाह—**तस्याश्चेति** । इतरयोश्चेति भागं व्याकरोति—**एवमिति** । तदेव कार्यमुदाहरति—**मूत्रमिति** । जलाधीनस्थितित्वात्तत्कार्यत्वं प्राणस्योपचर्यते श्रुत्यन्तरे तस्य वायुकार्यत्वसिद्धेरन्यत्रापवादाभावान्मुख्यमेतत्कार्यत्वमिति विवेकः ॥ २१ ॥

अविशेषेण सर्वेषा व्यात्मकत्वे कथमन्नादिशब्दवाच्यतेति चोदयति—**अत्रेति** ।

---

१ ङ. झ. ञ. 'श्लेवो' । २ झ. 'त्रितदो' । ३ क झ. ठ. ड. 'यतां च । ४ ख. ठ. ढ. 'बन्धे लक्ष' । ५ क. 'रेऽस्य ।

तथाऽध्यात्ममिदमन्नस्याशितस्य कार्यं मांसादि । इदमपां पीतानां कार्यं लोहितादि । इदं तेजसोऽशितस्य कार्यमस्थ्यादीति । अत्रोच्यते—

वैशेष्यात्तु तद्वादस्तद्वादः ॥ २२ ॥ (९)

तुशब्देन चोदितं दोषमपनुदति । विशेषस्य भावो वैशेष्यं भूयस्त्वमिति यावत् । सत्यपि त्रिवृत्करणे क्वचित्कस्यचिद्भूतधातोर्भूयस्त्वमुपलभ्यते, अग्नेस्तेजोभूयस्त्वमुदकस्याब्भूयस्त्वं पृथिव्या अन्नभूयस्त्वम्, इति । व्यवहारप्रसिद्ध्यर्थं चेदं त्रिवृत्करणम् । व्यवहारश्च त्रिवृत्कृतरज्जुवदेकत्वापत्तौ सत्यां न भेदेन भूतत्रयगोचरो लोकस्य प्रसिध्येत् । तस्मात्सत्यपि त्रिवृत्करणे वैशेष्यादेव तेजोबन्नविशेषवादो भूतभौतिकविषय उपपद्यते । तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति ॥ २२ ॥ (९)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये द्वितीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥
इति द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

बाह्ये व्यवहारविशेषासंभवमुक्त्वा देहेऽपि तदसंभवमाह—तथेति । उत्तरसूत्रमवतारयति—अत्रेति । तदक्षराणि व्याचष्टे—तुशब्देनेति । भूयस्त्वं विवृणोति—सत्यपीति । दृष्टं भूयस्त्वमुदाहरति—अग्नेरिति । अफलत्वादप्रतिपाद्यं त्रिवृत्करणमित्याशङ्क्याऽऽह—व्यवहारेति । एकैकभूतगोचरत्वेनापि व्यवहारस्य सुकरत्वान्न तादर्थ्येन त्रिवृत्करणमित्याशङ्क्याऽऽह—व्यवहारश्चेति । केवलभूततन्मात्राणामिन्द्रियागोचरत्वात्तदर्थं तदुक्तिरित्यर्थः । उक्तमनूद्यावशिष्टं भागं व्याचष्टे—तस्मादिति । विरोधसमाधिमुपसंहरन्पदाभ्यासस्य तात्पर्यमाह—तद्वाद इति ॥ २२ ॥ (९)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृते शारीरकभाष्यन्यायनिर्णये द्वितीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥
द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

---

१ क. अ. 'लक्ष्यते ।

ॐ तत्सद्ब्रह्मणे नमः ।

अथ साधनाख्यस्तृतीयोऽध्यायः ।

तत्र जीवस्य परलोकगमनागमनविचारपूर्वकवैराग्यप्रतिपादकः प्रथमः पादः ।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम् , अधि० १)

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

द्वितीयेऽध्याये स्मृतिन्यायविरोधो वेदान्तविहिते ब्रह्मदर्शने परिहृतः परपक्षाणां चानपेक्षत्वं प्रपञ्चितं श्रुतिविप्रतिषेधश्च परिहृतः । तत्र च जीवव्यतिरिक्तानि तत्त्वानि जीवोपकरणानि ब्रह्मणो जायन्त इत्युक्तम् । अथेदानीमुपकरणोपहितस्य जीवस्य संसारगतिप्रकारस्तदवस्थान्तराणि ब्रह्मसतत्त्वं विद्याभेदा-

---

जीवोपकरणभूतभौतिकजन्मादिनिरूपणानन्तरं तदुपहितजीवस्य संसारप्रकारं निरूपयितुं देहान्तरारम्भे भूतसूक्ष्मपरिष्वक्तस्यैव गमनमिति तावदाह—तदन्तरेति । हेतुहेतुमद्भावसंबन्धमध्याययोर्वक्तुं पूर्वाध्यायार्थं संक्षिपति—द्वितीय इति । ब्रह्मणि निरपवादे समन्वये स्मृतिन्यायश्रुतिविरोधनिरासेनानध्यवसायरूपाप्रामाण्याभावात्तार्तीयविचारावसरः स्यादिति हेतुहेतुमत्त्वलक्षणसंगतिरिति भावः । अनन्तरपादस्यावान्तरसंगत्यर्थं तदुपयुक्तमनुद्रवति—तत्र चेति । तथाच तैरुपहितस्य जीवस्य संसारप्रकारविचारोऽवतरतीति शेषः । इदानीं तार्तीयमर्थं सौकर्यार्थं पादशो विभज्य दर्शयति—अथेति । वैराग्यपादार्थं संगृह्य पदार्थं संगृह्णाति—तदिति । संसाराद्विरक्तस्य मुमुक्षोर्मोक्षहेत्वपरोक्षवाक्यार्थज्ञानसाधनलक्ष्यपदार्थज्ञानाय जीवस्यावस्थान्तराणि ब्रह्मस्वरूपं च निरूप्यत इत्यर्थः । तृतीयपादार्थमाह—विद्येति । निर्गुणब्रह्मवाक्यस्थापुनरुक्तपदोपसंहाराय मन्दाधिकारिणां सगुणोपासनैकरूप्याय च सर्वशाखासु विद्या भिन्नाऽभिन्ना वा गुणानामुपसंहारो न वेति विचार्यत इत्यर्थः । चतुर्थपादार्थमाह—

---

१ झ. 'तीयाध्या' । २ क. ट. 'ह्मत' । ३ क. ख. ठ. ड. 'द्भावं सं' । ४ क. ख. 'क्षणासं' । ५ क. ख. ठ. 'दार्थपादार्थ । ६ ख. ठ. गृह्णाति ।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम्, अधि० १)

भेदौ गुणोपसंहारानुपसंहारौ सम्यग्दर्शनात्पुरुषार्थसिद्धिः सम्यग्दर्शनोपायविधिप्रभेदो मुक्तिफलानियमश्चेत्येतदर्थजातं तृतीये[1] निरूपयिष्यते प्रसङ्गागतं च किमप्यन्यत्। तत्र प्रथमे तावत्पादे पञ्चाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते[2] वैराग्यहेतोः। "तस्माज्जुगुप्सेत" [छा० ५-१०] इति चान्ते श्रवणात्। जीवो मुख्यप्राणसचिवः सेन्द्रियः समनस्कोऽविद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रपद्यत इत्येतदवगतम्। "अथैनमेते

सम्यगिति। विरक्तस्य लक्ष्यपदार्थज्ञस्य[3] सर्वशाखास्वपुनरुक्तशब्दोपसंहारेणैकरूपवाक्यज्ञानवतो यज्ज्ञानं तावन्मात्रादेव पुरुषार्थस्तद्धेतूनां च यज्ञादिविधीनां[4] च शमादिविधीनां च बहिरङ्गत्वान्तरङ्गत्वभेदः शुद्धसत्त्वानां बहिरङ्गापोहेनान्तरङ्गग्रहायोच्यते। यस्मिञ्जन्मनि ज्ञानसाधनानुष्ठानं तस्मिन्नेव जन्मनि ज्ञानोदयेन मुक्तिरित्यनियमो जन्मान्तरीयसंस्कारस्यापि हेतुत्वादित्यर्थः। अध्यायार्थं संक्षिप्य निगमयति—**इत्येतदिति**। लोकायतिकमतनिरसनमपि समधिकमत्रास्तीत्याशङ्क्याऽऽह—**प्रसङ्गेति**। अध्यायार्थं संक्षिप्य पादार्थं संक्षिपति—**तत्रेति**। पञ्चसु द्युपर्जन्यपृथिवीपुरुषयोषित्स्वग्निदृष्ट्युपासनं पञ्चाग्निविद्या तामाश्रित्य संसारे पुण्यपापफलगतिप्रकारोऽत्र निरूप्यत इति यावत्। तस्यापि प्रदर्शनमेव न प्रतिपादनमिति मत्वोक्तं प्रदर्श्यत इति। पुमर्थसाधनमेवात्र निरूप्यं किमर्थं संसारगतिप्रदर्शनं तत्राऽऽह—**वैराग्येति**। अनेकायासं कर्म कृत्वाऽपि न स्वातन्त्र्यं क्वापि लभ्यते तेन कृतं कर्मतत्फलाभ्यामित्यर्थः। पञ्चाग्निविद्योपास्तिरस्मिन्प्रकरणे विधीयते न वैराग्याय संसारगतिरित्याशङ्क्योपसंहारालोचनया संसारगतिरत्र विवक्षितेत्याह—**तस्मादिति**। यस्मात्कर्मफलभूतः संसारो गत्यागतिरूपोऽनर्थस्तस्माज्जुगुप्सां घृणां कुर्वीत कर्मफले विद्वानिति **पञ्चाग्निविद्योपसंहारे** श्रवणादत्र वैराग्याय संसारगतिरभिहिता। यद्यपि विरक्तस्याधिकाराद्वैराग्यं शास्त्रादावधिकारिविशेषणं सिद्धं तथाऽपि तदेव युक्त्या दृढी क्रियत इति भावः। आद्यपादतात्पर्यमुक्त्वा तदवयवाद्याधिकरणविषयमाह—**जीव इति**। देहान्तरप्राप्तौ सहायसत्त्वं दर्शयति—**मुख्येति**। तत्र प्रधानकारणमाह—**अविद्येति**। अनाद्यनिर्वाच्या चित्प्रतिबिम्बनिमित्ततया जीवत्वहेतुरविद्या। कर्म शुभाशुभव्याप्तिश्ररूपम्। पूर्वप्रज्ञा जन्मान्तरीयसंस्कारः। ते परिग्रहाः प्रधानभूताः संसरणे **यस्य** स तथा। प्रमितस्य विषयत्वात्किमत्र प्रमाणं तदाह—**अथेति**। देहान्तरप्रेप्सानन्तर्य-

---

१ क. ङ. °येऽध्याये चिन्तयिं°। ज. °येऽध्याये निं°। २ झ. °तिभें°। ३ ठ. ड. °र्थस्य। ४ ख. झ. °नां च। ५ ख. ठ. ड. °भिमता। ६ क. °वाद्यधिं°।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम्, अधि० १)

प्राणा अभिसमायन्ति " [बृ० ४-४-१] इत्येवमादेः " अन्यन्नवतरं कल्याणतरं रूपं कुरुते " [बृ० ४-४-४] इत्येवमन्तात्संसारप्रकरणस्थाच्छब्दात् । धर्माधर्मफलोपभोगसंभवाच्च । स किं देहबीजैर्भूतसूक्ष्मैरसंपरिष्वक्तो गच्छत्याहोस्वित्संपरिष्वक्त इति चिन्त्यते । किं तावत्प्राप्तम् । असंपरिष्वक्त इति । कुतः । करणोपादानवद्भूतोपादानस्याश्रुतत्वात् । " स एतास्तेजोमात्राः समभ्याददानः " [बृ० ४-४-१] इति ह्यत्र तेजोमात्राशब्देन करणानामुपादानं संकीर्तयति । वाक्यशेषे चक्षुरादिसंकीर्तनात् । नैवं भूतमात्रोपादानसंकीर्तनमस्ति । सुलभाश्च सर्वत्र भूतमात्राः । यत्रैव देह आरब्धव्यस्तत्रैव सन्ति ततश्च तासां नयनं निष्प्रयोजनम् । तस्मादसंपरिष्वक्तो यातीति ।

एवं प्राप्ते पठत्याचार्यः—" तदन्तरप्रतिपत्तौ रंहति संपरि-

मथशब्दार्थः । न केवलं शब्दादेव तदवगतं युक्तितश्चेत्याह—धर्मेति । नियतदेशकालफलभोगान्यथानुपपत्त्याऽपि देहान्तरसंचरणं सिद्धमित्यर्थः । देहान्तरसंचारिणं जीवं विषयीकृत्य वादिविप्रतिपत्तेः संदेहमाह—स किमिति । देहशब्दो भाविविषयः । आद्ये निराश्रयप्राणगत्यभावान्न वैराग्यम् । चरमे भूतपरिष्वङ्गे प्राणानां नरकादिगतेर्वैराग्यम् । इत्युभयत्र फलम् । अत्र च परिष्वक्तरंहणनिरूपणेन वैराग्यदार्ढ्यकरणादधिकारिसिद्धौ तस्य शास्त्रे प्रवृत्तिरिति पादादिसंगतिरित्यङ्गीकृत्य पूर्वपक्षमाह—किमित्यादिना । करणैरिव भूतैरपि परिष्वक्तस्यैव रंहणमिति शङ्कते—कुत इति । वैषम्यं दर्शयन्नुत्तरमाह—करणेति । करणोपादाने मानमाह—स इति । तेजोमात्राशब्दस्य करणविषयत्वे हेतुमाह—वाक्येति । स यत्रैष चाक्षुषः पुरुष इत्यादाविति यावत् । प्रश्नप्रतिवचनाभ्यामपां गमने गम्यमाने कथं भूतमात्राणामुपादानासंकीर्तनं तत्राऽऽह—नैवमिति । आपः पुरुषवचसो भवन्तीत्यपां पुरुषवचनक्रियायोगमात्रं भाति न पुरुषोपादानत्वम् । न च पञ्चसु स्थानेष्वपां गमनमस्ति श्रद्धादीनामेव होम्यत्वावगमात् । यद्यपि करणानां भौतिकत्वात्तदुपादानश्रुत्यैव भूतोपादानमर्थाक्षिप्तं तथाऽपीन्द्रियोपादानापञ्चीकृतभूतांशान्यभूतविवक्षयेदमश्रुतत्वमिति भावः । देहान्तरारम्भान्यथानुपपत्त्या भूतपरिष्वक्तस्य गमनमित्याशङ्क्याऽऽह—सुलभाश्चेति । पारिष्वङ्गे मानफलयोरभावे फलितमुपसंहरति—तस्मादिति ।

पूर्वपक्षमनुभाष्यं प्रतिज्ञामवतार्य व्याकरोति—एवमिति । पारिष्वङ्गे मानाभावान्नै-

---

१ ङ. ञ. इत्यत्र । २ ठ. ड. °ग्यधीद्दं° । ३ ङ. °दानसं° । ४ ख. ख. °ष्य सिद्धान्तप्र° ।

ष्वक्तः " इति । तदन्तरप्रतिपत्तौ देहाद्देहान्तरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तो रंहति गच्छतीत्यवगन्तव्यम् । कुतः । " प्रश्ननिरूपणाभ्याम् । " तथाहि प्रश्नः " वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति " [छा० ५-३-३] इति । निरूपणं च प्रतिवचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाऽऽहुतीर्दर्शयित्वा "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति " [छा० ५-९-१] इति । तस्माद्द्विः परिवेष्टितो जीवो रंहति व्रजतीति गम्यते । नन्वन्या श्रुतिर्जलूकावत्पूर्वदेहं न मुञ्चति यावन्न देहान्तरमाक्रमतीति दर्शयति " तद्यथा तृणजलायुका " [बृ० ४-४-३] इति । तत्राप्परिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषय-

---

वमित्युक्तमाशङ्क्य सौत्रं हेतुमादाय व्याचष्टे—कुत इति । पञ्चसु स्थानेष्वापो हुताः पञ्चम्यामाहुतौ हुतायां यथा पुरुषशब्दवाच्याः पुरुषाकारेण परिणमन्ते तथा किं त्वं वेत्थेति श्वेतकेतुं प्रति प्रवाहणस्य प्रश्नः । तस्य चोत्तराज्ञाने तत्पितरं प्रति निरूपणं राज्ञा कृतम्—असौ वाव लोको गौतमेत्यादिना । तदिदं संक्षिप्याऽऽह—द्युपर्जन्येति । द्युप्रभृतीनामनग्नीनामग्नित्वं होमाधारत्वसाम्याद्ध्यानार्थं संपादितम् । श्रद्धादीनामाहुतित्वं च तत्र तत्र संनिपातमात्रेणोक्तम् । किं च पञ्चमे स्थाने गर्भाकारेणाऽऽपः परिणमन्तीत्युपक्रमोपसंहारयोरेकवाक्यत्वावगतेः । सिद्धान्तेन तत्परिवेष्टितो गच्छतीत्याह—इति त्विति । प्रश्नादीनां फलितं निगमयति—तस्मादिति । अशरीरस्य गतिश्चेदद्धिः संपरिष्वक्तस्य सा कल्प्येत न तु तस्य गतिः । किं तु यथा तृणजलायुका तृणान्तरं गृहीत्वा पूर्वतृणं त्यजति तथा जीवोऽपि देहान्तरं गृहीत्वैव पूर्वं देहं मुञ्चति तेन श्रुत्यन्तरविरोधान्न परिष्वक्तरंहणमिति शङ्कते—नन्विति । प्रश्नप्रत्युक्तिश्रुत्यपेक्षया बृहदारण्यकश्रुतिरन्योक्ता । अप्परिवेष्टितस्य गत्युक्तिश्रुतेर्गत्यन्तराभावाद्दृष्टान्तश्रुतेश्च तद्भावान्न विरोधोऽस्तीत्याह—तत्रापीति । कर्मोपस्थापितः प्रतिपत्तव्यः प्राप्तव्यो यो देहस्तद्विषये भावनाया देवोऽहमित्यादिकाया दीर्घीभावो व्यवहितार्थालम्बनत्वं तावन्मात्रं जलूकयोपमीयत इति योजना । जीवो हि संसरन्देहेन्द्रियाद्युपाधिः स्वयं प्रादेशिकत्वान्न तत्रस्थो देहान्तरं गन्तुमर्हत्यतः सूक्ष्मदेहेनैव परिष्वक्तो रंहतीति भावः । सांख्यादयोऽन्यथा देहान्तरप्राप्तिमा-

---

१ क. ट. देहान्त° । २ क. °वो यातीं । ज. ट °वो व्र° । ३ अ. ट. °र्जलौका° । ४ क. पूर्वदे° ।

(जीवस्य भाविशरीरबीजरूपसक्ष्मभूतवेष्टितस्यैवेतो गमनम्, अधि० १)

भावनादीर्घीभावमात्रं जलूकयोपमीयत इत्यविरोधः । एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः[1] कल्पना व्यापिनां करणानामात्मनश्च देहान्तरप्रतिपत्तौ कर्मवशाद्वृत्तिलाभस्तत्र भवति । केवलस्यैव[2] चाऽऽत्मनो वृत्तिलाभस्तत्र[3] भवति । इन्द्रियाणि तु देहवदभिनवान्येव तत्र तत्र भोगस्थान उत्पद्यन्ते । मन एव वा केवलं भोगस्थानमभिप्रतिपद्यते । जीव एव वोत्क्रम्य देहाद्देहान्तरं प्रतिपद्यते शुक इव वृक्षाद्वृक्षान्तरम् । इत्येवमाद्या[4]स्ताः सर्वा[5] एवानादर्तव्याः श्रुतिविरोधात् ॥ १ ॥

ननूदाहृताभ्यां प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः संपरिष्वक्तो रंहतीति प्राप्नोति । अप्शब्दश्रवणसामर्थ्यात् । तत्र कथं

हुस्तथैव किं न गृह्येतेत्याशङ्क्य श्रुतिविरोधादित्याह—एवमिति । याः पुरुषमतिप्रभवास्ताः सर्वा एवानादर्तव्या इति संबन्धः । तत्र सांख्यीयकल्पनामाह—व्यापिनामिति । करणानामाहंकारिकत्वात्तस्य व्यापित्वात्तेषामात्मनां च विभुत्वे किमिति शरीरे वृत्तिलाभो नियम्यते तत्राऽऽह—कर्मेति । सौगतानां कल्पनामाह—केवलस्येति । आत्मा खल्वालयज्ञानसंतानस्तस्य वृत्तयः शब्दादिज्ञानानि तल्लाभः शरीरान्तरे भवति । केवलशब्दस्तु करणसाहित्यमात्मनो वारयति । कथं तर्हि देहान्तरे करणानीत्याशङ्क्य पञ्चेन्द्रियाणि चक्षुरादीनि गोलकमात्रत्वान्मनसश्च समनन्तरप्रत्ययमात्रत्वादभिनवानामेव तेषां शरीरान्तरे जन्मेत्याह—इन्द्रियाणीति । वैशेषिककल्पनामाह—मन इति । केवलं करणैरात्मना च रहितमिति यावत् । करणानि नूतनान्येव तत्राऽऽरभ्यन्त आत्मा तु विभुत्वादैक्रियोऽपि तत्र वृत्तिमात्रमाप्नोति । भोगस्थानं भोगायतनं नूतनशरीरमित्यर्थः । दिगम्बरकल्पनामाह—जीव इति । वेदबाह्यकल्पनामुपसंहरति—इत्येवमाद्या इति । लोकायतकल्पनामाद्यग्रहणेन संगृह्णाति । ते हि देहमात्रात्मवादिनो भस्मीभावमेवाऽऽत्मनो मन्यन्ते न कस्यचिद्गमनम् । तासामनादर्तव्यत्वे हेतुं स्फुटयति—श्रुतीति ॥ १ ॥

भूतसूक्ष्मपरिवेष्टितस्य गमने प्रश्नप्रतिवचनाभ्यामिति हेतूरुक्तः स विवक्षितार्थसाधको नेत्युत्तरसूत्रव्यावर्त्यां शङ्कामाह—नन्विति । हेतोरसाधकत्वशङ्कां प्रत्याह—

---

१ ङ. ज. ञ. ट. °वाः प्रक° । २ क. °स्यैवाऽऽत्म° । ३ ञ. ट. °त्र तत्र भ° । ४ ज. °र्वा अना° । ५ क. एव नाऽऽद° । ६ ख. गृह्यत इत्या° । ७ ठ. °र्वा नाऽऽद° । ८ क. °षामपि तदात्मकानां व्यापित्वं तेषामा° । ठ, ड. °षामापि तदात्मनां व्यापित्वं तेषामा° । ९ ड. °दातिकि° । १० ट. ड. °न गृ° ।

सामान्येन प्रतिज्ञायते सर्वैरेव भूतसूक्ष्मैः संपरिष्वक्तो रंहतीति, अत उत्तरं पठति—

त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ २ ॥

तुशब्देन चोदितामाशङ्कामुच्छिनत्ति। त्र्यात्मिका ह्यापस्त्रिवृत्कर-णश्रुतेः। तास्वारम्भिकास्वभ्युपगतास्वितरदपि भूतद्वयमवश्य-मभ्युपगन्तव्यं भवति। त्र्यात्मकश्च देहस्त्रयाणामपि तेजोवन्नानां तस्मिन्कार्योपलब्धेः। पुनश्च त्र्यात्मकस्त्रिधातुत्वात्त्रिभिर्वातपित्त-श्लेष्मभिः। न[1] स भूतान्तराणि प्रत्याख्याय केवलाभिरद्भिरा-रब्धुं शक्यते। तस्माद्भूयस्त्वापेक्षोऽयमापः पुरुषवचस इति प्रश्नप्रतिवचनयोरप्शब्दो न कैवल्यापेक्षः। सर्वदेहेषु हि रसलो-हितादिद्रवभूयस्त्वं दृश्यते। ननु पार्थिवो धातुर्भूयिष्ठो देहेष्वप[3]लभ्यते। नैष दोषः। इतरापेक्षयाऽपां बाहुल्यं भविष्यति। दृश्यते च शुक्रशोणितलक्षणेऽपि देहबीजे द्रवबाहुल्यम्। कर्म च निमित्तकारणं देहान्तरारम्भे। कर्माणि चाग्निहोत्रादीनि सोमा-

---

अत इति। सूत्राक्षराणि व्याचष्टे—तुशब्देनेति। अपां त्र्यात्मकत्वेऽपि प्रकृते किं जातं तदाह—तास्विति। एवं तर्हि भूतत्रयारब्धत्वमेव न त्रिवृत्कृततदारम्यत्वमित्यपरि-तोषात्पक्षान्तरमाह—त्र्यात्मकश्चेति। पञ्चानां भूतानां कार्यस्य गन्धस्वेदपाकप्राणा-वकाशदानस्य दर्शनात्कार्यत्रयस्यैवोपलब्धिरसिद्धेत्यपरितोषात्पक्षान्तरमाह—पुनश्चेति। वातपित्तश्लेष्मभिः शरीरधारणात्मकैर्धातुभिस्त्रिधातुत्वात्त्र्यात्मक इति योजना। एवं त्र्यात्मकत्वेऽपि कथं भूतान्तराणामारम्भकत्वं तत्राऽऽह—नेति। वातपित्तयोर्वायुतेजो-जन्ययोर्देहे दर्शनादित्यर्थः। कथं तर्हि प्रश्नप्रतिवचनयोर्नियमेनापां ग्रहणं तत्राऽऽह—तस्मादिति। भूयस्त्वादितिसूत्रावयवमुपसंहारव्याजेन व्याख्यातं प्रत्यक्षावष्टम्भेनो-पपादयति—सर्वेति। द्रवांशस्य भूयस्त्वादपां ग्रहणम्। कठिनांशस्य ततोऽपि बाहुल्यदृष्टेरयुक्तमपां ग्रहणमिति शङ्कते—नन्विति। पञ्चात्मके देहे पार्थि-वांशबाहुल्येऽपि भूयस्त्वमपामविरुद्धं भूतान्तरापेक्षया संभवादित्याह—नैष इति। किंच देहोपादानयो रेतोलोहितयोरपां बाहुल्यात्तेनैव भूतान्तरोपलक्षणं युक्तमि-त्याह—दृश्यते चेति। देहनिमित्तानां कर्मणामब्बाहुल्याच्च ताभिर्भूतान्तरलक्षणेत्याह—कर्म चेति। सोमादीनामिहैव भस्मीभावान्न तद्गतमब्बाहुल्यं देहान्तरारम्भोपयोगी-

---

१ ङ. ञ. 'तुकत्वा'। २ ज. न च स। ३ क. 'लभ्यते। ४ क. 'शज्ञान'। ५ क. ख. ङ. 'हार'।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम्, अधि० १)

ज्यपयःप्रभृतिद्रवद्रव्यव्यपाश्रयाणि कर्मसमवायिन्यश्चाऽऽपः श्रद्धाशब्दोदिताः सह कर्मभिर्द्युलोकाख्येऽग्नौ हूयन्त इति वक्ष्यति । तस्मादप्यपां बाहुल्यप्रसिद्धिः । बाहुल्याच्चाप्शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यम्॥२॥

प्राणगतेश्च ॥ ३ ॥

प्राणानां च देहान्तरप्रतिपत्तौ गतिः श्राव्यते " तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति " [बृ० ४-४-२] इत्यादिश्रुतिभिः । सा च प्राणानां गतिर्नाऽऽश्रयमन्तरेण संभवतीत्यतः प्राणगतिप्रयुक्ता तदाश्रयभूतानामपामपि भूतान्तरोपसृष्टानां गतिरवगम्यते । न हि निराश्रयाः प्राणाः क्वचिद्गच्छन्ति तिष्ठन्ति वा जीवतो दर्शनात्॥३॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

स्यादेतत् । नैव प्राणा देहान्तरप्रतिपत्तौ सह जीवेन गच्छन्ति । " अग्न्यादिगतिश्रुतेः " । तथाहि श्रुतिर्मरणकाले वागादयः प्राणा अग्न्यादीन्देवान्गच्छन्तीति दर्शयति "यत्रास्य

त्याशङ्क्याऽऽह—कर्मेति । आपो हि स्थूलकर्मसाधनतया तत्संबन्धिन्यः सूक्ष्मरूपेण पुरुषमाश्रिताः श्रद्धाशब्दाः सह कर्मसंस्कारैर्द्युलोकाग्नौ हुताश्चन्द्रलोके देहारम्भन्त इति वक्ष्यमाणत्वादस्ति तासां देहारम्भोपयोग इत्यर्थः । निमित्तगतमपि द्रवबाहुल्यं देहारम्भोपयोगीति स्थिते युक्तमद्भिर्भूतान्तरोपलक्षणमित्युपसंहरति—तस्मादिति । अप्शब्देन भूतान्तरोपलक्षणे भूतसूक्ष्मपञ्चकपरिवेष्टितस्य युक्तैव गतिरित्याह—इतीति ॥ २ ॥

किंच भौतिकप्राणगत्यनुपपत्त्या तत्कारणभूतगतिरवश्यंभाविनी भूतगतिश्चेदिष्टा देहान्तरारम्भकत्वमपि तेषां स्यादित्याह—प्राणेति । सूत्रं विभजते—प्राणानां चेति । तेषां गमनेऽपि कुतो देहबीजानां भूतानां गतिस्तत्राऽऽह—सा चेति । स्वतन्त्राणामेव प्राणानां गमनं किं न स्यादित्याशङ्क्याऽऽह—न हीति । प्राणा हि जीवतः साश्रया दृष्टास्तेनोत्क्रमणेऽपि तेषां साश्रयत्वमित्यर्थः ॥ ३ ॥

प्राणानां साश्रयत्वेऽपि जीवेन सह गतिरसिद्धेत्याशङ्क्य प्रत्याह—अग्न्यादीति । चोद्यं विवृणोति—स्यादिति । उक्तं हेतुं व्यनक्ति—तथाहीति । परिहारं व्याक-

---

१ झ. °दपां । २ क. °नां दे° । ३ क. ङ. ञ. °तिराश्र° । ४ क. °ण न भ° । ङ. ञ. °ण न सं° । ५ झ. °पभोग ।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम्, अधि० १)

पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणः " [बृ० ३-२-१३] इत्यादिना "इति चेन्न "। "भाक्तत्वात्" । वागादीनामग्न्यादिगतिश्रुतिर्गौणी लोमसु केशेषु चादर्शनात् । " ओषधीर्लोमानि वनस्पतीन्केशाः " [बृ० ३-२-१३] इति हि तत्राऽऽम्नायते । न हि लोमानि केशाश्चोत्पत्त्यौषधीर्वनस्पतींश्च गच्छन्तीति संभवति । न च जीवस्य प्राणोपाधिप्रत्याख्याने गमनमवकल्प्यते । नापि प्राणैर्विना देहान्तर उपभोग उपपद्यते । विस्पष्टं च प्राणानां सह जीवेन गमनमन्यत्र श्रावितम् । अतो वागाद्यधिष्ठात्रीणामग्न्यादिदेवतानां वागाद्युपकारिणीनां मरणकाल उपकारनिवृत्तिमात्रमपेक्ष्य वागादयोऽग्न्यादीन्गच्छन्तीत्युपचर्यते ॥ ४ ॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

स्यादेतत् । कथं पुनः "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति " [छा० ५-३-३] इत्येतन्निर्धारयितुं पार्यते । यावता नैव प्रथमेऽप्यावपां श्रवणमस्ति । इह हि द्युलोकप्रभृतयः पञ्चा-

---

रोति—नेत्यादिना । अदर्शनादोषधिवनस्पतिगमनस्येति शेषः । तदेव विशदयितुमादौ गतिं प्रसञ्जयति—ओषधीरिति । तत्रापि मुख्यैव गतिः स्यादित्याशङ्क्याऽऽह—न हीति । अग्न्यादिगतिश्रुतीनां तमुत्क्रामन्तमित्यादिश्रुतीनां च मिथोविरोधेऽग्न्यादिगतिश्रुतिरौपचारिकी तत्प्रायपाठादित्युक्तम् । इदानीं जीवगतिश्रुत्यनुपपत्त्याऽपि प्राणगतिदृष्टेरग्न्यादिगतिश्रुतिरौपचारिकीत्याह—न चेति । इतश्च प्राणानां जीवेन सह गतेरावश्यकत्वादग्न्यादिगतिश्रुतिरौपचारिकीत्याह—नापीति । सह गतिश्रुतिरेव कस्मादौपचारिकी न स्यादित्याशङ्क्य निमित्ताभावादित्याह—विस्पष्टं चेति । अन्यत्र तमुत्क्रामन्तमित्यादावित्यर्थः । अग्न्यादिगतिश्रुतेरौपचारिकत्वं निमित्तोक्तिपूर्वकमुपसंहरति—अत इति ॥ ४ ॥

भूतान्तरोपसृष्टानामपां गमनमुपपाद्य पञ्चम्यामाहुतौ तासां पुरुषाकारत्वमुक्तमाक्षिप्य समाधत्ते—प्रथम इति । चोद्यं विभजते—स्यादिति । श्रवणाभावं दर्शयितुमग्नीन्प्रस्तौति—इहेति । पञ्चाग्निविद्याप्रकरणं सप्तम्यर्थः । द्युलोकप्रभृतयो द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चाऽऽहुतयः श्रद्धासोमवृष्ट्यन्नरेतोरूपास्तथाऽपि कथं प्रथमेऽग्ना-

---

१ ज. च । २ झ. 'त्क्रान्तं' । ३ क. 'र्वमु' । ४ ठ, ड. 'थममग्ना' ।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम्, अधि० १)

त्रयः पञ्चानामाहुतीनामाधारत्वेनाधीताः। तेषां च प्रमुखे "असौ वाव लोको गौतमाग्निः" [छा० ५-४-१] इत्युपन्यस्य "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति" [छा० ५-४-२] इति श्रद्धा हौम्यद्रव्यत्वेनाऽऽवेदिता। न तत्राऽऽपो हौम्यद्रव्यतया श्रुताः। यदि नाम पर्जन्यादिषूत्तरेषु चतुर्ष्वग्निष्वपां हौम्यद्रव्यता परिकल्प्येत परिकल्प्यतां नाम तेषु होतव्यतयोपात्तानां सोमादीनामब्बहुलत्वोपपत्तेः। प्रथमे त्वग्नौ श्रुतां श्रद्धां परित्यज्याश्रुता आपः परिकल्प्यन्त इति साहसमेतत्। श्रद्धा च नाम प्रत्ययविशेषः प्रसिद्धिसामर्थ्यात्। तस्मादयुक्तः पञ्चम्यामाहुतावपां पुरुषभाव इति चेन्नैष दोषः। हि यतस्तत्रापि प्रथमेऽग्नौ "ता एव" आपः श्रद्धाशब्देनाभिप्रेयन्ते। कुतः। "उपपत्तेः"। एवं ह्यादिमध्यावसानसंगानादनाकुलमेतदेकवाक्यमुपपद्यते। इतरथा पुनः पञ्चम्यामाहुतावपां पुरुषवचस्त्वप्रकारे पृष्टे प्रतिवचनावसरे प्रथमाहुतिस्थाने यद्यनपो होम्यद्रव्यं श्रद्धां नामावतारयेत्। ततोऽन्यथा प्रश्नोऽन्यथा प्रतिवचनमित्येकवाक्यता न स्यात्। "इति तु पञ्चम्यामाहु-

---

वपामश्रवणं तत्राऽऽह—तेषां चेति। प्रथमविशेषणमनर्थकमन्यत्राप्यश्रवणादित्याशङ्क्य कथंचिदन्यत्र श्रवणेऽपि प्रकृते तन्नास्तीत्याह—यदीति। तर्हि कल्प्यतामपामेव प्रथमेऽपि होम्यत्वमविशेषादित्याशङ्क्याऽऽह—प्रथमे त्विति। तत्रापि श्रद्धाशब्देनापामेवोक्तेर्नाश्रवणमित्याशङ्क्याऽऽह—श्रद्धा चेति। श्रुतिलक्षणयोः श्रुतिन्यायेयेति भावः। प्रथमेऽग्नावपामश्रुतिफलमाह—तस्मादिति। सिद्धान्तभागं विभजते—नेत्यादिना। श्रद्धाशब्दस्यार्थान्तरे रूढेर्न तेनापामुक्तिरिति शङ्कित्वा सूत्रावयवं व्याचष्टे—कुत इत्यादिना। एवं हीति। श्रद्धाशब्देनापां ग्रहे सतीति यावत्। संगानं संप्रतिपत्तिः। तामेव व्यतिरेकेण स्फोरयति—इतरथेति। यदुक्तमितरथा पुनरिति तदेव स्फुटयति—पञ्चम्यामिति। श्रद्धाशब्दस्यौत्सर्गिकोऽर्थान्तरत्वं दूषयति—तत इति। यदि चतुर्ष्वेव स्थानेष्वपां होम्यता तदा चतुर्थ्यामाहुताविति वाच्यं पञ्चम्यामिति विशेषणात्प्रथमस्थानेऽपि तासामेव होम्यता सिद्धेत्यर्थः। उपसंहारालोचनायामपि श्रद्धाशब्दत्वमपामेवेत्याह—इति त्विति। उपपत्तेरित्यस्यार्थान्तरमाह—

---

१ क. ज. झ. ट. °षः। यं°। २ क. ज. ठ. °देकं वा°। ३ क. ख. ठ. ड, अत्रापि। ४ झ. ठ. ड. स्फुटयते। ५ क. °स्यार्थो°।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो ममनम्, अधि० १)

तावापः पुरुषवचसो भवन्ति" इति चोपसंहरन्नेतदेव दर्शयति। श्रद्धाकार्यं च सोमवृष्ट्यादि स्थूलीभवदब्बहुलं लक्ष्यते। सा च श्रद्धाया अप्त्वे युक्तिः। कारणानुरूपं हि कार्यं भवति। न च श्रद्धाख्यः प्रत्ययो मनसो जीवस्य वा धर्मः सन्धर्मिणो निष्कृष्य होमायोपादातुं शक्यते पश्वादिभ्य इव हृदयादीनीत्याप् एव श्रद्धाशब्दा भवेयुः। श्रद्धाशब्दश्चाप्सूपपद्यते वैदिकप्रयोगदर्शनात्[1] "श्रद्धा वा आपः" [तै० सं० १-६-८-१] इति। तनुत्वं[2] श्रद्धासारूप्यं गच्छन्त्य[3] आपो देहबीजभूता इत्यतः श्रद्धाशब्दाः स्युः। यथा सिंहपराक्रमो नरः सिंहशब्दो भवति। श्रद्धापूर्वककर्मसमवायाच्चाप्सु श्रद्धाशब्द उपपद्यते। मञ्चशब्द इव पुरुषेषु। श्रद्धाहेतुत्वाच्च श्रद्धाशब्दोपपत्तिः "आपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे" इति श्रुतेः॥ ९॥

श्रद्धेति। श्रद्धापरिणामस्य सोमादेरब्बहुलत्वेऽपि श्रद्धाशब्दत्वमपामित्यत्र किमायातं तदाह—**सा चेति**। गोमयवृश्चिकादौ प्रत्यक्षेण विलक्षणत्वदृष्टेर्वृष्ट्यादेः श्रद्धाकार्यस्याब्बहुलत्वेऽपि कारणस्य श्रद्धाया मा भूदप्त्वमित्याशङ्क्याऽऽह—**कारणेति**। क्वचिद्वैलक्षण्यस्य प्रवृत्तत्वादिष्टत्वेऽपि श्रद्धापरिणामस्य सोमादेरब्बहुलत्वोपलब्धेः श्रद्धायास्तथात्वं कल्प्यते। वैलक्षण्यग्राहिण्यसति माने कल्पनाया दृष्टानुसारित्वादित्यर्थः। यत्तु प्रसिद्ध्या प्रत्ययविशेषः श्रद्धेति तत्राऽऽह—**न चेति**। जुहोतिश्रुतिसामर्थ्यान्मुख्यार्थत्यागे संनिहितवाक्यानुसारेण लक्षणेत्याह—**इत्याप इति**। न च धर्मिणा सहैव होमस्तत्रापि लक्षणाध्रौव्ये संनिहितवाक्यानुसारिण्यास्तस्या न्याय्यत्वादिति भावः। उपपत्तेरिति भागं विधान्तरेण व्याचष्टे—**श्रद्धेति**। वृद्धप्रयोगाभावे कथं वैदिकोऽपि प्रयोगः स्यादित्याशङ्क्य तस्यौपचारिकत्वमाह—**तनुत्वमिति**। सूक्ष्मत्वगुणादप्सु श्रद्धाशब्दस्य गौणत्वे दृष्टान्तमाह—**यथेति**। श्रद्धाशब्दस्याप्सु गौणत्वमुक्त्वा लाक्षणिकत्वमाह—**श्रद्धेति**। यत्कर्म श्रद्धापूर्वकं तदुपायत्वेनापां तद्योगात्परम्परया श्रद्धायोगिनीष्वप्सु तच्छब्द इत्यर्थः। लक्षणानिमित्तं संबन्धान्तरमाह—**श्रद्धेति**। अपां श्रद्धाहेतुत्वे मानमाह—**आपो हेति**। अस्मै पुंसेऽधिकारिणे संनमन्ते जनयन्ति दर्शनमात्रेण स्नानादिपुण्यकर्मसिद्ध्यर्थं श्रद्धामित्यर्थः॥ ९॥

---

१ ज. ञ. ट. °दिकात्प्रयो°। २ ङ. ञ. °त्वं च श्र°। ३ क. ङ. ञ. ट. °च्छन्त्यापो। ४ क. ज. °वतीति। ५ ख. ठ. ड. प्रत्यक्षत्वा°।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम्, अधि० १)

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

अथापि स्यात्प्रश्नप्रतिवचनाभ्यां नामाऽऽपः श्रद्धादिक्रमेण पञ्चम्यामाहुतौ पुरुषाकारं प्रतिपद्येरन् । न तु तत्संपरिष्वक्ता जीवा रंहेयुः । "अश्रुतत्वात्" । न ह्यत्रापामिव जीवानां श्रावयिता कश्चिच्छब्दोऽस्ति । तस्मात् "रंहति संपरिष्वक्तः" [सू० ३-१-१] इत्ययुक्तमिति चेत् । नैष दोषः । कुतः । "इष्टादिकारिणां प्रतीतेः" । "अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति" [छा० ५-१०-३] इत्युपक्रम्येष्टादिकारिणां धूमादिना पितृयाणेन पथा चन्द्रप्राप्तिं कथयति "आकाशाच्चन्द्रमसमेष सोमो राजा" [छा० ५-१०-४] इति त एवेहापि प्रतीयन्ते "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति" [छा० ५-४-२] इति श्रुतिसामान्यात् । तेषां चाग्निहोत्रदर्शपूर्णमासादिकर्मसाधनभूता दधिपयःप्रभृतयो द्रव्यभूयस्त्वात्प्रत्यक्षमेवाऽऽपः सन्ति । ता आहवनीये हुताः सूक्ष्मा आहु-

---

अपामेव प्रथमस्थानेऽपि होम्यत्वज्ञानात्पञ्चम्यामाहुतौ तासां पुरुषाकारपरिणामः स्यादित्युक्तम् । इदानीमाद्ये सूत्रे यदद्भिः परिवेष्टितो जीवो गच्छतीति प्रतिज्ञातं तदसत्त्वमाशङ्क्य परिहरति—**अश्रुतत्वादिति** । तत्र चोद्यं विशदयति—**अथापीति** । भूतान्तरोपसृष्टानामपां पुरुषाकारपरिणामेऽपीति यावत् । उक्तेऽर्थेऽङ्गीकृते नास्ति विमतिरित्याशङ्क्याऽऽह—**न त्विति** । हेत्वर्थं विवृणोति—**न हीति** । अत्रेति प्रकरणोक्तिः । अश्रुतत्वफलमाह—**तस्मादिति** । समाधिं विभजते—**नेत्यादिना** । कर्मफलोक्तिप्रारम्भार्थोऽथशब्दः । इष्टादिकारिणां प्रदेशान्तरगमनप्रतीतावपि प्रकृते किमायातं तदाह—**त इति** । पञ्चाग्निविद्यावाक्यमिहेत्युक्तम् । तत्र हेतुमाह—**तस्मिन्निति** । धूमादिवाक्ये पञ्चाग्निवाक्ये च सोमराजत्वप्राप्तिश्रवणाविशेषादिष्टादिकारिणः श्रद्धाशब्दिताद्भिर्वेष्टिता द्युलोकं यान्तीति भातीत्यर्थः । ननु महदिह श्रुत्योर्वैलक्षण्यं श्रद्धाशब्दितानामपां क्वचिद्द्युलोके होमः श्रुतः क्वचिदिष्टादिकारिणां धूमादिक्रमेणाऽऽकाशप्राप्तिर्न च तेषामापः सन्ति येन तद्वेष्टितानां गतिस्तत्राऽऽह—**तेषां चेति** । आपो यथोक्ताः सन्तु हुतानां तासां कथमिष्टादिकारिभिर्योगस्तत्राऽऽह—**ता इति** । दध्यादीनामपामाहवनीये हुतानामिहैव भस्मीभूतानां न जीवसंगतिरित्याशङ्क्य विशिनष्टि—**सूक्ष्मा इति** । तदेव साधयति—**आहुतीति** । तथाऽपि कथं सह गमनं

---

१ क. ङ. ञ. °नाभ्यामा° । २ क. °क्तमुक्तमि° । ३ क. ङ. ञ. ट. °यानेन ।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गमनम् , अधि० १)

त्योऽपूर्वरूपाः सत्यस्तानिष्टादिकारिण आश्रयन्ति । तेषां च शरीरं नैधनेन विधानेनान्त्येऽग्नावृत्विजो जुह्वति "असौ स्वर्गाय लोकाय स्वाहा" इति । ततस्ताः श्रद्धापूर्वककर्मसमवायिन्य आहुतिमय्य आपोऽपूर्वरूपाः सत्यस्तानिष्टादिकारिणो जीवान्परिवेष्ट्यामुं लोकं फलदानाय नयन्तीति यत्तदत्र जुहोतिनाऽभिधीयते "श्रद्धां जुह्वति" इति । तथाचाग्निहोत्रे षट्प्रश्नीनिर्वचनरूपेण वाक्यशेषेण " ते वा एते आहुती हुते उत्क्रामतः " [शत० ११-६-२-६] इत्येवमादिनाऽग्निहोत्राहुत्योः फलारम्भाय लोकान्तरप्राप्तिर्दर्शिता । तस्मादाहुतीमयीभिरद्भिः संपरिष्वक्ता जीवा रंहन्ति स्वकर्मफलोपभोगायेति श्लिष्यते ॥ ६ ॥

कथं पुनरिदमिष्टादिकारिणां स्वकर्मफलोपभोगाय रंहणं प्रतिज्ञायते। यावता तेषां धूमप्रतीकेन वर्त्मना चन्द्रमसमधिरूढा-

---

तदाह—**तेषां चेति** । नैधनं विधानमन्तेष्टिविधानम् । होममन्त्रमुदाहरति—**असाविति** । अमुकनामा यजमानः स्वर्गं गच्छतु स्वाहाकारो मन्त्रान्तज्ञापनार्थः । तथाऽपि कथं परिवेष्टितानामिष्टादिकारिणां गतिस्तत्राऽऽह—**तत इति** । प्रत्यक्षसिद्धदध्यादिवैशेष्यार्थमाहुतिमय्य इत्युक्तम् । क्रियातो विशिनष्टि—**अपूर्वेति** । तत्र श्रुतिमवतारयति—**यदिति** । तदेवं श्रुतिसामान्यं प्रतिपाद्याऽऽहुतिरूपाणामपां गमने सिद्धे श्रुत्यन्तरमपि मानमित्याह—**तथाचेति** । अग्निहोत्रप्रकरणे न त्वेवैनयोस्त्वमुत्क्रान्तिं[3] न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनं वेत्थेति जनकेन ये षट्पदार्था याज्ञवल्क्यं प्रत्युक्तास्ते षट्प्रश्ना निर्दिश्यन्ते । तेषां निर्वचनरूपो वाक्यशेषः । ते वा एते आहुती हुते उत्क्रामतस्ते अन्तरिक्षमाविशतस्ते अन्तरिक्षं तर्पयित्वा दिवं पृथिवीं पुरुषं योषितं वाऽऽविश्य पुरुषरूपेणोत्तिष्ठत इत्येवंरूपः । तेनाग्निहोत्रे सायं प्रातश्च क्रियमाणाहुत्योरपूर्वरूपयोरमुष्मातृगामिफलसिद्धये तेन सह द्युलोकप्राप्तिरुक्ता । तथा च वाजसनेयकश्रुतिपर्यालोचनायामपि जीवानामप्परिवेष्टितानां गतिसिद्धिरित्यर्थः । श्रुत्यन्तरालोचनातः सिद्धमुपसंहरति—**तस्मादिति** ॥ ६ ॥

उत्तरसूत्रव्यावर्त्यमाह—**कथमिति** । का पुनरस्यां प्रतिज्ञायामनुपपत्तिस्तत्राऽऽह—**यावतेति** । नन्वेषशब्देन चन्द्रमा गृह्यते नेष्टादिकारिणस्ततस्तेऽपि सोमं राजानं देवत्वादितरदेववद्भक्षयन्तीत्याशङ्क्य श्रुत्यन्तरे तेषामेव भक्ष्यत्वसिद्धेर्नैवमित्याह—

---

१ क. फललाभाय । २ ङ. 'वैतयो' । ३ झ. 'न्ति ग' ।

(जीवस्य भाविशरीरबीजरूपसूक्ष्मभूतवेष्टितस्यैवेतो गगनम्, अधि० १)

नामन्नभावं दर्शयति " एष सोमो राजा तदेवानामन्नं तं देवा भक्षयन्ति " [छा० ५-१०-४] इति " ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयन्ति " [बृ० ६-२-१६] इति च समानविषयं श्रुत्यन्तरम् । न च व्याघ्रादिभिरिव देवैर्भक्ष्यमाणानामुपभोगः संभवतीति । अत उत्तरं पठति—

भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ॥ ७ ॥ (१)

वाशब्दश्चोदितदोषव्यावर्तनार्थः । "भाक्तम्" एषामन्नत्वं न मुख्यम् । मुख्ये ह्यन्नत्वे " स्वर्गकामो यजेत " इत्येवंजातीयकाऽधिकारश्रुतिरुपरुध्येत । चन्द्रमण्डले चेदिष्टादिकारिणामुपभोगो न स्यात्किमर्थमधिकारिण इष्ट्याद्यायासबहुलं कर्म कुर्युः । अन्नशब्दश्चोपभोगहेतुत्वसामान्यादनन्नेऽप्युपचर्यमाणो दृश्यते । यथा विशोऽन्नं राज्ञां पशवोऽन्नं विशामिति । तस्मादिष्टस्त्रीपुत्रमित्रादिभिरिव गुणभावोपगतैरिष्टादिकारिभिर्यत्सुखविहरणं देवानां तदेवैषां भक्षणमभिप्रेतं न मोदकादिवच्चर्वणं निगरणं वा । " न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति " [छा०

ते चन्द्रमिति । यथा यज्ञे सोमं राजानं चमसस्थमृत्विजः पुनः पुनराप्याययन्त्यपक्षयन्ति चेति दृष्टम् । तथा तानिष्टादिकारिणश्चन्द्रमसि प्राप्तान्देवा भक्षयन्तीत्यर्थः । दार्ष्टान्तिकं विवृणोति—एवमिति । देवैरिष्टादिकारिणां भक्ष्यत्वेऽपि तेषामुपभोगाय गमनं किं न स्यादित्याशङ्क्याऽऽह—न चेति । उत्तरत्वेन सूत्रमवतारयति—अत इति । इष्टादिकारिणामद्यत्वे मुख्ये भोगाभावो न तु तदस्तीति प्रतिजानीते—वाशब्द इति । तेषां तर्हि श्रूयमाणमन्नत्वं कथमित्याशङ्क्य सिद्धान्तप्रतिज्ञामाह—भाक्तमिति । अन्नशब्दश्रुत्या मुख्येऽन्नत्वे किमिति भाक्तं तदुक्तमित्याशङ्क्यानन्यथासिद्धश्रुत्यर्थापत्तिविरोधादौपचारिकी श्रुतिरित्याह—मुख्ये हीति । अधिक्रियतेऽनेनेत्यधिकारो विधिपुरुषसंबन्धनिमित्तं कामादि तदुक्ता श्रुतिरधिकारश्रुतिस्तस्या वैयर्थ्यपरिहारार्थमिष्टादिकारिणामन्नत्वं भाक्तमेवेत्यर्थः । उक्तमेव व्यनक्ति—चन्द्रेति । न केवलं मुख्यार्थबाधादन्नशब्दस्यामुख्यार्थत्वमन्यत्र प्रयोगादपीत्याह—अन्नेति । अन्नत्वस्यामुख्यत्वे कथं भक्षयन्तीत्युक्तं तत्राऽऽह—तस्मादिति । न केवलमिष्टादिकारिणामन्नत्वस्यामुख्यत्वादमुख्यमेषां भक्षणं किं तु श्रुत्यन्तरादपीत्याह—न ह वा इति । तथाऽपि पार-

---

१ क. °मित्रभृत्यादि° । २ क. ङ. म. न वै ।

३-६-१] इति च देवानां चर्वणादिव्यापारं वारयति । तेषां चेष्टादिकारिणां देवान्प्रति गुणभावोपगतानामप्युपभोग उपपद्यते राजोपजीविनामिव परिजनानाम् । "अनात्मवित्त्वाच्च" इष्टादिकारिणां देवोपभोग्यभाव उपपद्यते । " तथा हि " श्रुतिरनात्मविदां देवोपभोग्यतां" दर्शयति "" अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम् " [बृ० १-४-१०] इति । स चास्मिन्नपि लोक इष्टादिभिः कर्मभिः प्रीणयन्पशुवद्देवानामुपकरोत्यमुष्मिन्नपि लोके तदुपजीवी तदादिष्टं फलमुपभुञ्जानः पशुवदेव देवानामुपकरोतीति गम्यते । " अनात्मवित्त्वात्तथाहि दर्शयति " इत्यस्यापरा व्याख्या । अनात्मविदो ह्येते केवलकर्मिण इष्टादिकारिणो न ज्ञानकर्मसमुच्चयानुष्ठायिनः । पञ्चाग्निविद्यामिहाऽऽत्मविद्येत्युपचरन्ति प्रकरणात् । पञ्चाग्निविद्याविहीनत्वाच्चेदमिष्टादिकारिणां गुणवादेनाऽनात्मत्वमुद्भाव्यते पञ्चाग्निविज्ञानप्रशंसायै । पञ्चाग्निविद्येह विधित्सिता । वाक्यतात्पर्यावगमात् । तथाहि श्रुत्यन्तरं चन्द्रमण्डले भोगस-

---

तन्व्याम्नेष्टादिकारिणां भोगसिद्धिरिति कुतो भोगाय गमनं तत्राऽऽह—**तेषां चेति** । केन दोषेण तेषां देवभोग्यतेत्याशङ्क्य सूत्रावयवं व्याचष्टे—**अनात्मेति** । अत्र मानं दर्शयन्नवशिष्टं सूत्रांशं योजयति—**तथा हीति** । अविद्याधिकारारम्भार्थोऽथशब्दः । उपास्तिमेव भेददृष्टिं स्पष्टयति—**अन्योऽसाविति** । भेददृष्टिनिदानमाह—**न स इति** । तस्य दृष्टान्तं देवोपभोग्यत्वमाह—**यथेति** । उक्तश्रुतेस्तात्पर्यमाह—**स चेति** । अनात्मश्रुतेर्मुख्यार्थत्वानुरोधेन सूत्रांशस्यार्थमुक्त्वा प्रकरणानुरोधेनार्थान्तरमाह—**अनात्मेति** । पञ्चाग्निविद्याविहीनत्वं तेषामनात्मवित्त्वम् । तद्धेत्वेनाऽऽत्मवित्त्वं चेत्तद्ग्राहित्येनानात्मवित्त्वं तदेव कथमित्याशङ्क्याऽऽह—**पञ्चाग्नीति** । इष्टादिकारिणां पञ्चाग्निविद्याशून्यत्वेऽपि कथं देवान्प्रत्यन्नत्वं तत्राऽऽह—**पञ्चेति** । गुणवादेन देवोपभोग्यत्वेनेति यावत् । किमर्था प्रशंसेत्याशङ्क्याऽऽह—**पञ्चाग्नीति** । तस्यापि विधित्सितत्वे हेतुमाह—**वाक्येति** । गौतमप्रवाहणसंवादरूपवाक्यैस्य पूर्वापरालोचनया पञ्चाग्निविद्याविधौ तात्पर्यगतेरिति यावत् । अनात्मवित्त्वादिति व्याख्याय तथाहीत्यादि व्याख्याति—**तथाहीति** । इष्टादिकारी सर्वनामार्थः । पूर्वोक्तवाक्येन

---

१ ङ. ञ. °ति दे° । २ क. ज. °विज्ञानवि° । ३ ङ. ञ. °विद्याप्र° । ४ क. °विद्या ह्येह । ५ ञ. °क्यपू° ।

(कर्मान्तरैः सानुशयस्य जीवस्य लोकान्तरारोहणम् , अधि० २)

द्भावं दर्शयति " स सोमलोके विभूतिमनुभूय पुनरावर्तते " [प्रश्न० ५-४] इति । तथाऽन्यदपि श्रुत्यन्तरम् " अथ ये शतं पितॄणां जितलोकानामानन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसंपद्यन्ते " [बृ० ४-३-३३] इतीष्टादिकारिणां देवैः[1] सह संवसतां भोगप्राप्तिं दर्शयति । एवं भाक्तत्वादन्नभाववचनस्येष्टादिकारिणोऽत्र जीवा रंहन्ती[2]ति प्रतीयन्ते । तस्माद्रंहति संपरिष्वक्त इति युक्तमेवोक्तम् ॥ ७ ॥ (१)

(कर्मान्तरैः सानुशयस्य जीवस्य लोकान्तरारोहणम् , अधि० २)

कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

इष्टादिकारिणां धूमादिना वर्त्मना चन्द्रमण्डलमधिरूढानां भुक्तभोगानां ततः प्रत्यवरोह आम्नायते " तस्मिन्यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतम् " [छा०५-१०-५] इत्यारभ्य यावद्रमणीयचरणा ब्राह्मणादियोनिमापद्यन्ते कपूयचरणाः श्वादियोनिमिति । तत्रेदं विचार्यते—किं निरनुशया

तुल्यार्थत्वबुद्ध्या तथेत्युक्तम् । पञ्चाग्निविद्याधिकारादन्यत्र प्रवृत्तत्वमाह—अन्यदिति । अत एव श्रुत्यन्तरमित्युक्तम् । पर्यायान्तरोपक्रमार्थोऽथशब्दः । जितो लोकः पूर्वसिद्धो लोको भोग्यो येषां तेषामाजानसिद्धानामिति यावत् । कर्मदेवत्वं व्युत्पादयति—य इति । श्रुत्यन्तरस्य तात्पर्यमाह—इष्टादीति । तेषामन्नत्वस्य भाक्तत्वे फलितमाह—एवमिति । अत्रेति प्रश्नप्रतिवचनोक्तिः । इष्टादिकारिणां भोगाय चन्द्रं प्रति गमने संभाविते तेषामेव प्रश्नप्रतिवचनयोरपि प्रतीतेर्युक्तं प्रथमसूत्रोक्तमित्युपसंहरति—तस्मादिति ॥ ७ ॥ (१)

कर्मसमवायिनीनामपां पञ्चमाहुतौ पुंस्परिणामहेतुमाश्रित्याद्धिः परिवेष्टितजीवगतिरुक्ता संप्रति स्वर्गादवरोहतां कर्मैव नास्ति कुतस्तत्समवायिन्य आपः कुतस्तरां पुंस्परिणाम इत्याशङ्क्याऽऽह—कृतेति । येषां पूर्वत्र चन्द्रमण्डलारोहणमुक्तं त एव प्रत्यवरोहन्तो विषय इति वक्तुं प्रत्यवरोहवाक्यमुदाहरति—इष्टादीति । ततश्चन्द्रमण्डलादिति यावत् । तस्मिन्नित्यपि तदेवोक्तम् । भोक्तव्यकर्मसमाप्त्यानन्तर्यमथशब्दार्थः । यथेतमित्यारभ्य श्वादियोनिमित्यन्तं वाक्यं यावदाम्नायत इति योजना । यावत्संपातमिति विशेषणाद्रमणीयचरणा रमणीयां योनिमित्यादिवाक्याच्च संशयमाह—तत्रेति ।

---

१ ज. ञ. ट. °वैः सं° । २ ज. झ. ट. °हन्त इति । ३ क. ज. ट. °यते । त° ।

भुक्तकृत्स्नकर्माणोऽवरोहन्त्याहोस्वित्सानुशया इति । किं तावत्प्राप्तम् । निरनुशया इति । कुतः । " यावत्संपातम् " इति विशेषणात् । संपातशब्देनात्र कर्माशय उच्यते । संपतत्यनेनास्माल्लोकादमुं लोकं फलोपभोगायेति । "यावत्संपातमुषित्वा" इति च कृत्स्नस्य तस्य कृतस्य तत्रैव भुक्ततां दर्शयति । " तेषां यदा तत्पर्यवैति " [बृ० ६-२-१६] इति च श्रुत्यन्तरेणैष एवार्थः प्रदर्श्यते । स्यादेतत् । यावदमुष्मिँल्लोक उपभोक्तव्यं कर्म तावदुपभुङ्क्त इति कल्पयिष्यामीति । नैवं कल्पयितुं शक्यते यत्किंचेत्यन्यत्र परामर्शात् ।

" प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् ।
तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मणे "
[बृ० ४-४-६] इति ह्यपरा श्रुतिर्यत्किंचेत्यविशेषपरामर्शेन

प्रकृतेषु प्रत्यवरोहत्सु जीवेष्विति यावत् । निरनुशयशब्दार्थमेव स्पष्टयति—**भुक्तेति**। अत्रापि प्रत्यवरोहतां सानुशयत्वसमर्थनद्वारा वैराग्याय संसारगतिरेव निरूप्यत इति पूर्ववत्पादादिसंगतिमभिप्रेत्य पूर्वपक्षमाकाङ्क्षापूर्वकं गृह्णाति—**किं तावदिति** । पूर्वपक्षे गतिरेव कर्मकृता तदभावकृता त्वागतिः सिद्धान्ते कर्मकृतत्वाविशेषो द्वयोरिति फलभेदः । तत्र प्रश्नपूर्वकं लिङ्गं हेतू करोति—**कुत इति**। यावत्पतनमुषित्वेत्येतावदत्र भाति न तु कर्मणः सर्वस्य भुक्तत्वमित्याशङ्क्याऽऽह—**संपातेति** । यावत्पतनं तावत्पतनमिति वचनमनर्थकमिति मत्वा वाक्यार्थमाह—**यावदिति** । चन्द्रमण्डले सर्वकर्मोपभोगे श्रुत्यन्तरसंमतिमाह—**तेषामिति** । इष्टादिकारिणां यदा तद्भोक्तव्यं कर्म पर्यवैति परिगच्छति परिक्षीणं भवति तदा तत आवर्तन्त इत्युत्तरेणान्वयः । यावच्छब्दोपबन्धस्य गत्यन्तरं शङ्कते —**स्यादिति** । श्रुत्यन्तरविरोधेन प्रत्याह—**नैवमिति**। तदेव प्रपञ्चयति—**प्राप्येति** । अयं संसारी यत्किंचिदिह लोके कर्म करोति तस्यान्तं फलं परलोके प्राप्य तस्माल्लोकात्पुनरस्मै लोकाय कर्मानुष्ठानार्थमागच्छति । पुनःशब्दात्पूर्वमप्यागत इति गम्यते संसारस्यानादित्वादित्यर्थः । परामर्शश्रुतेस्तात्पर्यमाह—**इति हीति** । न चोपसंहारे ब्राह्मण्यादिहेतुकर्मावगमादुपक्रमस्यापि संकोचस्तदनुसारेणोपसंहारस्य नेतव्यत्वात् । उपक्रमे च यावत्संपातमिति श्रवणात्तस्य च प्रथमश्रुतस्य बलीयस्त्वाद्ब्राह्मण्यादिप्रापकचरणस्य चाऽऽचारतया कर्मणोऽर्थान्तरत्वाद्यथाकारी यथा-

---

१ ज्ञ. °षश्रवणा° । २ ङ. ञ. ट. °तन्त्यने° । ३ ङ. ञ. ट. इत्यप्यप° । ४ ज्ञ. °न्तं प°।

(कर्मान्तरैः सानुशयस्य जीवस्य लोकान्तरारोहणम्, अधि० २)

कृत्स्नस्येह कृतस्य कर्मणस्तत्र क्षयिततां दर्शयति । अपि च प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकम् । प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्याभिव्यक्त्यनुपपत्तेः । तच्चाविशेषाद्यावत्किंचिदनारब्धफलं तस्य सर्वस्याभिव्यञ्जकम् । न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति । न ह्यविशिष्टे प्रदीपसंनिधौ घटोऽभिव्यज्यते न पट इत्युपपद्यते । तस्मान्निरनुशया अवरोहन्तीति,

एवं प्राप्ते ब्रूमः—" कृतात्ययेऽनुशयवानिति " । येन कर्मवृन्देन चन्द्रमसमारूढाः फलोपभोगाय तस्मिन्नुपभोगेन क्षयिते तेषां यदम्मयं शरीरं चन्द्रमस्युपभोगायाऽऽरब्धं तदुपभोगक्षयदर्शनशोकाग्निसंपर्कात्प्रविलीयते । सवितृकिरणसंपर्कादिव हिमकरैकाः । हुतभुगर्चिःसंपर्कादिवै च घृतकाठिन्यम् । ततः कृतात्यये कृतस्येष्टादेः कर्मणः फलोपभोगेनोपक्षये सति सानुशया एवेममवरोहन्ति । केन हेतुना "दृष्टस्मृतिभ्याम्" इत्याह । तथाहि प्रत्यक्षा श्रुतिः सानुशयानामवरोहं दर्शयति " तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं

चारीत्यादिषु भेदेन तयोरुक्तत्वान्न कर्मणा ब्राह्मणादियोन्यापत्तिरिति भावः । न केवलं श्रुत्यैवैतद्गम्यते किंतु युक्त्याऽपीत्याह—अपि चेति । विमतं स्वसंनिहिताविशेषाभिव्यञ्जकमभिव्यञ्जकत्वात्प्रदीपवत् । अभिव्यक्तिश्च कर्मणां फलदानायोन्मुखत्वम् । तत्र किंचिद्भुज्यते किंचिन्नेत्यशक्यं वक्तुमित्याशयवानाह—प्रायणमिति । मरणस्यानारब्धसर्वकर्माभिव्यञ्जकत्वे हेतुमाह—प्रागिति । अस्तु तर्हि प्रायणं प्रबलस्य कर्मणो व्यञ्जकं तत्राऽऽह—तच्चेति । तदुपपादयति—न हीति । उक्तमर्थं दृष्टान्तेन साधयति—न हीति । श्रुतियुक्तिभ्यां सर्वस्य कर्मणश्चन्द्रलोके भुक्तफलत्वेन क्षयितत्वे फलितमाह—तस्मादिति ।

पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति । प्रतिज्ञां विभजते—येनेति । हेतुमाकाङ्क्षाद्वाराऽवतार्य व्याकरोति—केनेति । तत्तत्र तेषां मध्ये ये केचिदिह कर्मभूमौ रमणीयचरणास्ते रमणीयां योनिमापद्येरन्निति यत्तदभ्याशो ह क्षिप्रमेवाप्रतिबन्धेनेत्यर्थः । रमणीयां योनिं विशिनष्टि—ब्राह्मणेति । प्रत्यवरोहतां

---

१ ज्ञ. क्षपित' । २ ङ. ञ. °रके । हुं' । ३ ङ. ञ. °व घृ' । ४ क. ठ. ड. क्षपित' ।

वा क्षत्रिययोनिं वा वैश्ययोनिं वा । अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा " [छा० ५-१०-७] इति । चरणशब्देनानुशयः सूच्यत इति वर्णयिष्यति । दृष्टश्चायं जन्मनैव प्रतिप्राण्युच्चावचरूप उपभोगः प्रविभज्यमान आकस्मिकत्वासंभवादनुशयसद्भावं सूचयति । अभ्युदयप्रत्यवाययोः सुकृतदुष्कृतहेतुत्वस्य सामान्यतः शास्त्रेणावगमितत्वात् । स्मृतिरपि " वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते " [गौत० शा० ११-२९] इति सानुशयानामेवावरोहं दर्शयति ।

कः पुनरनुशयो नामेति । केचित्तावदाहुः—स्वर्गार्थस्य

शुभकर्मवतां शुभयोनिप्राप्तिमुक्त्वा तेषामेवाशुभकर्मवतामशुभयोनिप्राप्तिमाह—**अथेति** । कपूयचरणा निन्दितकर्माणः शेषं पूर्ववत् । ननु चरणादाचाराद्योन्यापत्तिरत्रोच्यते नानुशयादन्यच्चरणमन्योऽनुशयस्तत्राऽऽह—**चरणेति** । अनुशेते भोक्तारमनुगच्छतीत्यनुशयः कर्मसमूहः स चरणशब्दार्थो भविष्यतीत्यर्थः । दृष्टशब्देन प्रत्यक्षश्रुतिरुक्ता । व्याख्यानान्तरमाह—**दृष्टश्चेति** । सर्वप्राणिषु जन्माऽऽरभ्य दृष्टोऽयमुत्कृष्टापकृष्टात्मा भोगोऽदृष्टनिमित्तो भोगत्वात्स्वर्गादिभोगवदित्यर्थः । कथमाकस्मिकत्वासंभवस्तत्राऽऽह—**अभ्युदयेति** । पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति सुखदुःखयोः सुकृतदुष्कृतकार्यत्वस्य सिद्धत्वाद्यो भोगः स कर्मनिमित्त इति व्याप्तेरनुशयसिद्धिरित्यर्थः । दृष्टं व्याख्याय स्मृतिं व्याचष्टे—**स्मृतिरपीति** । प्रेत्य प्रायणं कृत्वा चन्द्रलोकमधिरुह्येत्यर्थः । ततः शेषेण भुक्तादन्येन कर्मणा जन्म प्रतिपद्यन्त इति संबन्धः । श्रुतं ज्ञानम् । वृत्तमाचारः । देशश्च जातिश्च कुलं च रूपं चाऽऽयुश्च श्रुतं च वृत्तं च वित्तं च सुखं च मेधा च ते विशिष्टा येषु ते तथोक्ताः ।

अनुशयशब्दस्यार्थान्तरे रूढेर्निर्धारणार्थं पृच्छति—**कः पुनरिति** । एकदेशिमतमाह—**केचिदिति** । तत्पक्षे किमिष्टादिकर्मस्वशेषतो भुक्तफलेष्वननुभुक्तकर्मान्तरवशादावृत्तिः, अथवा तेषामेवावशेषादिति संशये भुक्तत्वादिष्टादीनामभुक्तकर्मान्तरादावृत्तिरिति प्राप्ते कृतात्ययेऽनुशयवानिति व्याचष्टे—**स्वर्गेति** । यदिष्टादि स्वर्गार्थं कृतं तस्य भुक्तस्यात्यये कश्चिदवशेषोऽनुशयस्तद्वानवरोहतीत्यर्थः । दृष्टेतिपदस्यार्थमाह—

---

१ क. ट. वा चण्डा° । २ क. °नानेनानु° । ङ. ञ. °नात्रानु° । ३ ङ. ञ. °ष्यते । दृ° । ४ ञ. °णान्याचा° । ५ ञ. ट. ङ. °त्य प्रयाणं ।

(कर्मान्तरैः सानुशयस्य जीवस्य लोकान्तरारोहणम्, अधि० २)

कर्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत्। यथा हि स्नेहभाण्डं रिच्यमानं न सर्वात्मना रिच्यते भाण्डानुसार्येव कश्चित्स्नेहशेषोऽवतिष्ठते तथाऽनुशयोऽपीति। ननु कार्यविरोधित्वाददृष्टस्य न भुक्तफलस्यावशेषावस्थानं न्याय्यम्। नायं दोषः। न हि सर्वात्मना भुक्तफलत्वं कर्मणः प्रतिजानीमहे। ननु निरवशेषकर्मफलोपभोगाय चन्द्रमण्डलमारूढाः। बाढम्। तथाऽपि स्वल्पकर्मावशेषमात्रेण तत्रावस्थातुं न लभ्यते। यथा किल कश्चित्सेवकः सकलैः सेवोपकरणैः राजकुलमुपसृप्तश्चिरप्रवासात्परिक्षीणबहूपकरणैश्छत्रपादुकादिमात्रावशेषो न राजकुलेऽवस्थातुं शक्नोति। एवमनुशयैमात्रपरिग्रहो न चन्द्रमण्डलेऽवस्थातुं शक्नोतीति।

न चैतद्युक्तमिव। न हि स्वर्गार्थस्य कर्मणो भुक्तफलस्यवाशेषानुवृत्तिरुपपद्यते कार्यविरोधित्वादित्युक्तम्। नन्वेतदप्युक्तम्—न स्वर्गफलस्य कर्मणो निखिलस्य भुक्तफलत्वं भविष्यतीति। तदेतदपेशलम्। स्वर्गार्थं किल कर्म स्वर्गस्थस्यैव स्वर्गफलं निखिलं न जनयति स्वर्गच्युतस्यापि कंचित्फललेशं

भाण्डेति। तदेव प्रपञ्चयति—**यथेति**। भाण्डानुसारिणः स्नेहस्याविरोधाद्युक्तः शेषः। कर्म तु फलोदयविरोधित्वात्फलं चेज्जातं नष्टमेवेति न तस्य शेषसिद्धिरिति शङ्कते—**नन्विति**। कृत्स्नस्य कर्मणो यदि फलं जातं तदा नावशेषसिद्धिर्न तु तदस्तीत्याह—**नायमिति**। येन कर्मणा चन्द्रमसमारूढास्तत्कर्म सर्वं तत्र न भुक्तमित्ययुक्तमिति शङ्कते—**नन्विति**। भोगार्थं चन्द्रारोहणमङ्गीकृत्य विरोधं समाधत्ते—**बाढमिति**। अत्रापि दृष्टेति व्याचष्टे—**यथेति**। अत्र च स्मृतिशब्देन लौकिकी स्मृतिर्यथोक्तदृष्टमूला वा ततः शेषेणेत्याद्या गृहीता।

तदेतदेकदेशिमतं दूषयति—**न चेति**। इवकारो मधुरोक्त्या प्रयुक्तो वस्तुतस्त्वेवकारो विवक्षितः। अयुक्तत्वे हेतुमाह—**नहीति**। स्वर्गार्थेन कर्मणा स्वर्गश्चेदारब्धो न तस्य शेषस्तेन स्वर्गो नाऽऽरभ्यते चेन्न तस्यार्थवत्तेति भावः। स्वर्गस्याऽऽरब्धत्वेऽपि कृत्स्नस्यानारम्भान्नोक्तदूषणमिति शङ्कते—**नन्विति**। स्वर्गार्थं चोदितस्य कर्मणः स्वर्गार्थत्वयोगान्नैवमित्याह—**तदेतदिति**। परोक्तं दृष्टान्तं विघटयति—

---

१ क. झ. 'रूढः। बा'। २ ङ. ञ. 'णच्छत्र'। ३ ङ. ञ. 'यलेशमा'। ४ ङ. ञ भवती'। ५ क. ङ. ज. ञ. 'लं ज'। ६ ज. झ. ट. 'पि किंचि'। ७ ठ. ड. 'र्थतायो'।

जनयतीति। न शब्दप्रमाणकानामीदृशी कल्पनाऽवकल्पते। स्नेहभाण्डे तु स्नेहलेशानुवृत्तिर्दृष्टत्वादुपपद्यते। तथा सेवकस्योपकरणलेशानुवृत्तिश्च दृश्यते। न त्विह तथा स्वर्गफलस्य कर्मणो लेशानुवृत्तिर्दृश्यते। नापि कल्पयितुं शक्यते स्वर्गफलत्वशास्त्रविरोधात्। अवश्यं चैतदेवं विज्ञेयम्—न स्वर्गफलस्येष्टादेः कर्मणो भाण्डानुसारिस्नेहवदेकदेशोऽनुवर्तमानोऽनुशय इति। यदि हि येन सुकृतेन कर्मणेष्टादिना स्वर्गमन्वभूवंस्तस्यैव कश्चिदेकदेशोऽनुशयः कल्प्येत ततो रमणीय एवैकोऽनुशयः स्यान्न विपरीतः। तत्रेयमनुशयविभागश्रुतिरुपरुध्येत "तद्य इह रमणीयचरणा अथ य इह कपूयचरणाः" [छा० ५-१०-७] इति। तस्मादामुष्मिकफले कर्मजात उपभुक्तेऽवशिष्टमैहिकफलं कर्मान्तरजातमनुशयस्तद्वन्तोऽवरोहन्तीति।

यदुक्तं यत्किंचेत्यविशेषपरामर्शात्सर्वस्येह कृतस्य कर्मणः फलोपभोगेनान्तं प्राप्य निरनुशया अवरोहन्तीति। नैतदेवम्। अनुशयसद्भावस्यावगमितत्वात्। यत्किंचिदिह कृतमामुष्मिकफलं कर्माऽऽरब्धभोगं तत्सर्वं फलोपभोगेन क्षपयित्वेति गम्यते।

स्नेहेति। तथा दृष्टत्वादुपपन्नेति यावत्। दार्ष्टान्तिकेऽपि तथैव लेशानुवृत्तिरित्याशङ्क्य दृष्टा कल्पिता वा सेति विकल्प्याऽऽद्यं प्रत्याह—न त्विति। इहेति शास्त्रीयव्यवहारभूमिरुक्ता। द्वितीयं निराह—नापीति। शब्दैकगम्यत्वान्नायमर्थः सामान्यतो दृष्टगम्य इत्यर्थः। किंच स्वर्गहेतुकर्मशेषादनुशयादवरोहे कपूययोन्यापत्तिशास्त्रविरोधः स्यादित्याह—अवश्यं चेति। तदेव स्फुटयति—यदीत्यादिना। परमतायोगे स्वमतमुपसंहरति—तस्मादिति।

प्रथमं पूर्वपक्षबीजमनुभाषते—यदिति। यद्यपि यत्किंचयावत्संपातशब्दौ चन्द्रमस्येव सर्वस्य कर्मणो भुक्तत्वप्रापकत्वेनानुशयाभावे लिङ्गभूतौ तथाऽपि रमणीयचरणाः कपूयचरणा इति शब्दयोर्विशिष्टजात्यारम्भकैहिककर्मसद्भावावेदकत्वादशेषभोगविषयसामान्यलिङ्गस्यैहिककर्मसंस्त्ववविषयविशेषलिङ्गेनाऽऽमुष्मिकविषयतया संकोचः स्यादिति मत्वाऽऽह—नैतादिति। फलभोगेन चन्द्रलोके स्थित्वेति शेषः। क्षपयित्वा तस्माल्लोकात्पुनरस्मै लोकायाऽऽगच्छतीति प्राप्यान्तमित्यादिवाक्येन गम्यत इति योजना।

---

१ ट. °वृत्तिः। न। २ क. ङ. ज. ञ. °स्तिर्दृश्य°। ३ झ. °रोधित्वात्। ४ झ. किंचित्स्वर्ग°। ५ झ. °र्मत्ववि°। ६ ख. ङ. फलोपभो°।

(कर्मान्तरैः सानुशयस्य जीवस्य लोकान्तरारोहणम्, अधि० २)

यदप्युक्तं प्रायणमविशेषादनारब्धफलं कृत्स्नमेव कर्माभिव्यनक्ति तत्र केनचित्कर्मणाऽमुष्मिँल्लोके फलमारभ्यते केनचिदस्मिन्नित्ययं विभागो न संभवतीति । तदप्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तम् । अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं प्रतिज्ञायत इति वक्तव्यम् । आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तेस्तदुपशमात्प्रायणकाले वृत्त्युद्भवो भवतीति यद्युच्येत । ततो वक्तव्यम् । यथैवं तर्हि प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिरित्येवं प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्मणो युगपत्फलारम्भासंभवाद्बलवता प्रतिबद्धस्य दुर्बलस्य वृत्त्युद्भवानुपपत्तिरिति । न ह्यनारब्धफलत्वसामान्येन जात्यन्तरोपभोग्यफलमप्येकं कर्मैकस्मिन्प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुं प्रतिनियतफलत्वविरोधात् ।

नापि कस्यचित्कर्मणः प्रायणेऽभिव्यक्तिः कस्यचिदुच्छेद इति शक्यते वक्तुम् । ऐकान्तिकफलत्वविरोधात् । न हि प्राय-

---

द्वितीयं पूर्वपक्षबीजमनुवदति—यदपीति । मरणस्याविशेषेणाशेषानारब्धकर्मव्यञ्जकत्वे विभागायोगं फलितमाह—तत्रेति । रमणीयचरणा इत्याद्यनुशयवादिश्रुतिविरोधादभिव्यञ्जकमपि प्रायणं न सर्वकर्मव्यञ्जकमनुमातुं शक्यमित्याह—तदपीति । व्यञ्जकत्वं प्रायणस्यापीत्युक्तं तदपि नास्तीत्याह—अपि चेति । न हि तस्य सर्वकर्मव्यञ्जकत्वे कारणं किंचिदिति भावः । पूर्ववादी पृष्टं मत्वा हेतुमाह—आरब्धेति । नानाविधसुखदुःखफलकर्मणामपर्यायेण प्रायणेऽभिव्यक्तिश्चेत्फलाभिमुख्यलक्षणत्वाद्व्यक्तेर्युगपत्तत्तत्फलभोगप्रसङ्गात्तस्य चादृष्टेस्तत्तत्प्रबलकर्मप्रतिबन्धध्वंसमपेक्ष्य क्रमेणैव तत्तत्कर्मव्यक्तिरिति परिहरति—यथेति । युगपत्फलारम्भासंभवादित्यसिद्धम् । सर्वस्यापि कर्मणोऽनारब्धफलत्वाविशेषादेकजात्यारम्भकत्वसंभवादित्याशङ्क्य विरुद्धजातिनिमित्तभोगफलस्य कर्मणः शास्त्रयुक्तिविरुद्धमेकजात्यारम्भकत्वमित्याह—न हीति ।

प्रायणावस्थायामुपस्थिते विरुद्धे कर्मणि प्रबलेन दुर्बलस्योच्छेदः स्यादित्याशङ्क्याऽऽह—नापीति । कृतं कर्माऽऽवश्यकफलकमिति नास्त्येकान्तः । प्रायश्चित्तेन ब्रह्मज्ञानेन च तत्क्षयश्रुतेरित्याशङ्क्य प्रकृते तदभावान्नोच्छेदोऽस्तीत्याह—न हीति ।

---

१ ङ. ञ. तत्र । २ ङ. ञ. यथा त' । ३ ज. °व हि प्रा° । ४ क. ङ. ज. ञ. °त्तिरेवं । ५ क. ज. शक्यं । ६ ठ. ड. °णस्योक्तं । ७ ठ. ड. °ते क°।८ ख. °रुद्धक° ।

श्चित्तादिभिर्हेतुभिर्विना कर्मणामुच्छेदः संभाव्यते । स्मृतिरपि विरुद्धफलेन कर्मणा प्रतिबद्धस्य कर्मान्तरस्य चिरमवस्थानं दर्शयति—

" कदाचित्सुकृतं कर्म कूटस्थमिह तिष्ठति ।
मज्जमानस्य संसारे यावद्दुःखाद्विमुच्यते " ॥
[महाभा० १२-२९२-१८]

इत्येवंजातीयका । यदि च कृत्स्नमनारब्धफलं कर्मैकस्मिन्प्रायणेऽभिव्यक्तं सदेकां जातिमारभेत ततः स्वर्गनरकतिर्यग्योनिष्वधिकारानवगमाद्धर्माधर्मानुत्पत्तौ निमित्ताभावान्नोत्तरा जातिरुपपद्येत । ब्रह्महत्यादीनां चैकैकस्य कर्मणोऽनेकजन्मनिमित्तत्वं स्मर्यमाणमुपरुध्येत । न च धर्माधर्मयोः स्वरूपफलसाधनादिसमधिगमे शास्त्रादतिरिक्तं कारणं शक्यं संभावयितुम् । न च दृष्टफलस्य कर्मणः कारीर्यादेः प्रायणमभिव्यञ्जकं संभवतीत्यव्यापिकाऽपीयं प्रायणस्याभिव्यञ्जकत्वकल्पना । प्रदीपोपन्यासोऽपि

प्रायश्चित्तेन वा ब्रह्मज्ञानेन वा भोगेन वा विना कर्मणां विच्छेदो नेत्यत्र मानमाह— **स्मृतिरिति** । इतोऽपि प्रायणाभिव्यक्तं सर्वमेव कर्मैकजात्यारम्भकमित्ययुक्तमित्याह— **यदि चेति** । पूर्वस्य कर्मणः सर्वस्याप्येकजात्यारम्भकस्य भोगेन क्षयान्मनुष्यार्धिकारित्वाच्च शास्त्रस्य स्वर्गादियोनिषु कर्मासिद्धेर्न तन्निमित्तः संसारः स्यात् । न च ज्ञानाभावान्मुक्तिरिति दुर्घटेतेत्यर्थः ।

" श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणाम् ।
चण्डालपुल्कसानां च ब्रह्महा योनिमृच्छति " ॥

इत्यादिस्मृतिविरोधोऽपि कर्माशयस्यैकभविकत्वे स्यादित्याह—**ब्रह्मेति** । एकस्यापि कर्मणोऽनेकजात्यारम्भकत्वस्मरणादनेकेषामेकजात्यारम्भकत्वं दूरनिरस्तमित्युक्तं तदयुक्तम् । एकं हि कर्मैकफलं दृष्टं न च सामान्यतो दृष्टविरुद्धं वचनं मानमित्याशङ्क्याऽऽह—**न चेति** । किंच प्रायणं सर्वस्य वा कर्मणो व्यञ्जकं कस्यचिदेव वा नाऽऽद्य इत्याह—**न चेति** । कारीर्यादेरिहैवानुष्ठितस्यात्रैव भुज्यमानत्वान्न प्रायणेन व्यङ्ग्यतेत्यर्थः । द्वितीयं निरस्यन्परोक्तं दृष्टान्तं प्रत्याह—**प्रदीपेति** । यश्च प्रदीप-

---

१ झ. बद्धस्य । २ ङ. ञ. °मप्यवं° । ३ क. ज. ठ. °नुपपत्तौ । ४ ज. ट. °पद्यते । ब्र° । ५ ङ. °तीत्येषाऽपि । ञ. °तीत्येषाऽपि केयं । ६ ठ. ङ. °ष्यारम्भकत्वा° । ७ क. °कारत्वा° । ८ क. °टनेत्य° । ९ क. ठ. श्वशूक° ।

(कर्मान्तरैः सानुशयस्य जीवस्य लोकान्तरारोहणम्, अधि० २)

कर्मबलाबलप्रदर्शनेनैव प्रतिनीतः । स्थूलसूक्ष्मरूपाभिव्यक्तिवच्चेदं द्रष्टव्यम् । यथा हि प्रदीपः समानेऽपि संनिधाने स्थूलं रूपमभिव्यनक्ति न सूक्ष्ममेवं प्रायणं समानेऽप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वे बलवतः कर्मणो वृत्तिमुद्भावयति न दुर्बलस्येति । तस्माच्छ्रुतिस्मृतिन्यायविरोधादश्लिष्टोऽयमशेषकर्माभिव्यक्त्यभ्युपगमः । शेषकर्मसद्भावेऽनिर्मोक्षप्रसङ्ग इत्ययमप्यस्थाने संभ्रमः । सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः । तस्मात्स्थितमेतदेवानुशयवन्तोऽवरोहन्तीति । ते चावरोहन्तः " यथेतमनेवं च" अवरोहन्ति । यथेतमिति यथागतमित्यर्थः । अनेवमिति तद्विपर्ययेणेत्यर्थः । धूमाकाशयोः पितृयाणेऽध्वन्युपात्तयोरवरोहे संकीर्तनाद्यथेतंशब्दाच्च यथागतमिति प्रतीयते । रात्र्याद्यसंकीर्तनादभ्राद्युपसंरूयानाच्च विपर्ययोऽपि प्रतीयते ॥ ८ ॥

चरणादिति चेन्नोपलक्षणार्थेति काष्णाजिनिः ॥ ९ ॥

अथापि स्यात् । या श्रुतिरनुशयसद्भावप्रतिपादनायोदाहृता " तद्य इह रमणीयचरणाः " [छा० ५-१०-७] इति सा खलु चरणाद्योन्यापत्तिं दर्शयति नानुशयात् । अन्यच्चरणम-

---

दृष्टान्तः सोऽपि प्रायणस्य सति व्यञ्जकत्वेऽनुकूलः स्यात् । यदा तु न तद्व्यञ्जकं किं तु बलवता प्रतिबद्धं दुर्बलं दृष्टमिति दर्शितं तदा तेनैव सोऽपि निरस्त इत्यर्थः । भवतु वा प्रायणस्य क्वचित्कर्मणि व्यञ्जकत्वं तदाऽपि प्रदीपोऽनुकूलो भवतीत्याह— **स्थूलेति** । उक्तमेव व्यनक्ति—**यथेत्यादिना** । इति सर्वकर्मव्यञ्जकत्वासिद्धिः । कतिपयव्यञ्जकत्वमिष्टमेवेति शेषः । ऐकभविकः कर्माशय इति मतनिरासं निगमयति— **तस्मादिति** । श्रुतिश्चरणश्रुतिः । स्मृतिश्च श्वसूकरेत्याद्या । न्यायस्तु केन हेतुनेत्यादावुक्तः । यदि सर्वं कर्मैकस्मिन्मुमुक्षुदेहे न भुज्यते तदाऽवशिष्टकर्मानन्त्यान्न कदाचिन्मुक्तिरतो मुक्त्यनुपपत्त्या प्रायणव्यक्तं सर्वं कर्मैकदेहारम्भकमित्याशङ्क्याऽऽह— **शेषेति** । सूत्रावयवव्याख्यामुपसंहरति—**तस्मादिति** । अवशिष्टं व्याचष्टे—**ते चेति** । विरुद्धमेतदित्याशङ्क्याऽऽह—**धूमेति** । **यथेतंशब्दाच्चेति** । यथेतमेवाध्वानं पुनर्निवर्तन्ते यथेतमिति श्रुतेश्चेत्यर्थः । विपर्ययप्रतीतिप्रापकमाह—**रात्र्यादीति** ॥ ८ ॥

पूर्वोदाहृतां श्रुतिमाक्षेपसमाधिभ्यां विवृणोति—**चरणादिति** । चोद्यं व्याकरोति— **अथापीति** । श्रुत्याऽनुशयसत्त्वे दर्शितेऽपीति यावत् । चरणाद्या योन्यापत्तिः साऽनुशयादेव तयोरैक्यादित्याशङ्क्याऽऽह—**अन्यदिति** । तदेवान्यत्वं स्फुटयितुं

---

१ ङ. ज. ञ. ट. स्थूलरू । २ क. श्वशूक । ३ झ. श्रुत्यनु ।

न्योऽनुशयः । चरणं चारित्रमाचारः शीलमित्यनर्थान्तरम् । अनुशयस्तु भुक्तफलात्कर्मणोऽतिरिक्तं कर्माभिप्रेतम् । श्रुतिश्च कर्मचरणे भेदेन व्यपदिशति " यथाकारी यथाचारी तथा भवति " [बृ० ४-४-५] इति " यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि यान्यस्माकꣳ सुचरितानि तानि त्वयोपास्यानि " [तै० १-११-२] इति च । तस्माच्चरणाद्योन्यापत्तिश्रुतेर्नानुशयसिद्धिरिति चेत् । नैष दोषः । यतोऽनुशयोपलक्षणार्थैवैषा चरणश्रुतिरिति काष्णाजिनिराचार्यो मन्यते ॥ ९ ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

स्यादेतत् । कस्मात्पुनश्चरणशब्देन श्रौतं शीलं विहाय लाक्षणिकोऽनुशयः प्रत्याय्यते । ननु शीलस्यैव श्रौतस्य विहितप्रतिषिद्धस्य साध्वसाधुरूपस्य शुभाशुभयोन्यापत्तिः फलं भविष्यति । अवश्यं च शीलस्यापि किंचित्फलमभ्युपगन्तव्यम् । अन्यथा हि "आनर्थक्यमेव" शीलस्य प्रसज्येत "इति चेत्" ।

चरणानुशयशब्दार्थमनुवदति—**चरणमिति** । तत्र श्रुतिमनुकूलयति—**श्रुतिश्चेति** । तयोर्भेदे फलितमाह—**तस्मादिति** । परिहारं व्याचष्टे—**नेत्यादिना** ।

" अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च ज्ञानं च शीलमेतद्विदुर्बुधाः "

इति[1] स्मृतस्य शीलस्यापि कर्माङ्गत्वाच्चरणशब्देन शीलवाचिना कर्मानुशयो लक्ष्यत इति भावः ॥ ९ ॥

काष्णाजिनिवाक्यस्य पौरुषेयत्वान्मूले वक्तव्ये मुख्यत्यागे न लक्षणा हेत्वभावाच्चरणशब्दितस्य शीलस्यैवाऽऽनर्थक्यपरिहारार्थं योन्यापत्तिहेतुतेत्याशङ्क्य परिहरति—**आनर्थक्यमिति** । शङ्कां विभजते—**स्यादिति** । संभवति मुख्येऽर्थे लक्षणा न ग्राह्येत्यर्थः । कर्मणैव योन्यापत्तिसंभवाच्चरणशब्देन तल्लक्षणेत्याशङ्क्य शास्त्रप्रामाण्यात्कर्मवच्चरणस्यापि योन्यापत्तिहेतुता स्यादिति पूर्ववाद्येवाऽऽह—**नन्विति** । किंच कर्मलक्षणायां तस्यैव फलं श्रुतमिति शीलस्य तत्कल्प्येत तस्यापि विहितस्याफलत्वायोगात्तेन चरणस्यैव यथाश्रुतं फलमुपेतव्यमित्याह—**अवश्यं चेति** । तदनुपगमे दोषमाह—**अन्यथेति** । आचारस्य कर्माङ्गत्वादङ्गाङ्गिनोश्चैकाधिकारत्वान्न पृथक्फल-

---

१ क्ष. 'ति शी' ।

(कर्मान्तरैः सानुशयस्य जीवस्य लोकान्तरारोहणम्, अधि० २)

नैष दोषः । कुतः । " तदपेक्षत्वात् " । इष्टादि हि कर्मजातं चरणापेक्षम् । न हि सदाचारहीनः कश्चिदधिकृतः स्यात्,

" आचारहीनं न पुनन्ति वेदाः "

इत्यादिस्मृतिभ्यः । पुरुषार्थत्वेऽप्याचारस्य नाऽऽनर्थक्यम् । इष्टादौ हि कर्मजाते फलमारभमाणे तदपेक्ष एवाऽऽचारस्तत्रैव किंचिदतिशयमारप्स्यते । कर्म च सर्वार्थकारीति श्रुतिस्मृतिप्रसिद्धिः । तस्मात्कर्मैव शीलोपलक्षितमनुशयभूतं योन्यापत्तौ कारणमिति काष्णाजिनेर्मतम् । न हि कर्मणि संभवति शीलाद्योन्यापत्तिर्युक्ता । न हि पद्भ्यां पलायितुं पारयमाणो जानुभ्यां रंहितुमर्हतीति ॥ १० ॥

सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥ (२)

" बादरिस्तु " आचार्यः " सुकृतदुष्कृते एव " चरणशब्देन प्रत्याय्येते इति मन्यते । चरणमनुष्ठानं कर्मेत्यनर्थान्तरम् । तथाह्यविशेषेण कर्ममात्रे चरतिः प्रयुज्यमानो दृश्यते । यो हीष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते धर्मं चरत्येष

कल्पनेत्याह—नेत्यादिना । उक्तमर्थं प्रश्नपूर्वकं सौत्रं हेतुमादाय विशदयति—कुत इति । कथमिष्टादिकर्मसमुदायस्य चरणापेक्षत्वं तत्राऽऽह—न हीति । सदाचारयुक्तस्य कर्माधिकारे मानमाह—आचारेति । वेदशब्देन वेदार्थोपलक्षणादाचारस्तच्छेषो न स्वतन्त्रफल इत्युक्तम् । इदानीं स्नानादिवत्पुरुषसंस्कारतया भिन्नफलत्वेऽपि न विरोधोऽस्तीत्याह—पुरुषेति । कथं तर्हि पृथक्फलत्वं तत्राऽऽह—इष्टादौ हीति । अङ्गावबद्धोपास्तिवदित्यर्थः । आचारस्यैव योन्यापत्तिहेतुत्वेऽपि[1] किमित्यनुशयस्य तत्कल्पनेत्याशङ्क्य कर्मणस्तद्धेतुत्वप्रसिद्धेरित्याह—कर्म चेति । एकदेशिमतमुपसंहरति—तस्मादिति । तदेव प्रपञ्चयति—न हीति । अयुक्तत्वं दृष्टान्तेन स्पष्टयति—न हीति । इतिशब्दो दार्ष्टान्तिकप्रदर्शनार्थः ॥ १० ॥

साक्षात्सिद्धान्तमाह—सुकृतेति । तदेव विवृणोति—बादरिरित्विति । कथं चरणशब्देन मुख्यवृत्त्या कर्मोच्यते तत्राऽऽह—चरणमिति । वृद्धप्रयोगाभावे कथं तस्य कर्मविषयत्वं तत्राऽऽह—तथाहीति । कर्मणः सर्वार्थकारित्वप्रसिद्धेराचारस्यातथात्वाद्भिन्नतेत्याशङ्क्य पूर्वोक्तस्मृतेरक्रोधादेः साधारणधर्मस्य शीलत्वासिद्धेर्मैवमित्याह—

---

१ ठ. ड. °त्वे किं ।

महात्मेति। आचारोऽपि[1] च धर्मविशेष एव। भेदव्यपदेशस्तु कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते। तस्मात् "रमणीयचरणाः" प्रशस्तकर्माणः कपूयचरणा निन्दितकर्माण इति निर्णयः॥ ११॥ (२)

(पापिनां याम्यलोकगमनम्, अधि० ३)

अनिष्टादिकारिणामपि च श्रुतम्॥ १२॥

इष्टादिकारिणश्चन्द्रमसं गच्छन्तीत्युक्तम्। ये त्वितरेऽनिष्टादिकारिणस्तेऽपि किं चन्द्रमसं गच्छन्त्युत न गच्छन्तीति चिन्त्यते। तत्र तावदाह[2]। इष्टादिकारिण एव चन्द्रमसं गच्छन्तीत्येतन्न। कस्मात्। यतः "अनिष्टादिकारिणामपि" चन्द्रमडलं गन्तव्यत्वेन "श्रुतम्"। तथाह्यविशेषेण कौषीतकिनः समामनन्ति—"ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" [कौषी० १-२] इति। देहारम्भोऽपि च पुनर्जायमानानां नान्तरेण चन्द्रप्राप्तिमवकल्पते[3]। पञ्चम्यामाहु-

---

आचारोऽपीति। कथं तर्हि श्रौतो भेदवादस्तत्राऽऽह—भेदव्यपदेशस्त्विति। लक्षणायां निमित्ताभावाच्चरणशब्दोऽनुशये मुख्य इति बादरिमतमुपसंहरति—तस्मादिति॥ ११॥ (२)

इष्टादिकारिणामनुशयवतामागतिरुक्ता। संप्रत्यनिष्टादिकारिणामपि चन्द्रस्थलस्खलितानामनुशयवतामागतिमभिप्रेत्य चोदयति—अनिष्टादीति। प्रथमाधिकरणेनास्य संगतिमाह—इष्टादीति। व्यवहितमनूद्यानिष्टादिकारिणो विषयीकृत्य ये वै के चेत्यविशेषश्रुतेर्वैस्वतं संगमनं जनानामिति श्रुतेश्च संशयं दर्शयति—ये त्विति। अत्र चानिष्टादिकारिणां शुभमार्गेण गमनमात्रमपि नेत्युक्त्या वैराग्ये दृढीकृते पूर्ववदेव पादादिसंगतयः। पूर्वपक्षे शुभाशुभकारिणामविशेषेण चन्द्रगतेस्तत्र शुभकरणमकिंचित्करमिति फलति। सिद्धान्ते त्वशुभकारिणां गत्यन्तरध्रौव्याच्चन्द्रगतौ प्रयोजकमिष्टाद्येवेति मत्वा पूर्वपक्षसूत्रं योजयति—तत्रेति। तेषामिष्टादिकं[4] कर्म चन्द्रलोकप्रापकमस्तीत्यतो नियमनिषेधो न युक्तिमानिति शङ्कते—कस्मादिति। श्रुत्या परिहरति—यत इति। तामेवोदाहरति—तथा हीति। श्रुतेश्चन्द्रलोकगमनमुपपाद्य चकारसूचितयुक्तितोऽपि तदुपपादयति—देहेति। देवयानपितृयाणातिरेकेण गमनागमनमार्गाश्रवणादथैतयोः पथोर्न कतरेणचनेत्यारभ्य जायस्व म्रियस्वेत्येतत्तृतीयं स्थान-

---

१ ङ. ज. °पि ध°। २ क. ज. °दाहुः। इ°। ३ क. ज. °नराजाय°। ४ ठ. ड. °दिक°।

(पापिनां याम्यलोकगमनम्, अधि० ३)

तावित्याहुतिसंख्यानियमात् । तस्मात्सर्व एव चन्द्रमसमासीदेयुः । इष्टादिकारिणामितरेषां च समानगतित्वं न युक्तमिति चेन्नेतरेषां चन्द्रमण्डले भोगाभावात् ॥ १२ ॥

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

तुशब्दः पक्षं व्यावर्तयति । नैतदस्ति सर्वे चन्द्रमसं गच्छन्तीति । कस्मात् । भोगायैव हि चन्द्रारोहणं न निष्प्रयोजनम् । नापि प्रत्यवरोहायैव । यथा कश्चिद्वृक्षमारोहति पुष्पफलोपादानाय न निष्प्रयोजनं नापि पतनायैव । भोगश्चानिष्टादिकारिणां चन्द्रमसि नास्तीत्युक्तम् । तस्मादिष्टादिकारिण एव चन्द्रमसमारोहन्ति नेतरे । ते तु संयमनं यमालयमवगाह्य स्वदुष्कृतानुरूपा यामीर्यातनाः " अनुभूय " पुनरेवेमं लोकं प्रत्यवरोहन्ति । एवंभूतौ तेषाम् " आरोहावरोहौ " भवतः । कुतः । " तद्गतिदर्शनात् "। तथाहि यमवचनसरूपा श्रुतिः प्रयतामनिष्टादिकारिणां यमवश्यतां दर्शयति—

मिति स्थानमात्रत्वश्रुत्या पथित्वेनाप्रतीतेश्चन्द्रमण्डलं प्राप्यावतीर्णानामपि तद्योगान्न केषांचिदेव गतिरिति मत्वोपसंहरति—तस्मादिति । सर्वेषां तुल्यगतित्वे तत्प्राप्तिहेत्वनुष्ठानवैयर्थ्यमिति शङ्कते—इष्टादीति । तत्र भोगाभावेऽपि मार्गान्तरशून्यतया ग्रामं गच्छन्वृक्षमूलान्युपसर्पतीतिवदुपपन्ना गतिरित्याह—नेतरेषामिति ॥ १२ ॥

सिद्धान्तमुपक्रमते—संयमने त्विति । सूत्रं व्याचष्टे—तुशब्द इति । पक्षव्यावृत्तिमेव व्यनक्ति—नैतदिति । का पुनरत्रानुपपत्तिः । तत्र तेषां तद्गमनमफलं सफलं वेति विकल्प्याऽऽद्यं प्रत्याह—भोगायेति । द्वितीयेऽपि गमनस्य प्रत्यवरोहो वा भोगो वा फलं नाऽऽद्य इत्याह—नापीति । पक्षद्वयनिरासं दृष्टान्तेन स्पष्टयति—यथेति । कल्पान्तरं निरस्यति—भोगश्चेति । तुशब्दार्थमुपसंहरति—तस्मादिति । कथं तर्हि तेषामारोहावरोहावित्याशङ्क्य संयमने त्वनुभूयेत्यादि विभजते—ते त्विति । तत्र प्रश्नपूर्वकं हेतुमाह—कुत इति । हेतुं व्याचष्टे—तथा हीति । प्रयतां प्रेत्य गच्छतां संपरायः परलोकः । सम्यगवश्यंभावेन परा परस्ताद्देहपातादीयते गम्यत इति व्युत्पत्तेः । तत्प्राप्त्यर्थः साधनविशेषः सांपरायः । स बालमविवेकिनं

---

१ क. ज. ट. °ति । भो° । २ क. ज. °दुश्चरिता° । ३ क. °रूपां यातनामनु° । ४ ड. ञ. °नस्वरू° । ५ ठ. ड. °चिदव° । ६ ठ. °त्वेन त° । ७ ठ. ड. तर्हीतरेषा° ।

" न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ।
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे "
[कठ० २-६] इति ।

" वैवस्वतं संगमनं जनानाम् " [ऋ० सं० १०-१४-१]
इत्येवंजातीयकं च । बह्वेव यमवश्यताप्राप्तिलिङ्गं भवति ॥१३॥

स्मरन्ति च ॥ १४ ॥

अपि च मनुव्यासप्रभृतयः शिष्टाः संयमने पुरे यमायत्तं कपूयकर्मविपाकं[1] स्मरन्ति नाचिकेतोपाख्यानादिषु ॥ १४ ॥

अपि च सप्त ॥ १५ ॥

" अपि च सप्त " नरका रौरवप्रमुखा दुष्कृतफलोपभोगभूमित्वेन स्मर्यन्ते पौराणिकैः । तानिष्टकारिणः प्राप्नुवन्ति । कुतस्ते चन्द्रं प्राप्नुयुरित्यभिप्रायः ॥ १५ ॥

ननु विरुद्धमिदं यमायत्ता यातनाः पापकर्माणोऽनुभवन्तीति ।

विशेषतो वित्तनिमित्तेन मोहेन मूढं छन्नदृष्टिमत एव प्रमाद्यन्तं प्रमादं कुर्वन्तं विषयप्रवणं प्रति न भाति । स न केवलमज्ञ एव किंतु विपरीतदर्शी च यस्मादयमेव लोकः खयन्नपानादिरस्ति न पर इति मानी मननशीलस्तस्मात्तदनुरूपमाचरन्पुनः पुनर्जननमरणप्राप्त्या मे वशमापद्यत इति मृत्योर्नचिकेतसं प्रति वचनम् । श्रुत्यन्तरमाह—**वैवस्वतमिति** । जनानां परलोकगतानां संगमनं संगम्यं वैवस्वतं यमं राजानं हविषा दुवस्यत प्रीणयतेत्यर्थः । ये वै के चास्मादित्यादिश्रुत्या सर्वेषां चन्द्रगतिः सिद्धेत्युक्तमित्याशङ्क्य विरोध्यनेकलिङ्गदृष्ट्या तदन्यथा नेयमित्याह—**बह्वेवेति** । ये वै के च वैवस्वतं संगमनमित्यनयोर्वाक्ययोः सामान्येन चन्द्रलोकयमलोकगतिवादिनोर्विद्याकर्मविशेषितमार्गद्वयभ्रष्टानामनिष्टादिकारिणां तृतीयस्थानगतिवादिवाक्येनेष्टादिकारिणां चन्द्रगतिवाक्येन च विशेषार्थेन विषयविशेषनियतिरिति भावः ॥ १३ ॥

इतश्चेष्टादिकारिविषये ये वै के चेत्यादिवाक्यस्य संकोच इत्याह—**स्मरन्ति चेति** । तद्व्याकरोति—**अपि चेत्यादिना** ॥ १४ ॥

इतश्चानिष्टादिकारिणां न चन्द्रगतिरित्याह—**अपीति** । तद्व्याख्याति—**अपि चेत्यादिना** ॥ १५ ॥

अनिष्टादिकारिणां चन्द्रमण्डले भोगाभावाद्यमवश्यतायाश्च श्रुतिस्मृतिसिद्धत्वान्न चन्द्रगतिरित्युक्तमिदानीं तेषां यमवश्यतामाक्षिपति—**नन्विति** । विरुद्धत्वे हेतुमाह—

---

१ ज. दर्शयति । २ क. 'कं सर्वं स्मं' । ३ क. ङ. ज. ञ. 'निष्टादिका' ।

(पापिनां याम्यलोकगमनम्, अधि० ३)

यावता तेषु रौरवादिष्वन्ये चित्रगुप्तादयो नानाधिष्ठातारः स्मर्यन्त इति नेत्याह—

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

तेष्वपि सप्तसु नरकेषु तस्यैव यमस्याधिष्ठातृत्वव्यापाराभ्युपगमादविरोधः। यमप्रयुक्ता एव हि ते चित्रगुप्तादयोऽधिष्ठातारः स्मर्यन्ते ॥ १६ ॥

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

पञ्चाग्निविद्यायाम् " वेत्थ यथाऽसौ लोको न संपूर्यते " [छा० ५-३-३] इत्यस्य प्रश्नस्य प्रतिवचनावसरे श्रूयते—— "अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति। जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते "[छा० ५-१०-८] इति। तत्रैतयोः पथोरिति विद्याकर्मणोरित्येतत्। कस्मात्। " प्रकृतत्वात् " विद्याकर्मणी हि देवयानपितृयाणयोः पथोः प्रतिपत्तौ प्रकृते " तद्य इत्थं विदुः " [छा० ५-१०-१] इति विद्या तया प्रतिपत्तव्यो देवयानः पन्थाः प्रकीर्तितः। " इष्टापूर्ते दत्तम् " [छा० ५-१०-३] इति कर्म तेन प्रतिपत्तव्यः पितृयाणः पन्थाः प्रकीर्तितः। तत्प्रक्रियायाम् " अथैतयोः पथोर्न कतरेणचन" [छा० ५-१०-८] इति श्रुतम्। एतदुक्तं भवति—ये न विद्यासाधनेन

यावतेति। सूत्रेण परिहरति——नेत्याहेति। तद्विभजते——तेष्वपीति। एकत्रोभयोरधिष्ठातृत्वायोगमाशङ्क्याऽऽह—यमेति ॥ १६ ॥

मार्गद्वयभ्रष्टानां तृतीयस्थानोक्तेरपि नानिष्टादिकारिणां चन्द्रगतिरित्याह—विद्येति। हेत्वन्तरमेव प्रकटयन्भूमिकोक्तिपूर्वकं श्रुतिमुदाहरति——पञ्चेति। तद्विद्येति प्रकरणमुक्तम्। श्रौती प्लुतिर्विचारणार्था। तृतीयस्थानोक्त्यारम्भार्थोऽथशब्दः। तत्प्रतिपत्तिफलमाह—तेनेति। श्रुत्यर्थं सूत्रयोजनया विशदयति—तत्रेति। उक्ता श्रुतिः सप्तम्यर्थः। पथिशब्दस्यार्थान्तरे रूढेर्विद्याकर्मार्थत्वे न मानमिति शङ्कते——कस्मादिति। तत्र प्रकरणं प्रमाणयति—प्रकृतत्वादिति। तदेव विवृणोति—विद्येति। प्रतिपत्तौ प्रतिपत्तिसाधने। तत्र देवयानस्य पथो विद्याद्वारा प्रकृतत्वं प्रकटयति—तद्य इति। कर्मद्वारा पितृयाणस्यापि प्रकृतत्वमाह—इष्टेति। विद्याकर्मणोरेवं प्रकृतत्वेऽपि प्रकृते किं जातं तदाह—तादिति। विद्याकर्महीनानां क्षुद्रजन्तुभावोऽत्र निर्दिश्यते न पुनस्तृतीयोऽध्वेत्याशङ्क्याऽऽह——एतदिति।

---

१ ङ. ञ. ये च न। २ ज. विद्यया सा'। ३ क. ठ. ङ. °ति तत्प्रक°।

देवयाने पथ्यधिकृता नापि कर्मणा पितृयाणे तेषामेष क्षुद्रजन्तुलक्षणोऽसकृदावर्ती तृतीयः पन्था भवतीति । तस्मादपि नानिष्टादिकारिभिश्चन्द्रमाः प्राप्यते । स्यादेतत् । तेऽपि चन्द्रबिम्बमारुह्य ततोऽवरुह्य क्षुद्रजन्तुत्वं प्रतिपत्स्यन्त इति । तदपि नास्ति आरोहानर्थक्यात् । अपि च सर्वेषु प्रयत्सु चन्द्रलोकं प्राप्नुवत्स्वसौ लोकः प्रयद्भिः संपूर्येतेत्यतः प्रश्नविरुद्धं प्रतिवचनं प्रसज्येत । तथा हि प्रतिवचनं दातव्यं यथाऽसौ लोको न संपूर्यते । अवरोहाभ्युपगमादसंपूर्णोपपत्तिरिति चेन्न । अश्रुतत्वात् । सत्यमवरोहादप्यसंपूरणमुपपद्यते । श्रुतिस्तु तृतीयस्थानसंकीर्तनेनासंपूरणं दर्शयति " एतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते " [छा० ५-१०-८] इति । तेनानारोहादेवासंपूरणमिति युक्तम् । अवरोहस्येष्टादिकारिष्वप्यविशिष्टत्वे सति तृतीयस्थानोक्त्यानर्थक्यप्रसङ्गात् । तुशब्दस्तु शाखान्तरीयवाक्यप्रभवामशेषगमनाशङ्कामुच्छिनत्ति । एवं सत्यधिकृतापेक्षः शाखान्तरीये वाक्ये सर्वशब्दोऽवतिष्ठते " ये वै केचिदधिकृता अस्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" [कौ० १-२] इति ॥ १७ ॥

मार्गद्वयभ्रष्टानामनिष्टादिकारिणां तृतीयस्थानोक्तिफलमाह—तस्मादिति । यदिदं तृतीयस्थानकीर्तनं तन्न चन्द्रगतिं वारयत्यागत्याऽपि तत्प्राप्तिसंभवादिति शङ्कते—स्यादिति । मानफलाभ्यां हि कल्पना न चेह तदुभयं तथा च नैवं कल्पनेत्याह—तदपीति । प्रतिवचनस्य प्रश्नोननुरूपत्वप्रसङ्गादपि नेयं कल्पनेत्याह—अपि चेति । कथं तर्हि प्रश्नानुगुणं प्रतिवचनं तत्राऽऽह—तथा हीति । गमनेऽपि तस्य प्रश्नानुगुणत्वसिद्धिरित्याह—अवरोहेति । अवरोहकृतासंपूरणस्याश्रुतेर्नैवमपि श्रुतहान्यादि कल्पयितव्यमित्याह—नेति । तदेव प्रपञ्चयति—सत्यमिति । तर्हि तथैवासंपूरणं स्यादित्याशङ्क्य श्रुतिविरोधान्नैवमित्याह—श्रुतिस्त्विति । श्रुतिसिद्धमसंपूरणं निगमयति—तेनेति । किमिति तदवरोहणकृतमेव श्रुतावपि नेष्टमित्याशङ्क्याऽऽह—अवरोहस्येति । युक्त्या स्वपक्षमुपपाद्य परपक्षं चापनुद्य पूर्ववाद्युद्भावितवाक्यस्य सूत्राक्षरेणैव गतिं दर्शयितुमारभते—तुशब्दस्त्विति । उच्छित्तिप्रकारं प्रकटयति—एवमिति । उक्तन्यायेनानिष्टादिकारिणां चन्द्रगत्ययोगे सतीति यावत् । अधिकृतशब्देनेष्टादिकारिणो गृह्यन्ते । सर्वशब्दस्याधिकृतार्थत्वे स्थिते स्थितं वाक्यार्थमाह—ये वा इति ॥ १७ ॥

१ ज. ट. °मेव क्षु° । २ क. °न्द्रमण्डलमा° । ३ क. ज. के चाधि° । ४ झ. °श्नानु° ।

(पापिनां याम्यलोकगमनम्, अधि० ३)

यत्पुनरुक्तं देहलाभोपपत्तये सर्वे चन्द्रमसं गन्तुमर्हन्ति । पञ्चम्यामाहुताविति पञ्चाहुतिसंख्यानियमादिति । तत्प्रत्युच्यते—

न तृतीये तथोपलब्धेः ॥ १८ ॥

"न तृतीये" स्थाने देहलाभाय पञ्चसंख्यानियम आहुतीनामादर्तव्यः। कुतः। "तथोपलब्धेः"। तथा ह्यन्तरेणैवाऽऽहुतिसंख्यानियमं वर्णितेन प्रकारेण तृतीयस्थानप्राप्तिरुपलभ्यते "जायस्व म्रियस्वेत्येतत्तृतीयं स्थानम्" [छा०५-१०-८] इति। अपि च "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" [छा० ५-३-३] इति मनुष्यशरीरहेतुत्वेनाऽऽहुतिसंख्या कीर्त्यते न कीटपतङ्गादिशरीरहेतुत्वेन पुरुषशब्दस्य मनुष्यजातिवचनत्वात्। अपि च पञ्चम्यामाहुतावपां पुरुषवचस्त्वमुपदिश्यते नापञ्चम्यामाहुतौ पुरुषवचस्त्वं प्रतिषिध्यते वाक्यस्य व्यर्थतादोषात्। तत्र येषामारोहावरोहौ संभवतस्तेषां पञ्चम्यामाहुतौ देह उद्भविष्यति। अन्येषां तु विनैवाऽऽहुतिसंख्यया भूतान्तरोपसृष्टाभिरद्भिर्देह आरप्स्यते ॥ १८ ॥

परोक्तश्रुतेर्गतिमुक्त्वा तदीयां युक्तिमनुवदति—यदिति। तदुत्तरत्वेन सूत्रमादत्ते—तदिति। प्रतिज्ञां पूरयन्योजयति—नेत्यादिना। पृष्ट्वा हेतुमुक्त्वा व्याचष्टे—कुत इति। भोगाय हि चन्द्रारोहणमित्यादिवर्णितः प्रकारः। उपलम्भमेवाभिनयति—जायस्वेति। ज्ञानकर्मशून्या[3] हि कृमिकीटादिभावेन पुनः पुनर्जायन्ते म्रियन्ते चेति प्रसिद्धम्। न च तत्राऽऽहुतिसंख्योपलभ्यते। न च तेषां निरन्तरं जायमानानां म्रियमाणानां चाऽऽहुतिसंख्या कल्प्यते दृष्टविरोधे कल्पनानवकाशादित्यर्थः। किंच देहमात्रहेतुत्वेनाऽऽहुतिसंख्या नियम्यते मनुष्यदेहहेतुत्वेन वा तत्राऽऽद्यं पुरुषशब्दविरोधेन प्रत्याह—अपि चेति। द्वितीयं निराह—अपि चेत्यादिना। तत्र हेतुमाह—वाक्यस्येति। तस्य विधिनिषेधार्थद्वयार्थतायां वाक्यभेदादैक्ये च संभवति तदयोगादित्यर्थः। पञ्चम्यामाहुतावपां पुरुषाकारपरिणामेऽपि नापञ्चम्यामाहुतौ तासां तन्निषेधश्चेत्तर्हि तासामुभयथा देहारम्भसंभवे कथं व्यवस्थेत्याशङ्क्याऽऽह—तत्रेति। अन्येषां त्विति। चन्द्रमण्डलं प्रत्यारोहस्ततोऽवरोहश्च येषां न युक्तस्तेषामिति यावत् ॥ १८ ॥

---

१ ब्र. ट. °तीयस्था°। २ क. ब. ट. °रभ्यते। ३ क. ब्र. °र्मशुला हि। ४ क. हि क्रिमि°।

(पापिनां याम्यलोकगमनम्, अधि० ३)

स्मर्यतेऽपि च लोके ॥ १९ ॥

अपि च स्मर्यते लोके । द्रोणधृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनां चायोनिजत्वम् । तत्र द्रोणादीनां योषिद्विषयैकाऽऽहुतिर्नास्ति । धृष्टद्युम्नादीनां तु योषित्पुरुषविषये द्वे अप्याहुती न स्तः । यथा च तत्राऽऽहुतिसंख्यानादरो भवत्येवमन्यत्रापि भविष्यति । बलाकाऽप्यन्तरेणैव रेतःसेकं गर्भं धत्त इति लोकरूढिः ॥ १९ ॥

दर्शनाच्च ॥ २० ॥

अपि च चतुर्विधे भूतग्रामे जरायुजाण्डजस्वेदजोद्भिज्जलक्षणे स्वेदजोद्भिज्जयोरन्तरेणैव ग्राम्यधर्ममुत्पत्तिदर्शनादाहुतिसंख्यानादरो भवति । एवमन्यत्रापि भविष्यति ॥ २० ॥

ननु " तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजमुद्भिज्जम् " [छा० ६-३-१] इत्यत्र त्रिविध एव भूतग्रामः श्रूयते कथं चतुर्विधत्वं भूतग्रामस्य प्रतिज्ञातमिति । अत्रोच्यते—

तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥ (३)

"आण्डजं जीवजमुद्भिज्जम्" [छा० ६-३-१] इत्यत्र तृतीये-

मनुष्यदेहारम्भं प्रत्याहुतिसंख्यानियमाभावे स्मृतिं संवादयति—**स्मर्यतेऽपीति** । सूत्रं व्याकरोति—**अपि चेति** । लोकशब्देन सूत्रभाष्ययोरितिहासादिरपि व्युत्पत्त्योच्यते । अयोनिजत्वाविशेषेऽपि द्रोणादिष्ववान्तरविशेषमाह—**तत्रेति** । तद्दृष्टान्तेनानिष्टादिकारिष्वप्याहुतिसंख्यानियमाभावधीरिति फलितमाह—**यथेति** । देहमात्रहेतुत्वेनाऽऽहुतिसंख्यानियमो नेत्यत्रापि सूत्रस्य तात्पर्यमस्तीत्याह—**बलाकेति** ॥ १९ ॥

इतश्च देहमात्रारम्भे नाऽऽहुतिसंख्यानियमोऽस्तीत्याह—**दर्शनाच्चेति** । ऐतरेयश्रुत्यवष्टम्भेन सूत्रं व्याकरोति—**अपि चेत्यादिना** । अन्यत्रापीत्यनिष्टादिकारिणो निर्दिश्यन्ते ॥ २० ॥

श्रुत्यन्तरविरोधं शङ्कते—**नन्विति** । अण्डजमेवाऽऽण्डजं पक्ष्यादि । जीवजं जरायुजम् । उद्भिद्य जायत इत्युद्भिज्जं वृक्षादि । छान्दोग्यश्रुतिविरोधं सूत्रेण परिहरति—**अत्रेति** । तद्व्याख्याति—**आण्डजमिति** । उद्भिज्जशब्देन स्वेदजोपसंग्रहे हेतुमाह—

---

१ क. ज. °दर एवम् ।

(अवरोहिणो जीवस्य वियदादिसमानत्वम्, अधि० ४)

नोद्भिज्जशब्देनैव स्वेदजोपसंग्रहः कृतः प्रत्येतव्यः । उभयोरपि स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात् । स्थावरोद्भेदात्तु विलक्षणो जङ्गमोद्भेद इत्यन्यत्र स्वेदजोद्भिज्जयोर्भेदवाद इत्यविरोधः ॥ २१ ॥ (३)

(अवरोहिणो जीवस्य वियदादिसमानत्वम्, अधि० ४)

साभाव्यापत्तिरुपपत्तेः ॥ २२ ॥ (४)

इष्टादिकारिणश्चन्द्रमसमारुह्य तस्मिन्यावत्संपातमुषित्वा ततः सानुशया अवरोहन्तीत्युक्तम् । अथावरोहप्रकारः परीक्ष्यते । तत्रेयमवरोहश्रुतिर्भवति " अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति"[छा०५-१०-७]

उभयोरिति । ऐतरेयके तर्हि भेदव्यपदेशस्य का गतिस्तत्राऽऽह—स्थावरेति । श्रुत्योर्विरोधं निराकृतमुपसंहरति—इत्यविरोध इति ॥ २१ ॥ (३)

अनिष्टादिकारिणामारोहावरोहरूपा गतिरुक्ता संप्रतीष्टादिकारिणामवशिष्टमवरोहप्रकारं निरूपयति—साभाव्येति । व्यवहितेन संबन्धं दर्शयति—इष्टादीति । विषयवाक्यमुदाहरति—तत्रेति । चन्द्रमसि भोगं समाप्य प्राप्तावरोहेष्विष्टादिकारिष्विति यावत् । चन्द्रे भोक्तव्यकर्मणः समाप्त्यानन्तर्यमथेत्युक्तम् । एतमेव वक्ष्यमाणं पन्थानं पुनर्निवर्तन्ते पुनःशब्दादनादौ संसारे पूर्वमपि चन्द्रं गता निवृत्ताश्चेति गम्यते । कोऽसावध्वा यं प्रति निवर्तन्ते तमाह—यथेति । यथागतं मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमिति गमनक्रम आगमनेऽप्याकाशोक्तेर्यथेतमिति भाति पितृलोकाद्यकीर्तनादभ्रादिसंकीर्तनाच्चानेवमपीति गम्यते । तथा च यथेतमित्युपलक्षणं याः खल्वापश्चन्द्रमण्डले देहमारब्धवत्यस्ताः कर्मक्षये द्रुता आकाशं गतास्तत्सदृशा यदा जायन्ते तदा तदुपहिता अनुशयिनोऽप्याकाशसमा भवन्तीत्याह—आकाशमिति । तत्तुल्यतामापन्नाश्च वायुनेतश्चामुतश्च नीयमाना वायुसमा अनुशयिनोऽप्परिवेष्टिता वायुतुल्या भवन्तीत्याह—आकाशादिति । तदनन्तरं यो धूमो गमनदशायामासीत्तत्तुल्यो भवत्यनुशयीत्याह—वायुरिति । ततोऽपां धारणात्संभृतोदकं यदभ्रं तत्तुल्योऽनुशयीत्याह—धूम इति । ततो जलसेचनान्मेघो वर्षणकर्ता तत्तुल्यः स सिध्यतीत्याह—अभ्रमिति । तत्सादृश्यमापद्य वर्षधाराभिरनुशयी पृथिवीमापद्यत इत्याह—मेघ इति । अवरोहत्सु देहभृत्सु विषयेष्वाकाशं वायुमिति कर्मत्वोक्तेर्धूमो भवतीत्यादिभवतिश्रुतेश्च संदेहमाह—तत्रेति ।

---

१ ङ. ञ. °मासाद्य तं° । २ क्ष. यथा । ३ क्ष. °नुशायि° । ४ क्ष. °नुशायि° ।

इति । तत्र संशयः-किमाकाशादिस्वरूपमेवावरोहन्तः प्रतिपद्यन्ते किं वाऽऽकाशादिसाम्यमिति । तत्र प्राप्तं तावदाकाशादिस्वरूपमेव प्रतिपद्यन्त इति । कुतः । एवं श्रुतिर्भवति । इतरथा लक्षणा स्यात् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा । तथा च " वायुर्भूत्वा धूमो भवति " इत्येवमादीन्यक्षराणि तत्स्वरूपापत्तावव[1]कल्प[2]न्ते । तस्मादाकाशादिस्व[3]रूप[4]प्रतिपत्तिरिति । एवं प्राप्ते ब्रूमः—आकाशादिसाम्यं प्रतिपद्यन्त इति । चन्द्रमण्डले यदम्मयं शरीरमुपभोगार्थमारब्धं तदुपभोगक्षये सति प्रविलीयमानं सूक्ष्ममाकाशसमं भवति ततो वायोर्वशमेति ततो धूमादिभिः संपृच्यत इति । तदेतदुच्यते " यथेतमाकाशमाकाशाद्वायुम् " [छा० ५-१०-५] इत्येवमादिना । कुत एतत् ।

देवयानपितृयाणौ पन्थानौ प्रक्रम्य तृतीयत्वोक्तेर्युक्तं स्थानशब्दस्य मार्गलक्षणत्वम् । भवतिश्रुतेश्च सादृश्यलक्षणत्वे हेत्वभावात्तादात्म्यार्थत्वमेवेति पूर्वपक्षयति—**तत्रेत्यादिना** । अत्र चावरोहरूपसंसारगतिनिरूपणद्वारा वैराग्यदृढीकरणात्पूर्ववत्पादादिसंगतयः । पूर्वपक्षे भवतिश्रुतेर्मुख्यार्थत्वसिद्धिः । सिद्धान्ते तूपपत्त्या लाक्षणिकार्थत्वधीः । यथेतमाकाशमाकाशाद्वायुमित्यत्र तादात्म्यादृष्टेरन्यस्य चान्यात्मत्वासिद्धेर्नाऽऽकाशादितादात्म्यमनुशयिनामिति शङ्कते—**कुत इति** । वायुर्भूत्वेत्यादौ तादात्म्यसिद्धेर्नहुषादिषु चाजगरादिभावानुभवाद्यथेतमाकाशमित्यादावपि तादात्म्यमेवेति परिहरति—**एवं हीति** । भवतिश्रुतेः सादृश्यलक्षकत्वेऽपि नानुपपत्तिरित्याशङ्क्याऽऽह—**इतरथेति** । साऽपि शब्दवृत्तित्वादाश्रितेत्याशङ्क्याऽऽह—**श्रुतीति** । श्रुतेर्मुख्यार्थत्वे तदक्षरानुकूल्यं फलमाह—**तथा चेति** । पूर्वोक्तप्रकारेण श्रुतेर्मुख्यार्थत्वमाश्रित्यानुशयिनामाकाशादिस्वरूपापत्तावक्षराणि सम्यञ्चि भवन्तीत्यर्थः । श्रुत्या पूर्वपक्षमुपसंहरति—**तस्मादिति** । आकाशादितादात्म्यं प्रत्याख्यातुं प्रयतितव्यमिति पक्षमनुभाष्य सिद्धान्तयति—**एवमिति** । समानो भावः साभाव्यं सादृश्यं तदापत्तिरिति योजनया प्रतिज्ञां विवृणोति—**आकाशादीति** । कथं पुनश्चेतनानामनुशयिनामचेतनैराकाशादिभिः सादृश्यमित्याशङ्क्य प्रतिज्ञातमेवार्थं प्रकटयति—**चन्द्रेति** । प्रतिज्ञासमाप्ताविति[5]शब्दः । उक्तेऽर्थे श्रुतिमुदाहरति—**तदेतदिति** । भवतिश्रुत्या तादात्म्यमेवोपेयं न तत्सादृश्यमिति शङ्कते—**कुत इति** । तत्र हेतुमवतार्य व्याकरोति—**उप-**

---

१ ङ. ञ. °वं हि श्रु° । २ ङ. ञ. °रूपोपपत्तावेव क° । ज. ट. °रूपोपपत्ता° । ३ ङ. ञ. ट. °कल्प्यन्ते । ४ ङ. °रूपोपपत्ति° । ५ ट. °पप्राप्तिरि° । क. °पस्यैव प्र° । ६ क. झ. °नुशायि° ।

(स्वर्गादवरोहणकाले स्वर्गादिषु जनिष्यतो जीवस्य स्वर्गवृ-
ष्ट्योर्जन्मनि त्वरा तदितरेषु जन्मनि विलम्बः, अधि० ५)

उपपत्तेः । एवं ह्येतदुपपद्यते । न ह्यन्यस्यान्यभावो मुख्य उपपद्यते। आकाशस्वरूपप्रतिपत्तौ च वाय्वादिक्रमेणावरोहो नोपपद्यते विभुत्वाच्चाऽऽकाशेन नित्यसंबन्धत्वात् । न तत्सादृश्यापत्तेरन्यस्तत्संबन्धो घटते । श्रुत्यसंभवे च लक्षणाश्रयणं न्याय्यमेव । अत आकाशादितुल्यतापत्तिरेवात्राऽऽकाशादिभाव इत्युपचर्यते ॥ २२ ॥ (४)

(स्वर्गादवरोहणकाले स्वर्गादिषु जनिष्यतो जीवस्य स्वर्गवृष्ट्योर्जन्मनि त्वरा तदितरेषु जन्मनि विलम्बः, अधि० ५)

नातिचिरेण विशेषात् ॥ २३ ॥ (५)

तत्राऽऽकाशादिप्रतिपत्तौ प्राग्व्रीह्यादिप्रतिपत्तेर्भवति विशयः । किं दीर्घं दीर्घं कालं पूर्वपूर्वसादृश्येनावस्थायोत्तरोत्तरसादृश्यं गच्छन्त्युताल्पमल्पमिति । तत्रानियमो नियमकारिणः शास्त्र-

---

पत्तेरिति । एवं हीत्याकाशादिसादृश्याङ्गीकारे सतीति यावत् । एतदित्याकाशादिभवनमुक्तम् । युक्तं हि नहुषादिदेहारम्भकभूतानामजगरादिभावेन परिणामित्वं तद्देहानामयौगपद्यादिह तु सूक्ष्मदेहस्याऽऽकाशादेश्चापर्यायत्वान्न परस्परात्मतेत्युक्तमेव साधयति—न हीति । वायुर्भूत्वेत्यादिश्रुतेस्तर्हि का गतिस्तत्राऽऽह—आकाशेति । अनुशयिनामाकाशादिभ्यस्तिलमाषान्तेभ्यः स्वेनैव रूपेण निष्क्रमणान्यथानुपपत्तिरूपश्रुतार्थापत्त्याऽन्यस्य पूर्वसिद्धान्यभावानुपपत्त्यनुगृहीतया विरोधादुपचरितैतद्भावापत्तिविषया श्रुतिरिति भावः । आकाशादिना संयोगमात्रं भवतिश्रुत्या लक्ष्यतां किं सादृश्येनेत्याशङ्क्याऽऽकाशे तदनुपपत्तेरवैरूप्यार्थं वाय्वादावपि सादृश्यमेवेत्याह—विभुत्वाच्चेति । यदुक्तमेवं सति श्रुतिर्भवतीतरथा लक्षणेति तत्राऽऽह—श्रुतीति । अनुशयिनामाकाशादितादात्म्यायोगात्तत्तुल्यतापत्तेः श्रुत्यर्थत्वात्तत्परिहाराय प्रेक्षाकारिणा प्रयत्नवता भाव्यमित्युपसंहरति—अत इति ॥ २२ ॥ (४)

पूर्वपूर्वसादृश्यं गतानामुत्तरोत्तरसादृश्यापत्तिरविलम्बेनेत्याह—नातिचिरेणेति । विषयसंशयौ दर्शयति—तत्रेति । अवरोहत्सु तत्तत्सादृश्यं गतेष्विति यावत् । गन्तृभेदेन चिराचिराभ्यां गतिदर्शनात्तमेव संशयं विशदयति—किमिति । शास्त्रमतीन्द्रियार्थे मानं न चेह शास्त्रमस्ति तथा चानिर्धारणेति पूर्वपक्षयति—तत्रेति । न चातो

---

१ क. °काशादिस्व° । २ क. °बद्भत्वा° । ३ क. घटेत । ४ क. °दिभावाप° । ५ ट. °लं तत्साद° । ६ क. ज. झ. °र्वसा° । ७ क. ज. झ. ट °त्तर° । ८ झ. °दिहेतु° । ९ क. झ. °नुशायि° । १० झ. °पत्त्याऽनु° । ११ क. ख. °तत्वत° । १२ क. झ. °नुशायि° । १३ ट. ड. °न्द्रियेऽर्थे ।

(स्वर्गादवरोहणकाले स्वर्गादिषु जनिष्यतो जीवस्य स्वर्गवृष्ट्योर्जन्मनि त्वरा तदितरेषु जन्मनि विलम्बः, अधि० ५)

स्याभावादिति । एवं प्राप्त इदमाह—" नातिचिरेण " इति । अल्पमल्पं कालमाकाशादिभावेनावस्थाय वर्षधाराभिः सहेमां भुवमापतन्ति । कुत एतत् । विशेषदर्शनात् । तथाहि व्रीह्यादिभावापत्तेरनन्तरं विशिनष्टि " अतो वै खलु दुर्निष्पपतरम् " [छा० ५-१०-६] इति । तकार एकश्छान्दस्यां प्रक्रियायां लुप्तो मन्तव्यः । दुर्निष्पपततरं दुर्निष्क्रमतरं दुःखतरमस्माद्व्रीह्यादिभावान्निःसरणं भवतीत्यर्थः । तदत्र दुःखं निष्पपतनं प्रदर्शयन्पूर्वेषु सुखं निष्पपतनं दर्शयति । सुखदुःखताविशेषश्चायं निष्पपतनस्य कालालपत्वदीर्घत्वनिमित्तः । तस्मिन्नवधौ शरीरानिष्पत्तेरुपभोगासंभवात् । तस्माद्व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः स्यादिति ॥ २३ ॥ (५)

वै खलु दुर्निष्पपतरमिति व्रीह्यादिभावादूर्ध्वमेव विलम्बगमनावगमात्पूर्वमविलम्बसिद्धिरिति वाच्यम् । तत्र दुःखनिःसरणस्यैव विवक्षितत्वेन विलम्बस्यानिष्टत्वात् । न च देहाद्यभावाद्दुःखासिद्धेर्विलम्बाभिप्रायमेतदिति युक्तम् । तथाऽपि प्रकृतसर्वपरामर्शकातःशब्दात्पूर्वस्माद्विलम्बगमनप्रतीतेः सर्वत्र प्रयत्नगौरवं तुल्यमिति भावः । अत्र चाऽऽकाशादिभावमारभ्य व्रीह्यादिभावपर्यन्तावरोहरूपसंसारगतेस्तत्तत्साहश्यरूपायाश्चिराचिरत्वनिरूपणेन वैराग्यस्यैव दृढीकरणात्पादादिसंगतिः । पूर्वपक्षे सर्वत्र तत्तद्भावपरिहारार्थं प्रयत्नगौरवं कर्तव्यम् । सिद्धान्ते तु तदर्थं कर्तव्यप्रयत्नस्य क्वचिल्लाघवं क्वचिद्गौरवमिति फलभेदः । पूर्वपक्षमनूद्य सिद्धान्तमवतार्य प्रतिज्ञां पूरयन्विवृणोति—**एवमिति** । नियामकशास्त्राभावान्नैतदित्याह—**कुत इति** । नियामकविषयं हेतुमवतार्य व्याचष्टे—**विशेषेति** । वाक्यस्य विवक्षितमर्थं वदन्पदं पूरयति—**तकार इति** । पदं पूरयित्वा पदार्थं वदन्वाक्यार्थमाह—**दुर्निष्क्रमेति** । कथमेतावताऽऽकाशादिभ्यो विलम्बमन्तरेण निःसरणं भाति तत्राऽऽह—**तदिति** । सुखनिःसरणमेवाऽऽकाशादिषु विशेषणादालक्ष्यते नाविलम्बनिःसरणमित्याशङ्क्याऽऽह—**सुखेति** । किमर्थमित्थं कल्प्यत आकाशादेः सुखेन निःसरणं व्रीह्यादेस्तु दुःखेनेति । यथाश्रुतमेव किं न स्यात्तत्राऽऽह—**तस्मिन्निति** । अतःशब्दस्य प्रकृतपरामर्शित्वेऽप्येकवाक्योपात्तव्रीह्यादिपरामर्शित्वेन निराकाङ्क्षत्वाद्वाक्यान्तरोपात्ताकाशाद्यपरामर्शित्वादाकाशादिवर्षणान्तादविलम्बेन निःसरणमित्युपसंहरति—**तस्मादिति** । आकाशादौ व्रीह्यादौ च तद्भावं परिहर्तुं कर्तव्यप्रयत्नस्य लाघवगौरवविशेषं निगमयितुमितीत्युक्तम् ॥ २३ ॥ (५)

---

१ क. ड. ञ. °तरं ।

(सस्यादौ जीवस्य न मुख्यजन्म किंतु संश्लेषमात्रम्, अधि० ६)

अन्याधिष्ठितेषु पूर्ववदभिलापात् ॥ २४ ॥

तस्मिन्नेवावरोहे प्रवर्षणानन्तरं पठ्यते—" त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते " [छा० ५-१०-६] इति । तत्र संशयः—किमस्मिन्नवधौ स्थावरजात्यापन्नाः स्थावरसुखदुःखभाजोऽनुशयिनो भवन्त्याहोस्वित्क्षेत्रज्ञान्तराधिष्ठितेषु स्थावरशरीरेषु संश्लेषमात्रं गच्छन्तीति । किं तावत्प्राप्तम् । स्थावरजात्यापन्नास्तत्सुखदुःखभाजोऽनुशयिनो भवन्तीति । कुत एतत् । जनेर्मुख्यार्थत्वोपपत्तेः । स्थावरभावस्य च श्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः । पशुहिंसादियोगाच्चेष्टादेः

अनुशयिनामाकाशादिप्रवर्षणान्तसादृश्यं चिरभावि तत्सादृश्यत्वाद्व्रीह्यादिसादृश्यवदित्यस्य विशेषणश्रुत्या बाधमुक्त्वा प्रकृतावरोहवाक्यैकदेशमवशिष्टं विचारयति—**अन्येति** । संगतिं सूचयन्विषयमाह—**तस्मिन्निति** । त इहेति तच्छब्देनानुशयिनो गृह्यन्ते । व्यवहारभूमिः सप्तम्यर्थः । व्रीह्यादिभावमापन्नेष्वनुशयिषु जायत इति श्रुतेः कर्मपूर्वकत्वाश्रुतेश्च विचारहेतुं संशयमाह—**तत्रेति** । अस्मिन्नवधावित्याकाशादिवर्षणान्ततत्सादृश्यापत्त्यनन्तरदशायामित्यर्थः । अत्र च स्थावरभावस्य संसारगतेरालोचनद्वारा वैराग्यस्यैव दृढीकरणात्पादादिसंगतिः । पूर्वपक्षे व्रीह्यादिजन्मनो मुख्यत्वेऽनुशयिनां तत्परिहारायाधिकृतेनाधिकं प्रयतितव्यम् । सिद्धान्ते तदीयसंश्लेषमात्रं निराकर्तुं प्रयत्नलाघवमिति विवक्षित्वा विमर्शपूर्वकं पूर्वपक्षयति—**किं तावदिति** । आकाशादिष्विव व्रीह्यादिष्वपि संश्लेषमात्रं न तद्देहतेति शङ्कते—**कुत इति** । विशेषं दर्शयन्परिहरति—**जनेरिति** । जीवस्य जन्माभावेऽपि देवो जातो मनुष्यो जात इत्यादौ तत्तद्देहाभिमानद्वारा जनेर्मुख्यत्वदर्शनोत्तत्रापि मुख्यत्वार्थं देहाभिमानपूर्वकं सुखदुःखभाक्त्वमास्थेयमित्यर्थः । कथं स्थावरभावे जनेर्मुख्यत्वं न हि तत्र देहाभिमानपूर्वकं मनुष्यादिदेहवद्भोगोऽस्ति तत्राऽऽह—**स्थावरेति** । " स्थाणुमन्येऽनुसंयन्ति " इत्याद्या श्रुतिः ।

" शरीरजैः कर्मदोषैर्याति स्थावरतां नरः "

इत्याद्या च स्मृतिः । ननूदाहृताभ्यां श्रुतिस्मृतिभ्यां पापफलत्वं स्थावरभावस्य भाति तत्कथमिष्टादिकारिणां चन्द्रस्थलस्खलितानां तत्प्राप्तिः शङ्क्यते तत्राऽऽह—**पश्विति** । सोमपानावसरे परस्परमुच्छिष्टभक्षणमादिशब्देन विवक्षितम् । " अग्नीषोमीयं पशुमा-

---

१ ङ. ज. ञ. 'ते पू' । २ ङ. ज. 'स्मिन्नेवाव' । ३ क्ष. कर्मापू' । ४ क. 'नुशायि' । ५ क. ठ. ड. 'नादत्रा' ।

कर्मजातस्यानिष्टफलत्वोपपत्तेः । तस्मान्मुख्यमेवेदमनुशयिनां व्रीह्यादिजन्म । श्वादिजन्मवत् । यथा " श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा " [छा० ५-१०-७] इति मुख्यमेवानुशयिनां श्वादिजन्म तत्सुखदुःखान्वितं भवति । एवं व्रीह्यादिजन्मापीति ।

एवं प्राप्ते ब्रूमः—अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यन्ते न तत्सुखदुःखभाजो भवन्ति । " पूर्ववत् " । यथा वायुधूमादिभावोऽनुशयिनां तत्संश्लेषमात्रम् । एवं व्रीह्यादिभावोऽपि जातिस्थावरैः संश्लेषमात्रम् । कुत एतत् । तद्देवेहाप्यभिलापात् । कोऽभिलापस्य तद्भावः । कर्मव्यापारमन्तरेण संकीर्तनम् । यथाऽऽकाशादिषु प्रवर्षणान्तेषु न किंचि-

---

लभेत " इति विशेषशास्त्रान्न हिंस्यादित्यादिसामान्यशास्त्रस्य विशेषविषये बाधात्पशुहिंसनस्य नानिष्टफलतेत्याशङ्क्य क्रत्वर्थतया पुरुषार्थतया च विधिनिषेधयोर्भिन्नार्थत्वेनाविरोधाद्बाध्यबाधकत्वासिद्धेरशक्यं पशुहिंसनस्य निषेधाधिगतमनर्थहेतुत्वमपाकर्तुमित्याशयवानुपसंहरति—तस्मादिति । पशुहिंसादेरङ्गत्वान्न स्वातन्त्र्येण व्रीह्यादिजन्महेतुतेत्याशङ्क्य पापान्तरस्य तद्धेतुत्वे दृष्टान्तमाह—श्वादीति । अवरोहाधिकारे श्वादिभावः श्रुतो नेत्याशङ्क्य श्रुत्यन्तरमाह—यथेति । अनुशयिनां व्रीह्यादिजन्मनो मुख्यत्वे तत्परिहारायाधिकृतेन प्रयत्नगौरवं कर्तव्यमित्युपसंहर्तुमितिशब्दः ।

पूर्वपक्षमनूद्य सिद्धान्तमवतार्य प्रतिज्ञां पूरयित्वा योजयति—एवमिति । तत्र सौत्रं दृष्टान्तमादाय व्याचष्टे—पूर्ववदिति । जनेर्मुख्यत्वाय व्रीह्यादिष्वनुशयिनस्तत्सुखदुःखभाजो भवन्तीत्युक्तम् । तथा च तेषां तेषु न संश्लेषमात्रमिति शङ्कते—कुत इति । पूर्ववदिति सूत्रभागस्यार्थद्वयविवक्षया प्रयुक्तत्वादर्थान्तरं दर्शयन्परिहरति—तद्वदिति । वायुर्भूत्वेत्यादौ व्रीह्यादिवाक्ये चोक्तिसाम्येऽपि स्थावरादिभावस्यानुशयिनां विरोधिनि पूर्ववाक्ये व्रीह्यादिवाक्ये वा न काचिदुक्तिरस्तीति शङ्कते—कोऽभिलापस्येति । कर्मपरिणामनिमित्तत्वकथनं विना तद्भावोक्तिस्तद्देहत्वप्राप्त्यभावे लिङ्गमिति ब्रुवन्नभिलापस्य तद्भद्भावमाह—कर्मेति । अन्तरेण कर्मव्यापारं व्रीह्यादिनेति नास्ति संकीर्तनमित्याशङ्क्य कर्मविशेषव्यापारस्य निमित्तत्वेनानुक्तिरिष्टेत्याह—यथेति । अनुशयिनां व्रीह्यादिभा-

---

१ ड. ज. म. °मेवानु° । २ क. ज. वा चाण्डा° । ३ क. °नुशायि° । ४ ठ. ड. °भावो न ।

(सत्यादौ जीवस्य न मुख्यजन्म किंतु संश्लेषमात्रम्, अधि० ६)

त्कर्मव्यापारं परामृशत्येवं व्रीह्यादिजन्मन्यपि । तस्मान्नास्त्यत्र सुखदुःखभाक्त्वमनुशयिनाम् । यत्र तु सुखदुःखभाक्त्वमभिप्रैति परामृशति तत्र कर्मव्यापारं " रमणीयचरणाः " " कपूयचरणाः " इति च । अपि च मुख्येऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु कण्ड्यमानेषुं पच्यमानेषु भक्ष्यमाणेषु च तदभिमानिनोऽनुशयिनः प्रवसेयुः । यो हि जीवो यच्छरीरमभिमन्यते स तस्मिन्पीड्यमाने प्रवसतीति प्रसिद्धम् । तत्र व्रीह्यादिभावाद्रेतःसिग्भावोऽनुशयिनां नाभिलप्येत । अतः संसर्गमात्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति । एतेन जनेर्मुख्यार्थत्वं प्रतिब्रूयात् । उपभोगस्थानत्वं च स्थावरभावस्य। न च वयमुपभोगस्थानत्वं स्थावरभावस्यावजानीमहे । भवत्वन्येषां जन्तूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानामेतदुपभोग-

---

वेन जन्मास्मिन्प्रकरणे कर्मव्यापारोक्तिं विनोक्तत्वादाकाशादिभाववदिति फलितमाह—तस्मादिति । किंच ब्राह्मणादिजन्मन्येव रमणीयचरणा इत्यादिकर्मकीर्तनं प्रागपि तज्जन्मनो व्रीह्यादिभावेन जन्मसत्त्वे व्यर्थं स्यात् । अतो नास्तिं पुरस्ताज्जन्मेति श्रुतार्थापत्तिमाह—यत्रेति । किंच यो यो ह्यन्नमत्तीत्यादिनोत्तरत्र पुरुषाहुतिसंबन्धोऽनुशयिनां श्रूयते स च तेषां व्रीह्यादिभावेन जन्मोपगमेन तल्लवनादौ प्रवासप्रसङ्गादयुक्तः स्यादतो न पूर्वं मुख्यं जन्मेति श्रुतार्थापत्त्यन्तरमाह—अपि चेति । जीवानां व्रीह्यादिभ्योऽन्यत्वात्तत्पीडनेऽपि न प्रवासोऽस्तीत्याशङ्क्याऽऽह—यो हीति । अनुशयिनां प्रवासेऽपि का क्षतिस्तत्राऽऽह—तत्रेति । पूर्वोक्तहेतुफलमुपसंहरति—अत इति । यत्तु जनेर्मुख्यत्वसिद्धेर्भोगस्थानत्वाच्च स्थावरत्वस्य मुख्यमेवानुशयिनां व्रीह्यादिजन्मेति तत्राऽऽह—एतेनेति । उक्तयुक्त्या जन्मश्रुतेरुपचरितार्थत्वेनेति यावत् । अनुशयिनां वा स्थावरजीवानां वा स्थावरभावस्य भोगस्थानतेति विकल्प्याऽऽद्यमुक्तन्यायेन दूषयति—उपभोगेति । यदनुशयिनां स्थावरत्वस्य भोगस्थानत्वं तच्च प्रतिब्रूयादिति संबन्धः । द्वितीयमङ्गी करोति—न चेति । केषां तर्हि तदुपभोगायतनं तत्राऽऽह—भवत्विति । अन्येऽपि न तत्र भोक्तारो व्रीह्यादिसंश्लिष्टत्वादनुशयिवदित्याशङ्क्य तद्देहपरिणामिपापराहित्यमुपाधिरित्याह—अपुण्येति । अनुशयिनामपि व्रीह्यादिभावानुकूलपापविशे-

---

१ ज. °खभोक्तृत्वम् । २ ट. °नुशायि° । ३ ङ. ञ. °ति । अ° । ४ ङ. ञ. °षु भज्यमानेषु प° । ५ झ. °वो वाऽनु° । ६ झ. °मप्यपु° । ७ झ. °स्ति पर° ।

स्थानम् । चन्द्रमसस्त्ववरोहन्तोऽनुशयिनो न स्थावरभावमुपभुञ्जत इत्याचक्ष्महे ॥ २४ ॥

अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

यत्पुनरुक्तं पशुहिंसादियोगादशुद्धमाध्वरिकं कर्म तस्यानिष्टमपि फलमवकल्पत इत्यतो मुख्यमेवानुशयिनां व्रीह्यादिजन्मास्तु तत्र गौणी कल्पनाऽनर्थिकेति । तत्परिहियते । न । शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य । अयं धर्मोऽयमधर्म इति शास्त्रमेव विज्ञाने कारणम् । अतीन्द्रियत्वात्तयोः । अनियतदेशकालनिमित्तत्वाच्च । यस्मिन्देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेष्वधर्मो भवति । तेन न शास्त्रादृते धर्माधर्मविषयं विज्ञानं कस्यचिदस्ति । शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितः स कथमशुद्ध इति

षवत्त्वं कल्प्यमित्युपाधेरसंभवमाशङ्क्य निरतिशयपुण्यकारिणां प्रबलपापपरिग्रहायोगादल्पपापैश्च स्थावरत्वोदिसिद्धेर्नैवमित्याह—चन्द्रमसस्त्विति ॥ २४ ॥

परोक्तमनूद्य निरस्यति—अशुद्धमिति । अनुवादं विभजते—यदिति । इष्टादिकारिणोऽनिष्टफलवत्त्वसंभवे फलितमाह—इत्यत इति । एतेन गौणी जन्मश्रुतिरिति प्रत्युक्तमित्याह—तत्रेति । व्रीह्यादिजन्मनो मुख्यत्वे सतीति यावत् । परिहारमवतारयति—तदिति । न वैदिकं कर्माशुद्धमिति प्रतिज्ञायां शास्त्रहेतुत्वादित्युक्तं विवृणोति—अयमिति । अनुमानमपि कस्मादस्मिन्नर्थे न प्रमाणमित्याशङ्क्य दृष्टं सामान्यतोऽदृष्टं वा तदिति विकल्प्याऽऽद्यं प्रत्याह—अतीन्द्रियत्वादिति । द्वितीयं दूषयति—अनियतेति । तदेव प्रपञ्चयति—यस्मिन्निति । शुद्धे हि देशे सायं प्रातरित्यादौ काले जीवनादौ च निमित्ते योऽग्निहोत्रादिधर्मो निर्वर्त्यते स एवाशुद्धे देशे मध्यरात्रादौ काले मरणादौ च निमित्ते कृतः सन्नधर्म इति प्रसिद्धं तथा च न तत्र सामान्यतो दृष्टं सावकाशमित्यर्थः । धर्मादिज्ञानं नाऽऽनुमानिकं किंतु शास्त्रमात्रकृतमित्युक्तं तन्निगमयति—तेनेति । शास्त्रादेव धर्मादिज्ञानेऽपि प्रकृते किं जातं तदाह—शास्त्राच्चेति । दुष्टत्वमपि ज्योतिष्टोमस्य निषेधाधिगतमिति सांख्यः

---

१ ङ. ञ. ट. °मेवेहानु° । २ ङ. °योः । नि° । ३ क. ज्ञानं । ४ ङ. ञ. ट. 'रितं स । ५ क. ठ. ङ. °त्वाप्ति° ।

(सस्यादौ जीवस्य न मुख्यजन्म किंतु संश्लेषमात्रम्, अधि० ६)

शक्यते वक्तुम् । ननु " न हिंस्यात्सर्वा भूतानि " इति शास्त्रमेव भूतविषयां हिंसामधर्म इत्यवगमयति । बाढम् । उत्सर्गस्तु सः । अपवादः " अग्नीषोमीयं पशुमालभेत " इति । उत्सर्गापवादयोश्च व्यवस्थितविषयत्वम् । तस्माद्विशुद्धं कर्म वैदिकं शिष्टैरनुष्ठीयमानत्वादनिन्द्यमानत्वाच्च । तेन न तस्य प्रतिरूपं फलं जातिस्थावरत्वम् । न च श्वादिजन्मवदपि व्रीह्यादिजन्म भवितुमर्हति । तद्धि कपूयचरणानधिकृत्योच्यते नैवमिह वैशेषिकः कश्चिदधिकारोऽस्ति । अतश्चन्द्रस्थलस्खलितानामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्यते ॥ २९ ॥

शङ्कते—नन्विति । पशुहिंसायां निषेधसामर्थ्यादनर्थहेतुत्वमौत्सर्गिकमित्यङ्गी करोति—बाढमिति । तथाऽपि विधिसामर्थ्यात्तस्य क्रतूपकारित्वेन श्रेयोहेतुत्वमापवादिकमुपेयमित्याह—अपवाद इति । तयोः सामान्यविशेषविषयत्वेन व्यवस्थितविषयत्वादविरुद्धतया न बाध्यबाधकतेत्युक्तं तत्राऽऽह—उत्सर्गेति । पशुहिंसाया निषेधादनर्थहेतुत्वं क्रतूपकारो विधेरित्युभयार्थत्वाविरोधेऽपि परिहृत्यैवानर्थं क्रतूपकारेणार्थबाहुल्यहेतुत्वाभावे न विधिरनर्थकः स्यात् । न च श्येनेऽपि वैधी प्रवृत्तिरिति तस्य विशिष्टार्थहेतुता । सर्वत्र काम्येषु करणांशे रागात्प्रवृत्तिरितिकर्तव्यतांशे वैधीत्युपगमात् । ज्योतिष्टोमस्य श्येनस्येव काम्यत्वेऽपि नाभिचरेदितिवदनिषिद्धत्वादग्नीषोमीयहिंसायामितिकर्तव्यरूपायां प्रवृत्तौ विध्यधीनत्वाद्विशिष्टार्थसाधनत्वमेव । तथा च विधिनिषेधयोर्विरोधे सावकाशानवकाशन्यायेन व्यवस्थेति भावः । विधिनिषेधयोरविरोधे फलितमाह—तस्मादिति । नानृतं वदेदितिवत्कस्यचित्प्रकरणे श्रुतत्वाभावात्पुरुषार्थत्वेन प्राप्तहननस्यैव न हिंस्यादिति निषेधाद्विहितक्रत्वर्थहिंसाया निषेधाविषयत्वान्नानर्थहेतुता । किं तु सुखफलत्वमेवेत्यर्थः । शिष्टैरनुष्ठीयमानमपि देशविशेषे मांसाशनादि विवादास्पदं देशान्तरे दृश्यते तत्राऽऽह—अनिन्द्यमानत्वादिति । वैदिकस्य कर्मणः शुद्धत्वे सिद्धमर्थमाह—नेति । प्रतिरूपं प्रतिकूलमनिष्टमिति यावत् । कर्मान्तरनिबन्धनस्तर्हि व्रीह्यादिभावोऽनुशयिनां भविष्यतीत्युक्तं तत्राऽऽह—न चेति । इहेति व्रीह्यादिजन्मनीत्यर्थः । वैशेषिकोऽधिकारोऽसाधारणो हेतुरनुशयिनां तद्भावोक्तिस्तर्हि कथमित्याशङ्क्याऽऽह—अत इति ॥ २९ ॥

---

१ ङ. ञ. ट. अयं चापं । २ ज. °न्द्रस्थानस्ख° । ३ ङ. ञ. °स्थलात्स्खलि° । ४ ठ. ड. विधिरि° । ५ क्ष. °भयथार्थ° । ६ ठ. ड. °नुशायि° ।

(सस्यादौ जीवस्य न मुख्यजन्म किंतु संश्लेषमात्रम् , अधि० ६)

रेतःसिग्योगोऽथ ॥ २६ ॥

इतश्च व्रीह्यादिसंश्लेषमात्रं तद्भावो यत्कारणं व्रीह्यादिभावस्यानन्तरमनुशयिनां रेतःसिग्भाव आम्नायते "यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति" [छा०५-१०-६] इति। न चात्र मुख्यो रेतःसिग्भावः संभवति। चिरजातो हि प्राप्तयौवनो रेतःसिग्भवति। कथमिवानुपचरितं तद्भावमद्यमानान्नानुगतोऽनुशयी प्रतिपद्यते। तत्र तावदवश्यं रेतःसिग्योग एव रेतःसिग्भावोऽभ्युपगन्तव्यः। तद्वद्व्रीह्यादिभावोऽपि व्रीह्यादियोग एवेत्यविरोधः ॥ २६ ॥

योनेः शरीरम् ॥ २७ ॥ (६)

इति महर्षिव्यासप्रणीतब्रह्मसूत्रतृतीयाध्यायस्य प्रथमः पादः ॥ १ ॥

अथ रेतःसिग्भावस्यानन्तरं योनौ निषिक्ते रेतसि योनेरधिशरीरमनुशयिनामनुशयफलोपभोगाय जायत इत्याह शास्त्रम् "तद्य इह रमणीयचरणाः" [छा० ५-१०-७] इत्यादि। तस्मादप्यवगम्यते नावरोहे व्रीह्यादिभावावसरे तच्छरीरमेव

किं च वाक्यशेषे संयोगस्यैव तद्भावस्य श्रुतेरुपक्रमेऽपि तद्भावः संयोगान्नार्थान्तरमित्याह—रेतःसिगिति। सूत्रं व्याकरोति—इतश्चेति। प्रकृतोपयोगित्वेनान्नभक्षणं तरुणत्वेन विशिनष्टि—यो रेत इति। तद्भूय एव भवतीति श्रुत्या तद्भावमेवान्नानुगतोऽनुशयी प्रतिपद्यत इत्युच्यते न संयोगमात्रमित्याशङ्क्याऽऽह—न चेति। अत्रेत्यद्यमानान्नानुगतोऽनुशयी वाक्यं वा प्रकृतमुच्यते। रेतःसिचः स्वभावलोचनया मुख्यस्य तद्भावस्यायोगं स्फोरयति—चिरेति। अनुशयिस्वभावालोचनयाऽपि तमेवार्थं समर्थयते—कथमिति। मुख्यस्य तद्भावस्यायोगे फलितमाह—तत्रेति। तथाऽपि व्रीह्यादिभावे किं जातं तदाह—तद्वदिति। अन्यथोपक्रमोपसंहारयोर्विरोधः स्यात्तत्परिहारार्थमुपसंहारवदुपक्रमोऽपि नेतव्य इत्याह—इत्यविरोध इति ॥ २६ ॥

तर्हि सर्वत्रानुशयिनां संसर्गमात्रमिति ब्राह्मणयोनिमित्यादिकाऽपि श्रुतिरुपचरितार्थेत्याशङ्क्योक्तम्—योनेरिति। सूत्रं व्याकरोति—अथेत्यादिना। शरीरवत्त्वस्य विशिष्टावसरत्वदर्शनाद्व्रीह्यादिषु नानुशयिनां तद्वत्त्वं नापि सुखाद्यन्वितत्वमिति फलितमाह—तस्मादिति। अनुशयिनां व्रीह्यादिजन्मामुख्यमुपपाद्याधिकरणार्थमुपसंह-

---

१ ङ. ञ. 'रितत' । २ ङ. ज. ञ. ट 'रभावान' । ३ झ. 'क्षणं त' । ४ ख. 'भावालो' । ५ ठ. ड. 'चनाया । ६ क. स्फोटयति । ७ ठ. ड. 'ह्यमित्युप' ।

(स्वप्नदृष्टेर्मिथ्यात्वकथनम्, अधि० १)

सुखदुःखान्वितं भवतीति । तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धम् ॥ २७ ॥ (६)

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये तृतीयाध्यायस्य प्रथमः पादः ॥ १ ॥

अथ साधनाख्यतृतीयाध्याये द्वितीयः पादः ।

(पूर्वभागेण त्वंपदार्थस्योत्तरभागेण तत्पदार्थस्य च शोधनम् ।

(स्वप्नदृष्टेर्मिथ्यात्वकथनम्, अधि० १)

संध्ये सृष्टिराह हि ॥ १ ॥

अतिक्रान्ते पादे पञ्चाग्निविद्यामुदाहृत्य जीवस्य संसारगति-

रति—तस्मादिति । तदेवमिष्टादिकारिणामनिष्टादिकारिणां चारोहावरोहरूपसंसारगतौ सिद्धायां ततो वैराग्यमधिकारिविशेषणतया वाक्यार्थधीसाधनं दृढीकृतं भवतीति पादार्थमुपसंहरति—इति सिद्धमिति ॥ २७ ॥ (६)

इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतायां शारीरकभाष्यटीकायां तृतीयाध्यायस्य प्रथमः पादः ॥ १ ॥

संसारगतिनिरूपणेन ततो दृढीकृतवैराग्यस्य वाक्यार्थावगतये तत्त्वमर्थौ संशोधयितुं पादमारभमाणस्त्वमर्थस्य जाग्रदवस्था संसारनिरूपणेनैव निरूपितेत्युपेत्य स्वयंज्योतिष्ट्वसिद्धये स्वप्नावस्थां वक्तुं पूर्वपक्षयति—संध्ये सृष्टिरिति । वृत्तमनूद्य पादसंगतिमाह—अतिक्रान्त इति । संसारस्य पुनः पुनरारोहावरोहरूपत्वात्तस्मिन्नस्वास्थ्ये विरक्तस्य वाक्यार्थज्ञानार्थं पदार्थशोधनाय द्वितीयपादारम्भः । तत्रापि त्वमर्थस्योद्देश्यत्वान्न स्थानतोऽपीत्यतः प्राक्तनस्यावस्थानिर्मुक्तत्वप्रतिपादनाय प्रयत्यते । ततश्चाऽऽऽ पादसमाप्तेस्तत्पदार्थो विविच्यते । तत्रापि स्वयंज्योतिष्ट्वस्पाष्ट्यार्थं स्वप्नावस्था

---

१ ट. °नुशायि° । २ ख. ठ. ड. पुनरा° । ३ क. ठ ड. °स्थाविनि° । ४ ड. °तिष्ट्वार्थ ।

प्रभेदः प्रपञ्चितः । इदानीं तु तस्यैवावस्थाभेदः प्रपञ्च्यते । इदमामनन्ति " स यत्रै प्रस्वपिति " [बृ० ४-३-९] इत्युपक्रम्य " न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान्रथयोगान्पथः सृजते " [बृ० ४-३-१०] इत्यादि । तत्र संशयः । किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिराहोस्विन्मायामयीति । तत्र तावत्प्रतिपद्यते " संध्ये सृष्टिः " इति । संध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् " संध्यं तृतीयं स्वप्नस्थानम् " [बृ० ४-३ ९] इति । द्वयोर्लोकस्थानयोः प्रबोधसंप्रसादस्थानयोर्वा संधौ भवतीति संध्यम् । तस्मिन्संध्ये स्थाने तथ्यरूपैव सृष्टिर्भवितुमर्हति । कुतः । यतः प्रमाणभूता

प्रथमं व्यवस्थाप्यत इत्यर्थः । आरम्भणाधिकरणे स्वप्नस्य मायामयत्वं सिद्धवत्कृत्य जाग्रदवस्थाया मायामयत्वं निरूपितम् । इदानीं तदेव स्वप्नस्य मायामयत्वं प्रकटयितुं तद्विषयवाक्यमुदाहरति—इदमिति । तस्मिन्वाक्ये स्वाप्नीं सृष्टिमधिकृत्य रथादिसर्गाम्नानाद्रथाद्यभावाम्नानाच्च संशयमाह—तत्रेति । पारमार्थिकत्वमर्थक्रियासमर्थत्वमित्यभिप्रेत्य प्रबोध इवेत्युदाहरणम् । अन्यथा तत्रापि वास्तव्याः सृष्टेरनिष्टत्वेन साध्यवैकल्यान्मायामयत्वं प्रातीतिकसत्तामात्रोपेतत्वम् । अत्र च त्वमर्थस्य स्वप्नावस्थानिरूपणेन ततो निष्कृष्टस्य स्वयंज्योतिषः शुद्धतया वाक्यार्थान्वयित्वेन तद्धेतुत्वमस्तीति तत्प्रतिपादनात्पादादिसंगतयः । पूर्वपक्षे स्वप्नस्य सत्यतया ततो निष्कर्षायोगादशुद्धस्यास्वयंज्योतिषो वाक्यार्थान्वयासिद्धिः । सिद्धान्ते तस्य मिथ्यात्वात्ततो निष्कृष्टस्य स्वयंज्योतिष्ट्वात्तदन्वयेन तद्धीहेतुत्वमिति मत्वा पूर्वपक्षमुपादत्ते—तत्रेति । प्रतिज्ञां विवृण्वन्नादौ संध्यशब्दार्थमाह—संध्यमितीति । तत्र मानमाह—वेद इति । प्रथमप्रयोगाभावे कथं वैदिकप्रयोगसिद्धिरित्याशङ्क्य यौगिकत्वान्न तदपेक्षेत्याह—द्वयोरिति । ऐहिकामुष्मिकं च यदैन्द्रियकं रूपादिज्ञानं तस्याभावादनुदयाच्च स्वप्नस्थानं तयोः संध्यमुक्तम् । स्थूलदर्शनस्य चाभावाद्वासनामयज्ञानस्य तत्र भावात्प्रबोधसंप्रसादयोर्वा संध्यं स्वप्नस्थानमिति विवेक्तव्यम् । पदार्थमुक्त्वा प्रतिज्ञां पूरयति—तस्मिन्निति । स्वप्नसृष्टेर्न सत्यत्वं मानाभावादित्याह—कुत इति । श्रुतिं प्रमाणयन्नुत्तरमाह—यत इति । बाह्यरथाद्यभावेऽपीत्यथशब्दः । न केवलं सृष्टिश्रुत्या स्वप्नसृष्टेः

---

१ क. ज. 'स्थाप्रभे' । २ क. 'त्र स्व' । ३ ङ. 'ध्ये तथ्यरूपा सृ' । ४ क. 'प्रमा' । ५ क. 'नस्यादर्शनस्य । ठ. ड. 'नस्यादर्शनस्य वाऽभा' । ६ ठ. ड. 'नाज्ञा' ।

(स्वप्नदृष्टेर्मिथ्यात्वकथनम्, अधि० १)

श्रुतिरेवमाह " अथ रथान्रथयोगान्पथः सृजते " [बृ० ४-३-१०] इत्यादि । स हि कर्तेति चोपसंहारादेवमेवावगम्यते॥ १ ॥

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥

अपि चैके शाखिनोऽस्मिन्नेव संध्ये स्थाने कामानां निर्मातारमात्मानमामनन्ति—" य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः " [कठ० ५-८] इति । "पुत्रादयश्च" तत्र कामा अभिप्रेयन्ते काम्यन्त इति। ननु कामशब्देनेच्छाविशेषा एवोच्येरन् । न। "शतायुषः पुत्रपौत्रान्वृणीष्व"[कठ० १-२३]इति प्रकृत्यान्ते "कामानां त्वा कामभाजं करोमि " [कठ० १-२४] इति प्रकृतेषु तत्र तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात् । प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्रतीमः । प्राज्ञस्य हीदं प्रकरणम् " अन्यत्र धर्मादन्यत्राधर्मात् " [कठ० २-१४] इत्यादि । तद्विषय एवं च वाक्यशेषोऽपि—

" तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन "

[कठ० ५-८] इति । प्राज्ञकर्तृका च सृष्टिस्तथ्यरूपा समधि-

सत्यत्वं सकर्तृकत्वादपि तस्माज्जागरितसृष्टिवदर्थक्रियासामर्थ्यं सत्यत्वमेष्टव्यमित्याह—स हीति ॥ १ ॥

किंच विमताः सत्या निर्मितत्वाज्जाग्रन्निर्मितरथादिवदित्याह—निर्मातारं चेति । निर्मितान्कामान्विशिनष्टि—पुत्रादयश्चेति । निर्मातारं चेत्यादि व्याकरोति—अपि चेति । सुप्तेषु करणेषु निर्व्यापारेष्विति यावत् । स त्वया पृष्ट आत्मेति शेषः । कामशब्दस्य यौगिकार्थमाह—पुत्रादयश्चेति । रूढियोगमपहरतीतिन्यायेन शङ्कते—नन्विति। प्रकरणविरोधान्नात्र रूढिरित्याह—नेत्यादिना । तत्रेति य एष इत्यादि यत्र श्रुतं तत्रैव प्रकरण इति यावत् । परकर्तृकत्वादपि सत्यैव स्वप्नसृष्टिः संप्रतिपन्नवदित्याह—प्राज्ञं चेति । तद्विषयं प्रकरणं प्रकटयति—प्राज्ञस्येति । तद्विषयं वाक्यशेषमपि विशदयति—तदिति । दृष्टान्तस्य साध्यविकलतां प्रत्याह—प्राज्ञेति । हेत्वसिद्धिमाशङ्क्य क्वचिज्जीवकर्तृकत्वश्रवणेऽपि जीवस्यैव प्राज्ञाभेदाय ब्रह्मणस्तद्भावात्प्राज्ञकर्तृ-

---

१ ङ. ज. ञ. ट. °त्र पु°। २ झ. °व वा°। ३ ठ. ढ. °न्दयौ°। ४ ठ. °षयवा°। ५ ठ. ढ. °त्य प्रज्ञा°। ६ क. प्राज्ञभे°।

गता जागरिताश्रया तथा स्वप्नाश्रयाऽपि सृष्टिर्भवितुमर्हति । तथा च श्रुतिः " अथो खल्वाहुर्जागरितदेश एवास्यैष इति यान्येव जाग्रत्पश्यति तानि सुप्तः " [बृ० ४-३-१४] इति स्वप्नजागरितयोः समानन्यायतां श्रावयति । तस्मात्तथ्यरूपैव संध्ये सृष्टिरिति ॥ २ ॥

एवं प्राप्ते प्रत्याह—

मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥

तुशब्दः पक्षं व्यावर्तयति । नैतदस्ति यदुक्तं संध्ये सृष्टिः पारमार्थिकीति । मायैव संध्ये सृष्टिर्न परमार्थगन्धोऽप्यास्ति । कुतः । " कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् " । न हि कात्स्न्र्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः । किं

केति मत्वा दार्ष्टान्तिकमाह—तथेति । स्वप्नजागरितयोस्तुल्यदेशत्वश्रवणादपि स्वप्नस्य सत्यतेत्याह—तथा चेति । स्वप्नजाग्द्वियोरेकार्थत्वश्रुत्याऽपि स्वप्नसृष्टेः सत्यतेत्याह—यानीति । उक्तश्रुतेस्तात्पर्यमाह—स्वप्नेति । बाध्यत्वेन मिथ्यात्वमाशङ्क्य जागरितसृष्टेः श्रुत्या बाध्यत्वेऽपि तत्त्वसाक्षात्कारात्प्रागनुवृत्तेः सत्यत्ववदस्यापि स्वप्नस्य सत्यतेत्याह—तस्मादिति । स्वप्नसृष्टेः सत्यत्वे तद्विशिष्टात्मनोऽशुद्धेर्न वाक्यार्थान्वयितेत्युपसंहर्तुमितीत्युक्तम् ॥ २ ॥

पूर्वपक्षानुवादेन सिद्धान्तं सूत्रयति—एवमिति । अक्षरव्याख्यामारभते—तुशब्द इति । पक्षव्यावृत्तिमेव व्यावर्त्यानुवादेन व्यनक्ति—नैतदिति । पूर्वपक्षनिषेधं प्रतिज्ञायोत्तरपक्षं प्रतिजानीते—मायेति । मायाविद्ययोर्भेदो नेति वक्तुं सूत्रभाष्ययोर्मायाशब्दः । सूत्रे मात्रशब्देन सति मातरि बाध्यत्वं नाम भ्रान्तिसिद्धत्वं स्वप्नस्य जाग्द्वैलक्षण्यं विवक्षितम् । श्रुतियुक्तिभ्यां स्वप्नसृष्टेः सत्यत्वोक्तेर्नेयं प्रतिज्ञेति शङ्कते—कुत इति । तयोरन्यथासिद्धेर्वक्ष्यमाणत्वं मत्वा हेतुमवतार्य व्याकरोति—कात्स्न्र्येनेति । परमार्थवस्तुधर्मो योग्यदेशकालनिमित्तसाहित्यम् । वस्तुत्वस्य कात्स्न्र्येन व्याप्तत्वांत्तथाव्यक्त्यभावे तद्व्याप्यं वस्तुत्वमपि व्यावर्त्येतेत्यर्थः । एकस्यापि सर्वात्मनाऽनभिव्यक्तेः सर्वत्र वस्तुत्वव्यावृत्तिरित्याक्षिपति—किमिति । अतिप्रसङ्गं प्रत्याख्यातु-

---

१ क. ङ. ज. ञ. ट. °यानि खेव । २ ङ. सुषुप्तः । ज. ट. स्वप्नः । ३ ङ. ञ. मायामत्येव । ४ ख. ठ. °प्रदृष्टेः । ५ ठ. ङ. °वर्तेते° ।

पुनरत्र कात्स्न्र्यमभिप्रेतं देशकालनिमित्तसंपत्तिरबाधश्च । न हि परमार्थवस्तुविषयाणि देशकालनिमित्तान्यबाधश्च स्वप्ने संभाव्यन्ते[1]। न तावत्स्वप्ने रथादीनामुचितो देशः संभवति। न[2] हि संवृते देहदेशे रथादयोऽवकाशं लभेरन्। स्यादेतत्। बहिर्देहात्स्वप्नं द्रक्ष्यति देशान्तरितद्रव्यग्रहणात्। दर्शयति च श्रुतिर्बहिर्देहात्स्वप्नम्। "बहिष्कुलायादमृतश्चरित्वा स ईयतेऽमृतो यत्र कामम्।" [बृ० ४-३-१२] इति। स्थितिगतिप्रत्ययभेदश्च नानिष्क्रान्ते जन्तौ सामञ्जस्यमश्नुवीतेति। नेत्युच्यते। न हि सुप्तस्य जन्तोः क्षणमात्रेण योजनशतान्तरितं[3] देशं पर्येतुं विपर्येतुं च तत्र सामर्थ्यं संभाव्यते। क्वचिच्च प्रत्यागमनवर्जितं स्वप्नं श्रावयति "कुरुष्वैहमद्य शयानो निद्रयाऽभिप्लुतः स्वप्ने पञ्चालानभिगतश्चास्मिन्प्रतिबुद्धः" इति। देहाच्चेदपेयात्पञ्चालेषु[4] प्रतिबुध्येत तानसावभिगत इति कुरुष्वैव तु प्रतिबुध्यते। येन चायं देहेन देशान्तरमश्नुवानो मन्यते तमन्ये पार्श्वस्थाः शयनदेश एव पश्यन्ति। यथाभूतानि चायं देशान्तराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवन्ति। परिधावंश्चेत्पश्येज्जा-

---

मिष्टं कात्स्न्र्यं व्याचष्टे—देशेति। स्वप्नेऽपि तत्सिद्धिमाशङ्क्याऽऽह—नेत्यादिना। तत्र स्वप्ने योग्यदेशायोगं विवृणोति—न तावदिति। यत्र स्वप्नो दृश्यते स एव रथादीनां योग्यो देशः स्यादित्याशङ्क्य स किं देहादन्तर्बहिर्वेति विकल्प्याऽऽद्यं प्रत्याह—न हीति। द्वितीयं शङ्कते—स्यादिति। तत्रोपपत्तिमाह—देशेति। तत्रैव श्रुतिमाह—दर्शयतीति। देहाद्बहिरेव स्वप्नधीरित्यत्र युक्त्यन्तरमाह—स्थितीति। अन्तरेव वा स्वप्नो न बहिरित्याह—नेतीति। बहिर्गतस्याऽऽगत्यनियमात्तत्रैव प्रबोधप्रसङ्गादपि न स्वप्नो बहिरित्याह—क्वचिच्चेति। श्रावयति स्वप्नद्रष्टा प्रबुद्धः सन्पार्श्वस्थानिति शेषः। उक्तमर्थं व्यतिरेकद्वारा स्फोरयति—देहाच्चेदिति। इतश्च देहाद्बहिर्देशान्तरं गत्वा न स्वप्नधीरित्याह—येनेति। न स्वप्नो देशान्तरं गतस्येत्यत्रैव हेत्वन्तरमाह—यथेति। तदेव व्यतिरेकेणोपपादयति—परिधावन्निति। देहाद्देहान्तरं[10] गच्छन्निति यावत्। न केवलं स्वप्नोऽन्तरेवेत्युपपन्नं किं तु श्रौतश्चे-

---

१ क. ङ. झ. ञ. 'व्यते। न। २ ङ. ञ. ट. न तावत्संवृ'। ३ क. ज. 'रितदे'। ४ ङ. ञ. ततः। ५ ज. 'ष्वहं शय्यायां श'। ६ ङ. ज. 'मथ श'। ७ ङ. ञ. 'लेष्वेव प्र'। ८ झ. ट. 'व प्र'। ९ क. ख. 'व स्व'। १० क. ख. ङ. 'देशान्त'।

ग्रहैर्द्वस्तुभूतमर्थमाकलयेत् । दर्शयति च श्रुतिरन्तरेव देहे स्वप्नम् " स यत्रैतत्स्वप्न्यया चरति " [बृ० २-१-१८] इत्युपक्रम्य " स्वे शरीरे यथाकामं परिवर्तते " [बृ०२-१-१८] इति । अतश्च श्रुत्युपपत्तिविरोधाद्बहिष्कुलायश्रुतिर्गौणी व्याख्यातव्या, बहिरिव कुलायादमृतश्चरित्वेति । यो हि वसन्नपि शरीरे न तेन प्रयोजनं करोति स बहिरिव शरीराद्भवतीति । स्थितिगतिप्रत्ययभेदोऽप्येवं सति विप्रलम्भ एवाभ्युपगन्तव्यः । कालविसंवादोऽपि च स्वप्ने भवति रजन्यां सुप्तो वासरं भारते वर्षे मन्यते । तथा मुहूर्तमात्रवर्तीनि स्वप्ने कदाचिद्बहुवर्षपूगानतिवाहयति । निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे वोचितानि विद्यन्ते । करणोपसंहाराद्धि नास्य रथादिग्रहणाय चक्षुरादीनि सन्ति । रथादिनिवर्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दारूणि वा । बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे । स्वप्न एवैते सुलभबाधा भवन्ति । आद्यन्तयोर्व्यभिचारदर्शनात् । रथोऽयमिति हि कदाचित्स्वप्ने निर्धारितः क्षणेन मनुष्यः संप-

---

त्याह—दर्शयतीति । एतदिति स्वप्नवाचि क्रियाविशेषणम् । स्वप्न्ययेति वृत्तिविशेष्यते । अन्तरेव स्वप्नश्चेत्कथं तर्हि बहिष्कुलायश्रुतिरिति तत्राऽऽह—अतश्चेति । कथं शरीरे वसतो बहिरिवेत्युक्तिरित्याशङ्क्योपचारे निमित्तमाह—यो हीति । यत्तु स्थितिगतिप्रत्ययभेदसामञ्जस्याय स्वप्नो बहिरिति तत्राऽऽह—स्थितीति । एवं सतीति । श्रुतियुक्तिभ्यामन्तरेव स्वप्ने सिद्धे सतीत्यर्थः । विप्रलम्भो विभ्रमः । योग्यदेशायोगं स्वप्नस्योक्त्वा तादृक्कालायोगं स्पष्टयति—कालेति । अत्र रात्रिसमयेऽपि केतुमालादौ वर्षान्तरे वासरो भवतीति भारत इत्युक्तम् । विधान्तरेण कालविसंवादमाह—तथेति । योग्यकालायोगमुक्त्वा तादृङ्निमित्तायोगमाह—निमित्तान्यपीति । बुद्धयर्थं योग्यनिमित्तायोगं साधयति—करणोति । अस्येति स्वप्नद्रष्टुरुक्तिः । कर्मार्थं योग्यनिमित्ताभावमाह—रथादीति । अबाधासंभवं विभजते—बाध्यन्ते चेति । न केवलं प्रबोधे बाध्यत्वं स्वप्नेऽपीत्याह—स्वप्न इति । आदावन्ते च व्यभिचारधीर्जागरेऽपि तुल्येत्याशङ्क्य विशेषमाह—रथोऽयमिति । न केवलमध्यक्षं स्वप्ने रथा-

---

१ अ. 'द्वस्तु' । २ झ. 'पि स्व' । ३ ङ. अ. ट. 'त्रप्रव' । ४ ङ. अ. 'द्बहून्वर्ष' । ५ क. नास्याश्वर' । ६ क. 'थाश्वाद' । ७ क. ङ. ज. अ. एव चैते ।

यते मनुष्योऽयमिति निर्धारितः क्षणेन दृक्षः । स्पष्टं चाभावं रथादीनां स्वप्ने श्रावयति शास्त्रम् " न तत्र रथा न रथयोगा न पन्थानो भवन्ति " [बृ० ४-३-१०] इत्यादि । तस्मान्मायामात्रं स्वप्नदर्शनम् ॥ ३ ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

मायामात्रत्वात्तर्हि न कश्चित्स्वप्ने परमार्थगन्धोऽस्तीति । नेत्युच्यते । " सूचकश्च हि " स्वप्नो भवति भविष्यतोः साधवसाधुनोः । तथा हि श्रूयते—

" यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने "

[छा० ५-२-९] तथा " पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति " [ऐत० आर० ३-२-४-१७] इत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यत इति श्रावयति । " आचक्षते च " स्वप्नाध्यायविदः । कुञ्जरारोहणादीनि स्वप्ने धन्यानि खरयानादीन्यधन्यानीति । मन्त्रदेवताद्रव्यविशेषनिमित्ताश्च केचित्स्वप्नाः सत्यार्थगन्धिनो भवन्तीति मन्यन्ते । तत्रापि भवतु नाम सूच्य-

---

दीनां बाध्यत्वं किं तु श्रुतमपीत्याह—स्पष्टं चेति । योग्यदेशाद्यभावेन सिद्धमर्थमुपसंहरति—तस्मादिति ॥ ३ ॥

स्वप्नस्य मायामात्रत्वे शुभाशुभफलत्वान्वयव्यतिरेकाभ्यां शास्त्रेण च विरोधः स्यादित्याशङ्क्याऽऽह—सूचकश्चेति । सूत्रव्यावर्त्यामाशङ्कामाह—मायेति । विरोधद्वयं प्रत्याह—नेतीति । तत्र प्रथमं श्रुतिविरोधं निरस्यति—सूचकश्च हीति । स्वप्नो भविष्यतः साधुनः सूचक इत्यत्र श्रुतिमुक्त्वा तादृशोऽसाधुनोऽपि सूचकोऽसावित्यत्र श्रुतिमाह—तथेति । अन्वयव्यतिरेकविरोधसमाधिं स्फुटयति—आचक्षते चेति । इतश्चोभयविधविरोधवैधुर्यमित्याह—मन्त्रेति । तर्हि शुभाशुभसूचकत्वानुपपत्त्या स्वप्नस्य सत्यत्वान्न मायामात्रत्वमित्याशङ्क्यार्थक्रियाकारित्वेऽपि परमार्थत्वाभावान्मिथ्यात्वमित्याह—तत्रापीति । स्वप्नस्य सत्यार्थसूचकत्वेऽपीति यावत् । द्विविधविरोध-

---

१ क. ज. ट. 'ति च नि' । ङ. ञ. 'ति वा नि' । २ क ङ. ज. ञ. 'गन्ध इति । ३ ख. प्रकटयति ।

मानस्य वस्तुनः सत्यत्वं सूचकस्यं स्त्रीदर्शनादेर्भवत्येव वैतथ्यं बाध्यमानत्वादित्यभिप्रायः । तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम् । यदुक्तमाह हीति तदेवं सति भाक्तं व्याख्यातव्यम् । यथा लाङ्गलं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्यक्षमेव लाङ्गलं गवादीनुद्वहति । एवं निमित्तमात्रत्वात्सुप्तो रथादीन्सृजते स हि कर्तेति चोच्यते । न तु प्रत्यक्षमेव सुप्तो रथादीन्सृजति । निमित्तत्वं चास्य रथादिप्रतिभाननिमित्तमोदत्रासादिदर्शनात्तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यम् । अपि च जागरिते विषयेन्द्रियसंयोगादादित्यादिज्योतिर्व्यतिकराच्चाऽऽत्मनः स्वयंज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः । तत्र यदि रथादिसृष्टिवचनं श्रुत्या नीयेत तँतः स्वयंज्योतिष्ट्वं न निर्णीतं स्यात् । तस्माद्रथाद्यभाववचनं श्रुत्या रथादिसृष्टिवचनं तु भक्त्येति व्याख्येयम् । एतेन निर्माणश्रवणं व्याख्यातम् । यदप्युक्तं प्राङ्मनेनं निर्मातारमामन-

---

समाधिफलमुपसंहरति—तस्मादिति । परोक्तमनूद्य दूषयति—यदित्यादिना । तदिति सुप्तस्य स्रष्टृत्वादिवचनम् । एवं सतीति पूर्वोक्तन्यायेन स्वप्नस्य मायामात्रत्वे सतीत्यर्थः । स्वप्नदृष्टरथादिस्रष्टृत्वादिवचसो गौणत्वं दृष्टान्तेन स्पष्टयति—यथेति । लाङ्गलस्यापि गवाद्युद्वोढृत्वं मुख्यमेव किं न स्यादित्यत्राऽऽह—न त्विति । तथाऽपि दार्ष्टान्तिके मुख्यमेव स्रष्टृत्वं सुप्तस्य चेतनत्वेन स्रष्टृत्वयोगादित्याशङ्क्याऽऽह—न तु प्रत्यक्षमिति । जाग्रतः स्रष्टृत्ववद्यदि सुप्तस्यापि तदिष्टं तर्हि सृष्टस्य रथादेर्न प्रबोधमात्रेण बाध्यता स्यादित्यर्थः । धर्माधर्मयोरेव निमित्तत्वात्कुतः सुप्तस्य निमित्तते त्याशङ्क्य तत्फलित्वेन तत्कर्तृतयेत्याह—निमित्तत्वं चेति । इतश्च श्रुत्या स्वप्नसृष्टिर्वास्तवी नाभीष्टेत्याह—अपि चेति । हेत्वन्तरं स्फोरयति—जागरित इति । अस्त्वात्मनः स्वयंज्योतिष्ट्वविवेचनाय स्वप्नोक्तिस्तथाऽपि स्वप्ने सृष्टिवचनं मुख्यमेवेत्याशङ्क्याऽऽह—तत्रेति । जागरितादविशेषादित्यर्थः । पूर्वापरालोचनायां श्रुतेरन्यपरत्वादसत्त्वे रथादीनां सिद्धे फलितमाह—तस्मादिति । यत्तु निर्मातारं चेत्यादि तत्राऽऽह—एतेनेति । रथादिसृष्टिवचनस्य भाक्तत्वोपपादनेनेति यावत् । परोक्तमनुमानमनूद्य हेत्वसिद्ध्या दूषयति—यदपीति । स्वयं विहत्य पूर्वं देहं निश्चेष्टं कृत्वा

---

१ ङ. ज. ञ. °स्य तु स्त्री° । २ घ. ङ. झ. °त्वं त्वस्य । ३ क. ङ. ञ. °त्रासद° । ४ ङ. ञ. °ष्ट्वं द्रष्टुर्दुर्वि° । ५ क. ज. °चमि । ६ ङ. ज. ञ. °त स्व° । ७ झ. तदा । ८ ङ. ञ. °नं भाक्तमिति । ९ क. °परलो° ।

न्तीति तदप्यसत्। श्रुत्यन्तरे "स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति" [बृ० ४-३-९] इति जीवव्यापारश्रवणात्। इहापि "य एष सुप्तेषु जागर्ति" [कठ० ५-८] इति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता संकीर्त्यते। तस्य तु वाक्यशेषेण "तदेव शुक्रं तद्ब्रह्म" इति जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते "तत्त्वमसि" [छा० ६-९-४] इत्यादिवदिति न ब्रह्मप्रकरणं विरुध्यते। न चास्माभिः स्वप्नेऽपि प्राज्ञव्यवहारः प्रतिषिध्यते तस्य सर्वेश्वरत्वात्सर्वास्ववस्थास्वधिष्ठातृत्वोपपत्तेः। पारमार्थिकस्तु नायं संध्याश्रयः सर्गो वियदादिसर्गवदित्येतावत्प्रतिपाद्यते। न च वियदादिसर्गस्यापि प्रत्यन्तिकं सत्यत्वमस्ति। प्रतिपादितं हि "तदनन्यत्वमारम्भणशब्दादिभ्यः" [ब्र० सू० २-१-१४] इत्यत्र समस्तस्य प्रपञ्चस्य मायामात्रत्वम्। प्राक्तु ब्रह्मात्मत्वदर्शनाद्वियदादिप्रपञ्चो व्यवस्थितरूपो भवति। संध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यत इति। अतो वैशेषिकमिदं संध्यस्य मायामात्रत्वमुदितम् ॥ ४ ॥

स्वयं निर्मायापूर्वं वासनामयं देहं संपाद्य स्वेन भासा स्वकीयबुद्धिवृत्त्या स्वेन ज्योतिषा स्वरूपचैतन्येन चेत्यर्थः। न केवलं बृहदारण्यके जीवस्य स्वापकर्तृत्वं श्रुतं किं तु काठकेऽपीत्याह—इहापीति। प्रकरणवाक्यशेषाभ्यां परमात्मा निर्मातेत्युक्तमाशङ्क्य जीवभावमापन्नस्य परस्य स्वाविद्यया स्वप्नोपादानत्वं वा विना तद्भावं स्वाविद्यया तदधिष्ठातृत्वं वेति विकल्प्याऽऽद्यमङ्गी करोति—न चेति। द्वितीयमपि स्वी करोति—तस्येति। तर्हि प्राज्ञकर्तृत्वहेतोः सिद्धेरनुमानमदुष्टमित्याशङ्क्य व्यावहारिकं पारमार्थिकं वा सत्यत्वं साध्यमिति विकल्प्याऽऽद्ये बाधकं प्रत्यक्षविरोधमाह—पारमार्थिकस्त्विति। व्यवहारे बाधवैधुर्यमिह पारमार्थिकत्वम्। द्वितीये दृष्टान्तस्य साध्यविकलतेत्याह—न चेति। वियदादिसर्गस्यासिद्धं मिथ्यात्वमिति कुतो दृष्टान्तस्य साध्यविकलता तत्राऽऽह—प्रतीति। कस्तर्हि स्वप्नस्य जाग्रतो विशेषो येनैतन्मिथ्यात्वं पृथगुच्यते तत्राऽऽह—प्राक्त्विति। व्यवहारेऽपि स्वप्नस्य मिथ्यात्वं वक्तुं पृथगुक्तिरिति भावः ॥ ४ ॥

---

१ ङ. ञ. °पि च य। २ ङ. ज. ञ. °रणत्वं वि°। ३ क. ङ. ज. ञ. °ज्ञव्यापारः। ४ क. ङ. ञ. °स्वप्यव°। ५ क. °स्याऽऽत्यन्ति°। ६ ख. ठ. ङ. °र्तृकत्व°।

परामिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥

अथापि स्यात्परस्यैव तावदात्मनोऽशो जीवोऽग्नेरिव विस्फुलिङ्गः। तत्रैवं सति यथाऽग्निविस्फुलिङ्गयोः समाने दहनप्रकाशनशक्ती भवत एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्ती ततश्च जीवस्यैश्वर्यवशात्सांकल्पिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति। अत्रोच्यते—सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवस्येश्वरविपरीतधर्मत्वम्। किं पुनर्जीवस्येश्वरसमानधर्मत्वं नास्त्येव न नास्त्येव विद्यमानमपि तत्तिरोहितमविद्यादिव्यवधानात्। तत्पुनस्तिरोहितं सत्परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतेव दृक्शक्तिरौषधवीर्यादीश्वरप्रसादात्संसिद्धस्य कस्यचिदाविर्भवति न स्वभावत एव सर्वेषां जन्तूनाम्। कुतः। ततो ह्यीश्वराद्धेतोरस्य जीवस्य बन्धमोक्षौ भवतः।

यदुक्तं स्वप्नो योग्यनिमित्ताभावान्मिथ्येति तन्न जीवसंकल्पस्यैव निमित्तत्वसिद्धेरित्याशङ्क्याऽऽह—परेति। सूत्रव्यावर्त्यमाह—अथापीति। पूर्वोक्तरीत्या मिथ्यात्वे स्वप्नस्योक्तेऽपीत्यर्थः। जीवेश्वरयोरंशांशित्वेऽपि किं स्यात्तत्राऽऽह—तत्रेति। तस्मिञ्जीवे परस्यांशे श्रुतिस्मृतिसिद्धे सतीति यावत्। ज्ञानैश्वर्यशक्तिसाम्ये फलितमाह—ततश्चेति। नाविद्यामयी स्वप्नसृष्टिः किंतु सांकल्पिकी सत्येति चोद्यमनूद्योत्सूत्रं परिहरति—अत्रेति। असर्वज्ञत्वानीश्वरत्वयोरध्यक्षत्वान्न जीवस्य संकल्पादेव रथादिसृष्टिरित्यर्थः। तर्हि विरुद्धत्वादेव न तयोरैक्यमिति शङ्कते—किमिति। प्रातीतिके विरोधेऽपि वस्तुतस्तदभावादैक्यमित्याह—न नेति। किमिति तर्हि जीवे सर्वज्ञत्वादि न भातीत्याशङ्क्य सूत्रं योजयति—विद्यमानमिति। अविद्यादीत्यादिपदं तत्कार्यार्थम्। यन्न कदाचिदुपलभ्यते तस्य सत्यत्वमेव कथं तत्राऽऽह—तदिति। आदरदीर्घकालनैरन्तर्यत्रयवत्त्वं ध्यानस्य सूचयति—यतमानस्येति। ध्यानकार्यमीश्वरप्रसादप्रतिबन्धकपापध्वंसं दर्शयति—विधूतेति। किमिति तर्हि सर्वेषामीश्वरध्यायिनां तन्नाऽऽविर्भवति तत्राऽऽह—संसिद्धस्येति। अणिमादिविशिष्टस्येति यावत्। ततः स्वतोव्यक्तौ हेतुं पृच्छति—कुत इति। सूत्रपदेनोत्तरम्—ततो हीति।

---

१ क. 'वस्य ज्ञानैश्व'। २ ड. ज. ट. नास्ति वि'। ञ. नास्तीति वि'। ३ क. ड. ज. ञ. 'पि तु त'। ४ ड. ञ. 'द्याव्य'। ५ ञ. ट. 'स्कृतस्येव। ६ क. ड. ज. ञ. 'चिदेवाऽऽवि'। ७ ड. 'नूद्य सूत्रेण प'।

(स्वप्नदृष्टेर्मिथ्यात्वकथनम्, आधि० १)

ईश्वरस्वरूपापरिज्ञानाद्बन्धस्तत्स्वरूपपरिज्ञानात्तु मोक्षः। तथा च श्रुतिः—

" ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्याभिध्यानात्तृतीयं देहभेदे
विश्वैश्वर्यं केवल आप्तकामः "
[श्वेताश्व० १-११] इत्येवमाद्या ॥ ५ ॥

देहयोगाद्वा सोऽपि ॥ ६ ॥ (१)

कस्मात्पुनर्जीवः परमात्मांश एव संस्तिरस्कृतज्ञानैश्वर्यो भवति। युक्तं तु ज्ञानैश्वर्ययोरतिरस्कृतत्वं विस्फुलिङ्गस्येव दहनप्रकाशनयोरिति। उच्यते—सत्यमेवैतत्। "सोऽपि" तु जीवस्य ज्ञानैश्वर्यतिरोभावः "देहयोगात्" देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद्भवति। अस्ति चात्रोपमा यथाऽग्नेर्दहनप्रकाशनसंपन्नस्याप्यरणि-

---

कथमीश्वरस्य विरुद्धफलहेतुतेत्याशङ्क्य विभजते—ईश्वरेति । तत्र मानमाह—तथा चेति । परमात्मैवाहमिति साक्षादनुभूय सर्वपाशानामविद्यारागादिबन्धनानामपहानिरपेक्षयो भवति क्षीणैश्च क्लेशैस्तत्कार्यजन्ममृत्युध्वंस इति निर्गुणविद्याफलमुक्तम् । सगुणविद्याफलमाह—तस्येति । परस्याऽऽभिमुख्येन ध्यानाद्बन्धमोक्षापेक्षया वा मन्त्रोक्तपाशहानिजन्मादिप्रहाणसिद्धिद्वयापेक्षया वा तृतीयम् । अणिमाद्यैश्वर्यं देहभेदे देहविशेषसिद्धदेहे साधकदेहपाते वा सति जगत्कारणसायुज्यापत्त्या भवति । ततश्च विश्वैश्वर्यं निरतिशयैश्वर्यं भुक्त्वा निर्गुणविद्योदये केवलोऽद्वितीयः सन्नाप्तकामो निरतिशयानन्दात्मनैव तिष्ठतीति क्रममुक्तिरित्यर्थः ॥ ५ ॥

जीवस्य स्वत एवानाविर्भूतज्ञानैश्वर्यतया संकल्पमात्रं न स्रष्टृतेत्युक्तं तत्र हेत्वसिद्धिमाशङ्क्याऽऽह—देहयोगाद्वा सोऽपीति । सूत्रव्यावर्त्यमाह—कस्मादिति । आक्षेपं विवृणोति—युक्तं त्विति । पारमार्थिकस्य प्रतिबन्धस्याभावः साध्यते प्रातिभासिकस्य वेति विकल्पयति—उच्यत इति । आद्यमङ्गी करोति—सत्यमिति । द्वितीयं दूषयति—सोऽपीति । सूत्रे देहशब्देन स्थूलं सूक्ष्मं च देहं गृहीत्वा व्याचष्टे—देहेति । वेदनाशब्देन सुखादयो गृह्यन्ते । आदिशब्देन तद्धेतुरविद्या । तद्धर्मकस्यैवान्यसंपर्कतिरस्कारे दृष्टान्तमाह—अस्तीति । अरणिस्थोऽग्निरस्तीत्येतदेव संदिग्ध-

---

१ ङ. ञ. ट. °रस्य स्व°। २ ज. °नान्मोक्षः। ३ ङ. ज. ञ. °शयो°। ४ क. ङ. °मेवमेत° । ट. °मेत° । ५ ङ. °दे सि° । ६ क. ख. ठ. ड. °मात्राग्न स्व° । ७ ठ. ड. °पर्कातिर° ।

गतस्य दहनप्रकाशने तिरोहिते भवतो यथा वा भस्मेच्छन्नस्य। एवमविद्याप्रत्युपस्थापितनामरूपैकृतदेहाद्युपाधियोगात्तद्विवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः। वाशब्दो जीवेश्वरान्यत्वाशङ्काव्यावृत्त्यर्थः। नन्वन्य एव जीव ईश्वरादस्तु तिरस्कृतज्ञानैश्वर्यत्वार्तिक देहयोगकल्पनया। नेत्युच्यते। न ह्यन्यत्वं जीवस्येश्वरादुपपद्यते "सेयं देवतैक्षत" [छा० ६-३-२] इत्युपक्रम्य "अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य" [छा० ६-३-२] इत्यात्मशब्देन जीवस्य परामर्शात्। "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" [छा० ६-९-४] इति च जीवायोपदिशतीश्वरात्मत्वम्। अतोऽनन्य एवेश्वराज्जीवः सन्नेहयोगात्तिरोहितज्ञानैश्वर्यो भवति। अतश्च न सांकल्पिकी जीवस्य स्वप्ने रथादिसृष्टिर्घटते। यदि च सांकल्पिकी स्वप्ने सृष्टिः स्यान्नैवानिष्टं कश्चित्स्वप्नं पश्येत्। न हि कश्चिदनिष्टं संकल्पयते। यत्पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति न तत्साम्यवचनं सत्यत्वाभिप्रायं स्वयंज्योतिष्ट्वविरोधात्। श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात्। जागरितप्रभववासनानिर्मितत्वात्तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायम्। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वम् ॥ ६ ॥ (१)

मित्याशङ्क्याऽऽह—यथा वेति। दार्ष्टान्तिकमाह—एवमिति। सूत्रे वाशब्दस्य पक्षान्तरद्योतित्वमाशङ्क्याऽऽह—वाशब्द इति। तत्रान्यत्वाशङ्कां दर्शयति—नन्विति। तद्व्यावृत्तिं विशदयति—नेतीति। इतश्च न वास्तवमन्यत्वमित्याह—तदिति। अनन्यत्वे फलितमाह—अत इति। जीवस्य ज्ञानादितिरोभावेऽपि किं स्यात्तत्राऽऽह—अतश्चेति। सांकल्पिकत्वे दोषान्तरमाह—यदि चेति। तत्र हेतुः—न हीति। परोक्तमनूद्य निरस्यति—यदिति। स्वप्नेऽपि जागरवदर्थेन्द्रियसत्त्वे दुर्विवेचनतया साध्यं स्वयंज्योतिष्ट्वं न सिध्येदित्याह—स्वयमिति। इतश्च न स्वप्नस्य सत्यत्वार्थमेव तद्वाक्यमित्याह—श्रुत्येति। तर्हि केनाभिप्रायेणेदं साम्यमुक्तं तत्राऽऽह—जागरितेति। स्वप्नस्य जागरितेन तुल्यनिर्भासत्वाभिप्रायं साम्यवचनमिति शेषः। स्वप्नस्य सत्यत्वसाधकाभावे मिथ्यात्वसाधके च फलितमुपसंहरति—तस्मादिति ॥ ६ ॥ (१)

---

१ क. ङ. ञ. 'रो भ'। २ ङ. ञ. 'स्मना छन्न'। ३ ट. 'पदे'। ४ क. जीवस्येश्वरादन्य'। ५ ङ. ञ. 'श्वरयोरन्य'। ६ क. जीवस्योप'। ७ क. ज. ञ. सृष्टिसिद्धिः स्या'। ८ ट. 'त्वं स्थाप'। ९ क. ञ. 'निमित्तत्वा'। १० क. ङ. ज. ञ. 'प्रायं तत्। तं'।

(सुषुप्तिस्थानरूपब्रह्मस्थब्रह्मण एकत्वस्थापनम्, अधि० २)

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

स्वप्नावस्था परीक्षिता, सुषुप्तावस्थेदानीं परीक्ष्यते । तत्रैताः सुषुप्तिविषयाः श्रुतयो भवन्ति । क्वचिच्छ्रूयते " तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति " [छा० ८-६-३] इति । अन्यत्र तु नाडीरनुक्रम्य श्रूयते " ताभिः प्रत्यवसृप्य पुरीतति शेते " [बृ० २-१-१९] इति । तथाऽन्यत्र नाडीरेवानुक्रम्य " तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति " [कौषी० ४-१९] इति । तथाऽन्यत्र य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते " [बृ० २-१-१७] इति । तथाऽन्यत्र " सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति "[छा० ६-८-१] इति । " प्राज्ञेनाऽऽत्मना संपरिष्वक्तो न बाह्यं किंचन वेद नाऽऽन्तरम् " [बृ० ४-३-२१] इति च । तत्र संशयः— किमेतानि नाड्यादीनि परस्परानिरपेक्षतया भिन्नानि सुषुप्तिस्थानान्याहोस्वित्परस्परापेक्षयैकं सुषुप्तिस्थानमिति । किं तावत्-

---

बाह्यकरणोपरमं स्वप्नमात्मनः स्वयंज्योतिष्ट्वार्थं निरूप्यान्तःकरणोपरमं सुषुप्तं तस्य ब्रह्मत्वाय निरूपयति—तदभाव इति । अधिकरणसंगतिमाह—स्वप्नेति । स्वप्नाभावस्य प्रतियोगिस्वप्नाधीननिरूपणत्वाद्धेतुहेतुमत्तेत्यर्थः । विषयवाक्यान्यु(ण्यु)दाहरति—तत्रेति । सुषुप्तिचिन्ताप्रस्तावः सप्तम्यर्थः । तत्तत्र तांस्ववस्थासु मध्ये सुषुप्तिरुच्यते । यस्यामवस्थायामेतत्स्वपनं यथा स्यात्तथा सुप्तः । समस्तः संवृतसर्वबाह्येन्द्रियः । संप्रसन्नः संवृतान्तःकरणश्चेत्यर्थः । नाडीपुरीततोः समुच्चयवाक्यं पठति—अन्यत्रेति । नाडीपरमात्मनोः समुच्चयवाक्यं दर्शयति—तथेति । परमात्ममात्रविषयाणि वाक्याराण्याह—तथेति । नाडीपुरीतद्ब्रह्मसु सप्तमीश्रुतेः समुच्चयोक्तेश्च संशयमाह—तत्रेति । अ[1]स्वापनिरूपणद्वारा ब्रह्माभिन्नत्वमर्थसिद्धेर्वाक्यार्थधीसंभवात्पादादिसंगतिः । पूर्वपक्षे स्थानाऽऽरब्धाज्जीवस्य ब्रह्मैक्यानियमः । सिद्धान्ते नाडीपुरीतद्वारा ब्रह्मस्थानत्वनियमाज्जीवस्य [2]ऽऽत्मत्वनियतिरित्यभिसंधाय विमृश्य पूर्वपक्षयति—किमिति । नाडीपुरीत-

---

१ क. ङ. ञ. म. °षुप्तवि° । २ ङ. म. ° डीरेवानु° । ३ ङ. म. °न्यत्रापि ना° । ४ क. °डीरनु° । ५ ङ. म. °न्यत्रापि य । ६ ङ. म. °ति । तथा प्रा° । ७ क. ङ. म. °पेक्षाणि भि° । ८ क. ङ. ज. म सुप्ति° । ९ क. ङ. ज. म. सुप्ति° । १० क. तासु स्वप्नाद्यव° ।

त्माप्तं भिन्नानीति । कुतः । एकार्थत्वात् । न ह्येकार्थानां क्वचित्परस्परापेक्षत्वं दृश्यते व्रीहियवादीनाम् । नाड्यादीनां चैकार्थता सुषुप्तौ दृश्यते " नाडीषु सृप्तो भवति " [छा० ८-६-३] " पुरीतति शेते " [बृ० २-१-१९] इति च तत्र तत्र सप्तमीनिर्देशस्य तुल्यत्वात् । ननु च न सति सप्तमीनिर्देशो दृश्यते "सता सोम्य तदा संपन्नो भवति " [छा० ६-८-१] इति । नैष दोषः । तत्रापि सप्तम्यर्थस्य गम्यमानत्वात् । वाक्यशेषो हि सदायतनैषी जीवः सदुपसर्पतीत्याह " अन्यत्राऽऽयतनमलब्ध्वा प्राणमेवोपश्रयते " [छा० ६-८-२] इति प्राणशब्देन तत्र प्रकृतस्य सत उपादानात् । आयतनं च सप्तम्यर्थः । सप्तमीनिर्देशोऽपि तत्र वाक्यशेषे दृश्यते " सति संपद्य न विदुः सति संपद्यामहे " [छा० ६-९-२] इति । सर्वत्र च विशेषविज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते। तस्मादेकार्थत्वान्नाड्यादीनां विकल्पेन कदाचित्कांचित्स्थानं स्वापायोपसर्पतीति ।

ब्रह्मणां विकल्पे प्रश्नपूर्वकं हेतुमाह—कुत इति । एकार्थत्वेऽपि समुच्चये का क्षतिस्तत्राऽऽह—न हीति । एकार्थत्वमेव नाड्यादिषु कथं तत्राऽऽह—नाड्यादीनां चेति । एकार्थता निरपेक्षस्वापाधारतेति यावत् । अस्मिन्प्राण एवैकधा भवतीत्यपि वाक्ये सप्तम्या चेदाधारत्वं तर्हि सतस्तृतीयोक्तेर्नाऽऽधारतेति शङ्कते—नन्विति । सप्तम्यभावेऽपि तदर्थसिद्धेराधारत्वं सतोऽपि स्यादित्याह—नैष इति । तत्रापि सत्यपि नाड्यादाविवेत्यर्थः । तस्य गम्यमानत्वमेव दर्शयति—वाक्येति । तत्र सता सोम्येत्यादाविति यावत् । प्राणस्याऽऽयतनत्वेऽपि किं सतः स्यात्तत्राऽऽह—प्राणेति । तथाऽपि कथं सप्तम्यर्थस्य गम्यमानत्वं तत्राऽऽह—आयतनं चेति । सति सप्तमीनिर्देशस्यासत्त्वमुपेत्योक्तं तदपि नास्तीत्याह—सप्तमीति । विशेषज्ञानोपरमस्वापस्य नाडीपुरीततोरयोगात्तयोर्न सुप्तिस्थानतेत्याशङ्क्य शास्त्रप्रामाण्यमाश्रित्याऽऽह—सर्वत्रेति । न च जीवाधारत्वं नाड्यादेरयुक्तं बुद्ध्युपाधिकजीवाधारत्वाविरोधात् । न च विकल्पेऽन्यतरबाधाद्युक्तः समुच्चयस्तत्रापि प्रत्येकं सप्तमीश्रुतिसिद्धनिरपेक्षाधारत्वस्यान्तबाधात् । ताभिः प्रत्यवसृप्येत्यादौ तु कदाचिन्नाड्य एव कदाचित्ताभिः चरमाणस्य पुरीतदेव कदाचित्ताभिरेव संचरतो ब्रह्मैवाऽऽधार इति युक्तमन्यन्निरपेक्षाधारत्वश्रुतिविरोधादिति मत्वोपसंहरति—तस्मादिति । विकल्पे ज्ञस्य ब्रह्मैक्यमनियतमिति फलितं वक्तुमितिशब्दः ।

---

१ घ. झ. ट. °नां त्वेका° । २ ङ. ञ. °नु नैव सं° । ३ क. ङ. ञ. ट. °शेषे हि । ४ क. ङ. ज. ञ. हि तत्राय° । ५ ङ. °न च तं° ।

(सुषुप्तिस्थानरूपहृत्स्थब्रह्मण एकत्वस्थापनम्, अधि० २)

एवं प्राप्ते प्रतिपाद्यते—तदभावो नाडीष्वात्मनि चेति । तदभावे[2] इति तस्य प्रकृतस्य स्वप्नदर्शनस्याभावः सुषुप्तमित्यर्थः । " नाडीष्वात्मनि च " इति समुच्चयेनैतानि नाड्यादीनि स्वापायोपसर्पति[3] न विकल्पेनेत्यर्थः । कुतः । "तच्छ्रुतेः" तथाहि—सर्वेषामेव[4] नाड्यादीनां तत्र तत्र सुषुप्तिस्थानत्वं श्रूयते तच्च समुच्चये संगृहीतं भवति । विकल्पे ह्येषां पक्षे बाधः स्यात् । नन्वेकार्थत्वाद्विकल्पो नाड्यादीनां व्रीहियवादिवदित्युक्तम् । नेत्युच्यते । न ह्येकविभक्ति[5]निर्देशमात्रेणैकार्थत्वं विकल्पश्च भवति । नानार्थत्वसमुच्चययोरप्येकविभक्तिनिर्देशदर्शनात्प्रासादे शेते पर्यङ्के शेत इत्येवमादिषु । तथेहापि नाडीषु पुरीतति ब्रह्मणि च स्वपितीत्येतदुपपद्यते समुच्चयः । तथा च श्रुतिः " तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति " [कौषी० ४-१९] इति समुच्चयं नाडीनां प्राणस्य

पूर्वपक्षमनूद्य सिद्धान्तमाह—एवमिति । प्रतिज्ञां विभजते—तदित्यादिना । चकारेण पुरीतदुक्तिं गृहीत्वाऽऽह—समुच्चयेनेति । समुच्चये सिद्धान्ते प्रश्नपूर्वकं हेतुमुक्त्वा व्याचष्टे—कुत इत्यादिना । नाड्यादीनां सुप्तिस्थानत्वश्रुतिर्विकल्पेऽपि स्यादित्याशङ्क्याऽऽह—विकल्पे हीति । तेषामन्यतमस्य सुप्तिस्थानत्वे नान्यतमस्य तदिति पक्षे बाधः स चायुक्तो बाधस्यागतिकगतित्वादित्यर्थः । परा[9]क्तं विकल्पहेतुमनुवदति—नन्विति । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाह—नेतीति । प्रकृतदर्शादिसाधनीभूतपुरोडाशप्रकृतितया व्रीहियवौ श्रुतौ समर्थौ च निरपेक्षतया पुरोडाशं कर्तुं तयोर्मिथोपेक्षायामनपेक्षसाधनत्वार्थकश्रुतिबाधादनन्यगतित्वेन विकल्पाश्रयणं नाड्यादीनां तु न प्रत्येकं स्वापसाधने शक्तिरिति वक्ष्यते । नापि मानमिति भावः । यत्त्वेकार्थत्वं तत्किं मानान्तरसिद्धं किं वा सप्तमीसिद्धम् । नाऽऽद्यः । तदनुपलम्भात् । न द्वितीय इत्याह—न हीति । प्रासादस्य पर्यङ्कधारणार्थत्वं पर्यङ्कस्य शयनार्थतेति नानार्थत्वेऽप्येकविभक्तिनिर्देशः । व्यवधानाव्यवधानाभ्यां च शयनसाध[11]नत्वसमुच्चयः । तद्वदमूषु श्रुतिष्वपि नाड्यादिषु सप्तमीसमुच्चयश्चेत्याह—तथेति । अनेकश्रुतिसामर्थ्यालोचनया समुच्चयमुक्त्वा तत्रैव श्रुतिमाह—तथा चेति । उक्तश्रुतेस्तात्पर्यमाह—समुच्चयमिति ।

---

१ क. ज. ञ. 'तिपद्य' । २ झ. ट. 'वस्तस्य । ३ क. ङ. ञ. 'योपैति । ४ ङ. ञ. 'मेषां ना' । ५ ङ. ज. ञ. सुप्ति' । ६ ज. 'क्तिमा' । ७ क. ङ. ञ. 'ल्पश्चाऽऽपतति । ८ ज. 'क्तिद' । ९ क. ज. 'तीत्युप' । १० क. 'रोक्तवि' । ११ क. ठ. ड. 'नत्वात्समु' ।

च सुषुप्तौ श्रावयत्येकवाक्योपादानात् । प्राणस्य च ब्रह्मत्वं समधिगतम् " प्राणस्तथाऽनुगमात् " [ब्र० सू० १-१-२८] इत्यत्र । यत्रापि निरपेक्षा एव नाडीः सुषुप्तस्थानत्वेन श्रावयति " आसु तदा नाडीषु सृप्तो भवति " [छा० ८-६-३] इति, तत्रापि प्रदेशान्तरप्रसिद्धस्य ब्रह्मणोऽप्रतिषेधान्नाडीद्वारेणैव ब्रह्मण्येवावतिष्ठत इति प्रतीयते । न चैवमपि नाडीषु सप्तमी विरुध्यते नाडीभिरपि ब्रह्मोपसर्पन्सृप्त एव नाडीषु भवति । यो हि गङ्गया सागरं गच्छति गत एव स गङ्गायां भवति । अपि चात्र रश्मिनाडीद्वारात्मकस्य ब्रह्मलोकमार्गस्य विवक्षितत्वान्नाडीस्तुत्यर्थं सृप्तिसंकीर्तनम् । " नाडीषु सृप्तो भवति "[छा० ८-६-३] इत्युक्त्वा " तं न कश्चन पाप्मा स्पृशति " [छा० ८-६-३] इति ब्रुवन्नाडीः प्रशंसति । ब्रवीति च पाप्मस्पर्शाभावे हेतुम् "तेजसा हि तदा संपन्नो भवति" [छा०८-६-३] इति । तेजसा नाडीगतेन पित्ताख्येनाभिव्याप्तकरणो न बाह्यविषयानीक्षत इत्यर्थः । अथवा तेजसेति ब्रह्मण एवायं निर्देशः । श्रुत्यन्तरे " ब्रह्मैव

तत्र हेतुः—एकेति । नाडीनां प्राणस्य चैकेन वाक्येनोपादानान्मिथः समुच्चय इत्यर्थः । प्राणस्य नाडीसमुच्चयेऽपि ब्रह्मणस्ताभिः समुच्चये किं जातं तत्राऽऽह—प्राणस्येति । समुच्चये श्रुत्यन्तरं नैरपेक्ष्यद्योति विरुध्येतेत्याशङ्क्याऽऽह—यत्रेति । नाडीनां द्वारत्वे कथमधिकरणश्रुतिस्तत्राऽऽह—न चेति । नाड्यादौ सप्तम्याः सामीप्यमर्थमादाय ब्रह्मण्यधिकरणार्थत्वेऽपि न तद्विरोधोऽस्तीत्यर्थः । विरोधाभावं साधयति—नाडीभिरिति । तदेव दृष्टान्तेन स्पष्टयति—यो हीति । इतश्च ब्रह्मैवैकं स्वापाधिकरणमित्याह—अपि चेति । तर्हि नाडीषु सुप्तिसंकीर्तनमनर्थकमित्याशङ्क्य हेत्वन्तरमेव स्फोरयति—अत्रेति । नाडीप्रकरणं सप्तम्यर्थः । मार्गोपदेशायोक्तानां नाडीनां स्तुत्यर्थं सुप्तिकीर्तनमित्यत्र गमकमाह—नाडीष्विति । तासु सुप्तस्य पाप्मास्पर्शे को हेतुस्तत्राऽऽह—ब्रवीतीति । हेतुं विभजते—तेजसेति । विषयदर्शनाभावे तदुत्थसुखाद्यभावात्तद्धेतुधर्माद्यनुमानायोगात्पाप्मभिरस्पर्श इति शेषः । हेतुवाक्यं विधान्तरेण व्याकरोति—अथवेति । ब्रह्मसंपत्तावपि कथं पापास्पर्शस्तत्राऽऽह—ब्रह्मेति ।

---

१ क. ज. सुप्तौ । २ ज. ट. °स्य ब्र° । ३ क. ङ. अ. इव । ४ क. ङ. ज. अ. °रेण ब्र° । ५ ङ. ट. °ङीद्वाराऽपि । ६ ङ. °र्पन्सुप्त° । ७ ङ. अ. °क्त्वाऽतस्तं न । ८ क. ङ. ज. अ. बाह्यान्विष° । ९ ङ. अ. °जस इति । १० क. °प्तिसंकी° ।

(सुषुप्तिस्थानरूपहृत्स्थब्रह्मण एकत्वस्थापनम्, अधि० २)

तेज एव " [बृ० ४-४-७] इति तेजःशब्दस्य ब्रह्मणि प्रयुक्तत्वात् । ब्रह्मणा हि तदा संपन्नो भवति नाडाद्वारेगातस्तं न कश्चन पाप्मा स्पृशतीत्यर्थः । ब्रह्मसंपत्तिश्च पाप्मस्पर्शाभावे हेतुः समधिगतः " सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः " [छा० ८-४-१] इत्यादिश्रुतिभ्यः । एवं च सति प्रदेशान्तरप्रसिद्धेन ब्रह्मणा सुषुप्तिस्थानेनानुगतो नाडीनां समुच्चयः समधिगतो भवति । तथा पुरीततोऽपि ब्रह्मप्रक्रियायां संकीर्तनात्तदनुगुणमेव सुषुप्तिस्थानत्वं ज्ञायते " य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते " [बृ० २-१-१७] इति । हृदयाकाशे सुषुप्तिस्थाने प्रकृत इदमुच्यते " पुरीतति शेते " [बृ० २-१-१९] इति । पुरीतदिति हृदयपरिवेष्टनमुच्यते । तदन्तर्वर्तिन्यपि हृदयाकाशे शयानः शक्यते पुरीतति परिशेत इति वक्तुम् । प्राकारपरिक्षिप्तेऽपि पुरे वर्तमानः प्राकारे वर्तत इत्युच्यते । हृदयाकाशस्य ब्रह्मत्वं समधिगतम् " दहर उत्तरेभ्यः " [ब्र० सू० १-३-१४] इत्यत्र ।

तथा नाडीपुरीतत्समुच्चयोऽपि " ताभिः प्रत्यवसृप्य पुरीतति शेते" [बृ० २-१-१९] इत्येकवाक्योपादानादवगम्यते । सत्प्राज्ञयोश्च प्रसिद्धमेव ब्रह्मत्वम् । एवमेतासु श्रुतिषु त्रीण्येव

कतरद्व्याख्यानमादेयं द्वितीयमित्याह—एवं चेति । नाडीनां ब्रह्मप्राप्तिद्वारत्वे सतीति यावत् । नाडीद्वारा ब्रह्मणः स्वापस्थानत्वे क्वचित्ताभिः प्रत्यवसृप्य पुरीतति शेत इति पुरीतदुक्तिर्वृथेत्याशङ्क्य पुरीतद्ब्रह्मणोरपि गुणप्रधानत्वेन समुच्चयमाह—तथेति । उक्तमेव विवृणोति—य इति । आकाशे शेते चेत्पुरीतति कथं शेते तत्राऽऽह—तदिति । तदेव दृष्टान्तेन स्पष्टयति—प्राकारेति । पुरीतदाकाशसमुच्चयेऽपि कथं पुरीतद्ब्रह्मणोः समुच्चयस्तत्राऽऽह—हृदयेति ।

नाडीब्रह्मणोरिव पुरीतद्ब्रह्मणोरपि समुच्चयमुक्त्वा नाडीपुरीततोः समुच्चयमाह—तथेति । सत्प्राज्ञयोरपि सुषुप्तिस्थानत्वोक्तिस्त्रयाणामेव कथं समुच्चयोक्तिरित्याशङ्क्याऽऽह—सदिति । समुच्चयपक्षमुपसंहरति—एवमिति । तेष्ववान्तरविभागमाह—

---

१ क. ङ. ज. ञ सुप्ति° । २ क. ज. ट. नयः । ङ ञ. चयः । ३ क. ङ. ज. ञ. समा. श्रितो । ४ क. ङ ज. ञ. सुप्ति° । ५ ङ. ज. ञ. ट. सुप्ति° । ६ क. ङ. ज. ञ. ट. °ति शे° । ७ ङ. ज. ञ. °पि हि पु° । ८ क. ङ. ज. ञ. °स्य च ब्र° । ९ ङ. ज. ञ. °म् । एता° । १० ख. सुषुप्ति° ।

सुषुप्तिस्थानानि संकीर्तितानि नाड्यः पुरीतद्ब्रह्म चेति । तत्रापि द्वारमात्रं नाड्यः पुरीतच्च ब्रह्मैव त्वेकं सुषुप्तिस्थानम् । अपि च नाड्यः पुरीतद्वा जीवस्योपाध्याधार एव भवति तत्रास्य करणानि वर्तन्त इति । न ह्युपाधिसंबन्धमन्तरेण स्वत एव जीवस्याऽऽधारः कश्चित्संभवति ब्रह्मव्यतिरेकेण स्वमहिमप्रतिष्ठितत्वात् । ब्रह्माधारत्वमप्यस्य सुषुप्ते नैवाऽऽधाराधेयभेदाभिप्रायेणोच्यते कथं तर्हि तादात्म्याभिप्रायेण । यत आह " सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति " [छा० ६-८-१] इति । स्वशब्देनाऽऽत्माऽभिलप्यते स्वरूपमापन्नः सुप्तो भवतीत्यर्थः । अपि च न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति स्वरूपस्यानपायित्वात् । स्वप्नजागरितयोस्तूपाधिसंपर्कवशात्पररूपापत्तिमिवापेक्ष्य तदुपशमात्सुषुप्तेः स्वरूपापत्तिर्वक्ष्यते । अतश्च सुप्तावस्थायां कदाचित्सता संपद्यते कदाचिन्न संपद्यत इत्ययुक्तम् ।

अपि च स्थानविकल्पाभ्युपगमेऽपि विशेषविज्ञानोपशमलक्षणं

तत्रेति । नाडीपुरीततोर्द्वारत्वे हेत्वन्तरमाह—अपि चेति । तयोरुपाध्याधारत्वमपि कथं तत्राऽऽह—तत्रेति । नाडीषु पुरीतति च जीवस्योपाध्यन्तर्भूतानि करणानि कर्माणि तिष्ठन्तीत्युपाध्याधारत्वं तयोरुक्तम् । जीवस्य त्वाधारो ब्रह्मैवेत्यर्थः । किमिति तयोः साक्षादेव जीवाधारत्वं नेष्टं तत्राऽऽह—न ह्रीति । तर्हि ब्रह्मणोऽपि कुतो जीवाधारत्वमैक्यादित्याशङ्क्याऽऽह—ब्रह्मेति । तादात्म्याभिप्रायेण स्वापे जीवस्य ब्रह्माधारत्वोक्तिरित्यत्र लिङ्गमाह—यत इति । स्वशब्दस्य स्वकीयार्थत्वान्न तादात्म्यमत्र भातीत्याशङ्क्य पदार्थोक्त्या वाक्यार्थमाह—स्वेति । जीवस्य ब्रह्मैक्यमेव नाडीपुरीततोस्तु तदुपाध्याधारतया तदाधारतेत्यतुल्यार्थत्वान्न विकल्पोऽस्तीत्युक्तम् । इदानीं विकल्पायोगे हेत्वन्तरमाह—अपि चेति । जीवस्य चेदौत्सर्गिकं ब्रह्मत्वं तर्हि किमिति स्वापे तस्य तद्रूपत्वमुच्यते तत्राऽऽह—स्वप्नेति । सुषुप्तेरपवादाभावाज्जीवस्य ब्रह्मतादात्म्ये फलितमाह—अतश्चेति ।

इतश्च विकल्पासिद्धिरित्याह—अपि चेति । हेत्वन्तरमेव स्फोरयन्विकल्पवादिनोऽपि संमतमर्थमाह—स्थानेति । क्वचिदिति नाडीपुरीतद्ब्रह्मणामन्यतमोक्तिः ।

---

१ क. ङ. ज. ञ. सुप्ति । २ ञ. 'द्ब्रह्मेति । ३ ङ. ञ. ठ 'पि च द्वा' । ४ ङ. ञ. त्वेकमनपायि सुप्ति' । ५ क. ज. ट. सुप्ति' । ६ क. ज ञ. 'तिष्ठत्वा' । ७ ङ. ज. ञ. सुषुप्तो । ८ क. ङ. ज. ब. 'त्तिर्विवक्ष्य' । ९ ङ. 'ते स्वमपीतो भवतीति । अ' । १० ञ. 'र्गिकब्र' ।

(सुषुप्तिस्थानरूपहृत्स्थब्रह्मण एकत्वस्थापनम्, अधि० २)

तावत्सुषुप्तं न कंचिद्विशिष्यते । तत्र सति संपन्नस्तावेत्तदेकत्वान्न विजानातीति युक्तम् " तत्केन कं विजानीयात् " [बृ० २-४-१४] इति श्रुतेः । नाडीषु पुरीतति च शयानस्य न किंचिद्विज्ञाने कारणं शक्यं विज्ञातुं भेदविषयत्वात् " यत्र त्वन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत् " [बृ० ४-३-३१] इति श्रुतेः । ननु भेदविषयस्याप्यतिदूरादिकारणमविज्ञाने स्यात् । बाढम् । एवं यदि जीवः स्वतः परिच्छिन्नोऽभ्युपगम्येत यथा विष्णुमित्रः प्रवासी स्वगृहं न पश्यतीति । न तु जीवस्योपाधिव्यतिरेकेण परिच्छेदो विद्यते । उपाधिगतमेवातिदूरादिकारणमविज्ञान इति यद्युच्येत तथाऽप्युपाधेरुपशान्तत्वात्सत्येव संपन्नो न विजानातीति युक्तम् । न च वयमिह तुल्यवन्नाड्यादिसमुच्चयं प्रतिपादयामः । न हि नाड्यः सुप्तिस्थानं पुरीतद्वेत्यनेन विज्ञानेन

अन्यथा सुप्तिभङ्गो जागरादिवदिति भावः । स्वापस्यैवंरूपत्वेऽपि विकल्पे काऽनुपपत्तिस्तत्राऽऽह—तत्रेति । एकत्वमद्वैतावस्थत्वम् । सति संपन्नस्य विशेषज्ञानाभावे मानमाह—तादिति । अवशिष्टेऽपि स्थानद्वये यथोक्तं सुषुप्तं युक्तमेवेत्याशङ्क्याऽऽह—नाडीष्विति । नाड्यादिगोचरस्य पुंसो द्वैतावस्थत्वाद्विशेषाज्ञाने नास्ति हेतुरित्यर्थः । द्वैतावस्थस्य विशेषज्ञाननियमे मानमाह—यत्रेति । तस्यापि विशेषाज्ञाने हेतुं शङ्कते—नन्विति । भिद्यत इति भेदो विद्यमानस्य विषयस्यापीत्यर्थः । जीवस्यातिदूरत्वं स्वाभाविकमौपाधिकं वा तत्राऽऽद्यं दूषयति—बाढमिति । स्वाभाविकमपि दूरत्वमज्ञाने हेतुरित्यत्र दृष्टान्तमाह—यथेति । अस्तु प्रस्तुतेऽपि तादृगतिदूरत्वमज्ञानहेतुर्नेत्याह—न त्विति । द्वितीयमनुवदति—उपाधीति । तर्हि विकल्पासिद्धिरित्याह—तथाऽपीति । सुप्तिदशायामुपाधिपरिच्छेदाङ्गीकारे च कतिपयसंनिहितार्थज्ञानप्रसङ्गादशेषविशेषज्ञानशून्यतायै निरुपाधितया जीवस्य ब्रह्मरूपेणावस्थानमास्थेयमित्यर्थः । उपाधीनामुपशमे कथं नाड्यादिसमुच्चयोक्तिस्तत्राऽऽह—न चेति । इहेति स्वापस्थानमुक्तम् । गुणप्रधानत्वेन समुच्चयोक्तिरित्यर्थः । किंच नाड्यादीनां स्वापस्थानत्वोक्तेरफलत्वान्न समुच्चयो विकल्पो वेत्याह—न हीति । कथमस्याफलत्वमित्याशङ्क्य स्वातन्त्र्येण वा फलवदङ्गत्वेन वा फलवत्त्वमिति विकल्प्याऽऽद्यं प्रत्याह—

---

१ ज. ट. °नस्तदे° । २ क. ङ. ञ. °वदेक° । ३ क. ज. वक्तुं । ४ क. ङ. ञ. °त्र वाऽन्य° । ५ क, ङ. ज. ञ. °वं स्याद्यदि । ६ क. °गम्यते य° । ७ क. °गृहान्न प° । ८ ङ. ञ. °त्वेत्य° । ९ क. °षविज्ञा° । १० ञ. वाऽफलत्वमि° । ११ ट. ड. °ल्त्वमि° ।

किंचित्प्रयोजनमस्ति। न ह्येतद्विज्ञानप्रतिबद्धं किंचित्फलं श्रूयते। नाप्येतद्विज्ञानं फलवतः कस्यचिदङ्गमुपदिश्यते। ब्रह्म त्वनपायि सुप्तिस्थानमित्येतत्प्रतिपादयामः। तेन तु विज्ञानेन प्रयोजनमस्ति जीवस्य ब्रह्मात्मत्वावधारणं स्वप्नजागारितव्यवहारविमुक्तत्वावधारणं च। तस्मादात्मैव सुप्तिस्थानम् ॥ ७ ॥

अतः प्रबोधोऽस्मात् ॥ ८ ॥ (२)

यस्माच्चाऽऽत्मैव सुप्तिस्थानम् " अतः " एवं च कारणान्नित्यवदेव " अस्मात् " आत्मनः " प्रबोधः " स्वापाधिकारे शिष्यते " कुत एतदागात् " [बृ० २-१-१६] इत्यस्य प्रश्नस्य प्रतिवचनावसरे " यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणाः " [बृ० २-१-२०] इत्यादिना। " सत आगम्य न विदुः सत आगच्छामहे " [छा० ६-१०-२] इति च। विकल्प्यमानेषु तु सुषुप्तिस्थानेषु कदाचिन्नाडीभ्यः प्रतिबुध्यते कदाचित्पुरीततः कदाचिदात्मन इत्यशासिष्यत्। तस्मादप्यात्मैवं सुप्तिस्थानमिति ॥ ८ ॥ (२)

न हीति। द्वितीयं दूषयति—नापीति। विकल्पसमुच्चययोरप्रतिपाद्यत्वे किमत्र प्रतिपाद्यं तदाह—ब्रह्म त्विति। तद्विज्ञानेऽपि तुल्यमफलत्वमित्याशङ्क्याधिकरणत्वज्ञानस्य प्रयोजनमाह—तेनेति। ब्रह्म स्वापस्थानमिति ज्ञानस्य फलवत्त्वे फलितमाह—तस्मादिति ॥ ७ ॥

ब्रह्मण एव प्रबोधापादानत्वोक्तेरपि तदेव सुप्तिस्थानमित्याह—अत इति। सूत्रं व्याचष्टे—यस्मादिति। विकल्पेऽपि तदपादानत्वोक्तिर्ब्रह्मणो घटिष्यते नेत्याह—विकल्प्यमानेष्विति। न च नाडीपुरीततोरुत्थानापादानत्वं कदाचिदपि शिष्यते ब्रह्मण एव तु तद्वचने फलितमुपसंहरति—तस्मादपीति। एवमात्मनो ब्रह्मात्मत्वं सिद्धमित्यधिकरणार्थमुपसंहर्तुमितीत्युक्तम् ॥ ८ ॥ (२)

---

१ ङ. ञ. ट. 'व का'। २ क. ज. 'मेवास्मा'। ३ ङ. ञ 'दि स'। ४ ज. ट. 'षु सुप्ति'। ५ क. सुप्ति'। ६ झ. ट. 'स्मादात्मै'। ७ ङ. ञ. 'व तु सु'। ८ ठ. ड. 'णस्य। ९ ठ. ढ. 'स्मादिति।

(स्वप्नावस्थितस्यैव जीवस्य तस्मात्समुद्बोधो नापरस्य, अधि० ३)

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ (३)

तस्याः पुनः सत्संपत्तेः प्रतिबुध्यमानः किं य एव सत्संपन्नः स एव प्रतिबुध्यत उत स वाऽन्यो वेति चिन्त्यते । तत्र प्राप्तं तावदनियम इति । कुतः । यदा हि जलराशौ कश्चिज्जलबिन्दुः प्रक्षिप्यते जलराशिरेव स तदा भवति पुनरुद्धरणे च स एव जलबिन्दुर्भवतीति दुःसंपादम् । तद्वत्सुप्तः परेणैकत्वमापन्नः संप्रसीदतीति न स एव पुनरुत्थातुमर्हति । तस्मात्स एवेश्वरो वाऽन्यो वा जीवः प्रतिबुध्यत इत्येवं प्राप्ते इदमाह—"स एव तु" जीवः सुप्तः स्वास्थ्यं गतः पुनरुत्तिष्ठति नान्यः । कस्मात् । "कर्मानुस्मृतिशब्दविधिभ्यः" । विभज्य हेतुं दर्शयिष्यामि । कर्मशेषानु-

---

अतः प्रबोधोऽस्मादिति स्वापानन्तरं ब्रह्मणः सकाशात्प्रबोधोक्तेस्तदात्मनैव सुप्तस्तिष्ठतीत्युक्तम् । इदानीं तस्मात्प्रबोधस्तदापत्तिं गमयति सुप्तादन्यस्य प्रबोधसंभवेन तस्य नाड्यादिस्थानत्वसंभवादित्याशङ्क्याऽऽह—स एवेति । स्वापस्थानाद्ब्रह्मणः प्रतिबुध्यमानं जीवमधिकृत्योपाधिनाशात्कर्मानुस्मृत्यादिदर्शनाच्च संशयमाह—तस्या इति । तस्यैवोत्थानोक्त्या स्वापातिरेकसाधनेन त्वमर्थशोधनात्तस्य ब्रह्मैक्ययोग्यतया वाक्यीयज्ञानोपयोगितेति पादादिसंगतिः । पूर्वपक्षे ज्ञानवैयर्थ्यं सिद्धान्ते तस्यैवोत्थानादज्ञातब्रह्मात्मना सुप्तस्यावस्थानात्तदैक्यज्ञानादेव मुक्तेस्तदर्थत्वनियतिरित्यभिप्रेत्य नियामकानुपलब्ध्या पूर्वपक्षयति—तत्रेति । नियमसंभवे नानियमो युक्तिमानिति शङ्कते—कुत इति । नियमायोगं दृष्टान्तेन साधयति—यदेति । जलबिन्दोः सावयवत्वादवयवप्रसर्पणप्रणाडिकयैकत्वमापन्नस्य तस्यैव नोद्धरणम् । जीवस्य तु सोपाधित्वादुपाधेर्यावद्बन्धभावित्वादुद्धारसिद्धिरित्याशङ्क्योपाधिलयाभावे सत्संपत्त्यसिद्धेर्नैवमिति मत्वा दार्ष्टान्तिकमाह—तद्वदिति । नियामकायोगे फलितमाह—तस्मादिति । संभावनामात्रेणेश्वरो वेत्युक्तम् । अनिर्मोक्षपक्षे मोक्षः सुप्तस्येति ज्ञानवैयर्थ्यमिति वक्तुमितिशब्दः । पूर्वपक्षमनूद्य सिद्धान्तप्रतिज्ञामाह—एवमिति । ऐक्यावस्थायामवच्छेदाभावे तस्यैवोत्थानं नियन्तुमशक्यमिति शङ्कते—कस्मादिति । अवच्छेदकाविद्याशक्तिं सिद्धवत्कृत्य तस्यैवोत्थाने मानमाह—कर्मेति । षड्यागानामिव समुच्चितानामिह न हेतुत्वं किंतु प्रत्येकमित्याह—विभज्येति । तत्र कर्मशब्दोक्तं हेतुं विशदयति—कर्मेति ।

---

१ अ. ट. उतान्यो । २ ङ. अ. 'नस्तद्बु' । ३ क. ङ. ज. अ. ट. 'णे स' । ४ झ. 'रोऽन्यो । ५ ज. 'त एवं । ६ ख. ठ. ड. 'त्ति निग' । ७ ख. 'धिकत्वा' । ८ ठ. ढ. 'यमे प' ।

ष्ठानदर्शनात्तावत्स एवोत्थातुमर्हति नान्यः । तथाहि—पूर्वेद्युरनुष्ठितस्य कर्मणोऽपरेद्युः शेषमनुतिष्ठन्दृश्यते । न चान्येन सामिकृतस्य कर्मणोऽन्यः शेषक्रियायां प्रवर्तितुमुत्सहते । अतिप्रसङ्गात् । तस्मादेक एव पूर्वेद्युरपरेद्युश्चैकस्य कर्मणः कर्तेति गम्यते । इतश्च स एवोत्तिष्ठति यत्कारणमतीतेऽहन्यहमदोऽद्राक्षमिति पूर्वानुभूतस्य पश्चात्स्मरणमन्यस्योत्थाने नोपपद्यते । न ह्यन्यदृष्टमन्योऽनुस्मर्तुमर्हति । सोऽहमस्मीति चाऽऽत्मानुस्मरणमात्मान्तरोत्थाने नावकल्पते । शब्देभ्यश्च तस्यैवोत्थानमवगम्यते । तथाहि "पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव" [बृ० ४-३-१६] "सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति" [छा० ८-३-२] "त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति" [छा० ६-९-३] इत्येवमादयः शब्दाः स्वापप्रबोधाधिकारपठिता नाऽऽत्मान्तरोत्थाने सामञ्जस्यमीयुः ।

कर्मविद्याविधिभ्यश्चैवमेवावगम्यते । अन्यथा हि कर्मविद्याविधि-

---

शेषानुष्ठानदर्शनमेव प्रकटयति—तथाहीति । कथमेतावता तस्यैवोत्थानमित्याशङ्क्योक्तम्—न चेति । सामिकृतस्यार्धमनुष्ठितस्येति यावत् । एकस्यैव ज्योतिष्टोमादेरनेकयजमानकत्वापातादित्याह—अतिप्रसङ्गादिति । उक्तहेतुफलमुपसंहरति—तस्मादिति । अतः स एवोत्तिष्ठतीति शेषः । अनुस्मृतिं व्याकरोति—इतश्चेति । का पुनरुक्तानुस्मृतेरन्योत्थानेऽनुपपत्तिस्तत्राऽऽह—न हीति । अनुस्मृतिरित्यत्रानुशब्देन प्रत्यभिज्ञाऽपि सूचितेत्याह—सोऽहमिति । शब्दशब्दार्थमाह—शब्देभ्यश्चेति । अयनं गमनमायः प्रतिनियतं गमनं प्रतिन्यायः स यथा भवति तथा योनिं योनिं प्रत्यागच्छति स्वापानन्तरं जागरायेत्यर्थः । सुप्तानामुत्थानयोग्यत्वमापन्नमेतं न विन्दन्तीति सूचितम् । इहेति पूर्वप्रबोधोक्तिः । तदाभवन्तीति स्वापव्यवहितं जागरितमुच्यते ।

विधिपदं व्याचष्टे—कर्मेति । स एवोत्तिष्ठतीत्येतदेवमेवेत्युक्तम् । तदेव व्यतिरेकमुखेन(ण) विशदयति—अन्यथेति । विद्यानर्थक्यं व्यनक्ति—

---

१ ज. °नात्स° । २ क. ङ. ज. ञ. ट. °तुमर्हति । अ° । ३ ट. °द्युरेक° । ४ ङ. ञ. °व । इमाः स° ' ५ ज्ञ. 'हर्ब्रह्मलोकं गच्छ° । ६ ज. °तं न° । ७ क. ज. ज्ञ. ट. वा य° । ८ क. ङ. ञ. ट. °कारे प° । ९ ङ. ञ. ट. °मेव ।

(स्वप्नावस्थितस्यैव जीवस्य तस्मात्समुद्बोधो नापरस्य, अधि० ३)

धयोऽनर्थकाः स्युः। अन्योत्थानपक्षे हि सुप्तमात्रो मुच्यत[2] इत्यापद्येत। एवं चेत्स्याद्व[3]दं किं कालान्तरफलेन कर्मणा विद्यया वा कृतं स्यात्। अपि चान्योत्थानपक्षे यदि तावच्छरीरान्तरे व्यवहरमाणो जीव उत्तिष्ठ[4]त्तत्रत्यव्यवहारलोपप्रसङ्गः स्यात्। अथ तत्र सुप्त[5] उत्तिष्ठेत्कल्पनानर्थक्यं स्यात्। यो हि यस्मिञ्शरीरे सुप्तः स तस्मिन्नोत्तिष्ठत्यन्यस्मिञ्शरीरे सुप्तोऽन्यस्मिन्नुत्तिष्ठतीति कोऽस्यां कल्पनायां लाभः स्यात्। अथ मुक्त उत्तिष्ठेदन्तवान्मोक्ष आपद्येत। निवृत्ताविद्यस्य च पुनरुत्थानमनुपपन्नम्। एतेनेश्व[6]रस्योत्थानं प्रत्युक्तम्। नित्यनिवृत्ताविद्यत्वात्। अकृताभ्यागमकृतविप्रणाशौ[7] च दुर्निवारावन्योत्थानपक्षे स्याताम्। तस्मात्स एवोत्तिष्ठति नान्य इति। यत्पुनरुक्तं यथा जलराशौ प्रक्षिप्तो जलबिन्दुर्नोद्धर्तुं शक्यत एवं सति संपन्नो जीवो नोत्पतितुमर्हतीति, तत्परिहियते—युक्तं तत्र विवेककारणाभावाज्जलबिन्दोरनुद्धरणम्। इह विद्यते विवेककारणं कर्म

अन्येति। कर्मवैयर्थ्यमाह—एवं चेदिति। सुप्तमात्रस्य मुक्त्युपगमश्चेदित्यर्थः। अनुष्ठानकाले फलाभावात्कर्मणो ध्यानस्य च कालान्तरफलस्यान्योत्थानपक्षे वैयर्थ्यमित्यर्थः। विद्याऽत्र ध्यानम्। इतश्च नान्योत्थानमित्याह—अपि चेति। अन्योत्थाने सोऽन्यो जीवो वा स्यादीश्वरो वा। जीवश्चेद्बद्धो मुक्तो वा। बद्धोऽपि देहान्तरे व्यवहरमाणस्तत्र सुप्तो वेति विकल्प्याऽऽद्यमनूद्य प्रत्याह—अन्येति। द्वितीयमनूद्य दूषयति—अथेत्यादिना। विफलं गौरवमेव स्फोरयति—यो हीति। कल्पान्तरमनूद्य निरस्यति—अथेति। अन्तवत्त्वे का क्षतिस्तत्राऽऽह—निवृत्तेति। हेत्वभावादिति भावः। मुक्तस्य नोत्थानमित्युक्तन्यायेन कल्पान्तरं निराह—एतेनेति। तदीयस्वरूपापेक्षया हेतुमाह—नित्येति। प्रत्येकं सर्वपक्षेषु दोषमुक्त्वा साधारणं दोषमाह—अकृतेति। अन्योत्थाने पाश्चात्यप्रबोधकालीनसुखादेर्न पूर्वकर्मकार्यतेत्यकृतमागच्छेत्कृतं च सुप्तस्य मुक्तौ फलमदत्त्वैव नश्येदिति दोषद्वयमित्यर्थः। अन्योत्थानायोगे फलितमाह—तस्मादिति। पूर्वपक्षबीजमनुवदति—यदिति। दृष्टान्तवैषम्योक्त्या प्रत्याह—तदित्यादिना। नास्माभिरेवान्यैरपि दुर्विवेचनत्वं तुल्यमि-

---

१ ङ. अ. सुषुप्त°। २ ङ. अ. मुच्येतेत्या°। ३ क. किं तदा वा°। ४ ङ. अ. °त्तत्रत्व°। ५ ज. सुषुप्त। ६ ङ. अ. °श्वरोत्था°। ७ झ. °शौ दुर्वारा°।

(मूर्छाया जाग्रदाद्यवस्थान्तरभिन्नत्वम्, अधि० ४)

चाविद्या चेति वैषम्यम्। दृश्यते च दुर्विवेचयोरप्यस्मज्जातीयैः क्षीरोदकयोः संसृष्टयोर्हंसेन विवेचनम्। अपि च न जीवो नाम कश्चित्परस्मादन्यो विद्यते यो जलबिन्दुरिव जलराशेः सतो विविच्येत। सदेव तूपाधिसंपर्काज्जीव इत्युपचर्यत इत्यसकृत्प्रपञ्चितम्। एवं सति यावदेकोपाधिगता बन्धानुवृत्तिस्तावदेकजीवव्यवहारः। उपाध्यन्तरगतायां तु बन्धानुवृत्तौ जीवान्तरव्यवहारः। स एवायमुपाधिः स्वापप्रबोधयोर्बीजाङ्कुरन्यायेनेत्यतः स एव जीवः प्रतिबुध्यत इत्युक्तम् ॥ ९ ॥ (३)

(मूर्छाया जाग्रदाद्यवस्थान्तरभिन्नत्वम्, अधि० ४)

सू मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥ (४)

अस्ति मुग्धो नाम यं मूर्छित इति लौकिकाः कथयन्ति। स तु किमवस्थ इति परीक्षायामुच्यते—तिस्रस्तावदवस्थाः शरीरस्थस्य जीवस्य प्रसिद्धा जागरितं स्वप्नः सुषुप्तमिति। चतुर्थी शरीरा-

---

त्याशङ्क्याऽऽह—दृश्यते चेति। प्रकारान्तरेण दृष्टान्तवैषम्यमाह—अपि चेति। कस्तर्हि जीवस्तत्राऽऽह—सदेवेति। सत एवोपाधिना जीवत्वे नानाजीववादोऽपि प्रत्युक्त इत्याह—एवमिति। उक्तमेव व्यतिरेकद्वारोपपादयति—उपाध्यन्तरेति। उपाधिभेदमुपेत्य तत्र तत्र जीवभेदो गम्यतामित्याशङ्क्य बीजाङ्कुरवद्व्यक्ताव्यक्तात्मनैकस्यैवोपाधेः स्थितेर्नैवमित्याह—स एवेति। सुप्तस्यैवोत्थानादज्ञातब्रह्मणा तदवस्थानं सिद्धमित्युपसंहरति—इत्यत इति ॥ ९ ॥ (३)

अवस्थात्रयमुक्त्वा मूर्छाख्यमवस्थान्तरं दर्शयति—मुग्ध इति। विषयमाह—अस्तीति। प्रामाणिकस्य विषयत्वात्तस्य लोकसिद्धतामाह—यमिति। स किं जागराद्यवस्थानामन्यतमावस्थान्तर्गतः किं वाऽवस्थान्तरगत इत्यवस्थाचतुष्टयप्रसिद्धिनियमवैलक्षण्याभ्यां संदेहे प्रत्यभिज्ञया स एवोत्तिष्ठतीत्युक्तेर्विशेषज्ञानाभावाद्विशेषैक्यप्रत्यभिज्ञानान्मुग्धिः सुप्तिरेवेति पूर्वपक्षयति—स त्विति। अत्र मुग्धेरवस्थान्तरत्वोक्त्या ततो विभक्ते त्वमर्थे शोधिते तस्य वाक्यार्थान्वयिनस्तद्धीहेतुत्वात्पादादिसंगतिः। पूर्वपक्षे मूर्छातिरेकार्थं पृथङ्न प्रयतितव्यम्। सिद्धान्ते पृथक्प्रयत्नमौच्यमिति मत्वा पूर्वपक्षं विवृणोति—तिस्रस्तावदिति। शरीरस्थस्येतिविशेषणसिद्धमवस्थान्तरमाह—चतुर्थीति। मूर्छाऽपि चिरोच्छ्वासवेपथुप्रभृतिधर्मभेदादवस्थान्तरमि-

---

१ ङ. म. चनयो। २ ङ म. स्मादात्मनोऽन्यो। ३ घ. ङ. ज. झ. ट. इति युक्तं। ४ ज. शारीरस्य। ५ ख. ठ. ड. 'त्र जी'। ६ ङ. 'छ्वास। ७ क. ठ. ड. 'शेषणै'। ८ क. ख. ठ. ड. विविक्ते।

(मूर्छाया जाग्रदाद्यवस्थान्तरभिन्नत्वम्, अधि० ४)

दपसृप्तिः। न तु पञ्चमी काचिदवस्था जीवस्य श्रुतौ स्मृतौ वा प्रसिद्धाऽस्ति। तस्माच्चतसृणामेवावस्थानामन्यतमाऽवस्था मूर्छेत्येवं प्राप्ते ब्रूमः—

न तावन्मुग्धो जागरितावस्थो भवितुमर्हति न ह्ययमिन्द्रियैर्विषयानीक्षते। स्यादेतत्। इषुकारन्यायेन मुग्धो भविष्यति। यथेषुकारो जाग्रदपीष्वासक्तमनस्तया नान्यान्विषयानीक्षत एवं मुग्धो मुसलसंपातादिजनितदुःखानुभवव्यग्रमनस्तयो जाग्रदपि नान्यान्विषयानीक्षत इति। न। अचेतयमानत्वात्। इषुकारो हि व्यापृतमना ब्रवीतीषुमेवाहमेतावन्तं कालमुपलभमानोऽभूवमिति। मुग्धस्तु लब्धसंज्ञो ब्रवीत्यन्धे तमस्यहमेतावन्तं कालं प्रक्षिप्तोऽभूवं न किंचिन्मया चेतितमिति। जाग्रतश्चैकविषयविषक्तचेतसोऽपि देहो विधियते। मुग्धस्य तु देहो धरण्यां पतति। तस्मान्न जागर्ति नापि स्वप्नान्पश्यति निःसंज्ञकत्वात्। नापि मृतः प्राणोष्मणोर्भावात्। मुग्धे हि जन्तौ मृतोऽयं स्यान्न वा मृत इति संशयाना ऊष्माऽस्ति नास्तीति हृदयदेशमाल-

---

त्याशङ्क्य सुप्तेरेवावान्तरभेदादेवंविधत्वसिद्धेर्न धर्मिभेदकल्पनेत्याह—न त्विति। अवस्थान्तरस्याप्रसिद्धत्वे सुषुप्त्यन्तर्भावं मूर्छाया मत्वा नियमयति—तस्मादिति। तथा च तद्व्यतिरेकार्थं पृथङ्न प्रयतितव्यमिति फलितमितिशब्दार्थः।

पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति। परिशेषादित्यस्यार्थं परिशेषं दर्शयितुमारभते—न तावदिति। जाग्रदवस्थो हीन्द्रियैरर्थानुपलभते मुग्धो नैवमिति वैषम्यं हेतुमाह—न हीति। जाग्रदवस्थस्यैव मुग्धस्यार्थानुपलम्भो दुःखानुभवव्यग्रतया स्यादिति दृष्टान्तेन शङ्कते—स्यादिति। इषुकारन्यायं प्रपञ्चयति—यथेत्यादिना। वैषम्योक्त्या प्रत्याह—नेत्यादिना। मुग्धस्य जागरितावस्थत्वाभावे हेत्वन्तरमाह—जाग्रतश्चेति। देहधारणाभावाद्विषयमात्रानुपलब्धेश्च मुग्धो जाग्रदवस्थो नेति निगमयति—तस्मादिति। अस्तु तर्हि तस्य स्वप्नावस्थत्वं नेत्याह—नापीति। तर्हि तस्य मृतावस्थत्वं नेत्याह—नापीति। पूर्ववत्प्राणोष्माणौ मुग्धे न सिद्धौ तत्कुतोऽस्य मृतादन्यत्वं तत्राऽऽह—मुग्धे हीति। ऊष्माऽस्ति नेति संशय्यान्यतरनिश्चयार्थं हृदयदे-

---

१ ज. °णामव°। २ क. °र्हतीति। ३ ङ. झ. ञ. ट. मुशल°। ४ ज. ट. °लघाता°। ५ ट. °या ना°। ६ झ. ट. °रो व्या°। ७ क. °मस्येता°। ८ ङ. ञ. षयासक्त°। ९ ज. ठ. °हो प्रि°। १० ट. °स्य दे°। ११ क. ङ. ज. झ. °ज्ञत्वा°। १२ क. नियमयति। १३ झ. °तव्यं फ°।

(मूर्छाया जाग्रदाद्यवस्थान्तराभिन्नत्वम्, अधि० ४)

भन्ते निश्चयार्थं प्राणोऽस्ति नास्तीति च नासिकादेशम्। यदि प्राणोष्मणोरास्तित्वं नावगच्छन्ति ततो मृतोऽयमित्यध्यवसाय दहनायारण्यं नयन्ति। अथ तु प्राणमूष्माणं वा प्रतिपद्यन्ते ततो नायं मृत इत्यध्यवसाय संज्ञालाभाय भिषज्यन्ति। पुनरुत्थानाच्च न दिष्टं गतः। न हि यमराष्ट्रात्प्रत्यागच्छति। अस्तु तर्हि सुषुप्तो निःसंज्ञत्वादमृतत्वाच्च। न। वैलक्षण्यात्। मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सत्वेपथुरस्य देहो भवति भयानकं च वदनं विस्फारिते नेत्रे। सुषुप्तस्तु प्रसन्नवदनस्तुल्यकालं पुनः पुनरुच्छ्वसिति निमीलिते अस्य नेत्रे भवतः। न चास्य देहो वेपते। पाणिपेषेणमात्रेण च सुषुप्तमुत्थापयन्ति न तु मुग्धं मुद्गरघातेनापि। निमित्तभेदश्च भवति मोहस्वापयोः। मुसलसंपातादिनिमित्तत्वान्मोहस्य श्रमनिमित्तत्वाच्च स्वापस्य। न च लोकेऽस्ति प्रसिद्धिर्मुग्धः सुप्त इति। "परिशेषादर्धसंपत्तिः" मुग्धतेत्यवगच्छामः। निःसंज्ञत्वात्संपन्न इतरस्माद्वैलक्षण्यादसंपन्न इति।

शमालभन्ते स्पृशन्तीति यावत्। प्राणोऽस्ति नेति च संदिह्यान्यतरार्थं नासिकादेशमालभन्त इति संबन्धः। नास्तित्वनिश्चयफलमाह—यदीति। परस्य पराध्यवसायगोचरो नेत्याशङ्क्य कार्यलिङ्गकमनुमानमाह—दहनायेति। अस्तित्वनिश्चयफलमाह—अथ त्विति। तत्रापि कार्यलिङ्गकमनुमानमाह—संज्ञेति। मुग्धस्य मृतत्वाभावे हेत्वन्तरमाह—पुनरिति। यमराज्यं प्रविष्टस्यापि पुनरुत्थानं किं न स्यात्तत्राऽऽह—न हीति। परिशेषसिद्धं मुग्धस्य स्वापावस्थत्वमित्याह—अस्त्विति। तत्र सालक्षण्यं हेतुमाह—निःसंज्ञत्वादिति। उक्तसालक्षण्येऽपि लक्षणनिमित्तफलानां भेदान्नैक्यमित्याह—नेत्यादिना। लक्षणं लक्षणभेदं विवृणोति—मुग्ध इति। निमित्तभेदमुदाहरति—निमित्तेति। आदिपदेनोभयत्रापि ज्वरादि गृह्यते। श्रमापनयार्था ब्रह्मसंपत्तिः सुषुप्तिः। देहत्यागार्था तत्संपत्तिर्मोहः। सति मोहे मरणाभावेऽपि तस्मिन्नसति तदभावादिति फलभेदं मत्वा मोहस्वापयोरैक्ये मानाभावमाह—न चेति। परिशेषायातमर्थमाह—परीति। साम्यवैलक्षण्याभ्यामर्धसंपत्तिं साधयति—निःसंज्ञत्वादिति।

---

१ क. ट. 'रितने'। २ क. 'षमा'। ३ क ज. सुप्त'। ४ ज. 'रपाते'। ५ क. ज. श्रमादिनि'। ६ ङ. ञ. ट. 'ज्ञकत्वा'। ७ क. ख. ठ. 'रस्परा'। ८ ठ. ड. 'दिनो'। ९. क. 'नयनार्था'। १० क. ख. ठ. ड. सुप्तिः। ११ क. तद्भावा'।

(मूर्छाया जाग्रदाद्यवस्थान्तरभिन्नत्वम्, अधि० ४)

कथं पुनरर्धसंपत्तिर्मुग्धतेति शक्यते वक्तुम् । यावता सुप्तं प्रति तावदुक्तं श्रुत्या "सता सोम्य तदा संपन्नो भवति" [छा० ६·८·१] इति "अत्र स्तेनोऽस्तेनो भवति" [बृ० ४·३·२२] "नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतम्" [छा० ८·४·१] इत्यादि । जीवे हि सुकृतदुष्कृतयोः प्राप्तिः सुखित्वदुःखित्वप्रत्ययोत्पादनेन भवति। न च सुखित्वप्रत्ययो दुःखित्वप्रत्ययो वा सुषुप्ते विद्यते मुग्धेऽपि तौ प्रत्ययौ नैव विद्येते । तस्मादुपाध्युपशमात्सुषुप्तवन्मुग्धेऽपि कृत्स्नसंपत्तिरेव भवितुमर्हति नार्धसंपत्तिरिति । अत्रोच्यते—न ब्रूमो मुग्धेऽर्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति। किं तर्ह्यर्धेन सुषुप्तपक्षस्य भवति मुग्धत्वमर्धेनावस्थान्तरपक्षस्येति ब्रूमः । दर्शिते च मोहस्य स्वापेन साम्यवैषम्ये । द्वारं चैतन्मरणस्य । यदाऽस्य सावशेषं कर्म भवति तदा वाङ्मनसे

अर्धसंपत्तिमाक्षिपति—**कथमिति** । काऽनुपपत्तिरित्याशङ्क्य मुग्धस्यार्धसंपत्त्यभावं साधयितुं सुप्तेन साम्यं कर्मतत्फललेशाभावेन कथयति—**यावतेति** । यत्सुप्तं प्रति सत्संपन्नत्वं श्रुतं तदुपाध्युपरमाभिप्रायं स चोपाध्युपरमो मुग्धस्यापीति कृत्स्नसंपत्तिरेवेति भावः । कर्मसंबन्धस्य यावद्बन्धभावित्वात्सुप्तस्य कर्मराहित्यमसिद्धमित्याशङ्क्य तत्कार्यसुखदुःखधीराहित्यात्तद्धेतुकर्मराहित्यं कल्प्यमित्याह—**जीवे हीति** । सुप्तस्य सुखानुभवात्तदविनाभूतो दुःखानुभवोऽपि कल्प्यतामित्याशङ्क्य स्वप्रकाशस्वरूपसुखानुभवव्यतिरेकेण कर्मोत्थानुकूलप्रतिकूलार्थधीजन्यौ प्रत्ययावसंभाविनावित्याह—**न चेति** । सुप्तस्य कर्मफलवैकल्येऽपि मुग्धस्य किं सिद्धं तत्राऽऽह—**मुग्धेऽपीति** । सुखादिधीराहित्यकल्पितकर्मराहित्येन संपूर्णा सत्संपत्तिर्मुग्धेऽपीति निगमयति—**तस्मादिति** । ब्रह्मसंपत्त्यविशेषेऽपि सुप्तिमूर्छयोर्भेदोऽस्तीत्याह—**अत्रेति** । यत्तु मूर्छायां जीवस्य ब्रह्मणा नार्धसंपत्तिरिति दर्शितं तदङ्गी करोति—**नेत्यादिना** । तर्हि किमपेक्षयाऽर्धसंपत्तिस्तत्राऽऽह—**किमिति** । अर्धेनाऽऽदीयमानेन निःसंज्ञत्वेनेति यावत् । परित्यज्यमानेन चार्धेन प्रसन्नवदनत्वादिनेत्यर्थः । अवस्थान्तरं मरणम् । उपनेयापनेयार्धाभ्यामुभयपक्षत्वं कथं मुग्धे सिद्धं तत्राऽऽह—**दर्शिते चेति** । तथाऽपि कथमस्यामरणपक्षत्वं तत्राऽऽह—**द्वारं चेति** । मुग्धत्वं मरणस्य द्वारं चेत्तस्मिन्सति स्यादेवेत्याशङ्क्याऽऽह—**यदेति** । कर्मणः सावशेषत्वे गमकमाह—**तदेति** । तर्हि

---

१ क. ज. ट न सु । २ क. ब्रह्मणो । ३ क. °त्सुषुप्त । ४ ख. ठ. ड. °भूतदुः । ५ ख. °पि विक° । ६ ठ. ड. °वितावि° । ७ ख. ठ. ड. °र्छावस्थायां ।

(ब्रह्मणो निरूपभावस्य वेदान्तसंमतत्वम्, जधि० १)

प्रत्यागच्छतः। यदा तु निरवशेषं कर्म भवति तदा प्राणोष्माणावपगच्छतः। तस्मादर्धसंपत्तिं ब्रह्मविद इच्छन्ति। यत्तूक्तं न पञ्चमी काचिदवस्था प्रसिद्धाऽस्तीति। नैष दोषः। कादाचित्कीयमवस्थेति न प्रसिद्धा स्यात्। प्रसिद्धा चैषा लोकायुर्वेदयोः। अर्धसंपत्त्यभ्युपगमाच्च न पञ्चमी गण्यत इत्यनवद्यम् ॥१०॥(४)

(ब्रह्मणो निरूपभावस्य वेदान्तसंमतत्वम्, अधि० ५)

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

येन ब्रह्मणा सुषुप्त्यादिषु जीव उपाध्युपशमात्संपद्यते तस्येदानीं स्वरूपं श्रुतिवशेन निर्धार्यते। सन्त्युभयलिङ्गाः श्रुतयो ब्रह्मविषयाः " सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः " [छा० ३-१४-२] इत्येवमाद्याः सविशेषलिङ्गाः। " अस्थूलमनण्वह्रस्वमदीर्घम् " [बृ० ३-८-८] इत्येवमाद्याश्च निर्विशेषलिङ्गाः।

कुतो द्वारत्वं मरणं प्रति मोहस्योक्तं तत्राऽऽह—यदा त्विति। कर्मणो निःशेषत्वे[1] प्रयोजकमाह—तदेति। साम्यवैषम्याभ्यां सिद्धमुपसंहरति—तस्मादिति। अवस्थान्तरमप्रसिद्धत्वान्नेत्युक्तमनुवदति—यत्त्विति। जीवदवस्थायां सर्वजीवसाधारण्याभावादप्रसिद्धिर्न त्वभेदादित्याह—नेत्यादिना। इदानीमप्रसिद्धिरपि नास्तीत्याह—प्रसिद्धा चेति। आयुर्वेदो वैद्यशास्त्रम्। कथमन्यथा मुसलपातादिना मुग्धं बन्धुमुपलभ्य तदीयसंज्ञालाभार्थं तदीयपितृप्रभृतयश्चिकित्साशास्त्रकुशलमन्विष्यानुगच्छेयुरिति भावः। कस्मात्तर्हि पञ्चमतया मुग्धिर्न गण्यते तत्राऽऽह—अर्धेति। निःसंज्ञत्वमप्रसन्नवदनतेत्यादिना सुप्तिमरणान्तर्भावविधया पञ्चमतया मूर्छा नोक्तेत्यर्थः। उक्तवैषम्यादनन्तर्भावविधया पृथगुक्तिरपि स्यादित्याशङ्क्यानन्तर्भावेऽपि सर्वसाधारणत्वाभावान्नैवमिति मत्वा त्वमर्थशोधनमुपसंहरति—इत्यनवद्यमिति ॥१०॥ (४)

स्वप्नाद्यवस्थोक्त्या तद्व्यतिरिक्तं स्वप्रकाशं ब्रह्मात्मकं सदैकरूपं त्वमर्थमुद्देश्यं परिशोध्येदानीं विधेयतदर्थशोधनमारभमाणस्तस्य तावन्निर्विशेषत्वमाह—नेत्यादिना। संगतिमाह—येनेति। ब्रह्मस्वरूपस्यासकृदुक्तत्वात्किमनेनाऽऽरम्भेणेत्याशङ्क्य श्रुतिषु दृष्टविवादनिरासेन तन्निर्णयार्थमित्याह—श्रुतीति। विषयोक्तिपूर्वकं संशयबीजमाह—सन्तीति। सविशेषत्वं निर्विशेषत्वं चोभयं लिङ्ग्यते प्रकाश्यते याभिः श्रुतिभिस्ता[2]स्तथा। तत्र सविशेषब्रह्मश्रुतीरुदाहरति—सर्वेति। चकारेणोक्तार्थाः श्रुतयोऽन्याः सर्वज्ञः स सर्ववित्यादयः समुच्चिताः। सविशेषं ब्रह्म लिङ्ग्यते याभिस्ताः श्रुतयस्तथा। निर्विशेषब्रह्मश्रुती[3]रुदाहरति—अस्थूलमिति। यत्तदद्रेश्यमदृश्येऽनात्म्ये

---

१ ग. गम्यत। २ ख. ठ, ड. 'त्वे प्रापक'। ३ क. ख. झ, मुशल'। ४ ठ. ड. 'तीराह। अ'।

(ब्रह्मणो निरूपभावस्य वेदान्तसंमतत्वम्, अधि० ५)

किमासु श्रुतिषूभयलिङ्गं ब्रह्म प्रतिपत्तव्यमुतान्यतरलिङ्गम् । यदाऽन्यतरलिङ्गं तदाऽपि सविशेषमुत निर्विशेषमिति मीमांस्यते। तत्रोभयलिङ्गश्रुत्यनुग्रहादुभयलिङ्गमेव ब्रह्मेत्येवं प्राप्ते ब्रूमः—न तावत्स्वत एव परस्य ब्रह्मण उभयलिङ्गत्वमुपपद्यते । न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं चेत्यभ्युपगन्तुं शक्यं विरोधात् । अस्तु तर्हि " स्थानतः " पृथिव्याद्युपाधियोगादिति । तदपि नोपपद्यते । न ह्युपाधियोगादप्यन्याद्-

---

नेति नेत्याद्याः श्रुतयश्चकारेण गृह्यन्ते । निर्विशेषं ब्रह्म लिङ्ग्यते याभिस्ताः श्रुतयस्तथेति । पूर्ववत्सविषयं संशयबीजमुक्त्वा संशयमाह—**किमिति** । उभयं सविशेषत्वं निर्विशेषत्वं च लिङ्ग्यते यस्मिन्ब्रह्मणि तत्तथेति यावत् । उभयत्र श्रुत्यनुग्रहादेकत्रोभयोर्विरोधान्नाऽऽद्यो विकल्पः । सविशेषत्वं निर्विशेषत्वं वाऽन्यतरद्यत्र लिङ्ग्यते तद्ब्रह्म तथेत्येतत् । परस्य परिणामित्वकूटस्थत्वाभ्यां द्वितीयं विकल्पयति—**यदेति** । अत्र निर्विशेषस्य तदर्थस्य ब्रह्मणो निरूपणे तस्य वाक्यार्थान्वयितया तद्धीहेतुत्वलाभात्पादादिसंगतिः । पूर्वपक्षे द्विरूपं ब्रह्म ध्येयं सिद्धान्ते तु निर्विशेषमेव तज्ज्ञेयमित्यभिप्रेत्य पूर्वपक्षयति—**तत्रेति** । उभयविधत्वं विकृताविकृतब्रह्मापेक्षया वा स्थितिप्रलयकालभेदेन वा कार्यकारणब्रह्मभेदेन वा कारणाकारणब्रह्मभेदेन वा न व्यवस्थापयितुं शक्यं ब्रह्मद्वयाभावात् । तत्कथमेकस्य विरुद्धोभयरूपतेत्याशङ्क्याऽऽह—**उभयेति** । न च निर्विशेषब्रह्मप्रकरणस्थशब्दानां निषेध्यार्पणेन निषेधवाक्यैकवाक्यतया सप्रपञ्चात्पर्यान्न सविशेषधीरिति वाच्यम् । उपास्तिप्रकरणस्थैसप्रपञ्चवाक्यान्तरैः स्वशेषिविधिविरोधशून्यतया स्वार्थे प्रमाणैः सप्रपञ्चतासिद्धेर्निषेधवाक्यविरोधेऽपि तेषां स्वशेषिवाक्याविरुद्धत्वात्प्रामाण्योपपत्तेरिति भावः । उभयरूपं ब्रह्म ध्येयमिति पूर्वपक्षमनूद्य सिद्धान्तसूत्रमादत्ते—**एवमिति** । उभयलिङ्गत्वं ब्रह्मणः स्वाभाविकमाहो परोपाधिकमाद्यं प्रत्याह—**न तावदिति** । अनुपपत्तिं स्फुटयति—**न हीति** । द्वितीयं शङ्कते—**अस्त्विति** । स्थानत इति व्याचष्टे—**पृथिव्यादीति** । स्थानमुपाधिस्तद्योगादिति यावत् । औपाधिकत्वेऽपि सत्यत्वमग्निसंपर्कजन्यलौहित्यवदिति भावः । उपाधिवशादाविद्योभयलिङ्गत्वयोगेऽपि न तात्त्विकमुभयलिङ्गत्वं कूटस्थस्य ब्रह्मणो वास्तवरूपान्तरायोगादित्याह—**तदपीति** । उक्तमेव दृष्टान्तेन स्पष्टयति—

---

१ क. ङ. ज. ञ. 'दाऽप्यन्य'। २ क. ज. प्राप्त इदमुच्यते । न । ३ क. ह्येकव'। ४ क. ज. 'त्यवधारयितुं श'। ५ ठ. ङ. 'धाच्चाऽऽद्यो कल्पो स'। ६ ख. ठ. ङ. 'न्न वि'। ७ ङ. 'स्थप्र'। ८ ठ. ङ. 'रोधिशू'। ९ ठ. ङ. सत्त्वम'।

शस्य वस्तुनोऽन्यादृशः स्वभावः संभवति । न हि स्वच्छः सन्स्फटिकोऽलक्तकाद्युपाधियोगादस्वच्छो भवति भ्रममात्रत्वादस्वच्छ[1]ताभिनिवेशस्य । उपाधीनां चाविद्याप्रत्युपस्थापितत्वात् । अतश्चान्यतरलिङ्गपरिग्रहेऽपि समस्तविशेषरहितं निर्विकल्प[2]कमेव ब्रह्म प्रतिपत्तव्यं न तद्विपरीतम् । " सर्वत्र हि ब्रह्मस्वरूपप्रतिपादनपरेषु वाक्येषु " अशब्दमस्पर्शमरूपमव्ययम् " [कठ० ३-१५ नृसिं० त्तरता० ९ मुक्ति० २-७२] इत्येवमादिष्वपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यते ॥ ११ ॥

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

अथापि स्याद्यदुक्तं निर्विकल्प[3]मेकलिङ्गमेव ब्रह्म नास्य स्वतः स्थानतो वोभयलिङ्गत्वमस्तीति । तन्नोपपद्यते । कस्मात् । "भेदात्" । भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उपदिश्यन्ते चतुष्पाद्ब्रह्म षोडशकलं ब्रह्म वामनीत्वादिलक्षणं ब्रह्म त्रैलो[5]क्यशरीरवैश्वानरशब्दोदितं ब्रह्मेत्येवंजातीयकाः । तस्मात्सविशेषत्वमपि ब्रह्म[6]णोऽभ्युपगन्तव्यम् । ननूक्तं नोभयलिङ्गत्वं

न हीति । आलक्तकाद्युपाधिघटिते स्फटिकादावस्वच्छताधीस्तर्हि कथं तत्राऽऽह—भ्रमेति । स्वरसधवलस्य स्फटिकादेरुपाधितो दृष्टोऽरुणिमा न वास्तवः संयुक्तोपाधेरेवारुणतया भानादित्यर्थः । उपाधेरमिथ्यात्वेऽपि तत्कृतं मिथ्येत्युक्तम् । इदानीं तस्यापि मिथ्यात्वात्तन्मिथ्येति किं वक्तव्यमित्याह—उपाधीनामिति । उभयरूपत्वं तत्त्वतो ब्रह्मणो न चेत्तर्हि सविशेषत्वमेव नानाश्रुतिवशादिष्यतामित्याशङ्क्याऽऽह—अतश्चेति । सर्वस्य विशेषस्याविद्याकृतत्वादेवेति यावत् । तत्र हेतुत्वेन सूत्रावयवं व्याचष्टे—सर्वत्रेति ॥ ११ ॥

न स्थानतोऽपीत्यादिनोक्तमाक्षिप्य समाधत्ते—नेत्यादिना । निषेध्यमनूद्य निषेद्धुं नञर्थमाह—अथापीति । श्रुतिभिर्ब्रह्मणो निर्विशेषत्वे मितेऽपीति यावत् । श्रौतस्य नासिद्धिरिति शङ्कते—कस्मादिति । श्रुत्यन्तरविरोधात्तदसिद्धिरिति सूत्रावयवेनाऽऽह—भेदादिति । तदेव विभजते—भिन्ना हीति । तादृगाकारोपदेशस्य फलमाह—तस्मादिति । निर्विशेषत्ववादित्यपेरर्थः । उक्तविरोधं स्मारयति—नन्विति । औपा-

---

१ क. ज. 'च्छत्वाभि' । २ ज. 'कल्पैकलिङ्गमे' । ३ क. 'ल्पमे' । ४ ङ. ञ. ट. 'ल्पकमे' । ५ क. ज. झ. ट. 'रीरं वै' । ६ झ. 'ह्मणो ह्यप' । ७ क. ख. ङ. 'ति । अत' ।

(ब्रह्मणो नीरूपभावस्य वेदान्तसंमतत्वम्, अधि० ५)

ब्रह्मणः संभवतीति। अयमप्यविरोधः। उपाधिकृतत्वादाकारभेदस्य। अन्यथा हि निर्विषयमेव भेदशास्त्रं प्रसज्येतेति चेत्। नेति ब्रूमः। कस्मात् "प्रत्येकमतद्वचनात्"। प्रत्युपाधिभेदं ह्यभेदमेव ब्रह्मणः श्रावयति शास्त्रम् "यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा" [बृ०२-५-१] इत्यादि। अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुम्। भेदस्योपासनार्थत्वादभेदे तात्पर्यात्॥ १२॥

अपि चैवमेके॥ १३॥

अपि चैवं भेददर्शननिन्दापूर्वकमभेददर्शनमेवैके शाखिनः समामनन्ति "मनसैवेदमाप्तव्यं नेह नानाऽस्ति किंचन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" [कठ० ४-११] इति। तथाऽन्येपि "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मे तत्" [श्वेता० १-१२] इति समस्तस्य भोग्यभोक्तृनियन्तृलक्षणस्य प्रपञ्चस्य ब्रह्मैकस्वभावतामधीयते॥ १३॥

कथं पुनराकारवदुपदेशिनीष्वनाकारोपदेशिनीषु च ब्रह्मविष-

धिकमाकारभेदमादाय प्रत्याह—अयमपीति। उभयरूपत्वस्वीकारेण विरोधसमाधिवदित्यपेरर्थः। आकारभेदो नोपाधितोऽपीत्युक्तमित्याशङ्क्याऽऽह—अन्यथेति। रूपभेदवादिशास्त्रप्रामाण्यार्थमौपाधिकस्तद्भेदो वक्तव्य इत्यर्थः। किमुपाधिगत एव रूपभेदो ब्रह्मण्युपवर्ण्यते किं वोपाधिमनिषेत्तत्त्वत एव ब्रह्मणोऽपि भेदो जायते। प्रथमे ब्रह्मणो नोभयरूपतेत्यभिप्रेत्याऽऽह—नेतीति। आकाङ्क्षापूर्वकं हेतुमवतार्य व्याकुर्वन्द्वितीये श्रुत्यन्तरविरोधमाह—कस्मादित्यादिना। फलद्वयफलमाह—अतश्चेति॥ १२॥

भेददर्शननिन्दया भेदोक्तेरपि न तात्त्विको भेदः शास्त्रीयोऽस्तीत्याह—अपि चेति। सूत्रं व्याकरोति—अपि चेत्यादिना। भोक्ता जीवो भोग्यं शब्दादि तदुभयं प्रेर्यं प्रेरितारं च नियन्तारमीश्वरं मत्वा विचार्य तत्सर्वं त्रिविधं मे मम प्रोक्तं ब्रह्मैवेति जानीयादित्यर्थः। उक्तवाक्यार्थमाह—समस्तस्येति॥ १३॥

उत्तरसूत्रव्यावर्त्यां शङ्कामाह—कथमिति। श्रुतीनां तुल्यत्वाद्ब्रह्मणो निर्विशेषत्वे

---

१ ङ. ञ. ट. कुतः। २ क. ज. °म्। अ°। ३ झ. ट °दभे°। ४ क. ज. मृत्युं गच्छति क. ज. ट. भोज्यं। ६ ज. ट. भोज्यभो°।

यासु श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति। अत उत्तरं पठति—

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं न रूपादिमत्। कस्मात्। "तत्प्रधानत्वात्"। "अस्थूलमनण्वह्रस्वमदीर्घम्" [बृ० ३-८-८] "अशब्दमस्पर्शमरूपमव्ययम्" [कठ० ३-१५] "आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" [छा० ८-१४-१] "दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः" [मुण्ड० २-१-२] "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः" [बृ० २-५-१९] इत्येवमादीनि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानीत्येतत्प्रतिष्ठापितम् "तत्तु समन्वयात्" [ब्र० सू० १-१-४] इत्यत्र। तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यम्। इतराणि त्वाकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि। उपासनाविधिप्रधानानि हि तानि तेष्वसति विरोधे यथाश्रुतमाश्रयितव्यम्। सति तु विरोधे तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्तीति। एष विनिगमनायां हेतुः, येनोभयीष्वपि श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति ॥ १४ ॥

नियामकं नास्तीत्यर्थः। तत्परात्परविरोधे तत्परं बलवदिति न्यायं नियामकं वदन्ननन्तरसूत्रमवतारयति—अत इति। तत्र प्रतिज्ञां विभजते—रूपादीति। प्रश्नद्वारा नियामकमुक्त्वा विवृणोति—कस्मादित्यादिना। एतेषामपि तत्प्रधानत्वमुपपादयति—विशेषत्वादसिद्धमित्याशङ्क्याऽऽह—इत्येतदिति। समन्वयाधिकरणमुपजीव्य फलितमाह—तस्मादिति। सप्रपञ्चवाक्यानामपि तुल्यं तत्प्रधानत्वमित्याशङ्क्याऽऽह—इतराणीति। तेषां वस्तुपरत्वाभावे हेतुमाह—उपासनेति। तेषामपि स्वशेष्यविरोधादुक्ता स्वार्थे मानतेत्याशङ्क्य पर्णमयीवाक्यवन्मानान्तरविरोधान्नैवमित्याह—तेष्विति। विरोधस्य तुल्यत्वात्कुतो निर्धारणेत्याशङ्क्याऽऽह—सतीति। उक्तहेतुकृतां विनिगमनामेवाभिनयति—येनेति ॥ १४ ॥

---

१ क. ङ. ञ. °व हि ब्रं°। २ क. °द्ब्रह्मेति। दि°। ३ क. °सनवि°। ४ क. ज. झ. ट. °वन्ति। ए°। ५ झ. न्यायनि°। ६ क. ख. °कं सूत्रं व°।

(ब्रह्मणो नीरूपभावस्य वेदान्तसंमतत्वम् , अधि० ५)

का तर्ह्याकारवद्विषयाणां श्रुतीनां गतिरित्यत आह—

प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

यथा प्रकाशः सौरश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसंबन्धात्तेष्वृजुवक्रादिभावं प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यते, एवं ब्रह्मापि पृथिव्याद्युपाधिसंबन्धात्तदाकारतामिव प्रतिपद्यते तदालम्बनो ब्रह्मण आकारविशेषोपदेश उपासनार्थो न विरुध्यते। एवमवैयर्थ्यमाकारवद्ब्रह्मविषयाणामपि वाक्यानां भविष्यति । न हि वेदवाक्यानां कस्यचिदर्थवत्त्वं कस्यचिदनर्थवत्त्वमिति युक्तं प्रतिपत्तुं प्रमाणत्वाविशेषात् । नन्वेवमपि यत्पुरस्तात्प्रतिज्ञातं नोपाधियोगादप्युभयलिङ्गत्वं ब्रह्मणोऽस्तीति तद्विरुध्यते। नेति ब्रूमः। उपाधिनिमित्तस्य वस्तुधर्मत्वानुपपत्तेः। उपाधीनां चाविद्याप्रत्युपस्थापितत्वात्। सत्यामेव च नैसर्गिक्यामविद्यायां लोकवेदव्यवहारावतार इति तत्र तत्रावोचाम ॥ १५ ॥

सूत्रान्तरं प्रश्नपूर्वकमवतारयति—**का तर्हीति**। दृष्टान्तं व्याचष्टे—**यथेति**। चकारार्थं दार्ष्टान्तिकमाह—**एवमिति**। किमर्थो ब्रह्मणो निराकारस्याऽऽकारोपदेशस्तत्राऽऽह—**तदिति**। अवैयर्थ्यादित्यत्र प्रातिपदिकार्थमाह—**एवमिति**। निष्प्रपञ्चवाक्यविरोधाद्वैयर्थ्यमेव तेषां किं न स्यादित्याशङ्क्य प्रत्ययार्थमाह—**न हीति**। पूर्वापरविरोधं शङ्कते—**नन्विति**। एवमपीत्युक्तरीत्या श्रुतीनां व्यवस्थितत्वेऽपीत्यर्थः। औपाधिकमुभयलिङ्गत्वं वास्तवमुपेत्य विरोधः साध्यते किं वाऽविद्याकृतमिति विकल्प्याऽऽद्यं निराह—**नेतीति**। वस्तुधर्मत्वानुपपत्तेर्वस्तुनो धर्मः सत्यत्वं तद्वत्तासिद्धेरिति यावत्। इतश्च नोपाधिकृतनानात्वस्य सत्यतेत्याह—**उपाधीनां चेति**। न तेषामविद्यत्वं शास्त्रतस्तद्धियं विना तद्विशिष्टोपास्त्ययोगादित्याशङ्क्य तत्त्ववेदकमानाद्ब्रह्मज्ञाने तदज्ञानध्वस्तेरुपास्त्यादिव्यवहारस्यापि निरवकाशत्वादुपाधीनां व्यावहारिकसत्त्वेऽपि न तात्त्विकतेत्याह—**सत्यामिति**। आविद्यकं तु नानात्वं न विरोधहेतुस्तस्य पूर्वमपि सर्वव्यवहारहेतोरुपगतेरिति मत्वाऽऽह—**तत्र तत्रेति** ॥ १५ ॥

---

१ ङ. °यर्थ्यम् ॥ १५ ॥ य°। २ क. ङ. ज्ञ. ञ. ट. °र्मतानु°। ३ ख. ठ. ड. °रोधश्चोद्यते। ४ ठ. ड. °स्तद्विषयं। ५ क. ठ. ड. °विद्यं तु।

आह च तन्मात्रम् ॥ १६ ॥

" आह च " श्रुतिश्चैतन्यमात्रं विलक्षणरूपान्तररहितं निर्विशेषं ब्रह्म " स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव " [बृ० ४-५-१३] इति । एतदुक्तं भवति—नास्याऽऽत्मनोऽन्तर्बहिर्वा चैतन्यादन्यद्रूपमस्ति चैतन्यमेव तु निरन्तरमस्य स्वरूपम् । यथा सैन्धवघनस्यान्तर्बहिश्च लवणरस एव निरन्तरो भवति न रसान्तरं तथैवेति ॥ १६ ॥

दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

" दर्शयति च " श्रुतिः पररूपप्रतिषेधेनैव ब्रह्म निर्विशेषत्वात् " अथात आदेशो नेति नेति " [बृ० २-३ ६] इति " अन्यदेव तद्विदितादथो अविदितादधि " [केन० ३] " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह " [तैत्ति० २-४-१] इत्येवमाद्या । बाष्कलिना च बाध्वः पृष्टः सन्नवचनेनैव ब्रह्म प्रोवा-

---

कीदृशं तर्हि निर्विशेषं ब्रह्म तत्रोक्तम्—आहेति । तद्विभजते—आह चेति । मात्रचोऽर्थमाह—विलक्षणेति । काऽसौ श्रुतिस्तामाह—स यथेति । एकरसे चिन्मात्रे स दृष्टान्तो यथा येन प्रकारेण लोके सैन्धवस्य घनो मूर्तिविशेषः खिल्यमावोऽन्तर्बहिर्भेदशून्यः सर्वो लवणैकरसस्तथैवायमात्माऽन्तर्बहिर्विभागरहितः समस्तोऽपि प्रकृष्टज्ञप्त्यैकतानस्तिष्ठतीत्यर्थः । सविशेषस्यैव सैन्धवघनस्य दृष्टान्तितत्वाद्दार्ष्टान्तिकस्यापि ब्रह्मणः सविशेषत्वं दृष्टान्तदार्ष्टान्तिकयोरैकरूप्यादित्याशङ्क्याऽऽह—एतदिति ॥ १६ ॥

अन्यापोहमुखेन बोध्यमानत्वादपि स्वगतविशेषशून्यं ब्रह्म विशेषवत्त्वे तदुक्त्याऽपि प्रतिपादनसिद्धावितरव्यावृत्तिवैयर्थ्यादित्याह—दर्शयतीति । सूत्रं व्याचष्टे—दर्शयतीत्यादिना । अन्यनिषेधेनैव ब्रह्मोक्तौ स्वगतविशेषाभावे हेतुमाह—निर्विशेषत्वादिति । रूपद्वयव्याख्यानन्तर्यमथशब्दार्थः । तस्य ब्रह्मधीहेतुत्वमतःशब्दार्थः । विदितं कार्यमविदितं कारणम् । अथो इति निपातोऽप्यर्थः । अधीत्युपरिष्टादन्यदित्यर्थः । तमानन्दं ब्रह्मस्वभावं विद्वान्न कुतश्चन बिभेतीति शेषः । तत्रैव श्रुत्यन्तरमाह—बाष्कलिनेति । स तु प्रश्ने कृते बाध्वस्य तूष्णींभावे भावमविद्वान्भूयो भूयः पप्रच्छ तं पुनरतिनिर्बन्धकारिणं बाध्वो द्वितीये तृतीये वा प्रश्ने प्रत्युक्तवानि-

---

१ ब्र. एवं । २ ज. 'ति । न तस्या' । ३ ङ ञ. 'थैवायमपीति । ४ ङ. 'षत्वम् । अ' । ज. ञ. ट. 'षम् । अ' । ५ क. नेतीति । ६ ङ. ज. ञ. 'दधीति । य' । ७ ङ. वार्धः । ञ. बाहः । ८ ज. ब्रह्मोवा' । ९ क. ब्र. 'षत्वाद्दृष्टा' । १० ठ. ङ. प्रकृते ।

चेति श्रूयते " स होवाचाधीहि भो इति[1] स तूष्णीं बभूव तं ह द्वितीये वा तृतीये वा वचन उवाच ब्रूमः खलु त्वं तु न विजानासि। उपशान्तोऽयमात्मा " इति। तथा स्मृतिष्वपि परप्रतिषेधेनैवोपदिश्यते।

" ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते "

[भ० गी० १३-१२] इत्येवमाद्यासु। तथा विश्वरूपधरो नारायणो नारदमुवाचेति स्मर्यते—

" माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि "

[महाभा०१२-३४१-४५] इति ॥ १७ ॥

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

यत एव चायमात्मा चैतन्यरूपो निर्विशेषो वाङ्मनसातीतः परप्रतिषेधोपदेश्यः " अत एव च " अस्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेषु—

त्याह—तं हेति। उक्तं चेदुत्तरं किमिति न मया ज्ञातं तत्राऽऽह—त्वं त्विति। कथं तूष्णींभाव एवोत्तरं तत्राऽऽह—उपशान्त इति। अथो इत्यादि व्याचष्टे—तथेति। सूत्रगताथोशब्दस्तथेत्यर्थे ज्ञेयः। उक्तिफलमाह—यदिति। ज्ञेयमेव विशिनष्टि—अनादिमदिति। आदिरस्यास्तीत्यादिमत्कार्यं तदस्य नास्तीत्यनादिमत्कार्यरहितमित्यर्थः। स्वयं च न कार्यमित्याह—न सदिति। न च तत्कारणमित्युक्तम्—नासदिति। तथा वास्तवनिर्विशेषत्ववशेनेति यावत्। सर्वेषां भूतानां पृथिव्यादीनां गुणा गन्धादयः सर्वप्राणभृतां वा गुणा जनकत्वपालकत्वादयस्तैर्युक्तं मां पश्यसीति यदेतदेषा माया मया सृष्टेति योजना। कस्मादेषा मायेत्युक्ते निर्विशेषश्रुतिमाश्रित्याऽऽह—नैवमिति ॥ १७ ॥

विशिष्टदृष्टान्तोक्तिरपि निर्विशेषत्वमस्य गमयतीत्याह—अत इति। सूत्राक्षराणि व्याचष्टे—यत इति। पूर्वोक्तसर्वरूपाण्युपादाय विशेषणानि। उपाधिनिमित्तत्वे विशेषवत्तायाः सत्यत्वं शङ्कित्वोक्तमपारमार्थिकीमिति। जलसूर्यकादिवदिति कप्रत्ययो बिम्बोद्देशेन प्रतिबिम्बस्याऽऽभासत्वधिया प्रयुक्तः। तान्येव मोक्षशास्त्राणि संक्षि-

---

१ ङ. ञ. 'हि भगवो ब्रह्मेति। २ क. ज. स ह तूं। ३ क. 'ये तृ'। ४ क. ङ. ज. ञ. 'न्यस्वरूं। ५ ङ. ञ. 'षेधेनोप'। ६ ञ. 'म्बाभेदं'।

"यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा" इति ।
"एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्"
[ब्रह्मबिन्दु० १२] इत्येवमादिषु ॥ १८ ॥

अत्रेदं प्रत्यवस्थीयते—

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥

न जलसूर्यादितुल्यत्वमिहोपपद्यते तद्वदग्रहणात् । सूर्यादिभ्यो हि मूर्तेभ्यः पृथग्भूतं विप्रकृष्टदेशं मूर्तं जलं गृह्यते तत्र युक्तः सूर्यादिप्रतिबिम्बोदयः । न त्वात्मा मूर्तो न चास्मात्पृथग्भूता विप्रकृष्टदेशाश्चोपाधयः सर्वगतत्वात्सर्वानन्यत्वाच्च । तस्मादयुक्तोऽयं दृष्टान्त इति ॥ १९ ॥

अत्र प्रतिविधीयते—

**वृद्धिह्रासभाक्त्वमन्तर्भावादु-
भयसामञ्जस्यादेवम् ॥ २० ॥**

युक्त एव त्वयं दृष्टान्तो विवक्षितांशसंभवात् । न हि दृष्टा-

प्यायऽऽह—**यथेति** । अयं हि विवस्वाञ्ज्योतिःस्वभावः स्वयमेकोऽपि तत्तत्पात्रगता भिन्ना अपोऽनुगच्छन्बहुधा क्रियते । एवमयमात्मा तत्तत्क्षेत्रेष्वनुगच्छन्कूटस्थस्वप्रकाशचिद्धातुरेकोऽपि सन्नुपाधिना भेदरूपः क्रियत इति योजना । आदिशब्दोपात्तं जलचन्द्रकोपमानं दर्शयति—**एक एवेति** ॥ १८ ॥

उत्तरसूत्रमवतारयति—**अत्रेति** । श्रौतः स्मार्तश्च दृष्टान्तः सम्यग्यर्थः । न तथात्वमिति व्याचष्टे—**नेत्यादिना** । इहेत्यात्मोक्तिः । हेतुमवतार्य तद्वदग्रहणं दर्शयितुं दृष्टान्तस्वरूपमाह—**सूर्यादिभ्यो हीति** । दार्ष्टान्तिके तद्वैषम्यमाह—**न त्विति** । उपाधीनामात्मनो विप्रकृष्टदेशत्वाभाव हेतुमाह—**सर्वगतत्वादिति** । तेषां तस्मात्पृथग्भूतत्वाभावे हेतुमाह—**सर्वेति** । वैषम्यफलमाह—**तस्मादिति** ॥ १९ ॥

चोद्यमनूद्य सिद्धान्तयति—**अत्रेति** । दृष्टान्तदार्ष्टान्तिकयोर्विवक्षितांशेन वा सर्वात्मनैर्ना वा साम्यं तत्राऽऽद्यमङ्गी करोति—**युक्त इति** । द्वितीयं निराह—**न हीति** । उपाधेर्भिन्नत्वं भिन्नदेशत्वं च दृष्टान्ते दृष्टमिह तदभावाद्रूपशून्यत्वाच्च ब्रह्मणो न प्रति-

---

१ क. ज भिन्नरूपो । २ क. ङ. ञ. इति चैव' । ३ क. 'त्र पर्यव' । ४ ज. 'भ्यो मू' । ५ क. ज. 'र्ति च ज' । ६ ठ. ड. 'पात्तज' । ७ ङ. 'त्मभावेन सा' । ८ ख. 'ना सा' ।

(ब्रह्मणो नीरूपभावस्य वेदान्तसंमतत्वम्, अधि० ५)

न्तदार्ष्टान्तिकयोः[1] क्वचित्किंचिद्विवक्षितांशं[3] मुक्त्वा सर्वसारूप्यं[2] केनचिद्दर्शयितुं शक्यते सर्वसारूप्ये हि दृष्टान्तदार्ष्टान्तिकभावोच्छेद एव स्यात् । न चेदं स्वमनीषया जलसूर्यकादिदृष्टान्तप्रणयनम् । शास्त्रप्रणीतस्य त्वस्य प्रयोजनमात्रमुपन्यस्यते । किं पुनरत्र विवक्षितं सारूप्यमिति । तदुच्यते—"वृद्धिह्रासभाक्त्वम्[4]" इति । जलगतं हि सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते जलह्रासे ह्रसति जलचलने चलति जलभेदे भिद्यत इत्येवं जलधर्मानुयायि[5] भवति न तु परमार्थतः सूर्यस्य तथात्वमस्ति । एवं परमार्थतोऽविकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यन्तर्भावाद्भजत[6] इवोपाधिधर्मान्वृद्धिह्रासादीन् । एवमुभयोर्दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यादविरोधः ॥ २० ॥

दर्शनाच्च ॥ २१ ॥ (५)

दर्शयति च श्रुतिः परस्यैव ब्रह्मणो देहादिषूपाधिष्वन्तरनुप्रवेशम्—

" पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशत् "
[बृ० २-५-१८] इति ।

" अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य " [छा० ६-३-२]

बिम्बं कल्प्यमित्याशङ्क्याऽऽह—न चेति । शास्त्रीये दृष्टान्ते किं सूत्रेणेत्याशङ्क्याऽऽह—शास्त्रेति । प्रयोजनमात्मनो निर्विशेषत्वज्ञानम् । विवक्षितांशेन साम्येऽपि सर्वात्मना साम्यमतिप्रसङ्गीत्युक्तमिदानीमाकाङ्क्षापूर्वकं सूत्रमादाय विभजते—किमित्यादिना । वृद्धिह्रासेत्यादि व्याख्यायावशिष्टं व्याचष्टे—एवमिति । अविरोधस्तद्भावस्येति शेषः ॥ २० ॥

ब्रह्म न प्रतिबिम्बभावं गन्तुमलममूर्तत्वाद्वन्धवदित्यत्राप्रयोजकत्वमुक्त्वा दोषान्तरमागमविरोधमाह—दर्शनाच्चेति । सूत्रं विवृणोति—दर्शयतीति । द्विपदोपलक्षितानि मनुष्यादिशरीराणि । चतुष्पदोपलक्षितानि च पश्वादिशरीराणि । पुरश्चक्रे पुरश्चक्षुराद्यभिव्यक्तेः पुरस्तादेवं स स्रष्टेश्वरः पक्षी लिङ्गशरीरी भूत्वा पुरस्तान्येव सृष्टानि शरीराण्याविशत्प्रविष्टवान् । स च वस्तुवृत्त्या पुरुषः पूर्णस्तदतिरिक्तवस्त्व-

---

१ ज. °योः कंचित्कचिद्वि° । २ क. ट. °चित्कंचि° । ३ ङ. ज. ञ. °क्षितमंशं । ४ क ङ. ञ. °नुविधायि । ५ ज. °जतीवो° । ६ झ. °व स्व° । ७ ट. °र्णस्त्वति° ।

इति च। तस्माद्युक्तमेतत् "अत एव चोपमा सूर्यकादिवत्" [ब्र० सू० ३-२-१८] इति। तस्मान्निर्विकल्पकैकलिङ्गमेव ब्रह्म नोभयलिङ्गं विपरीतलिङ्गं चेति सिद्धम्।

अत्र केचिद्वे अधिकरणे कल्पयन्ति। प्रथमं तावदिदं प्रत्यस्तमिताशेषप्रपञ्चमेकाकारं ब्रह्मोत प्रपञ्चवदनेकाकारोपेतमिति। द्वितीयं तु स्थिते प्रत्यस्तमितप्रपञ्चत्वे किं सल्लक्षणं ब्रह्मोतै बोधलक्षणमुतोभयलक्षणमिति। अत्र वयं वदामः—सर्वथाऽप्यानर्थक्यमधिकरणान्तरारम्भस्येति। यदि तावदनेकलिङ्गत्वं परस्य ब्रह्मणो निराकर्तव्यमित्ययं प्रयासस्तत्पूर्वेणैव "न स्थानतोऽपि" इत्यनेनाधिकरणेन निराकृतमित्युत्तरमधिकरणं "प्रकाशवच्च" एतद्व्यर्थमेव भवेत्। न च सल्लक्षणमेव ब्रह्म न बोधलक्षणमिति शक्यं वक्तुम्। "विज्ञानघन एव" इत्यादिश्रुतिवैयर्थ्यप्रसङ्गात्। कथं वा निरस्तचैतन्यं ब्रह्म चेतनस्य जीवस्याऽऽत्मत्वेनोपदिश्येत। नापि बोधलक्षणमेव ब्रह्म न सल्लक्षणमिति शक्यं वक्तुम् "अस्तीत्येवोपलब्धव्यः" [कठ० ६-१३] इत्यादिश्रु-

---

भावादित्यर्थः। प्रतिबिम्बपक्षस्य श्रुतिमूलत्वे फलितमाह—तस्मादिति। स्वसिद्धान्तमुपसंहरति—तस्मान्निर्विकल्पेति।

स्वमतेनाधिकरणमुक्त्वा स्वयूथ्यमतमुत्थापयति—अत्रेति। व्याख्यातेषु सूत्रेष्विति यावत्। न स्थानतोऽपीत्यादि प्रकाशवच्चेत्यतः प्रागेकमधिकरणं तद्गतं विचारं दर्शयति—प्रथममिति। प्रकाशवच्चेत्यादि द्वितीयमधिकरणं तत्रत्यं विचारमाह—द्वितीयं त्विति। तत्र पूर्वपक्षसूत्रं प्रकाशवच्चेति। न केवलं सद्रूपमेव ब्रह्म किंतु चैतन्यप्रकाशवच्च सत्यं ज्ञानं सदेवेत्युभयश्रुतेः। एवं सत्यवैयर्थ्यात्सिद्धान्तसूत्रमाह चेति। सत्त्वं चैतन्यप्रकाशमात्रं सदेव विज्ञानमानन्दमित्याद्या श्रुतिराह तन्न ब्रह्मणो नानारसत्वाशङ्क्येत्यर्थः। द्वितीयमधिकरणं दूषयति—अत्रेति। सर्वथाऽपि फलस्य संदेहस्य च भावेऽपीत्यर्थः। कथं फलस्य भावे वैयर्थ्यमित्याशङ्क्य तत्किमनेकरूपत्वनिराकरणं किं वा सन्मात्रत्वसाधनमथवा बोधमात्रत्वबोधनमिति विकल्प्याऽऽद्यं दूषयति—यदीति। द्वितीयं निरस्यति—न चेति। न केवलं श्रुतिविरोधोऽपि तु श्रुतार्थापत्तिविरोधश्चेत्याह—कथं वेति। एतेन पूर्वपक्षासिद्धिरुक्ता। तृतीयं प्रत्याह—नापीति। श्रुतिविरोधवद्युक्तिविरोधश्चास्तीत्याह—

---

१ क. ज. 'कल्पैक'। २ क. 'त प्रयो'। ३ क. 'वच्चेत'। ४ क. शक्यते। ५ ठ. ड. किं स'।

तिवैयर्थ्यप्रसङ्गात्। कथं वा निरस्तसत्ताको बोधोऽभ्युपगम्येत। नाप्युभयलक्षणमेव ब्रह्मेति शक्यं वक्तुम्। पूर्वाभ्युपगमविरोधप्रसङ्गात्। सत्ताव्यावृत्तेन च बोधेन बोधव्यावृत्तया च सत्तयोपेतं ब्रह्म प्रतिजानानस्य तदेव पूर्वाधिकरणप्रतिषिद्धं सप्रपञ्चत्वं प्रसज्येत। श्रुतत्वाददोष इति चेत्। न। एकस्यानेकस्वभावत्वानुपपत्तेः। अथ सत्तैव बोधो बोध एव च सत्ता नानयोः परस्परव्यावृत्तिरस्तीति यद्युच्येत तथाऽपि किं सल्लक्षणं ब्रह्मोत बोधलक्षणमुतोभयलक्षणमित्ययं विकल्पो निरालम्बन एव स्यात्। सूत्राणि त्वेकाधिकरणत्वेनैवास्माभिर्नीतानि। अपि च ब्रह्मविषयासु श्रुतिष्वाकारवदनाकारप्रतिपादनेन विप्रतिपन्नास्वनाकारे ब्रह्मणि परिगृहीतेऽवश्यं वक्तव्येतरासां श्रुतीनां गतिः। तादर्थ्येन "प्रकाशवच्च" इत्यादीनि सूत्राण्यर्थवत्तराणि संपद्यन्ते।

यदप्याहुराकारवादिन्योऽपि श्रुतयः प्रपञ्चप्रविलयमुखेनानाकारप्रतिपत्त्यर्था एव न पृथगर्था इति तदपि न समीचीनमिव लक्ष्यते। कथम्। ये हि परविद्याधिकारे केचित्प्रपञ्चा उच्यन्ते यथा "युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च

कथमिति। सतो व्यावृत्तस्य तुच्छत्वादित्यर्थः। एतेन सिद्धान्तासिद्धिरुक्ता[3]। पूर्वपक्षान्तरमपि परस्यायुक्तं पूर्वाधिकरणविरोधादित्याह—नापीति। प्रसङ्गमेव प्रपञ्चयति—सत्तेति। तद्व्यावृत्तत्वं तद्विशेषितत्वम्। श्रुत्यवष्टम्भेन पूर्वपक्षसिद्धिं शङ्कते—श्रुतत्वादिति। विरुद्धमर्थं श्रुतिरपि न वदेदतो न तदवष्टम्भादुभयात्मता शङ्कनीयेत्याह—नैकस्येति। विरोधं परिहर्तुं वाक्यार्थस्याखण्डतां चोदयति—अथेति। वाक्यार्थाखण्डत्वमुपेत्य परस्य संशयानुपपत्तिमाह—तथाऽपीति। एकाधिकरणत्वे सूत्राणामसांगत्यादभिन्नाधिकरणत्वमाशङ्क्याऽऽह—सूत्राणीति। इतश्च नाधिकरणभेदोऽस्तीत्याह—अपि चेति। पूर्वाधिकरणापेक्षितहेत्वन्तरवादित्वेनोत्तरसूत्राणां तच्छेषत्वसिद्धेर्न भेदकल्पनेति हेत्वन्तरमेव स्फुटयति—ब्रह्मेति।

आकारवद्ब्रह्मवादिश्रुतीनां प्रकारान्तरेण गतिरिति मतमनुवदति—यदपीति। प्रपञ्चप्रविलयपक्षं दूषयति—तदपीति। सर्वश्रुतीनामेकवाक्यत्वसंभवे किमिति तदसमीचीनतेति पृच्छति—कथमिति। परविद्याप्रकरणस्थानामाकारवद्ब्रह्मवादिश्रुतीनामेकवाक्यत्वं किं वोपास्तिप्रकरणस्थानामथ वा सर्वासां तत्राऽऽद्यमङ्गी करोति—ये हीति।

---

१ क. ज. °पि स°। २ ङ. च शतानि स°। ३ ठ. ड. °क्ता। प°। ४ ठ. ड. °क्यार्थस्याख°। ५ ख. °मसंग°। ६ ख. °त्या भिन्ना°। ७ ठ. ड. °प्रल°।

सहस्राणि बहूनि चानन्तानि च " [बृ० २-५-१९] इत्येवमादयस्ते भवन्ति प्रविलयार्थाः " तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम् " [बृ० २-५-१९] इत्युपसंहारात्। ये पुनरुपासनाविधानाधिकारे प्रपञ्चा उच्यन्ते यथा "मनोमयः प्राणशरीरो भारूपः "[छा० ३-१४-२] इत्येवमादयो न तेषां प्रविलयार्थत्वं न्याय्यम् " स क्रतुं कुर्वीत " [छा० ३-१४-१] इत्येवंजातीयकेन प्रकृतेनैवोपासनविधिना तेषां संबन्धात्। श्रुत्या चैवंजातीयकानां गुणानामुपासनार्थत्वेऽवकल्प्यमाने न लक्षणया प्रविलयार्थत्वमवकल्पते। सर्वेषां च साधारणे प्रविलयार्थत्वे सति " अरूपवदेव हि तत्प्रधानत्वात् " [ब्र० सू० ३-२-१४] इति विनिगमनकारणवचनमनवकाशं स्यात्। फलमप्येषां यथोपदेशं क्वचिदुरितक्षयः क्वचिदैश्वर्यप्राप्तिः क्वचित्क्रममुक्तिरित्यवगम्यत एवेत्यतः पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्मवाक्यानां(णां) च न्याय्यं नैकवाक्यत्वम्। कथं चैषामेकवाक्यतोत्प्रेक्ष्यत इति वक्तव्यम्। एकनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवा-

---

यथा रथे वाजिनो युज्यन्ते तथाऽस्याऽऽत्मनः संयुक्ताः स्वविषयप्रकाशनाय हरयो हरणादिन्द्रियाणि दश प्राणिभेदापेक्षया च शता शतानीत्युपक्रम्याऽऽत्मनश्चेन्द्रियाणां च भेदं शङ्कित्वोक्तमयमित्यादि। तेषां प्रविलयद्वारा ब्रह्मवाक्येनै(नै)कवाक्यत्वे हेतुमाह—तदेतदिति। द्वितीयं दूषयति—ये पुनरिति। तेषां लयार्थत्वेन ब्रह्मवाक्यैकवाक्यत्वाभावे हेतुमाह—स क्रतुमिति। किं च मनोमयादिवाक्यान्न साक्षाल्लयो भाति किं तु लक्षयितव्यः। न च श्रुतित्यागेन लक्षणा श्रुतेर्बलीयस्त्वादित्याह—श्रुत्या चेति। तृतीयं प्रत्याह—सर्वेषां चेति। यदि हि काश्चिदपि श्रुतयोऽनाकारवादितयोपासनापराः स्युस्तदा सर्वासां लयार्थत्वेन निरूपणाद्ब्रह्मप्रधानत्वाविशेषादेता ध्यानविधिप्रधाना निष्प्रपञ्चप्रधानास्त्वेता इति विनिगमनं न स्यात्तथा च सूत्रं विरुध्येतेत्यर्थः। निष्प्रपञ्चवाक्येष्वेव फलश्रवणात्फलवत्संनिधावफलं तदङ्गमिति न्यायात्सप्रपञ्चवाक्यानां तदेकवाक्यतेत्याशङ्क्याऽऽह—फलमिति। उपास्तिफलेन फलवत्त्वादुक्तन्यायाविषयत्वमाकारवद्वाक्यानामिति स्थिते फलितमाह—इत्यत इति। एकवाक्यताहेत्वदृष्टेरपि नैकवाक्यतेत्याह—कथं चेति। हेतुत्वानुपलब्धिरसिद्धेति शङ्कते—एकेति। यद्यपि प्रयाजदर्शपूर्णमासवाक्ययोर्विषयानुबन्धभेदान्नियोगभेदस्तथाऽप्येका-

---

१ क. ङ. ज. ञ. ट. °वन्तु प्र°। २ क. ज. °सनवि°। ३ ङ. ञ. ट. °नाधि°। ४ क. °सनवा°। ५ क. भवति। ६ क. ठ. ड. हेत्वनु°। ७ ठ. ड. °योगे भे°। ८ ख. ठ. ड. °प्येकोऽधि°।

कथमिति चेत्। न। ब्रह्मवाक्येषु नियोगाभावात्। वस्तुमात्रपर्यवसायीनि[1] हि ब्रह्मवाक्यानि(णि) न नियोगोपदेशीनीत्येतद्विस्तरेण प्रतिष्ठापितम् "तत्तु समन्वयात्" [ब्र०सू० १-१-४] इत्यत्र।

किंविषयश्चात्र नियोगोऽभिप्रेयत[2] इति वक्तव्यम्। पुरुषो हि नियुज्यमानः कुर्वीति स्वव्यापारे कस्मिंश्चिन्नियुज्यते। ननु द्वैतप्रपञ्चप्रविलयो नियोगविषयो भविष्यति। अप्रविलापिते हि द्वैतप्रपञ्चे ब्रह्मतत्त्वावबोधो न भवेत्यतो ब्रह्मतत्त्वावबोधप्रत्यनीकभूतो द्वैतप्रपञ्चः प्रविलाप्यः। यथा स्वर्गकामस्य यागोऽनुष्ठातव्य उपदिश्यत एवमपवर्गकामस्य प्रपञ्चप्रविलयः। यथा च तमसि व्यवस्थितं घटादितत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यत एवं ब्रह्मतत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतः प्रपञ्चः प्रविलापयितव्यः। ब्रह्मस्वभावो हि प्रपञ्चो न प्रपञ्चस्वभावं ब्रह्म तेन नामरूपप्रपञ्चप्रविलापनेन ब्रह्मतत्त्वावबोधो

धिकारनियोग इत्येकनियोगत्वम्। तथा तत्त्वावबोधकामस्यैको नियोगः सर्वत्रैत्येकवाक्यतेत्यर्थः। तत्त्वमादिवाक्येषु नियोगाभावादेकनियोगधीरसिद्धेति दूषयति—नेति। तेष्वपि कल्प्यतां नियोगोऽन्यथा प्रामाण्यायोगादित्याशङ्क्याऽऽह—वस्त्विति।

विषयाभावाच्च न नियोगोऽत्रेत्याह—किमिति। नियोज्यावच्छिन्नो नियोगस्तस्य किंविषयेणेत्याशङ्क्याऽऽह—पुरुषो हीति। विषयोऽपि तर्हि नियोगावच्छेदकत्वेन कश्चित्कल्प्यतामित्याशङ्क्य द्वैतलयो वा स्याद्ब्रह्मज्ञानं वा तदविद्यानिवृत्तिर्वा तत्कार्यनिवृत्तिर्वेति विकल्प्याऽऽद्यमादत्ते—नन्विति। तत्त्वावबोधकामिनस्तत्त्वावबोधफलके विषये तदुपकारके वा नियोगो युक्तस्तस्मात्कथं प्रपञ्चलये स्यादित्याशङ्क्य तदुपकारकत्वादित्याह—अप्रविलापिते हीति। काम्यमानतत्त्वावबोधोपकारकत्वे फलितमाह—अत इति। उक्तमर्थं वैदिकोदाहरणेन स्फुटयति—यथेति। स्वर्गं प्रति यागस्य साधनत्वात्तत्र नियोगेऽपि प्रकृते काम्यमानोपायत्वाभावात्कुतो नियोगः स्यादित्याशङ्क्य प्रतिबन्धनिवृत्तितया प्रपञ्चलयस्यानुष्ठेयत्वं लौकिकदृष्टान्तेन दर्शयति—यथा चेत्यादिना। तत्त्वज्ञानकामो द्वैतं प्रविलापयेदिति न नियोगो ब्रह्मणोऽपि तल्लये लयापातादित्याशङ्क्याऽऽह—ब्रह्मेति। न हि लोके कार्यनाशेऽपि कारणं नश्यत्यारोपितस्याधिष्ठानान्तर्भावेऽपि तस्य तदनन्तर्भावादिति भावः। नैयोगिके द्वैतलये फलितमाह—तेनेति। वेदान्तानां द्वैतलयनियोगनिष्ठत्वेनैकवाक्यत्वं शङ्कितं

---

१ ज. 'मात्रे प'। २ ज. 'नि ब्र'। ३ ख. 'नीति त'। ४ ङ. ञ. 'प्रेत। ५ क. ङ. ञ. 'वतीत्य'। ६ ठ. ड. 'त्तिर्वे'। ७ ठ, ड. 'बोधे वि'। ८ ख. ठ. 'लये नि'।

भवतीति । अत्र वयं पृच्छामः—कोऽयं प्रपञ्चप्रविलयो नाम । किमग्निप्रतापसंपर्काद्धृतकाठिन्यप्रविलय इव प्रपञ्चप्रविलयः कर्तव्य आहोस्विदेकस्मिंश्चन्द्रे तिमिरकृतानेकचन्द्रप्रपञ्चवदविद्याकृतो ब्रह्मणि नामरूपप्रपञ्चो विद्यया प्रविलापयितव्य इति । तत्र यदि तावद्विद्यमानोऽयं प्रपञ्चो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य इत्युच्येत स पुरुषमात्रेणाशक्यः प्रविलापयितुमिति तत्प्रविलयोपदेशोऽशक्यविषय एव स्यात् । एकेन चाऽऽदिमुक्तेन पृथिव्यादिप्रविलयः कृत इदानीं पृथिव्यादिशून्यं जगदभविष्यत् । अथाविद्याध्यस्तो ब्रह्मण्येकस्मिन्नयं प्रपञ्चो विद्यया प्रविलाप्यत इति ब्रूयात् । ततो ब्रह्मैवाविद्याध्यस्तप्रपञ्चप्रत्याख्यानेनाऽऽवेदयितव्यम् "एकमेवाद्वितीयं ब्रह्म" [छा० ६-२-१] "तत्सत्यं स आत्मा तत्त्वमसि" [छा०६-८-७] इँति । तस्मिन्नावेदिते विद्या स्वयमेवोत्पद्यते तया चाविद्या बाध्यते ततश्चाविद्याध्यस्तः सकलोऽयं नामरूपप्रपञ्चः स्वप्नप्रपञ्चवत्प्र-

---

प्रत्याह—अत्रेति । प्रश्नमेव विशदयति—कोऽयमिति । किंशब्दोपात्तं पक्षद्वयं दर्शयति—किमित्यादिना । वास्तवस्यावास्तवस्य वा द्वैतस्य लयो नियोगविषयत्वेनेष्ट इति विकल्पार्थः । आद्यमनूद्य प्रत्याह—यदीत्यादिना । वस्तुनो ज्ञानाद्ध्वस्तेर्मुसलादिना च कृत्स्नद्वैतनिवृत्त्ययोगान्नभोग्रसननियोगवदयं नियोगः स्यादित्यर्थः । किं चानादौ संसारे कश्चित्प्रागितो मुक्तो न वा । तत्राऽऽद्येऽद्यतनपृथिव्याद्युपलब्धिर्विरुध्येत । द्वितीये शुकादिमुक्तिश्रुतिविरोधः । तस्याश्चार्थवादत्वेऽपि द्वारार्थे तात्पर्याविरोधादित्यनेकजीववादमुपेत्याऽऽह—एकेनेति । द्वितीयमुत्थापयति—अथेति । तर्हि द्वैतलये नियोगवैयर्थ्यमित्याह—तत इति । ब्रह्मतत्त्वज्ञापनेनैव तदविद्याकृतद्वैतलयात्तदेव वेदान्तैर्ज्ञापनीयं कृतमत्र नियोगेनेत्यर्थः । कथं तदावेदनं तदाह—एकमिति । मा तर्हि द्वैतलये नियोगो भूद्ब्रह्मज्ञाने तु स्यादिति द्वितीयमाशङ्क्याऽऽह—तस्मिन्निति । शब्दोक्ते ब्रह्मणि नियोगापेक्षां विना शब्दशक्तेरेव ज्ञानोत्पत्तेर्न तद्विषयोऽपि नियोगोऽस्तीत्यर्थः । उत्पन्ने ज्ञाने नान्तरीयकत्वेनाज्ञाननिवृत्तेर्न नियोगस्तत्रापीति तृतीयं प्रत्याह—तयेति । चतुर्थं निरस्यति—ततश्चेति । कारणाविद्यानि-

---

१ ज. झ. 'ग्नावि' । २ ङ. ञ. 'कृते ब्र' । ३ ज. 'ति । य' । ४ झ. 'त्युच्यते स । ५ ट. तद्विल' । ६ ङ. ञ. 'त्प्रल' । ७ ङ. इति । एवमाविदिते त' । ८ क. 'स्मिन्विद्या । ९ ज. 'त्प्रली' । १० ठ. 'त्पर्यवि' । ११ ख. झ. 'ज्ञाने' ।

विलीयते। अनावेदिते तु ब्रह्मणि ब्रह्मविज्ञानं कुरु प्रपञ्चप्रविलयं चेति शतकृत्वोऽप्युक्ते न ब्रह्मविज्ञानं प्रपञ्चप्रविलयो वा जायेत।

नन्वावेदिते ब्रह्मणि तद्विज्ञानविषयः प्रपञ्चविलयविषयो वा नियोगः स्यात्। न। निष्प्रपञ्चब्रह्मात्मत्वावेदनेनैवोभयसिद्धेः। रज्जुस्वरूपप्रकाशनेनैव हि तत्स्वरूपविज्ञानमविद्याध्यस्तसर्पादिप्रपञ्चप्रविलयश्च भवति। न च कृतमेव पुनः क्रियते। नियोज्योऽपि च प्रपञ्चावस्थायां योऽवगम्यते जीवो नाम स प्रपञ्चपक्षस्यैव वा स्याद्ब्रह्मपक्षस्यैव वा। प्रथमे विकल्पे निष्प्रपञ्चब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिवज्जीवस्यापि प्रविलापितत्वात्कस्य प्रपञ्चविलये नियोग उच्यते कस्य वा नियोगनिष्ठतया मोक्षोऽवाप्तव्य उच्यते। द्वितीयेऽपि ब्रह्मैवानियोज्यस्वभावं जीवस्य स्वरूपं जीवत्वं त्वविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि नियोज्याभावान्नियोगाभाव एव। द्रष्टव्यादिशब्दा अपि पराविद्याधिकारपठितास्तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधाना भवन्ति लोकेऽपीदं पश्येदमाकर्णयेति चैवंजातीयकेषु

वृत्तेरिति यावत्। किं च ब्रह्मज्ञानादौ नियोगो ब्रह्मण्यज्ञाते ज्ञाते वा। तत्राऽऽद्यं दूषयति—अनावेदिते त्विति।

द्वितीयमालम्बते—नन्विति। ब्रह्मणि शाब्दे तद्वशादेव नियोगादृते ब्रह्मज्ञानादिसिद्धेर्नियोगवैयर्थ्यमित्याह—नेत्यादिना। तदेव दृष्टान्तेन स्फुटयति—रज्जुवत्। ब्रह्मतत्त्वावेदनसिद्धमपि ब्रह्म ज्ञानादिनियोगेन पुनः साध्यमित्याशङ्क्याऽऽह—न चेति। करणापर्यवसानादित्यर्थः। विषयाभावान्नियोगाभावमुक्त्वा नियोज्याभावादपि वेदान्तेषु तदभावमाह—नियोज्योऽपीति। प्रपञ्चान्तर्भावपक्षं प्रत्याह—प्रथम इति। प्रपञ्चप्रविलयो ब्रह्मज्ञानादेरुपलक्षणम्। मुमुक्षोर्नियोज्यत्वमाशङ्क्योक्तम्—कस्येति। ब्रह्मान्तर्भावे नियोज्यत्वं दुर्वचनमित्याह—द्वितीयेऽपीति। ब्रह्मणोऽनन्योऽपि जीवोऽविद्ययाऽन्यत्वान्नियोज्यः स्यादित्याशङ्क्य ब्रह्मण्यावेदिते भेदकाविद्यायोगान्नैवमित्याह—जीवत्वमिति। ब्रह्मज्ञाने श्रूयमाणा विधयस्तर्केण कथं निरस्यन्ते तत्राऽऽह—द्रष्टव्यादीति। तेषामभिमुखीकरणार्थत्वं न क्वापि दृष्टमित्याशङ्क्याऽऽह—लोकेऽपीति। ज्ञानमेव प्रकृत्यर्थतया श्रुतं किमिति लोके वेदे वा न विधेयमित्याशङ्क्यापुरु-

---

१ क. ज. झ.ट. जायते। २ क. 'अप्रवि'। ३ क. ज. 'ब्रह्मतत्त्वावे'। ४ क. म 'त्मतत्त्वावे'। ५ ज. 'विययाऽध्य'। ६ क. 'क्षस्य वा। ७ क. ङ. म. 'अप्रवि'। ८ क. उच्यते। ९ ज. 'यत्वमवि'। १० क. ज. ट. 'धानाः। लो'। ११ ठ. ड. 'अवि'। १२ ठ. 'त्वं प्रत्या'।

निर्देशेषु प्रणिधानमात्रं कुर्वित्युच्यते न साक्षाज्ज्ञानमेव कुर्विति। ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्जायते कदाचिन्न जायते तस्मात्तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन। तस्मिन्दर्शिते स्वयमेव यथाविषयं यथाप्रमाणं च ज्ञानमुत्पद्यते। न च प्रमाणान्तरेणान्यथाप्रसिद्धेऽर्थेऽन्यथाज्ञानं नियुक्तस्याप्युपपद्यते। यदि पुनर्नियुक्तोऽहमित्यन्यथा ज्ञानं कुर्यान्न तु तज्ज्ञानं किं तर्हि मानसी सा क्रिया। स्वयमेव चेदन्यथोत्पद्येत भ्रान्तिरेव स्यात्। ज्ञानं तु प्रमाणजन्यं यथाभूतविषयं च न तन्नियोगशतेनापि कारयितुं शक्यते। न च प्रतिषेधशतेनापि वारयितुं शक्यते। नै हि तत्पुरुषतन्त्रं वस्तुतन्त्रमेव हि तत्। अतोऽपि नियोगाभावः।

किं चान्यन्नियोगनिष्ठतयैव पर्यवस्यत्याम्नाये यदभ्युपगतमनियोज्यब्रह्मात्मत्वं जीवस्य तदप्रमाणकमेव स्यात्।

षतन्त्रत्वादित्याह—ज्ञेयेति। किं च नियोगवादिनाऽपि वेदान्तानां वस्तुवादित्वमवश्यं वाच्यं नियोगमात्रात्तत्त्वज्ञानायोगात्। ततो वाक्यादेव तदुत्पत्तेर्नियोगानर्थक्यमित्याह—तस्मादिति। ज्ञानस्यापुरुषतन्त्रतया विधेयत्वायोगस्तच्छब्दार्थः। तं ज्ञेयाभिमुखं पुरुषं प्रतीति यावत्। तथाऽपि नियोगाभावे कथं तत्र धीरित्याशङ्क्याऽऽह—तस्मिन्निति। किं च मानानपेक्षो विधिर्न सम्यग्ज्ञानं जनयति न च मुमुक्षोर्मिथ्याज्ञानमुपयुक्तम्। न च प्रमाणबाधिते सम्यग्ज्ञानं जनयितुं शक्यम्। तथा च मानेनैव तत्सिद्धेर्व्यर्थो विधिरित्याह—न चेति। योषिदादिष्वग्न्यादिधीवन्मानविरुद्धेऽपि विधेर्युक्तं ज्ञानमित्याशङ्क्याऽऽह—यदीति। अन्यथा ज्ञानमपि न मानसी क्रिया रज्जुभुजंगादिधीवदित्याशङ्क्याऽऽह—स्वयमिति। शास्त्रीययत्नाद्यनपेक्षतया जातज्ञानस्याक्रियात्वेऽपि शास्त्रीयमन्यस्यान्यज्ञानं प्रयत्नादिकृतं मानसी क्रियैवेत्यर्थः। कथंभूतं तर्हि सम्यग्ज्ञानं तत्राऽऽह—ज्ञानं त्विति। तदपि नियोगाधीनं किं न स्यात्तत्राऽऽह—नेति। नेक्षेतेत्यादिनिषेधविषयत्ववद्विधिविषयत्वमपि स्यादित्याशङ्क्याऽऽह—न चेति। तत्रापि संकल्पपूर्वयत्न एव विधीयत इति भावः। सम्यग्ज्ञानस्य विधिनिषेधाविषयत्वे हेतुमाह—न हीति। प्रयत्नानधीनत्वे फलितमाह—अत इति। मानवस्तुतन्त्रत्वमपेरर्थः।

नियोगवादिनं प्रत्यन्यच्च किंचिदुच्यते दूषणमित्याह—किं चेति। तदेव स्फोरयति—नियोगेति। शास्त्रस्य नियोगनिष्ठत्वे पदार्थयोरैक्योपगमो भ्रान्तिमूलः स्यादित्यर्थः।

---

१ ज. °सिद्धार्थे। २ क. ज. 'प्युत्पद्य°। ३ झ. ट. °त्र त°। ४ ज. भ्रान्तिः सा। ज्ञा°। ५ ज. न त°। ६ ठ. ड. शास्त्रजन्म°। ७ ट. क. तदाह।

(ब्रह्मणो नीरूपभावस्य वेदान्तसंमतत्वम्, अधि० १)

अथ शास्त्रमेवानियोज्यब्रह्मात्मत्वमाचक्षीत तदवबोधे च पुरुषं नियुञ्जीत ततो ब्रह्मशास्त्रस्यैकस्य द्वयर्थपरता विरुद्धार्थपरता च प्रसज्येयाताम्। नियोगपरतायां च श्रुतहानिरश्रुतकल्पना कर्मफलवन्मोक्षस्यादृष्टफलत्वमनित्यत्वं चेत्येवमादयो दोषा न केनचित्परिहर्तुं शक्याः। तस्मादवगतिनिष्ठान्येव ब्रह्मवाक्यानि(णि) न नियोगनिष्ठानि। अतश्चैकनियोगप्रतीतेरेकवाक्यतेत्ययुक्तम्। अभ्युपम्यमानेऽपि च ब्रह्मवाक्येषु नियोगसद्भावे तदेकत्वं निष्पपञ्चोपदेशेषु सप्रपञ्चोपदेशेषु चासिद्धम्। न हि शब्दान्तरादिभिः प्रमाणैर्नियोगभेदे गम्यमाने सर्वत्रैको नियोग इति शक्यमाश्रयितुम्। प्रयाजदर्शपूर्णमासवाक्येषु त्वधिकारांशेनाभेदाद्युक्तमेकत्वम्। न त्विह सगुणनिर्गुणचोदनासु कश्चिदेकत्वाधिकारांशोऽस्ति। न हि भारू-

---

शास्त्रसिद्धत्वादुभयमपि प्रामाणिकमित्याह—अथेति। अनेकार्थतया वाक्यभेदो विरुद्धार्थत्वादप्रामाण्यं चेति दूषयति—तत इति। उपक्रमोपसंहारैकरूप्यादिसिद्धा ब्रह्मपरताऽपि वेदान्तानां नियोगपरत्वे पीड्येतेत्याह—नियोगेति। किंच धियो विधेयत्वे कर्मवदपूर्वावान्तरव्यापारात्फलसिद्धिरेष्टव्या ततश्चादृष्टफलत्वमनित्यत्वं सातिशयत्वं च स्वर्गादिर्वत्तत्फलस्य स्यादित्याह—कर्मेति। वेदान्तानां नियोगपरत्वाभावे कथं प्रामाण्यं तत्राऽऽह—तस्मादिति। तेषामनियोगनिष्ठत्वे फलितमाह—अतश्चेति। वेदान्तेषु नियोगाभावादेकनियोगविधिरसिद्ध इत्युक्तम्। संप्रति प्रौढवादितया नियोगमङ्गीकृत्य तदेकत्वं प्रत्याह—अभ्युपगम्यमानेऽपीति। तत्र हेतुमाह—न हीति। भिन्नवाक्यार्थविषयः शब्दः शब्दान्तरम्। यथा यजतिददातिजुहोतियस्तथेहापि वेदोपासीतेति शब्दभेदः। आदिशब्देन रूपभेदः प्रकरणभेदः फलभेदश्च गृह्यते। एतैर्भेदे सिद्धे तदेकत्वासिद्धिरित्यर्थः। अनुबन्धभेदेऽपि प्रयाजदर्शपूर्णमासवाक्येष्विव नियोगैक्यमाशङ्क्याधिकारांशस्य तत्राभेदादिह तदभावान्नैवमित्याह—प्रयाजेति। एकस्यैव स्वर्गकामस्य साङ्गप्रयोगाधिकारवदत्रापि मुमुक्षोरेकस्यैव द्वैतलयादावधिकारादुभयविधिवाक्येषु नियोगैक्यं स्यादित्याशङ्क्याऽऽह—न त्विति। भिन्नाधिकारत्वादन्योन्योपकारायोगाच्चेति हेतुमाह—न हीति। तर्हि भारूपत्वादीनां विशिष्टगुणवादित्वमन्येषां तस्मिन्नेव धर्मिणि द्वैतविलापनार्थतेत्येकवाक्यतेत्याशङ्क्याऽऽ-

---

१ क. ज. °त्वमप्याच°। २ ट. °स्य वस्तुपरता विधिरूपार्थपरता च ब्र°। ३ ड. °क्षफलस्य ट°। ४ङ. ञ. °षु वाऽऽसि°। ५ ङ. ञ. °देऽवग°। ६ ज. शक्यं श्र°। ७ट. 'क्येष्वधि°। ८ ठ. ड. 'वत्फ°। ९ क. ठ. ड. °गधीर°। १० क. ठ. ड. °सिद्धेत्यु°। ११ ड. °स्य साध्यस्य त°। १२ ठ. ड. 'विधवा°।

पत्वादयो गुणाः प्रपञ्चप्रविलयोपकारिणः । नापि प्रपञ्चविलयो भारूपत्वादिगुणोपकारी परस्परविरोधित्वात् । न हि कृत्स्नप्रपञ्चप्रविलापनं प्रपञ्चैकदेशापेक्षणं चैकस्मिन्धर्मिणि युक्तं समावेशयितुम् । तस्मादस्मदुक्त एव विभाग आकारवदनाकारोपदेशानां युक्ततर इति ॥ २१ ॥ (५)

(ब्रह्मणो निषेधातीतत्वेन सत्यत्वस्थापनम्, अधि० ६)

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥

" द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च " [बृ० २-३-१] इत्युपक्रम्य पञ्च महाभूतानि द्वैराश्येन प्रविभज्यामूर्तरसस्य च पुरुषशब्दोदितस्य माहारजनादीनि रूपाणि दर्शयित्वा पुनः

ह—न हि कृत्स्नेति । एकवाक्यत्वायोगे फलितमाह—तस्मादिति । अनिर्वाच्यद्वैतालम्बनाः सविशेषश्रुतयः स्वाभाविकाद्वैतालम्बनाश्च निर्विशेषश्रुतय इत्यस्मदुक्तो विभागः । निष्प्रपञ्चमद्वयं चैतन्यैकरसं ब्रह्मेति तत्पदलक्ष्यमुपसंहर्तुमितीत्युक्तम् ॥ २१ ॥ (५)

निषेधश्रुतिभिर्ब्रह्मणि निर्विशेषे निरूपिते तासां ब्रह्मनिषेधत्वमाशङ्क्योक्तम्—प्रकृतेति । ब्रह्म सन्मात्रं तच्च सामान्यत्वाद्विशेषापेक्षं तेन तेषु निषिद्धेषु नास्ति ब्रह्मेति शङ्कायामधिकरणम् । तस्य विषयवाक्यं सोपक्रममाह—द्वे वावेति । वावशब्दोऽवधारणे । रूपद्वयमेवावधृतं विशिनष्टि—मूर्तं चेति । किं तन्मूर्तं किंच तदमूर्तमित्याकाङ्क्षायामुक्तम्—पञ्चेति । पृथिव्यप्तेजोरूपं भूतत्रयं मूर्तं रूपं वाय्वाकाशं चामूर्तं रूपमिति द्विराशित्वेन पञ्च भूतानि विभागेनोक्तानीत्यर्थः । अमूर्तस्य भूतद्वयस्य रसः सारो हिरण्यगर्भः करणात्मा य एष एतस्मिन्मण्डले पुरुषो यश्चायमध्यात्मं दक्षिणेऽक्षन्पुरुष इत्युक्तस्तस्य वासनामयानि रूपाणि तद्यथा माहारजनमित्यादिना विचित्राणि दर्शयित्वा रूपिणो ब्रह्मणः स्वरूपोक्त्यर्थमथेत्यादि वाक्यमित्याह—अमूर्तेति । सत्यस्य सत्यमित्यत्र षष्ठ्यन्तसत्यशब्दार्थोक्त्यनन्तरमित्यथशब्दार्थः । प्रथमान्तसत्यशब्दार्थस्य वक्तव्यत्वेनावशेषादित्यतःशब्दार्थः । अवशिष्टार्थस्तु व्यक्ती भविष्यति । वाक्योक्तिद्वारा तदर्थनिषेधमधिकरणविषयमुक्त्वा विशेषानुपलम्भकृतं संशयमाह—

---

१ म. ट. 'ष्वपि' । २ म. 'रिणो भवन्ति ना' । ३ म. 'लयादयो गुणा भा' । ४ म. 'कारिणः। प' । ५ ट. 'र्मिण्येकत्वं स' । ६ क. ग. च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च" इ' । ७ क. ग. 'लक्षमु' । ८ क. कारणात्मा । ९ ठ. ड. 'क्षायं द' । १० ठ. ड. 'दर्थं नि' ।

पठ्यते " अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति " [बृ०२-३-६] इति । तत्र कोऽस्य प्रतिषेधस्य विषय इति जिज्ञासामहे । न ह्यत्रेदं तदिति विशेषितं किंचित्प्रतिषेध्यमुपलभ्यते । इतिशब्देन त्वत्र प्रतिषेध्यं किमपि समर्प्यते नेति नेतीतीतिपरत्वान्नञ्प्रयोगस्य। इतिशब्दश्चायं संनिहितालम्बन एवंशब्दसमानवृत्तिः प्रयुज्यमानो दृश्यते " इति ह स्मोपाध्यायः कथयति" इत्येवमादिषु। संनिहितं चात्र प्रकरणसामर्थ्याद्रूपद्वयं सप्रपञ्चं ब्रह्मणस्तच्च ब्रह्म यस्य ते द्वे रूपे । तत्र नः संशय उपजायते । किमयं प्रतिषेधो रूपे रूपवच्चोभयमपि प्रतिषेधत्याहोस्विदेकतरम् । यदाऽप्येकतरं तदाऽपि किं ब्रह्म प्रतिषेधति रूपे परिशिनष्ट्याहोस्विद्रूपे प्रतिषेधति ब्रह्म परिशिनष्टीति । तत्र प्रकृतत्वाविशेषादुभयमपि प्रतिषेधतीत्याशङ्कामहे। द्वौ चैतौ प्रतिषेधौ द्विर्नेतिशब्दप्रयोगात् । तयोरेकेन सप्रपञ्चं ब्रह्मणो रूपं

तत्रेति । जिज्ञासाहेतुमुक्तं व्यनक्ति—न हीति । सामान्येन दृष्टस्यैव विशेषतो दृष्टौ स्थाण्वादौ संशयदृष्टेरत्र तदभावे कथमसौ स्यादित्याशङ्क्याऽऽह—इतिशब्देनेति । अस्तु तर्हि तदर्थवत्त्वाय यत्किंचिदत्र निषेध्यमित्याशङ्क्योक्तम्—इतिशब्दश्चेति । प्रत्यक्षादिसंनिहितघटाद्यालम्बनस्तर्हि निषेधः स्यादित्याशङ्क्य सजातीयमानार्पितस्य विजातीयमानसिद्धादन्तरङ्गत्वात्तदालम्बनेव निषेधस्येत्याह—संनिहितं चेति । प्रकृतत्वं विशेषासिद्धिश्चेति हेतुमुक्त्वा संशयं निगमयति—तत्रेति । अन्यतरनिषेधेनापि निषेधसिद्ध्या पक्षान्तरमाह—आहोस्विदिति । द्वितीयेऽपि ब्रह्मणो वाङ्मनसातीतत्वात्प्रपञ्चस्य चाध्यक्षादिसिद्धत्वात्तस्य व्यावहारिकमानासिद्धत्वेऽपि कल्पितत्वात्तत्कल्पनाधिष्ठानत्वात्तन्निषेधावधित्वाच्च ब्रह्मणः परिशेषार्हत्वादिति पक्षद्वयं दर्शयति—यदाऽपीति । अत्र निषेधार्थोक्त्या तत्पदार्थस्यैव शोधनात्तँस्यैव शुद्धस्य वाक्यार्थान्वयित्वेन तद्धीहेतुत्वात्पादादिसंगतिरिति मत्वा पूर्वपक्षयति—तत्रेति । पूर्वपक्षे निषेधस्य शून्यतान्तत्वाद्ब्रह्मणः शून्यस्य प्रत्यक्त्वेन ज्ञानानर्हता । सिद्धान्ते व्यतिरिक्तस्यैव निषेधादप्रपञ्चस्य ब्रह्मणस्तत्त्वेन ज्ञानयोग्यता सति संभवे प्राप्तसर्वनिषेधकल्पनादेकदेशस्यैव तत्कल्पनं युक्तं लाघवात् । नेदं रजतमित्यादौ तथा दर्शनादित्याशङ्क्य निषेधद्वयशक्त्या प्राप्तसर्वबाधकल्पनं युक्तमन्यत्र निषेधद्वयाभावादेकदेशस्यैव बाधेत्याह द्वौ-चेति । निषेधयोर्द्वयोरपुनरुक्तमर्थमभिनयति—तयोरिति । वस्त्वन्तराभा-

---

१ ट. 'शास्यते । न । २ क ज. ट समर्थ्यते । ३ ङ. ञ. 'तिशब्दप' । ४ ज. 'ब्दश्च सं' । ५ ञ. 'तावल' । ६ ज. ट. यस्यैते । ७ ट. ङ. 'तस्य च शु' ।

प्रतिषिध्यतेऽपरेण रूपवद्ब्रह्मेति भवति मतिः। अथवा ब्रह्मैव रूपवत्प्रतिषिध्यते तद्धि वाङ्मनसातीतत्वादसंभाव्यमानसद्भावं प्रतिषेधार्हम्। न तु रूपमपश्यः प्रत्यक्षादिगोचरत्वात्प्रतिषेधार्हः। अभ्यासस्त्वादरार्थ इति।

एवं प्राप्ते ब्रूमः—न तावदुभयप्रतिषेध उपपद्यते शून्यवादप्रसङ्गात्। किंचिद्धि परमार्थमालम्ब्यापरमर्थः प्रतिषिध्यते यथा रज्ज्वादिषु सर्पादयः। तच्च परिशिष्यमाणे कस्मिंश्चिद्भावेऽवकल्प्यते कृत्स्नप्रतिषेधे तु कोऽन्यो भावः परिशिष्येत। अपरिशिष्यमाणे चान्यस्मिन्य इतरः प्रतिषेद्धुमारभ्यते प्रतिषेद्धुमशक्यत्वात्तस्यैव परमार्थत्वापत्तेः प्रतिषेधानुपपत्तिः। नापि ब्रह्मप्रतिषेध उपपद्यते "ब्रह्म ते ब्रवाणि" [बृ० २-१-१]

वविशिष्टवस्त्वन्तरज्ञानस्यैव नेदं रजतमित्यादौ निषेधार्थत्वान्न सर्वनिषेधः संभवतीत्याशङ्क्याऽऽह—अथ वेति। तत्र हेतुः—तद्धीति। प्रकृतत्वाविशेषात्प्रपञ्चस्यापि निषेधो ब्रह्मवदित्याशङ्क्याध्यक्षादिविरोधान्नैवमित्याह—न त्विति। ब्रह्ममात्रनिषेधे निषेधद्वयवैयर्थ्यमेकेनैव कृतत्वादित्याशङ्क्याऽऽह—अभ्यासस्त्विति।

पक्षद्वयमनूद्य सिद्धान्तयति—एवमिति। तत्र प्रथममुत्सूत्रमेव प्रथमं पक्षं प्रत्याह—नेति। प्रसङ्गस्येष्टत्वं निराचष्टे—किंचिद्धीति। वास्तवमधिष्ठानं ज्ञात्वाऽऽरोप्यं निरस्यमित्यत्र दृष्टान्तमाह—यथेति। अस्तु तर्हि शून्यमेव वस्तु तदधिगम्येतरन्निषेध्यं नेत्याह—तच्चेति। निषेधनं तदर्थः। लोकसिद्धपदार्थान्वययोग्यतावशेन वाक्यार्थस्वीकारान्नेत्येव च निषेधादर्शनान्नायमयं नेदमिहेति धर्मिप्रतियोगिघटितस्यैव निषेधस्य दृष्टेर्विशेषणावशेषस्याऽऽवश्यकत्वादयुक्ता शून्यतेत्यर्थः। किंच लोके भ्रमस्य साधिष्ठानत्वोपलम्भात्तात्त्विकाधिष्ठानाभावे प्रत्यक्षादिसिद्धद्वैतस्यैव तात्त्विकत्वापातान्निषेधो निरवकाशः स्यादित्याह—अपरीति। दृष्टसर्वनिषेधे तदेकदेशवस्तुधीरूपापवादाभावादुत्सर्गस्थितिरिति न्यायात्पूर्वदृष्टस्य वस्तुत्वप्रसङ्गादनवधिकनिषेधायोगादवस्तुतया च शून्यभानात्तद्दृष्ट्या पूर्वदृष्टनिषेधासंभवान्न तत्पर्यन्तो निषेध इति भावः। पूर्वपक्षान्तरं प्रत्याह—नापीति। प्राप्तिपूर्वकत्वान्निषेधस्य ब्रह्मणश्चाविद्यया प्रत्यक्षादिभिर्वा द्वैतवदप्राप्तेः शब्देन प्राप्तस्य तेनैव निषेधे पङ्कप्रक्षालनन्यायान्न तन्निषेध इति भावः। ब्रह्मणो निषेध्यत्वाभावे हेत्वन्तरमाह—ब्रह्मेति। आदिपदेन ब्रह्मविदाप्नोतीत्यादिरुपक्रमो गृह्यते। ब्रह्मणः सत्त्वा-

---

१ ट. °ल्यक्षगो°। २ ह. ट. °मार्थे प्र°। ३ ज. °ल्प्यत उभयप्र°। ४ ङ. न. हि। ५ ज. झ. ट. °रभते। ६ क. ज. ट. °ते तस्यै°। ङ. ञ. °ते तस्य प्र°।

(ब्रह्मणो निषेधातीतत्वेन सत्यत्वस्थापनम्, अधि० ६)

इत्याद्युपक्रमविरोधात्। "अविज्ञानं स भवति। अथ ब्रह्मेति वेद चेत्" [तैत्ति० २-६-१] इत्यादिनिन्दाविरोधात्। "अस्तीत्येवोपलब्धव्यः" [कठ० ६-१३] इत्यवधारणविरोधात्। सर्ववेदान्तव्याकोपप्रसङ्गाच्च। वाङ्मनसातीतत्वमपि ब्रह्मणो नाभावाभिप्रायेणाभिधीयते। न हि महता परिकरबन्धेन "ब्रह्मविदाप्नोति परम्" [तै० २-१-१] "सत्यं ज्ञानमनन्तं ब्रह्म" [तै० २ १-१] इत्येवमादिना वेदान्तेषु ब्रह्म प्रतिपाद्य तस्यैव पुनरभावोऽभिलप्येत।

"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्"
[म० भा० ३-२-४२]

इति हि न्यायः। प्रतिपादनप्रक्रिया त्वेषा "यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह" [तै० २-४-१] इति। एतदुक्तं भवति—वाङ्मनसातीतमविषयान्तःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति। तस्माद्ब्रह्मणो रूपप्रपञ्चं प्रतिषेधति परिशिनष्टि ब्रह्मेत्येवगन्तव्यम्।

तदेतदुच्यते "प्रकृतैतावत्त्वं हि प्रतिषेधति" इति। प्रकृतं यदेतावदियत्तापरिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रतिषेधति। तद्धि प्रकृतं प्रपञ्चितं च पूर्वस्मिन्ग्रन्थेऽधिदैव-

---

सत्त्वधियोर्गुणदोषोक्तेरपि न तन्निषेध्यमित्याह—असन्निति। ब्रह्मणः सन्मात्रत्वसिद्धेरपि न तन्निषेध्यमित्याह—अस्तीति। किं च सर्वेषु वेदान्तेषु साक्षाद्वा परम्परया वा ब्रह्मैव प्रतिपाद्यते तेन तद्विरोधादपि न तन्निषेध्यमित्याह—सर्वेति। यत्तु वाङ्मनसातीतत्वादसंभावितसद्भावं निषेधार्हं ब्रह्मेति तत्राऽऽह—वागिति। तत्र हेतुः—नहीति। केनाभिप्रायेण तर्हि वाङ्मनसातीतत्वमुक्तं तत्राऽऽह—प्रतिपादनेति। वागाद्यतीतत्वेनासत्त्वे ब्रह्मणोऽवगम्यमाने किमियं प्रतिपादनप्रक्रियेत्याशङ्क्याऽऽह—एतदिति। पक्षद्वयायोगे फलितं निषेधार्थं निगमयति—तस्मादिति।

उक्तेऽर्थे सूत्रमवतार्य योजयति—तदेतदित्यादिना। ब्रह्मणो रूपद्वयं निषेध्यमित्यत्र हेतुमाह—तद्धीति। प्रकृतत्वमात्रेण निषेधे ब्रह्मणोऽपि निषेधः स्याद विशेषादित्याशङ्क्याऽऽह—प्रपञ्चितं चेति। ब्रह्मणः षष्ठ्यन्तपदवाच्यतया प्रपञ्चावच्छेदेनाप्रधानत्वात्प्रपञ्च एव प्रधानतया निषेधेन संबध्यत इत्यर्थः। पुरुषशब्दश्चव

---

१ ङ. ञ. इत्युप°। २ क. ज. इत्याद्यव। ३ ट. °ह्म" एव°। ४ क. ज. 'त्यभ्युपग' ५ ञ. °वत्त्वं प°। ट. °वत्परि' ६ ख ठ. °त्वे ब्र°।

तमध्यात्मं च। तज्जनितमेवं च वासनालक्षणमपरं रूपममूर्तरस-[1]भूतं पुरुषशब्दोदितं[3] लिङ्गात्मव्यपाश्रयं महारजनाद्युपमाभिर्द-र्शितम्। अमूर्तरसस्य पुरुषस्य चक्षुर्ग्राह्यरूपयोगित्वानुपपत्तेः। तदेतत्सप्रपञ्चं ब्रह्मणो रूपं संनिहितालम्बनेनेतिकरणेन प्रतिषे-धैकनयं प्रत्युपनीयत इति गम्यते। ब्रह्म तु रूपविशेषणत्वेन षष्ठ्या निर्दिष्टं पूर्वस्मिन्ग्रन्थे न स्वप्रधानत्वेन। प्रपञ्चिते च तदीये रूपद्वये रूपवतः स्वरूपजिज्ञासायामिदमुपक्रान्तम् "अथात आदेशो नेति नेति" [बृ०२-३-६] इति। तत्र कल्पितरूपप्रत्या-ख्यानेन ब्रह्मणः स्वरूपावेदनमिदमिति निर्णीयते। तदास्पदं हीदं समस्तं कार्यं नेति नेतीति प्रतिषिद्धम्। युक्तं च कार्यस्य वाचा-रम्भणशब्दादिभ्योऽसत्त्वमिति नेति नेतीति प्रतिषेधनम्। न तु ब्रह्मणः सर्वकल्पनामूलत्वात्। न चात्रेयमाशङ्का कर्तव्या—कथं

णात्तस्य च ब्रह्मविषयत्वाद्ब्रह्मापि प्रपञ्चितमित्याशङ्क्य पुरुषशब्दस्यात्र लिङ्गात्मविष-यत्वान्नैवमित्याह—तदिति। वासनालक्षणमेव रूपं किमित्युपमाभिरुच्यते प्रसिद्धरू-पत्वमेव पुरुषस्य कुतो नेष्टमित्याशङ्क्याऽऽह—अमूर्तेति। रूपद्वयस्य प्राधान्येन प्रकृ-तत्वे फलमाह—तदिति। अर्थतो ब्रह्मणोऽपि प्राधान्येन प्रकृतत्वाविशेषान्निषेध्यत्व-मित्याशङ्क्याऽऽह—ब्रह्म त्विति। अर्थतस्तस्य प्राधान्येऽपि राजपुरुषादाविव शब्दतः प्रधानतया प्रकृतं रूपद्वयमेव प्रकृतपरामर्शीनेतिशब्देनानूद्य निषेध्यमित्यर्थः। ब्रह्मणस्तर्हि प्राधान्येनाप्रकृतत्वादुत्तरत्रापि न प्रतिपाद्यतेत्याशङ्क्याऽऽह—प्रपञ्चिते चेति। एवमुप-क्रमेऽपि कथं वाक्यार्थो निर्णीयतामित्याशङ्क्याध्यारोपापवादन्यायं सूचयति—तत्रेति। निर्घटं भूतलमित्युक्ते घटस्यान्यत्र सत्त्ववद्ब्रह्मणि रूपद्वयनिषेधेऽपि ततोऽन्यत्र तद्भवेदि-त्याशङ्क्याऽऽह—तदास्पदमिति। उपादानादन्यत्र कार्ययोगात्तत्र निषिद्धस्य न क्वापि सत्तेति भावः। यत्तु प्रत्यक्षादिसिद्धस्य द्वैतस्य न निषेधस्तद्विरोधादिति तत्राऽऽह—युक्तं चेति। तत्त्वावेदनमानासिद्धत्वाद्वाचारम्भणादिशब्दाच्च द्वैतस्य वस्तुसत्त्ववैधुर्या-द्युक्ता निषेध्यतेति भावः। सत्त्वेन सिद्धं द्वैतं निषिध्यते चेद्ब्रह्मणोऽपि तथा सिद्ध्यवि-शेषान्निषेधतादवस्थ्यमित्याशङ्क्याऽऽह—न त्विति। आरोपाधिष्ठानत्वेन निषेधाव-धित्वेन चावशेषान्न ब्रह्मणो निषेध्यतेत्यर्थः। द्वे वावेत्यादिनोक्तं रूपद्वयं निषिध्यते चेत्पङ्कप्रक्षालनन्यायात्प्रसज्यप्रतिषेधे गौरवं स्यादित्याशङ्क्याऽऽह—न चेति।

---

१ ज. °व वा°। २ क. ज. °भूतपु°। ३ क. ज. °दितलिं°। ४ झ. °धकं न°। ५ ङ. °लिपतं च रू°। ६ ठ. ड. °तत्त्वफ°।

(ब्रह्मणो निषेधातीतत्वेन सत्यत्वस्थापनम्, अधि० ६)

हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयमेवं पुनः प्रतिषेधति—

" प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् "

इति। यतो नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति लोकप्रसिद्धं त्विदं रूपद्वयं ब्रह्मणि कल्पितं परामृशति प्रतिषेध्यत्वाय शुद्धब्रह्मस्वरूपप्रतिपादनाय चेति निरवद्यम्। द्वौ चैतौ प्रतिषेधौ यथासंरूपन्यायेन द्वे अपि मूर्तामूर्ते प्रतिषेधतः। यद्वा पूर्वः प्रतिषेधो भूतराशिं प्रतिषेधत्युत्तरो वासनाराशिम्। अथ वा " नेति नेति " [बृ० २·३·६] इति वीप्सेयमितीति यावत्किंचिदुत्प्रेक्ष्यते तत्सर्वं न भवतीत्यर्थः। परिगणितप्रतिषेधे हि क्रियमाणे यदि नैतद्ब्रह्म किमन्यद्ब्रह्म भवेदिति जिज्ञासा स्यात्। वीप्सायां तु सत्यां समस्तस्य विषयजातस्य प्रतिषेधादविषयः प्रत्यगात्मा ब्रह्मेति जिज्ञासा निवर्तते। तस्मात्प्रपञ्चमेव ब्रह्मणि कल्पितं प्रतिषेधति परिशिनष्टि ब्रह्मेति निर्णयः। इतश्चैष एव निर्णयः। यतस्ततः प्रतिषेधाद्भूयो ब्रवीति " अन्यत्परमस्ति " [बृ० २·३·६] इति। अभावावसाने हि प्रतिषेधे क्रियमाणे किमन्यत्परमस्तीति ब्रूयात्। तत्रैषाऽक्षरयो-

---

अत्रेति रूपद्वयनिषेधपक्षोक्तिः। शङ्का न कार्येत्यत्र हेतुमाह—यत इति। अप्रतिपाद्यं चेदनुवाद्यत्वं न च प्राप्तिफलं विनाऽनुवादस्तत्राऽऽह—लोकेति। तथाऽपि कथं पङ्कप्रक्षालनन्यायो न स्यादित्याशङ्क्य निषेधस्य फलवत्त्वादित्याह—शुद्धेति। उक्तरीत्या निषेधस्य निर्दोषत्वमुक्तं निगमयति—इति निरवद्यमिति। द्वौ निषेधौ तयोरवैयर्थ्यार्थं सर्वं निषेध्यमित्युक्तं प्रत्याह—द्वौ चेति। संभावितं पक्षान्तरमाह—यद्वेति। भावाभावविषयत्वेन वा निषेधद्वयं विवक्षितम्। पक्षान्तरमाह—अथवेति। वीप्सापक्षे वाक्यार्थमाह—इतीति। यावदिति पक्षान्तरेभ्यो विशेषार्थम्। तेषु निराकाङ्क्षो वाक्यार्थो न सिध्यतीत्याह—परीति। वीप्सापक्षे निराकाङ्क्षा वाक्यार्थधीरिति विशेषमाह—वीप्सायां त्विति। सूत्रावयवव्याख्यामुपसंहरति—तस्मादिति। अवयवान्तरमादाय व्याकरोति—इतश्चेति। कथं तावता निषेधस्य नाभावावसानत्वं तत्राऽऽह—अभावेति। नेति नेतीति निषेधात्परमस्तीति प्रतिपादकं किमित्यपेक्षायामादेशनिर्वचनवाक्यमेवेत्यक्षरयोजनया दर्शयति—तत्रेति। निर्वचनप्रकारमेवाऽऽका-

---

१ ट. °व प्र°। २ ङ. °राशिं प्रतिषेधति। अ°। ३ ज. हि नै°। ४ ट. °त्मेति। ५ ज. °यो ब्रह्म ब्र°। ६ क. ज. °धे कि°। ७ ब्र. °दमनु°। ८ ऊ. ङ. °शङ्क्याऽऽह।

जना—नेति नेतीति ब्रह्माऽऽदिश्य तमेवाऽऽदेशं पुनर्निर्वक्ति । नेति नेतीत्यस्य कोऽर्थः । न ह्येतस्माद्ब्रह्मणो व्यतिरिक्तमस्तीत्यतो नेतीत्युच्यते न पुनः स्वयमेव नास्तीत्यर्थः । तच्च दर्शयत्यन्यत्परमप्रतिषिद्धं ब्रह्मास्तीति । यदा पुनरेवमक्षराणि योज्यन्ते न ह्येतस्मादिति नेति नेति । न हि प्रपञ्चप्रतिषेधरूपादादेशनादन्यत्परमादेशनं ब्रह्मणोऽस्तीति । तदा ततो ब्रवीति च भूय इत्येतन्नामधेयविषयं योजयितव्यम् । अथ नामधेयम् " सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् " [बृ० २-३-६] इति हि ब्रवीतीति । तच्च ब्रह्मावसाने प्रतिषेधे समञ्जसं भवति । अभावावसाने तु प्रतिषेधे किं सत्यस्य सत्यमित्युच्येत । तस्माद्ब्रह्मावसानोऽयं प्रतिषेधो नाभावावसान इत्यध्यवस्यामः ॥ २२ ॥

तदव्यक्तमाह हि ॥ २३ ॥

यैत्तत्प्रतिषिद्धात्प्रपञ्चजातादन्यत्परं ब्रह्म तदस्ति चेत्कस्मान्न गृह्यत इति । उच्यते—" तदव्यक्तम् " अनिन्द्रियग्राह्यं

ङ्क्षापूर्वकमाह—नेत्यादिना । हि यस्मान्नेति नेत्यादिष्टादेतस्माद्ब्रह्मणोऽन्यद्व्यतिरिक्तं नास्ति ब्रह्मैव परमस्ति तस्मान्नेति नेत्युच्यते न तु सर्वाभावधियेति निर्वचनस्यार्थः । एवंप्रकारमेतन्निर्वचनमनिषिद्धं ब्रह्म वदतीत्याह—तच्चेति । निर्वचनमेवानिषिद्धं ब्रह्माऽऽहेति श्रुतियोजनयोक्तम् । इदानीं नामधेयमेव निषेधावशिष्टं ब्रह्माऽऽहेति विधान्तरेण श्रुतियोजनया दर्शयति—यदेति । किं तन्नामधेयं तदाह—अथेति । प्रकृतनिषेधस्याभावान्तत्वनिषेधार्थोऽथशब्दः । ननु नामधेयं निषेधस्याभावान्तत्वेऽपि तद्विषयं घटिष्यते नेत्याह—तच्चेति । द्वेधा सूत्रावयवव्याख्यामुपसंहरति—तस्मादिति ॥ २२ ॥

अनिषेध्यत्वेन वस्तु सत्यं ब्रह्मोक्त्वा तस्याग्राह्यत्वेनासत्त्वमाशङ्क्य प्रत्याह—तदव्यक्तमिति । सूत्रव्यावर्त्यमाह—यत्तदिति । आत्मनि गृह्यमाणे तदभिन्नब्रह्मापि ग्राह्यमिति वाऽऽपाद्यते भावत्वे घटवत्प्रत्यक्षग्राह्यं तस्य स्यादिति वा नाऽऽद्यः। प्रत्यगभिन्नत्वेऽप्यविद्यावृतत्वात्तद्ग्रहेऽपि तदग्रहसिद्धेरित्याह—उच्यत इति । न द्वितीय इत्याह—तदिति । कथमिन्द्रियाग्राह्यत्वं ब्रह्मणः सिद्धं तत्राऽऽह—

---

१ क. ज. नेती° । २ ङ. ञ. नेति नेती । ३ ङ. अ. °नं न ब्र° । ४ ज. प्राणो । ५ ङ. ज. यत्प्र° । ६ ठ. ङ. °ना । य° । ७ ठ. ङ. भिन्नं ब्र° । ८ ठ. ङ. °ता न स्या° ।

(ब्रह्मणो निषेधातीतत्वेन सत्यत्वस्थापनम्, अधि० ६)

सर्वदृश्यसाक्षित्वात् । " आह ह्येवं श्रुतिः—" न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा " [मुण्ड० ३-१८] " स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यते " [बृ० ३-९-२६] " यत्तदद्रेश्यमग्राह्यम् " [मुण्ड० १-१-६] " यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने " [तै० २-७-१] इत्याद्या । स्मृतिरपि—

" अव्यक्तोऽयमचिन्योऽयमविकार्योऽयमुच्यते "

[भ० गी० २-२५] इत्याद्या ॥ २३ ॥

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

" अपि " चैनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्ति योगिनः । संराधनं च भक्तिध्यानप्रणिधानाद्यनुष्ठानम् । कथं पुनरवगम्यते संराधनकाले पश्यन्तीति । प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः । तथाहि श्रुतिः—

"पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् "

[कठ०४ १] इति । "ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते

आह हीति । अन्यैर्देवैरिन्द्रियान्तरैरिति यावत् । श्रुत्युक्तिपरत्वेन सूत्रावयवं व्याख्याय विद्यान्तरेण व्याचष्टे—स्मृतिरिति ॥ २३ ॥

आत्मैव ब्रह्मविद्यावृतं चेन्न कदाचिदपि गृह्येत्याशङ्क्याऽऽह—अपीति । सूत्रं व्याकरोति—अपि चेति । नास्य सदा ग्राह्यत्वमग्राह्यत्वं वा समाध्यवस्थायां प्रत्यक्त्वेन भानादित्यर्थः । भक्तिध्यानाभ्यां प्रकर्षेण स्वीये मनसि प्रतीचो निधानं भक्तिध्यानप्रणिधानम् । आदिपदेन तत्पूर्वकजपनमस्कारादिग्रहणम् । तत्र प्रश्नपूर्वकं प्रमाणमाह—कथमिति । स्वयंभूः स्रष्टा परमात्मा खानि च्छिद्रोपलक्षितानीन्द्रियाणि पराञ्चनात्मविषयाणि व्यतृणद्धिंसितवान्सा हि तेषां हिंसा यदसदर्थविषयतया समर्पणमित्याह—पराञ्चीति । तेषां तथासृष्टत्वे गमकमाह—तस्मादिति । यदि पराञ्चमेवार्थमिन्द्रियैः पश्यति नान्तरात्मानं कथं तर्हि लोकस्य तत्र ज्ञानमित्याशङ्क्य साधनचतुष्टयवतः समाधिकाले शुद्धे मनसि प्रत्यक्त्वेन तद्दृष्टिरित्याह—कश्चिदिति । ततो नित्याद्यनुष्ठानात्परिशुद्धबुद्धिर्ज्ञानस्य करणव्युत्पत्त्याऽन्तःकरणस्य प्रसादो नैर्मल्यं तेन निरवयवं निष्प्रपञ्चं प्रत्यञ्चं ध्यायन्नविषयत्वेन तत्साक्षात्करोतीत्याह—ज्ञानेति । विगता निद्रा

---

१ ङ. ञ. इत्येवमाद्या । २ क. ज. ञ. ट. 'नं भ' । ३ क. ञ. पश्यति । ४ क. ठ. ड. सर्जनमि' । ५ ट. ड. 'विशेषत्वे' । ६ ठ. ड. 'न तं साक्षा' ।

निष्कलं ध्यायमानः " [मुण्ड० ३-१-८] इति चैवमाद्या । स्मृतिरपि—

" यं विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः " ॥
" योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् " ।
[महाभा० १२-४७-५४] इति चैवमाद्या ॥ २४ ॥

ननु संराध्यसंराधकभावाभ्युपगमात्परापरात्मनोरन्यत्वं स्यादिति, नेत्युच्यते—

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥

यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुलिकरकोदकप्रभृतिषु कर्मसूपाधिभूतेषु सविशेषा इवावभासन्ते न च स्वाभाविकीमविशेषात्मतां जहति । एवमुपाधिनिमित्त एवायमात्मभेदः स्वतस्त्वैकात्म्यमेव । तथाहि वेदान्तेष्वभ्यासेनासकृज्जीवप्राज्ञयोरभेदः प्रतिपाद्यते ॥ २५ ॥

अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥

अतश्च स्वाभाविकत्वादभेदस्याविद्याकृतत्वाच्च भेदस्य विद्ययाऽविद्यां विधूय जीवः परेणानन्तेन प्राज्ञेनाऽऽत्मनैकतां

येभ्यस्ते तथेति स्वापाद्विवेकः । जितः श्वासो यैरिति प्राणायामनिष्ठतोक्तिः । संतुष्टा इति मनोव्याकुलताव्यावृत्त्या स्वप्नाद्विवेकः । संयतानीन्द्रियाणि येषामिति जागरिताद्भेदः । एतानि विशेषणानि यमनियमादिसर्वाङ्गोपसंग्रहार्थानि । योगात्मत्वं तज्जधीगम्यत्वम् ॥ २४ ॥

सूत्रान्तरव्यावर्त्यमाह—नन्विति । व्यावर्तकं सूत्रमवतारयति—नेतीति । प्रकाशादिवच्चेति भागं विभजते—यथेति । यद्यपि दृष्टान्तादात्मा प्रकाशशब्दितोऽज्ञानतत्कार्ये कर्मण्युपाधौ सविशेषस्तथाऽपि वस्तुतस्तस्यावैशेष्यमैकरस्यमेवेति दार्ष्टान्तिकमाह—एवमिति । अभ्यासादिति व्याचष्टे—तथा हीति ॥ २५ ॥

जीवस्य ब्रह्मात्मत्वाप्तिः श्रुतिवशादपि वास्तवमैक्यमौपाधिकं नानात्वमित्याह—अत इति । अतोऽनन्तेनेति व्याचष्टे—अतश्चेति । अभेदस्य स्वाभाविकत्वे सूत्रा-

---

१ घ. ज. झ. ट. ये । २ ङ. ञ. 'वाप्युप' । ३ क. घ. ट. 'त्परेतरात्म' । ४ झ. 'परमात्म' ।

गच्छति। तथा हि लिङ्गम् " स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति " [मुण्ड० ३-२-९] " ब्रह्मैव सन्ब्रह्माप्येति " [बृ० ४-४-६] इत्यादि ॥ २६ ॥

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

तस्मिन्नेव संराध्यसंराधकभावे मतान्तरमुपन्यस्यति स्वमत-विशुद्धये। क्वचिज्जीवप्राज्ञयोर्भेदो व्यपदिश्यते " ततस्तु तं पश्यते निष्कलं ध्यायमानः " [मुण्ड० ३-१-८] इति ध्यातृ-ध्यातव्यत्वेन द्रष्टृद्रष्टव्यत्वेन च। "परात्परं पुरुषमुपैति दिव्यम्" [मुण्ड० ३-२-८] इति गन्तृगन्तव्यत्वेन। " यः सर्वाणि भूतान्यन्तरो यमयति"[बृह० ३-७-१५] इति नियन्तृनियन्तव्य-त्वेन। क्वचित्तु तयोरेवाभेदो व्यपदिश्यते " तत्त्वमसि " [छा० ६-८-७] " अहं ब्रह्मास्मि " [बृ० १-४-१०] " एष त आत्मा सर्वान्तरः " [बृ० ३-४-१] " एष त आत्माऽन्तर्याम्यमृतः" [बृ० ३ ७-३] इति। तत्रैवमुभयव्यपदेशे सति यद्यभेद एवैकान्ततो गृह्यते भेदव्यपदेशो निरालम्बन एव स्यात्। अत उभयव्यपदेशदर्शनादहिकुण्डलवदत्र तत्त्वं भवितुमर्हति। यथाऽ-हिरित्यभेदः कुण्डलाभोगप्रांशुत्वादीनीति च भेद एवमि-हापीति ॥ २७ ॥

क्यवं व्याकुर्वाणो हेतुमाह—तथा हीति। आदिपदेन ब्रह्मविदाप्नोति परमि-त्यादि ग्राह्यम् ॥ २६ ॥

जीवब्रह्मणोरात्यन्तिकमैक्यमुक्त्वा भेदाभेदवादमुत्थापयति—उभयेति। सूत्रद्वयस्य संगतिमाह—तस्मिन्निति। तदुपन्यासफलमाह—स्वमतेति। अस्तु तर्हि भेदव्य-पदेशात्तयोर्भिन्नत्वमेव तत्राऽऽह—क्वचिदिति। अन्यतरव्यपदेशात्तदन्यस्य त्याज्य-तामाशङ्क्याऽऽह—तत्रेति। भेदो नियतो गृह्यते चेदभेदोक्तिरनालम्बना स्यादिति द्रष्टव्यम्। अन्यतरोक्तिरपि निरालम्बनत्वायोगे फलितमाह—अत इति। अत्रेति ब्रह्मात्मोक्तिः। अहिकुण्डलवदित्युक्तं विवृणोति—यथेति ॥ २७ ॥

---

१ क. ज. ञ. पश्यति। २ ङ. ञ. °न च। क°। ३ ज. °चित्तयो° ४ क. ञ.°कान्तः परि-यृ°। ५ ज. °त्वादिना तु भे°। ६ ङ. ञ. °दीनि च भे°। ७ क. °ति भे°। ८ ठ. ड. °शाद°।

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

अथ वा "प्रकाशाश्रयवत्" एतत्प्रतिपत्तव्यम् । यथा प्रकाशः सावित्रस्तदाश्रयश्च सविता नात्यन्तभिन्नावुभयोरपि तेजस्त्वाविशेषात् । अथ च भेदव्यपदेशभाजौ भवत एवमिहापीति॥ २८ ॥

पूर्ववद्वा ॥ २९ ॥

यथा वा पूर्वमुपन्यस्तं " प्रकाशादिवच्चावैशेष्यम् " [सू० ३-२-२५] इति तथैवैतद्द्रष्टुमर्हति । तथा ह्यविद्याकृतत्वाद्बन्धस्य विद्यया मोक्ष उपपद्यते । यदि पुनः परमार्थत एव बद्धः कश्चिदात्माऽहिकुण्डलन्यायेन परस्याऽऽत्मनः संस्थानभूतः प्रकाशाश्रयन्यायेन चैकदेशभूतोऽभ्युपगम्येत ततः पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रसज्येत । न चात्रोभावपि भेदाभेदौ श्रुतिस्तुल्यवद्व्यादिशति । अभेदमेव हि प्रतिपाद्यत्वेन निर्दिशति भेदं तु पूर्वप्रसिद्धमेवानुवदत्यर्थान्तरविवक्षया । तस्मात् "प्रकाशादिवच्चावैशेष्यम्" इत्येष एव सिद्धान्तः ॥ २९॥

प्रतिषेधाच्च ॥ ३० ॥ (६)

इतश्चैष एव सिद्धान्तः । यत्कारणं परस्मादात्मनोऽन्यं चेतनं प्रतिषेधति शास्त्रम् " नान्योऽतोऽस्ति द्रष्टा " [बृ० ३-७-२३] इत्येवमादि । " अथात आदेशो नेति नेति "

अहिकुण्डलन्यायेन परस्य जीवः संस्थानभूतो दर्शितः । संप्रति तदेकदेशभूत इति विधान्तरमाह—प्रकाशेति । तद्व्याकरोति—अथवेति । ब्रह्मात्मतत्त्वमेतदित्युक्तम् । दृष्टान्तं व्याचष्टे—यथेति । अभेद एव तर्हि तयोर्नेत्याह—अथ चेति । इहापीति पूर्ववद्ब्रह्मात्मोक्तिः । परमतमुपसंहर्तुमितिशब्दः ॥ २८ ॥

स्वसिद्धान्तमाह—पूर्ववद्वेति । तत्प्रपञ्चयति—यथेति । तर्हि भेदस्यैव प्रतिपाद्यता मैवं प्रसिद्धानुवादेनाप्रसिद्धस्य तद्भावादित्याह—अभेदमिति । परमतायोगे स्वमतमुपसंहरति—तस्मादिति ॥ २९ ॥

स्वमतसंभवे हेत्वन्तरमाह—प्रतिषेधाच्चेति । चकारार्थमाह—इतश्चेति । इतःशब्दार्थं विवृण्वन्नादौ चेतनभेदनिषेधमुदाहरति—यदिति । अचेतनभेदनिषेधं दर्शयति—अथेति ।

---

१ ट. °थ भे° । २ ट. °था पू° । ३ ङ. ज. 'थैव त' । ४ क. ङ. ज. ञ. °न वा प° । ५ ङ. ज. हि श्रुतिः प्र° । ६ झ. 'दिषु । "अ° ।

(ब्रह्मणोऽन्यस्यावस्तुत्वव्यवस्थापनम्, अधि० ७)

[बृ० २-३-६] " तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम् " [बृ० २-५-१९] इति च ब्रह्मव्यतिरिक्तप्रपञ्चनिराकरणाद्ब्रह्ममात्रपरिशेषाच्चैष एव सिद्धान्त इति गम्यते ॥ ३० ॥ (६)

(ब्रह्मणोऽन्यस्यावस्तुत्वव्यवस्थापनम्, अधि० ७)

परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥

यदेतन्निरस्तसमस्तप्रपञ्चं ब्रह्म निर्धारितमस्मात्परमन्यत्तत्त्वमस्ति नास्तीति श्रुतिविप्रतिपत्तेः संशयः। कानिचिद्धि वाक्यान्यापातेनैव प्रतिभासमानानि ब्रह्मणोऽपि परमन्यत्तत्त्वं प्रतिपादयन्तीव। तेषां हि परिहारमभिधातुमयमुपक्रमः क्रियते। परमतो ब्रह्मणोऽन्यत्तत्त्वं भवितुमर्हति। कुतः। सेतुव्यपदेशादुन्मानव्यपदेशात्संबन्धव्यपदेशाद्भेदव्यपदेशाच्चेति। सेतुव्यपदेशस्तावत् " अथ य आत्मा स सेतुर्विधृतिः " [छा० ८-४-१] इत्यात्मशब्दाभिहितस्य ब्रह्मणः सेतुत्वं संकीर्तयति। सेतुशब्दश्च हि लोके जलसंतानविच्छेदकरे मृदार्वादिप्रचये प्रसिद्धः। इह च सेतुशब्द आत्मनि प्रयुक्त इति लौकिकसेतोरिवाऽऽत्मसेतोर-

---

उक्तनिषेधद्वयात्मकशास्त्रतात्पर्यं संगृह्णाति—ब्रह्मेति। तदेवं निषेधवाक्यार्थालोचनया निष्प्रपञ्चं ब्रह्म वाक्यार्थान्वययोग्यं तत्पदलक्ष्यमिति ॥ ३० ॥ (६)

नेति नेतीति ब्रह्मातिरिक्तं सर्वं निषेध्यमित्युक्तं तदयुक्तं सेत्वादिव्यपदेशेभ्यो वस्त्वन्तरसत्त्वावगमात्। द्युभ्वाद्यधिकरणे सेतुव्यपदेशस्य प्रतिनीतत्वेऽपि भेदादिव्यपदेशानां गतिमजानन्नाशङ्कते—परमिति। विषयोक्तिपूर्वकं सबीजं संशयमाह—यदिति। सर्वश्रुतिविप्रतिपत्तिनिरासेनाद्वयं ब्रह्मैव वस्तु नान्यदिति स्थिते कथमयमारम्भः स्यादित्याशङ्क्याऽऽह—कानिचिदिति। मन्दाशङ्कानिरासाय तत्पदलक्ष्यस्याद्वयत्वप्रपञ्चार्थोऽयमारम्भस्ततोऽस्य पादादिसंगतिसौलभ्यम्। पूर्वपक्षे सद्वितीयत्वाद्ब्रह्मणो द्वितीयनिषेधासिद्धिः। सिद्धान्ते तस्याद्वयत्वाद्वैतनिषेधोपपत्तिः। अन्यस्य निषेधाद्ब्रह्मणश्च श्रुतत्वात्तदस्ति चेद्ब्रह्मातिरिक्तस्यापि श्रुत्योक्तत्वादस्तितेति मत्वा पूर्वपक्षसूत्रं योजयति—परमित्यादिना। इतिशब्दोऽक्षरयोजनासमाप्त्यर्थः। तत्राऽऽद्यं विवृणोति—सेत्विति। ब्रह्मणः सेतुत्वेऽपि कथं सद्वितीयत्वमित्याशङ्क्य व्याप्तिमाह—सेतुशब्दश्चेति। ब्रह्म सद्वितीयं सेतुत्वाल्लौकिकसेतुवदिति मत्वाऽऽह—इह चेति।

---

१ ज. °शेषणाच्चै°। २ ज. °स्तप्र°। ३ घ. ङ. ट. °चिद्वाक्या°। ४ क. ज. म. °षां प°। ५ घ. ङ. म. °शाच्च। से°। ६ झ. °ति क.। ७ ठ. ड. °पक्षं यो°।

न्यस्य वस्तुनोऽस्तित्वं गमयति। " सेतुं तीर्त्वा " [छा० ८-४-२] इति च तरतिशब्दप्रयोगात्। यथा लौकिकं सेतुं तीर्त्वा जाङ्गलमसेतुं प्राप्नोत्येवमात्मानं सेतुं तीर्त्वाऽनात्मानमसेतुं प्राप्नोतीति गम्यते। उन्मानव्यपदेशश्च भवति तदेतद्ब्रह्म चतुष्पाद्दष्टाशफं षोडशकलमिति। यच्च लोक उन्मितमेतावदिदमिति परिच्छिन्नं कार्षापणादि ततोऽन्यद्वस्त्वस्तीति प्रसिद्धम्। तथा ब्रह्मणोऽप्युन्मानात्ततोऽन्येन[1] वस्तुना भवितव्यमिति गम्यते। तथा संबन्धव्यपदेशो भवति "सता सोम्य तदा संपन्नो भवति" [छा० ६-८-१] इति " शारीर आत्मा " [तै० २-३-१] " प्राज्ञेनाऽऽत्मना संपरिष्वक्तः " [बृ० ४-३-२१] इति च। मितानां च मितेन संबन्धो दृष्टो यथा नराणां नगरेण। जीवानां च ब्रह्मणा संबन्धं व्यपदिशति सुषुप्तौ। अतस्ततः परमन्यदमितमस्तीति[2] गम्यते। भेदव्यपदेशश्चैनमर्थं गमयति। तथा हि " अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते " [छा० १-६-६] इत्यादित्याधारमीश्वरं व्यपदिश्य ततो भेदेनाक्ष्याधारमीश्वरं व्यपदिशति " अथ य एषोऽ-

---

इतश्च ब्रह्मसेतोः सद्वितीयत्वमित्याह--सेतुमिति। कथमेतावता वस्त्वन्तरास्तित्वं तत्राऽऽह—यथेति। जाङ्गलं वातभूयिष्ठमित्युक्तत्वाद्वातबहुलो देशो जाङ्गलम्। इह तु न्यायसाम्येन स्थलमात्रमुक्तम्। द्वितीयं हेतुं व्याकरोति—उन्मानेति। प्राची प्रतीची दक्षिणोदीचीति चतस्रः कलाः प्रकाशवान्पादः। पृथिव्यन्तरिक्षं द्यौः समुद्र इत्यनन्तवान्पादः। अग्निः सूर्यश्चन्द्रमा विद्युदिति ज्योतिष्मान्पादः। चक्षुः श्रोत्रं वाङ्मन इत्यायतनवान्पादः। एते पादाश्चत्वारोऽस्येति चतुष्पाद्ब्रह्म पादानामर्धान्यष्टौ शफान्यस्येत्यष्टाशफं चतस्रश्चतस्रः कला एकैकस्य पादस्येति षोडशकलं षोडशावयवमित्यर्थः। एवमुन्मानेऽपि कथं वस्त्वन्तरास्तित्वं तत्राऽऽह—यच्चेति। कार्षापणशब्देन षोडशपणानां संज्ञोक्ता। ब्रह्म सद्वितीयमुन्मितत्वात्संमतवदित्याह--तथेति। तृतीयं हेतुं व्याचष्टे--तथेति। तथाऽपि कथं सद्वितीयत्वमित्याशङ्क्य व्याप्तिमाह--मितानां चेति। व्याप्तस्य हेतोः पक्षधर्मतामाह—जीवानां चेति। विमतं सद्वितीयं संबन्धवत्त्वान्नगरवदित्याह—अत इति। चतुर्थं हेतुं विवृणोति--भेदेति। तत्राऽऽधारतो भेदव्यपदेशमुदाहरति—तथा हीति। अतिदेशतस्तं दर्श-

---

१ ज. 'दिति। २ ट. 'न च व'। ३ ज. 'दपि तत्त्वमि'।

(ब्रह्मणोऽन्यस्यावस्तुत्वव्यवस्थापनम्, अधि० ७)

क्षिणि पुरुषो दृश्यते" [छा० १-७-५] इति । अतिदेशं चास्यामुना रूपादिषु करोति "तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम" [छा० १-७-५] इति । सावधिकं चेश्वरत्वमुभयोर्व्यपदिशति "ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च" [छा० १-६-८] इत्येकस्य। "ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां च" [छा० १-७-६] इत्येकस्य। यथेदं मागधस्य राज्यमिदं वैदेहस्येति ॥ ३१ ॥

एवमेतेभ्यः सेत्वादिव्यपदेशेभ्यो ब्रह्मणः परमस्तीत्येवं प्राप्ते प्रतिपद्यते—

सामान्यात्तु ॥ ३२ ॥

तुशब्देन प्रदर्शितां प्राप्तिं निरुणद्धि । न ब्रह्मणोऽन्यत्किंचिद्भवितुमर्हति प्रमाणाभावात् । न ह्यन्यस्यास्तित्वे किंचित्प्रमाणमुपलभामहे सर्वस्यैं हि जनिमतो वस्तुजातस्य जन्मादि ब्रह्मणो भवतीति निर्धारितम् । अनन्यत्वं च कारणात्कार्यस्य। न च ब्रह्मव्यतिरिक्तं किंचिदजं संभवति "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" [छा० ६-२-१] इत्यवधारणात् ।

यति—अतिदेशं चेति । अस्येत्यक्षिस्थस्य पुरुषस्येत्यर्थः । अमुनेत्यादित्यमण्डलस्थेन पुरुषेण सहेति यावत् । अवधितोऽपि भेदोक्तिं साधयति—सावधिकं चेति । एकस्येत्याधिदैविकस्य पुरुषस्येति यावत् । पुनरेकस्येत्याध्यात्मिकस्य पुरुषस्येत्यर्थः । ऐश्वर्यस्य सावधिकत्वे दृष्टान्तमाह—यथेति । विमतं सद्द्वितीयं भेदव्यपदेशभाक्त्वाद्घटवदित्यर्थः ॥ ३१ ॥

पूर्वपक्षमुपसंहरति—एवमिति । ब्रह्मणः सद्द्वितीयत्वे ततोऽन्यस्य निषेध्यत्वोक्तिरयुक्तेति वक्तुमितीत्युक्तम् । पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति । सूत्रं व्याचष्टे—तुशब्देनेति । निरोधप्रकारमभिनयति—नेति । तर्हि सादि किंवाऽनादि । प्रथमं प्रत्याह—प्रमाणेति । तदेव स्फुटयति—न हीति । अभेदेऽपि मानादृष्टिस्तुल्येत्याशङ्क्य जन्मादिसूत्रमारभ्य तत्र तत्र सिद्धमर्थं स्मारयति—सर्वस्येति । आरम्भणाधिकरणसिद्धमर्थं कथयति—अनन्यत्वं चेति । द्वितीयं निराह—न चेति । ब्रह्मा-

---

१ ङ. ञ. °कामनां । २ ङ. ञ. °कामनां । ३ ट. °तिपाद्य° । ४ ब्र. °स्य ज° । ५ ज. °रका-रका° । ६ ज. न ब्र° ।

एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञानान्न ब्रह्मव्यतिरिक्तवस्त्व-[1][2]स्तित्वमवकल्पते । ननु सेत्वादिव्यपदेशा ब्रह्मव्यतिरिक्तं तत्त्वं सूचयन्तीत्युक्तम् । नेत्युच्यते । सेतुव्यपदेशस्तावन्न ब्रह्मणो बाह्यस्य सद्भावं प्रतिपादयितुं क्षमते सेतुरात्मेति ह्याह[3] न ततः परमस्तीति । तत्र परस्मिन्नसति सेतुत्वं नावकल्पत इति परं किमपि कल्प्येत । न चैतन्न्याय्यं हठो ह्यप्रसिद्धकल्पना । अपि च सेतुव्यपदेशादात्मनो[4][5] लौकिकसेतुनिदर्शनेन[6] सेतु-बाह्यवस्तुतां प्रसञ्जयता मृदारुमयताऽपि प्रसज्ज्येत[7][8] । न चैत-न्न्याय्यम् । अजत्वादिश्रुतिविरोधात् । सेतुसामान्यात्तु सेतुशब्द आत्मनि प्रयुक्त इति श्लिष्यते । जगतस्तन्मर्यादानां च विधार-कत्वं सेतुसामान्यमात्मनः । अतः सेतुरिव सेतुरिति प्रकृत आत्मा स्तूयते । "सेतुं तीर्त्वा" [छा० ८-४-२] इत्यपि तरतेरतिक्रमासं-

---

तिरिक्तवस्त्वभावे श्रुतिवत्तदर्थापत्तिमाह—एकेति । ब्रह्मणः सद्वितीयत्वे मानान्युक्ता-नीति शङ्कते—नन्विति । तत्र हेतुव्यपदेशस्य द्वितीयवस्तुसाधकत्वं नास्तीत्याह—नेतीति । स हि श्रुतितोऽर्थतो वा वस्त्वन्तरं साधयति तत्राऽऽद्यं दूषयति—सेत्विति । द्वितीयं शङ्कते—तत्रेति । श्रौतार्थविरोधादार्थिकार्थो न युक्तो लिङ्गस्य श्रुतितो दुर्बलत्वादित्याह—न चेति । इतश्च तस्य न वस्त्वन्तरसाधकत्वमित्याह—अपि चेति । विवक्षितं सेतुसाम्यमुपेक्ष्य तद्व्याप्तमर्थान्तरं कल्पयतोऽतिप्रसक्तिः स्यादिति हेत्वन्तरमेव स्फुटयति—सेत्विति । यावति स्वीकृते श्रुतिर्न विरुध्यते तावदेव स्वीकर्तव्यं तस्या निर्दोषत्वेन बलवत्तरत्वादित्याह—न चेति । सेतुशब्दस्य तार्हि का गतिरित्याशङ्क्य सूत्रयोजनया दर्शयति—सेतुसामान्यादिति । किं तत्प्र-सिद्धेन सेतुना सामान्यमात्मनि सेतुशब्दप्रयोगे निमित्तं तदाह—जगत इति । तस्य जगतो मर्यादास्तत्तन्नियतार्थक्रियासु व्यवस्थितत्वलक्षणास्तासां तदाश्रयस्य जग-तश्चान्तर्यामितया यदात्मनो विधारकत्वं तस्य सेतुसामान्यमित्यर्थः । तेनाऽऽत्मनि सेतुशब्दप्रयोगे[9][10] सति किं सिध्यति तदाह—अत इति । यत्तु तरतिशब्दादात्मसेतोः सद्वितीयत्वं तत्राऽऽह—सेतुमिति । स्वस्यैव स्वातिक्रमायोगात्प्राप्नोत्यर्थस्तरतिरित्य-युक्तं प्राप्नोतेरपि स्वात्मन्ययोगात् । ब्रह्मविदाप्नोतीतिवदुपपत्तावपि नात्र तरतिस्त-

---

१ ङ. ज. अ. न्न च ब्र' । २ ङ. ज. अ. ट. 'रिक्तं व' । ३ ङ. सत्वं । ४ ट. 'ह नातः । ५ क. ङ. अ. न पुनस्ततः । ६ ज. 'नो लोकसे' । ७ क. ज. ट. 'न सबा' । ८ क. प्रासङ्क्ष्येत । ९ क. ज. ट. 'रतिर' । १० ख. ठ. ड. 'गे किं ।

भवात्प्राप्तोत्यर्थ एव वर्तते। यथा व्याकरणं तीर्ण इति प्राप्त इत्युच्यते नातिक्रान्तस्तद्वत् ॥ ३२ ॥

बुद्ध्यर्थः पादवत् ॥ ३३ ॥

यदप्युक्तमुन्मानव्यपदेशादस्ति परमिति तत्राभिधीयते। उन्मानव्यपदेशोऽपि न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वप्रतिपत्त्यर्थः। किमर्थस्तर्हि "बुद्ध्यर्थः" उपासनार्थ इति यावत्। चतुष्पादष्टाशफं षोडशकलमित्येवंरूपा बुद्धिः कथं नु नाम ब्रह्मणि स्थिरा स्यादिति विकारद्वारेण ब्रह्मण उन्मानकल्पनैव क्रियते। न ह्यविकारेऽनन्ते ब्रह्मणि सर्वैः पुंभिः शक्या बुद्धिः स्थापयितुं मन्दमध्यमोत्तमबुद्धित्वात्पुंसामिति। "पादवत्"। यथा मन-आकाशयोरध्यात्ममधिदैवतं च ब्रह्मप्रतीकयोराम्नातयोश्चत्वारो वागादयो मनःसंबन्धिनः पादाः कल्प्यन्ते चत्वारश्चाग्न्यादय आकाशसंबन्धिन आध्यानाय तद्वत्। अथवा पादवदिति यथा कार्षापणे पादविभागो व्यवहारप्राचुर्याय कल्प्यते। न हि सकलेनैव कार्षापणेन सर्वदा सर्वे जना व्यवहर्तुमीशते क्रयविक्रये परिमाणानियमात्तद्वदित्यर्थः ॥ ३३ ॥

दर्थो वृद्धप्रयोगानुपलब्धेरित्याशङ्क्याऽऽह—यथेति ॥ ३२ ॥

सेतुव्यपदेशवद्द्वितीयं हेतुं निरस्यति—बुद्ध्यर्थ इति। व्यावर्त्यमनूद्य व्यावर्तकं सूत्रमादाय विभजते—यदपीति। उन्मानव्यपदेशोऽपीत्यपिना सेतुव्यपदेशो दृष्टान्त्यते। उपासनार्थत्वमुन्मानव्यपदेशस्य विशदयति—चतुष्पादिति। शुद्धं ब्रह्म हित्वा सोपाधिके किमिति तत्र बुद्धिः स्थिरी क्रियते तत्राऽऽह—न हीति। उत्तमबुद्धीनां झटित्यनौपाधिके ब्रह्मणि बुद्धिप्रवेशेऽपीतरेषां तदभावात्तेषामपि संग्रहार्थं सोपाधिके ब्रह्मणि स्थिरी क्रियते बुद्धिरिति फलितं वक्तुमितीत्युक्तम्। सूत्रभागमादाय वैदिकोदाहरणत्वेन व्याकरोति—पादवदित्यादिना। वागादय इत्यादिशब्देन प्राणश्चक्षुः श्रोत्रमिति गृहीतम्। अग्न्यादय इत्यादिशब्देन वायुरादित्यो दिश इति त्रयमुक्तम्। इदानीं तमेव सूत्रावयवं लौकिकत्वेन योजयति—अथवेति। पादविभागं विनाऽपि व्यवहारबाहुल्यं स्यादित्याशङ्क्याऽऽह—न हीति। उक्तदृष्टान्तेन मन्दमध्यमधियां ध्यानव्यवहाराय ब्रह्मण्युन्मानकल्पनेति दार्ष्टान्तिकमाह—तद्वदिति ॥ ३३ ॥

---

१ ज. ट. °प्रसिद्ध्यर्थः। २ क. ज. ट. °र्थं ना°। ३ ट. °रेणोन्मा°।

स्थानविशेषात्प्रकाशादिवत् ॥ ३४ ॥

इह सूत्रे द्वयोरपि संबन्धभेदव्यपदेशयोः परिहारो[२] विधीयते। यदप्युक्तं संबन्धव्यपदेशाद्भेदव्यपदेशाच्च परमतः स्यादिति तदप्यसत्। यत एकस्यापि स्थानविशेषापेक्षयैतौ व्यपदेशावुपपद्येते। संबन्धव्यपदेशे तावदयमर्थः—बुद्ध्याद्युपाधिस्थानविशेषयोगादुद्भूतस्य विशेषविज्ञानस्योपाध्युपशमे य उपशमः स परमात्मना संबन्ध इत्युपाध्यपेक्षयोपचर्यते न परिमितत्वापेक्षया। तथा भेदव्यपदेशोऽपि ब्रह्मण उपाधिभेदापेक्षयैवोपचर्यते न स्वरूपभेदापेक्षया। "प्रकाशादिवत्" इत्युपमोपादानम्। यथैकस्य प्रकाशस्य सौर्यस्य चान्द्रमसस्य वोपाधियोगादुपजातविशेषस्योपाध्युपशमात्संबन्धव्यपदेशो भवत्युपाधिभेदाच्च भेदव्यपदेशः। यथा वा सूचीपाशाकाशादिषूपाध्यपेक्षयैवैतौ[७] संबन्धभेदव्यपदेशौ भवतस्तद्वत् ॥ ३४ ॥

उपपत्तेश्च ॥ ३५ ॥

उपपद्यते चात्रेदृश एव संबन्धो नान्यादृशः[९] "स्वमपीतो भवति" [छा० ६·८·१] इति स्वरूपसंबन्धमेनमामनन्ति

अवशिष्टं हेतुद्वयं निराचष्टे—स्थानेति। सूत्रतात्पर्यमाह—इहेति। तमेव परिहारमुक्त्वाऽनुवादद्वारा स्फोरयति—यदपीति। तत्र सूत्रावयवं हेतुत्वेन योजयति—यत इति। स्थानविशेषो बुद्धिः। आदित्यश्चक्षुरित्यादिः। द्वयोरपि परिहारं संक्षिप्य विभज्य दर्शयन्नादौ संबन्धव्यपदेशं प्रत्याह—संबन्धेति। भेदव्यपदेशेऽपि स्थानविशेषादिति पदं योजयति—तथेति। व्यपदेशयोरौपाधिकत्वे प्रकाशदृष्टान्तं व्याचष्टे—प्रकाशेत्यादिना। आदिशब्देनोक्तमुदाहरणान्तरमाह—यथा वेति। एवमेकस्मिन्नपि ब्रह्मण्युपाध्यपेक्षावेतौ व्यपदेशावित्याह—तद्वदिति ॥ ३४ ॥

मुख्ये व्यपदेशद्वये संभवति कुतस्तदौपचारिकमुच्यते तत्राऽऽह—उपपत्तेश्चेति। तत्र संबन्धव्यपदेशे सूत्रं योजयति—उपपद्यते चेति। अत्रेति ब्रह्मात्मनोरुक्तिः। औपचारिकस्यैव संबन्धस्योपपत्तिमुपपादयति—स्वमिति। मुख्यसंबन्धासंभवं साध-

---

१ क. ज. ञ. ट. 'पि व्य'। २ ङ. ज. ञ. ट. 'रोऽभिधी'। ३ क. ङ. ज. 'क्षयैवोप'। ४ ज. 'स्य वा चा'। ५ ञ. सूच्याकाशाकाशादि'। ६ ङ. 'शाकाशादि'। ७ क. ङ. ज. ञ. ट. 'तौ भे'। ८ ङ. ञ. 'शः। यथा स्व'। ९ ख. 'क्षुरादित्या'। १० ठ. ड. मुख्यव्य'।

स्वरूपस्यानपायित्वात् । न नरनगरन्यायेन संबन्धो घटते । उपाधिकृतस्वरूपतिरोभावात्तु " स्वमपीतो भवति " [छा०६-८-१] इत्युपपद्यते । तथा भेदोऽपि नान्यादृशः संभवति । बहुतरश्रुतिप्रसिद्धैकेश्वरत्वविरोधात् । तथा च श्रुतिरेकस्याप्याकाशस्य स्थानकृतं भेदव्यपदेशमुपादयति " योऽयं बहिर्धा पुरुषादाकाशः " [छा० ३-१२-७] " योऽयमन्तः पुरुष आकाशः " [छा० ३-१२-८] " योऽयमन्तर्हृदय आकाशः " [छा० ३-१२-९] इति ॥ ३५ ॥

तथाऽन्यप्रतिषेधात् ॥ ३६ ॥

एवं सेत्वादिव्यपदेशान्परपक्षहेतूनुन्मथ्य संप्रति स्वपक्षं हेत्वन्तरेणोपसंहरति । " तथाऽन्यप्रतिषेधात् " अपि न ब्रह्मणः परं वस्त्वन्तरमस्तीति गम्यते । तथाहि "स एवाधस्तात् " [छा० ७-२५-१] " अहमेवाधस्तात् " [छा० ७-२५-१] " आत्मैवाधस्तात् " [छा० ७-२५-२] " सर्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्वं वेद " [बृ०२-४-६]" ब्रह्मैवेदं सर्वम्" [मुण्ड०२-२-११] "आत्मैवेदं सर्वम्" [छा०७-२५-२]"नेह नानाऽस्ति किंचन " [बृ० ४-४-१०] "यस्मात्परं नापरमस्ति किंचित् " [श्वे०३-९] " तदेतद्ब्रह्मापूर्वमनपरम-

---

यति—स्वरूपस्येति । संबन्धस्य द्विनिष्ठत्वादेकस्मिन्नयोगमाशङ्क्याऽऽह-उपाधीति । इदानीमौपचारिकं भेदमादाय सूत्रं योजयति—तथेति । श्रौतव्यपदेशस्य मुख्यत्वमेव न त्वौपचारिकत्वमन्यत्राद्दष्टेरित्याशङ्क्याऽऽह—तथा चेति ॥ ३५ ॥

स्वपक्षे हेत्वन्तरमाह—तथेति । सूत्रतात्पर्यमाह—एवमिति । ब्रह्मणोऽद्वितीयत्वं स्वपक्षः । हेत्वन्तरमेव सूत्रयोजनया विशदयति—तथेति । यथा सेत्वादिव्यपदेशनिरासेभ्यो न वस्त्वन्तरधीस्तथेति यावत् । अन्यप्रतिषेधमुदाहरति—तथाहीति । तस्य तात्पर्यं व्याचष्टे—अहमेवेति । अहंकारस्य सर्वात्मत्वप्राप्तिं प्रत्याह—आत्मैवेति । निन्दानुपपत्त्या भेदनिषेधं दर्शयति—सर्वमिति । बाधायां सामानाधिकरण्यादपि तत्सिद्धिरित्याह—ब्रह्मैवेति । आर्थिकीं निषेधधियमुक्त्वा साक्षादेव तत्प्रतीतिमाह—नेहेति । यस्मात्परमित्यत्र तेनेदं पूर्णं पुरुषेणेत्युत्तरेण संबन्धः । सेत्वादि-

---

१ क. ङ. ञ. 'पस्य चान' । २ ट. 'बन्ध उपपद्यते । ३ ज. 'कृतभे' । ४ क. ङ 'ति च ॥ ३५ ॥ ५ ठ. ड. 'देशेभ्यो ।

नन्तरमबाह्यम् " [बृ० २-५-१९] इत्येवमादिवाक्यानि स्वप्रकरणस्थान्यन्यार्थत्वेन परिणेतुमशक्यमानानि ब्रह्मव्यतिरिक्तं वस्त्वन्तरं वारयन्ति । सर्वान्तरश्रुतेश्च [बृह० ३-४-१] न परमात्मनोऽन्योऽन्तरात्माऽस्तीत्यवगम्यते ॥ ३६ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥ (७)

" अनेन " सेत्वादिव्यपदेशनिराकरणेनान्यप्रतिषेधसमाश्रयणेन च " सर्वगतत्वम् " अप्यात्मनः सिद्धं भवति । अन्यथा हि तन्न सिध्येत् । सेत्वादिव्यपदेशेषु हि मुख्येष्वङ्गीक्रियमाणेषु परिच्छेद आत्मनः प्रसज्येत सेत्वादीनामेवमात्मकत्वात् । तथाऽन्यप्रतिषेधेऽप्यसति वस्तु वस्त्वन्तराद्व्यावर्तत इति परिच्छेद एवाऽऽत्मनः प्रसज्येत । सर्वगतत्वं चास्य " आयामशब्दादिभ्यः " अवगम्यते । आयामशब्दो व्याप्तिवचनः शब्दः "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः " [छा० ८-१-३] " आकाशवत्सर्वगतश्च नित्यः " " ज्यायान्द्यिवो ज्यायानाकाशात् " [शत० १०-६-३-२]

" नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः "

[भ० गी० २-२४] इत्येवमादयो हि श्रुतिस्मृतिन्यायाः सर्वगतत्वमात्मनोऽवबोधयन्ति ॥ ३७ ॥ (७)

व्यपदेशेभ्यो दर्शितवाक्यानां विशेषमाह—स्वप्रकरणेति । ब्रह्मणोऽद्वयत्वे हेत्वन्तरमाह—सर्वान्तरेति ॥ ३६ ॥

ब्रह्मणोऽद्वयत्वेऽपि सर्वगतत्वं सर्वात्मत्वं च कथं तत्राऽऽह—अनेनेति । सूत्रं व्याकरोति—अनेनेत्यादिना । सेत्वादिव्यपदेशानामनिरासे परप्रतिषेधानाश्रयणे च सर्वगतत्वमाकाशस्येव ब्रह्मणः स्यादित्याशङ्क्याऽऽह—अन्यथेति । तत्र सेत्वादिव्यपदेशानिरासे सर्वगतत्वासिद्धिं स्फुटयति—सेत्वादीति । परनिषेधानाश्रयणेऽपि तदसिद्धिं साधयति—तथेति । परिच्छेदप्रसक्तिरिष्टैवेत्याशङ्क्यावशिष्टं व्याचष्टे—सर्वेति । आदिशब्दः सूत्रे स्मृतिन्यायापेक्षया प्रयुक्तः । तत्र श्रुत्या सह स्मृतिरुक्ता । न्यायस्तु परिच्छिन्नत्वे सत्यनित्यत्वादिलक्षणो यावद्विकारः सूत्रोक्तः । न च सर्वमूर्तसंयोगित्वं सर्वगतत्वं सत्वे द्वैतस्य स्यादिति युक्तम् । तत्कल्पनाधिष्ठानतया ब्रह्मणः सर्वगतत्वोपगमादतोऽद्वितीयमनवच्छिन्नं ब्रह्मेति ॥ ३७ ॥ (७)

---

१ क. ज. °मादीनि वा° । २ ज. ट. °शक्यानि । ३ क. घ. ज. °वधार्यते । ४ ज. °षु मु° । ५ ठ. ब्रह्माद्व° । ६ ठ. ड. °कारसूत्रो° ।

(कर्मफलोत्पत्तिं प्रतीश्वरस्यैव कर्तृत्वं नापूर्वस्य , अधि० ८)

फलमत उपपत्तेः ॥ ३८ ॥

तस्यैवं ब्रह्मणो व्यावहारिक्यामीशित्रीशितव्यविभागावस्थायामयमन्यः स्वभावो वर्ण्यते । यदेतदिष्टानिष्टव्यामिश्रलक्षणं कर्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां किमेतत्कर्मणो भवत्याहोस्विदीश्वरादिति भवति विचारणा । तत्र तावत्प्रतिपद्यते "फलमतः" ईश्वराद्भवितुमर्हति । कुतः । "उपपत्तेः" । स हि सर्वाध्यक्षः सृष्टिस्थितिसंहारौन्विदधद्देशकालविशेषाभिज्ञत्वात्कर्मिणां कर्मानुरूपं फलं संपादयतीत्युपपद्यते । कर्मणस्त्वनुक्षणविनाशिनः कालान्तरभावि फलं भवतीत्यनुपपन्नम् । अभावाद्भावानुत्पत्तेः । स्यादेतत्कर्म विनश्यत्स्वकालमेव स्वानु-

---

ब्रह्मातिरिक्तेऽर्थे निषिद्धे ब्रह्मणो निर्विशेषत्वान्न फलदातृत्वमित्याशङ्क्य व्यवहारतस्तदुपपादयितुमुपक्रमते—**फलमिति** । पूर्वाधिकरणयोस्तत्पदलक्ष्यं ब्रह्मोक्तमिदानीं तत्पदवाच्यमीश्वरं दर्शयतीत्यधिकरणस्य तात्पर्यमाह—**तस्यैवेति** । कुतो निर्विशेषत्वेनोक्तस्य फलहेतुतेत्याशङ्क्याऽऽह—**व्यावहारिक्यामिति** । निर्विशेषसत्याद्वितीयपूर्णस्वभावादन्यत्वं फलहेतुत्वाख्यं स्वभावः । तात्पर्यमुक्त्वा विचारविषयमाह—**यदिति** । इष्टं देवत्वादि । अनिष्टं तिर्यक्त्वादि । व्यामिश्रं मनुष्यत्वम् । कर्मफलत्वं साधयितुं संसारावस्थागतत्वमाह—**संसारेति** । त्रिविधकर्मफले लोकानुभवं प्रमाणयति—**प्रसिद्धमिति** । उभयोरपि फलहेतुत्वश्रुतेरुक्ते विषये संशयमाह—**किमिति** । सर्वगतत्वेन फलदातृत्वस्य सत्यपि समानन्यायत्वे कर्मपक्षं निराकरिष्यन्नादौ सिद्धान्तमुपक्रमते—**तत्रेति** । वाच्यार्थोक्तेर्लक्ष्यार्थोक्तिविशेषत्वात्तस्य च वाक्यार्थधीहेतुत्वादस्य पादादिसंगतयः । पूर्वपक्षे कर्मण एव फलदानसामर्थ्यादीश्वरस्यार्किंचित्करत्वम् । सिद्धान्ते स्वतश्चास्य कर्मणोऽसामर्थ्यात्तद्द्वारा परस्यैव तद्भावात्तस्यार्थवत्त्वम् । कटवेष्टनसंस्कारादिवत्पुण्यादिसंस्कारात्फलोत्पत्तौ न प्रदात्रपेक्षेति शङ्कते—**कुत इति** । तत्र सौत्रं हेतुमवतार्य व्याकरोति—**उपपत्तेरिति** । देशकालविशेषाभिज्ञत्वे योग्यत्वमाह—**सर्वेति** । कर्मानुरूपफलदातृत्वे हेतुमाह—**सृष्टीति** । विमतं विशिष्टज्ञानवद्दातृकं कर्मफलत्वात्सेवादिकर्मफलवदित्यर्थः । कर्मपक्षे क्रियातो वा तज्जन्यापूर्वाद्वा फलमाद्यं दूषयति—**कर्मणास्तिवति** । क्रियारूपं कर्म क्षणिकं तच्च नष्टं वा फलमुत्पादयेदुत्पाद्य वा फलं नश्येन्नाऽऽद्य इत्याह—**अभावादिति** । द्वितीयं शङ्कते—**स्यादिति** । तदैव तर्हि

---

१ ङ. ञ. °व हि ब्र° । २ क. ङ. ज. ञ. °रान्विचित्रान्वि° । ३ क. °ज्ञोक्तवेदा° । ४ ख. ट. °ज्ञत्वयो° ।

रूपं फलं जनयित्वा विनश्यति तत्फलं कालान्तरितं कर्त्रा[3] भोक्ष्यत इति । तदपि न परिशुध्यति प्राग्भोक्तृसंबन्धात्फलत्वानुपपत्तेः । यत्कालं हि यत्सुखं दुःखं वाऽऽत्मना भुज्यते तस्यैव लोके फलत्वं प्रसिद्धम् । न ह्यसंबद्धस्याऽऽत्मना सुखस्य दुःखस्य वा फलत्वं प्रतियन्ति लौकिकाः । अथोच्येत कर्मकार्यादपूर्वात्फलमुत्पत्स्यत इति । तदपि नोपपद्यते । अपूर्वस्याचेतनस्य काष्ठलोष्टसमस्य चेतनेनाप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः । तदस्तित्वे[5] च प्रमाणाभावात् । अर्थापत्तिः प्रमाणमिति चेत् । न । ईश्वरसिद्धेरर्थापत्तिक्षयात्[6] ॥ ३८ ॥

श्रुतत्वाच्च ॥ ३९ ॥

न केवलमुपपत्तेरेवेश्वरं फलहेतुं कल्पयामः किं तर्हि "श्रुतत्वात्" अपीश्वरमेव फलहेतुं मन्यामहे । तथा च श्रुतिर्भवति "स वा एष महानज आत्माऽन्नादो वसुदानः" [बृ० ४-४-२४] इत्येवंजातीयका ॥ ३९ ॥

भोगः स्यादित्याशङ्क्य कर्मान्तरप्रतिबन्धात्तदा भोक्तुमयोग्यत्वाद्वा नैवमित्याह—तदिति । स्वर्गादिभोगस्यैवार्थ्यमानत्वेन फलत्वादभुज्यमानमपि फलं स्वरूपेणास्तीत्ययुक्तमित्याह—तदपीति । किं च स्वर्गनरकयोरतितीव्रसुखदुःखत्वादननुभूयमानयोरसिद्धेः स्वरूपेण फलसत्त्वोक्तिरयुक्तेत्याह—यदिति । प्रसिद्धत्वमेव व्यतिरेकद्वारा स्फोरयति—न हीति । कल्पान्तरमुत्थापयति—अथेति । तस्य स्वतन्त्रस्यैं वा चेतनाधिष्ठितस्य वा फलदातृत्वं नाऽऽद्य इत्याह—तदपीति । न द्वितीयस्तस्यैवाप्रामाणिकत्वादित्याह—तदस्तित्वे चेति । आशुतरविनाशिनो यागस्य कालान्तरभाविफलहेतुत्वं श्रुतं स्थायिवस्त्वतिरेकेणानुपपन्नमपूर्वं कल्पयतीत्यर्थापत्तिरत्र मानमिति शङ्कते—अर्थापत्तिरिति । कर्मभिराराधितादीश्वरादेव स्थायिनो यथोक्तफलसिद्धेर्मैवमित्याह—नेश्वरेति ॥ ३८ ॥

श्रुतिविरुद्धत्वाच्च न फलहेतुत्वेन नियोगकल्पनेत्याह—श्रुतत्वाच्चेति । सूत्रं व्याचष्टे—न केवलमिति । कर्मफलत्वादिलक्षणा पूर्वोक्तोपपत्तिः । तामेव श्रुतिमुदाहरति—तथा चेति । निरुपाधिकं रूपमुक्त्वा सोपाधिकमाह—अन्नाद इति । अन्नमा समन्तात्प्राणिभ्यो ददातीत्यन्नादः । वसु धनमर्थिभ्यो ददातीति वसुदानः । तदुभयमन्नं वसु च कर्मफलम् ॥ ३९ ॥

---

१ क. ज. फलमर्जयि° । २ क. ज. ट. कर्ता । ३ ज. भुज्यत । ४ ज. ट. °स्तित्व एव प्र° । ५ ठ. ड. °सिद्धिमे° । ६ ठ. ड. °स्य चे° । ७ ठ. ड. °पलम्भनम° ।

(कर्मफलोत्पत्तिं प्रतीश्वरस्यैव कर्तृत्वं नापूर्वस्य, अधि० ८)

धर्मं जैमिनिरत एव ॥ ४० ॥

" जैमिनिः " [1]त्वाचार्यो " धर्मं " फलस्य दातारं मन्यते। " अत एव " हेतोः श्रुतेरुपपत्तेश्च । श्रूयते तावदयमर्थः " स्वर्गकामो यजेत " इत्येवमादिषु वाक्येषु । तत्र च विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते । अन्यथा ह्यननुष्ठातृको याग आपद्येत तत्रास्योपदेशवैयर्थ्यं स्यात् । नन्वनुक्षणविनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोऽयं पक्षः । नैष दोषः । श्रुतिप्रामाण्यात् । श्रुतिश्चेत्प्रमाणं यथाऽयं कर्मफलसंबन्धः श्रुत उपपद्यते तथा कल्पयितव्यः । न चानुत्पाद्य किमप्यपूर्वं कर्म विनश्यत्कालान्तरितं फलं दातुं शक्नोत्यतः कर्मणो वा सूक्ष्मा काचिदुत्तराऽवस्था फलस्य वा पूर्वाऽवस्थाऽपूर्वं नामास्तीति तर्क्यते । उपपद्यते चायमर्थ उक्तेन प्रकारेण । ईश्वरस्तु फलं ददातीत्यनुपपन्नम् । अविचित्रस्य कार-

---

संप्रति पूर्वपक्षयति—धर्ममिति । सूत्रं विभजते—[2]जैमिनिस्त्विति । श्रुतेरित्युक्तं व्यनक्ति—श्रूयत इति । कथमेतावता फलहेतुत्वं कर्मणः सिद्धं तत्राऽऽह—तत्र चेति । विधिश्रुतिर्विध्यर्थस्तस्य लिङाद्यर्थस्य प्रेरणात्मनो यागो विषयस्तद्भावावगमाद्यागः स्वर्गस्य साधनमिति गम्यते । पुरुषाभिलषितस्वर्गसाधनत्वाभावे यागस्य तत्र प्रेरणायोगादित्यर्थः । पुरुषप्रवृत्तेरर्थभावनाया भाव्याकाङ्क्षत्वादेकपदोपात्ततया यागस्य संनिहितत्वाद्भाव्यत्वेन संबन्धो न विषयत्वेनेत्याशङ्क्याऽऽह—अन्यथेति । योग्यतायाः संनिधेः सकाशादन्तरङ्गत्वाद्यागस्य च क्लेशात्मैकत्वेन फलार्थं[3] प्रवृत्तभावनाभाव्यत्वायोगात्पुरुषविशेषणत्वेन श्रुतस्वर्गादेरेव भावनोद्देश्यरूपभाव्यत्वसिद्धेरपुरुषार्थे पुरुषस्याप्रवृत्तेः स्वर्गादेरेव भाव्यत्वं यागस्य तु करणतया साध्यतेत्यर्थः । कर्म न कालान्तरीयफलदं क्षणिकत्वादित्युक्तं स्मारयति—नन्विति । श्रुत्यवष्टम्भेन निराचष्टे—नेति । तदेव व्यनक्ति—श्रुतिश्चेदिति । उपपत्तिमेव व्यतिरेकद्वारा दर्शयति—न चेति । कर्मावान्तरव्यापारत्वमुपेत्य कर्मणो वेत्युक्तम् । फलोत्पत्त्यन्यथानुपपत्त्या कल्प्यमानत्वं गृहीत्वा फलस्य वेत्युक्तम् । उपपत्तेश्चेति द्वितीयहेतुं[5] विवृणोति—उपपद्यते चेति । तत्र विधिश्रुतेरित्यादिरुक्तः[6] प्रकारः । श्रुत्युपपत्तिभ्यां स्वपक्षमुक्त्वा सिद्धान्तं प्रत्याह—ईश्वरस्त्विति । एकरूपात्कारणान्नानेकरूपं कार्यं कार्यान्तराणामाकस्मिकत्वापातादि-

---

१ ज. °निराचा° । २ ङ. °निरिति । ३ क. ख. ठ. ङ. °त्मत्वे° । ४ ख. ठ. ङ. °लार्थप्र° । ५ ठ. ङ. °तीयं हे° । ६ ठ. ङ. °रुक्तप्र° ।

णस्य विचित्रकार्यानुपपत्तेर्वैषम्यनैर्घृण्यप्रसङ्गात् । तदनुष्ठानवैयर्थ्यापत्तेश्च । तस्माद्धर्मादेव फलमिति ॥ ४० ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥ (८)

इति महर्षिव्यासप्रणीतब्रह्मसूत्रतृतीयाध्यायस्य द्वितीयः पादः ॥ २ ॥

बादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं फलहेतुं मन्यते । केवलात्कर्मणोऽपूर्वाद्वा केवलात्फलमित्ययं पक्षस्तुशब्देन व्यावर्त्यते । कर्मापेक्षादपूर्वापेक्षाद्वा यथा तथाऽस्त्वीश्वरात्फलमिति सिद्धान्तः । कुतः । " हेतुव्यपदेशात् " धर्माधर्मयोरपि हि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्यते फलस्य च दातृत्वेन " एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते । एष उ एवासाधु कर्म कारयति तं यमधो निनीषते " [कौषी० ३-८] इति । स्मर्यते चायमर्थो भगवद्गीतासु—

" यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
स तया श्रद्धया युक्तस्तस्या राधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हितान् " ॥

त्यर्थः । शुभाशुभफलदातृत्वे रागद्वेषादिमत्त्वापत्तेश्च नेश्वरात्फलमित्याह—वैषम्येति । ईश्वरस्य फलदातृत्वे कर्मानुष्ठानवैयर्थ्यं दोषान्तरमाह—तदिति । उक्तदोषनिवृत्त्यर्थमपूर्वादेव फलं नेश्वरादित्युक्तमुपसंहरति—तस्मादिति ॥ ४० ॥

ईश्वरात्फलमिति सिद्धान्तयति—पूर्वं त्विति । उत्तरपक्षप्रतिज्ञां विभजते—बादरायणस्त्विति । परपक्षनिषेधप्रतिज्ञां प्रकटयति—केवलादिति । ईश्वरानपेक्षादिति यावत् । कथमीश्वरस्यापि केवलस्य फलहेतुत्वं तत्राऽऽह—कर्मेति । यथा परपक्षे कर्मापेक्षादपूर्वापेक्षाद्वा कर्मणो[3] युक्तं फलमित्युपगतं तथा तदन्यतरापेक्षादीश्वरादेव फलमस्तु । तथाच न वैषम्यादीत्यर्थः । तत्र प्रश्नपूर्वकं प्रमाणमाह—कुत इति । अपूर्वस्याचेतनस्य केवलस्याप्रवृत्तेस्तस्यैव फलदातृत्वकल्पनायां दृष्टविरोधाद्देवतापूजात्मकत्वाच्च यागस्य पूज्यमानदेवताप्रसादद्वारा फलवत्त्वादुक्तश्रुतार्थापत्तेरीश्वरेणोपक्षयादपूर्वमप्रमाणमिति मत्वा हेतुं व्याचष्टे—धर्मेति । श्रौतं हेतुव्यपदेशमुक्त्वा स्मार्तं कथयति—स्मर्यते चेति । तस्य तत्तद्देवतास्वभावस्य ममेति यावत् । ततस्तस्मादाराधि-

---

१ क. ज. 'पि का' । २ ट. ड. 'त्युप' । ३ ठ. ड. 'णोऽस्तु फ' । ४ ठ. ड. 'पूर्वे प्र' ।

[भ० गी० ७-२१] इति। सर्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते। तदेव चेश्वरस्य फलहेतुत्वं यत्स्वकर्मानुरूपाः प्रजाः सृजति। विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते ॥ ४१ ॥ (८)

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ श्रीमच्छारीरकमीमांसाभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥ २ ॥

अथ साधनाख्यतृतीयाध्याये तृतीयः पादः।

(सगुणविद्यासु गुणोपसंहारस्य निर्गुणब्रह्मण्यपुनरुक्तपदोपसंहारस्य च निरूपणम्।)

(छान्दोग्यबृहदारण्यकोक्तपञ्चाग्निविद्योपासनयोः फलैक्यादैक्यम्, अधि० १)

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

व्याख्यातं विज्ञेयस्य ब्रह्मणस्तत्त्वम्। इदानीं तु प्रतिवेदान्तं

तादनुष्ठितादित्यर्थः। हेतुव्यपदेशादित्यस्यार्थान्तरमाह—सर्वेति। ईश्वरस्य सृष्ट्यादिहेतुत्वेऽपि कथं फलहेतुत्वं तत्राऽऽह—तदेवेति। यच्च विचित्रस्य कारणस्येत्यादि तत्राऽऽह—विचित्रेति ॥ ४१ ॥ (८)

इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृते शारीरकमीमांसाभाष्यविभागे न्यायनिर्णये तृतीयाध्यायस्य द्वितीयः पादः ॥ २ ॥

तात्त्विकमतात्त्विकं च ब्रह्मणो रूपमुक्त्वा तद्विद्यां प्रतिवेदान्तं प्रतीतानां नामाद्यभेदादभेदमाह—सर्ववेदान्तेति। पूर्वोत्तरपादयोः संगतिं वक्तुं वृत्तं कीर्तयति—व्याख्यातमिति। ज्ञेये ब्रह्मण्युक्ते तज्ज्ञानं किंरूपमित्यपेक्षायां तद्विचारायोत्तरपादप्रवृत्तिरित्याह—इदानीमिति। पदार्थयोः शोधनानन्तरमपुनरुक्तापेक्षितपदपदार्थोपसंहारेण सगुणनिर्गुणवाक्यानामर्थो निर्धार्यते। तत्र सगुणविद्यानां सत्त्वशुद्धिद्वारा

---

१ ठ. ड. 'दद्वयप्र'। २ क. ख. ठ. ड. 'नान्त'। ३ क. ख. ठ. ड. 'पदा'।

विज्ञानानि भिद्यन्ते न वेति विचार्यते । ननु विज्ञेयं ब्रह्म पूर्वापरादिभेदरहितमेकरसं सैन्धवघनवदवधारितं तत्र कुतो विज्ञानभेदाभेदचिन्तावसरः । न हि कर्मबहुत्ववद्ब्रह्मबहुत्वमपि वेदान्तेषु प्रतिपिपादयिषितमिति शक्यं वक्तुम् । ब्रह्मण एकत्वादेकरूपत्वाच्च । न चैकरूपे ब्रह्मण्यनेकरूपाणि विज्ञानानि संभवन्ति । न ह्यन्यथाऽर्थोऽन्यथा ज्ञानमित्यभ्रान्तं भवति । यदि पुनरेकस्मिन्ब्रह्मणि बहूनि विज्ञानानि वेदान्तान्तरेषु प्रतिपिपादयिषितानि तेषामेकमभ्रान्तं भ्रान्तानीतराणीत्यनाश्वासप्रसङ्गो वेदान्तेषु। तस्मान्न तावत्प्रतिवेदान्तं ब्रह्मविज्ञानभेद आशङ्कितुं शक्यते । नाप्यस्य "चोदनाद्यविशेषादभेदः" उच्यते । ब्रह्मविज्ञानस्याचोदनालक्षणत्वात् । अविधिप्रधानैर्हि वस्तुपर्यवसायिभिर्ब्रह्मवाक्यैर्ब्रह्मविज्ञानं जन्यत इत्यवोचदाचार्यः "तत्तु समन्वयात्" [ब्र० सू० १-१-४] इत्यत्र तत्कथमिमां भेदाभेदचिन्तामारभत

निर्गुणविद्योपयोगात्पदार्थोपसंहारेण वाक्यार्थज्ञानार्थत्वाच्च सगुणवाक्यार्थचिन्ताऽर्थवती निर्गुणचिन्ता तु तद्द्वारा मुक्तिहेतुरित्यर्थः । निरुपाधिकं ब्रह्मज्ञानं विचार्यत्वेनोक्तमिति मत्वा पादारम्भमाक्षिपति—**नन्विति** । अवयवभेदाभावात्तन्निमित्तो ज्ञानभेदो न संभवतीत्याह—**पूर्वेति** । स्वभावभेदाभावात्तत्कृतोऽपि ज्ञानभेदो नास्तीत्याह—**एकरसमिति** । ज्ञेयस्य ब्रह्मणः सर्वप्रकारभेदाभावे फलितमाह—**तत्रेति** । वेदान्तानां शक्तितात्पर्यालोचनायामपि नेयं चिन्तेत्याह—**न हीति** । एकस्यापि पिता पुत्रो भ्रातेत्यादावनेकविज्ञानविषयत्ववदिहापि स्यादित्याशङ्क्याऽऽह—**एकेति** । एकस्मिन्नेकरूपे स्मृत्याद्यनेकज्ञानवदनेकज्ञानसिद्धिरित्याशङ्क्याऽऽह—**न चेति** । दृष्टान्ते तु पूर्वकालविशिष्टादेतत्कालविशिष्टमन्यदिति ज्ञानभेदो युक्तो ब्रह्मणि तु निरुपाधिके नैवमित्यर्थः । अर्थस्यैकरूपत्वेऽपि ज्ञानमनेकरूपं तयोर्भेदादित्याशङ्क्याऽऽह—**न हीति** । तदेव प्रपञ्चयति—**यदीति** । पूर्वपक्षे ज्ञानभेदशङ्कायोगं निगमयति—**तस्मादिति** । सिद्धान्तेऽपि चोदनाद्यभेदाज्ज्ञानाभेदो न सिध्यतीत्याह—**नापीति** । तर्हि सूत्रविरोधः स्यादित्याशङ्क्य पूर्वापरविरोधात्त्याज्यमेतदित्यभिप्रेत्याऽऽह—**अविधीति** । आक्षेपमुपसंहरति—**तदिति** । तत्तदनेकोपाध्यवच्छिन्नब्रह्मविषयाणि प्राणादिविषयाणि चोपासनानि

---

१ क. ङ. ञ. °कमेकर' । २ क. घ. ङ. ब. ट. °वतारः । ३ क. ज. °हुत्वं वे' । ४ ज. भवन्ति । ५ ङ. वेदान्तेषु । ६ क. ज. ञ. ट. उच्यते । ७ ज. °ह्मज्ञा° । ८ क. ख. ठ. ड. °धिकब्र° । ९ ठ. ड. °णि नि° । १० ख. झ. °ज्ज्ञानभे° । ११ ठ. ड. तद्गुणोपधानब्र° ।

इति । तदुच्यते—सगुणब्रह्मविषया प्राणादिविषया चेयं विज्ञानभेदाभेदचिन्तेत्यदोषः । अत्र हि कर्मवदुपासनानां भेदाभेदौ संभवतः कर्मवदेव चोपासनानि दृष्टफलान्यदृष्टफलानि चोच्यन्ते[1]। क्रममुक्तिफलानि च कानिचित्सम्यग्[2]दर्शनोत्पत्तिद्वारेण। तेष्वेषा चिन्ता संभवति। किं प्रतिवेदान्तं विज्ञानभेद आहोस्विन्नेति ।

तत्र पूर्वपक्षहेतवस्तावदुपन्यस्यन्ते । नाम्नस्तावद्भेदप्रतिप-

---

विचारयोग्यानी(णी)त्याह—तदुच्यत इति । निरुपाधि[3]ब्रह्मज्ञाने ज्ञेयैक्यादैक्यं सिद्धमिति न भेदाभेदचिन्ता । तत्र पुनर्गुणोपसंहारो लक्ष्याखण्डवाक्यार्थसिद्ध्यर्थं वाच्यार्थतद्वाचकपदोपसंहाररूपो वर्तिष्यते तेनोक्तविचारारम्भसिद्धिरित्याह—इत्यदोष इति। सगुणमपि विचार्यमाणमद्वयं ब्रह्मैवेति कथं तस्मिन्नुपास्तिभेदाभेदचिन्तेत्याशङ्क्याऽऽह—अत्रेति । सोपाधिकं ब्रह्म सप्तम्यर्थः । न केवलं विषयभेदाद्भेदः किंतु फलभेदादपीत्याह—कर्मवदिति । विरक्तस्य मुमुक्षोरलमनेन विचारेणेत्याशङ्क्याऽऽह—क्रमेति । तस्यापि यथोक्तो विचारो हेयोपादेयविवेकोपकारीत्यर्थः । निर्गुणविद्यायां क्वचिद्भेदभ्रमापोहेनाभेदो निरूप्यतेऽपुनरुक्तशब्दानां सत्यादिधर्माणां वा साधारणस्वरूपलक्षणार्थमुपसंहारो वर्ण्यते । सगुणविद्यासु पुनरभेदः क्वचित्क्वचिद्भेदः क्वचिद्गुणानामुपसंहारः क्वचिदनुपसंहार इत्युपसंहरति—तेष्विति । एवं पादारम्भमुक्त्वा प्रतिशाखं प्रतीतज्ञानानि विषयीकृत्य नामादिभेदाच्चोदनाद्यविशेषाच्चाऽऽद्याधिकरणावयवं संशयमाह—किमिति ।

अत्र चोत्सर्गतः सर्वशाखासु विद्यैक्ये सिद्धे पूर्वोक्तन्यायेन विद्यातो मुक्तिसंभवात्पादादिसंगतिरिति मत्वा पूर्वपक्षयति—तत्रेति । पूर्वपक्षे प्रतिवेदान्तं विद्याभेदाद्गुणानुपसंहारः । सिद्धान्ते सर्वत्र विद्यैक्यात्तदुपसंहार इति फलमुत्तराधिकरणे वक्ष्यति । शाखान्तराधिकरणे " नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शन[4]शब्दान्तरसंख्याप्रक्रियातोऽपि कर्मभेदः स्यात् " [पू० मी० सू० २-४-८] इति पूर्वपक्षसूत्रेण पूर्वपक्षे कर्मभेदे ये हेतवो नामादयो दर्शितास्ते विद्याभेदलक्षणपूर्वपक्षोपयोगित्वेनोत्रानूद्यन्त इत्यर्थः । तत्र नाम्नो भेदकत्वमुदाहरति—नाम्न इति । आदिपदादेकप्रकरणस्थाग्निहोत्रदर्शपूर्णमासादिग्रहणम् । अथैष ज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र ज्योतिष्टोमानुवादेन सहस्रदक्षिणागुण-

---

१ घ चोद्यन्ते । २ क. घ. ङ. ञ. 'म्यग्ज्ञानो' । ३ ठ. ङ. 'धिकत्र' । ४ ठ. ङ. 'र्शनाच्छाखान्तरे क' । ५ ठ. ङ. 'नान्यत्रा' ।

(छान्दोग्यबृहदारण्यकोक्तपञ्चाग्निविद्योपासनयोः फलैक्यादैक्यम्, अधि० १)

त्तिहेतुत्वं प्रसिद्धं ज्योतिरादिषु । अस्ति चात्र वेदान्तान्तरविहितेषु विज्ञानेष्वन्यदन्यन्नाम तैत्तिरीयकं वाजसनेयकं कौथुमकं शाट्यायनकमित्येवमादि । तथा रूपभेदोऽपि कर्मभेदस्य प्रतिपादकः प्रसिद्धो वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्येवमादिषु । अस्ति चात्र रूपभेदः । तद्यथा केचिच्छाखिनः पञ्चाग्निविद्यायां षष्ठमपरमग्निमामनन्त्यपरे पुनः पञ्चैव पठन्ति ।

विधिर्वा तद्गुणककर्मान्तरविधिर्वेति संदेहे प्रकृतज्योतिष्टोमस्य तदेकदेशवाचिना ज्योतिःशब्देन भीमादिशब्दवदभिधानात्कर्मान्तराविधेश्च गुणमात्रविधानस्य लघुत्वाद्द्वादशशतदक्षिणायाश्च सहस्रदक्षिणया विकल्पात्प्रकृतानुवादेन गुणान्तरविधिरिति प्राप्ते सत्यां गतावेकस्य संज्ञिनोऽनेकसंज्ञायोगादेकत्रानुपपत्त्या लाक्षणिकः शब्द इत्येतावता ज्योतिःशब्दस्यासत्यामनुपपत्तौ ज्योतिष्टोमलक्षकत्वासिद्धेरथशब्दाच्च प्रकरणविच्छेदोत्प्रकृते[3] गुणविध्ययोगाद्गुणविशिष्टकर्मान्तरविधिरिति द्वितीये स्थितम् । अग्निहोत्रदर्शपूर्णमासादिषु संज्ञाभेदेन संज्ञिभेदे न विप्रतिपत्तिरिति भावः । संज्ञान्तरात्कर्मभेदेऽपि प्रकृते किं जातमित्याशङ्क्याऽऽह—अस्ति चेति । तैत्तिरीयकादिशब्दानां शाखानामत्वं[4] विज्ञाननामत्वं प्रयोगाविशेषात्प्रवृत्तिनिमित्तस्य च प्रवचनस्य ग्रन्थज्ञानयोरविशिष्टत्वान्न क्वचिन्मुख्यमन्यत्र गौणं नामाप्रसिद्धिविभागायोगादिति भावः । विद्याभेदं नामभेदादुक्त्वा रूपभेदादपि तमुदाहरति—तथेति । आदिपदेनाऽऽग्नेयाग्नीषोमीयादिसंग्रहः । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र पूर्वस्मिन्नेव वैश्वदेवे कर्मणि वाजिनवाक्येन वाजिनगुणविधिर्वा द्रव्यदेवतान्तरयुक्तकर्मान्तरविधिर्वेति संदेहे विश्वेषामेव देवानां वाजेनान्नेनाऽऽमिक्षया युक्तानां वाजिपदेनोक्तेर्वाजिभ्य इति तानन्नूद्य वाजिनगुणविधेरामिक्षावद्वाजिनमपि वैश्वदेवमेवेति न कर्मान्तरविधिरिति प्राप्ते विश्वेषां देवानामामिक्षां प्रत्यृषसर्जनतया प्राधान्येनाप्रकृतत्वाद्वाजिपदेन परामर्शायोगाद्वाजिनगुणस्याप्रकृतदेवताभिधानेन संबन्धात्कर्मान्तरदृष्टेस्तद्धितश्रुत्या चाऽऽमिक्षावरुद्धतया वाजिनस्य तत्रानवकाशात्पूर्वस्मात्कर्मणः स्वसंबन्धिकर्मणो भेदकत्वात्तद्धितश्रुतिविरोधे वाक्यस्य दौर्बल्याद्वाजिनवाक्येन द्रव्यदेवतान्तरयुक्तकर्मान्तरविधिरिति तत्रैव स्थितम् । आग्नेयादिषु पुना रूपभेदाद्भेदे न विमानमिति भावः । अस्तु रूपभेदात्कर्मभेदः प्रस्तुते किं जातं तदाह—अस्ति चेति । अत्रेति विद्योक्तिः । तदेव भिन्नं रूपमुदाहरति—तद्यथेति । यथा यागस्य द्रव्यदेवते रूपमेवं

---

१ ङ. ञ. 'कं कौशीतकं शा' । २ ठ. ड. 'दाद्गु' । ३ क. 'तेर्गुण' । ४ ठ. ड. 'त्वेऽपि ज्ञा' । ५ क. ख. ठ. ड. 'व्यदैवतं रू' ।

(छान्दोग्यबृहदारण्यकोक्तपञ्चाग्निविद्योपासनयोः फलैक्यादैक्यम्, अधि० १)

तथा प्राणसंवादादिषु कांचिदूनान्वागादीनामनन्ति केचिदधिकान्। तथा धर्मविशेषोऽपि कर्मभेदस्य प्रतिपादक आशङ्कितः कारीर्यादिषु। अस्ति चात्र धर्मविशेषः। यथाऽऽथर्वणिकानां शिरोव्रतमिति। एवं पुनरुक्त्यादयोऽपि भेदहेतवो यथा-

---

वेद्यमेव विद्याया रूपम्। तथा च वेद्यभेदे विद्याभेदः स्यादित्यर्थः। धर्मभेदाद्विद्याभेदं वक्तुं तस्य कर्मभेदकत्वमाह—**तथेति**। कारीरीवाक्यान्य(ण्य)धीयानास्तैत्तिरीया भूमौ भुञ्जते न तथाऽन्ये। अग्निमधीयानाश्च केचिदुपाध्यायस्योदकुम्भमाहरन्ति न त्वन्ये। न च तान्येव कर्माणि भूमिभोजनादिधर्मजन्योपकारवन्ति तद्रहितानि चेति युक्तमतस्तत्र धर्मभेदाद्भेदधीरित्यर्थः। एवमपि प्रकृते किं स्यात्तदाह—**अस्ति चेति**। अत्रेति पूर्ववद्विद्योक्तिः। अन्येषां तु शाखिनां नैवं शिरस्यग्निधारणं व्रतमस्तीति धर्मभेदाद्विद्याभेद इत्यर्थः। भेदकान्तराण्यतिदिशति—**एवमिति**। आदिग्रहणान्निन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनानि शब्दान्तरं संख्या प्रक्रियेत्येतानि च संगृह्यन्ते। तत्र समिधो यजतीत्यादौ पञ्चकृत्वोऽभ्यस्ते यजतिशब्दे किमेकं कर्मापूर्वं किं वा पञ्चैवेति संशये धात्वर्थानुबन्धभेदमन्तरेणापूर्वभेदायोगात्प्रकृते तदयोगादेकं कर्मापूर्वमिति प्राप्ते समिदादिवाक्यानां स्वरससिद्धाप्राप्तकर्मविधिपरत्वादसति विशेषे पुनः श्रुतेरानर्थक्यात्प्रत्यभ्यासमपूर्वभेद इति पुनरुक्तेर्भेदकत्वं स्थितम्। एवं शाखान्तरोक्ता विद्याः शाखान्तरोक्तविद्याभ्यो भिन्नाः पुनरुक्तेरिति पुनरुक्तितो विद्याभेदः। निन्देत्युदितानुदितहोमनिन्दोक्ता "प्रातःप्रातरनृतं ते वदन्नि पुरोदयाज्जुह्वति येऽग्निहोत्रम्। दिवा कीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषाम्" इत्यनुदितहोमनिन्दा "यथाऽतिथये प्रदुतायान्नं हरेयुस्तादृक्तद्यदुदिते जुह्वति" इत्युदितहोमनिन्दा। ततश्चैकस्यैवोदितेऽनुदिते च क्रमेणानुष्ठानायोगाद्भेदः। उदितानुदितहोमातिक्रमकृतप्रायश्चित्तादपि तद्भेदधीः। न च निन्दाप्रायश्चित्ते वेदान्तविद्यासु विद्येते इति नोदाहियेते। यत्त्वथ योऽन्यामित्यादि तद्भेदधीविषयत्वान्न विद्यां भिनत्ति। ततो भूय इत्येवमादि तु केवलदेवताज्ञाननिन्दया तस्य कर्मणा समुच्चयपरम्। अशक्तिश्च कर्मवद्विद्याभेदिका। न हि सर्वशाखाविहितं कर्म शक्यमेकेनानुष्ठातुं तथोपासनान्यपि नानाशाखोक्तानि नैकेनानुष्ठेयानीति भेदः। समाप्तिरपि शाखिना केषांचित्क्वचिदिति कर्मणो भेदिका। तथा वेदान्तेष्वपि क्वचिदोंकारसंवर्गात्मत्ववचनेन समाप्तिरन्यत्र क्वचिदित्युपास्तिभेदः। अन्यार्थदर्शनं वायुर्वै क्षेपिष्ठा देवता। सोऽरोदीद्यदरोदीदित्याद्यर्थवादरूपं

---

१ क. ङ. ज. ञ. 'रुक्तात्'। २ क. ख. ठ. ड. प्रस्तुते। ३ क. ख. झ. 'न्तरसं'। ४ ठ. 'भ्यस्तय'। ५ ठ. ड. 'सत्यत्व'।

संभवं वेदान्तान्तरेषु योजयितव्याः । तस्मात्प्रतिवेदान्तं विज्ञानभेद इति ।

एवं प्राप्ते ब्रूमः—सर्ववेदान्तप्रत्ययानि विज्ञानानि तस्मिंस्त-

---

कर्मभेदकं स्तुतिनिन्दयोरेकत्रासमवायात् । एवं वेदान्तेष्वपि नानाविधार्थवादस्य तत्र तत्र दृष्टेर्विद्याभेदः । शब्दान्तरादपि कर्मभेदः । ज्योतिष्टोमे सोमेन यजेत दाक्षिणानि जुहोति हिरण्यमात्रेयाय ददातीत्यत्र यजतिददातिजुहोतयः संहत्य वा कार्यं कुर्वन्त्यसंहत्य वेति संदेहे संहतानामेकापूर्वसाधकत्वं लाघवादिति पूर्वपक्षे "शब्दान्तरेण कर्मभेदः कृतानुबन्धत्वात्" [पू० मी० सू० २-२-१] इति । अत्र शब्दभेदे भावार्थानुबन्धभेदाद्भावनाभेद इति स्थितम् । तथेहापि "ब्रह्मविदाप्नोति परम्" "तरति शोकमात्मवित्" इति शब्दान्तराज्ज्ञानभेदः । संख्याऽपि कर्मणो भेदिका "सप्तदश प्राजापत्यान्पशूनालभते" इत्यत्र सप्तदशभिः पशुभिरेको वा यागो निर्वर्त्यः सप्तदश वेति संशये यो हि बहून्कल्पयति कल्पयत्यसावेकमिति लाघवादेको यागः सप्तदशपशुभिर्निर्वर्त्यत इति पूर्वपक्षे पशूनां पृथक्त्वे सप्तदशसंख्यायाः संभवात्तत्पृथक्त्वस्य च यागभेदाधीनत्वाद्यागाः सप्तदशेति सिद्धान्तितम् । तथाऽत्रापि तौ वा एतौ द्वौ संवर्गाविति संख्यातो विद्याभेदः । प्रक्रियाऽपि कर्मभेदिका कुण्डपायिनामयने मासमग्निहोत्रं जुहोति । मासं दर्शपूर्णमासाभ्यां यजेतेत्यत्र नित्येऽग्निहोत्रादौ मासगुणविधिर्वा कर्मान्तरविधिर्वेति संदेहे सत्यग्निहोत्रादिशब्दस्य प्रसिद्धाग्निहोत्राद्यनुवादित्वान्मासमित्यप्रसिद्धत्वात्प्रसिद्धानुवादेनाप्रसिद्धगुणविधिसंभवात्प्रकरणस्य वाक्याद्दौर्बल्याद्गुणविधिरिति प्राप्ते यस्य प्रकरणे यद्वाक्यं श्रुतं न तत्तस्य बाधकमित्युत्सर्गादुपसद्विश्वरित्वेत्युक्त्वा मासमग्निहोत्रमित्यादिश्रुतेर्नैयमिकाग्निहोत्रादौ चोपसदामभावात्तदनुवादेन गुणविधयसिद्धेरुपसदामपि तत्रैव विधाने वाक्यभेदादग्निहोत्रादिशब्दस्य चाऽऽख्यातपारतन्त्र्यात्तदर्थस्य चाधिकारालोचनायां वैलक्षण्यात्प्रसिद्धाग्निहोत्राद्यप्रत्यभिज्ञापकत्वात्कर्मान्तरमित्युक्तम् । तथाऽत्रापि वैश्वानराश्वमेधोपासनादिषु प्रकरणभेदाद्विद्याभेद इत्यर्थः । वेदान्तान्तरेष्विति प्रतिशाखं व्यवस्थिततत्तद्वेदान्तप्रभेदेष्विति यावत् । प्राच्यां मीमांसायामुक्तहेतुभिः सिद्धं पूर्वपक्षमुपसंहरति—**तस्मादिति** ।

पूर्वपक्षमनूद्य विद्यैक्यं सिद्धान्तमाह—**एवमिति** । सर्ववेदान्तेषु प्रतीयन्त इति सर्ववेदान्तप्रत्ययानि सर्ववेदान्तप्रमाणकानि तत्र तत्र विहितानीत्यर्थः । यान्येकस्मिन्वेदान्ते तान्येव वेदान्तान्तरेष्वपि विहितानीत्याह—**तस्मिन्निति** । सर्ववेदान्तप्रत्ययमित्येकवचनेन कर्तव्यतया प्रतीयमानज्ञानस्यैकत्वं ग्रहैकत्ववदविवक्षितम् । साधारणनिर्देशेन

---

१ ठ. ङ. °दाद्भेद । २ ठ. ङ. सर्वेषु वेदं ।

(छान्दोग्यबृहदारण्यकोक्तपञ्चाग्निविद्योपासनयोः फलैक्यादैक्यम्, अधि० १)

स्मिन्वेदान्ते तानि तान्येव भवितुमर्हन्ति। कुतः। "चोदनाद्य-विशेषात्"। आदिग्रहणेन शाखान्तराधिकरणसिद्धान्तसूत्रो-दिता अभेदहेतव इहाऽऽकृष्यन्ते। "संयोगरूपचोदनाख्याविशेषात्" [जै०सू०२-४-९] इत्यर्थः। यथैकस्मिन्नग्निहोत्रे शाखा-भेदेऽपि पुरुषप्रयत्नस्तादृश एव चोद्यते जुहुयादिति। एवम् "यो ह वै ज्येष्ठं च श्रेष्ठं च वेद" [छा०५-१-१][बृ० ६-१-१] इति वाजसनेयिनां छन्दोगानां च तादृश्येव चोदना। प्रयोज-नसंयोगोऽप्यविशिष्ट एव "ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति" [बृ० ६-१-१] इति। रूपमप्युभयत्र तदेव विज्ञानस्य यदुत ज्येष्ठश्रे-ष्ठादिविशेषणान्वितं प्राणतत्त्वम्। यथा च द्रव्यदेवते यागस्य रूपमेवं विज्ञेयं विज्ञानस्य तेन हि तद्रूप्यते। समाख्याऽपि सैव प्राणविद्येति। तस्मात्सर्ववेदान्तप्रत्ययत्वं विज्ञानस्य। एवं पञ्चा-ग्निविद्या वैश्वानरविद्या शाण्डिल्यविद्येत्येवमादिषु योजयितव्यम्। ये तु नामरूपादयो भेदहेत्वाभासास्ते प्रथमे एव काण्डे "न नाम्ना

विधीयमानसर्वोपासनज्ञानानि विवक्षितानीति प्रतिज्ञां व्याख्यायाऽऽकाङ्क्षाद्वारा हेतुम-वतारयति—कुत इति। चोदनासाहचर्यादादिशब्देनार्थवादग्रहणमाशङ्क्य व्यावर्त-यति—आदीति। "एकं वा संयोगरूपचोदनाख्याविशेषात्" [पू०मी०सू० २-४-९] इति शाखान्तराधिकरणे सिद्धान्तसूत्रं तत्रोक्तान्कर्मभेदहेतूनत्रापि ज्ञानाभेदहेतुत्वे-नाऽऽकृष्टानाचष्टे—संयोगेति। तत्र चोदनाया विधायकपदस्य चोद्यत इति वा पुरु-षप्रयत्नस्य धात्वर्थावच्छिन्नस्याविशेषं सदृष्टान्तमाह—यथेति। प्रतिशाखं होमाद्यव-च्छिन्नप्रयत्नवदिहापि प्राणज्येष्ठत्वादिधीविषयप्रयत्नस्याविशेषः शाखाद्वयेऽपीत्यर्थः। संयोगाविशेषमाह—प्रयोजनेति। रूपाविशेषमाह—रूपमिति। कथं ज्ञानस्य प्राणतत्त्वं रूपं तत्राऽऽह—यथा चेति। द्रव्यदेवताभ्यां यागस्य रूप्यमाणत्वात्तयोस्तद्रूपत्वं प्रकृते तु कथमित्याशङ्क्याऽऽह—तेनेति। आख्याविशेषमाह—समाख्येति। सर्व-शाखास्थप्राणज्ञानाख्यसमाख्याद्यविशेषादैक्यं निगमयति—तस्मादिति। उक्तं न्यायं पञ्चाग्निविद्यादिषु सर्वशाखास्थेष्वतिदिशति—एवमिति। परोक्तमनूद्य प्रत्याह—ये त्विति। अस्यार्थः—काठकं कालापकमित्यादिनामभेदान्न कर्मभेदः। कस्मात्।

---

१ ङ. ज. म. 'दिगुणवि'। २ ट. 'शेषान्वि'। ३ क. ङ. ज. म. 'यं रूपं वि'। ४ घ. ङ. म. विज्ञानानाम्। ५ क. ङ. ज. 'दिष्वपि यो'। ६ ज. 'मका'। ७ ठ. ङ. 'ज्ञानस्य स'। ८ ठ. 'ऽवंशिष्व'।

स्यादचोदनाभिधानत्वात् " [जै० सू २-४-१०] इत्यारभ्य परिहृताः ॥ १ ॥

इहापि किंचिद्विशेषमाशङ्क्य परिहरति—

भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥

स्यादेतत्। सर्ववेदान्तप्रत्ययत्वं विज्ञानानां गुणभेदान्नोपपद्यते।

अचोदनाभिधानत्वात्। काठकादीनां ग्रन्थनामतया कर्मनामत्वाभावात्। ग्रन्थयोगादेव कर्मणां तद्वारा तन्नामत्वसिद्धौ तत्रापि शक्तिकल्पनायां गौरवात्कर्मैकत्वेऽपि तत्तद्ग्रन्थसंदर्भसंयोगात्काठकप्रायश्चित्तमित्यादिदर्शनान्न नाम्ना कर्मभेदः। तथाऽत्रापि नामभेदान्न विद्याभेदः। विद्यैक्येऽपि तत्तद्ग्रन्थसंयोगात्तत्तन्नामत्वसिद्धेः। नापि रूपभेदो भेदकोऽग्नीषोमीयस्यैककर्मत्वेऽप्येकादशकपालत्वद्वादशकपालत्वरूपभेदो वाचनिक[1]। तथाऽन्यादिषु रूपभेदेऽपि विद्यैक्याविरोधात्। न च[2] धर्मविशेषो भेदकः। तस्य विद्याग्रहणार्थतया कर्मानुपकारिणस्तद्भेदकत्वाभावात्। उक्तं हि विद्यायां कर्मशास्त्रमिति। तथाऽत्रापि धर्मविशेषो न विद्यार्थ इति वक्ष्यते। न च पुनरुक्तिर्भेदिका। न[3] ह्येतद्विर्वचनं यदेकोऽर्थो बहुभिः शाखिभिरुच्यते। एकस्मिन्नपि वेदे बहुभिरुच्यमाने पुनरुक्तिप्रसङ्गात्। तस्मादध्येतृभेदेन पुनरुक्त्यभावात्कर्मैक्यम्। तदुक्तम् " अद्विर्वचनं श्रुतिसंयोगाविशेषात् " [पू० मी० सू० २-४-१६] इति। एवमत्रापि विद्यैक्यं प्रतिशाखं प्रत्येतव्यम्। अशक्तिरपि न भेदहेतुः। असमर्थानामेकस्मिन्नपि वेदे सर्वाङ्गोपसंहारानर्हत्वात्। समर्थानां तु शाखाभेदे[4] तदध्ययनाभावेऽपि तदध्येतृभ्यो विश्वस्य तत्तद्रूपमुपसंहर्तुं[5] शक्यत्वात्। न च समाप्तिवचनं भेदकमेकत्वेऽपि कस्यचिदन्याङ्गस्य[6] समाप्तौ समाप्तिवचनसंभवात्। न चान्यार्थदर्शनमन्यपरत्वात्कर्मैक्यं विद्यैक्यं वा प्रमितं निषेद्धुमर्हति। शब्दान्तरसंख्याप्राक्रियाणामपि प्रबलेनाभेदकेन भेदकत्वमपास्यमतो न विद्याभेदाशङ्केति ॥ १ ॥

तर्हि पूर्वतन्त्रोक्तन्यायेनैव प्रतिशाखं विद्यैक्यसिद्धौ किमनेनाधिकरणेनेत्याशङ्क्याऽऽह—इहापीति। शाखान्तराधिकरणे खल्वेकस्यां शाखायामग्नीषोमीयस्यैकादशकपालत्वमपरस्यां द्वादशकपालत्वमिति रूपभेदात्कर्मभेदं शङ्कित्वा संख्ययोर्विकल्प इत्युक्तम्। तँद्युक्तं कपालसंख्ययोरुत्पन्नशिष्टयोरुत्पत्तावैकरूप्येण ज्ञातकर्मप्रत्यभिज्ञानाबाधकत्वेन कर्माभेदकत्वादन्यादिगतपञ्चसंख्यावदुत्पत्तिविशिष्टत्वाद्वाजिनवद्भेदकत्वमिति शङ्कामुत्थाप्य परिहारादस्यार्थवत्तेत्यर्थः। शङ्कां विभजते—स्यादिति। गुणभेदं साध-

---

१ घ. ङ. ज. ट. पि कंचिं। ञ पि कञ्चिद्वि'। २ ठ. च कर्मं। ३ क. ख. ठ. ङ. न चैत'। ४ क. 'देन त'। ५ ङ. 'त्तदुपसं'। ६ ठ. ङ. 'चिदेकस्याङ्ग'। ७ झ. तदुक्तं। ८ क. ख. ठ. ङ. 'देस्ततप'।

(छान्दोग्यबृहदारण्यकोक्तपञ्चाग्निविद्योपासनयोः फलैक्यादैक्यम् , अधि० १)

तथाहि—वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य षष्ठमपरमग्निमामनन्ति " तस्याग्निरेवाग्निर्भवति " [बृ० ६ २-१४] इत्यादिना। छन्दोगास्तु तं नाऽऽमनन्ति पञ्चसंख्यया चैव च त उपसंहरन्ति " अथ ह य एतानेवं पञ्चाग्नीन्वेद " [छा० ५-१०-१०] इति । येषां च स गुणोऽस्ति येषां च नास्ति कथमुभयेषामेका विद्योपपद्येत । न चात्र गुणोपसंहारः शक्यते प्रत्येतुं पञ्चसंख्याविरोधात् । तथा प्राणसंवादे श्रेष्ठादन्यांश्चतुरः प्राणान्वाक्चक्षुःश्रोत्रमनांसि च्छन्दोगाः [छा० ५-१ ८।१] आमनन्ति वाजसनेयिनस्तु पञ्चममप्यामनन्ति " रेतो वै प्रजातिः प्रजायते ह प्रजया पशुभिर्य एवं वेद " [बृ० ६-१ ६] इति । आवापोद्वापभेदाच्च वेद्यभेदो भवति वेद्यभेदाच्च विद्याभेदो द्रव्यदेवताभेदादिर्वं यागस्येति चेत् । नैष दोषः । यतः " एकस्यामपि " विद्यायामेवंजातीयको गुणभेद उपपद्यते । यद्यपि षष्ठस्याग्नेरुपसंहारो न संभवति तथाऽपि द्युप्रभृतीनां पञ्चानामग्नीनामुभयत्र प्रत्यभिज्ञायमानत्वान्न विद्याभेदो भवितुमर्हति । न हि षोडशिग्रहणाग्रहणयोरतिरात्रो भिद्यते । पठ्यतेऽपि च षष्ठोऽग्निश्छन्दोगैः " तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति " [छा० ५-९ २] इति।

यति—तथा हीति । छन्दोगाः षष्ठमग्निं नाऽऽमनन्तीति कथं सिद्धमित्याशङ्क्योपसंहारवशादित्याऽऽह—पञ्चेति । गुणभेदमुक्त्वा तत्फलं विद्याभेदमाह—येषां चेति । वाजसनेयकगतो योऽग्निः षष्ठोऽन्त्येष्टिनिविष्टः प्रसिद्धवदुक्तस्तस्य च्छान्दोग्येऽप्युपसंहारान्न गुणभेदोऽस्तीत्याशङ्क्याऽऽह—न चेति । पञ्चाग्निविद्यायां गुणभेदाद्भेदमुक्त्वा प्राणविद्यायामपि तद्भेदाद्भेदमाह—तथेति । अस्तु प्रजननगुणवतो रेतसो वाजसनेयिनामावापश्छन्दोगानां चोद्धारस्तथाऽपि कथं विद्याभेदस्तत्राऽऽह—आवापेति । सूत्रावयवं परिहारत्वेन व्याचष्टे—नेत्यादिना । ननु गुणभेदे वेद्यभेदाद्विद्याभेदो न च षष्ठस्याग्नेरुपसंहारः पञ्चसंख्याविरोधात्तत्राऽऽह—यद्यपीति । एकैव विद्या षष्ठाग्नियुक्ता तद्रहिता चेति विरुद्धमित्याशङ्क्याऽऽह—न हीति । किंच वाजसनेयके षष्ठस्यापि ध्येयत्वमग्नेरुपेत्योक्तं न तु तस्य ध्येयत्वं पञ्चैवाग्नयस्तथोच्यन्ते । अनुपास्यत्वेन षष्ठोक्तिश्छान्दोग्येऽपि तुल्येत्याह—पठ्यतेऽपीति । इतोऽस्माल्लोकात्तं दिष्टं परलोकं प्रेतं गतं पुत्रा ज्ञातयो वाऽग्नये नैधनविधिं

---

१ ङ. 'त्रयाग' । २ क. ख. 'ग्नेष्वपि' । ३ ठ. ड. 'वाजिना' ।

वाजसनेयिनस्तु सांपादिकेषु पञ्चस्वग्निष्वनुवृत्तायाः समिद्धूमादिकल्पनाया निवृत्तये " तस्याग्निरेवाग्निर्भवति समित्समित् " [बृ० ६-२-१४] इत्यादि समामनन्ति स नित्यानुवादः। अथाप्युपासनार्थं एष वादस्तथाऽपि स गुणः शक्यते छन्दोगैरप्युपसंहर्तुम्। न चात्र पञ्चसंख्याविरोध आशङ्क्यः सांपादिकाग्न्यभिप्राया ह्येषा पञ्चसंख्या नित्यानुवादभूता न विधिसमवायिनीत्यदोषः। एवं प्राणसंवादादिष्वप्यधिकस्य गुणस्येतरत्रोपसंहारो न विरुध्यते। न चाऽऽवापोद्वापभेदाद्वेद्यभेदो विद्याभेदश्चाऽऽशङ्क्यः। कस्यचिद्वेद्यांशस्याऽऽवापोद्वापयोरपि भूयसो वेद्यराशेरभेदावगमात्। तस्मादैकविद्यमेव ॥ २ ॥

स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

यदप्युक्तमाथर्वणिकानां विद्यां प्रति शिरोव्रतांद्यपेक्षणाद-

विधातुं हरन्तीत्यर्थः। अनुपास्यत्वे किमिति पूर्वाग्निवत्पठ्यते षष्ठोऽग्निस्तत्राऽऽह—**वाजसनेयिनस्त्विति**। तस्योपासकस्य मृतस्य दाहायाग्निरेवाग्निरिति प्रसिद्धानुवादो न तूपास्तिविधिरुपास्यास्तूभयत्राऽपि पञ्चैवाग्नयः। प्रसिद्धानुवादश्च कल्पनानिवृत्त्यर्थत्वादर्थवानित्यर्थः। उत्पत्तौ गुणान्तरविध्यभावान्न विद्याभेदो वैश्वदेव्यास्तूत्पत्तौ विशिष्टगुणोक्तेर्भेद इत्युक्तम्। इदानीं वाजिनां षष्ठाग्निविधानेऽपि न विद्याभेद इत्याह—**अथापीति**। पञ्चाग्नीन्वेदेति श्रुतसंख्याविरोधान्न षष्ठस्याग्नेरुपसंहारसिद्धिरित्याशङ्क्य पञ्चसंख्याया विधेयत्वाभावात्सांपादिकाग्न्यवच्छेदकत्वेनैवानुवादादुत्पत्त्यशिष्टत्वादुत्पन्नानां च प्रत्यभिज्ञानान्न विद्याभेद इत्याह—**न चेति**। पञ्चाग्निविद्यामुक्तन्यायं प्राणविद्यादिष्वतिदिशति—**एवमिति**। यत्त्वावापोद्वापाभ्यां वेद्यभेदाद्विद्याभेद इति तत्राऽऽह—**न चेति**। बहुतरांशाभेदप्रत्यभिज्ञानादल्पतरांशभेदेऽपि प्रत्यभिज्ञाविरोधान्न विद्याभेद इत्यर्थः। रूपभेदाद्विद्याभेदं शङ्कितं निरस्योपसंहरति—**तस्मादिति** ॥ २ ॥

रूपभेदस्य भेदकत्वं निराकृत्य धर्मभेदस्य भेदकत्वं प्रत्याह—**स्वाध्यायस्येति**। व्यावर्त्य चोद्यमनुद्रवति—**यदपीति**। शिरोव्रतं शिरस्यग्निधारणम्। आदिग्रहणादा-

---

१ ङ. ज. 'दश्च श'। २ ङ. ञ. 'यसोर्वेद्यवेदित्रोर'। ३ क. ज. 'तारे'।

(छान्दोग्यबृहदारण्यकोक्तपञ्चाग्निविद्योपासनयोः फलैक्यादैक्यम्, अधि० १)

न्येषां च तदनपेक्षणाद्विद्याभेद इति तत्प्रत्युच्यते—" स्वाध्यायस्य " एष धर्मो न विद्यायाः । कथमिदमवगम्यते । यतः " तथात्वेन " स्वाध्यायधर्मत्वेन " समाचारे " वेदव्रतोपदेशपरे ग्रन्थ आथर्वणिका इदमपि वेदव्रततत्वेन व्याख्यातमिति समामनन्ति । " नैतदचीर्णव्रतोऽधीते " [मुण्ड० ३-२-११] इति चाधिकृतविषयादेतच्छब्दाद्ध्ययनशब्दाच्च स्वोपनिषदध्ययनधर्म एवैष इति निर्धार्यते । ननु " तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् " [मुण्ड० ३-२-१०] इति ब्रह्मविद्यासंयोगश्रवणादेकैव सर्वत्र ब्रह्मविद्येति संकीर्येतैष धर्मः । न, तत्राप्येतामिति प्रकृतप्रत्यवमर्शात् । प्रकृतत्वं च ब्रह्मविद्याया ग्रन्थविशेषापेक्षत्वमिति ग्रन्थविशेषसंयोग्येवैष धर्मः । " सववच्च तन्नियमः " इति निदर्शननिर्देशः । यथा च सवा होमाः सप्त सौर्यादयः शतौदनप-

---

तपावस्थानादि गृह्यते । चोद्योत्तरत्वेन सूत्रमवतार्य व्याचष्टे—तदिति । स्वाध्यायाङ्गत्वेन श्रुत्यादिभिरविनियोगे न तदङ्गतेति शङ्कते—कथमिति । तथात्वेनेत्यादिनोत्तरमाह—यत इति । गोदानादीनि वेदाध्ययनाङ्गत्वेनानुष्ठेयानि व्रतानि । शिरोव्रतमपि वेदव्रतेष्वन्तर्गतत्वेनोक्तं तेन यथा गोदानाद्यध्ययनाङ्गं तथेदमपीत्यर्थः । अधिकाराच्चेति व्याचष्टे—नैतदिति । एतद्ग्रन्थजातमचीर्णव्रतोऽननुष्ठितशिरोव्रतः पुरुषो नाधीत इति प्रकृतमुण्डकपरामर्शकादेतच्छब्दान्मुण्डकाध्ययनधर्म एवायं न विद्याधर्म इति प्रतिभातीत्यर्थः । अधिकारादधिकृतविषयादेतच्छब्दाच्चकारादधीत इत्यध्ययनशब्दाच्चेति व्याख्यातम् । इदानीं शङ्कोत्तरत्वेन व्याख्यातुं शङ्कयति—नन्विति । सर्वत्र ब्रह्मविद्यैकैव चेत्तया शिरोव्रतस्य संयोगाद्धर्मसंकरः स्यान्न च सोऽस्तीति विद्याभेद इत्यर्थः । एतां ब्रह्मविद्यामिति तत्प्रकाशकमिमं ग्रन्थमिति योज्यम् । अन्यथा प्रकृतविषयैतच्छब्दविरोधादित्याह—नेति । ब्रह्मविद्यैव प्रकृतेति सैव परामृश्यतामित्याशङ्क्य तस्याः सर्वत्रैक्यादर्थवैविहितैवात्र परामृष्टव्येत्याह—प्रकृतत्वं चेति । सूत्रावयवान्तरमवतारयति—सववच्चेति । तस्य शिरोव्रतस्य मुण्डकाध्ययने नियम इत्यत्र सववदिति निदर्शनमिति योजना । ततश्च शिरोव्रतस्य संकरो नेति चकारार्थः । तदेव विवृणोति—यथेति । सवा होमाः । आथर्वणैरुदित एकोऽग्निरेकऋषिसंज्ञया प्रसि-

---

१ ङ. ञ. 'न समाख्या' । २ क. ङ. ज. ञ. 'नु च ते' । ३ ङ. ञ. 'तपराम' । ४ क. ङ. ज. ञ. 'क्षमि' । ५ ठ. ड. 'ति भा' । ६ ठ. ड. 'शैवैकै' ।

(छान्दोग्यबृहदारण्यकोक्तपञ्चाग्निविद्योपासनयो फलैक्यादैक्यम्, अधि० १)

र्यन्ता वेदान्तरोदितयोरग्न्यभिसंबन्धादाथर्वणादितैकाग्न्यभिसंबन्धाच्चाऽऽथर्वणिकानामेव नियम्यन्ते। तथैवायमपि धर्मः स्वाध्यायविशेषसंबन्धात्तत्रैव नियम्यते। तस्मादप्यनवद्यं विद्यैकत्वम् ॥ ३ ॥

दर्शयति च ॥ ४ ॥ (१)

दर्शयति च वेदोऽपि विद्यैकत्वं सर्ववेदान्तेषु वेद्यैकत्वोपदेशात्। "सर्वे वेदा यत्पदमामनन्ति" [कठ० २-१५] इति। "तथैतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्यव एतं महाव्रते छन्दोगाः" [ऐत०आर० ३-२-३-१२] इति च। तथा "महद्भयं वज्रमुद्यतम्" [कठ० ६-२] इति काठक उक्तस्येश्वरगुणस्य भयहेतुत्वस्य तैत्तिरीयके भेददर्शननिन्दायै परामर्शो दृश्यते। "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति। तत्त्वेव भयं विदुषोऽमन्वानस्य" [तै० २-७-१] इति। तथा वाजसनेयके [शत० १०-६-१-१०] प्रादे-

---

द्धस्तेषामेव नियम्यन्ते तदीये तत्रैवाम्नो क्रियन्ते। स्वाध्यायविशेषसंबन्धादेतच्छब्दादधीतिशब्दाच्च मुण्डकाध्ययनसंबन्धाधिगतेरिति यावत्। धर्मभेदस्य धर्म्यभेदकत्वे फलितमाह—तस्मादिति। नामादिवद्धर्मभेदस्यापि भेदकत्वायोगादित्यर्थः ॥ ३ ॥

किंच वेद्यैकत्वोक्त्या ब्रह्मविद्यायास्तावदैक्यं सर्वत्र वेदो दर्शयति। तथाऽन्यत्रापि वेद्याभेदेऽपि विद्यैक्यमित्याह—दर्शयति चेति। सूत्रं व्याचष्टे—दर्शयतीत्यादिना। वेदत्रयेऽपि विद्यैक्यविषयमुपदेशान्तरमाह—तथेति। किंच शाखान्तरोक्तपदार्थस्य शाखान्तरे सिद्धवत्परामर्शादपि विद्यैक्यधीरित्याह—तथेत्यादिना। एष पुरुषो यदा यस्यामविद्यावस्थायामेतस्मिन्नात्मन्यद्वयत्वेन सर्ववेदान्तप्रसिद्धे स्वाविद्यावशादेवान्तरं भेददर्शनमुदरमल्पमपि करोत्यथ तदा तस्यामवस्थायां तस्य भेददर्शनवतो भयमावश्यकम् "द्वितीयाद्वै भयं भवति" इति श्रुत्यन्तरादित्यर्थः। भेददर्शनवता भयकारणमाह—तत्त्वेवेति। भेददर्शनवतो विदुषस्तत्त्वमन्वानस्य तदेव ब्रह्म भयंकरमित्यर्थः। निर्गुणविद्यायां वेद्यैकत्वादेकत्वेऽपि कथं सगुणविद्यायामेकत्वं तत्राऽऽह—तथेति। एवं ब्रह्मविद्यैक्येऽपि कथमुक्थाद्युपास्तीनामैक्यं तत्राऽऽह—

---

१ ङ. ञ. ट. तथाऽय°। २ ङ ज. ञ. ट. नियम्येत। ३ ङ.ज. ञ. ट. 'थैतमेव। ४ ञ. ङ. °ति। त° ५ ठ ङ. °दस्याभे°। ६ ख. ठ. ङ. °पि विद्या°। ७ ठ. ङ. °त्त्वमेव मन्वा°। ८ ठ. °द्याया वे°।

(गुणोपसंहारस्य कर्तव्यत्वम्, अधि० २)

शमात्रसंपादितस्य वैश्वानरस्य च्छान्दोग्ये सिद्धवदुपादानम् "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" [छा० ५-१८-१] इति । तथा सर्ववेदान्तप्रत्ययत्वेनान्यत्र विहितानामुक्थादीनामन्यत्रोपासनविधानायापोदानात्प्रायदर्शन-न्यायेनोपासनानामपि सर्ववेदान्तप्रत्ययत्वसिद्धिः ॥ ४ ॥ (१)

(गुणोपसंहारस्य कर्तव्यत्वम्, अधि० २)

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥ (२)

इदं प्रयोजनसूत्रम् । स्थिते चैवं सर्ववेदान्तप्रत्ययत्वे सर्वविज्ञानानामन्यत्रोदितानां विज्ञानगुणानामन्यत्रापि समाने विज्ञान उपसंहारो भवति । अर्थाभेदात् । य एव हि तेषां गुणानामेकत्रार्थो विशिष्टविज्ञानोपकारकः स एवान्यत्रापि । उभयत्रापि हि तदेवैकं विज्ञानं तस्मादुपसंहारः । विधिशेषवत् । यथा विधिशेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादि कर्म सर्वत्रेत्यर्था-

---

तथेति । यथा निर्गुणं सगुणं च ब्रह्म सर्वत्रैकमिति तद्विद्या न भिद्यते तथोक्थादीनां सर्ववेदान्तप्रत्ययत्वादेतद्भ्यते । यदन्यत्रोक्तानामन्यत्रोपास्त्यर्थं तेषामादानमिति । ततस्तदुपास्तीनामपि सर्ववेदान्तप्रमाणकत्वेनैक्यं प्रायदर्शनन्यायेन बाहुल्येन सिध्यतीत्यर्थः ॥ ४ ॥ (१)

सर्वशाखासु विद्यैक्ये गुण्याकृष्टगुणानां तत्र तत्रोपसंहारमनन्तरविचारफलमाह—**उपसंहार** इति । संक्षेपतोऽधिकरणतात्पर्यमाह—**इदमिति** । पूर्वविचारफलमनेन सूत्रेणोच्यते तेन तद्वदेवास्य पादादिसंगतिः । पूर्वपक्षे पूर्वाधिकरणस्य विवक्षितफलासिद्धिः । सिद्धान्ते तस्य तत्सिद्धिः । तुल्यधीबद्धा गुणा विधेयास्ते किं यथाश्रुति व्यवतिष्ठेरन्नुत प्रत्यभिज्ञया ज्ञानोपाधावुपसंहियेरन्निति मीमांसायामिच्छाभेदादतिरात्रे षोडशिग्रहाग्रहवदुपसंहारस्यानावश्यकत्वाद्यथाश्रुति व्यवस्थेति प्राप्ते सिद्धान्तयन्नुपसंहारः । समाने चेति विभागं विभजते—**स्थिते चेति** । तत्र हेतुमुक्त्वा व्याकरोति—**अर्थेति** । कथं व्यवस्थया श्रुतानां गुणानामुपकारैक्यं तत्राऽऽह—**उभयत्रेति** । गुणिद्वारा गुणानामपि प्रत्यभिज्ञाने फलितमाह—**तस्मादिति** । अर्थाभेदादुपसंहारे दृष्टान्तमाह—**विधीति** । प्रधानप्रत्यभिज्ञायां सर्वतद्धर्मप्रत्यभिज्ञानात्फलाविशेषाच्च व्यवस्थया श्रुतानामपि गुणानामेकज्ञानोपाधावुपसंहार इति दार्ष्टान्तिकमाह—

---

१ क. ङ. ज. ञ. 'कारः स । २ ङ. तथा । ३ ठ. ड. 'ह । एवमि' । ४ क. ख. ठ. ड. 'षयस्ते । ५ ठ. ड 'वस्थिते प्रा' ।

भेदादुपसंहरणमेवमिहापि । यदि हि विज्ञानभेदो भवेत्ततो विज्ञानान्तरनिबद्धत्वाद्गुणानां प्रकृतिविकृतिभावाभावाच्च न स्यादुपसंहारः । विज्ञानैकत्वे तु नैवमिति । अस्यैव तु प्रयोजनसूत्रस्य प्रपञ्चः " सर्वाभेदात् " [सू० ३-३-१०] इत्यारभ्य भविष्यति ॥ ५ ॥ (२)

(छान्दोग्यकाण्वशाखयोरुद्गीथविद्याभेदकथनम्, अधि० ३)

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

वाजसनेयके " ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति " [बृ० १-३-१] " ते ह वाचमूचुस्त्वं न उद्गाय "

एवमिति । उक्तमेव व्यतिरेकतः स्फोरयति—यदीति । आग्नेयसौर्ययोर्भेदेऽप्याग्नेयगतस्येतिकर्तव्यताजातस्य सौर्ये प्राप्तिवज्ज्ञानान्तरस्थानामपि गुणानां ज्ञानान्तरे प्राप्तिः स्यादित्याशङ्क्याऽऽह—प्रकृतीति । ज्ञानैक्येऽपि शाखान्तरोक्तगुणानां शाखान्तरोक्तज्ञाने नोपसंहारः । तत्रोक्तगुणमात्रेण तज्ज्ञानोपकारसिद्धेरधिकानपेक्षणात् । अन्यथा तत्रैव तद्विधिप्रसङ्गात् । तस्मादक्ष्यादित्यस्थानभेदेनोक्तयोरहरहमितिगुणयोर्व्यवस्थानवदुपास्याभेदेऽपि शाखाभेदेनोक्तानां व्यवस्थैवेत्याशङ्क्य शाखाभेदस्योक्तस्थानवदुपास्यविशेषणतया गुणव्यवस्थापकत्वाभावाद्धर्म्युपाधावुक्तगुणानां सर्वत्रापि श्रुतेन धर्मिणा नियमादनुमानतः सार्वत्रिकत्वसिद्धेर्विद्यैक्ये गुणोपसंहारो बलवद्बाधकाभावे वारयितुं न शक्यते । शाखान्तरे कतिपयगुणवादस्य तद्विध्यर्थतया गुणान्तरावारकत्वादित्याह—विज्ञानेति । एवमित्युपसंहाराभावोक्तिः । इतिशब्दः सिद्धान्तसमाप्त्यर्थः । उत्तरसंदर्भस्य पौनरुक्त्यं प्रत्याह—अस्यैवेति ॥ ५ ॥ (२)

संज्ञाभेदाज्ज्ञानैक्यं तद्गुणानां चान्यत्रोपसंहार इत्युक्त उद्गीथविद्ययोरपि च्छान्दोग्यबृहदारण्यकोक्तयोः संज्ञाभेदादभेदमाशङ्क्य प्रत्याह—अन्यथात्वमिति । चोदनाद्यविशेषादित्यस्यापवादार्थमिदमधिकरणम् । तस्य बृहदारण्यकस्थमुद्गीथब्राह्मणं छान्दोग्यस्थमुद्गीथाध्यायं च विषयमाह—वाजसनेयक इति । ते प्रकृता वागादयः प्राणा देवाः सात्त्विकवृत्तिप्रधानाः संभूयान्योन्यमुक्तवन्तो हन्त यदि संमतमस्माकं तदाऽस्मिन्नाभिचारिके यज्ञे वयमुद्गीथाख्यभक्तिलक्षितेनौद्गात्रेण कर्मणा तमोवृत्तिप्रधानानसुरानतीत्य स्वमन्यादिभावमयामेति ते चैवं कृतसंवादा वाचमौद्गात्रे कर्मणि प्रधानां त्वमस्मदर्थमौद्गात्रं निर्वर्तयेति नियुक्तवन्तस्तथोपक्रम्य वागादीन्वाक्प्राणचक्षुःश्रोत्रमनांसि पाप्मना ह्येषा विद्धेत्यादिना पाप्मविद्धत्वेन निन्दित्वा तेषामध्येयत्वं निर्धार्य मुख्यप्रा-

---

१ क. ङ. ज. ञ. °संहार एव° । २ ठ. ड. °न्तरप्रा° । ३ क. ठ. ड °रोक्ते ज्ञा° । ४ ठ. ड. °क्तमहरहमित्यहमहर्गुण° । ५ ठ. °स्य तु बृ° । ६ ख. ठ. ड. प्रधाना ।

(छान्दोग्यकाण्वशाखयोरुद्गीथविद्याभेदकथनम्, अधि० ३)

[बृ० १-३-२] इति प्रक्रम्य वागादीन्प्राणानसुरपाप्मविद्धत्वेन निन्दित्वा मुख्यप्राणपरिग्रहः पठ्यते " अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत् " [बृ० १-३-७] इति । तथा छान्दोग्येऽपि " तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्यामः " [छा० १-२-१] इति प्रक्रम्येतरान्प्राणानसुरपाप्मविद्धत्वेन निन्दित्वा तथैव मुख्यप्राणपरिग्रहः पठ्यते " अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे" [छा०१-२-७] इति। उभयत्रापि च प्राणप्रशंसया प्राणविद्याविधिरध्यवसीयते । तत्र संशयः—किमत्र विद्याभेदः स्यादाहोस्विद्विद्यैकत्वमिति । किं तावत्प्राप्तं पूर्वेण न्यायेन विद्यैकत्वमिति । ननु न युक्तं विद्यैकत्वं प्रक्रमभेदात् । अन्यथा हि प्रक्रमन्ते वाजसनेयिनोऽन्यथा छन्दोगाः । " त्वं न उद्गाय " [बृ० १-३-१] इति वाजसनेयिन उद्गीथस्य कर्तृत्वेन प्राण-

---

णस्योपास्यत्वं च निश्चित्य तत्परिग्रहः श्रूयत इत्यर्थः । वागादीनामनुपास्यत्वनिश्चयानन्तरमित्यथशब्दार्थः । आसन्यमास्ये भवं मुखान्तर्बिलस्थं प्राणं मुख्यप्राणाभिमानिनीं देवतामिति यावत् । उद्गीथब्राह्मणमुक्त्वोद्गीथाध्यायं कथयति—तथेति । तत्तत्रान्योन्याभिभवात्मके सङ्ग्रामे देवाः पूर्ववदुद्गीथलक्षितं कर्माऽऽजह्रुराहृतवन्तः । अनेन कर्मणैनानसुरान्स्वाभाविकेन्द्रियवृत्तिलक्षणानभिभविष्याम इत्यभिप्रेत्य कर्माऽऽरब्धवन्त इत्यर्थः । तथैवेत्युद्गीथब्राह्मणवदेवेत्यर्थः । आख्यायिकैव श्रुता न विद्याविधिरित्याशङ्क्य ब्राह्मणाध्याययोर्विवक्षितमर्थमाह—उभयत्रेति । शाखाद्वयस्थोद्गीथविद्यां विषयमुक्त्वा विचारबीजं संशयमाह—तत्रेति । भेदाभेदमानाभ्यां तमेव विशदयति—किमिति । विमृश्य पूर्वपक्षयति—किं तावदिति । पूर्वत्राख्याविशेषाद्विद्यैक्यमुक्तं तदत्राप्युद्गीथविद्येत्याख्याविशेषादैक्यमित्यर्थः । अत्र चोपास्तिभेदोक्त्या वाक्यार्थधीहेतोरेव निरूपणात्पादादिसंगतयः । पूर्वपक्षे गुणोपसंहारः सिद्धान्ते तदसत्तेति फलभेदः । अन्यथात्वमित्यादिसैद्धान्तिकीं शङ्कां व्याकुर्वन्पूर्वपक्षमाक्षिपति—नन्विति । प्रक्रमभेदादित्युक्तं व्यनक्ति—अन्यथा हीति । कथमुभयत्र प्रक्रमस्यान्यथात्वं तत्राऽऽह—त्वमिति । उद्गीथस्येति । सर्वस्या भक्तेरिति यावत् । उद्गीथत्वेनेति । तदवयवो योऽयमोंकारस्तथात्वेनेत्यर्थः । उद्गानकर्ता प्राणो वाजसनेयके ध्येयत्वेनोच्यते छान्दोग्ये त्वोंकारः प्राणदृष्ट्योपास्य इष्टः । तथाच कर्तृकर्मणोर्भेदान्न विद्यैक्यमिति फलितमाह—

---

१ ङ. ञ. 'ति तथेति प्र' । २ ङ. ज. झ. 'णानासु' । ३ क. ख. झ. 'ति । तत्रा' ।

मामनन्ति । छन्दोगास्तूद्गीथत्वेन " तमुद्गीथमुपासांचक्रिरे " [छा० १-२७] इति । तत्कथं विद्यैकत्वं स्यादिति चेत् । नैष दोषः । न ह्येतावता विशेषेण विद्यैकत्वमपगच्छति । अविशेषस्यापि बहुतरस्य प्रतीयमानत्वात् । तथा हि देवासुरसङ्ग्रामोपक्रमत्वमसुरात्ययाभिप्राय उद्गीथोपन्यासो वागादिसंकीर्तनं तन्निन्दया मुख्यप्राणव्यपाश्रयस्तद्गीर्याच्चासुरविध्वंसनमश्मलोष्टनिदर्शनेनेत्येवं बहवोऽर्था उभयत्राप्यविशिष्टाः प्रतीयन्ते । वाजसनेयकेऽपि चोद्गीथसामानाधिकरण्यं प्राणस्य श्रुतम् " एष उ वा उद्गीथः " [बृ० १-३-२३] इति । तस्माच्छान्दोग्येऽपि कर्तृत्वं लक्षयितव्यम् । तस्माच्च विद्यैकत्वमिति ॥ ६ ॥

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ ७ ॥

" न वा " विद्यैकत्वमत्र न्याय्यं विद्याभेद एवात्र न्याय्यः । कस्मात् । "प्रकरणभेदात्" । प्रक्रमभेदादित्यर्थः । तथा हि—

तादिति । बहुतररूपप्रत्यभिज्ञानादप्रत्यभिज्ञातं किंचिल्लक्षणया नेयमिति मत्वा समाधत्ते—नेत्यादिना । अविशेषादित्येतद्व्याचष्टे—न हीति । एतावता क्वचित्कर्मरूपत्वेनोपास्यत्वं कर्तृत्वेनान्यत्रेत्येतावन्मात्रेणेत्यर्थः । बहुतराविशेषप्रतीतिमेव प्रकटयति—तथा हीति । यथाऽश्मानं[1] पाषाणं प्राप्य मृत्त्वाल्लोष्टो विध्वंसत एवं विध्वंसमाना विष्वञ्चो विनेशुरिति श्रूयत इत्याह—तादिति । अविशेषधियं निगमयति—इत्येवमिति । न केवलं शाखान्तरे रूपभेदो दृष्टः किं त्वेकस्यामपि । तथाऽपि न तत्र विद्याभेदस्तथोभयोरपि स्यादित्याह—वाजेति । प्राणस्योद्गीथत्वमत्रापि श्रुतं चेत्कथमुपास्तिस्तत्राऽऽह—तस्मादिति । उद्गीथत्वेन श्रुतेरुभयत्राविशेषाद्यदेकत्र कर्तृत्वं तदितरत्रापि लक्ष्यं तथा च प्राणस्य कर्तृत्वेन कर्मत्वेन च ध्यानं शास्त्रादित्यर्थः । उभयत्रापि[2] वेद्यरूपाविशेषे फलितमाह—तस्माच्चेति ॥ ६ ॥

विद्यैक्ये पूर्वपक्षे तद्भेदं सिद्धान्तमाह—न वेति । वाशब्दस्यावधारणार्थत्वमुपेत्य प्रतिज्ञां विभजते—नेति । अत्रेति प्रकृतशाखाद्वयोक्तिः । उभयत्रापि प्राणस्योद्गीथत्वतत्कर्तृत्वाविशेषस्योक्तत्वाद्भेदेन विद्याभेदे संभवति कुतस्तद्भेदोक्तिरिति शङ्कते—कस्मादिति । तत्र हेतुः—प्रकरणेति । शाखाभेदादेव प्रकरणभेदसिद्धेर्न तस्य धीभे-

---

१ ङ. ञ. 'श्ममृल्लोष्ट' । २ ठ. ड. 'श्मानमाखणमृत्वा लोष्टो । ३ क. 'नं पाषाणमृत्वा लोष्टो । ४ क. 'पि प्राणस्योद्गीथत्वे' ।

(छान्दोग्यकाण्वशाखयोरुद्गीथविद्याभेदकथनम्, अधि० ३)

इह प्रक्रमभेदो दृश्यते। छान्दोग्ये तावत्—" ओमित्येतदक्षरमुद्गीथमुपासीत " [छा० १-१-१] इत्येवमुद्गीथावयवस्योंकारस्योपास्यत्वं प्रस्तुत्य रसतमत्वादिगुणोपव्याख्यानं तत्र कृत्वाऽथ " खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति " [छा० १-१-१०] इति पुनरपि तमेवोद्गीथावयवमोंकारमनुवर्त्य देवासुराख्यायिकाद्वारेण तम् " प्राणमुद्गीथमुपासांचक्रिरे " [छा० १-२-२] इत्याह। तत्र यद्युद्गीथशब्देन सकलाँ भक्तिरभिप्रेयते तस्याँश्च कर्तोद्गातार्त्विक्कृत उपक्रमश्चोपरुध्येत लक्षणा च प्रसज्येत। उपक्रमतन्त्रेण चैकस्मिन्वाक्य उपसंहारेण भवितव्यम्। तस्मादत्र तावदुद्गीथावयव ओंकारे प्राणदृष्टिरुपदिश्यते

दं प्रयोजकतेत्याशङ्क्याभीष्टमर्थमाह—प्रक्रमेति। शाखाद्वये तद्भेदं विवृणोति—तथा हीति। छान्दोग्यगतमुपप्रक्रमप्रकारं दर्शयति—छान्दोग्य इति। उपक्रमवाक्यस्यार्थमाह—उद्गीथेति। प्रकरणविच्छेदाभावं वक्तुं तदनुसंधत्ते—रसेति। भूतपृथिव्योषधिपुरुषवाग्ऋक्सामानां पूर्वस्य पूर्वस्योत्तरमुत्तरं सारतयोक्त्वा तेषामोंकारं रसतमत्वेन निर्दिश्य तमेव पुनरास्तिसमृद्ध्यादिगुणकत्वेनोपदिश्य ध्येयमाख्यायिकया निर्धार्योद्गीथोपास्तिरवतारितेत्यर्थः। ननु वाजसनेयके यथोद्गीथेनात्ययामेत्यत्रोद्गीथशब्देन सकला भक्तिरुक्ता त्वं न उद्गायेत्यनेनापि प्राणत्वेनोद्गातोच्यत एवमोमित्येतदक्षरमुद्गीथमुपासीतेत्युपक्रमवाक्यस्थोद्गीथशब्देन सकला भक्तिस्तस्याश्च कर्तोद्गाता प्राणत्वेनोच्यतां तथाच प्रक्रमाभेदाद्विद्यैक्यं तत्राऽऽह—तत्रेति। ऋत्विक्प्राणत्वेन निरुच्येतेति शेषः। तस्मिन्पक्षे यदुद्गीथावयवभूतमोंकाराख्यमक्षरं तत्र प्राणदृष्टिरनुष्ठेयेत्युपक्रमो बाध्येतेत्यर्थः। चकारो वक्ष्यमाणदोषसमुच्चये। यदुद्गीथावयवभूतमोंकाराख्यमक्षरं तद्विषयोद्गीथशब्दस्योद्गातृवाचित्वाभावात्तेनोद्गातुर्लक्ष्यत्वमपि ते स्यादित्याह—लक्षणेति। अक्ताः शर्करा उपदधातीत्यस्य तेजो वै घृतमिति शेषान्निर्णयवत्प्राणमुद्गीथमुपासांचक्रिर इति सकलभक्तिविषयोपसंहारादुपक्रमो नीयतामित्याशङ्क्याऽऽह—उपक्रमेति। तस्य संदिग्धार्थत्वात्स्यादुपसंहारापेक्षा। प्रकृते तूपक्रमस्यातिस्पष्टत्वान्नैवमित्यर्थः। ओमित्येतदक्षरमित्यादौ तर्हि कोऽर्थः स्यादित्याशङ्क्याऽऽह—तस्मादिति। उद्गीथेनात्ययामेत्यत्रापि तदवयवस्योद्गीथशब्दत्वादुद्गातुश्चाश्रुतेर्न प्रक्र-

---

१ क. ग. ङ. ज. ञ. ट. 'तमादि'। २ ङ. ञ. 'नं च तं'। ३ क. ज. 'ण प्रा'। ४ ङ. 'ला सामभं'। ५ ज. ट. 'प्रेयते तं'। ६ ट. 'स्या वा क'। ७ ठ. ड. 'भेदप्र'। ८ ठ. ड. 'दिश्याऽऽध्ये'। ९ ञ. 'द्गातृलक्ष्यं'।

वाजसनेयके तूद्गीथशब्देनावयवग्रहणे कारणाभावात्सकलैव भक्तिरावेद्यते । " त्वं न उद्गाय " [बृ० १-३ ७] इत्यपि तस्याः कर्तोद्गातर्त्विक्प्राणत्वेन निरूप्यत इति प्रस्थानान्तरम् । यदपि तत्रोद्गीथसामानाधिकरण्यं प्राणस्य तदप्युद्गातृत्वेनैव दिदर्शयिषितस्य प्राणस्य सर्वात्मत्वप्रतिपादनार्थमिति न विद्यैकत्वमावहति । सकलभक्तिविषय एवं च तत्राप्युद्गीथशब्द इति वैषम्यम् । न च प्राणस्योद्गातृत्वमसंभवेन हेतुना परित्यज्यत उद्गीथभाववदुद्गातृभावस्याप्युपासनार्थत्वेनोपदिश्यमानत्वात् । प्राणवीर्येण चोद्गातोद्गात्रं करोतीति नास्त्यसंभवः । तथा च तत्रैव श्रावितम् " वाचा च त्येव स प्राणेन चोदगायत् " [बृ० १-३-२४] इति । न च विवक्षितार्थभेदेऽवगम्यमाने वाक्यच्छायानुकारमात्रेण समानार्थत्वमध्यवसातुं युक्तम् । तथा ह्यभ्यु-

---

मभेदोऽस्तीत्याशङ्क्याऽऽह—वाजेति । ओमित्येतदक्षरमित्युपक्रमस्यावयवार्थत्वात्तँदुद्गीथमित्युद्गीथशब्देनावयवो गृहीतः । उद्गीथेनात्ययामेत्यत्र तु तथा हेत्वदृष्टेः सकलभक्तिविषयत्वमेव तस्येत्यर्थः । यदुक्तमिहापि नोद्गातुरस्ति धीरिति तत्राऽऽह—त्वमिति । कथं प्राणस्योद्गीथकर्तृत्वमुद्गीथेन सामानाधिकरण्यश्रवणात्ततो वैद्यैक्याद्विद्यैक्यं तत्राऽऽह—यदपीति । तत्रेति वाजसनेयकोक्तिः । इतश्च नेदं सामानाधिकरण्यं विद्यैक्यक्षममित्याह—सकलेति । तत्रेति सामानाधिकरण्यवाक्योक्तिः । अपिरुद्गीथेनात्ययामेतिवाक्यदृष्टान्तार्थः । वैषम्यमुभयत्र विद्यानानात्वम् । प्राणस्याचेतनत्वान्नोद्गातृत्वमित्याशङ्क्याऽऽह—न चेति । असंभवमभ्युपेत्य वाचनिकमुद्गातृत्वमित्युक्तं संप्रत्यसंभवोऽपि नास्तीत्याह—प्राणेति । औद्गात्रमुद्गाता प्राणवीर्येण करोतीत्येतदेव कथं तत्राऽऽह—तथाचेति । तत्रैवेत्युद्गीथप्रकरणोक्तिः । उद्गाता प्राणप्रधानया वाचा कृतवानौद्गात्रमिति श्रुत्यर्थः । यत्तु बहुतरार्थाविशेषाद्विद्यैक्यमिति तत्राऽऽह—न चेति । वाजसनेयके तावदुद्गीथोद्गातारौ ध्येयत्वेनोच्येते छान्दोग्ये त्वोंकारस्तदवयवः प्राणदृष्ट्योपास्य उक्तः । एवं विवक्षितार्थस्यान्तरङ्गोपास्यस्वरूपस्य भेदे गम्यमाने बहिरङ्गादर्थवादाविशेषान्नैकार्थत्वेन विद्यैक्यमित्यर्थः । वाक्यसादृश्यमात्रेणार्थैक्यं नास्तीत्यत्र दृष्टान्तमाह—तथा हीति । चतुर्दृश्यामेवामावास्याभ्रान्त्या दर्शार्थं प्रवृत्तस्य यजमा-

---

१ क. ज. ञ. ट. 'हणका' । २ ट. 'वं त' । ३ क. ङ. ञ. 'त्यज्येत । उ' । ४ ङ. ञ. ट. 'वस्योपा' । ५ क. ङ. ज. ञ. 'र्येणैव चो' । ६ ङ. ञ. 'त्रं कर्म क' । ७ क. ज. ञ. 'दे ग' । ८ क. ख. ठ. ङ. 'त्तमुद्गी' ।

(छान्दोग्यकाण्वशाखयोरुद्गीथविद्याभेदकथनम्, अधि० ३)

दयवाक्ये पशुकामवाक्ये च " त्रेधा तण्डुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् " [तै० सं० २-५-५ २] इत्यादिनिर्देशसाम्येऽप्युपक्रमभेदादभ्युदयवाक्ये देवतापनयोऽध्यवसितः पशुकामवाक्ये तु यागविधिः। तथेहा-

---

नस्य चन्द्रमाः पश्चादभ्युदेति तद्विषयं वाक्यमभ्युदयवाक्यम्। तस्मिन्वाक्ये पशुकामस्येष्टिविधायके च वाक्ये यद्यपि त्रेधा तण्डुलान्विभजेदित्यादिनिर्देशस्तुल्यस्तथाऽपि वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेतीति कालातिक्रमापराधेनोपक्रमादभ्युदयवाक्ये नित्ये दर्शकर्मण्येव पूर्वदेवताभ्यो हविषामपनयनेन दातृत्वादिगुणविशिष्टदेवतान्तराङ्गीकारः। पशुकामवाक्ये च यः पशुकामः स्यात्सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यादिति नित्यं दर्शकर्म परिसमाप्य पुनर्दोहार्थं वत्सापाकरणविध्युपक्रमात्पशुकामस्येष्टयन्तराविधानमुपगतम्। न तु वाक्यद्वये निर्देशस्य सादृश्यमात्रेणार्थैक्यं प्रक्रमभेदादर्थभेदनिश्चयात्। तथा प्रकृते शाखाद्वये बहुतरार्थवादिकसादृश्येऽपि पूर्वोक्तप्रक्रमभेदाद्विद्याभेद इत्यक्षरार्थः। एतदुक्तं भवति— " वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम् " इत्यत्र यस्य यजमानस्य पुरस्तात्पूर्वं हविर्निरुप्तं देवतार्थं संकल्पितं चन्द्रमाश्च पश्चादाभिमुख्येनोदेति तमेतं यजमानं निरुप्तं हविः प्रजादिना विनाशयति शत्रुं चास्य वर्धयति। तथाचासौ चतुर्दश्यामावास्याभ्रान्तिभागी मध्यमादिभावेन त्रेधाभूता ये तण्डुलास्तानग्न्यादिभ्यो दर्शदेवताभ्यो विभजेद्विभज्य च दातृत्वादिगुणकाग्न्यादिभ्यो देवताभ्यो निर्वपेदित्येवमर्थायां श्रुतौ किमभ्युदये नैमित्तिकं कर्मान्तरं दर्शाच्चोद्यते किंवा दर्शकर्मण्येव पूर्वदेवतात्यागेन देवतान्तरं विधीयत इति संदेहे त्रेधा तण्डुलान्विभजेदिति हविषामेव मध्यमादिक्रमेण विभागश्रवणात्पूर्वदेवताभ्यो हवींषि विभजेदिति चाश्रुतेरपनीता हविःषु पूर्वदेवता इति तदवरुद्धेषु तेषु देवतान्तरमलँब्धावकाशं श्रुतं कर्मान्तरमेव गोचरयेदिति देवतान्तरयुक्तकर्मान्तरे विधिरिति प्राप्ते त्रेधा तण्डुलान्विभजेदित्यत्र ये मध्यमाः स्युरित्यादिवाक्यान्तरप्राप्तं त्रेधात्व-

---

१ ङ. ज. ञ. ट. °जेत ये म°। २ ठ. ड. °ध्यमाः स्युस्ता°। ३ ठ. दैवतार्थं। ४ ट. ड. °दिदे°। ५ क. ख. ड. दितिश्रुतेः °कि। ६ ख. °तिश्रु°। ञ. °ति च श्रु°। ७ ख. ठ. ड. °लभ्याव°।

प्युपक्रमभेदाद्विद्याभेदः । " परोवरीयस्त्वादिवत् । "यथा परमात्मदृष्ट्यध्याससाम्येऽपि " आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् " [छा० १-९-१] " स एष परोवरीयानुद्गीथः स एषोऽनन्तः " [छा० १-९-२] इति परोवरीयस्त्वगुणविशिष्टमुद्गीथोपासनमक्ष्यादित्यादिगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनाद्भिन्नम् । न चेतरेतरगुणोपसंहार एकस्यामपि शाखायां तद्वच्छाखान्तरस्थेष्वप्येवंजातीयकेषूपासनेष्विति ॥ ७ ॥

मनूद्य विभजेदित्यस्यैव विधानात्कस्मादित्यपेक्षायां मध्यमादिवाक्यैर्देवतान्तरेषूक्तेषु तत्प्रतियोगिनीनां देवतानामेव बुद्धिस्थानां विभागप्रतियोगित्वसिद्धेः । तण्डुलशब्दस्य च हविर्मात्रविषयत्वाद्दधिपयसोरपि पूर्वदेवतातो विभागलाभादपनीते पूर्वदेवताके हविषि देवतान्तरस्य सावकाशत्वात्पूर्वद्रव्यमुखेन(ण) प्रकृतकर्मप्रत्यभिज्ञानाद्देवतान्तरसंबन्धेऽपि कर्मान्तरकल्पनानवकाशान्नैमित्तिकाधिकारे समाप्ते नित्याधिकारार्थं तान्येव कर्माण्यनुष्ठेयानीति नास्ति कर्मभेद इति स्थितम् । यः पशुकामः स्यात्सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात् । ये स्थविष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेद्ये मध्यमास्तान्विष्णवे शिपिविष्टाय शृते चरुं ये क्षोदिष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुमित्यर्क्षं तुल्यश्रुत्या दर्शसमाप्त्यनन्तरं वत्सापाकरणेन गोदोहनं कृत्वा पूर्ववद्देवताभ्यो हविर्विभज्य देवतान्तरविशिष्टपशुकामेष्टिविधानात्पूर्वस्य कर्मणोऽननुवृत्तेरभ्युदयवत्क्रयसारूप्येऽपि यागान्तरविधिस्तथेहापि स्यादिति पूर्वतन्त्रसिद्धं दृष्टान्तं बहिरेवोक्त्वा सौत्रं दृष्टान्तमादाय व्याचष्टे—**परोवरीयस्त्वेति** । परस्माद्वरप्राणादेः परोवराच्च तस्मादेव वरीयान्वरतरोऽयमुद्गीथः स च परमात्मदृष्टिसंपत्तेरनन्तर इति द्रष्टव्यम् । आकाशे चाऽऽदित्यादौ च परमात्मदृष्टेरारोपादुद्गीथोपास्तिसाम्येऽपि परोवरीयस्त्वादिगुणकोद्गीथोपास्तिरन्याऽन्या च हिरण्यश्मश्रुत्वादिगुणकोद्गीथोपास्तिस्तथेहापीत्यर्थः । दृष्टान्तेऽप्यधिकगुणानामन्योन्यत्रोपसंहाराद्विद्यैक्यमित्याशङ्क्याऽऽह—**न चेति** । पुनरुक्त्या विद्याभेदस्यातिस्पष्टत्वं हेतुं मत्वोक्तम्—**एकस्यामिति** । शाखाभेदाद्भेदेनापौनरुक्त्येऽपि तात्पर्यप्रमेयगुणभेदविशिष्टोपासनेषु नानात्वमित्याह—**तद्वदिति** ॥ ७ ॥

---

१ ङ. ञ. °यस्त्वादिगु° । २ ख. ङ. ज. ञ. °दित्यग° । ३ क. ज. °कस्यां शा° । ४ ठ. ड. °मासेन नि° । ५ क. °ये नि° । ख. °ये सांनिवयनेऽष्टा° । ठ. °ये सनिवनेऽष्टा° । ड. °ये सानिवतेऽष्टा° । ६ ठ. ड. °त्र त्रिरुक्त्वा द° । ७ क. ख. ठ. ड. °स्मात्स्वर° ।

(छान्दोग्यकाण्वशाखयोरुद्गीथविद्याभेदकथनम्, अधि० ३)

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥ (३)

अथोच्येत संज्ञैकत्वाद्विद्यैकत्वमत्र न्याय्यमुद्गीथविद्येत्युभयत्राप्येका संज्ञेति। " तदपि " नोपपद्यते। " उक्तं " ह्येतत्। " न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् " [सू० ३-३-७] इति। तदेव चात्र न्याय्यतरं श्रुत्यक्षरानुगतं हि तत्संज्ञैकत्वं तु श्रुत्यक्षरबाह्यमुद्गीथशब्दमात्रेणेयागाल्लौकिकैर्व्यवहर्तृभिरुपचर्यते। अस्ति चैतत्संज्ञैकत्वं प्रसिद्धभेदेष्वपि परोवरीयस्त्वाद्युपासनेषूद्गीथविद्येति। तथा प्रसिद्धभेदानामप्यग्निहोत्रदर्शपूर्णमासादीनां काठकैकग्रन्थपरिपठितानां काठकसंज्ञैकत्वं दृश्यते तथेहापि भविष्यति। यत्र तु नास्ति कश्चिदेवंजातीयको भेदहेतुस्तत्र भवतु संज्ञैकत्वाद्विद्यैकत्वं यथा संवर्गविद्यादिषु ॥ ८ ॥ (३)

पूर्वपक्षबीजमुद्भाव्य दूषयति—संज्ञातश्चेदिति। अनुवादं व्याकरोति—अथेति। अत्रेति शाखाद्वयमुक्तम्। संज्ञैकत्वं विवृणोति—उद्गीथेति। पूर्वसूत्रगतं नञ्शब्दं तच्छब्देन संयोज्य परिहरति—तदपीति। पूर्वसूत्रोक्तपरिहारस्य बाधकत्वाच्चोद्याभासोऽयमित्याह—उक्तं हीति। समाख्याविशेषादभेदो गम्यते रूपभेदाच्च भेदस्तथा सति किमत्र युक्तं तत्राऽऽह—तदेवेति। रूपभेदस्यान्तरङ्गतया बलवत्तरत्वात्संज्ञायाश्च श्रुतिबाह्यतया बहिरङ्गत्वात्पौरुषेयतया च सापेक्षत्वेन दुर्बलत्वाद्रूपभेदादुक्तं विद्यानानात्वमेव युक्तमित्यर्थः। कथं संज्ञैक्यं श्रुत्यक्षरैश्रुतबाह्यं तत्राऽऽह—उद्गीथेति। संज्ञैक्याद्विद्यैक्ये स्यादतिप्रसक्तिरित्यस्तीत्यादि व्याकरोति—अस्ति चेति। अपिशब्दोपात्तमुदाहरणान्तरमाह—तथेति। संज्ञैक्येऽपि न चेत्तदैक्यं तर्हि संज्ञैक्यमुद्गीथज्ञानेऽप्यप्रयोजकमित्याह—तथेहेति। कथं तर्हि संज्ञैक्यस्य व्यभिचारित्वे प्रथमसूत्रे तस्यैक्ये हेतुत्वमुक्तमित्याशङ्क्य तुशब्दसूचितमर्थमाह—यत्रेति। एवंजातीयकः प्रक्रमभेदो वा तत्तुल्यो वेत्यर्थः। असति बलवति बाधके संज्ञैक्यमपि साधकमित्यत्र दृष्टान्तमाह—यथेति। आदिपदेन पञ्चाग्निविद्या वैश्वानरविद्येत्यादि गृह्यते ॥ ८ ॥ (३)

---

१ क. 'देवात्रापि न्या'। ज. 'देवात्र न्या'। २ क. ज. ट. 'त्रयो'। ३ ठ. ड. 'रवा'। ४ ख. ठ. ड. 'स्यैक्यहे'।

(ब्रह्मदृष्टेर्हेतुत्वेनाक्षरोद्गीथयोरेकत्वसंपादनम् , अधि० ४)

व्याप्तेश्च समञ्जसम् ॥ ९ ॥ (४)

" ओमित्येदक्षरमुद्गीथमुपासीत " [छा० १-१-१] इत्यत्राक्षरोद्गीथशब्दयोः सामानाधिकरण्ये श्रूयमाणेऽध्यासापवादैकत्वविशेषणपक्षाणां प्रतिभासनात्कतमोऽत्र पक्षो न्याय्यः स्यादिति विचारः । तत्राध्यासो नाम द्वयोर्वस्तुनोरनिवर्तितायामेवान्यतरबुद्धावन्यतरबुद्धिरध्यस्यते यस्मिन्नितरबुद्धिरध्यस्यतेऽनुवर्तत एव तस्मिंस्तद्बुद्धिरध्यस्तेतरबुद्धावपि । यथा नाम्नि ब्रह्मबुद्धावध्यस्यमानायामप्यनुवर्तत एव नामबुद्धिर्न ब्रह्मबुद्ध्या निवर्तते । यथा वा प्रतिमादिषु विष्ण्वादिबुद्ध्यध्यासः । एवमिहाप्यक्षर उद्गीथबुद्धिरध्यस्येतोद्गीथे वाऽक्षरबुद्धिरिति । अपवादो नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायां पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टाया मिथ्याबुद्धेर्निवर्तिका भवति । यथा देहेन्द्रियसंघात आत्मबुद्धिरात्मन्येवाऽऽत्मबुद्ध्या पश्चाद्धाविन्या " तत्त्वमसि " [छा० ६-८-७]

ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्रोद्गीथविशोषितत्वमोंकारस्यापि सिद्धवत्कृत्य प्रक्रमभेदाद्विद्याभेदमुक्त्वा तमेव विशेषणविशेष्यभावं निरूपयति—व्याप्तेश्चेति । ओमुद्गीथशब्दयोः सामानाधिकरण्यमधिकरणस्य विषयं दर्शयति—ओमित्येतदिति । विशेषानवधारणकृतं संदेहमाह—अध्यासेति । अत्र च विशेषणविशेष्यभावनिरूपणेन विचारस्य वाक्यार्थधीसाधनसंक्रान्ततया पादादिसंगतयः । पूर्वपक्षे समानाधिकरणवाक्यस्यानध्यवसितार्थत्वादप्रामाण्यं सिद्धान्ते तस्यार्थनिश्चयात्प्रामाण्यम् । कथमेतेषां पक्षाणां प्रतिभानं भेदो वेति तत्राध्यासं व्युत्पादयति—तत्रेति । तेषां मध्ये योऽध्यासो नाम प्रसिद्धः स व्युत्पाद्यते । गौणी बुद्धिरसावित्युपेत्य व्युत्पादनमभिनयति—द्वयोरिति । कथमन्यतरबुद्धावनिवर्तितायामन्यतरबुद्धेरध्यासः स्यात्तत्राऽऽह—यस्मिन्निति । अध्यस्तबुद्धेतरबुद्धेर्निवर्त्यत्वमाशङ्क्य दृष्टान्तमाह—यथेति । वैदिकदृष्टान्तमुक्त्वा लौकिकमाह—यथा वेति । विशेषमनवधारयन्दार्ष्टान्तिकमाह—एवमिति । अध्यासपक्षसमाप्ताविति शब्दः । अपवादव्युत्पादनं प्रतिज्ञाय व्युत्पादयति—अपवाद इति । यत्रेति । यस्मिन्कस्मिंश्चिद्वस्तुनीत्यर्थः । तत्रापि लौकिकं वैदिकं चोदाहरणमाह—यथेत्यादिना ।

---

१ ङ. ज. ञ. ट. 'भाना' । २ ग. 'ध्यस्तायाम' । ३ ङ. ञ. 'ध्यस्योतोद्गी' । ४ ठ. ड. 'रस्य सि' । ५ क. 'दय' ।

(ब्रह्मदृष्टेर्हेतुत्वेनाक्षरोद्गीथयोरेकत्वसंपादनम्, अधि० ४)

इत्यनया यथार्थबुद्ध्या[1] निवर्तते। यथा वा दिग्भ्रान्तिबुद्धिर्दिग्याथात्म्यबुद्ध्या[2] निवर्तते। एवमिहाप्यक्षरबुद्ध्योद्गीथबुद्धिर्निर्तत उद्गीथबुद्ध्या वाऽक्षरबुद्धिरिति। एकत्वं त्वक्षरोद्गीथशब्दयोरनतिरिक्तार्थवृत्तित्वम्। यथा द्विजोत्तमो ब्राह्मणो भूमिदेव इति। विशेषणं पुनः सर्ववेदव्यापिन ओमित्येतस्याक्षरस्य ग्रहणप्रसङ्गे[3] उद्गीथविषयस्य समर्पणम्। यथा नीलं यदुत्पलं तदानयेति, एवमिहाप्युद्गीथोऽयमोंकारस्तमुपासीतेति। एवमेतस्मिन्सामानाधिकरण्यवाक्ये विमृश्यमान एते पक्षाः प्रतिभान्ति।

तत्रान्यतमनिर्धारणकारणाभावादनिर्धारणप्राप्ताविदमुच्यते—"व्याप्तेश्च समञ्जसम्" इति। चशब्दोऽयं तुशब्दस्थाननिवेशी पक्षत्रयव्यावर्तनप्रयोजनः। तदिह त्रयः पक्षाः सावद्या इति पर्युदस्यन्ते। विशेषणपक्ष एवैको निरवद्य इत्युपादीयते। तत्राध्यासे तावद्या बुद्धिरितरत्राध्यस्यते तच्छब्दस्य लक्षणावृत्तित्वं प्रसज्येत तत्फलं च कल्प्येत। श्रूयत एव फलम्—"आपयिता ह वै कामानां भवति" [छा० १-१-७] इत्या-

---

पूर्ववद्दार्ष्टान्तिकमाह—एवमिति। इतिशब्दोऽपि पूर्ववत्। एकत्वपक्षं सदृष्टान्तं स्पष्टयति—एकत्वं त्विति। विशेषणपक्षं प्रकटयति—विशेषणमिति। ग्रहणप्रसङ्गे ध्येयत्वेन स्वीकारप्रसक्ताविति यावत्। उक्तमेव दृष्टान्तेन स्पष्टयति—यथेति। पक्षचतुष्टयं व्युत्पादितमुपसंहरति—एवमिति।

अध्यासादिषु दृष्टेष्वनध्यवसायपक्षं पूर्वपक्षयित्वा सिद्धान्तमाह—तत्रेत्यादिना। सूत्रस्थचशब्दस्य समुच्चयाद्यर्थाभावादानर्थक्यमाशङ्क्य व्याचष्टे—चशब्द इति। पक्षव्यावृत्तिमेव प्रकटयति—तादिति। तत्तत्र सामानाधिकरण्यवाक्ये चतुष्टयपक्षेषु दृष्टेष्विति यावत्। व्यावर्त्ये पक्षत्रये विशेषणपक्षस्य प्रवेशं निषेधन्नादेयं पक्षमाह—विशेषणेति। कथं त्रयाणां पक्षाणां सावद्यत्वं तत्राध्यासस्य सावद्यत्वं साधयति—तत्रेति। उद्गीथबुद्धेरक्षरेऽध्यासेऽक्षरशब्दस्योद्गीथे तस्मिन्वाऽक्षरबुद्धेरध्यासे सत्युद्गीथशब्दस्याक्षरे लक्षणा स्यात्। श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या तेन नाध्यास इत्यर्थः। तत्रैव दोषान्तरमाह—फलं चेति। तत्कल्पनाममृष्यन्नाह—श्रूयत इति।

---

१ ङ. ञ. निवर्त्यते। २ क्ष. °न्तिर्दि°। ३ ङ. ञ. निवर्त्यते। ४ ङ. ञ. °वर्त्येतोद्गी°। ५ क. ङ. ञ. °ङ्गे ओङ्कारवि°। ६ ङ. ञ. °रणे का°। ७ ज. शी परपक्षव्या°। ञ. °शी परपक्षत्र°। क. ट. फलं। ९ क्ष. °श्यन्यु°। १० क्ष. °दिद°। ११ क. °स्थस्य च°। १२ क. ख. °विषये।

दीति चेन्न[1] । तस्यान्यफलत्वात् । आप्त्यादिदृष्टिफलं हि तन्नो-द्गीथाध्यासफलम् । अपवादेऽपि समानः फलाभावः । मिथ्या-ज्ञाननिवृत्तिः फलमिति चेत् । न । पुरुषार्थोपयोगानवगमात् । न च कदाचिदप्योंकारादोंकारबुद्धिर्निवर्तेत[2] उद्गीथादुद्गीथ-बुद्धिः । न चेदं वाक्यं वस्तुतत्त्वप्रतिपादनपरम् । उपासनावि-धिपरत्वात् । नाप्येकत्वपक्षः संगच्छते निष्प्रयोजनं हि तदा शब्दद्वयोच्चारणं स्यात् । एकेनैव विवक्षितार्थसमर्पणात् । न च हौत्रावषय[3] आध्वर्यवविषये वाऽक्षर ओंकारशब्दवाच्य उद्गीथ-शब्दप्रसिद्धिरस्ति । नापि सकलायां साम्नो द्वितीयायां भक्तावुद्गी-थशब्दवाच्यायामोंकारशब्दप्रसिद्धिर्येनानतिरिक्तार्थता स्यात् ।

तस्याध्यासफलत्वाभावान्नैवमित्याह—तन्नेति । श्रुतस्य फलस्यान्यफलत्वमेव व्यनक्ति—आप्त्यादीति । न च तस्योभयफलत्वमाप्त्यादिदृष्टिं विधातुमोमित्येतदक्षरमिति वाक्येन विशिष्टप्रणवार्थेन पृथगुपास्तिविध्यनुपगमादिति भावः । अपवादपक्षं प्रत्याह—अपवादेऽपीति । अध्यासं दृष्टान्तयितुमपिशब्दः । वाक्यशेषस्थं तु फलं नाध्या-सस्य नापवादस्यापि स्याद्विशिष्टोपास्तिसंबन्धादित्यर्थः । फलाभावासिद्धिं शङ्कते—मिथ्येति । तन्निवृत्तावात्मनि कर्तृत्वाद्यनर्थनिवृत्तिरानन्दाभिव्यक्तिश्च दृष्टा नैवमों-कारबुद्ध्योद्गीथबुद्धेस्तया वेतरस्या ध्वंसे कश्चित्पुरुषार्थो दृष्टः । तस्मान्नेदं फल-मित्याह—नेति । अपवादमुपेत्य वैफल्यं दोषमुक्त्वाऽङ्गीकारं त्यजति—न चेति । उद्गीथबुद्धिरोंकारबुद्धेरपवादिका चेदोंकारबुद्धिः स्वविषयादोंकारान्निवर्तेत । ओंकारबुद्धेर्बाध्याया मिथ्याधीत्वेन स्वार्थव्यभिचारात् । यदोंकारधीरुद्गीथबुद्धेरपवा-दिका तदाऽपि मिथ्याधीत्वादुद्गीथधीः स्वार्थान्निवर्तेत । न चैवं दृष्टमतो नापवाद इत्यर्थः । किंचापवादेनास्य वाक्यस्य तात्पर्यमुपास्तिपरत्वादित्याह—न चेति । एकत्वपक्षं निराह—नापीति । पिकशब्दस्य कोकिलशब्देन व्युत्पादनवदन्यतरश-ब्दस्यान्यतरशब्देन व्युत्पादनं फलवदेवेत्याशङ्क्य संदिग्धार्थतादेरसत्त्वान्नैवमित्याह—एकेनेति । ओंकारोद्गीथशब्दयोरुद्गीथार्थत्वादन्यतरेण तत्सिद्धेर्न शब्दान्तरमर्थव-दित्यर्थः । किंचैकत्वपक्षे किमुद्गीथस्याक्षरेऽन्तर्भावोऽक्षरस्य वेतरस्मिन्निति विक-ल्प्याऽऽद्यं निराह—न चेति । द्वितीयं प्रत्याह—नापीति । उद्गीथशब्दस्याक्षरे तच्छब्दस्य चोद्गीथे प्रसिद्ध्यभावे तयोरेकार्थत्वराहित्यं फलतीत्याह—येनेति । पक्ष-

---

१ ङ. ज ञ. ट. चेन्न । २ ट. °वर्तेतोद्गी° । ३ ङ. ञ. °षये वाऽऽध्व° । ४ ङ. ञ. °थप्र° । ५ ख. ठ. ड. °सस्येवाप° । ६ ठ. ड. °रध्वं° ।

(ब्रह्मदृष्टेर्हेतुत्वेनाक्षरोद्गीथयोरेकत्वसंपादनम्, अधि० ४)

परिशेषाद्विशेषणपक्षः परिगृह्यते । व्याप्तेः सर्ववेदसाधारण्यात् । सर्वव्याप्यक्षरमिह मा प्रसङ्क्षीत्यत उद्गीथशब्देनाक्षरं विशेष्यते । कथं नामोद्गीथावयवभूत ओंकारो गृह्यतेति । नन्वस्मिन्नपि पक्षे समाना लक्षणा। उद्गीथशब्दस्यावयवलक्षणार्थत्वात् । सत्यमेवमेतत् । लक्षणायामपि तु संनिकर्षविप्रकर्षौ भवत एव । अध्यासपक्षे ह्यर्थान्तरबुद्धिरर्थान्तरे निक्षिप्यत इति विप्रकृष्टा लक्षणा विशेषणपक्षे त्ववयविवचनेन शब्देनावयवः समर्प्यत इति संनिकृष्टा । समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तमाना दृष्टाः

त्रयं सावद्यत्वेनापोद्य निरवद्यं पक्षं गृह्णाति—परिशेषादिति । तत्र सौत्रं पदमादाय विभजते—व्याप्तेरिति । तथाऽपि कथं विशेषणपक्षसिद्धिस्तत्राऽऽह—सर्वेति । इहेत्युपासनोक्तिः । तत्प्रसङ्गे वाक्यशेषविरोधः स्यादिति मत्वा ब्रूते—अत इति । संभवे व्यभिचारे च विशेषणमर्थवदित्युपगमादोंकारस्य विशेष्यस्य सर्ववेदव्यापित्वादुद्गीथेन विशेषणेन व्यभिचारवारणेऽपि सर्वस्या द्वितीयस्या भक्तेरुद्गीथशब्दितायास्तदवयवे संभवाभावादयुक्तमोंकारविशेषणत्वमुद्गीथस्येत्याशङ्क्यावयवलक्षणार्थत्वमुद्गीथशब्दस्योपेत्याऽऽह—कथमिति । इतिशब्दो वृत्तक्रियापदेन संबध्यते । न चोद्गीथस्यैवावयविनो लक्षणा स्यादोंकारेणावयवेनेति युक्तमोंकारस्योपरिष्टाद्विस्तरेण व्याख्यास्यमानतया प्रधानत्वात्तेन भक्तिलक्षणायामुद्गीथपदेन भक्तिविशेषस्यैवार्पणे व्यभिचाराभावाद्विशेषणवैयर्थ्यमिति भावः । लक्षणाप्रसङ्गेनाध्यासस्य निरस्तत्वादयमपि पक्षो दोषसाम्यान्नोपादेयः स्यादिति शङ्कते—नन्विति । उद्गीथशब्दस्यावयवे लक्षणामङ्गी करोति—सत्यमिति । अध्यासपक्षवदयमपि तर्हि पक्षो नोपादेयः स्यादित्याशङ्क्याऽऽह—लक्षणायामिति । पक्षद्वये तुल्यायामपि लक्षणायामध्यासपक्षमुपेक्ष्य विशेषणपक्षमाश्रयामहे तत्र लक्षणार्थस्य वाक्यार्थान्वयित्वेन लक्षणायाः संनिकृष्टविषयतया बलीयस्त्वात् । अध्यासे तु गौणी धीरमावित्युक्तत्वात् । लक्ष्यमाणगुणवत्येकस्मिन्नितरशब्दस्यावसानाल्लक्षणाया विप्रकृष्टविषयत्वेन दौर्बल्यादित्यर्थः । अध्यासपक्षे लक्षणाया विप्रकृष्टविषयत्वं स्पष्टयति—अध्यासेति । सिद्धान्ते लक्षणायाः संनिकृष्टविषयत्वेन प्रबलत्वं प्रकटयति—विशेषणेति । अवयविवचनेन शब्देनावयवलक्षणाया लौकिकत्वाभावं प्रत्याह—समुदायेष्विति । पटो दग्धो ग्रामो दग्ध इति तदेकदेशदाहेऽपि समुदायशब्दो लक्षणयाऽवयवे प्रयुज्यते तथोद्गीथ-

---

१ ज्ञ. ट. 'र्ववेदव्या' । २ ङ. ञ. विशिष्यते । ३ ज. 'मेत' । ४ ट. 'मेव त' । ५ ङ. ञ. 'ष्टा लक्षणा । स' । ६ ट. प्रवृत्ता । ७ ठ. 'वेऽसंभवाद' । ८ ठ. ङ. 'म्याप्तेऽऽदे' । ९ ठ. ङ. 'यवल' । १० ठ. ङ. 'क्षणत्वम' ।

(वसिष्ठत्वादिगुणानामुपसंहर्तव्यत्वम्, अधि० ५)

पटग्रामादिषु। अतश्च व्याप्तेर्हेतोरोमित्येतदक्षरमित्येतस्योद्गीथमित्येतद्विशेषणमिति समञ्जसमेतन्निरवद्यमित्यर्थः ॥ ९ ॥(४)

(वसिष्ठत्वादिगुणानामुपसंहर्तव्यत्वम्, अधि० ५)

सर्वाभेदादन्यत्रेमे ॥ १० ॥(५)

वाजिनां छन्दोगानां च प्राणसंवादे श्रैष्ठ्यगुणान्वितस्य प्राणस्योपास्यत्वमुक्तम्। वागादयोऽपि हि तत्र वसिष्ठत्वादिगुणान्विता उक्ताः। ते च गुणाः प्राणे पुनः प्रत्यर्पिताः "यद्वा अहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसि "[बृ०६-१-१४ छा०५-१-१३] इत्यादिना। अन्येषामपि तु शाखिनां कौषीतकिप्रभृतीनां प्राणसंवादेषु "अथातो निःश्रेयसादानमेता ह वै देवता अहंश्रेयसे विवदमानाः " [कौ०२-१४] इत्येवंजातीयकेषु प्राणस्य श्रैष्ठ्यमुक्तं न त्विमे वसिष्ठत्वादयोऽपि गुणा उक्ताः। तत्र संशयः—

शब्दोऽपि द्वितीयभक्त्यवयवेऽक्षरे लक्षणया वर्तिष्यते न चाक्षरस्योद्गीथावयवत्वं तदुपासनं च विधेयमिति वाक्यभेदः। विशिष्टाक्षरानुवादेनोपास्तेरेव तत्तद्गुणवत्यास्तत्तत्फलविशिष्टायाः समस्तेन वाक्येन विधानादिति भावः। उक्तहेत्वनुवादेनावशिष्टं सूत्रपदं व्याकुर्वन्विशेषणपक्षस्य निरवद्यत्वमुपसंहरति—अतश्चेति ॥ ९ ॥ (४) ॥

ओंकारस्योद्गीथगुणकस्यैवोपास्यतेत्युक्ते प्राणस्यापि तत्तदुक्तगुणमात्रस्यैव तत्र तत्रोपास्यतेत्याशङ्क्याऽऽह—सर्वेति। विषयं वक्तुमविगीतमर्थमाह—वाजिनामिति। शाखाद्वयेऽपि संमतमर्थान्तरमाह—वागिति। सा हि वसिष्ठत्वगुणा वाक्। वाग्मिनो हि लोके सुखिनो वसन्ति। चक्षुश्च प्रतिष्ठागुणं चक्षुष्मतः पादप्रतिष्ठादर्शनात्। संपद्गुणं श्रोत्रम्। तद्वत एव श्रवणार्थावधारणकर्मसंपत्तिदर्शनात्। आयतनगुणं मनः। भोग्यानां तत्र वृत्तिद्वारा निधानादित्युभयत्रापि श्रुतमित्यर्थः। तत्र तर्हि बहूनामुपास्यतेष्टेत्याशङ्क्याऽऽह—ते चेति। अन्वयव्यतिरेकाभ्यां प्राणाधीनत्वसिद्धेर्वागादिस्थितेः प्राणे स्वगुणा वागादिभिरर्पिता इत्यर्थः। शाखान्तरेऽपि संमतमर्थमाह—अन्येषामिति। निःश्रेयसं श्रैष्ठ्यं तस्याऽऽदानं निर्धारणं तदन्तरेणोपास्तेरयोगात्तत्प्रस्तुतमधिकृतमित्याह—अथेति। एता ह वै देवता वागाद्यभिमानिन्योऽहंश्रेयसे स्वकीयश्रेष्ठत्वायेति यावत्। अविगीतमर्थमुक्त्वा विगीतमर्थमाह—न त्विति। एवंशब्दाज्ज्येष्ठत्वादिगुणकप्राणप्रत्यभिज्ञानाच्च वसिष्ठत्वादिगुणेषु संशयमाह—तत्रेति।

---

१ ज. 'समित्येत'। २ ङ. ज. म. वाजसनेयिनां। ३ ङ. म. 'सिष्ठोऽस्मि। ४ ट. 'द। भ'। ५ ठ. ङ. 'तमु'। ६ ठ. ङ. 'तमा'।

(वसिष्ठत्वादिगुणानामुपसंहर्तव्यत्वम्, अधि० ५)

किमिमे वसिष्ठत्वादयो गुणाः क्वचिदुक्ता अन्यत्राप्यस्येरन्नुत नास्येरन्निति । तत्र प्राप्तं तावन्नास्येरन्निति । कुतः । एवंशब्दैमयोगात् । " अथो य एवं विद्वान्प्राणे निःश्रेयसं विदित्वा " [कौ० २-१४] इति हि तत्र तत्रैवंशब्देन वेद्यं वस्तु निवेद्यते । एवंशब्दश्च संनिहितावलम्बनो न शाखान्तरपरिपठितमेवंजातीयकं गुणजातं शक्नोति निवेदयितुम् । तस्मात्स्वप्रकरणस्थैरेव गुणैर्निराकाङ्क्षत्वमिति ।

एवं प्राप्ते प्रत्याह—अस्येरन्निमे गुणाः क्वचिदुक्ता वसिष्ठत्वादयोऽन्यत्रापि । कुतः । " सर्वाभेदात् " । सर्वत्रैव हि तदेवैकं प्राणविज्ञानमभिन्नं प्रत्यभिज्ञायते । प्राणसंवादादिसारूप्यात् ।

क्वचिदिति वाजसनेयकच्छान्दोग्योक्तिः । अन्यत्रेति कौषीतकिप्रभृतिशाखोच्यते । अत्र च वसिष्ठत्वादिगुणोपसंहारद्वारा वाक्यार्थधीहेतोरेव निरूपणात्पादादिसंगतिः । पूर्वपक्षे यथाश्रुति गुणव्यवस्था । सिद्धान्ते गुण्यनुरोधात्तद्व्यवस्थेति मत्वा पूर्वपक्षयति—तत्रेति । विद्यैक्यादनुमानादुपसंहारे कथमनुपसंहारः स्यादिति शङ्कते—कुत इति । ओंकारस्य सर्वत्र प्राप्तावुद्गीथविशेषणादन्यव्यावृत्तिवदेवं विद्वानिति संनिहितालम्बनादेवंशब्दादसंनिहितस्य विद्यैक्यद्वाराऽनुमितस्य वसिष्ठत्वादेर्व्यावृत्तिर्युक्तेत्याह—एवंशब्देति । यथा प्राणो वागादिभ्यः श्रेष्ठः सिद्धस्तथा प्राणं श्रैष्ठ्यगुणं विद्वान्यः कश्चिदधिकृतः सन्नुपास्ते सोऽपि प्राणे श्रैष्ठ्यं विदित्वोपास्य प्राणात्मकत्वप्राप्त्या श्रैष्ठ्याद्यन्वितो भवतीति श्रुत्यर्थः । एवंशब्दसंयोगेऽपि विद्याया वसिष्ठत्वादिगुणवत्त्वं किं न स्यात्तत्राऽऽह—तत्र तत्रेति । वक्ष्यमाणा तत्तद्विद्याप्रकरणमुच्यते । एकत्वाद्विद्याया वेद्यार्थैकेनैवंशब्देन शाखान्तरोक्तानामपि वसिष्ठत्वादीनां परामर्शः स्यादित्याशङ्क्याऽऽह—एवमिति । शब्दस्य शाब्दमेवाऽऽनुमानिकादपि संनिहितमिति कुतः शाखान्तरीयगुणधीरित्यर्थः । विद्याया निराकाङ्क्षत्वार्थं शाखान्तरीयमपि गुणजातमिह परामृष्टमित्याशङ्क्याऽऽह—तस्मादिति ।

पूर्वपक्षमनुभाष्य सिद्धान्तसूत्रमवतार्य प्रतिज्ञां व्याकरोति—एवमिति । क्वचिदुक्तानां गुणानां गुणानभिधायिशाखासूपसंहारे सर्वत्र तत्प्रसङ्गात्क्वचिदेवोपसंहारे निमित्तं पृच्छति—कुत इति । तत्र सौत्रं हेतुमुक्त्वा व्याचष्टे—सर्वेति । सर्वासु शाखासु प्राणज्ञानस्यैक्ये मानमाह—अभिन्नमिति । प्रत्यभिज्ञापकं दर्शयति—प्राणेति । आदिशब्दः श्रेष्ठत्वादि-

---

१ ङ. अ. किमेते व° । २ ट. °मेते व° । ३ क ङ. ज. ट. °ब्दसंयो° । ४ ख. ट. °ति त° । ५ ख. °पठि° । ६ ट. °प्याच्च । अ° । ७ ठ. °दित्याश° । ८ क. ख. °स्वार्थे शा° ।

अभेदे च विज्ञानस्य कथमिमे गुणाः क्वचिदुक्ता अन्यत्र नास्येरन्। नन्वेवंशब्दस्तत्र तत्र भेदेनैवंजातीयकं गुणजातं वेद्यत्वाय समर्पयतीत्युक्तम्। अत्रोच्यते—यद्यपि कौषीतकिब्राह्मणगतेनैवंशब्देन वाजसनेयिब्राह्मणगतं गुणजातमसंशब्दितममंनिहितत्वात्तथाऽपि तस्मिन्नेव विज्ञाने वाजसनेयिब्राह्मणगतेनैवंशब्देन तत्संशब्दितमिति न परशाखागतमप्यभिन्नविज्ञानावरुद्धं गुणजातं स्वशाखागताद्विशिष्यते। न चैवं सति श्रुतहानिरश्रुतकल्पना वा भवति। एकस्यामपि[२] हि शाखायां श्रुता गुणाः श्रुता एव सर्वज्ञ भवन्ति गुणवतो भेदाभावात्। न हि देवदत्तः शौर्यादिगुणत्वेन स्वदेशे प्रसिद्धो देशान्तरं गतस्तदृश्यैरविभावितशौर्यादिगुणोऽप्यतद्गुणो भवति। यथा[४] च तत्र परिचयविशेषादेशान्तरेऽपि देवदत्तगुणा विभाव्यन्ते। एवमभियोगविशेषाच्छाखान्तरेऽप्युपास्या गुणाः शाखान्तरेऽप्यस्येरन्। तस्मादेकप्रधानसंबद्धा धर्मा एकत्राप्युच्यमानाः सर्वत्रैवोपसंहर्तव्या इति॥ १०॥(५)

ग्राही। ज्ञानैक्येऽपि यथाश्रुति गुणव्यवस्थामाशङ्क्योक्तम्—अभेदे चेति। गुण्याकृष्टगुणानां व्यवस्थोक्तिरनुमानविरुद्धेत्यर्थः। पूर्वपक्षबीजमनुभाषते—नन्विति। अनुमानस्य शब्दविरोधं परिहरन्नाह—अत्रेति। असंनिहितत्वादेवंशब्देन वसिष्ठत्वादिग्रहायोगान्नानुमानश्रुत्यविरुद्धेत्याशङ्क्याऽऽह—यद्यपीति। वाजसनेयिब्राह्मणस्थेन तावदेवंशब्देन वसिष्ठत्वादिगुणजातस्य प्राणधीसंबन्धः सिद्धः सैव कौषीतकिब्राह्मणेऽपि प्रत्यभिज्ञाता तथाच तद्गतेनापि वसिष्ठत्वाद्येवंशब्देन शक्यं परामर्ष्टुमित्यर्थः। शब्दस्य शब्दोक्तमेव संनिहितं न विजातीयानुमासिद्धमित्याशङ्क्याऽऽह—इति नेति। न हि शब्दस्य शाब्दमेव संनिहितं किंतु शब्दोक्तार्थनान्तरीयकतया प्राप्तमपि बुद्धिस्थं शब्दस्य संनिहितमेव पर्णमयीत्वस्य जुहूपस्थापितक्रतुवदतः संनिध्यविशेषादेवंशब्देन तस्यापि संग्रहसिद्धिरिति भावः। अनुमानतः शाखान्तरीयगुणोपसंहारे परिगणितत्वं श्रुतं हीयेताश्रुतानामपि गुणान्तराणामत्रोपसंहारादित्याशङ्क्यानुमायाः श्रुत्यविरुद्धार्थत्वान्नैवमित्याह—न चेति। तदेव व्यनक्ति—एकस्यामिति। उक्तमर्थं दृष्टान्तेन समर्थयति—न हीति। शब्दोक्तनान्तरीयकमपि संनिहितमेवेत्युक्तं दृष्टान्तेन स्पष्टयति—यथा चेति। देवदत्तैक्यात्तस्मिन्बुद्धिस्थे तद्गुणानां बुद्धिस्थतावज्ज्ञानैक्यात्तस्मिन्बुद्धिसंनिहिते तद्गुणा अपि तथा भवन्तीत्याह—एवमिति। अनुमानस्याविरोधे फलितमाह—तस्मादिति॥ १०॥ (५)

---

१ ङ. ज. ञ. °बद्धं। २ ट. °पि शा°। ३ ङ. ञ. °देशस्थैर°। ४ ट. तथा च।

(आनन्दादिब्रह्मगुणानां प्रतिपत्तिफलत्वेन सर्वत्र सम-
त्वाद्यवस्थापकविध्यभावाच्चोपसंहर्तव्यत्वम्, अधि० ६)

आनन्दादयः प्रधानस्य ॥ ११ ॥

ब्रह्मस्वरूपप्रतिपादनपरासु श्रुतिष्वानन्दरूपत्वं विज्ञानघनत्वं सर्वगतत्वं सर्वात्मत्वमेवंजातीयका ब्रह्मणो धर्माः क्वचित्केचिच्छ्रूयन्ते । तेषु संशयः—किमानन्दादयो ब्रह्मधर्मा यत्र यावन्तः श्रूयन्ते तावन्त एव तत्र प्रतिपत्तव्याः किं सर्वे सर्वत्रेति । तत्र यथाश्रुतिविभागं धर्मप्रतिपत्तौ प्राप्तायामिदमुच्यते—"आनन्दादयः प्रधानस्य" ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः । कस्मात् । "सर्वाभेदादेव" [ब्र० सू० ३-३-१०] । सर्वत्र हि तदेवैकं प्रधानं विशेष्यं ब्रह्म न भिद्यते । तस्मात्सार्वत्रिकत्वं ब्रह्मधर्माणां तेनैव पूर्वाधिकरणोदितेन देवदत्तशौर्यादिनिदर्शनेन ॥ ११ ॥

प्राणस्य सविशेषत्वाद्युक्तः शाखान्तरीयवसिष्ठत्वाद्युपसंहारो ब्रह्मणो निर्विशेषत्वात्तद्धर्मैः स्वशाखागतैरेव प्रमितिसिद्धेर्नाऽऽनन्दाद्युपसंहारः स्यादित्याशङ्क्याऽऽह—**आनन्दादय इति** । विषयं दर्शयति—**ब्रह्मेति** । ब्रह्मैक्यनिर्विशेषत्वाभ्यां संशयमाह—**तेष्विति** । वेद्यब्रह्मैक्यादेवंशब्दवदपवादकादृष्टेश्चौत्सर्गिको गुणोपसंहारः स्यादित्याशङ्क्य ब्रह्मैक्यादानन्दादीनां सर्वत्रोपसंहारे संयद्वामत्वादयोऽपि किमिति नोपसंह्रियेरन्नित्यभिप्रेत्य पूर्वपक्षयति—**तत्रेति** । संयद्वामत्वादीनामुपासनार्थमुक्तानां यथाविधि व्यवस्था । सत्यादयस्तु वस्तुतत्त्वप्रमित्यर्था यत्र यत्र वस्तुतत्त्वधीस्तत्र तत्रोपसंह्रियेरन्नित्युक्त्वा[3] वाक्यार्थधीहेतोरेवात्र निरूपणात्पादादिसंगतिः । पूर्वपक्षे सत्याद्यनुपसंहारे तत्त्वाप्रमितिः । सिद्धान्ते तदुपसंहारे तत्प्रमितिसिद्धिरिति मत्वा सिद्धान्तमाह—**इदमिति** । शाखाभेदेनोदितानुदितहोमकार्यताव्यवस्थावदिहापि शब्दभेदेन व्यवस्था स्यादिति शङ्कते—**कस्मादिति** । पूर्वहेतुमिहाऽऽकृष्योदाहरति—**सर्वेति** । हेतुमेव विवृणोति—**सर्वत्रेति** । ब्रह्मणः सर्वत्रैक्ये फलितमाह—**तस्मादिति** । धर्मिणः सार्वत्रिकत्वेऽपि धर्माणां यथाश्रुति व्यवस्था स्यादित्याशङ्क्याऽऽह—**तेनेति** । सत्यज्ञानादयो मिथो विशेषणविशेष्यभूता विरुद्धानृतजडादिभ्रान्ति निवर्तयन्तः सत्त्वादिपरापरसामान्याधारभूतामेकामानन्दव्यक्तिं लक्षयन्ति । न चैकस्मादेव पदादीदृशं ब्रह्म सिध्यति पदमात्रप्रयोगे विरोधाभावाल्लक्षणानुत्थानात्प्रयोक्तव्ये पदान्तरे संभावितसमस्तभ्रान्तिनिरसनसमर्थं पदजातं प्रयोक्तव्यमित्यारोपितभ्रान्तिनिवृत्त्यर्थं परशाखीयमपि पदवृन्दमत्रोपसंहर्तव्यमिति भावः ॥ ११ ॥

---

१ ङ. ञ. 'त्मकत्व' । २ क. ङ. ज. ञ. ट. किंवा स' । ३ ठ. ड. 'त्युक्त्वा वा' ।

(आनन्दादिब्रह्मगुणानां प्रतिपत्तिफलत्वेन सर्वत्र समत्वाद्यवस्थापकविच्यभावाच्चोपसंहर्तव्यत्वम्, अधि० ६)

नन्वेवं सति प्रियशिरस्त्वादयोऽपि धर्माः सर्वे सर्वत्र संकीर्येरन्। तथा हि—तैत्तिरीयक आनन्दमयमात्मानं प्रक्रम्याऽऽम्नायते " तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा " [तै० २-५-१] अत उत्तरं पठति—

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

प्रियशिरस्त्वादीनां धर्माणां तैत्तिरीयक आम्नातानां नास्त्यन्यत्र प्राप्तिः। यत्कारणं प्रियं मोदः प्रमोद आनन्द इत्येते परस्परापेक्षया भोक्त्रन्तरापेक्षया चोपचितापचितरूपा उपलभ्यन्ते। उपचयापचयौ च सति भेदे संभवतः। निर्भेदं तु ब्रह्म " एकमेवाद्वितीयम् " [छा०६-२-१] इत्यादिश्रुतिभ्यः। न चैते प्रियशिरस्त्वादयो ब्रह्मधर्माः कोशधर्मास्त्वेत इत्युपदिष्टमस्माभिः " आनन्दमयोऽभ्यासात् " [ब्र० सू० १-१-१२] इत्यत्र। अपि च परस्मिन्ब्रह्मणि चित्तावतारोपायमात्रत्वेनैते परिकल्प्यन्ते न द्रष्टव्यत्वेन। एवमपि सुतरामन्यत्राप्राप्तिः प्रियशिरस्त्वादी-

---

आनन्दमयस्य ब्रह्मणः सर्वत्राभेदात्तद्धर्मत्वेनाऽऽनन्दादिवत्प्रियशिरस्त्वादयोऽपि तत्र तत्र प्रसज्येरन्नो चेदानन्दादयोऽपि सार्वत्रिका न स्युरिति शङ्कते—नन्विति। ब्रह्मधर्माणां सर्वत्र संकरे सतीति यावत्। ब्रह्मधर्मतैव तेषामसिद्धेत्याशङ्क्याऽऽह—तथा हीति। सूत्रेणोत्तरमाह—अत इति। तत्र प्रतिज्ञां विभजते—प्रियेति। हेतुं व्याकरोति— यदिति। इष्टवस्तुसामान्याप्तिकृतं प्रीतिमात्रं प्रियम्। पुत्रादिविशेषलाभकृतो हर्षविशेषो मोदः। स एव प्रकृष्टः सन्प्रमोदः। सुखसामान्यमानन्द इत्येवमेते परस्परापेक्षयोपचयापचयरूपा भोक्तृभेदाच्च तथात्वभाजो जीवेषु सुखादिवैचित्र्यदृष्टेरित्यर्थः। तेषामेवंरूपत्वोपलम्भेऽपि किमायातमित्याशङ्क्याऽऽह—उपचयेति। तर्हि ब्रह्मण्यपि भेदोऽस्तु नेत्याह—निर्भेदं त्विति। अतो यत्र यत्र ब्रह्म प्रतिपाद्यं तत्र तत्र प्रियशिरस्त्वादीनां न प्राप्तिरिति शेषः। ब्रह्मधर्मत्वमेषामुपेत्योक्तं तदेव नास्तीत्याह—नचेति। आनन्दमयस्य ब्रह्मत्वे कथं तद्धर्माणामेषामब्रह्मधर्मतेत्याशङ्क्याऽऽनन्दमयाधिकरणे वृत्तं स्मारयति—कोशेति। इतश्च प्रियशिरस्त्वादीनां ब्रह्मवाक्ये न प्राप्तिरित्याह—अपि चेति। अस्तु तर्हि चित्तावतारोपायत्वेनैव सर्वत्र ब्रह्मवाक्ये तत्प्राप्तिस्तत्राऽऽह—एवमपीति। तेषां ब्रह्मणि चित्तावतारोपायत्वेऽपि न ब्रह्मवाक्ये सर्वत्र प्राप्तिर्दृष्टव्यत्वेनानुपदेशात्। अब्रह्मधर्मत्वाच्च। चित्तावतारस्तु तत्र तत्रोक्तिरेव

आनन्दादिब्रह्मगुणानां प्रतिपत्तिफलत्वेन सर्वत्र समत्वाद्व्यवस्थापकविध्यभावाच्चोपसंहर्तव्यत्वम्, अधि० ६)

नाम् । ब्रह्मधर्मास्त्वेतान्कृत्वा न्यायमात्रमिदमाचार्येण प्रदर्शितं " प्रियशिरस्त्वाद्यप्राप्तिः " इति । स च न्यायोऽन्येषु निश्चितेषु ब्रह्मधर्मेषूपासनायोपदिश्यमानेषु नेतव्यः संयद्वामादिषु [छा० ४·१५·२] सत्यकामादिषु च । तेषु हि सत्यप्युपास्यस्य ब्रह्मण एकत्वे प्रक्रमभेदादुपासनाभेदे सति नान्योन्यधर्माणामन्योन्यत्र प्राप्तिः । यथा च द्वे नार्यावेकं नृपतिमुपासाते छत्रेणान्या चामरेणान्या तत्रोपास्यैकत्वेऽप्युपासनभेदो धर्मव्यवस्था च भवत्येवमिहापीति । उपचितापचितगुणत्वं हि सति भेदव्यवहारे सगुणे ब्रह्मण्युपपद्यते न निर्गुणे परस्मिन्ब्रह्मणि । अतो न सत्यकामत्वादीनां धर्माणां क्वचिच्छ्रुतानां सर्वत्र प्राप्तिरित्यर्थः ॥ १२ ॥

इतरे त्वर्थसामान्यात् ॥ १३ ॥ (६)

" इतरे तु " आनन्दादयो धर्मा ब्रह्मस्वरूपप्रतिपादनायैवोच्यमानाः "अर्थसामान्यात्" प्रतिपाद्यस्य ब्रह्मणो धर्मिण एकत्वा-

---

धर्मैः संभवान्नैषामुपसंहारं काङ्क्षतीत्यर्थः । अब्रह्मधर्मत्वेनैषामुपसंहारशङ्काभावादनर्थकमिदं सूत्रमित्याशङ्क्याऽऽह—ब्रह्मेति । कृत्वाचिन्ताफलमाह—स चेति । तत्रापि ब्रह्मैक्यात्किमित्यन्योन्यत्रोपसंहारो न स्यादित्याशङ्क्याऽऽह—तेष्विति । तेषां ध्यानार्थमुक्तानां विधिपारतन्त्र्याद्यत्र यावद्गुणविशिष्टतयोपास्तिर्विधीयते तत्र तावतामेव ध्येयता नान्येषामित्यन्योन्यत्रानुपसंहार इत्यर्थः । उपास्यैक्ये कथमुपास्तिभेदो धर्मभेदो वेत्याशङ्क्याऽऽह—यथा चेति । विध्यधीनेषु धर्मेषु विधिमतिक्रम्य संकरो नास्तीत्युपसंहर्तुमितिशब्दः । सगुणवन्निर्गुणेऽपि ब्रह्मैक्यविशेषादुपसंहारानुपसंहारव्यवस्था किं न स्यात्तत्राऽऽह—उपचितेति । सगुणनिर्गुणयोर्वैषम्यमुक्त्वा सूत्रे विवक्षितं वदन्नुपसंहरति—अतो नेति ॥ १२ ॥

विधिपरतन्त्रेभ्यः सत्यकामत्वादिभ्यो वस्तुधर्माणामानन्दादीनां ब्रह्मतत्त्वमित्युपयोगितया यत्र यत्र ज्ञेयं ब्रह्मोच्यते तत्र तत्र प्राप्तिरिति विशेषमाह—इतरे त्विति । सूत्रितं विशेषं विशदयति—इतरे त्वित्यादिना । ब्रह्मस्वरूपसिद्ध्यर्थमुच्यमानत्वमे-

---

१ ङ. ञ. दर्शितं । २ ञ. संपद्वामत्वादि° । ३ ङ. ज. °द्वामत्वादि° । ४ क. ङ. ज. ञ. °मत्वादि° । ५ ङ. ञ. ट. °स्यत्र° । ६ ङ. ञ. द्वे भार्ये एकं । ७ ङ. ञ. 'भेदे ध° । ८ ट. °दी° । ९ ठ. ङ. °ब्रह्मधर्मत्वा° ।

(पुरुषज्ञानस्य संसारकारणाज्ञाननिवर्तकत्वात्पुरुषस्यैव वेद्यत्वम्, अधि० ७)

त्सर्वे सर्वत्र प्रतीयेरन्निति वैषम्यं प्रतिपत्तिमात्रप्रयोजना हि त इति ॥ १३ ॥ (६)

(पुरुषज्ञानस्य संसारकारणाज्ञाननिवर्तकत्वात्पुरुषस्यैव वेद्यत्वम्, अधि० ७)

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

काठके हि पठ्यते—

" इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिः " [कठ० ३-१०] इत्यारभ्य
" पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः " [कठ० ३-११] इति । तत्र संशयः—किमिमे सर्व एवार्थादयस्ततस्ततः परत्वेन प्रतिपाद्यन्त उत पुरुष एवैभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति । तत्र तावत्सर्वेषां परत्वेन प्रतिपादनमिति भवति मतिः । तथा हि श्रूयते—इदमस्मात्परमिदमस्मात्परमिति । ननु बहुष्वर्थेषु परत्वेन प्रतिपिपादयिषितेषु वाक्यभेदः स्यात् । नैष दोषः । वाक्यबहुत्वोपपत्तेः । बहून्येव ह्येतानि वाक्यानि प्रभवन्ति बहूनर्थान्परत्वोपेतान्प्रतिपादयितुम् ।

वाऽऽनन्दादीनां वैषम्यार्थं कथयति—प्रतिपत्तीति । सत्यत्वज्ञानत्वानन्दत्वात्मत्वपूर्णत्वलक्षणाः पञ्च पदार्था ज्ञानाधिकारे सर्वत्रोपसंहर्तव्या इति वक्तुमिति-शब्दः ॥ १३ ॥ (६)

ब्रह्मस्वभावभूतोपसंहार्यधर्मोक्त्यनन्तरमस्वभावस्यानुपसंहार्यस्याप्यर्थादिपरत्वरूपधर्मस्य ब्रह्मप्रमित्युपायत्वं वदति—आध्यानायेति । विषयवाक्यं पठति—काठक इति । वाक्यभेदाभेदानिर्धारणेनार्थादीनधिकृत्य संशयमाह—तत्रेति । विद्याभेदाभेदप्रसङ्गेन वाक्यभेदाभेदयोस्तन्निबन्धनविद्याभेदाभेदयोर्वा चिन्तया वाक्यार्थधीहेतोरेवं चिन्तनात्पादादिसंगतिः । पूर्वपक्षे वाक्यभेदाद्विद्याभेदः सिद्धान्ते तदभेदात्तदभेद इत्यभिप्रेत्य पूर्वपक्षमाह—तत्रेति । तत्र हेतुमाह—तथा हीति । पूर्वपक्षमाक्षिपति—नन्विति । संभवत्येकवाक्यत्वे वाक्यभेदो दोषोऽत्र तु वाक्यभेद एवेति समाधत्ते—नेति । उपपत्तिमेवाऽऽह—बहूनीति । सर्वेषां प्रत्येकं परत्वोक्तिरफलेत्याशङ्क्य—

" दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः "

इत्यादिस्मृतेर्ध्यानद्वारा प्रत्येकं परत्वोक्तेः सफलत्वसिद्धेरपूर्वार्थतया च प्रामाणिकस्य

---

१ ज. परे । २ ट. °भ्यः प° । ३ क. ङ. ज. ञ. °र्षेषामेवैषां प° । ट. 'र्वेषामेषां प° । ४ ज्ञ. ट. भवन्ति । ५ क. °व विचि° ।

(पुरुषज्ञानस्य संसारकारणाज्ञाननिवर्तकत्वात्पुरुषस्यैव वेद्यत्वम्, अधि० ७)

तस्मात्प्रत्येकमेषां परत्वप्रतिपादनमिति । एवं प्राप्ते ब्रूमः—पुरुष एव ह्येभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति युक्तं न प्रत्येकमेषां परत्वप्रतिपादनम्[1] । कस्मात् । प्रयोजनाभावात् । न हीतरेषु परत्वेन प्रतिपन्नेषु किंचित्प्रयोजनं दृश्यते श्रूयते वा । पुरुषे त्विन्द्रियादिभ्यः परस्मिन्सर्वानर्थव्रातातीते[2] प्रतिपन्ने दृश्यते प्रयोजनं मोक्षसिद्धिः । तथा च श्रुतिः "निचाय्य तन्मृत्युमुखात्प्रमुच्यते" [कठ०३-१५] इति । अपि च परप्रतिषेधेन काष्ठाशब्देन[3] च पुरुषविषयमादरं दर्शयन्पुरुषप्रतिपत्त्यर्थैव पूर्वापरप्रवाहोक्तिरिति दर्शयति । "आध्यानाय" इति। आध्यान-

क्ष्यभेदस्येष्टत्वात्प्रत्येकमर्थादीनां परत्वं प्रतिपाद्यमित्युपसंहरति—तस्मादिति । र्वपक्षमनूद्य सूत्राद्बहिरेव सिद्धान्तं प्रतिजानीते—एवमिति । पुरुषपरत्वस्य शक्ति-षयस्य तात्पर्यगम्यत्ववदर्थादिपरत्वानामपि शक्तिविषयत्वादपूर्वत्वाच्च तात्पर्यमेयत्वं न स्यादिति शङ्कते—कस्मादिति। तात्पर्यमेयत्वनिमित्तफलाभावान्नार्थादिपरत्वानां न्मेयतेति मत्वाऽऽह—प्रयोजनेति । कथं प्रयोजनाभावोक्तिरित्याशङ्क्यान्वयव्य-रेकसिद्धं शास्त्रसिद्धं वा फलमिति विकल्प्याऽऽद्यं निराह—न हीति । तीयं प्रत्याह—श्रूयते चे(वे)ति । प्रकरणस्यास्य वस्तुपरत्वदृष्टेरुपास्तिविधिपरत्वा-गात्परमपुरुषार्थहेतुतत्त्वधीपरत्वे च संभवतीन्द्रियाद्युपास्त्यधीनस्मृतिसिद्धावान्तरपुरुषार्थ-त्वायोगान्न प्रत्येकमर्थादिपरत्वसिद्धिरित्यर्थः[4] । पुरुषस्य परत्वधीरपि न फलवती पर-धीत्वादर्थादिपरत्वधीवदित्यनुमानात्कथं त्वन्मतेऽपि पुरुषार्थहेतुफलत्वमित्याशङ्क्या-र्थशून्यतोपलक्षितानवच्छिन्नचिद्धातुविषयत्वात्पुरुषपरत्वदृष्टेरनर्थध्वंसफलत्वमनुभवसि-मित्याह—पुरुषे त्विति । अज्ञानमिथ्याधीशान्तेर्दृष्टफलत्वाद्दृष्टे सत्यदृष्ट-ल्पना न युक्तेति मत्वाऽऽह—दृश्यत इति । विद्वदननुभवे विप्र-पन्नं प्रति पुरुषपरत्वदृष्टेर्दृष्टफलत्वे श्रुतिमाह—तथा चेति । इतश्चास्य र्भस्य सर्वस्मात्परत्वेन पुरुषप्रमितिपरतेत्याह—अपि चेति । पुरुषान्न परमिति-षधलिङ्गेन सा काष्ठेति काष्ठाशब्देन बाधावधित्वेन परत्वोक्तिलिङ्गेन च पुरुषवि-मादरं तात्पर्यं दर्शयन्वेद इति यावत् । पूर्वापरप्रवाहोक्तिः पूर्वस्मात्पूर्वस्मादपरस्या-स्य परत्वोक्तिः । ध्यानविधेरिहाभावात्परपुरुषमितेर्ध्यानार्थता कथं सूत्रितेत्याशङ्क्य ावयवं व्याचष्टे—आध्यानायेति। निर्गुणब्रह्मप्रमितिरपि ध्यानार्था ब्रह्ममितित्वात्स-

१ ट. °मेतेषां । २ ट. °कमन्येषां प्र° । ३ ज. °रत्वे प्र° । ४ ज. ट. °र्थजाता° । ५ ङ. °द्वादिश° । ६ क. °ते पु° । ७ क. ख. ठ ङ. °तृपरत्व° । ८ झ. °शून्योप° । ९ क. ख. °क्त° । १० ठ. ङ. °ह्ममि° ।

पूर्वकाय सम्यग्दर्शनायेत्यर्थः । सम्यग्दर्शनार्थमेव हीहाऽऽध्यानमुपदिश्यते न त्वाध्यानमेव स्वप्रधानम् ॥ १४ ॥

आत्मशब्दाच्च ॥ १५ ॥ (७)

इतश्च पुरुषप्रतिपत्त्यर्थैवेयमिन्द्रियादिप्रवाहोक्तिः । यत्कारणम्—

" एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः "

[कठ० ३-१२] इति प्रकृतं पुरुषमात्मेत्याह । अतश्चानात्मत्वमितरेषां विवक्षितमिति गम्यते । तस्यैव च दुर्विज्ञानतां संस्कृतमतिगम्यतां च दर्शयति । तद्विज्ञानायैव च " यच्छेद्वाङ्मनसी प्राज्ञः " [कठ० ३-१३] इत्याध्यानं विदधाति । तद्व्याख्यातम् " आनुमानिकमप्येकेषाम् " [ब्र० सू० १-४-१] इत्यत्र । एवमनेकप्रकार आशयातिशयः श्रुतेः पुरुषे लक्ष्यते नेतरेषु । अपि च " सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् "

गुणब्रह्मामितिवदित्याशङ्क्य ततस्तु तामित्यादिश्रुतिविरोधमाह—सम्यगिति ॥ १४ ॥

सर्वस्मात्परत्वेन पुरुषस्यैवात्र प्रतिपाद्यत्वे हेत्वन्तरमाह—आत्मेति । सूत्रस्थं चशब्दं व्याकरोति—इतश्चेति । तदेव स्फुटयन्नात्मशब्दं विभजते—यदिति । आत्मनोऽप्रकाशमानत्वं स्वाभाविकमिति शङ्कां वारयति—दृश्यते त्विति । तस्यां श्रुतावेष आत्मेत्यस्यार्थमाह—प्रकृतमिति । सूत्रगतपञ्चम्या विवक्षितमर्थमाह—अतश्चेति । अवशिष्टपूर्वार्धस्यार्थमाह—तस्येति । उत्तरार्धतात्पर्यमाह—संस्कृतेति । चशब्दसूचितं हेत्वन्तरमाह—तदिति । वागादिनियमनमात्रं मन्त्रे प्रतीतं न तु ध्यानविधिरित्याशङ्क्याऽऽह—तद्व्याख्यातमिति । अज्ञातार्थज्ञापनस्वाभाव्यादागमस्याऽऽत्मनश्च श्रुत्यैव दुर्ज्ञानत्वोक्तेर्वस्तुतश्च तथात्वादर्थादीनां च सुगमत्वात्तेषां परत्वोक्तिरपि तत्परैवेत्यभिप्रेत्योपसंहरति—एवमिति । उपक्रमोपसंहारयोरैकरूप्यादपि पुरुषपरत्वे तात्पर्यं संदर्भस्य सिद्धमित्याह—अपि चेति । तद्विष्णोः परमं पदम् । पुरुषान्न परं किंचिदित्युपक्रमोपसंहारयोरैकरूप्यात्फलवति सर्वस्मात्परत्वे पुरुषस्य प्रतिपाद्ये सत्यवान्तरवाक्यानां(णां) तदेकवाक्यतायोगे वाक्यभेदादिकल्पने गौरवात्परपुरुषपरत्वमेव संदर्भस्येति हेत्वन्तरमेव स्फोरयति—स इति। प्रमितिसतत्वाच्च पुरुषस्यैव प्रमेयतेत्याह—

---

१ ङ. ञ. 'तां सुसं' । २ क. ख. ठ. ड. 'हारै' । ३ ठ. ड. 'हारै' । ४ ठ. ड. 'ल्पनागौ' ।

(ईश्वरस्यैवाऽऽत्मशब्दवाच्यत्वं न विराजः, अधि० ८)

[कठ० ३-९] इत्युक्ते किं तदध्वनः पारं विष्णोः परमं पदमित्यस्यामाकाङ्क्षायामिन्द्रियाद्यनुक्रमणात्परमपदप्रतिपत्त्यर्थ एवायमाम्नाय इत्यवसीयते ॥ १५ ॥ (७)

(ईश्वरस्यैवाऽऽत्मशब्दवाच्यत्वं न विराजः , अधि० ८)

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

ऐतरेयके श्रूयते—" आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति " [ऐ०१-१] " स इमाल्लोकानसृजताम्भो मरीचीर्मरमापः " [ऐ०१-२] इत्यादि। तत्र संशयः—किं पर एवाऽऽत्मेहाऽऽत्मशब्देनाभिलप्यत उतान्यः कश्चिदिति। किं तावत्प्राप्तं न परमात्मेहाऽऽत्मशब्दाभिलप्यो भवितुमर्हतीति । कस्मात् । वाक्यान्वयदर्शनात् । ननु वाक्यान्वयः सुतरां परमात्मविषयो दृश्यते प्रागुत्पत्तेरात्मैकत्वावधारणात् । ईक्षणपूर्वकस्रष्टृत्ववचनाच्च । नेत्युच्यते । लोकसृष्टिवचनात् । परमात्मनि हि स्रष्टरि परिगृह्यमाणे महाभू-

---

किमिति । अर्थानामिन्द्रियाकर्षकत्वेन परत्ववत्परस्मिन्नात्मनि सर्वनियम्याकर्षकत्वेन परत्वं निश्चितमिति मत्वाऽऽह—इन्द्रियादीति ॥ १५ ॥ (७)

वाक्यभेदभयादर्थादीनां पृथक्प्रतिपाद्यत्वे प्रत्युक्ते देवादिकर्तृत्वेन प्रकृतापरब्रह्मणोऽन्यो लोकस्रष्टा परो नोपेयो वाक्यभेदप्रसङ्गादित्याशङ्क्याऽऽह—आत्मेति । विषयवाक्यमुदाहरति—ऐतरेयक इति । आत्मशब्दस्य परत्र सूत्रे च प्रयोगात्तं विषयीकृत्य संशयमाह—तत्रेति । आत्मशब्दस्य वाक्यार्थज्ञानोपयुक्तस्य परमात्मविषयत्वोक्त्या सत्यत्वादीनां तत्प्रमित्युपयोगिनामुपसंहारसिद्धेरस्ति पादादिसंगतिः । आत्मशब्दस्यापराविषयत्वे तदर्थप्रमित्यर्थं पूर्वपक्षे सत्याद्यनुपसंहारः । सिद्धान्ते तस्य पराविषयत्वे तत्प्रमित्यर्थं तदुपसंहार इत्यभिप्रेत्य विमृश्य पूर्वपक्षयति—किमिति । परशब्दवाच्यत्ववदात्मशब्दवाच्यत्वमपि तस्यैव किं न स्यादित्याह—कस्मादिति । आत्मविषयवाक्यस्य सूत्रे तात्पर्यात्तद्विद्याऽत्राभीष्टा तत्र गुणोपसंहारोऽस्तीत्याह—वाक्येति । पूर्वपक्षमाक्षिपति—नन्विति । सुतरामित्युक्तमेव हेतुद्वयोक्त्या प्रकटयति—प्रागिति । लोकस्रष्टृत्वलिङ्गाद्वाक्यान्वयः सूत्रविषयो न परात्मगामीत्याह—नेतीति । परस्यापि लोकस्रष्टृत्वं सर्वकारणत्वादिति लिङ्गस्यान्यथासिद्धिमाशङ्क्याऽऽह—परमात्मनीति । तत्कर्तृकसर्गस्याऽऽकाशादिमहाभूतादित्वादस्य चातथात्वदृष्टेः

---

१ ट. मित्याका° । २ ख. घ. ङ. ञ. °मायास इ° । ३ क. ज झ. ट. °हेति । ४ ख. ठ. °त्मं° । ५ ठ. ड. °योद्रि° । ६ क. ख. झ. तत्र गु° ।

तत्सृष्टिरादौ वक्तव्या लोकसृष्टिस्त्विहाऽऽदावुच्यते। लोकाश्च महाभूतसंनिवेशविशेषाः। तथाचाम्भःप्रभृतीँल्लोकत्वेनैव निर्ब्रवीति " अदोऽम्भः परेण दिवम् " [ऐ० १-२] इत्यादिना। लोकसृष्टिश्च परमेश्वराधिष्ठितेनापरेण केनचिदीश्वरेण क्रियत इति श्रुतिस्मृत्योरुपलभ्यते। तथा हि श्रुतिर्भवति " आत्मैवेदमग्र आसीत्पुरुषविधः " [बृ० १-४-१] इत्याद्या। स्मृतिरपि

" स वै शरीरी प्रथमः स वै पुरुष उच्यते।
आदिकर्ता स भूतानां ब्रह्माऽग्रे समवर्तत "

[मार्क० पु० ४५-६४] इति।

ऐतरेयिणोऽपि " अथातो रेतसः सृष्टिः प्रजापते रेतो देवाः " [ऐ० आ० २-१-३-१] इत्यत्र पूर्वस्मिन्प्रकरणे प्रजापतिकर्तृकां विचित्रां सृष्टिमामनन्ति। आत्मशब्दोऽपि तस्मि-

---

सूत्रस्थे च लोककर्तृकतायाः श्रुतिस्मृतिसिद्धत्वान्नात्र परगृहीतिरित्यर्थः। लोकशब्देनात्र महाभूतानामेवोक्तेः सृष्टेरिहापि महाभूतादित्वमिष्टमित्याशङ्क्याऽऽह—**लोकाश्चेति**। महाभूतसंनिवेशविशेषे लोकशब्दस्य रूढत्वेऽपि प्रकरणादिह महाभूतान्येव ते गृह्यन्त्रित्याशङ्क्याऽऽह—**तथा चेति**। अम्भो मरीचीर्मरमाप इति सूत्रयित्वा स्वयमेव श्रुतिर्विवृणोति। अदस्तदम्भः परेण दिवं दिवः परस्ताद्द्यौर्द्युप्रतिष्ठो लोको दिवमारभ्योपरितनलोकाश्चान्द्रमसैरम्भोभिरभिव्याप्तैरम्भःशब्दिता इत्यर्थः। अन्तरिक्षलोकः सवितृमरीचिव्याप्तैर्मरीचयः। स्थानभेदाद्बहूक्तिः। म्रियन्तेऽस्मिन्भूतानीति पृथिवीलोको मरम्। याः पृथिव्या अधस्तात्ता आपः पातालानि तेषामब्बाहुल्याद्बिभेयापेक्षया स्त्रीलिङ्गत्वम्। एवमादिपदेन द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आप इति गृहीतम्। तथाऽपि परमात्मैव स्रष्टा किं न स्यात्तत्राऽऽह—**लोकेति**। आत्मा हिरण्यगर्भः पुरुषविधस्तत्प्रकारः शिरःपाण्यादिमान्भूतानां स्थूलभूतकार्याणां चराचराणामिति यावत्। प्रजापतिकर्तृकैव लोकसृष्टिरित्येतत्प्रकरणादपि भातीत्याह—**ऐतरेयिणोऽपीति**। नियम्यसृष्ट्यानन्तर्यमथेत्युक्तम्। नियन्तृसृष्ट्यतिरेकेण तत्सृष्टेरकिंचित्करत्वमतःशब्दार्थः। किं तद्रेतो यस्य सृष्टिरिष्टेत्याशङ्क्याऽऽह—**प्रजेति**। रेतो वीर्यं तत्कार्यत्वाद्देवास्तच्छब्दाः। वाक्यस्य तात्पर्यमाह—**इत्यत्रेति**। उपक्रमोपसंहारस्थाभ्यामात्मब्रह्मश्रुतिभ्यां परस्मिन्गम्यमाने कुतो लोकस्रष्टृत्वलिङ्गेनापरब्रह्मसिद्धिः श्रुतिभ्यां लिङ्गस्य दुर्बलत्वादित्याशङ्क्य लिङ्गस्यैव प्राधान्यमिति वक्तुं तयोरन्यथासिद्धिमाह—**आत्मेति**। ब्रह्मलोक इत्यादौ ब्रह्मशब्दस्यापि तस्मिन्प्रयो-

---

१ ङ. ञ. निर्वक्त्यदोऽ। २ ठ. ड. °स्य लो°। ३ ठ. ड. सूचयित्वा। ४ ङ. °त्युक्तिः। नि°।

(ईश्वरस्यैवाऽऽत्मशब्दवाच्यत्वं न विराजः, अधि० ८)

न्प्रयुज्यमानो दृश्यते "आत्मैवेदमग्र आसीत्पुरुषविधः" [बृ० १-४-१] इत्यत्र। एकत्वावधारणमपि प्रागुत्पत्तेः स्वविकारापेक्षमुपपद्यते । ईक्षणमपि तस्य चेतनत्वाभ्युपगमादुपपन्नम् । अपि च "ताभ्यो गामानयत्" "ताभ्योऽश्वमानयत्" "ताभ्यः पुरुषमानयत्" "ता अब्रुवन्" [ऐ० २-२-३] इत्येवंजातीयको भूयान्व्यापारविशेषो लौकिकेषु विशेषवत्स्वात्मसु प्रसिद्ध इहानुगम्यते। तस्माद्विशेषवानेव कश्चिदिहाऽऽत्मा स्यादिति। एवं प्राप्ते ब्रूमः—पर एवाऽऽत्मेहाऽऽत्मशब्देन गृह्यत "इतरवत्"। यथेतरेषु सृष्टिश्रवणेषु "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" [तै० २-१-१] इत्येवमादिषु परस्याऽऽत्मनो ग्रहणम् । यथा चेतरस्मिँल्लौकिकात्मशब्दप्रयोगे प्रत्यगात्मैव मुख्य आत्मशब्देन गृह्यते तथेहापि भवितुमर्हति। यत्र[3] "आत्मेवेदमग्र आसीत्" [बृ० १-४-१] इत्येवमादौ "पुरुषविधः" [बृ० १-४-१] इत्येवमादि विशेषणान्तरं

गोऽस्तीति वक्तुमपीत्युक्तम्। एक एवेत्येकत्वावधारणस्य प्रजापतावयोगात्परमात्मैवात्राऽऽत्मशब्दः स्यादित्याशङ्क्याऽऽह—एकत्वेति । अवधारणस्यैवं संभवेऽपि तस्मिन्नीक्षितृत्वायोगात्परस्यैवात्रोक्तिरित्याशङ्क्याऽऽह—ईक्षणमिति । परस्मिन्नसंभावितविशेषदृष्टेरपि सूत्रस्यैवाऽऽत्मशब्दतेत्याह—अपि चेति। ईश्वरो हि करणाधिष्ठात्रीरग्न्यादिदेवता वागादिभिः सह सृष्टवांस्ताश्च तं प्रति भोगार्थं शरीरमयाचन्त स च ताभ्यो गां गोशरीरमश्वशरीरं पुरुषशरीरं च यथाकर्म यथाश्रुतमानीतवांस्ततस्ता देवताः सोऽब्रवीद्यथायतनं यथाचक्षुरादिस्थानमस्मिन्देहे प्रविशतेति तदाह—ताभ्य इति । उक्तश्रुत्यर्थं संगृह्णाति—एवमिति । इहेति स्रष्टुरात्मनो निर्देशः । लिङ्गप्रकरणसिद्धमुपसंहरति—तस्मादिति । सिद्धान्तसूत्रमवतार्य प्रतिज्ञां व्याकरोति—एवमिति । इहेत्युदाहरणोक्तिः । दृष्टान्तमादाय व्याचष्टे—इतरवदिति । तस्य व्याख्यान्तरमाह—यथा चेति । परस्यैव विश्वस्रष्टृत्वं प्रागेकत्वमात्मत्वं च मुख्यं तदसत्यामनुपपत्तौ नान्यत्रानुमेयम्। लोकसृष्टिवचनेऽपि महाभूतसर्गस्य पूर्वसिद्धतया वक्तुं शक्यत्वादिति मत्वा दार्ष्टान्तिकमाह—तथेति । आत्मब्रह्मशब्दयोरन्यथासिद्धिं प्रत्याह—यत्रेति । सति बाधकेऽन्यार्थत्वेऽपि प्रकृते तदभावात्प्रत्युत साधकस्यैव सत्त्वात्परविष-

---

१ ङ. ञ. °त्ताश्चाब्रुं°। २ ख. ट. इत्यनुं°। ३ ङ. ज. ञ. °त्र तु "आ° । ४ ठ. ड. °त्र'। ५ ठ. ड. °न्यत्र नेय°।

श्रूयते भवेत्तत्र विशेषवत आत्मनो ग्रहणम् । अत्र पुनः परमात्मग्रहणानुगुणमेव विशेषणमप्युत्तरमुपलभ्यते " स ईक्षत लोकान्नु सृजा इति " [ऐ० १-१] " स इमाल्लोकानसृजत " [ऐत० १-२] इत्येवमादि । तस्मात्तस्यैव ग्रहणमिति न्याय्यम् ॥ १६ ॥

अन्वयादिति चेत्स्यादवधारणात् ॥ १७ ॥ (८)

वाक्यान्वयदर्शनान्न परमात्मग्रहणमिति पुनर्यदुक्तं तत्परिहर्तव्यमिति । अत्रोच्यते—" स्यादवधारणात् " इति । भवेदुपपन्नं परमात्मनो ग्रहणम् । कस्मात् । " अवधारणात् " । परमात्मग्रहणे हि प्रागुत्पत्तेरात्मैकत्वावधारणमाञ्जसमवकल्पते । अन्यथा ह्यनाञ्जसं तत्परिकल्पेत । लोकसृष्टिवचनं तु श्रुत्यन्तरप्रसिद्धमहाभूतसृष्ट्यनन्तरमिति योजयिष्यामि । यथा " तत्तेजोऽसृजत " [छा० ६-२-३] इत्येतच्छ्रुत्यन्तरप्रसिद्धवियद्वायुसृष्ट्यनन्तरमित्ययूयुजमेवमिहापि । श्रुत्यन्तरप्रसिद्धो हि समानविषयो विशेषः श्रुत्यन्तरेषूपसंहर्तव्यो भवति । योऽप्ययं व्यापारविशेषानुगमः " ताभ्यो गामानयत् " [ऐत०

यत्वमेवेत्याह—अत्रेति । ईक्षणपूर्वकसर्गस्य परस्मिन्प्रसिद्धत्वे फलितमाह—तस्मादिति ॥ १६ ॥

पूर्वपक्षबीजमनूद्य दूषयति—अन्वयादिति । अनुवादं विभजते—वाक्येति । परिहारमवतारयति—अत्रेति । स्यादिति पदं पूरयित्वा व्याकरोति—भवेदिति । तत्र प्रश्नपूर्वकं हेतुमाह—कस्मादिति । अवधारणं विवृणोति—परमात्मेति । सूत्रग्रहेऽपि स्वविकारापेक्षया तदुक्तमित्याशङ्क्याऽऽह—आञ्जसमिति । तदेव व्यतिरेकतः स्फोरयति—अन्यथेति । यच्च लोकस्रष्टृत्वलिङ्गादपरग्रहणं तत्राऽऽह—लोकेति । श्रुत्यन्तरं तैत्तिरीयादिश्रुतिः । तत्र दृष्टान्तमाह—यथेति । इहापीत्यैतरेयकोक्तिः । श्रुत्यन्तरप्रसिद्धा महाभूतसृष्टिरत्रोपसंहर्तुमशक्या वाक्यभेदादित्याशङ्क्याऽऽह—श्रुत्यन्तरेति । न हि तैत्तिरीयादिवाक्यमैतरेयवाक्यं च भिन्नं सृष्ट्यनुवादेनाविकृतब्रह्मविषयत्वाविशेषादित्यर्थः । यत्तु व्यापारवत्स्वात्मसु प्रसिद्धव्यापारविशेषस्यात्रानुगमाद्विशेषवानेवायमात्मेति तत्राऽऽह—योऽपीति । किंचाफले भेदे

---

१ ड. 'षम' । २ ट. 'णमुत्त' । ३ ड. ञ. 'त्मन इह ग्र' । ४ ड. ञ. 'कल्प्येत । अ' । ५ ड. 'कल्प्येत ।

(ईश्वरस्यैवाऽऽत्मशब्दवाच्यत्वं न विराजः, अधि० ८)

२-२] इत्येवमादिः सोऽपि विवक्षितार्थावधारणानुगुण्येनैव ग्रहीतव्यः। न ह्ययं सकलः कथाप्रबन्धो विवक्षित इति शक्यते वक्तुं तत्प्रतिपत्तौ पुरुषार्थाभावात्। ब्रह्मात्मत्वं त्विह विवक्षितम्। तथा ह्यम्भःप्रभृतीनां लोकानां लोकपालानां चाग्न्यादीनां सृष्टिं शिष्ट्वा करणानि करणायतनं च शरीरमुपदिश्य स एव स्रष्टा " कथं न्विदं महते स्यात् " [ऐ० ३-११] इति वीक्ष्येदं शरीरं प्रविवेशेति दर्शयति " स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत " [ऐत० ३-१२] इति। पुनश्च " यदि वाचाऽभिव्याहृतं यदि प्राणेनाभिप्राणितम् " [ऐत० ३-११] इत्येवमादिना करणव्यापारविवेचनपूर्वकम् "अथ कोऽहम् " [ऐत० ३-११] इति वीक्ष्य " स एतमेव पुरुषं ब्रह्म ततममपश्यत् " [ऐत० ३-१३] इति ब्रह्मात्मत्वदर्शनमवधारयति। तथोपरिष्टात् " एष ब्रह्मैष इन्द्रः " [ऐत० ५-३] इत्यादिना समस्तभेदजातं सह महाभूतैरनुक्रम्य " सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म " [ऐत० ५-३] इति ब्रह्मात्मत्वदर्शनमेवावधारयति। तस्मादिहाऽऽत्मगृहीतिरित्यनपवादम्।

वेदस्याप्रामाण्याद्ब्रह्मपरत्वे च फलसंभवात्तदेव विवक्षितमित्याह—न हीति। पौर्वापर्यालोचनयाऽपि ब्रह्मपरत्वमेवास्य संदर्भस्येत्याह—तथा हीति। स परमेश्वर एतमेव सीमानं मूर्ध्नः केशविभागावसानं विदार्य च्छिद्रं कृत्वैतया द्वारा ब्रह्मरन्ध्रसंज्ञया शरीरं प्रापद्यत प्राप्तवानिति यावत्। इतश्च ब्रह्मपरत्वमेवास्येत्याह—पुनश्चेति। स शरीरे प्रविष्टः परमात्मा तमेव शरीरान्तर्गतं परमात्मानं ब्रह्म ततममेकस्तकारो लुप्तो मन्तव्यस्ततमं व्याप्ततमं यद्ब्रह्म तद्रूपेणैतमात्मानमपश्यदित्यर्थः। इतोऽपि वाक्यस्यास्ति ब्रह्मपरतेत्याह—तथेति। यः शरीरे प्रविष्टः परमेश्वर एष एव परब्रह्म परमात्मा प्रजापतिः सूत्रात्माऽप्येष एव प्रज्ञा ब्रह्मचैतन्यं नीयतेऽनेनेति नेत्रं नियन्तृ यस्य तत्प्रज्ञानेत्रम्। प्रज्ञाने तस्मिन्नेवाधिष्ठाने प्रतिष्ठितं लोकोऽपि भूरादिः प्रज्ञानेत्रः प्रज्ञानियन्तृकः। सैव प्रज्ञा सर्वस्य लोकस्य प्रतिष्ठाऽधिष्ठानम्। तच्च प्रज्ञानं ब्रह्मैवमवधारणमनेकधा व्याख्याय प्रकृतमुपसंहरति—तस्मादिति।

---

१ क. ज. त्विदं। २ झ. °रचरण°। ३ ज. °तत्तम°। ४ क. ङ. ज. ञ. °मस्तं मे°। ख. ठ. ड. °ति। प°। ६ ख. °श्वरः स ए°। ७ ठ. ड. ब्रह्म।

अपरा योजना । " आत्मगृहीतिरितरवदुत्तरात् " । [सू० १६] वाजसनेयके " कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः " [बृ० ४-३-७] इत्यात्मशब्देनोपक्रम्य तस्यैव सर्वसङ्गविनिर्मुक्तत्वप्रतिपादनेन ब्रह्मात्मतामवधारयति । तथा ह्युपसंहरति " स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म " [बृ० ४-४-२५] इति । छान्दोग्ये तु "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् "[छा० ६-२-१] इत्यन्तरेणाऽऽत्मशब्दमुपक्रम्योदर्के " स आत्मा तत्त्वमसि " [छा० ६-८-७] इति तादात्म्यमुपदिशति । तत्र संशयः—तुल्यार्थत्वं किमनयोराम्नानयोः स्यादतुल्यार्थत्वं वेति । अतुल्यार्थत्वमिति तावत्प्राप्तमतुल्यत्वादाम्नानयोः । न ह्याम्नानवैषम्ये सत्यर्थसाम्यं युक्तं प्रतिपत्तुमाम्नानतन्त्रत्वादर्थपरिग्रहस्य । वाजसनेयके चाऽऽत्मशब्दोपक्रमादात्मतत्त्वोपदेश इति गम्यते । छान्दोग्ये तूपक्रमविपर्ययादुपदेशविपर्ययः । ननु च्छान्दोगानामप्यस्त्युदर्के तादात्म्योपदेश इत्युक्तम् । सत्यमु-

---

पूर्ववर्णके विद्यैक्यगुणोपसंहारनिरूपणाँस्पाष्टयान्न साक्षात्पादसंगतिरिति तदर्थं वर्णकान्तरमाह—**अपरेति**। पूर्वत्र वाक्यैक्यबलादर्थादिपरत्वं परित्यज्य विद्यैक्यमुक्तम्। इदानीं भिन्नार्थोपक्रमेण वाक्यभेदशङ्कायामाह—**आत्मेति**। श्रुतिद्वयगतं वाक्यमुदाहरति—**वाजसनेयक इति**। उदाहृतवाक्यं त्वमर्थं तदर्थपर्यन्तं लक्षयतीत्यत्र गमकमाह—**तथा हीति**। तदर्थं त्वमर्थान्तं लक्षयद्वाक्यान्तरमाह—**छान्दोग्ये त्विति**। सच्छब्दस्याऽऽत्मानात्मार्थत्वानिर्णयेन वाक्यद्वये संशयमाह—**तत्रेति**। अर्थाभेदाद्विद्याभेदोक्त्या वाक्यार्थधीहेतोरेवात्रोक्तिरिति पादादिसंगतिः। पूर्वपक्षे विद्याभेदाद्गुणानुपसंहारः। सिद्धान्ते तदभेदात्तदुपसंहार इति मत्वाऽर्थभेदाद्विद्याभेदं पूर्वपक्षमाह—**अतुल्येति**। आम्नानवैषम्येऽपि किमित्यर्थैक्याद्विद्यैक्यं न स्यात्तत्राऽऽह—**न हीति**। तदेव विशदयति—**वाजसनेयके चेति**। छान्दोग्येऽपि वाक्यशेषादात्मार्थत्वसिद्धौ कथमाम्नानवैषम्यं कथंतरामर्थभेदः कथंतमां विद्यानानात्वमिति शङ्कते—**नन्विति**। स आत्मा तत्त्वमसीति तादात्म्योपदेशमङ्गी करोति—**सत्यमिति**। तर्हि तदनुसारेणोपक्रमोऽपि

---

१ क. °र्वसंगतिमुं। २ ङ. ज. ञ. ट. °विमुक्तं। ३ ज. °ग्येऽपि सं। ४ क. ङ. ज. ञ. °रेणैवाऽऽत्मं। ५ ट. °नयोरतुं। ६ ङ. ञ. °नु च च्छं। ७ क. ह्म. °णा स्यान्न। ८ ठ. ङ. °ये वा।

(ईश्वरस्यैवाऽऽत्मशब्दवाच्यत्वं न विराजः, अधि० ८)

क्तम्। उपक्रमतन्त्रत्वादुपसंहारस्य तादात्म्यसंपत्तिः सेति मन्यते। तथा प्राप्तेऽभिधीयते—आत्मगृहीतिः "सदेव सोम्येदमग्र आसीत्" [छा० ६-२-१] इत्यत्र च्छन्दोगानामपि भवितुमर्हतीतरवत्। यथा "कतम आत्मा" [बृ० ४-३-७] इत्यत्र वाजसनेयिनामात्मगृहीतिस्तथैव। कस्मात्। उत्तरात्तादात्म्योपदेशात्। "अन्वयादिति चेत्स्यादवधारणात्"। यदुक्तमुपक्रमान्वयादुपक्रमे चाऽऽत्मशब्दश्रवणाभावान्नाऽऽत्मगृहीतिरिति तस्य कः परिहार इति चेत्सोऽभिधीयते "स्यादवधारणात्" इति। भवेदुपपन्नेहाऽऽत्मगृहीतिः। "अवधारणात्"। तथा हि—"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" [छा० ६-१-३] इत्येकविज्ञानेन सर्वविज्ञानमवधार्य तत्संपिपादयिषया सदेवेत्याह तच्चाऽऽत्मगृहीतौ सत्यां संपद्यते। अन्यथा हि योऽयं मुख्य आत्मा स न विज्ञात इति नैव सर्वविज्ञानं संपद्येत। तथा

नीयतामित्याशङ्क्याऽऽह—उपक्रमेति। स हि संदिग्धार्थो निश्चितार्थोपसंहारेण नीयते प्रकृते तु तस्यासंदिग्धार्थत्वात्तदनुसारिण्युपसंहारे प्रतिमायां विष्णुदृष्टिवदात्मनि ब्रह्मदृष्टिरेष्टव्येत्यर्थः। वाजसनेयिवाक्यं ब्रह्मात्मविद्यार्थं छान्दोग्यवाक्यं त्वात्मनि ब्रह्मदृष्ट्यर्थमिति विद्याभेदमुपसंहरति—इति मन्यत इति। अतुल्यार्थतया विद्याभेदमनूद्य सिद्धान्तमाह—तथेति। तादात्म्योपदेशस्य[२] गत्यन्तरमनूद्य दूषयति—अन्वयादिति। तत्रानुवादं विभजते—यदिति। उपक्रमान्वयात्तत्तन्त्रत्वादुपसंहारस्येति यावत्। उपक्रमोऽपि तर्हि सदेवेत्यवधारणादात्मानमेव गोचरयतीत्याशङ्क्याऽऽह—उपक्रमेति। तस्मादुपसंहारेऽपि न परमात्मतादात्म्यमात्मनो गृह्यते। न हि सच्छब्देनोपक्रमस्थेनाऽऽत्मोच्यते तस्य तस्मिन्नप्रसिद्धत्वात्। तथा च सतो नाऽऽत्मनस्तादात्म्यसंपत्तिरात्मनि तत्त्वमसीति विवक्षितेत्याह—नाऽऽत्मेति। परिहारमादत्ते—स इति। तत्र प्रतिज्ञां व्याचष्टे—भवेदिति। अवधारणादिति हेतुं विवृणोति—तथा हीति। एकविज्ञानेन सर्वविज्ञानं सच्छब्देनानात्मग्रहेऽपि सतः सर्वात्मत्वादविरुद्धमित्याशङ्क्याऽऽह—तच्चेति। उक्तमेव व्यतिरेकेण साधयति—अन्यथेति। प्रकारान्तरेण हेतुं व्याचष्टे—तथेति। एकमेवाद्वितीयमित्येकत्वावधारणमनेन जीवेनाऽऽत्मनेति जीवस्याऽऽत्मशब्देन परामर्शः सति संपद्येत्यादि तत्स्वभावापत्तिवचनं भूय एव मा भगवान्विज्ञापयत्विति परिचोदना। हेतुजातस्योक्तस्य फलमाह—

---

१ ङ. ञ. संपद्यते। २ ठ, ड. °देशेऽस्य।

प्रागुत्पत्तेरेकत्वावधारणं जीवस्य चाऽऽत्मशब्देन परामर्शः स्वापावस्थायां च तत्स्वभावसंपत्तिकथनं परिचोदनापूर्वकं च पुनः पुनः " तत्त्वमसि " [छा० ६-८-७] इत्यवधारणमिति च सर्वमेतत्तादात्म्यप्रतिपादनायामेवावकल्पते न तादात्म्यसंपादनायाम् । न चात्रोपक्रमतन्त्रत्वोपन्यासो न्याय्यः । न ह्युपक्रम आत्मत्वसंकीर्तनमनात्मत्वसंकीर्तनं वाऽस्ति सामान्योपक्रमश्च न वाक्यशेषगतेन विशेषेण विरुध्यते विशेषाकाङ्क्षित्वात्सामान्यस्य । सच्छब्दार्थोऽपि च पर्यालोच्यमानो न मुख्यादात्मनोऽन्यः संभवत्यतोऽन्यस्य वस्तुजातस्याऽऽरम्भणशब्दादिभ्योऽनृतत्वोपपत्तेः । आम्नानवैषम्यमपि नावश्यमर्थवैषम्यमावहति । आहर पात्रं पात्रमाहरेत्येवमादिष्वर्थसाम्येऽपि तद्दर्शनात् । तस्मादेवंजातीयकेषु वाक्येषु प्रतिपादनप्रकारभेदेऽपि प्रतिपाद्यार्थाभेद इति सिद्धम् ॥ १७ ॥ (८)

इति च सर्वमिति । यत्तूपक्रमतन्त्रेणोपसंहारेण भाव्यमिति तत्राऽऽह—न चेति । अत्र च्छान्दोग्ये स आत्मेत्यादेरुपसंहारस्येति यावत् । तत्र हेतुः—न हीति । उपसंहारानुसारेणापि तार्हि नोपक्रमो नेयस्तयोर्भिन्नविषयत्वात्तत्राऽऽह—सामान्येति । सच्छब्दस्य सत्तासामान्यवाचित्वेनाऽऽत्मानात्मसाधारण्याद्विशेषाकाङ्क्षायामुपसंहारानुसारेणाऽऽत्मैव तदर्थो निर्णीयते । संदिग्धार्थेनोपक्रमेणोपसंहारस्यानिर्णयादुपक्रमानुरोधन्यायस्यासंदिग्धोपक्रमविषयत्वादित्यर्थः । उपक्रमभेदमुपेत्य श्रुतिद्वयेऽपि वेद्यैक्येन विद्यैक्यमुक्तम् । संप्रत्युपक्रमभेदोऽपि नास्तीत्याह—सच्छब्देति । आत्मातिरिक्तस्य सर्वस्यानिर्वाच्यत्वादनात्मनः सच्छब्दार्थासिद्धेरात्मन एव तदर्थत्वान्नोपक्रमभेदोऽस्तीत्यर्थः । यत्त्वाम्नानवैषम्ये सत्यर्थसाम्यमयुक्तमिति तत्राऽऽह—आम्नानेति । तद्वैषम्यस्यार्थभेदेनानवश्यंभावे फलितमाह—तस्मादिति । एवंजातीयकेषु योऽयं विज्ञानमयः सदेव सोम्येदमित्यादिषु प्रतिपादनप्रकारभेदः समाम्नानविशेषो वाजसनेयके वाक्यार्थान्वयित्वमर्थस्य तदर्थपर्यन्तस्य च्छान्दोग्ये तदर्थस्य त्वमर्थपर्यन्तस्य लक्ष्यतया वाक्यार्थभेदाभावादेकैवोभयत्रापि विद्येत्याह—प्रतिपाद्येति ॥ १७ ॥ (८)

---

१ ट. °पत्तेः क° । २ क. ज. °ति स° । ३ ङ. ज. ञ. ट. °त्रतोप° । ४ ङ. ञ. ट. °रेत्यादि° । ५ ज. ट. °पि च त° ।

(काण्वच्छान्दोग्यषष्ठयोर्वैस्त्वेकत्वम्, अधि० ९)

कार्याख्यानादपूर्वम् ॥ १८ ॥ (९)

छन्दोगा वाजसनेयिनश्च प्राणसंवादे श्वादिमर्यादं प्राणस्याऽन्नमाम्नाय तस्यैवापो वास आमनन्ति। अनन्तरं च च्छन्दोगा आमनन्ति—" तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति " [छा० ५-२-२] इति। वाजसनेयिनश्चाऽऽमनन्ति " तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाऽऽचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाऽऽचामेदेतमेव तदनमनग्नं कुरुते " [बृह० माध्य० ६-२-१५] इति। तत्र चाऽऽचमनमनग्नताचिन्तनं च प्राणस्य प्रतीयते तत्किमुभयमपि विधीयत उताऽऽचमनमेवोता-

---

संदिग्धस्य सदुपक्रमस्य शेषान्निर्णयवदाचामन्तीति वर्तमानापदेशस्य विधित्वसंदेहे शेषादशिष्यन्नाचामेदित्यतो विधिपरत्वं निर्णेयमित्याशङ्क्याऽऽह—**कार्येति**। विषयं वक्तुमविगीतमाम्नानं दर्शयति—**छन्दोगा इति**। यदिदं किंचाऽऽश्वभ्य आ कृमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमित्युक्त्वा तस्यैव प्राणस्यापो वासो वदन्तीति यावत्। छन्दोगानामविशेषाम्नानमुक्त्वा विशेष(शिष्ट)माम्नानमाह— **अनन्तरं चेति**। तस्मादपां प्राणं प्रति वासोरूपत्वादिति यावत्। अशिष्यन्तः श्रोत्रियाः सन्तोऽशनं कुर्वन्तस्तावदेतत्कुर्वन्ति किं तद्भोजनात्पूर्वमूर्ध्वं वाऽद्भिः प्राणं परिदधति परिधापयन्त्याच्छादयन्तीत्यर्थः। शाखान्तरेऽपि विशेषाम्नानं कथयति—**वाजसनेयिनश्चेति**। यस्मात्प्राणस्याऽऽपो वासस्तस्मादित्यस्मिन्नर्थे तच्छब्दः। विद्वांसः प्राणविद्यावन्तस्तेषां यथेष्टचेष्टानिषेधार्थं श्रोत्रियपदम्। एतमेवानं प्राणं तत्तेनाऽऽचमनेनानग्नं वाससा परिहितं कुर्वन्तो मन्यन्ते चिन्तयन्तीत्यर्थः। काण्वानामाम्नानविशेषमुक्त्वा माध्यंदिनानामाह—**तस्मादिति**। यस्मात्पूर्वे प्राणविदः स्वयमाचामन्तः प्राणमनग्नं वाससा परिहितं कुर्वन्तो मन्यन्ते तस्मादिदानींतनोऽपि प्राणविदेवं कुर्यादित्यर्थः। पाठत्रयेऽप्यापातिकमर्थमाह—**तत्र चेति**। उभयोरपूर्वत्वमुपेत्याऽऽह—**तदिति**। किं च वाक्यभेदप्रसङ्गभयादन्यतरदेव विधेयमिति कल्पान्तरं द्रष्टव्यम्। द्वितीयमपि विशेषानवधारणाद्वेधा विकल्पयति—**उतेति**। तत्रापि प्रथमश्रुतत्वमालोच्य प्रथमो विकल्पो दृष्टिविषयसंपादनेनाऽऽचमनस्यानग्नताचि-

---

१ ङ. ज. ञ. ट. °ष्टादद्भिः। २ ङ. ञ. तत्राऽऽच°। ३ क. °र्थः। काण्वा°। ४ क. ठ. ड. किंवा।

नग्नताचिन्तनमेवेति विचार्यते । किं तावत्प्राप्तमुभयमपि विधीयत इति । कुतः । उभयस्याप्यवगम्यमानत्वात् । उभयमपि चैतदपूर्वत्वाद्विध्यर्हम् । अथ वाऽऽचमनमेव विधीयते विस्पष्टा हि तस्मिन्विधिविभक्तिः " तस्मादेवंविदाशिष्यन्नाचामेदशित्वा चाऽऽचामेत् " [बृह० मा० ६-२-१५] इति । तस्यैव स्तुत्यर्थमनग्नतासंकीर्तनमिति ।

एवं प्राप्ते ब्रूमः—नाऽऽचमनस्य विधेयत्वमुपपद्यते " कार्याख्यानात् " प्राप्तमेव हीदं कार्यत्वेनाऽऽचमनं प्रायत्यार्थं [मनु० २-५३] स्मृतिप्रसिद्धमन्वाख्यायते । नन्वियं श्रुतिस्तस्याः

न्तनशेषत्वं मत्वा द्वितीय इति भेदः । अत्र पाठत्रयेऽपि प्राणविद्याङ्गमनग्नताचिन्तनमेकमेव विधेयमिति चिन्तायां वाक्यार्थज्ञानसाधनगामित्वात्पादादिसंगतिः । पूर्वपक्षे द्वयोर्विधेयत्वाद्वाक्यभेदो[1]ऽन्यतरविधावप्याचमनस्यैव विधेयत्वाद्विशेषविषयस्य तस्यान्यत्रोपसंहारः । सिद्धान्ते त्वनग्नताचिन्तनस्यैव विधेयत्वाद्वाक्यैक्यादाचमनविशेष[3]स्याविधेयस्य नोपसंहृतिरित्यङ्गीकृत्य विमृश्य पूर्वपक्षमाह—किमिति । गौरवादुभयविधानमयुक्तमिति शङ्कते—कुत इति । कर्तव्यत्वेन द्वयोरपि तात्पर्यगम्यत्वान्न गौरवमित्याह—उभयस्येति । गम्यमानत्वमात्रेण तात्पर्यगम्यतया विधेयत्वमतिप्रसक्तमित्याशङ्क्याऽऽह—उभयमिति । न च स्मृत्याचारसिद्धत्वा[4]न्नापूर्वत्वं तयोरेतद्वाक्यमूलत्वात् । न च सामान्यविशेषतया श्रुतिस्मृत्याचाराणां न मूलमूलिता सामान्यसिद्धानृतवदननिषेधस्य क्रतुगामितया विधिवदाचमनस्यापि प्रसिद्धस्यैव प्राणविद्यायोगित्वेन विधानाद्वाक्यभेदप्रसङ्गस्य चोपरिधारणविधिवददोषत्वादिति भावः । न युक्तो वाक्यभेदः सत्यां गतावित्याशङ्क्य पक्षान्तरमाह—अथ वेति । तत्र हेतुः—विस्पष्टेति । तर्हि किमर्थमनग्नताकीर्तनं तत्राऽऽह—तस्येति । महाहं हीदमाचमनं यदेनेन प्राणोऽनग्नः स्यादिति स्तुतिस्तस्माद्विधेयं विशेषविषयमाचमनमन्यत्र चोपसंहर्तव्यमित्यर्थः[5] ।

सिद्धान्तयति—एवमिति । तत्र हेतुमादाय व्याचष्टे—कार्येति । प्रयतस्य प्रयत्नवतो भावः प्रायत्यं शुद्धत्वं तदर्थं स्मार्तमाचमनमनूद्यत इत्युक्तमाक्षिपति—नन्विति । स्मृतेः श्रुतिमूलत्वेन प्रामाण्यादुक्तश्रुतिमूलैव सा । न च स्मृतिसिद्धोऽर्थः श्रुत्याऽनूद्यते

---

१ क. घ. ज. 'तिरस्याः । २ ठ. ड. 'दो वाऽन्य' । ३ झ. 'षस्य वि' । ४ झ. 'त्वान्न पू' । ५ झ. 'धेयवि' ।

(काण्वच्छान्दोग्यषष्ठ्योर्विस्त्वेकत्वम्, अधि० ९)

स्मृतेर्मूलं स्यात् । नेत्युच्यते । विषयनानात्वात् । सामान्यविषया हि स्मृतिः पुरुषमात्रसंबद्धं[1] प्रायत्यार्थमाचमनं प्रापयति श्रुतिस्तु प्राणविद्याप्रकरणपठिता[2] तद्विषयमेवाऽऽचमनं विदधती विदध्यात् । न च भिन्नविषययोः श्रुतिस्मृत्योर्मूलमूलिभावोऽवकल्पते । न चेयं श्रुतिः प्राणविद्यासंयोग्यपूर्वमाचमनं विधास्यतीति शक्यमाश्रयितुम् । पूर्वस्यैव पुरुषमात्रसंयोगिन आचमनस्येह प्रत्यभिज्ञायमानत्वात् । अत एव[3] च नोभयविधानम् । उभयविधाने च वाक्यं भिद्येत । तस्मात्प्राप्तमेवाशिशिषतामाशितवतां चोभयत आचमनमनूद्य " एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते " [बृ० ६-१-१४] इति प्राणस्यानग्नताकरणसंकल्पोऽनेन वाक्येनाऽऽचमनीयास्वप्सु प्राणविद्यासंबन्धित्वेनापूर्वं उपदिश्यते । न चायमनग्नतावाद आचम-

---

वैपरीत्यापत्तेरित्यर्थः । भिन्नविषयत्वान्मूलमूलिभावो नानयोरित्याह—नेति । विषयभेदं विशदयति—सामान्येति । भिन्नविषयत्वे फलितमाह—न चेति । अर्थैकत्वाभावेऽपि तद्भावेऽतिप्रसङ्गादित्यर्थः । आचमनान्तरविधानमुपेत्य मूलमूलिभावो निरस्तः संप्रति तदपि नास्तीत्याह—न चेति । न च स्मार्ताचमनस्य श्रौत्याऽनुवादे वैपरीत्यं त्रिराचामेदित्यादिश्रुतिसिद्धस्यैव सामान्याचमनस्यात्रानुवादादिति मत्वा हेतुमाह—पूर्वस्येति । अनृतवादनिषेधस्य पुरुषार्थतया विहितस्यापि क्रत्वर्थेनाप्राप्तस्य विधानमविरुद्धमाचमनस्य तु सर्वकर्माङ्गतया विहितस्य प्राणोपास्त्यङ्गत्वमपि सिद्धमिति पुनर्विधानानर्थक्यमिति भावः । आचमनस्य प्रकृते विधानायोगं हेतूकृत्याऽऽद्यं पूर्वपक्षं प्रत्याह—अत एवेति । युक्त्यन्तरमाह—उभयेति । न चोपरिधारणवद्वाक्यनानात्वमदोषः संभवत्येकवाक्यत्वे तद्भेदस्यानिष्टत्वादिति भावः । तर्हि किमिह विधेयं तदाह—तस्मादिति । अनुवादे हेतुमाह—प्राप्तमिति । अनग्नताकृतिसंकल्पे विधित्सिते कृतमनुवादेनेत्याशङ्क्याऽऽह—आचमनीयास्विति । प्राणविद्याधिकारे चेदनग्नतासंकल्पो विधीयते कथं वाक्यभेदो न स्यादित्याशङ्क्याऽऽह—प्राणेति । तस्य विधियोग्यत्वं सूचयति—अपूर्व इति । एतेनापूर्वमिति पदं व्याख्यातम् । यत्त्वनग्नतासंकीर्तनमाचमनस्तुत्यर्थमिति तत्राऽऽह—न चेति । स्तोतव्यविधेयाभावे स्तुतिरयुक्तेत्यर्थः । किंच विधेयमप्राप्तं प्राप्तेन स्तूयते न चानग्नतासंकल्पोऽन्येन

---

१. °बन्धं प्रा° । ट. °बन्धप्रा° । २ क. ज. °परिपठि° । ३ ट. °व नो° । ४ झ. श्रुत्यनु° ।

नस्तुत्यर्थ इति न्याय्यम् । आचमनस्याविधेयत्वात् । स्वयं चानम्रतासंकल्पस्य विधेयत्वप्रतीतेः । न चैवं सत्येकस्याऽऽचमनस्योभयार्थताऽभ्युपगता भवति प्रायत्यार्थता परिधानार्थता चेति । क्रियान्तरत्वाभ्युपगमात् । क्रियान्तरमेव ह्याचमनं नाम प्रायत्यार्थं पुरुषस्याभ्युपगम्यते तदीयासु त्वप्सु वासःसंकल्पनं नाम क्रियान्तरमेव परिधानार्थं प्राणस्याभ्युपगम्यत इत्यनवद्यम्। अपि च "यदिदं किंचाऽऽश्वभ्य आ कृमिभ्य आ कीटपतंगेभ्यस्तत्तेऽन्नम्" [बृ० ६-१ १४] इत्यत्र तावन्न सर्वान्नाभ्यवहारश्चोद्यत इति शक्यं वक्तुम् । अशब्दत्वादशक्यत्वाच्च । सर्वं तु प्राणस्यान्नमितीयमन्नदृष्टिश्चोद्यते तत्साहचर्याच्चापो वास इत्यत्रापि नापामाचमनं चोद्यते प्रसिद्धास्त्वेव त्वाचमनीयास्त्वप्सु परि-

---

प्राप्तो येन स्तावकः स्यान्न चान्यतोऽप्राप्तमाचमनं येन विधेयतया स्तोतव्यमित्याह—स्वयं चेति । शुद्ध्यर्थं विनियुक्तस्यैवाऽऽचमनस्य प्राणपरिधानार्थत्वे विनियुक्तविनियोगविरोधः स्यादित्याशङ्क्याऽऽह—न चेति । एकस्य कर्मणः स्यादेकार्थतेत्युत्सर्गादसति बाधके तदनेकार्थत्वाप्सिद्धेः संकल्पविधिपरत्वमेव वाक्यस्येत्याह—क्रियेति । हेतुमेव साधयति—क्रियान्तरमिति । वासःसंकल्पक्रियातो भेदादाचमनस्य क्रियान्तरत्वं संकल्पस्यापि परिधानार्थस्याऽऽचमनादन्यत्वात्तथात्वमेवं क्रियाभेदे सत्युत्सर्गस्य भङ्गो नास्तीत्याह—इत्यनवद्यमिति । किंच दृष्टिचोदनासाहचर्यादिहापि सैव युक्ता नाऽऽचमनचोदनेत्याह—अपि चेति । सर्वान्नभक्षणमेवात्रापि चोद्यते न दृष्टिरित्याशङ्क्याऽऽह—अत्रेति । दृष्टिवाचकाभावं हेतुमाह—अशब्दत्वादिति । अन्नशब्दवशादभ्यवहरणं भातीत्याशङ्क्याऽऽह—अशक्यत्वाच्चेति। न हि श्वादिमर्यादं सर्वमन्नमेकेनात्तुं शक्यं भक्ष्याभक्ष्यविधिविरोधात् । प्राणविद्यासामर्थ्यादसामर्थ्यविरोधसमाधानं[3] तु सर्वान्नानुमत्यधिकरणे निरस्यमिति भावः । अशब्दत्वस्य दृष्टेरपि तुल्यत्वादभ्यवहरणवदविधेयत्वमाशङ्क्य नान्तरीयकतया दृष्टेः शब्देन क्रियमाणत्वादभ्यवहरणस्य तज्जन्यत्वज्ञाप्यत्वयोरभावादनुपपत्तिकज्ञानस्य दृष्टिविधेरेव तच्छान्तावनुत्थानात्तद्विधानमेवैतदित्याह—सर्वं त्विति । तथाऽपि प्रकृते संकल्पविधौ किमायातं तदाह—तदिति । प्रकरणविरोधाद्वाक्यस्य क्रियाविधिपरत्वाभावे किंपरत्वं तदाह—प्रसिद्धास्त्विति । अस्तु सर्वान्नवाक्ये दृष्टिविधिराचमनवाक्ये तु क्रियैव

---

१ ट. शक्यते । २ ङ. ञ. ट. °स्त्वेवाऽऽच° । ३ ठ. ड °नं स° ।

धानदृष्टिश्चोद्यत इति युक्तम् । न ह्यर्थवैशसं संभवति । अपि चाऽऽचामन्तीति वर्तमानापदेशित्वान्नायं शब्दो विधिक्षमः । ननु मन्यन्त इत्यपि समानं वर्तमानापदेशित्वम् । सत्यमेव तत् । अवश्ययविधये त्वन्यतरस्मिन्वासःकार्याख्यानादपां वासःसंकल्पनमेवापूर्वं विधीयते नाऽऽचमनं पूर्ववद्धि तदित्युपपादितम् । यदप्युक्तं विस्पष्टा चाऽऽचमने विधिविभक्तिरिति तदपि पूर्ववत्त्वेनैवाऽऽचमनस्य प्रत्युक्तम् । अत एवाऽऽचमनस्याविधित्सितत्वात् " एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते " [बृह० ६-१-१४] इत्यत्रैव काण्वाः पर्यवस्यन्ति नाऽऽमनन्ति " तस्मादेवंवित् " इत्यादि । तस्मान्माध्यंदिनानामपि पाठ आचमनानुवादेनैवंवित्त्वमेव प्रकृतप्राणवासोवित्त्वं विधीयत इति प्रतिपत्तव्यम् । योऽप्ययमभ्युपगमः क्वचिदाचमनं विधीयतां क्वचिद्वासोविज्ञानमिति सोऽपि न साधुः । आपो वास इत्यादिकाया वाक्यप्रवृत्तेः सर्वत्रैकरूप्यात् । तस्माद्वासोविज्ञानमेवेह विधीयते नाऽऽचमनमिति न्याय्यम् ॥ १८ ॥ (९)

चोद्यते तत्राऽऽह—न हीति । इतश्चाऽऽचमने विधिरत्र नास्तीत्याह—अपि चेति । तर्हि चिन्तनमपि न विधेयं दोषसाम्यादित्याह—नन्विति । आचमनचिन्तनयोर्वर्तमानापदेशमङ्गी करोति—सत्यमिति । तर्हि द्वयोरविधेयत्वमित्याशङ्क्यानुवादमात्रस्याकिंचित्करत्वादन्यतरविधेरावश्यकत्वे संकल्पनमेव विधेयमिति विधान्तरेण सूत्रं योजयति—अवश्येति । तत्र हेतुत्वेनाऽऽचमनस्यान्यतः प्राप्तिमुक्तां स्मारयति—पूर्ववदिति । पूर्वपक्षबीजमनुभाष्य दूषयति—यदपीति । पूर्ववत्त्वेनापूर्ववत्त्वाभावेनेति यावत् । तत्र श्रुतिविधिविभक्तिरनन्नतासंकल्पेन नेया जातैश्चयवाग्वा जुहुयादितिवदविवक्षितं वा विधित्वमिति भावः । आचमनस्याविधेयत्वे लिङ्गान्तरमाह—अत इति । तर्हि पाठावैयर्थ्यार्थं माध्यंदिनानामाचमने विधिरिष्यतामित्याशङ्क्य श्रुत्यन्तरानुसारेण तत्रापि चिन्तनमेव विधेयमित्याह—तस्मादिति । एवंवित्त्वमेवेत्युक्तं व्यनक्ति—प्रकृतेति । यदाचामेदित्यनूद्य तदेवंविदिति वेदनमेव विधीयत इत्यर्थः । शाखाभेदेनोदितानुदितहोमवदुभयमपि विधेयमित्येकदेशिमतमाशङ्क्याऽऽह—योऽप्ययमिति । एकीयव्यवस्थायोगे फलितमाह—तस्मादिति ॥ १८ ॥ (९)

---

१ क. म. 'त्रापि । २ ङ. ञ. 'देशत्व' । ३ क. ञ. 'वश्यं वि' । ४ ङ. म. 'धेयत्वमित्या' । ५ ङ. ज. म. ट. 'त्रैवैक' । ६ क. ञ. 'मुक्त्वा स्मा' ।

समान एवं चाभेदात् ॥ १९ ॥ (१०)

वाजसनेयिशाखायामग्निरहस्ये शाण्डिल्यनामाङ्किता विद्या विज्ञाता, तत्र च गुणाः श्रूयन्ते—"स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपम्" [शतप० १०-६-३-२] इत्येवमादयः। तस्यामेव शाखायां बृहदारण्यके पुनः पठ्यते—" मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच " [बृ० ५-६-१] इति। तत्र संशयः—किमियमेका विद्याऽग्निरहस्यबृहदारण्यकयोर्गुणोपसंहारश्चोत द्वे इमे विद्ये गुणानुपसंहारश्चेति। किं तावत्प्राप्तम्। विद्याभेदो गुणव्यवस्था चेति। कुतः। पौनरुक्त्यप्रसङ्गात्। भिन्नासु हि शाखास्वध्येतृवेदितृभेदात्पौनरुक्त्यपरिहारमालोच्य विद्यैकत्वमध्यवसायैकत्रातिरिक्ता गुणा इतरत्रोपसंहियन्ते प्राणसंवादादिष्वित्युक्तम्। एकस्यां पुनः शाखायामध्येतृवेदितृभेदाभावादशक्यपरिहारे पौनरुक्त्ये न विप्रकृष्टदे-

---

पूर्वत्र प्राप्ताचमनानुवादेनानम्रताचिन्तनं विधेयमित्युक्तम्। इह तु वाक्ययोः कस्य विधित्वं कस्य वाऽनुवादित्वमित्यनिश्चयाद्वयोरपि विद्याविधित्वमाशङ्क्याऽऽह—**समान इति**। शाण्डिल्यविद्यामुदाहरति—**वाजसनेयीति**। शाण्डिल्येन दृष्टेति तन्नाम्नाऽङ्किता चिह्निता विशेषिता विद्येति यावत्। एकस्यां शाखायां देशभेदेन कृतां विद्यां विषयीकृत्याम्यासात्प्रत्यभिज्ञानाच्च संशयमाह—**तत्रेति**। अत्र च विद्याभेदादिनिरूपणद्वारा वाक्यार्थधीसाधनस्यैव निरूपणात्पादादिसंगतिः। पूर्वपक्षे पौनरुक्त्यपरिहाराय विद्याभेदाद्गुणानुपसंहारः। सिद्धान्ते विद्यैक्येऽप्यपौनरुक्त्याद्गुणोपसंहार इति मत्वा विमृश्य पूर्वपक्षयति—**किं तावदिति**। गौरवदुष्टं[3] विद्यानानात्वमयुक्तमित्याह—**कुत इति**। प्रामाणिकं गौरवमदूषणमिति मत्वाऽऽह—**पौनरुक्त्येति**। विद्याभेदे पौनरुक्त्यमन्यासं भिन्नशाखासु विद्यैक्येऽपि पौनरुक्त्यदृष्टेरित्याशङ्क्याऽऽह—**भिन्नास्विति**। अध्येतृभेदेन शब्दपौनरुक्त्यं वेदितृभेदेन चार्थपौनरुक्त्यं परिहियते। शाखाभेदेऽपि देशभेदोक्तविद्याफलार्थिनां प्रतिपत्तृत्वात्तत्तद्वाक्याध्येतृत्वाच्चापौनरुक्त्यमित्याशङ्क्यैकशाखाध्ययनस्य नित्यविधित्वेनैव प्राप्तत्वान्नैवमित्याह—**एकस्यामिति**। अग्निहोत्रं

---

१ ङ. ञ. ट. °त्र गु°। २ ट. एव। ३ ञ. °दुष्टवि°।

(प्राणोपासनं प्रति प्राणविद्याप्राप्तानप्रतावुद्धयाचमनयोरनप्रतावुद्धेरेव विधेयत्वम्, अधि० १०)

शस्यैका विद्या भवितुमर्हति। न चात्रैकमाम्नानं विद्याविधानार्थमपरं गुणविधानार्थमिति विभागः संभवति । तदा ह्यतिरिक्ता एव गुणा इतरत्रेतरत्र चाऽऽम्नायेरन्न समानाः। समाना अपि तूभयत्राऽऽम्नायन्ते मनोमयत्वादयः। तस्मान्नान्योन्यगुणोपसंहार इति। एवं प्राप्ते ब्रूमहे—यथा भिन्नासु शाखासु विद्यैकत्वं गुणोपसंहारश्च भवत्येवमेकस्यामपि शाखायां भवितुमर्हति । उपास्याभेदात्। तदेव हि ब्रह्म मनोमयत्वादिगुणकमुभयत्राप्युपास्यमभिन्नं प्रत्यभिजानीमः। उपास्यं च रूपं विद्यायाः। न चैविद्यमाने रूपाभेदे विद्याभेदमध्यवसातुं शक्नुमः। नापि विद्याभेदे गुणव्यवस्थानम्[3]। ननु पौनरुक्त्यप्रसङ्गाद्विद्याभेदोऽध्यवसितः। नेत्युच्यते—अर्थविभागोपपत्तेः। एकं ह्याम्नानं विद्याविधानार्थमपरं गुणविधानार्थमिति न किंचिन्नोपपद्यते। नन्वेवं सति यदपठितमग्निरहस्ये तदेव बृहदारण्यके पठितव्यम् "स एष सर्वस्येशानः" इत्यादि। यत्तु पठितमेव मनोमयं इत्यादि तन्न पठित-

---

जुहोतीत्यत्र सिद्धं जुहोत्यर्थमनूद्य दध्ना जुहोतीतिगुणविधिवदिहापि स्यादित्यपौनरुक्त्यमाशङ्क्याऽऽह—न चेति। द्वयोरदृष्टविशेषतया विधित्वानुवादत्वानिश्चयात्तुल्यगुणोक्तिवैयर्थ्याच्च नेयं व्यवस्थेत्याह—तदेति। अपौनरुक्त्याय विद्याभेदाद्गुणानुपसंहार इत्युपसंहरति—तस्मान्नेति। उक्तमनूद्य सिद्धान्तयति—एवमिति। क्रियापदेनेतिशब्दस्य संबन्धः। हेतुमादाय व्याकरोति—उपास्येति। तदैक्ये गम्यमानेऽपि न विद्यैक्यं तदैक्ये हेत्वभावादित्याशङ्क्य रूपाभेदो हेतुरित्याशङ्क्याऽऽह—उपास्यं चेति। तस्य हेतुत्वमेव स्फुटयति—न चेति। प्रत्यभिज्ञाविरोधादित्यर्थः। विद्यैक्ये फलितमाह—नापीति। गुणव्यवस्थानमध्यवसातुं शक्नुम इति संबन्धः। अध्येतृवेदितृभेदाभावात्पौनरुक्त्यमुक्तं स्मारयति—नन्विति। अर्थभेदसंभवान्न पौनरुक्त्यमित्याह—नेतीति। अदृश्यमानविशेषतया कस्य कोऽनुवाद इत्यनिश्चयान्नार्थविभागसिद्धिरित्याशङ्क्य यत्र भूयांसो गुणा विधीयन्ते तत्र प्रधानविधिरन्यत्र तदनुवादेन गुणविधिरिति विभागमभिप्रेत्याऽऽह—एकं हीति। तुल्यगुणोक्तिवैयर्थ्यमुक्तं स्मारयति—नन्विति। बृहदारण्यके प्रधानविधिरग्निरहस्ये गुणविधिरित्येवं विभागे सतीति यावत्।

---

१ ङ. ञ. °नीमहे। उ°। २ क. ज. झ. ट. च रू°। ३ ट. °स्था। न°। ४ ट. °ठितं म°। ५. °यत्वादि। ६ झ. °ति। ट°।

(काण्वाग्निरहस्यब्राह्मणबृहदारण्यकस्थशाण्डिल्यविद्याया एकविधत्वम्, अधि० ११)

व्यम् । नैष दोषः । तद्बलेनैव प्रदेशान्तरपठितविद्याप्रत्यभिज्ञानात् । समानगुणाज्ञानेन हि विप्रकृष्टदेशां शाण्डिल्यविद्यां प्रत्यभिज्ञाप्य तस्यामीशानत्वाद्युपदिश्यते । अन्यथा हि कथं तस्यामयं गुणविधिरभिधीयते । अपि चाप्राप्तांशोपदेशेनार्थवति वाक्ये संजाते प्राप्तांशपरामर्शस्य नित्यानुवादतयाऽप्युपपद्यमानत्वान्न तद्बलेन प्रत्यभिज्ञोपेक्षितुं शक्यते । तस्मादत्र समानायामपि शाखायां विद्यैकत्वं गुणोपसंहारश्चेत्युपपन्नम् ॥१९॥(१०)

(काण्वाग्निरहस्यब्राह्मणबृहदारण्यकस्थशाण्डिल्यविद्याया एकविधत्वम्, अधि० ११)

संबन्धादेवमन्यत्रापि ॥ २० ॥

बृहदारण्यके " सत्यं ब्रह्म " [बृ० ५ ४-१] इत्युपक्रम्य " तद्यत्तत्सत्यमसौ स आदित्यो य एषे एतस्मिन्मण्डले

प्रत्यभिज्ञादार्ढ्यार्थं तुल्यगुणोक्तिरर्थवतीत्याह—नेति । तदेव स्फुटयति—समानेति । प्रत्यभिज्ञानस्यार्किंचित्करत्वमाशङ्क्याऽऽह—अन्यथेति । तस्यां बृहदारण्यैके गुणविधानार्थमग्निरहस्योक्तायामिति यावत् । अयं गुणविधिरीशानत्वादिगुणकथनमित्यर्थः । अग्निरहस्योत्पन्नां विद्यामनूद्य विशिष्टगुणत्वेन बृहदारण्यके तँस्यां गुणविधानमित्युक्तम् । इतश्च तुल्यगुणोक्तिप्राप्ता प्रत्यभिज्ञा नोपेक्षितव्येत्याह—अपि चेति । तदेव कैमुतिकन्यायेन स्फोरयति—अप्राप्तेति । नान्तरिक्षे न दिवीत्यादिषु निष्फलानुवादस्यापि निर्दोषत्वात्प्रकृते तुल्यगुणानुवादस्य प्रत्यभिज्ञानार्थत्वेनार्थवत्त्वात्तुल्यगुणोक्तिकृता प्रत्यभिज्ञा नोपेक्षितुं शक्या तेनेशानत्वादिगुणवद्विद्योक्त्या बृहदारण्यकवाक्ये समानार्थे मनोमयत्वादितुल्यगुणानुवादस्य यथाकथंचिद्योगेऽपि प्रधानप्रत्यभिज्ञापकत्वेन सफलत्वात्तदधीनप्रत्यभिज्ञायाश्च विशिष्टविधिशेषत्वाद्बृहदारण्यके गुणविधिरन्यत्र प्रधानविधिरित्यर्थः । सिद्धे पुनरुक्तिपरिहारे फलितमाह—तस्मादिति ॥ १९ ॥ (१०)

विद्यैक्ये गुणोपसंहारमुक्त्वा तदैक्येऽपि तदनुपसंहारस्थलं वदन्पूर्वपक्षयति—संबन्धादिति । विषयमाह—बृहदिति । आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्तेत्यत्र सत्यशब्दो हिरण्यगर्भवाची तच्च सत्यं हिरण्यगर्भाख्यं ब्रह्म महदित्युपक्रम्येति यावत् । तत्तत्रैवं सति यँत्तत्सत्यं ब्रह्म सोऽसावादित्यो विधेयादित्यापेक्षया पुंलिङ्गप्रयोगः । किं मण्डलमेवाऽऽदित्यो नेत्याह—य इति । तस्य स्थानभेदेनाऽऽ-

---

१ ग. 'श्चेत्यनुप' । २ क. ङ. ज. ञ. 'ष त' । ३ क. 'ण्यक्रगु' । ४ क. ख. तस्या । ५ ठ. ड. विधिशिष्टविशे' । ६ ठ. ड. 'त्वादग्निरहस्ये गु' । ७ ख. यत्स' ।

(काण्वाग्निरहस्यब्राह्मणबृहदारण्यकस्थशाण्डिल्यविद्याया एकविधत्वम्, अधि० ११)

पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः" [बृ० ५.५.२] इति। तस्यैव सत्यस्य ब्रह्मणोऽधिदैवतमध्यात्मं चाऽऽयतनविशेषमुपदिश्य व्याहृतिशरीरत्वं च संपाद्य द्वे उपनिषदावादिश्येते। "तस्योपनिषदहः" इत्यधिदैवतम्। "तस्योपनिषदहम्" इत्यध्यात्मम्। तत्र संशयः-किमविभागेनैवोभे अप्युपनिषदावुपयत्रानुसंधातव्ये उत विभागेनैकाधिदैवमेकाध्यात्ममिति। तत्र सूत्रेणैवोपक्रमते। यथा शाण्डिल्यविद्यायां विभागेनाप्यधीतायां गुणोपसंहार उक्त एवमन्यत्राप्येवंजातीयके विषये भवितुमर्हति। एकविद्याभिसंबन्धात्। एका हीयं सत्यविद्याऽधिदैवमध्यात्मं चाधीता। उपक्रमाभेदाच्यतिपक्तपाठाच्च। कथं तस्यामुदितो धर्मस्तस्यामेव न स्यात्। यो ह्याचार्ये कश्चिदनुगमनादिराचारश्चोदितैः स ग्राम-

---

दित्यचाक्षुषपुरुषात्मनाऽवस्थानमुक्त्वा तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिन्प्रतिष्ठित इत्यन्योन्यव्यतिषङ्गमुक्त्वाऽऽदित्यपुरुषस्य य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिरो भुव इति बाहू स्वरिति प्रतिष्ठेति व्याहृतिदेहत्वं संपाद्य तस्योपनिषदहरित्यादित्यपुरुषस्याहर्नामत्वमुक्तम्। अनन्तरं च योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर इत्यादिना व्याहृतिदेहत्वं संपाद्य तस्योपनिषदहमित्यहंनामत्वमुक्तम्। उपनिषदिति देवतामुपगमयतीति तत्प्रकाशकं रहस्यं नामोच्यते। अहःशब्दः प्रकाशवचनोऽहंशब्दः प्रत्यगात्मवाची तदाह—तस्येत्यादिना। उपनिषद्वयं विषयीकृत्य सत्यब्रह्मैक्यस्थानभेदाभ्यां संशयमाह—तत्रेति। अत्र च सत्यविद्यायामुपनिषद्वयस्थोक्त्या वाक्यार्थधीहेतुचिन्तनात्पादादिसंगतिः। पूर्वपक्षे विद्यैक्याद्गुणोपसंहारनियमे सत्युपनिषदोः सांकर्यादतिदेशासिद्धिः। सिद्धान्ते विद्यैक्येऽपि स्थानभेदोपलक्ष्यानां धर्माणामनुपसंहारादुपनिषदोरसंकरादतिदेशः स्यादिति मत्वा पूर्वपक्षसूत्रमादत्ते—तत्रेति। सूत्राक्षराणि योजयति—यथेति। उपनिषदोर्विद्यैक्ये संकरः शङ्कयेत तदैक्यं कथमित्याशङ्क्याऽऽह—एकेति। विद्यैक्यं हेतुमाह—उपक्रमेति। सत्यं ब्रह्मेत्युपक्रमाभेदस्तावेतावन्योन्यस्मिन्नित्यादिव्यतिषक्तपाठस्ताभ्यां विद्यैक्यं सिद्धमित्यर्थः। तदैक्येऽपि किं स्यात्तदाह—कथमिति। विद्यैक्येऽपि स्थानभेदादुपनिषदोरसंकरः स्यादित्याशङ्क्य दृष्टान्तेन परिहरति—यो हीति। तस्योपनिषदिति प्रकृतसत्यपराम-

---

१ क. ज. ञ. ट. 'दावुपदि'। २ ङ. ज. ञ ट. 'वतमं'। ३ ङ. ञ. 'दमाध्या'। ४ ङ. ञ. 'गमादि'। ५ क. ङ. ञ. 'तः संप्रा'। ६ ठ. ड. 'रं योऽ'। ७ ठ. ड. 'स्तस्यापि भू'। ८ क. यः। पूं'।

गतेऽरण्यगते च तुल्यवदेव भवति। तस्मादुभयोरप्युपनिषदोरुभयत्र प्राप्तिरिति ॥ २० ॥

एवं प्राप्ते प्रतिविधत्ते—

न वा विशेषात् ॥ २१ ॥

"न[3] वा" उभयोरुभयत्र प्राप्तिः। कस्मात्। "विशेषात्"। उपासनस्थानविशेषोपनिबन्धादित्यर्थः। कथं स्थानविशेषोपनिबन्ध इत्युच्यते—"य[3] एष एतस्मिन्मण्डले पुरुषः" [बृ०५-५-२] इति ह्याधिदैविकं पुरुषं प्रकृत्य "तस्योपनिषदहः" इति श्रावयति। "योऽयं दक्षिणेऽक्षन्पुरुषः" [बृ०५-५-२] इति चाऽऽध्यात्मिकं पुरुषं प्रकृत्य "तस्योपनिषदहम्" इति। तस्येति चैतत्संनिहिताँवलम्बनं सर्वनाम तस्मादायतनविशेषव्यपाश्रयेणैवैते उपनिषदावुपदिश्येते। कुत उभयोरुभयत्र प्राप्तिः। नन्वेक एवायमधिदैवतमध्यात्मं च पुरुष एकस्यैव सत्यस्य ब्रह्मण आयतन-

---

र्शात्तस्य प्रधानस्याभेदाद्विशेषणतया स्थानस्योपसर्जनत्वाद्गुणप्रधानयोश्च प्रधाने संप्रत्ययात्तदविनाभावात्तदुपसंहारो गुणानामित्यर्थः। विद्यैक्ये गुणोपसंहारध्रौव्ये फलितमाह—तस्मादिति ॥ २० ॥

सिद्धान्तयति—एवमिति। वाशब्दस्यावधारणार्थत्वमुपेत्य प्रतिज्ञां विभजते—न वेति। ध्येयाभेदे ध्यानभेदात्किमिति न प्राप्तिरित्याह—कस्मादिति। हेतुं गृहीत्वा व्याचष्टे—विशेषादिति। ध्यानध्येयोपसर्जनभूतौ स्थानविशेषौ ताभ्यामुपनिषदोर्योगाद्यवस्था तयोर्युक्तेत्यर्थः। तस्येतिपरामृष्टब्रह्मणो नामद्वयविधाने तस्य स्थानविशेषसंगतिरसिद्धेति शङ्कते—कथमिति। उपनिषदोः स्थानविशेषयोगं साधयति—उच्यत इति। निकृष्टं ब्रह्मैव प्रधानं तच्छब्दमुपनिषद्वयां संबद्धमित्याशङ्क्याऽऽह—तस्येति। तस्योपनिषदित्युभयत्र तच्छब्देनाधिदैवादिविशिष्टस्यैव परामर्शात्तद्योगित्वादुपनिषदोः स्वरूपमात्रासंबन्धात्तद्वयं व्यवस्थयाऽनुसंधेयम्। न हि सर्वनाम संनिहितं हित्वा व्यवहितं स्पृशतीत्यर्थः। तच्छब्दस्य विशिष्टार्थत्वे फलितमाह—तस्मादिति। विशेषणभेदेऽपि विशेष्याभेदादुपसंहारः स्यादिति शङ्कते—नन्विति। विशेष्याभे-

---

१ ङ. ञ. 'त् ॥२१॥ नैवोभ'। २ क. न चोभ'। ३ ज. स। ४ क. ङ. ज. ञ. ट. 'ताल'। ५ ठ ड. 'वादु'।

(काण्वाग्निरहस्यब्राह्मणबृहदारण्यकस्थशाण्डिल्यविद्याया एकाविधत्वम्, अधि० ११)

द्वयप्रतिपादनात् । सत्यमेवमेतत् । एकस्यापि त्ववस्थाविशेषोपादानेनैवोपनिषद्विशेषोपदेशात्तदवस्थस्यैव सा भवितुमर्हति । अस्ति चायं दृष्टान्तः सत्यप्याचार्यस्वरूपानपाये यदाचार्यस्याऽऽसीनस्यानुवर्तनमुक्तं न तत्तिष्ठतो भवति । यच्च तिष्ठत उक्तं न तदासीनस्येति । ग्रामारण्ययोस्त्वाचार्यस्वरूपानपायात्तत्स्वरूपानुबद्धस्य च धर्मस्य ग्रामारण्यकृतविशेषाभावादुभयत्र तुल्यवद्भाव इत्यदृष्टान्तः सः । तस्माद्व्यवस्थाऽनयोरुपनिषदोः ॥ २१ ॥

दर्शयति च ॥ २२ ॥ (११)

अपि चैवंजातीयकानां धर्माणां व्यवस्थेति लिङ्गदर्शनं भवति "तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम" [छा० १-७-५] इति । कथमस्य लिङ्गत्वमिति तदुच्यते—अक्ष्यादित्यस्थानभेदभिन्नान्धर्मानन्योन्यस्मिन्ननुपसंहार्यान्पश्यन्निहातिदेशेनाऽऽदित्यपुरुषगतान्रूपादीनक्षिपुरुष उपसंहरति " तस्यैतस्य तदेव रूपम् " [छा० १-७-५] इत्यादिना । तस्माद्व्यवतिष्ठते एवैते उपनिषदाविति निर्णयः ॥ २२ ॥ (११)

दमङ्गी करोति—सत्यमिति । तर्हि कथमुपनिषद्व्यवस्थेत्याशङ्क्य विशिष्टभेदात्तन्निष्ठत्वाच्च तयोरित्याह—एकस्येति । उक्तेऽर्थे दृष्टान्तमाह—अस्तीति । प्रतिदृष्टान्तोऽपि दर्शित इत्याशङ्क्याऽऽह—ग्रामेति । तत्र स्वरूपोपाधावुक्तत्वाद्युक्तं तुल्यत्वमिह तु विशिष्टोपाधावुक्तेर्व्यवस्थेत्यर्थः । विशिष्टोपाध्युक्तिफलमाह—तस्मादिति ॥ २१ ॥

उपनिषदोर्व्यवस्थितत्वे हेत्वन्तरमाह—दर्शयति चेति । तदेव व्याकरोति—अपि चेति । यथोक्तं वाक्यं धर्माणां संकरमेव दर्शयतीति शङ्कते—कथमिति । अत्यन्तसंकरे सत्यभेद एवेति नातिदेशस्तेन तद्वशाद्विद्यैक्येऽपि स्वतो नात्यन्तसंकरो धर्माणामित्याह—तदिति । उपनिषदोस्त्वतिदेशाभावाद्व्यवस्थैवेत्युपसंहरति—तस्मादिति ॥ २२ ॥ (११)

आयतनभेदाद्गुणानुपसंहारमुक्त्वा तेनैव हेतुना संभृतिप्रभृतीनां गुणानां विद्यान्तरे-

---

१ ज. ट. °र्यैत्वस्व° । २ ङ. °वास्थिति° । ३ ट. °क्त्वं त° । ४ ज. तन्निरूप्यते । ५ ङ. ञ. °स्थिते । ६ ठ. °त्तस्मिन्निविष्टत्वा° । ७ क. ख. ङ. °न्निविष्टत्वा° । ८ क. तस्य । ९ क. ग° ।

(अहरहर्मिमीत आदित्याक्षिपुरुषैक्यत्वेऽपि स्थानविशेषे तन्नामविशेषस्य युक्तत्वम्, अधि० १२)

संभृतिद्युव्याप्त्यापि चातः ॥ २३ ॥ (१२)

" ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान "

इत्येवं राणायनीयानां खिलेषु वीर्यसंभृतिद्युनिवेशप्रभृतयो ब्रह्मणो विभूतयः पठ्यन्ते । तेषामेव चोपनिषदि शाण्डिल्यविद्याप्रभृतयो ब्रह्मविद्याः पठ्यन्ते । तासु ब्रह्मविद्यासु ता ब्रह्मविभूतय उपसंहियेरन्न वेति विचारणायां ब्रह्मसंबन्धादुपसंहारप्राप्तावेवं पठति—संभृतिद्युव्याप्तिप्रभृतयो विभूतयः शाण्डिल्यविद्याप्रभृतिषु नोपसंहर्तव्याः । अत एव चाऽऽयतनविशेषयोगात् । तथा हि शाण्डिल्यविद्यायां हृदयायतनत्वं ब्रह्मण उक्तम् " एष

ष्वनुपसंहारमाह-संभृतीति । पूर्वन्यायेनैव वाक्यान्तरं व्याख्यातुमुदाहरति-ब्रह्मेति । वीर्या वीर्याणि पराक्रमभेदाः । अन्ये हि पुरुषाः सहायानपेक्ष्य विक्रमान्बिभ्रति तेन तत्पराक्रमाणां तत एव नियतपूर्वत्वरूपकारणत्वेन ज्येष्ठा भवन्ति किं तु तत्सहकारिणोऽपि । ब्रह्मवीर्याणां तु ब्रह्मैव ज्येष्ठं ब्रह्म ज्येष्ठं येषां तानि तथा । ब्रह्म खल्वनन्यापेक्षं जगज्जन्मादि करोति । किंचान्येषां पराक्रमाणानां बलवद्भिर्मध्ये भङ्गः संभवति तेन ते स्ववीर्याणि न बिभ्रति । ब्रह्मवीर्याणि तु ब्रह्मणा संभृतान्यविघ्नेन संभृतानीत्यर्थः । तैर्ज्येष्ठं ब्रह्माग्रे देवादिजन्मतः प्रागेव दिवं स्वर्गमाततान व्याप्तवन्नित्यमेव विश्वव्यापकमित्यर्थः । ब्रह्म भूतानां प्रथमं तु जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं क इत्युत्तरो भागः । खिलेषु विधिनिषेधहीनेषु परिशिष्टोपदेशेषु ग्रन्थेष्विति यावत् । विषयमुक्त्वा संशयं वक्तुं भूमिकां करोति—तेषामिति । ब्रह्मसंबन्धाद्विद्याभेददृष्ट्या च संशयमाह—तास्विति । अत्र च विद्याभेदेन गुणानुपसंहारोक्त्या वाक्यार्थधीहेतोरेव चिन्तनात्पादादिसंगतिः । पूर्वपक्षे विद्याभेदस्य गुणव्यवस्थापकत्वासिद्धिः । सिद्धान्ते तत्सिद्धिरिति मत्वा पूर्वपक्षयति—ब्रह्मेति । न चाऽऽधिदैविकगुणानामाध्यात्मिकविद्यास्वनुपसंहारः । एष हि सर्वेषु लोकेषु भातीत्यादिषु व्यभिचारात् । अनुपसंहारे च पृथगुपासनं तत्फलं च कल्प्यमिति गौरवम् । अतो द्युनिवेशादीनां ब्रह्मसंबन्धेन सर्वत्र प्रत्यभिज्ञानादुपसंहार इत्यर्थः । सिद्धान्तमवतार्य योजयति—एवमिति । संभृतिश्च द्युव्याप्तिश्च संभृतिद्युव्याप्ति तदपि सर्वत्र नोपसंहर्तव्यमुपनिषदोरिव विशेषयोगव्यवस्थानादित्यर्थपरतया सूत्रं व्याख्यातमित्यर्थः । इदानीं चकारस्यावधारणार्थत्वं गृहीत्वा हेतुं विवृणोति—तथा हीति । आयतनभेदयोगमुक्तमुपसंहरति—

---

१ ट. °र इत्येवं प्रा° । २ क. °णां न त ए° । ३ ठ. ड. त ए° । ४ ठ ड. °न्ति । ब्र° । ५ क. ख. ठ. ड. तच्च ज्येष्ठं ।

(अहरहमित्यादित्याक्षिपुरुषैकत्वेऽपि स्थानविशेषे तन्नामविशेषस्य युक्तत्वम्, अधि० १२)

म आत्माऽन्तर्हृदये " [छा० ३-१४-३] इति । तद्वदेव दहरविद्यायामपि " दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः" [छा० ८-१-१] इति । उपकोसलविद्यायां त्वक्ष्यायतनत्वम् " य एषोऽक्षिणि पुरुषो दृश्यते " [छा० ४-१५-१] इति । एवं तत्र तत्र तत्तदाध्यात्मिकमायतनमेतासु विद्यासु प्रतीयते । आधिदैविक्यस्त्वेता विभूतयः संभृतिद्युव्याप्तिप्रभृतयस्तासां कुत एतासु प्राप्तिः । नन्वेतास्वप्याधिदैविक्यो विभूतयः श्रूयन्ते " ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः " [छा० ३-१४-३] "एष उ एव भासनीरेष हि सर्वेषु लोकेषु भाति" [छा० ४-१५-४] "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते " [छा० ८-१-३] इत्येवमाद्याः । सन्ति चान्या आयतनविशेषहीना अपीह ब्रह्मविद्याः षोडशकलाद्याः । सत्यमेवमेतत् । तथाऽप्यत्र विद्यते विशेषः संभृत्याद्यनुपसंहारहेतुः । समानगुणान्नानेन हि प्रत्युपस्थापितासु विप्रकृष्टदेशास्वपि विद्यासु विप्रकृष्टदेशगुणा उपसंहियेरन्निति युक्तम् । संभृत्यादयस्तु शाण्डिल्यादिवाक्यगोचराश्च गुणाः परस्परव्यावृत्तस्वरूपत्वान्न प्रदेशान्तरवर्तिविद्याप्रत्यु-

---

एवमिति । कथं तावता संभृत्यादीनामेतासु विद्यास्वनुपसंहारस्तत्राऽऽह—आधिदैविक्यस्त्विति । आध्यात्मिकविद्यास्वपि संभृत्याद्याधिदैविकगुणानामुपसंहारः स्यादिति लिङ्गेन शङ्कते—नन्विति । ज्यायान्दिव इति शाण्डिल्यविद्यायामेष उ एवेत्याद्युपकोसलविद्यायां यावान्वा अयमाकाश इति दहरविद्यायामिति भेदः । अध्यात्माधिदैवभेदादनुपसंहारश्चेत्तर्हि तद्भेदशून्योपासनासूपसंहारः स्यादित्याह —सन्ति चेति । आध्यात्मिकविद्यास्वाधिदैविकविभूतीनामायतनभेदशून्यब्रह्मधियां चास्मिन्प्रकरणे सत्त्वमङ्गी करोति—सत्यमिति । तर्हि षोडशकलाद्यासु ब्रह्मविद्यासु संभृत्यादिगुणानां किमित्युपसंहारो न स्यादित्याशङ्क्याऽऽह—तथाऽपीति । विशेषहेतुमेव विवृणोति—समानेति । प्रकृतेऽपि विद्याप्रत्यभिज्ञया गुणोपसंहारः स्यादित्याशङ्क्याऽऽह— संभृत्यादयस्त्विति । तद्धर्मविशिष्टब्रह्मणः शाण्डिल्यादिविद्यासु श्रुतमनोमयत्वादिधर्मकब्रह्मणश्च भेदान्न प्रत्यभिज्ञेति नोपसंहार इत्यर्थः । विशिष्टभेदेऽपि स्वरूपाभेदात्प्रत्यभिज्ञे-

---

१ ङ. ञ. ट. °न्तर आका° । २ क. ङ. ञ. ट. °कोशल° । ३ ङ. ञ. ट. भूतेषु । ४ ङ. अपि हि ब्र° । ञ. ट. अपि ब्र° । ५ ङ. ञ. ट. °मेवैत° । ६ ठ. ड. °भृतीत्या° । ७ क. ञ. °स ८ ञ. °हेतुं वि° । ९ ञ. °भिज्ञोप° ।

(विद्यैकत्वाभावात्संभृत्यादिगुणानां शाण्डिल्यविद्यादिष्वनुपसंहार्यत्वम्, अधि० १३)

पस्थापनक्षमाः। न च ब्रह्मसंबन्धमात्रेण प्रदेशान्तरवर्तिविद्या-प्रत्युपस्थापनमित्युच्यते विद्याभेदेऽपि तदुपपत्तेः। एकमपि हि ब्रह्म विभूतिभेदैरनेकधोपास्यत इति स्थितिः। परोवरीयस्त्वादिवद्भेददर्शनात् [सू० ३-३-७]। तस्माद्वीर्यसंभृत्यादीनां शाण्डिल्यविद्यादिष्वनुपसंहार इति ॥ २३ ॥ (१२)

(विद्यैकत्वाभावात्संभृत्यादिगुणानां शाण्डिल्यविद्यादिष्वनुपसंहार्यत्वम्, अधि० १३)

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥ (१३)

अस्ति ताण्डिनां पैङ्गिनां च रहस्यब्राह्मणे पुरुषविद्या। तत्र पुरुषो यज्ञः कल्पितः। तदीयमायुस्त्रेधा विभज्य सवनत्रयं कल्पितम्। अशिशिषादीनि च दीक्षादिभावेन कल्पितानि। अन्ये च

योपसंहारसिद्धिमाशङ्क्याऽऽह—न चेति। कतिपयगुणविशिष्टतयोभयत्राऽऽम्नानं विना स्वरूपमात्रस्यैव प्रत्यभिज्ञानस्य ज्ञानाभेदकत्वे स्यादतिप्रसक्तिरित्यर्थः। तामेव व्यनक्ति—एकमपीति। एकस्यानेकगुणवत्त्वेनानेकधोपास्यत्वे दृष्टान्तमाह—परेति। यथोद्वीर्थस्यैकस्यैव परोवरीयस्त्वादिगुणवत्त्वेन हिरण्यश्मश्रुत्वादिगुणवत्त्वेन च बहुधोपासनं दृष्टं तथा ब्रह्मणोऽपि तत्तद्गुणकत्वेनानेकधोपासनाद्ब्रह्मसंबन्धमात्रेण प्रत्यभिज्ञाने स्यादतिप्रसक्तिरित्यर्थः। संभृत्यादीनां मनोमयत्वादीनां च विद्याप्रत्यभिज्ञापकत्वायोगे फलितमाह—तस्मादिति ॥ २३ ॥ (१२)

तत्तद्देशभेदसंभिन्नविद्यासु गुणानुपसंहारोक्तिप्रसङ्गात्कालभेदवद्विद्यायां गुणानुपसंहारमाह—पुरुषेति। विषयमाह—अस्तीति। पुरुषो वाव यज्ञ इति सामानाधिकरण्यश्रुतेरर्थमाह—तत्रेति। छान्दोग्यशाखाभेदः सप्तम्यर्थः। तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनमथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यंदिनं सवनमथ यान्यष्टाचत्वारिंशद्वर्षाणि तत्तृतीयं सवनमिति प्रसिद्धयज्ञसाम्यार्थं सवनत्रयं कल्पितमित्याह—तदीयमिति। स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षा अथ यद्धसति यज्ञक्षति तत्स्तुतशस्त्रैः शब्दवत्त्वसाम्यादित्याह—अशिशिषेति। तं चेदेतस्मिन्वयसि किंचिद्व्याध्याद्युपतपेत्स ब्रूयात्प्राणा वै वसव इदं मे प्रातःसवनं माध्यंदिनं सवनमनुसंतनुतेत्यादिराशीः सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति मन्त्रप्रयोगस्तदाह—अन्ये चेति। संशयार्थं शाखान्तरीयपुरुषविद्यामुदा-

---

१ ज. झ. °स्थान°। २ ज. °स्थान°। ३ ङ. ज. ञ. ट. °नमुच्य°। ४ ङ. ञ. ट. °पि ब्र°। ५ ङ. ञ. °नेकैरनेक°। ज. °नेकैरुपा°। ६ क. °करूपगु°। ७ ख. °त्वेन चानें°। ८ ठ. ड. °भेदे सं°। ९ ठ. ड. °तीयस°। १० ख. ठ. ड. °ते साऽस्य। ११ ख. ठ. ड. °क्षा। अं°। १२ क. °ति यन्मैथुनं चरति तं°। १३ ख. °शस्त्रे श°। १४ ठ. ड. स। १५ क. ठ. ड. वाव।

(विद्यैकत्वाभावात्संभृत्यादिगुणानां शाण्डिल्यविद्यादिष्वनुपसंहार्यत्वम्, अधि० ११)

धर्मास्तत्र समधिगता आशीर्मन्त्रप्रयोगादयः।[छा० ३-१६-१७] तैत्तिरीयका अपि कंचित्पुरुषयज्ञं कल्पयन्ति "तस्यैवं विदुषो यज्ञस्याऽऽत्मा यजमानः श्रद्धा पत्नी"[तै० आर० १०-६४] इत्येतेनानुवाकेन। तत्र संशयः—किमितरत्रोक्ताः पुरुषयज्ञस्य धर्मास्तैत्तिरीयकेषूपसंहर्तव्याः किं वा नोपसंहर्तव्या इति। पुरुषयज्ञत्वाविशेषादुसंहारप्राप्तावाचक्ष्महे नोपसंहर्तव्या इति। कस्मात्। तद्रूपप्रत्यभिज्ञानाभावात्। तदाहाऽऽचार्यः—"पुरुषविद्यायामिव" इति। यथैकेषां शाखिनां ताण्डिनां पैङ्गिनां च पुरुषविद्यायामाम्नानं नैवमितरेषां तैत्तिरीयाणामाम्नानमस्ति। तेषां हीतरविलक्षणमेव यज्ञसंपादनं दृश्यते पत्नीयजमानवेदिवेदबर्हिर्यूपाज्यपश्वृत्विगाद्यनुक्रमणात्। यदपि सवनसंपादनं तदपीतरविलक्षणमेव "यत्प्रातर्मध्यंदिनं सायं च तानि सवनानि" [तै० आर० १०-६४] इति।

हरति—तैत्तिरीयका इति। तद्वतयोर्विदुषो यज्ञस्येति षष्ठ्योः सामानाधिकरण्यवैयधिकरण्यानिश्चयात्पुरुषविद्यामधिकृत्य संशयमाह—तत्रेति। इतरत्रेति च्छान्दोग्यभेदोक्तिः। अत्र च भेदानुपसंहारोक्त्या वाक्यार्थधीहेतुचिन्तनात्पादादिसंगतिः। पूर्वपक्षे विद्याभेदादुपसंहारः सिद्धान्ते तद्भेदादनुपसंहार इत्यभिप्रेत्योभयत्रापि मरणावभृथविशिष्टसांपांदिकपुरुषयज्ञत्वलक्षणरूपैक्याद्विद्यैक्यं गुणोपसंहारश्चेति पूर्वपक्षयति—पुरुषेति। निषादस्थपतिन्यायेन विदुषो यज्ञस्येति सामानाधिकरण्यात्पुरुषयज्ञस्योभयत्राविशेषादभेदोपसंहारावित्यर्थः। सिद्धान्तयति—आचक्ष्महे इति। पूर्वोक्तायतनविशेषयोगाभावादुपसंहारसिद्धिरिति शङ्कते—कस्मादिति। विद्यैक्यसाधकवेद्यैक्याभावात्तद्भेदे नोपसंहार इत्याह—तदिति। उक्तेऽर्थे सूत्रं पातयति—तदाहेति। तदक्षराणि व्याचष्टे—यथेति। अतो विद्याभेदादनुपसंहार इति शेषः। यत्तु रूपैक्याद्विद्यैक्यं गुणोपसंहारश्चेति तत्राऽऽह—तेषां हीति। तत्र हेतुमाह—पत्नीति। "आत्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीत्" इत्यादिबहुतरवैलक्षण्यान्न तद्रूपैक्यामेत्यर्थः। वैलक्षण्यान्तरमाह—यदपीति। छान्दोग्ये हि पुरुषस्याऽऽयुस्त्रेधा विभज्य सवनत्रयमुक्तम्। तैत्तिरीये तु सायं

---

१ ङ. ञ. °ताश्चाऽऽशी°। २ झ. °ज्ञाभा°। ३ क. ज. झ. ञ. ट. °यत्सायं प्रातं°। ४ क. ज. झ. ञ. ट. °नं च। ५ झ. °षोर्यज्ञ। ६ क. ख. °त्र मे°। ७ ठ. ड. °पातिकं°। ८ क. °गीयके तु।

(विद्यैकत्वाभावात्संभृत्यादिगुणानां शाण्डिल्यविद्यादिष्वनुपसंहार्यत्वम्, अधि० ११)

यदपि किंचिन्मरणावभृथत्वादिसामान्यं [तै० आर० १०-६४] तदप्यल्पीयस्त्वाद्भूयसा वैलक्षण्येनाभिभूयमानं न प्रत्यभिज्ञापनक्षमम्। [छा० ३-१७-५] न च तैत्तिरीयके पुरुषस्य यज्ञत्वं श्रूयते। " विदुषो यज्ञस्य " [तै० आर० १०-६४] इति हि न चैते समानाधिकरणे षष्ठ्यौ विद्वानेव यो यज्ञस्तस्येति। न हि पुरुषस्य मुख्यं यज्ञत्वमस्ति। व्यधिकरणे त्वेते षष्ठ्यौ विदुषो यो यज्ञस्तस्येति। भवति हि पुरुषस्य मुख्यो यज्ञसंबन्धः। सत्यां च गतौ मुख्य एवार्थ आश्रयितव्यो न भाक्तः। " आत्मा यजमानः " इति च यजमानत्वं पुरुषस्य निर्ब्रुवन्नैवयधिकरण्येनैवास्य यज्ञसंबन्धं दर्शयति। अपि च " तस्यैवंविदुषः " इति सिद्धवदनुवादश्रुतौ सत्यां पुरुषस्य यज्ञभावमात्मादीनां च यजमानादिभावं प्रतिपित्समानस्य

प्रातर्मध्यंदिनमिति सवनसंपादनमितरविलक्षणं लक्ष्यते तेन विद्याभेद इत्यर्थः। " मरणमेवावभृथः " इति च्छान्दोग्ये। " यन्मरणं तदवभृथः " इति तैत्तिरीये। " यद्गमते तदुपसदः " इति चोभयत्रापि तुल्यम्। अतो रूपैक्याद्विद्यैक्यमिति चोद्यमनुवदति— यदपीति। बहुतरवैलक्षण्ये सति किंचिन्मात्रसालक्षण्यान्न विद्यैक्यमतिप्रसङ्गादित्याह— तदपीति। यत्तु पुरुषयज्ञत्वाविशेषादिति तत्राऽऽह—न चेति। निषादस्थपतिन्यायेन षष्ठ्योः सामानाधिकरण्यात्पुरुषस्य यज्ञत्वमुक्तमित्याशङ्क्याऽऽह—विदुष इति। सामानाधिकरण्याभावे हेतुमाह—न हीति। अर्थानुपपत्त्यभावे न्यायोऽवतरतीति। प्रकृते चैं पुरुषस्य कर्तृत्वाद्यज्ञस्य क्रियात्वादचैतन्याच्च पुरुषैक्ययोगान्न्यायाप्रवृत्तिरित्यर्थः। कथं तर्हि षष्ठ्योरन्वयस्तत्राऽऽह—व्यधिकरणे त्विति। अर्थानुपपत्तिस्तत्रापि तुल्येत्याशङ्क्याऽऽह—भवतीति। अन्यत्र तथाभावेऽपि प्रकृते पुरुषस्य यज्ञत्वमेवेत्याशङ्क्योक्तम्—सत्यां चेति। यज्ञस्य ज्ञानैवद्योगित्वं मानान्तरसिद्धमपूर्वसंबन्धकल्पनया न त्याज्यं तदनुवादेन विद्याप्रशंसनार्थं पत्न्यादिसंपादनसंभवादित्यर्थः। यजमानतया पुरुषस्य यज्ञसंबन्धितावचनादापि न यज्ञात्मतेत्याह—आत्मेति। इतोऽपि तैत्तिरीयकेषु पुरुषयज्ञत्वं नेष्टमित्याह—अपि चेति। यथा प्रमितेऽर्थे प्रवृत्तं प्रमाणमनुवादकं तथा यज्ञस्य प्रमाणान्तरसिद्धविद्वद्योगितानुवादेन विशेषणविधिश्रुतौ प्रमितविशेषणानामनूदितविशेष्यगामित्वेनैकवाक्यत्वसंभवे विशेष्यस्य विशेषणानां च पृथक्प्रतिपादनेन वाक्यभेदः स्यादित्यर्थः। इतश्चोभयत्र भिन्ना पुरुषविद्ये-

---

१ क. °ज्ञापने क्ष° । ज. °ज्ञाने क्ष° । ट. °ज्ञान° । २ ज. ट. ति न । ३ ट. मुख्यार्थ । ४ क. ख. ठ. ड. तु । ५ क. ख. झ. °नयोगि° । ६ ठ. ड. °के पु° ।

(तैत्तिरीयकताण्डिनोः पुरुषविद्यायाः पृथक्त्वम्, अधि० १४)

वाक्यभेदः स्यात्। अपि च ससंन्यासामात्मविद्यां पुरस्तादुपदिश्यानन्तरं तस्यैवंविदुष इत्याद्यनुक्रमणं पश्यन्तः पूर्वशेष एवैष आम्नायो न स्वतन्त्र इति प्रतीमः। तथा चैकमेव फलमुभयोरप्यनुवाक्योरुपलभामहे " ब्रह्मणो महिमानमाप्नोति " [तै० आ० १०-६३-६४] इति। इतरेषां त्वनन्यशेषः पुरुषविद्याम्नायः। आयुरभिवृद्धिफलो ह्यसौ " एष ह षोडशं वर्षशतं जीवति य एवं वेद " [छा० ३-१६-७] इति समभिव्याहारात्। तस्माच्छाखान्तराधीतानां पुरुषविद्याधर्माणामाशीर्मन्त्रादीनामप्राप्तिस्तैत्तिरीयके ॥ २४ ॥ (१३)

(तैत्तिरीयकताण्डिनोः पुरुषविद्यायाः पृथक्त्वम्, अधि० १४)

वेधाद्यर्थभेदात् ॥ २५ ॥ (१४)

अस्त्याथर्वणिकानामुपनिषदारम्भे मन्त्रसमाम्नायः " सर्वे

त्याह—अपि चेति। संन्यासेनाङ्गेन सहितामङ्गितया स्थितामात्मविद्यां पुरस्तात्प्राजापत्यो हाऽऽरुणिरित्यादावनुवाके न्यास इति ब्रह्मेत्यादिनोक्त्वा तस्यैवंविदुष इति पूर्वोक्तपरामर्शात्तच्छेषत्वमस्य भातीत्याह—ससंन्यासामिति। इतश्च पूर्वशेषोऽयमाम्नायो न स्वतन्त्र इत्याह—तथा चेति। तैत्तिरीयाणां पुरुषविद्याम्नायस्य पारतन्त्र्यमुक्त्वा पैङ्गिनां ताण्डिनां च तदाम्नायस्य स्वातन्त्र्यमाह—इतरेषां त्विति। तत्र हेतुमाह—आयुरिति। षोडशाधिकं वर्षशतं प्रकर्षेण व्याध्याद्यनुपद्रुतो जीवत्युक्तप्रकारेणाऽऽत्मानं यज्ञाद्यात्मकं विद्वानिति विद्यया सहाऽऽयुरभिवृद्धिफलस्य संकीर्तनात्तत्फलत्वेन स्वातन्त्र्यं पुरुषविद्यायाः सिद्धमित्यर्थः। स्वतन्त्रपरतन्त्रयोरैक्यायोगे फलितमाह—तस्मादिति ॥ २४ ॥ (१३)

पूर्वत्राऽऽत्मविद्यासंनिधौ श्रवणात्तैत्तिरीयगतपुरुषयज्ञो ज्ञानाङ्गमित्यङ्गीकृत्याऽऽयुरभिवृद्धिफलविद्यातो भेदोऽस्य दर्शितः। संप्रति प्रवर्ग्यादीनामपि विद्यासंनिध्यविशेषात्तदङ्गत्वमित्याशङ्क्यान्यत्रानुपसंहारार्थं तेषामङ्गत्वं निरस्यति—वेधादीति। तत्तदुपनिषदारम्भे ते ते मन्त्रास्तानि तानि च कर्माणि श्रुतानि विषय इति वक्तुमारभते—अस्तीति। अभिचारदेवतामभिचारकर्ता प्रार्थयते—सर्वमिति। हे देवते मद्रिपोः सर्वमङ्गं प्रविध्य विदारय। विशेषतश्च हृदयं प्रविध्य भिन्धि। धमनीः शिराः प्रवृज्य विभञ्ज त्रोटय। तदीयं शिरश्चाभितो विदारय। एवं मद्रिपुर्बहुधा विपृक्तो विश्लिष्टो भवत्वित्यर्थः। विश्वप्रकाशकत्वात्तत्प्रसवहेतुत्वाच्च देव सवितरित्यादित्यः संबोध्यते। स च यज्ञस्य यज्ञपतेश्च यजमानस्य निर्वर्तने नियुज्यते प्रसुवेति।

---

१ झ. एवाऽऽम्ना° । २ ज. ट. °षां चान° । ३ क. घ. ङ. ज. ट स । ४ ङ. ज. म. °ाम° । ५ ट. °आणाम° । ६ क. ख. झ. प्रवृञ्ज । ठ. ड. प्रवृज । ७ क. झ. विभञ्ज ।

(तैत्तिरीयकताण्डिनोः पुरुषविद्यायाः पृथक्त्वम् , अधि० १४)

प्रविध्य हृदयं प्रविध्य धमनीः प्रवृज्य[1] शिरोऽभिप्रवृज्य[2] त्रिधा विपृक्तः " इत्यादिः । ताण्डिनाम् "देव सवितः प्रसुव यज्ञम्" [छा० ब्रा० १-१] इत्यादिः । शाट्यायनिनाम्[3] " श्वेताश्वो हरितनीलोऽसि " इत्यादिः । कठानां तैत्तिरीयाणां[4] च " शं नो मित्रः शं वरुणः " [तै० १-१-१] इत्यादिः । वाजसनेयिनां[5] तूपनिषदारम्भे प्रवर्ग्यब्राह्मणं पठ्यते—"देवा ह वै सत्रं निषेदुः " [शत० १४-१-१-१ इत्यादिः । कौषीतकिनामप्यग्निष्टोमब्राह्मणम् " ब्रह्म वा अग्निष्टोमो ब्रह्मैव[6] तदहर्ब्रह्मणैव ते ब्रह्मोपर्यन्ति तेऽमृतत्वमाप्नुवन्ति य एतदहरुपयन्ति " इति । किमिमे सर्वे प्रविध्यादयो[7] मन्त्राः प्रवर्ग्यादीनि च कर्माणि विद्यासूपसंहियेरन्किं वा नोपसंहियेरन्निति मीमांसामहे । किं तावन्नः प्रतिभाति । उपसंहार एवैषां[8] विद्यास्विति । कुतः । विद्याप्रधानानामुपनिषद्ग्रन्थानां समीपे पाठात् । नन्वेषां विद्यार्थतया

उच्चैःश्रवाः श्वेतोऽश्वो यस्य तव स त्वं श्वेताश्वोऽसि हरित इन्द्रनीलस्तद्वन्नीलोऽसीतीन्द्रः संबोध्यते । मित्रो नामाऽऽदित्यो नोऽस्माकं सुखकरो भूयादिति विद्यार्थी प्रार्थयते । एवं शं वरुण इत्यादि योज्यम् । इन्द्रादयो देवाः किल कस्मिंश्चित्पूर्वस्मिन्काले सत्रं निर्वर्तयितुं निविष्टवन्त इत्युपक्रम्य प्रवर्ग्याख्यं कर्म श्रुतमित्याह—देवा इति । अग्निष्टोमब्राह्मणमुपनिषदारम्भे पठ्यत इति संबन्धः । अग्निष्टोमो ब्रह्मैव स यस्मिन्नहनि क्रियते तदपि ब्रह्मातश्चैतदहरहर्निर्वर्त्य कर्म ये केचिदुपयन्त्यनुतिष्ठन्ति ते ब्रह्मणैव साधनेन ब्रह्मापरमुपगच्छन्ति ते चामृतत्वं परं ब्रह्म क्रमेण प्राप्नुवन्तीत्यर्थः । विषयमुक्त्वोपकारभावाभावमानाभ्यां संशयमाह—किमित्यादिना । अत्र च विद्यासंनिध्यान्नातानामपि मन्त्रादीनां तदुपकारैकत्वाभावेनातच्छेषतया नान्यत्रोपसंहार्यतेत्युक्तिद्वारा विचारस्य ज्ञानहेतुयोगात्पादादिसंगतिः । पूर्वपक्षे मन्त्रादीनां विद्योपाधावुपसंहारः । सिद्धान्ते त्वनुपसंहार इत्यभिप्रेत्य विमृश्य पूर्वपक्षयति—किमिति । विनियोजकमानाभावे कथं विद्याशेषतेति शङ्कते—कुत इति । फलवत्संनिधावफलं तदङ्गमितिन्यायात्फलवद्विद्यासंनिध्यान्नातानां तदङ्गतेत्याह—विद्येति । श्रुत्यादीनां विनियोजकानामन्यतमस्याप्यनुपलम्भादारभ्य कांचन विद्यामनान्नानादाम्नाताङ्गैरेव पूर्णाया नैराकाङ्क्ष्यान्नैषां विद्याशेषतेति शङ्कते—नन्विति । विद्याया नैराकाङ्क्ष्येऽपि

---

१ ज. झ. ट. प्रवृज्य । २ क. °वृज्यथ त्रिं° । ३ ङ. ञ. °दिः । स ता । ४ ङ. ट. शाट्यायं° । ५ ज. झ. ट. °यनानां । ६ ङ. ञ. °रीयकाणां । ७ ज. ब्रह्म वैत° । ८ ट. °ह्मैत° । ९ ट. °यन्त्यमृ° । १० ङ. ञ. °विध्येत्याद° । ११ क. ज. एषां । १२ क. झ. °ण व्याप्तुं । १३ झ. °कभा° । १४ झ. °योपधा° ।

(तैत्तिरीयकताण्डिनोः पुरुषविद्यायाः पृथक्त्वम्, अधि० १४)

विधानं नोपलभामहे । बाढम् ।अनुपलभमाना अपि त्वनुमास्यामहे संनिधिसामर्थ्यात् । न हि संनिधेरर्थवत्त्वे संभवत्यकस्मादसावनाश्रयितुं युक्तः । ननु नैषां मन्त्राणां विद्याविषयं किंचित्सामर्थ्यं पश्यामः । कथं च प्रवर्ग्यादीनि कर्माण्यन्यार्थत्वेनैव विनियुक्तानि सन्ति विद्यार्थत्वेनापि प्रतिपद्येमहीति । नैष दोषः। सामर्थ्यं तावन्मन्त्राणां विद्याविषयमपि किंचिच्छक्यं कल्पयितुं हृदयादिसंकीर्तनात् । हृदयादीनि हि प्रायेणोपासनेष्वायतनादिभावेनोपदिष्टानि तद्द्वारेण च "हृदयं प्रविध्य" इत्येवंजातीयकानां मन्त्राणामुपपन्नमुपासनाङ्गत्वम् । दृष्टश्चोपासनेष्वपि मन्त्रविनियोगः " भूः प्रपद्येऽमुनाऽमुनाऽमुना" [छा० ३-१५-३] इत्ये-

---

मन्त्रादीनां फलवत्त्वाय फलवन्नियोगसाकाङ्क्षत्वात्फलवद्विद्यासंनिहितानां तच्छेषतया फलवत्त्वे फलान्तरकल्पनायोगादेकतराकाङ्क्षायां विद्याकाङ्क्षामापाद्य प्रकरणाद्याक्षेपेण तच्छेषतेत्याह—बाढमिति । संनिधेर्धर्मसाम्येऽपि संभवान्न विद्याशेषतेत्याशङ्क्याऽऽह—न हीति । अकस्मात्फलं विनेति यावत् । अनुष्ठेयप्रकाशित्वान्मन्त्राणां विद्याशेषमर्थमप्रकाशयतां न तच्छेशषतेति शङ्कते—नन्विति । कर्मणां विद्याशेषत्वं संनिधेरुक्तं प्रत्याह—कथं चेति । पुरस्तादुपसदां प्रवर्ग्येण प्रचरन्तीतिवाक्येन प्रवर्ग्यस्य क्रतुशेषत्वसिद्धेर्न संनिधेर्विद्याशेषत्वं तस्य वाक्याद्दौर्बल्यादग्निष्टोमादेश्च ज्योतिष्टोमादिवाक्येन स्वर्गादिफलत्वज्ञानान्न विद्याशेषतेत्यर्थः । मन्त्राणां कर्मणां च विद्याशेषत्वाभावं दूषयति—नेति । तत्र मन्त्राणां विद्यासमवेतार्थप्रकाशनेन तच्छेषत्वं साधयति—सामर्थ्यमिति । हृदयादीत्यादिपदेन नाडीनामादित्यादेश्च संग्रहः । तथाऽपि कथं मन्त्राणां विद्यादिविषयं सामर्थ्यं तत्राऽऽह—हृदयेति । तदसंबद्धान्यपि सन्ति कानिचिदुपासनानीति प्रायेणेत्युक्तम् । हृदयादिपदस्य विद्यासमवेतार्थत्वेऽपि कथमितरेषां मन्त्रपदानां विद्याशेषतेत्याशङ्क्य हृदयादिपदानुसारेण तदेकवाक्यतया पदान्तराणामपि यथाकथंचिदुपास्त्यर्थतेत्याह—तदिति । उपास्तिषु मन्त्रविनियोगस्यादृष्टेरश्लिष्टा कल्पनेत्याशङ्क्याऽऽह—दृष्टश्चेति । पुत्रस्य दीर्घायुष्ट्वार्थं छान्दोग्ये त्रैलोक्यं कोशत्वेन परिकल्प्योपास्तिरुक्ता । तत्र पितुरयं प्रार्थनामन्त्रो भूरित्यादि । अमुनेति पुत्रस्य त्रिनाम गृह्णात्यमुना देवदत्तनाम्ना सह भूरितीमं लोकं प्रपद्य

---

१ ज. °षये किं°। २ ट. °महि । नैं°। ३ क. ज. °रेणैव ह्°। ४ ट. °ण ह्°। ५ ज. ट. °त्रप्रयो°। ६ ज. ट. °मुना"इ°। ७ क. ख. ठ. ड. °वद्योग°। ८ ठ. °काशत्वा°। ९ ठ. ड. °ण च°। १० क. ख. °प्तां सा°। ११ च. कथमितरेषां म°। १२ क. ख. ठ. ड. °द्यावि°। १३ ड. य°। १४ क. ख.° बन्धान्य°।

वमादिः । तथा प्रवर्ग्यादीनां कर्मणामन्यत्रापि विनियुक्तानां सतामविरुद्धो विद्यासु विनियोगो वाजपेय इव बृहस्पतिसवस्येति । [आश्व० श्रौ० ९-९-१८-१९]

एवं प्राप्ते ब्रूमः—नैषामुपसंहारो विद्यास्विति । कस्मात् । " वेद्याद्यर्थभेदात् " " हृदयं प्रविध्य " इत्येवं-

---

इत्यर्थः । यत्तु प्रवर्ग्यादीनामन्यत्र विनियोगान्न विद्याशेषतेति तत्राऽऽह—तथेति । यद्यपि पुरस्तादुपसदामित्यादिवाक्यं प्रवर्ग्यादीनामन्यशेषत्ववादिविद्याशेषत्वसाधकसंनिधेर्बलीयस्तथाऽप्यविरोधान्न वाक्येन बाध्यः संनिधिर्वाक्येनान्यत्र विनियुक्तस्यापि प्रवर्ग्यादेः संनिधिना विद्यास्वपि विनियोगादित्यर्थः । तत्र दृष्टान्तमाह—**वाजपेय इति** । ब्रह्मवर्चसकामो बृहस्पतिसवेन यजेतेति ब्रह्मवर्चसफलोऽपि बृहस्पतिसवो वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयाङ्गत्वेन विधीयते क्त्वाप्रत्ययादेककर्तृकतासिद्धेरेकप्रयोगतामन्तरेण तदयोगादेकप्रयोगतायां गुणप्रधानभावापेक्षत्वाद्वाजपेयप्रकरणान्नानात्तस्याङ्गित्वं बृहस्पतिसवस्याङ्गत्वम् । नन्वेवं मीमांसकानां मुद्राभेदः कृतो यदि बृहस्पतिसववाक्यं प्रकरणान्तरस्थबृहस्पतिसवविपरिवृत्त्यर्थं कस्तार्हि वाजपेयाङ्गविधिः । अथैष विधिः कथं तार्हि प्रकरणान्तरस्थबृहस्पतिसवस्येह संनिधिः । न चैकमेव वाक्यं दूरस्थं कर्म संनिधापयत्यङ्गत्वेन च विदधाति । तस्मात्प्रकरणान्तरे कौण्डपायिनवत्कर्मान्तरं बृहस्पतिसवस्तन्नाम तु प्रसिद्धबृहस्पतिसवधर्मातिदेशार्थम् । तथा च कर्मान्तरमेव वाजपेयाङ्गत्वेन विधीयत इति मतद्वयेऽपि स्थिते कथं विनियुक्तविनियोगाशङ्केति सत्यमभ्युपेत्य वादोऽयं खादिरत्वादि चात्र व्यवस्थितमुदाहरणम् । न च साधिकारयोरपि कर्मणोरङ्गाङ्गित्वे दर्शपूर्णमासाविष्ट्वा सोमेन यजेतेत्यत्रापि स्याद्दर्शपूर्णमासयोः सोमस्य वा प्रकरणे तद्वचनानान्नानात्तयोरगृह्यमाणविशेषतया गुणप्रधानत्वासिद्धेर्भिन्नप्रयोगत्वेऽपि क्रिययोः कर्तृत्वाधिष्ठानपुरुषस्यैक्यात्प्रत्ययसिद्धेरङ्गाङ्गित्वप्रमापकाभावे चाधिष्ठानलक्षणाविरोधाद्दर्शपूर्णमासोत्तरकालता सोमानुष्ठानस्येति कालार्थोऽयं संयोगः । प्रकृते तु प्रकरणाध्ययनसिद्धये प्रत्ययैप्रमितमङ्गाङ्गित्वमतो बृहस्पतिसवस्यान्यत्र विनियुक्तस्यैव वाजपेये क्त्वाप्रत्ययेन विनियोगवत्प्रवर्ग्यादीनामपि विनियुक्तानामेवान्यत्र संनिधिना विद्यास्वपि विनियोग इति भावः ।

पूर्वपक्षमनूद्य सूत्राद्बहिरेवानुपसंहारं प्रतिजानीते—**एवमिति** । मन्त्राणां कर्मणां च संनिधेरुपसंहारो विद्यासूक्तः स कस्मान्निषिध्यत इत्याह—**कस्मादिति** । तत्र हेतुत्वेन सूत्रमवतारयति—**वेधादीति** । आथर्वणिकानां मन्त्राम्नायस्य विद्याशेषत्वाभावपरत्वेनाक्षराणि योजयति—**हृदयमिति** । भिन्नशब्दस्यार्थमाह—

---

१ ङ. 'योगयोगा' । २ ठ. ड. 'रुषैक्या । ३ ठ. संप्रयो' । ४ ठ. ड. 'वमि' ।

(तैत्तिरीयकताण्डिनोः पुरुषविद्यायाः पृथक्त्वम् , अधि० १४)

जातीयकानां हि मन्त्राणां येऽर्था हृदयवेधादयो भिन्ना अनभिसंबद्धास्त उपनिषदुदिताभिर्विद्याभिः । न तेषां ताभिः संगन्तुं सामर्थ्यमस्ति । ननु हृदयस्योपासनेष्वप्युपयोगात्तद्द्वारक उपासनासंबन्ध उपन्यस्तः । नेत्युच्यते । हृदयमात्रसंकीर्तनेनैवमुपयोगः कथंचिदुत्प्रेक्ष्येत न च हृदयमात्रमत्र मन्त्रार्थः । "हृदयं प्रविध्य धमनीः प्रमृज्य" इत्येवंजातीयको हि न सकलो मन्त्रार्थो विद्याभिरभिसंबध्यते । अभिचारविषयो ह्येषोऽर्थस्तस्मादाभिचारिकेण कर्मणा " सर्वं प्रविध्य " इत्येतस्य मन्त्रस्याभिसंबन्धः । तथा " देव सवितः प्रसुव यज्ञम् " [छा० ब्रा० १·१] इत्यस्य यज्ञप्रसवलिङ्गत्वाद्यज्ञेन कर्मणा संबन्धः । तद्विशेषसंबन्धस्तु प्रमाणान्तरादनुसर्तव्यः ।

एवमन्येषामपि मन्त्राणां केषांचिल्लिङ्गेन केषांचिद्वचनेन केषां-

---

अनभिसंबद्धा इति । अनभिसंबन्धमेवाभिव्यनक्ति—नेति । हृदयपदस्योपास्तिसंबन्धार्थत्वात्तद्द्वारा मन्त्रस्य तच्छेषतेत्युक्तं स्मारयति—नन्विति । मन्त्रस्योपास्तिशेषत्वं प्रत्याह—नेतीति । पदान्तरसमभिव्याहृतस्य तस्यापि नोपास्त्युपयोगो वस्तुतोऽस्तीति मत्वा कथंचिदित्युक्तम् । हृदयस्य विद्योपयोगे मन्त्रार्थस्य तद्भावान्मन्त्रस्य विद्याशेषतेत्याशङ्क्याऽऽह—न चेति । अत्रेत्याथर्वणश्रुत्युक्तिः । हृदयातिरिक्तस्यापि मन्त्रार्थस्य विद्यायोगः स्यादित्याशङ्क्य साक्षात्परम्परया वेति विकल्प्याऽऽद्यं दूषयति—हृदयमिति । तद्द्वाराऽन्येषामपि विद्यायोगः स्यादिति द्वितीयमाशङ्क्याऽऽह—अभिचारेति । सर्वैरेव पदैरयं मन्त्रः स्वतोऽभिचारगतार्थप्रकाशको दृश्यते । तथा च सामर्थ्यलक्षणं लिङ्गं संनिधिं बाधित्वा कर्मशेषत्वमस्याऽऽपादयति । न च सर्वपदानामभिचारे समवेतार्थत्वे सत्येकपदसमवेतार्थत्वमात्रेण विद्याशेषत्वं हृदयपदस्याभिचारेऽपि समवेतार्थत्वादित्यर्थः । आथर्वणिकानामुपनिषदुपक्रमस्य लिङ्गवशात्कर्मसंबन्धवत्ताण्डिनामपि तदुपक्रमस्य लिङ्गादेव कर्मसंगतिरित्याह—तथेति । कर्ममात्रप्रयोगेऽपि केन कर्मणाऽस्य संगतिरिति लिङ्गान्न गम्यते तेन प्रमाणान्तरमन्वेष्यमित्याशङ्क्याऽऽह—तदिति । सावित्रं जुहोति कर्मणः कर्मणः पुरस्तात्सवने सवने जुहोतीति वाक्याद्वाजपेयसंबन्धोऽस्य सिध्यतीत्यर्थः ।

उक्तन्यायं मन्त्रान्तरेष्वतिदिशति—एवमिति । अन्येषां तु श्वेताश्वो हारितनी-

---

१ ज्ञ. 'यभेदाद' । २ क. ज. 'नेषूप' । ३ ज्ञ. 'त्तत्द्वा' । ४ ङ. ञ. 'सनसं' । ५ ङ. ञ. ट. 'नस्यैव' । ६ ज. प्रविध्येत्ये' । ७ ङ. ज. ञ. 'चारिकवि' । ८ क. ङ. ञ. ट. 'इत्यस्य । ९ क. ङ. ञ. 'णाऽभिसं' । १० ठ. 'चारस' । ११ ठ. ड. 'ति वाज' । १२ क. ख. उक्तं न्या' । १३ ट. ड. 'षां श्वे' ।

चित्प्रमाणान्तरेणेत्येवमर्थान्तरेषु विनियुक्तानां रहस्यपठितानामपि सतां न संनिधिमात्रेण विद्याशेषत्वोपपत्तिः । दुर्बलो हि संनिधिः श्रुत्यादिभ्य इत्युक्तं प्रथमे तन्त्रे " श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् "

लोऽसीत्यादीनां वचनं श्रुतिर्वाक्यं वा प्रमाणान्तरं प्रकरणं तेन कर्मसंबन्धोऽत्र सर्वत्रानुसर्तव्य इति संबन्धः । लिङ्गादिभिरन्यत्र विनियोगे मन्त्राणां सिद्धे फलितमाह— **इत्येवमिति** । किमिति लिङ्गादिभिः संनिधिर्बाध्यते तत्राऽऽह—**दुर्बलो हीति** । कथं दौर्बल्यं प्रमाणत्वाविशेषे तत्राऽऽह—**इत्युक्तमिति** । स्वार्थं वक्तुं पदान्तरानपेक्षं पदं श्रुतिः । श्रुतभावगता शक्तिर्लिङ्गम् । संहत्यार्थं वदत्पदवृन्दं वाक्यम् । प्रधानवाक्यमङ्गोक्त्याकाङ्क्षं प्रकरणम् । समानदेशत्वं स्थानम् । यौगिकः शब्दः समाख्येत्युक्तलक्षणानामेषां समवाये समानविषयत्वविरोधे । परस्योत्तरस्य दौर्बल्यम् । श्रुतिविरोधे लिङ्गस्य तद्विरोधे वाक्यस्य तद्विरोधे प्रकरणस्य तद्विरोधे स्थानस्य तद्विरोधे समाख्याया इत्यत्र हेतुमाह—**अर्थविप्रकर्षादिति** । स्वार्थोक्तेः पूर्वपूर्वापेक्षतया लिङ्गादीनां विलम्बेनार्थधीहेतुत्वमित्यर्थः । तत्र श्रुतिलिङ्गयोर्विरोधोदाहरणमैन्द्र्या गार्हपत्यमुपतिष्ठत इति, अत्र गार्हपत्यमिति द्वितीयाऽतो गार्हपत्यस्य कर्मतया क्रियां प्रति शेषित्वं सिद्धमैन्द्र्येतितृतीयाश्रुतेरैन्द्र्याख्यर्चः " कदाचनस्तरीरसि " इत्याद्यायाः करणत्वेन शेषता तदयं श्रौतः शेषशेषिभावः कदाचनेत्यस्या ऋचश्चेन्द्रदेवतोक्तिसामर्थ्यलिङ्गेन विरुध्यते तत्र लिङ्गानुगुण्येन गार्हपत्यमितिश्रुतिः सप्तम्यर्थे तत्समीप इन्द्र उपस्थेय इति व्याख्येया श्रुत्यनुगुणतया वा लिङ्गमिन्द्र ईश्वरः स्वोचितक्रियाया गार्हपत्य इति व्याख्येयमिति संदेहे श्रुतेर्विनियोगाय सामर्थ्यापेक्षत्वेऽपि तज्ज्ञानानपेक्षत्वादवगतश्रौतविनियोगनिर्वाहाय सामर्थ्यस्य तदन्यथानुपपत्त्या गम्यमानत्वात्पूर्वावगतश्रौतविनियोगानुरोधेनैवं लिङ्गस्थितेस्तदेव श्रुत्यनुसारेण नेयमिति स्थितम् । लिङ्गवाक्ययोर्विरोधोदाहरणं स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति, किमुपस्तरणे पुरोडाशासादने च कृत्स्नो मन्त्र प्रयोक्तव्यः किंवा कल्पयाम्यन्त उपस्तरणे शेषस्तु पुरोडाशासादन इति संदेहे सामर्थ्यस्यैकवाक्यताधीपूर्वत्वाभावात्सदनकरणपुरोडाशासादनयोरनुष्ठेययोर्विभागेनैव प्रकाशने मन्त्रयोः सामर्थ्यादेकवाक्यतावशेन सामर्थ्यानुमानात्प्रागेव प्रतीतं सामर्थ्यमेकैकस्य भागस्यैकैकस्मिन्नर्थे विनियोजिकां श्रुतिं कल्पयतीति वाक्यालिङ्गमेव बलवदिति सिद्धम् । वाक्यप्रकरणयोर्विरोधोदाहरणं सूक्तवाकः, तत्र हि पौर्णमासीदेवता अमा-

१ ठ. ड. °न्धोऽनु° । २ क. ख. ठ. ड. °शेषात्तत्राऽऽ° । ३ क. °पेक्षाया । ४ ख. °क्षया ५ झ. शेषत्वं । ६ ठ. ड. °न्द्रया ऋचः । ७ ठ. ड. °च इन्द्र° । ८ झ. °तोक्तिः सा° । ९ क. सिद्धान्तः

(तैत्तिरीयकताण्डिनोः पुरुषविद्यायाः पृथक्त्वम्, अधि० १४)

वास्यादेवताश्चाऽऽम्नाताश्च मिथो नैकवाक्यतां गच्छन्तीति लिङ्गसामर्थ्यात्पौर्णमासीप्रयोगादिन्द्राग्निशब्दोत्कर्षे समवेतार्थत्वादमावास्यायां च तत्प्रयोगे तदेकवाक्यताप्रतीतमवीवृधेतां महो ज्यायोऽक्रातामित्येतदुत्कृष्य न प्रयोक्तव्यमुत यत्रेन्द्राग्निशब्द उत्कृष्य नीतस्तत्रैवैतदापि पौर्णमासीत उत्कृष्य प्रयोक्तव्यमिति संशये प्रकरणस्य विनियोज्यस्वरूपसामर्थ्यमनपेक्ष्याविनियोजकत्वात्तद्गुणालोचनायां च प्रथमभाविनो विनियोजकत्वात्प्रकरणाद्वाक्यस्य शीघ्रप्रवृत्तस्याऽऽदौ विनियोजकत्वसंभवात्प्रकृतस्य साकाङ्क्षत्वं ज्ञात्वा तेनेदमेकं वाक्यमित्यनुमानात्प्रागेवोक्तिसामर्थ्यात्पदानामेकवाक्यत्वस्य प्रात्यक्ष्यात्तद्विरोधेऽनुमानानुत्थानाद्देवतापनये तच्छेषाणां वाक्यादपकर्ष एवेति। क्रमप्रकरणयोर्विरोधोदाहरणं राजसूयसंनिधावभिषेचनीयसमीपे शौनःशेपोपाख्यानाद्याम्नातम्। नानेष्टिपशुसोमसमुदायो हि राजसूयस्तत्राभिषेचनीयः सोमयागस्तस्य संनिधौ शुनःशेपो नाम कश्चिदृषिपुत्रो हरिश्चन्द्रपुत्रेण पुरुषमेधार्थं पशुत्वेन क्रीतो वरुणाय स्वालम्भे कर्तुमारब्धे वरुणं तुष्टाव स च तुष्टः सन्नेनं ररक्षेत्याख्यानमक्षद्यूतादि च श्रुतं तत्किं समस्तराजसूयाङ्गमुताभिषेचनीयस्यैवेति संशये प्रकरणस्य साकाङ्क्षतायाः प्रात्यक्ष्यात्संनिधिपाठेनाभिषेचनीयस्य स्ववाक्योपात्तपदार्थनिराकाङ्क्षस्याप्याकाङ्क्षोत्थापनादुत्थिताकाङ्क्षं प्रकरणमेकवाक्यतादिकल्पनापरम्परया प्रागेव विनियोगं कल्पयतीति प्रकरणाविरोधे संनिधिर्बाध्यते। क्रमसमाख्ययोर्विरोधोदाहरणं पुरोडाशिकाख्याने काण्डे कर्मणामाग्नेयादीनां कमेण मन्त्राः श्रुतास्तत्रामावास्यकसांनाय्यक्रमे शुन्धध्वं दैव्याय कर्मण इति शुन्धनार्थो मन्त्रः समाम्नातस्तत्र पुरोडाशपात्राणां वा शुन्धने मन्त्रोऽयं प्रयोक्तव्यः सांनाय्यपात्राणां वेति संदेहे समाख्या संबन्धनिबन्धना सती तदर्थं यावत्संनिधिं कल्पयति तावद्वैदिकेन प्रत्यक्षेण संनिधिनाऽऽकाङ्क्षाद्वारा परम्परया श्रुतिं परिकल्प्य विनियोगस्य कृतत्वात्पुरोडाशवार्दिमन्त्रबाहुल्याच्च तत्समाख्यासिद्धेः स्थानविरोधे न सा विनियोक्त्रीति स्थितम्। तदेवं लिङ्गस्यैकया श्रुत्या श्रुत्यर्थविनियोगं प्रति व्यवधानं वाक्यस्य द्वाभ्यां लिङ्गश्रुतिभ्यां प्रकरणस्य तिसृभिर्वाक्यलिङ्गश्रुतिभिः स्थानस्य चतसृभिः प्रकरणवाक्यलिङ्गश्रुतिभिः समाख्यायाः स्थानप्रकरणवाक्यलिङ्गश्रुतिभिः पञ्चभिरित्यवान्तरभेदान्मिथो विरोधे श्रुतेर्बाधकत्वमेव लिङ्गवाक्यप्रकरणस्थानानां पूर्वपूर्वापेक्षया बाध्यत्वमुत्तरोत्तरापेक्षया बाधकतेत्युभयथात्वम्। समाख्याया बाध्यतैवेति विवेकः। मन्त्राणां विद्याशेषत्वं निरस्य प्रवर्ग्यादिकर्मणां

---

१ ठ. ड. 'ज्यरू'। २ ख. ठ. ड. 'स्य प्रत्यक्षात्त'। ३ क. 'त्यक्षात्त'। ४ ठ. 'ष्टिस'। ५ क. ख. 'श्विदप्यृषि'। ६ ख. ठ. ड. 'यस्यापीति। ७ क. ख. ठ. ड. 'णं पौरो'। ८ क. ख. ठ. ड. 'वाचिमं'। ९ ठ. ड. 'ध्यतेति।

[पू०मी० सू०३-३-१४] इत्यत्र। तथा कर्मणामपि प्रवर्ग्यादीनामन्यत्र विनियुक्तानां न विद्याशेषत्वोपपत्तिः। न ह्येषां विद्याभिः सहैकार्थ्यं किंचिदस्ति। वाजपेये तु बृहस्पतिसवस्य स्पष्टं विनियोगान्तरम् " वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत " [आश्व०श्रौ०९-९-१९] इति। अपि चैकोऽयं प्रवर्ग्यः सकृदुत्पन्नो बलीयसा प्रमाणेनान्यत्र विनियुक्तो न दुर्बलेन प्रमाणेनान्यत्रापि विनियोगमर्हति। अगृह्यमाणविशेषत्वे हि प्रमाणयोरेवं स्यान्न तु बलवदबलीयसोः प्रमाणयोरगृह्यमाणविशेषता संभवति बलवदबलीयस्त्वविशेषादेव। तस्मादेवंजातीयकानां मन्त्राणां कर्मणां वा न संनिधिपाठमात्रेण विद्याशेषत्वमाशङ्कितव्यम्। अरण्यानुवचनादिधर्मसामान्यात्तु संनिधिपाठ इति संतोष्टव्यम् ॥ २९ ॥ (१४)

तच्छेषत्वं निरस्यति—तथेति। तत्र हेतुः—न हीति। अनुपकारकस्य शेषत्वाभावादुपकारकस्य च प्रवर्ग्यादिकृतस्य विद्यायामनिरूपणान्न तेषां तच्छेषतेत्यर्थः। यत्तु विनियुक्तविनियोगो न विरोधीयत्यत्रोपेत्यवादेनोदाहरणं तत्राऽऽह—वाजपेये त्विति। इष्ट्वेति क्त्वाश्रुतिः समानकर्तृकत्वे विहिता संयोगपृथक्त्वेन विनियुक्तमपि विनियोजयत्यतो न तत्र श्रुत्योस्तुल्यबलयोर्मिथो बाध इत्युभयथात्वं बृहस्पतिसवस्येष्टमित्यर्थः। प्रकृते तुल्यबलत्वं विनियोजकयोर्नास्तीत्याह—अपि चेति। तुल्यबलत्वशङ्कानिरासद्वारा विनियुक्तविनियोगायोगे हेत्वन्तरसमुच्चयार्थमपिचेत्युक्तम्। पुरस्तादुपसदामित्यादिवाक्यं बलीयः प्रमाणम्। अन्यत्रेति ज्योतिष्टोमाद्युक्तम्। दुर्बलं प्रमाणं संनिधिः। अन्यत्रापीति विद्योक्ता। विरोधाभावादसाति विरोधे बाधाभावादुभयत्रापि प्रमाणाभ्यां विनियोगः स्यादित्याशङ्क्याऽऽह—अगृह्यमाणेति। एतदुभयत्र विनियुक्तत्वमेवं द्वाभ्यां मानाभ्यामिति यावत्। वाक्यादेः संनिवेशश्च विशेषो निश्चितो नास्तीत्याशङ्क्याऽऽह—न त्विति। मानयोर्विशेषग्रहे फलितमाह—तस्मादिति। प्रकरणपाठसिद्धये विनियोगो मन्त्रादीनां कल्प्यते तथा च बलवत्प्रमाणेनान्यत्र विनियोगे प्रकरणपाठसिद्धौ न क्रमो विनियोजको दौर्बल्यादित्यर्थः। तर्हि संनिधिपाठस्य का गतिस्तामाह—अरण्येति ॥ २९ ॥ (१४)

विद्यासंनिधौ श्रुतस्यापि मन्त्रादेर्विद्यायामसामर्थ्यादनुपसंहारवत्क्वचिदेव हानसंनिधौ श्रुतस्योपायनस्य तदन्तरेणापि हानसंभवेन तदुपपादनासामर्थ्यादनुपसंहार इत्याश-

---

१ ज. 'कार्य्यमस्ति। २ ङ. ञ. बलप्र'। ३ क. ङ. ज. ञ. ट. रेतदेवं। ४ ज. ठ. 'लयोः प्र'। ५ क. 'लताविं'। ट. 'लत्वविं'। ६ ङ. ञ. 'वत्ताविं'। ७ ङ. ञ. 'ञनत्वादिं'। ८ 'मयार्थत्व'। ९ क. ठ. ङ. 'बलप्र'। १० क. कथ्यते।

(वेदमन्त्रप्रवर्ग्यादीनां विद्यानङ्गत्वम्, अधि० १५)

हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥ (१५)

अस्ति ताण्डिनां श्रुतिः—" अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि " [छा० ८-१३-१] इति । तथाऽऽथर्वणिकानाम् " तथा *विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् " [मुण्ड० ३-२-८] इति। तथा शाट्यायनिनः पठन्ति—" तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम् " इति । तथैव कौषीतकिनः " तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम् " [कौषी० १-४] इति । तदिह क्वचित्सुकृतदुष्कृतयोर्हानं श्रूयते क्वचित्तयोरेव विभागेन प्रियैरप्रियैश्चोपायनं क्वचित्तूभयमपि हान-

---

ङ्क्त्याऽऽह—**हानौ त्विति** । विषयं वक्तुं तत्तच्छाखास्थवाक्यान्युदाहरति—**अस्तीत्यादिना** । यथाऽश्वो जीर्णानि रोमाणि रजोभिः सह शातयित्वा स्वच्छो भवति तथाऽहमपि पापं सर्वं विधूय निर्मलः सन्ब्रह्मलोकमभिसंभवामीति संबन्धः । यथा च चन्द्रो राहुग्रस्तो राहोर्मुखात्प्रमुच्य भास्वरो भवत्येवं शरीरमकृतमशुद्धं प्रवाहरूपेणानादिसिद्धं वा धूत्वा त्यक्त्वा स्वच्छो भूत्वा कृतः सिद्धो न पुनरपूर्वपुण्योपचयेन साध्यो यस्याऽऽत्मा सोऽहं कृतकृत्यः सन्ब्रह्मलक्षणं रूपमभिसंभवामि प्रत्यक्त्वेन प्राप्नोमीत्यर्थः। तथा ताण्डिनामिवाऽऽथर्वणिकानामस्ति श्रुतिरिति संबन्धः । " यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय " इति दृष्टान्तं परामृशति—**तथेति** । ताण्डिनश्चाऽऽथर्वणिकाश्च तथेत्युच्यन्ते । **तस्येति** । विदुषो मृतस्येत्यर्थः । **तथैवेति** शाट्यायनिनो दृष्टान्तिताः। तत्तेन विद्याबलेन सुकृतं च दुष्कृतं च ते विधूनुते निरस्यति विद्वानित्यर्थः । त्यक्तयोस्तयोर्विनियोगं दर्शयति—**तस्येति** । विषयपरिशेषार्थमापाततो वाक्यार्थमाह—**तदिति** । तत्तत्र श्रुताविहोदाहृतेषु वाक्येष्विति यावत् । क्वचित्ताण्डिनामाथर्वणिकानां च श्रुताविति यावत्। क्वचित्तयोरेवेत्यत्र क्वचिदिति शाट्यायनिश्रुतिरुक्ता।

---

* यथा नद्य इत्यायर्धानन्तरं मुण्डके एवमेवार्धं दृश्यतेऽतो यथा नद्य इत्यादिटीकानुरोधेनायं पाटः । परं तादिहेत्यादिभाष्यतट्टीकानुरोधेन त्वार्धः स्थापितः प्रायःसर्वादर्शपुस्तकस्थो विद्वान्पुण्यपापे इत्यादिः पाठ एव समीचीन इति भाति ।

---

१ क. ङ. ञ. तदा । २ क. ङ. ज. ञ. ट. °द्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति " इ० । ३ क. ज. शाट्याय° । ४ ज. ञ. विधुनु° । ५ ञ. ट °चिदुभ° । ६ क. ख. ठ. न्दमानाः । ७ ठ. शाट्याय° । ८ ठ. ड. °तं दु° । ९ ठ. शाट्याय° ।

मुपायनं च तद्यत्रोभयं श्रूयते तत्र तावन्न किंचिद्वक्तव्यमस्ति । यत्राप्युपायनमेव श्रूयते न हानं तत्राप्यर्थादेव हानं संनिपतति । अन्यैरात्मीययोः सुकृतदुष्कृतयोरुपेयमानयोरावश्यकत्वात्तद्धानस्य । यत्र तु हानमेव श्रूयते[2] नोपायनं तत्रोपायनं संनिपतेद्वा न वेति विचिकित्सायामश्रवणादसंनिपातः । विद्यान्तरगोचरत्वाच्च शाखान्तरीयस्य[3] श्रवणस्य । अपि चाऽऽत्मकर्तृकं सुकृतदुष्कृतयोर्हानं परकर्तृकं तूपायनं तयोरसत्यावश्यकभावे कथं हानेनोपायनमाक्षिप्येत । तस्मादसंनिपातो हानावुपायनस्येति ।

अस्यां प्राप्तौ पठति—" हानाविति" हानौ त्वेतस्यां केवलायामपि श्रूयमाणायामुपायनं संनिपतितुमर्हति । तच्छेषत्वात् । हानशब्दशेषो ह्युपायनशब्दः समधिगतः कौषीतकिरहस्ये ।

क्वचित्तूभयमित्यत्र क्वचिदिति कौषीतकिश्रुतिर्गृह्यते । तत्र कौषीतकिश्रुतिर्न विचारापेक्षेत्याह—तदिति । शाट्यायनिश्रुतिरपि नापेक्षते विचारमित्याह—यत्रेति । आर्थिकं हानसंनिपातं साधयति—अन्यैरिति । परिशिष्टं विषयमाह—यत्र त्विति । हानोपायनयोः सहभावस्याऽऽवश्यकत्वानावश्यकत्वाभ्यां संशयमाह—तत्रेति । अत्र च विद्यास्तुतिप्रकर्षप्रयोजनस्योपायनोपसंहारस्योक्त्या वाक्यार्थधीहेतुवर्णनात्पादादिसंगतिः। पूर्वपक्षे स्तुतिप्रकर्षासिद्धिः सिद्धान्ते तत्सिद्धिरिति मत्वा पूर्वपक्षं गृह्णाति—अश्रवणादिति[4] । क्वचिदश्रवणेऽप्यन्यत्र श्रवणादिहोपसंहारमाशङ्क्याऽऽह—विद्येति । विद्यैक्ये सत्युपसंहारः स्यान्न चेह तदस्ति कौषीतकिगतपर्यङ्कविद्यायाः सगुणत्वात्ताण्ड्यार्थवणिकश्रुत्योश्च पुण्यपापविधूननहेतुत्वेन श्रुतविद्याया निर्गुणत्वादिति यत्र हानमेव श्रुतं तत्र नोपायनं संनिपतेदित्यर्थः । न केवलमश्रवणादेवंननुवृत्तिर्युक्तिविरोधादपीत्याह—अपि चेति । यथा शाट्यायनिश्रुतावुपायने श्रुते हानानुवृत्तिस्तथा ताण्ड्यादिश्रुतावपि हाने श्रुते स्यादुपायनानुवृत्तिरित्याशङ्क्य तत्रानुपपत्त्या संबन्धेऽपि प्रकृते नैवमित्याह—तयोरिति । अश्रवणादिफलमुपसंहरति—तस्मादिति । अनुपसंहारे स्तुतिप्रकर्षासिद्धिरिति वक्तुमितीत्युक्तम् ।

सिद्धान्तयति—अस्यामिति । अश्वरोमादिदृष्टान्ताद्विधूतयोः सुकृतदुष्कृतयोः परत्रावस्थानापेक्षत्वादत्र हानसंनिधौ श्रुतमुपायनं केवलहानश्रवणेऽप्यपेक्षितत्वादायातीति व्याचष्टे—हानौ त्विति । तुशब्दार्थमाह—केवलायामिति । तच्छेषत्वादित्युक्तं

---

१ क. ज. ट. च श्रूयते । त° । २ क. ज. ञ. 'ते न तूपा' । ३ ठ. °यश्र° । ४ क. ञ. °ति । क्वचिदश्रवणादिति क° । ५ ठ. ड. °र्वणश्रु° । ६ क. ख. ठ. ड. °त्वादतो य° । ७ ख. ठ. ड. °दनु° । ८ ठ. ड. °ष्टान्ततो विधू° ।

(वेदमन्त्रप्रवर्ग्यादीनां विद्यानङ्गत्वम्, अधि० १५)

तस्मादन्यत्र केवलहानेश्रवणेऽप्युपायनानुवृत्तिः। यदुक्तमश्रवणाद्विद्रान्तरगोचरत्वादनावश्यकत्वाच्चासंनिपात इति तदुच्यते—भवेदेषा व्यवस्थोक्तिर्यद्यनुष्ठेयं किंचिदन्यत्र श्रुतमन्यत्र निनीष्यते। न त्विह हानमुपायनं वाऽनुष्ठेयत्वेन संकीर्त्यते विद्यास्तुत्यर्थं त्वनयोः संकीर्तनम्। इत्थं महाभागा विद्या यत्सामर्थ्यादस्य विदुषः सुकृतदुष्कृते संसारकारणभूते विधूयेते ते चास्य सुहृद्दुर्हृत्सु निविशेते इति। स्तुत्यर्थे चास्मिन्संकीर्तने हानानन्तरभावित्वेनोपायनस्य क्वचिच्छ्रुतत्वादन्यत्रापि हानश्रुतावुपायनानुवृत्तिं मन्यते स्तुतिप्रकर्षलाभाय। प्रसिद्धा चार्थवादान्तरापेक्षाऽर्थवादान्तरप्रवृत्तिः "एकविंशो वा इतोऽसावादित्यः" [छा० २-१०-५] इत्येवमादिषु। कथं हीहैकविंशताऽऽदित्यस्याभिधीयेतानपेक्ष्यमाणेऽर्थवादान्तरे "द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः"[शत०६-२-२-३]इत्यस्मिन्। तथा

विवृणोति—हानेति। हेतुफलमाह—तस्मादिति। अन्यत्र तण्डयादिश्रुताविति यावत्। पूर्वपक्षबीजमनुभाषते—यदिति। यत्रानुष्ठेयत्वेन श्रवणं तत्रोपसंहारे विधैक्यमपेक्षितम्। इह त्वनुष्ठेयतयोक्तस्य नोपसंहारः किंतु सिद्धस्यैव स्तुत्यर्थतयोक्तस्य तेनासति बाधके तस्योपसंहारः स्तुतिप्रकर्षायेत्याह—तदिति। व्यवस्थोक्तिर्विद्याभेदे गुणं प्रति नियमस्तदभेदे तदुपसंहार इति निर्देश इत्यर्थः। तर्हि किमर्थमनयोः संकीर्तनं तदाह—विद्येति। संकीर्तनस्य स्तुत्यर्थत्वमभिनयति—इत्थमिति। अस्तु स्तुत्यर्थं संकीर्तनं तथाऽपि किमर्था हानावुपायनानुवृत्तिस्तत्राऽऽह—स्तुत्यर्थे चेति। हानावुपायनानुवृत्तिं सूत्रकारो मन्यते चेत्तर्हि कथं स्तुतिप्रकर्षस्योपायनोपसंहारकल्पकत्वं तत्राऽऽह—स्तुतीति। स्तुतिर्हि विद्यायाः कार्या सा च केवलश्रुतहानेनापि लभ्या तदैव प्रकर्षोऽपेक्ष्येत यद्यप्रकर्षेण स्तुतिर्न चैवं तस्मात्प्रमाणसिद्धोपायनोपसंहारस्य फलं स्तुतिप्रकर्षसिद्धिरित्यर्थः। ननूपायनवादस्यार्थवादत्वे विधिशेषत्वं तस्य तच्छेषत्वान्न तु हानवादार्थवादशेषत्वं तत्राऽऽह—प्रसिद्धा चेति। इतोऽस्मात्पृथिवीरूपाल्लोकादिति यावत्। तत्रापि कथमर्थवादान्तरापेक्षा तत्राऽऽह—कथं हीति। इहेति पूर्वोक्तार्थवादोक्तिः। हेमन्तशिशिरयोरैक्यं मत्वा पञ्चर्तव इत्युक्तम्। अश्रुतमपि श्रुत्यन्तरानुसाराद्ग्राह्यमित्यत्र दृष्टान्तमाह—तथेति। यज्ञस्य पुरुषाकारकल्पनायां सेन्द्रियत्वाय त्रिष्टुभौ भवत इत्युक्तं बह्वृचब्राह्मणे। तत्र त्रिष्टुप्शब्देन च्छन्दोमात्राभिधानात्कथं सेन्द्रियत्वमित्युक्ते वाजस-

---

१ ट. °दत्र। २ ङ. ञ. °नशब्दश्च°। ३ ज. ते ह्यस्य। ४ ज. निःश्रेयते। ५ ज °धीयतेऽपेक्ष्यमा°। ट. धीयतेऽपेक्षमा°। ६ क. ञ. °पेक्षमा°। ७ क.ङ.ज ञ.. इत्येतस्मि°। ८ ञ. °रः श्रुति°।

(वेदमन्त्रप्रवरर्ष्यादीनां विद्यानङ्गत्वम्, अधि० १५)

" त्रिष्टुभौ भवतः सेन्द्रियत्वाय " [ऐत० ब्रा० १-४-११] इत्येवमादिवादेषु "इन्द्रियं वै त्रिष्टुप्" [तै० सं० ३-२-९-३] इत्येवमाद्यर्थवादान्तरापेक्षा दृश्यते[4]। विद्यास्तुत्यर्थत्वाच्चास्योपायनवादस्य कथमन्यदीये सुकृतदुष्कृते अन्यैरुपेयेते इति नातीवाभिनिवेष्टव्यम्। उपायनशब्दशेषत्वादिति[6] च शँब्दशब्दं समुच्चारयन्स्तुत्यर्थामेव हानावुपायनानुवृत्तिं सूचयति। गुणोपसंहारविवक्षायां ह्युपायनार्थस्यैव हानावनुवृत्तिं ब्रूयात्। तस्माद्गुणोपसंहारविचारप्रसंङ्गेन स्तुत्युपसंहारप्रदर्शनार्थमिदं सूत्रम्।

"कुशाश्छन्दस्तुत्युपगानवत्" इत्युपमोपादानम्। तद्यथा— भाल्लविनाम् " कुशा वानस्पत्याः स्थ ता मा पात "इत्येतस्मिन्निगमे कुशानामविशेषेण वनस्पतियोनित्वश्रवणे शाट्यायनिनाम् " औदुम्बराः " इति विशेषवचनादौदुम्बर्यः कुशा आश्री-

---

नेयके तथात्वेन त्रिष्टुभस्तत्त्वं गृहीतमित्यर्थः। ननु श्रुत्यन्तरश्रुतमप्युपायनं न हानावुपसंहर्तव्यं परकीयसुकृतदुष्कृतोपादानस्य परेण कर्तुमशक्यत्वात्तत्राऽऽह—**विद्येति**। विद्यासामर्थ्यादन्यत्र सुकृतदुष्कृतफलसंचारोक्त्या विद्यास्तुतेरिष्टत्वान्नाभिनिवेशावकाश इत्यर्थः। उपायनवादस्य स्तुत्यर्थत्वं कथमित्याशङ्क्य सूत्रकारोक्तिसामर्थ्यादित्याह—**उपायनेति**। तदेवोपपादयति—**गुणेति**। उपायनार्थशब्देन सुकृतादिस्वरूपोपायनमिष्टं फलैत उपायनस्येष्टत्वात्। फलोपसंहारं विनाऽर्थोपसंहारोऽभीष्टश्चेदुपायनशेषत्वादिति स्यात्तच्छब्दशेषत्वादिति चाऽऽह तथाच वदन्नर्थस्योपसंहारं नेच्छतीत्यर्थः। विद्यागुणोपसंहारप्रस्तावे स्तुत्यर्थविचारो न युक्त इत्याशङ्क्य प्रासङ्गिकत्वादयमदोष इत्याह—**तस्मादिति**। स्तुत्युपसंहारः स्तुत्युपयोगिनो गुणस्य सुकृतदुष्कृतयोरन्यत्र फलसंचारस्योपसंहारस्तत्प्रकारस्यानुपास्यस्यापि प्रदर्शनार्थं सूत्रमित्यर्थः।

शाखान्तरस्थो विशेषः शाखान्तरेऽप्याश्रयणीय इत्यत्र दृष्टान्तमाह—**कुशेति**। तदिदमुपमानं यथा तथा व्याख्येयमिति प्रतिज्ञाय कुशादृष्टान्तं व्याचष्टे—**भाल्लविनामिति**। भोः कुशाः शङ्कवो यूयं वानस्पत्या वनस्पतिप्रभवाः स्थ भवथ ता मा मां पात रक्षतेति यजमानस्य वचनम्। औदुम्बरा इति श्रुतेर्दर्भविषयेकुशशब्दस्याख्रीत्वम्।

---

१ क. ज. °दिष्विन्द्रि°। ङ. ञ. दिषु वा°। २ ट. °यं त्रि°। ३ ङ. ञ. °ष्टुभामित्ये°। ४ क. ट. °ते। स्तु°। ५ ङ. ज. ञ. °न्यैरभ्युपे°। ६ ङ. °ति हेतोस्तुशब्दं। ७ ज. ट. शब्दं। ८ ङ. ञ. °त्यर्थमे°। ९ क. ज. °क्षायामुपा°। १० ज. °सङ्गेः स्तु°। ११ क. ङ. ज. ञ. ट. 'रप्रकारद°। १२ ज. ट. °नित्वेन श्र°। १३ ङ. ञ. °म्बराः कुशा इ°। १४ ज. °ति व°। १५ ठ. ङ. °लमत। १६ ठ. न तु यु°। ङ. न पुनर्युक्त। १७ झ. कुशद°। १८ क. ठ. ङ. °प्रभावाः। १९ क. ख. ठ. ङ. °यस्य कु°।

यन्ते । यथा च क्वचिद्देवासुरच्छन्दसामविशेषेण पौर्वापर्यप्रसङ्गे "देवच्छन्दांसि पूर्वाणि" इति पैङ्ग्यश्रुत्या[1]ज्ञानात्प्रतीयन्ते । यथा च षोडशिस्तोत्रे केषांचित्कालाविशेषप्राप्तौ "समयाध्युषिते सूर्ये" इत्याचाभिश्रुतेः[2] कालविशेषप्रतिपत्तिः । यथैव चाविशेषेणोपगानं केचित्समामनन्ति विशेषेण भाल्लविनः । यथैतेषु कुशादिषु श्रुत्यन्तरगतविशेषान्वय एवं हानावप्युपायनान्वय इत्यर्थः । श्रुत्यन्तरकृतं[3] हि विशेषं श्रुत्यन्तरेऽनभ्युपगच्छतः सर्वत्रैव विकल्पः स्यात् । स चान्याय्यः सत्यां गतौ ।

अत एवास्त्री कुशमित्यमरसिंहेनानुशिष्टम् । औदुम्बर्य इति भाष्यात्कुशशब्दस्य शङ्कुविषयस्य स्त्रीत्वमपीति विवेक्तव्यम् । छन्दोदृष्टान्तं व्याचष्टे—यथा चेति । दशाक्षरादीनि देवच्छन्दांसि, नवाक्षराण्यासुराणि तेषां क्वचिच्छन्दोभिः स्तुवत इत्यादावविशेषेण पूर्वापरत्वप्रसङ्गे पैङ्ग्यश्रुतिवशाद्विशेषसिद्धिरित्यर्थः । स्तुतिदृष्टान्तं विवृणोति—यथा चेति । अतिरात्रे षोडशिनः पात्रविशेषस्य ग्रहणे यदङ्गभूतं स्तोत्रं तत्कस्मिन्काले गेयमिति केषांचिच्छन्दोगादीनां कालविशेषाश्रवणात्कालाविशेषप्राप्तौ सूर्ये समयाध्युषिते समीपाध्युषिते सूर्यस्योदयसंनिधौ षोडशिस्तोत्रमुपाकर्तव्यमिति विशेषधीरार्चाभिश्रुतेर्भवत्यृचोऽधीयत इत्यार्चास्तदीयश्रुतेर्विशेषधीः । यद्वा "समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति" इति तैत्तिरीयश्रुतेः षोडशिस्तोत्रेऽर्धास्तमितकालविशेषसिद्धिरित्यर्थः । उपगानं विभजते—यथैवेति । ऋत्विज उपगायन्तीत्यविशेषेणोपगानान्नानाध्वर्युरुपगायतीत्यध्वर्युवर्जिता ऋत्विज उपगायन्तीति विशेषेणोपगानमिति शेषः । दृष्टान्तेष्वभीष्टमंशमनूद्य दार्ष्टान्तिकमाह—यथेति । दृष्टान्तेऽपि श्रुत्यन्तरस्य श्रुत्यन्तरान्वयो मा भूद्वन्त्वेतानि स्वतन्त्राण्येव वाक्यानीत्याशङ्क्याऽऽह—श्रुत्यन्तरेति । विकल्पोऽपि व्रीहियववदस्तु नेत्याह—स चेति । अगतिका हीयं गतिर्यद्विकल्पाश्रयणं तस्याष्टदोषदुष्टत्वात् । तथा हि—व्रीहिभिर्यवैर्वा यजेतेति वाक्यद्वयमपि मानं तत्र व्रीहिवाक्याश्रयणे यववाक्यमनाश्रयणीयं श्रुतनैरपेक्ष्यविरोधाद्युगपदुभयानुष्ठानायोगात् । अतो यववाक्यस्थं मौनत्वं हेतुमृते त्याज्यं तस्य त्यक्तमौनत्वस्यामात्वमेष्टव्यम् । केनापि हेतुना प्रयोगाङ्गत्वेन यवाङ्गीकारे त्यक्तमौनत्वस्य पुनराश्रयणं तन्निरासेन स्वीकृतमौनत्वस्य पुनस्त्यागश्चेत्येकस्मिन्वाक्ये चत्वारो दोषाः । द्वितीयेऽपि वाक्ये प्राप्तत्यागाप्राप्ताश्रयणत्यक्तस्वीकारोपात्तत्यागा इति त एव दोषाः । तथाऽपि तुल्यबलत्वाद्वृत्यन्तराभावाच्च व्रीहियववाक्ययोर्विकल्पोऽङ्गीकृतः । यथाऽऽहुः—

---

१ क. ङ. ज. ञ. °भ्यायात्र° । २ क. ङ. ञ. °यते । य° । ३ ज. ट. °त्यार्चश्रु° । ४ घ. झ. °र्चोदिश्रु° । ५ क. ङ. ज. ञ. ट. °प्रतीतिः । य° । ६ झ. °रगतवि° । ७ क. ख. व्याचष्टे । ८ च. झ. ठ. ड. °र्चोदिश्रु° । ९ ठ. ड. मात्वं । १० ठ. ड. °मात्व° । ११ क. ख. ड. °मात्व° । १२ क. ख. ठ. ड. °मात्व° ।

" तदुक्तं " द्वादशलक्षण्याम् " अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्प्रतिषेधे विकल्पः स्यात् " [पू० मी० सू० १०-८-१५] इति ।

" एवमेषोऽष्टदोषोऽपि यद्व्रीहियववाक्ययोः ।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते " इति ।

इह तु सत्यां गतौ न तदाश्रयणमित्यर्थः । अष्टदोषविकल्पपरिहाराय वाक्यान्तरशेषत्वं वाक्यान्तरस्य जैमिनेरपि संमतमित्याह—तदुक्तमिति । द्वादशाध्याय्यां मीमांसायां दाशमिकमुदाहरति—अपि त्विति । दीक्षितो न ददाति न जुहोति न पचतीति ज्योतिष्टोमाधिकारे श्रुतं तत्र किं सर्वदानहोमपाकानां निषेधः किं वा तेषामकृतुप्रयुक्तानामथ वा तत्प्रयुक्तानामपि चोदकप्राप्तानामाहो पर्युदास इति संशये सर्वहोमादिनिषेधे प्रत्यक्षविधिविरोधादकृतुप्रयुक्तानां वा तत्प्रयुक्तानामपि चोदकप्राप्तानामानुमानिकतया निषेधस्य प्रत्यक्षाविरुद्धत्वेन निषेद्धुं शक्यत्वान्निषेध इति प्राप्ते सिद्धान्तसूत्रमपि त्वित्यादि । तुशब्दोऽवधारणार्थो नायं निषेधः किंतु न दीक्षितोऽदीक्षित इत्युक्तानामितरेषामविशेषेण होमादीनां ज्योतिष्टोमे कस्य पर्युदासः स्यादित्यत्र हेतुमाह—वाक्येति । अहरहर्दद्यादितिवाक्यशेषस्य सत्त्वादिति यावत् । पर्युदासमनाश्रित्य निषेधेऽभीष्टे ज्योतिष्टोमे दानादीनां विकल्पः स्यात्स चान्याय्य इत्याह—प्रतिषेध इति । " अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात् " [पू० मी० सू० १०-८-३] इत्येतद्दाशमिकं वा सूत्रमर्थद्वारा पठति—अपि त्विति । एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्त इत्युपक्रम्याऽऽश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कार इति सप्तदशाक्षरं मन्त्रगणं सप्तदशकलिङ्गदेहसमष्टिरूपप्रजापतित्वेन स्तुत्वा यज्ञे यज्ञेऽन्वायत्तोऽनुगत इत्यनारम्भवादेन सर्वयज्ञेषु मन्त्रगणो विनियुक्तः । तत्र च यज्ञेषु येयजामहकरणमुक्त्वा नानुयाजेष्विति[3] श्रुतम् । तत्र नानुयाजेष्वितिनिषेधाद्विधिनिषेधसंनिपाताद्विकल्पो वा स्यात्पर्युदासेनानुयाजं वर्जयित्वेतरेषु[4] यजतिषु येयजामहः कर्तव्य इति वाक्यशेषः सन्विधिरेव वेति संदेहे विधिनिषेधयोः शास्त्रीयतया तुल्यबलत्वेन[5] षोडशिग्रहणाग्रहणवद्विकल्पे प्राप्ते सिद्धान्तितमपि त्विति । नानुयाजेष्वित्ययं न निषेधोऽपि तु येयजामहकरणविधेर्वाक्यशेषः सन्पर्युदासः स्यान्निषेधे[6] तु विकल्पो भवेत्तस्यान्याय्यत्वाद्येयजामहकरणविधीनां नानुयाजेष्विति पर्युदासः सन्नेक-

---

१ ठ. ड. °क्षविरो° । २ क. ख. ठ. ड. °दनाप्रा° । ३ क्ष. °ति नि° । ४ ठ. ड. °षु ये° । ५ ख. क्ष. °रेवे° । ६ ठ. ड. °लत्वेन । ७ ठ. ड. स्यात्तन्नि° ।

(वेदमन्त्रप्रवर्ग्यादीनां विद्यानङ्गत्वम्, अधि० १०)

अथ वैतास्वेव विधूननश्रुतिष्वेतेन सूत्रेणैतच्चिन्तयितव्यम् । किमनेन विधूननवचनेन सुकृतदुष्कृतयोर्हानमभिधीयते किंवाऽर्थान्तरमिति । तत्र चैवं प्रापयितव्यम् । न हानं विधूननमभिधीयते "धूञ्कम्पने" इति स्मरणात् । दोधूयन्ते ध्वजाग्राणीति च वायुना चाल्यमानेषु ध्वजाग्रेषु प्रयोगदर्शनात् । तस्माच्चालनं विधूननमभिधीयते । चालनं तु सुकृतदुष्कृतयोः कंचित्कालं फलप्रतिबन्धनादित्येवं प्रापय्य प्रतिवक्तव्यम् । हानावेवैष विधूननशब्दो वर्तितुमर्हति । उपायनशब्दशेषत्वात् । न हि परपरिग्रहभूतयोः सुकृतदुष्कृतयोरप्रहीणयोः परैरुपायनं संभवति । यद्यपीदं परकीययोः सुकृतदुष्कृतयोः परैरुपायनं नाऽऽर्जवं संभाव्यते तथाऽपि तत्संकीर्तनात्तावत्तदानुगुण्येन हानमेव विधूननं नामेति निर्णेतुं शक्यते । क्वचिदपि

देशः स्यादतः षोडशिग्रहणाग्रहणयोरगत्या विकल्पेऽपि प्रकृते पर्युदासेनोपपत्तौ तदभावादनुयाजवर्जितेषु यजतिषु येयजामहः कर्तव्य इति विधिरेवायमित्यर्थः ।

वर्णकान्तरमाह—अथ वेति । सुकृतदुष्कृते विधूनुत इत्यादौ विधूननशब्दं विषयीकृत्य धात्वर्थमुख्यतोपायनशब्दसंनिधिभ्यां संशयमाह—किमिति । अर्थान्तरं चालनम् । मन्त्रादीनां विद्यासंनिधेरकिंचित्करत्ववदत्रापि विधूननशब्दस्योपायनशब्दसंनिधिरप्रयोजक इत्यभिप्रेत्य पूर्वपक्षमाह—तत्रेति । पूर्वपक्षे विद्यावशान्न सुकृतादिनिवृत्तिः। सिद्धान्ते ततस्तत्सिद्धिः । पाणिनिस्मरणं पूर्वपक्षे हेतू करोति—धूञ्इति । लोकप्रयोगसामर्थ्याच्च विधूननस्य चालनेत्याह—दोधूयन्त इति । स्मृत्या लोकतश्च सिद्धं निगमयति—तस्मादिति । कम्पनस्य मूर्त्यनुविधानादमूर्तयोः सुकृतदुष्कृतयोर्न तद्युक्तमित्याशङ्क्य विशिष्टार्थक्रियाकारित्वाभावस्तद्धर्मोऽत्र लक्षणीय इत्याह—चालनं त्विति । चालनस्य विधूननत्वे विद्यया न सुकृतादिध्वस्तिरिति फलं वक्तुमितीत्युक्तम् । पूर्वपक्षमनुभाष्य सूत्राक्षरैः सिद्धान्तयति—एवमिति । उपायनशब्दशेषत्वादित्युपायनशब्दसंनिधौ विधूननशब्दस्य श्रुतत्वादित्यर्थः । तदेव प्रपञ्चयति—न हीति । पूर्वपक्षेऽपि लक्षणाप्रौढ्याद्विधूननशब्दसंनिहितोपायनशब्दानुसारेण हानमेव लक्ष्यमित्यर्थः । उपायनस्यापि मुख्यस्यायोगात्तच्छेषतया कथं हानमित्याशङ्क्याऽऽह—यद्यपीति । उपायनशब्दस्य विधूननशब्दसंनिधौ क्वचिदेव भावात्कथं तद्वशान्निर्णयस्तत्राऽऽह—क्वचिदपीति । यथा कुशादिषु क्वचिदुक्तेषु संदिग्धेषु श्रुत्यन्तरान्निर्णयोऽङ्गीकृतस्तथेदमुपायनं विधूननसंनिधौ क्वचिदेव श्रुतमपि यत्र यत्र विधूननं

---

१ ङ. ञ. ट. 'तेनैव सू' । २ ङ. ञ. तत्रैवं । ३ झ. ट. 'ते धुञ्क' । ४ ट. च । ५ झ. 'तिपत्तव्य' । ६ ङ. ञ. 'व्दोऽनुव' । ७ ङ. 'तयोरपरिहीणयोः । ८ क. झ. ठ. ङ. 'दनूया' । - झ. 'ति । धुञि' ।

(मरणात्प्रागुपास्ये साक्षात्कृते सुकृतदुष्कृतक्षयः, अधि० १६)

चेदं विधूननसंनिधावुपायनं श्रूयमाणं कुशाछन्दस्तुत्युपगानवद्विधूननश्रुत्या सर्वत्रापेक्ष्यमाणं सार्वत्रिकं निर्णयकारणं संपद्यते। न च चालनं ध्वजाग्रवत्सुकृतदुष्कृतयोर्मुख्यं संभवति। अद्रव्यत्वात्। अश्वश्च रोमाणि विधून्वानस्त्यजत्रजः सहैव तेन रोमाण्यपि जीर्णानि शातयति। "अश्व इव रोमाणि विधूय पापम्" [छा० ८-१३-१] इति च ब्राह्मणम्। अनेकार्थत्वाभ्युपगमाच्च धातूनां न स्मरणविरोधः। "तदुक्तम्" इति व्याख्यातम् ॥ २६ ॥ (१५)

(मरणात्प्रागुपास्ये साक्षात्कृते सुकृतदुष्कृतक्षयः, अधि० १६)

सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥

देवयानेन पथा पर्यङ्कस्थं ब्रह्माभिप्रस्थितस्य व्यध्वनि सुकृतदुष्कृतयोर्वियोगं कौषीतकिनः पर्यङ्कविद्यायामामनन्ति—"स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति" [कौषी० १-३] इत्युपक्रम्य "स आगच्छति विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुते" [कौषी० १-४] इति। तार्किक

श्रूयते तत्र तत्रैं सर्वत्र तत्संदिग्धार्थं निर्णायकत्वेनापेक्षितं निर्णायकमित्यर्थः। यत्तु लौकिकप्रयोगाद्विधूननं कम्पनमेवेति तत्राऽऽह—न चेति। दृष्टान्ते कम्पनस्यैव दृष्टेर्दार्ष्टान्तिकेऽपि तदेव ग्राह्यमित्याशङ्क्याऽऽह—अश्वश्चेति। हानमपि तत्र भातीत्यर्थः। तथाऽपि दार्ष्टान्तिके विधूननं चालनमेवेत्याशङ्क्य तयोस्तुल्यत्वान्नैवमित्याह—अश्व इवेति। यत्तु पाणिनिस्मरणाद्विधूननं कम्पनमेवेति तत्राऽऽह—अनेकेति। श्रुत्यन्तरस्थो विशेषः श्रुत्यन्तरेऽनाश्रितश्चेद्विकल्पः सर्वत्र स्यात्। स चायुक्तः सत्यां गताविति पर्युदासाधिकरणे व्युत्पादितमित्याह—तदुक्तमिति ॥ २६ ॥ (१५)

कर्मक्षयहेतुत्वं विद्यायाः सिद्धं कृत्वा हानसंनिधावुपायनोपसंहारो दर्शितः संप्रति तदेवासिद्धं मार्गमध्ये श्रुतकर्मक्षयस्य विद्याहेतुकत्वाभावादित्याशङ्क्याऽऽह—सांपराय इति। यद्वा द्वितीयवर्णकोक्तविधूननशब्दस्य हानस्य कालोऽनेन निरूप्यते। विधूननं हानमित्युक्त्वा तदेव क्वचिद्व्यध्वन्यर्धपथे श्रुतं विचारयितुं विचारविषयमाह—देवयानेनेति। उक्तं विभागवचनमधिकृत्य श्रुतिविप्रतिपत्त्या संशयमाह—तर्हीति। अश्व इव रोमाणि विधूय पापमित्यारभ्य धूत्वा शरीरमित्युक्त्वा ब्रह्मलोकमभिसंभवामीति श्रुत्या देहत्यागात्प्रागेव सुकृतादिहानोक्तेर्विद्यासामर्थ्याच्च जीवत एव तद्धान-

---

१ ङ. ञ. °त्राप्यपे°। २ क. घ. ङ. °पेक्षमा°। ३ ङ. ज. ञ. विधुन्वा°। ४ ङ. ञ. °तवियोगं। ५ क. °त्र तं°। ६ च. ठ. ङ. °ग्धार्थानां नि°। ७ ङ. °रयुतं वि°।

(मरणात्प्रागुपास्ये साक्षात्कृते सुकृतदुष्कृतक्षयः, अधि० १६)

यथाश्रुतं व्यध्वन्येव वियोगवचनं प्रतिपत्तव्यमाहोस्विदादावेव देहादपसर्पण इति विचारणायां श्रुतिप्रामाण्याद्यथाश्रुति प्रतिपत्तिप्रसक्तौ पठति " सांपराये " इति । सांपराये गमन एव देहादपसर्पण इदं विद्यासामर्थ्यात्सुकृतदुष्कृतहानं भवतीति प्रतिजानीते । हेतुं[1] चाऽऽचष्टे "तर्तव्याभावात्" इति। न हि विदुषः संपरेतस्य विद्यया ब्रह्म[3] संप्राप्तस्तोऽन्तराले सुकृतदुष्कृताभ्यां किंचित्प्राप्तव्यमस्ति यदर्थं कतिचित्क्षणानक्षीणे[4] ते कल्पेयाताम्। विद्याविरुद्धफलत्वाच्च विद्यासामर्थ्येन तयोः क्षयः स च यदैव विद्या फलाभिमुखी तदैव भवितुमर्हति । तस्मात्प्रागेव सञ्चयं सुकृतदुष्कृतक्षयः पश्चात्पठ्यते । तथा ह्यन्येऽपि शाखिनस्ताण्डिनः शाट्यायनिनश्च प्रागवस्थायामेव सुकृतदुष्कृतहानमाम-

---

सिद्धेः सति पुष्कले हेतौ कार्यक्षेपायोगाद्विद्यायाश्च कर्मक्षये पुष्कलहेतुत्वात्सुकृतदुष्कृते विधूनुत इत्यत्रैव च पाठक्रमादर्धपथे सुकृतादित्यागानुगमात्पाठक्रमाच्चार्थक्रमस्य बलवत्त्वात्पूर्वपक्षाभावमाशङ्क्य तत्प्राप्तिमाह—श्रुतीति । तत्सुकृतदुष्कृते विधूनुत इत्येतन्न पाठमात्रं किंतु तच्छब्देन सर्वनाम्ना तस्मादिति हेत्वर्थेन विरजानद्यतिक्रमस्य विधूननं प्रति हेतुतां वदन्ती श्रुतिरियम् । न च श्रुत्यन्तरविरोधोऽर्धपथेऽपि कर्मक्षयस्य ब्रह्मलोकसंभवनात्प्राक्कालत्वसिद्धेरिति भावः । विधूननशब्दवत्सुकृतादिहानस्य कालोक्तिद्वारा वाक्यार्थधीहेतुकथनात्पादादिसंगतिः । पूर्वपक्षे विद्यासामर्थ्यानादरः । सिद्धान्ते तदादरणमित्यभिप्रेत्य पूर्वपक्षप्राप्तिमुक्त्वा सिद्धान्तसूत्रमवतार्य योजयति—पठतीत्यादिना । किं फलवशादर्धपथे[10] दुष्कृतादिहानं कल्प्यं किंवा तत्रैव हानहेतोः सत्त्वात् । तत्राऽऽद्यं प्रत्याह—न हीति । संपरेतस्य परलोकं प्रति प्रस्थितस्येत्यर्थः । द्वितीयं निराह—विद्येति । अनपाकृतपापस्य देवयानेन पथा गमनायोगाज्जीवत एव विदुषो विद्यासामर्थ्यात्पापहानमित्यर्थः । का तर्हि कौषीतकिश्रुतेर्गतिस्तत्राऽऽह—तस्मादिति । तदितिसर्वनामश्रुत्या प्रकरणपठितविद्यायाः प्राधान्यात्परामर्शाद्विरजानद्यतिक्रमस्यानन्तरं[11]प्रकृतस्याप्यप्राधान्यादपरामर्शात्पाठक्रमबाधेनार्थक्रमः स्वीकर्तव्य इत्यर्थः । किंच सति पुष्कलहेतौ कार्यं भवत्येवेतिन्यायानुगृहीतं श्रुत्यन्तरमेव बलवदिति मत्वा श्रुत्यन्तरमुदाहरति—तथा हीति । न हि तस्याविरोधेन नयनं पूर्वपक्षे युक्तं[12] विधूय पापमिति विधूनने पुंसः स्वातन्त्र्यदृष्टे-

---

१ ठ. 'प्यात्तु यथा' । २ क. घ. ङ. ञ. ट. 'तुं ह्याच' । ३ ङ ज ञ. ट. 'ह्म प्रे' । ४ ट. 'क्षण अक्षी' । ५ क. ङ. ज. ञ. ट. 'त्वात्तु वि' । ६ ज. ट. शाट्यायं' । ७ क. ख. 'त्र पा' । ८ ङ. 'भवात्प्रा' । ९ ठ. ङ. 'शब्दितसुकृ' । १० क. ख. 'थे सुकृता' । ११ क. ख. 'न्तरं प्र' । १२ ख. हेतुयुक्तं ।

(उपासकस्यैवार्चिरादिमार्गो न ज्ञानिन इत्यस्य व्यवस्था, अधि० १७)

नन्ति—" अश्व इव रोमाणि विधूय पापम् " [छा०८।१३।१] इति, " तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम् " इति च ॥ २७ ॥

छन्दत उभयाविरोधात् ॥ २८ ॥ (१६)

यदि च देहादपसृप्तस्य देवयानेन पथा प्रस्थितस्यार्धपथे सुकृतदुष्कृतक्षयोऽभ्युपगम्येत ततः पतिते देहे यमनियमविद्याभ्यासात्मकस्य सुकृतदुष्कृतक्षयहेतोः पुरुषप्रयत्नस्येच्छातोऽनुष्ठानानुपपत्तेरनुपपत्तिरेव तद्धेतुकस्य सुकृतदुष्कृतक्षयस्य स्यात् । तस्मात्पूर्वमेव साधकावस्थायां "छन्दतः" अनुष्ठानं तस्य स्यात् । तत्पूर्वकं च सुकृतदुष्कृतहानमिति द्रष्टव्यम् । एवं निमित्तनैमित्तिकयोरुपपत्तिस्ताण्डिशाट्यायनिश्रुत्योश्च संगतिरिति ॥२८॥(१६)

(उपासकस्यैवार्चिरादिमार्गो न ज्ञानिन इत्यस्य व्यवस्था, अधि० १७)

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥२९॥

क्वचित्पुण्यपापापहानसंनिधौ देवयानः पन्थाः श्रूयते क्वचिन्न। तत्र संशयः—किं हानावविशेषेणैव देवयानः पन्थाः संनिप-

---

रित्याशयेनाऽऽह—अश्व इवेति । किंच प्रागवस्थायामेव सुकृताद्यादानस्य श्रुतत्वाद्देहे च तत्त्यागात्तदादानायोगान्नार्धपथे कर्मनिवृत्तिरित्याह—तस्येति ॥ २७ ॥

विद्याफलत्वाद्ब्रह्मलोकाप्तिवत्कर्मक्षयोऽपि देहत्यागादूर्ध्वं स्यादित्याशङ्क्याऽऽह—छन्दत इति । सूत्रं व्याचष्टे—यदि चेति । जीवतो ब्रह्मलोकाप्तेरयोगाद्देहपातापेक्षा कर्महानेस्तु देहवत एव सिद्धेर्नैवमित्यर्थः । छन्दतः स्वच्छन्दतः स्वेच्छयेति व्याकरोति—इच्छात इति । अर्धपथे हेत्वनुष्ठानासिद्ध्या साध्यासिद्धौ फलितमाह—तस्मादिति । उभयाविरोधादिति भागं व्याकरोति—एवमिति । समर्थस्य क्षेपायोगात्पूर्णे हेतावनन्तरमेव कार्योत्पत्तिरन्यथा निमित्तनैमित्तिकत्वमेव तयोर्न स्यादित्यर्थः । सूत्रपदस्यार्थान्तरमाह—ताण्डीति । इत्थं विद्यासामर्थ्यात्प्रागेव सुकृतादिनिवृत्तिरित्युपसंहर्तुमितीत्युक्तम् ॥ २८ ॥ (१६)

सुकृतादिहानसंनिधानोक्तदेवयानगतेरुपायनवदेव सार्वत्रिकत्वप्राप्तावुक्तम्—गतेरिति । विचारविषयमाह—क्वचिदिति । संशयार्थं कोट्यन्तरमाह—क्वचिन्नेति । हानसंनिधौ मार्गश्रुतेर्विशेषाज्ञानाच्च मार्गविषये संशयमाह—तत्रेति । हानसंनिधौ क्वचिदेव श्रुतोपायनस्य सार्वत्रिकत्ववत्क्वचिदेव कर्मक्षयसंनिध्युक्तस्य पथो देवयानस्य

---

१ ट. °ति ॥ २७ ॥ छ° । २ ट. °कं सु° । ३ क. ङ. ज. म. °पापहा° । ४ ट. °षेण दे° । ५ ङ. °वतो ।

(उपासकस्यैवार्चिरादिमार्गो न ज्ञानिन इत्यस्य व्यवस्था, अधि० १७)

तेदुत विभागेन क्वचित्संनिपतेत्क्वचिन्नेति। यथा तावद्धानावविशेषेणैवोपायनानुवृत्तिरुक्तैवं देवयानानुवृत्तिरपि भवितुमर्हतीत्यस्यां प्राप्तावाचक्ष्महे—"गतेः" देवयानस्य पथः "अर्थवत्त्वमुभयथा" विभागेन भवितुमर्हति क्वचिदर्थवती गतिः क्वचिन्नेति नाविशेषेण। "अन्यथा हि" अविशेषेणैवैतस्यां गतावङ्गीक्रियमाणायां "विरोधः" स्यात्। "पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" [मुण्ड० ३-१-३] इत्यस्यां श्रुतौ देशान्तरप्रापणी गतिर्विरुध्येत। कथं हि निरञ्जनोऽगन्ता देशान्तरं गच्छेत्। गन्तव्यं च परमं साम्यं न देशान्तरप्राप्त्यायत्तमित्यानर्थक्यमेवात्र गतेर्मन्यामहे ॥ २९ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥ (१७)

"उपपन्नः" चायमुभयथा भावः क्वचिदर्थवती गतिः क्वचिन्नेति। "तल्लक्षणार्थोपलब्धेः"। गतिकारणभूतोऽर्थः पर्यङ्कविद्यादिषु सगुणेषूपासनेषूपलभ्यते। तत्र हि पर्यङ्कारोहणं

केवलक्षयश्रवणेऽपि युक्ताऽनुवृत्तिरिति संगतिगर्भं पूर्वपक्षमाह—यथेति। निर्गुणब्रह्मविद्या गतिमती ब्रह्मविद्यात्वात्सगुणब्रह्मविद्यावादिति भावः। प्रासङ्गिकविधूननसमयोक्त्या प्रस्तुतगुणोपसंहारोक्तेरपवादोक्तिद्वारा विचारस्य वाक्यार्थज्ञानोपायगामित्वात्पादादिसंगतिः। पूर्वपक्षे निर्गुणविदोऽपि गत्यपेक्षया नियतिः। सिद्धान्ते सगुणविद्यावत एव तदपेक्षेति विवक्षित्वा सिद्धान्तयति—अस्यामिति। प्रतिज्ञां व्याख्याय हेतुं व्याख्याति—अन्यथेति। विरोधमेव साधयति—कथं हीति। सर्वगतस्यासङ्गस्याऽऽत्मनो नोपाध्यतिरेकेण गत्युपपत्तिरित्यर्थः। गन्तृरूपालोचनया गतेरयोगमुक्त्वा गन्तव्यरूपालोचनयाऽपि तदयोगमाह—गन्तव्यं चेति। स्वतो भिन्नयोरैक्यायोगादाविद्ये भेदे विद्ययैव तन्निवृत्तेर्विद्यायाश्च स्वोत्पत्तौ स्वफले वा देशभेदापेक्षाभावादनर्थिका गतिरित्युपसंहरति—इतीति। निर्गुणब्रह्मधीः सप्तम्यर्थः ॥ २९ ॥

निर्गुणविद्यायां गतिर्व्यर्थेति प्राधान्येनोक्त्वा पर्यङ्कविद्यादौ प्राधान्येन तदर्थवत्त्वमाह—उपपन्न इति। तत्र प्रतिज्ञां व्याकरोति—उपपन्नश्चेति। क्वचिदर्थवती गतिरित्यत्र हेतुमवतार्य लक्षणशब्दस्य लक्षणया कारणार्थत्वं गृहीत्वा व्याचष्टे—तादिति। उपलब्धिमेवाभिनयति—तत्रेति। देशादेशान्तरप्राप्त्यायत्ते फले श्रुते फलितमाह—

---

१ ङ. 'पणग'। २ ङ. 'तिः। तं'। ३ ज. 'रणीभू'। ४ क. ङ. ज. ञ. ट. 'तो ह्यर्थः। ट. 'षूप'। ६ ठ. ड. 'शान्त'।

पर्यङ्कस्थेन ब्रह्मणा संवदनं विशिष्टगन्धादिप्राप्तिश्चेत्येवमादि बहुदेशान्तरप्राप्त्यायत्तं फलं श्रूयते तत्रार्थवती गतिः । न तु सम्यग्दर्शने तल्लक्षणार्थोपलब्धिरस्ति । न ह्यात्मैकत्वदर्शिनामाप्तकामानामिहैव दग्धाशेषक्लेशबीजानामारब्धभोगकर्माशयक्षपणव्यतिरेकेणापेक्षितव्यं किंचिदस्ति तत्रानर्थिका गतिः । लोकवच्चैष विभागो द्रष्टव्यो यथा लोके ग्रामप्राप्तौ देशान्तरप्रापणः पन्था अपेक्ष्यते नाऽऽरोग्यप्राप्तावेवमिहापीति । भूयश्चैनं विभागं चतुर्थाध्याये निपुणतरमुपपादयिष्यामः ॥ ३० ॥(१७)

(सर्वासूपासनासूत्तरमार्गविधानम् , अधि० १८)

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥ (१८)

सगुणासु विद्यासु गतिरर्थवती न निर्गुणायां परमात्मविद्यायामित्युक्तम् । सगुणास्वपि विद्यासु कासुचिद्गतिः श्रूयते यथा पर्यङ्कविद्यायामुपकोसलविद्यायां पञ्चाग्निविद्यायां दहरविद्यायामिति । नान्यासु यथा मधुविद्यायां शाण्डिल्यविद्यायां षोड-

---

तत्रेति । पर्यङ्कविद्यासगुणोपास्तिः सप्तम्यर्थः । निर्गुणविद्यायामपि हेतुरस्तीत्याशङ्क्याऽह—न त्विति । तदेवोपपादयति—न हीति । तेषां प्राप्तपरानन्दत्वमाह—आप्तेति । इहेति जीवदवस्थोक्तिः । निरस्तसमस्तानर्थत्वमाह—दग्धेति । तर्हि सद्यो देहपातः स्यान्नेत्याह—आरब्धेति । हेतोर्व्यभिचारं निरस्य क्वचिन्नेत्युक्तं निगमयति—तत्रेति । सम्यग्धीः सप्तम्यर्थः । निर्गुणब्रह्मविन्नार्चिरादिगतिमान्मुक्तिफलभाक्त्वान्मुच्यमानहिरण्यगर्भवदिति भावः । क्वचिदर्थवती गतिः क्वचिन्नेत्युक्तं सौत्रेण दृष्टान्तेन स्पष्टयति—लोकवच्चेति । इहेति सगुणनिर्गुणविद्योक्तिः । इतिशब्दः सूत्रव्याख्यासमाप्तौ । " तयोर्ध्वमायन्नमृतत्वमेति " इतिश्रुतेर्दैवयानेनाध्वना गतस्यैव मुक्तिरित्याशङ्क्याऽह—भूयश्चेति ॥ ३० ॥ (१७)

सगुणनिर्गुणविद्यासु गतिभावाभावव्यवस्थावत्सगुणविद्यास्वपि व्यवस्थामाशङ्क्याऽऽह—अनियम इति । वृत्तं कीर्तयति—सगुणास्विति । गतेर्द्विधाऽर्थवत्त्वे स्थिते किमनेनाधिकरणेनेत्याशङ्क्य विषयमाह- सगुणास्वपीति । विचारबीजं संशयं वक्तुं कोटयन्तरमाह—नेति । अर्चिरादिपर्वाणं पन्थानमधिकृत्य विद्याविशेषाधिकाराद्वाक्यादविशे-

---

१ ङ. ञ. °णा सह सं° । २ ट हि । ३ ट. °वत्त्वेष । ४ क. ञ. °श्चैतं वि° । ज. ट. °श्चैवं वि° । ५ क. ङ. ज. ञ. °तुर्थेऽध्या° । ६ ङ. ञ. °द्याया पञ्चा° । ७ ङ. ञ. °द्यायामुपकोसलविद्यायां द°

(सर्वासूपासनासूत्तरमार्गविधानम्, अधि० १८)

शकलविद्यायां वैश्वानरविद्यायामिति। तत्र संशयः—किं यास्वेषा[1] गतिः श्रूयते तास्वेव नियम्येतोतानियमेन सर्वाभिरेवंजातीयकाभिर्विद्याभिरभिसंबध्येतेति[2]। किं तावत्प्राप्तं, नियम इति। यत्रैव श्रूयते तत्रैव भवितुमर्हति। प्रकरणस्य नियामकत्वात्। यद्यन्यत्राश्रूयमाणाऽपि गतिर्विद्यान्तरं गच्छेच्छ्रुत्यादीनां प्रामाण्यं हीयेत, सर्वस्य सर्वार्थत्वप्रसङ्गात्। अपि चार्चिरादिकैकैव गतिरुपकोसलविद्यायां पञ्चाग्निविद्यायां च तुल्यवत्पठ्यते, तत्सर्वार्थत्वेऽनर्थकं पुनर्वचनं स्यात्। तस्मान्नियम इत्येवं प्राप्ते पठति—"अनियमः" इति। "सर्वासामेव" अभ्युदयप्राप्तिफलानां सगुणानां विद्यानामविशेषेण[3] एषा देवयानाख्या[4] गतिर्भवितुमर्हति। नन्वनियमाभ्युपगमे प्रकरणविरोध उक्तः। नैष[5] दोषः। "शब्दानुमानाभ्यां" श्रुतिस्मृतिभ्यामित्यर्थः। तथा हि श्रुतिः—

षदृष्टेश्च संशयमाह—तत्रेति। सगुणासु विद्यासु गतेः सार्वत्रिकत्वोक्त्या वाक्यार्थधीहेतोरेव चिन्तनात्पादादिमंगतिः। पूर्वपक्षे नियताया गतेरुपसंहारासिद्धिः। सिद्धान्ते त्वनियतायाः सार्वत्रिकत्वमित्यङ्गीकृत्य विमृश्य पूर्वपक्षमाह—किमिति। नियमं व्याकरोति—यत्रेति। तत्र हेतुः—प्रकरणस्येति। हेतुं व्यतिरेकतो विवृणोति—यदीति। प्राकरणिके सामान्यसंबन्धे श्रुत्यादिभ्यो विशेषविनियोगधीः। यत्र श्रुत्यादय एव विनियोजका न प्रकरणं तत्रापि तन्निर्वाहाय प्रकरणं कल्प्यम्। तदभावे दर्शपूर्णमासज्योतिष्टोमादिधर्माणां संकरात्। तस्माद्विनियोगाय तन्निर्वाहाय च प्रकरणमौन्यम्। अन्यथा श्रुत्याद्यप्रामाण्यात्तेन प्राकरणिकी विशेषसंगतिरित्यर्थः। न केवलं नियमे प्रकरणमेव प्रमाणं किंतु लिङ्गमपीत्याह—अपि चेति। एकत्रोक्तस्य सर्वत्र संबन्धसिद्धौ पुनरुक्तिरनर्थिकेत्यर्थः। लिङ्गप्रकरणाभ्यां वाक्यबाधं मत्वोपसंहरति—तस्मादिति। नियता गतिर्नोपसंहारार्हेति प्राप्तं पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति। अनियमं व्याचष्टे—सर्वासामिति। कर्मसमृद्ध्यादिफलोपासनानि व्यवच्छिनत्ति—अभ्युदयेति। अनियमे प्रकरणविरोधं स्मारयति—नन्विति। सूत्रावयवेनोत्तरमाह—नेति। गतेर्वाक्यीयान्वयस्य सार्वत्रिकत्वाद्दुर्बलं प्रकरणं बाध्यमित्यभिप्रेत्य श्रुतिमाह—तथा हीति। तत्तत्राधिकृतानां मध्ये ये केचिद्द्युलोकादीनग्नित्वेन विदुस्तेऽर्चिषमभिसंभवन्तीति संबन्धः। ये चेत्यत्रापि तथैवान्वयः। अविशेषेण विद्यान्तरशालिनां देवयानप्रापकवाक्येन प्रकरणं बाध्यमित्युक्तम्। इदानीं वाक्यं न विद्यान्तरशीलि-

---

१ क. ङ. ज. ञ. ट. 'स्वेषा। २ ङ. ज. ञ. 'रेवैवं'। ३ ङ. ञ. याभिः सं'। ४ ट. बध्यते। किं। ५ क. ज. 'णैवैषा। ञ. 'णैव दे'। ६ ट. नैष दोषः। श'। ७ ञ. संस्कारा'।

" तद्य इत्थं विदुः " [छा० ५-१०-१] इति पञ्चाग्निविद्या-वतां देवयानं पन्थानमवतारयन्ती " ये चेमेऽरण्ये श्रद्धा तप इत्युपासते " [छा० ५-१०-१] इति विद्यान्तरशीलिनामपि पञ्चाग्निविद्याविद्भिः समानमार्गतां गमयति । कथं पुनरवगम्यते विद्यान्तरशीलिनामियं गतिरिति । ननु श्रद्धातपःपरायणानामेव स्यात्तन्मात्रश्रवणात् । नैष दोषः । न हि केवलाभ्यां श्रद्धातपोभ्यामन्तरेण विद्याबलमेषा गतिर्लभ्यते,

" विद्यया तदारोहन्ति यत्र कामाः परागताः ।
न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः "

[शत० १० ५-४-१६] इति श्रुत्यन्तरात् । तस्मादिह श्रद्धातपोभ्यां विद्यान्तरोपलक्षणम् । वाजसनेयिनस्तु पञ्चाग्निविद्याधिकारेऽधीयते—"य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते " [बृ० ६-२-१५] इति । तत्र श्रद्धालवो ये सत्यं ब्रह्मोपासत इति व्याख्येयम् । सत्यशब्दस्य ब्रह्मण्यसकृत्प्रयुक्तत्वात् । पञ्चाग्निविद्याविदां चेत्थंवित्त्वैवोपात्तत्वाद्विद्या-

---

नामपि देवयानप्रापकमिति शङ्कते—कथमिति । वाक्यस्य तर्हि कोऽर्थः स्यादित्याशङ्क्याऽऽक्षेपैवाऽऽह—नन्विति । श्रद्धातपोनुष्ठानमात्रस्य श्रुतत्वात्तन्निष्ठानामेव गतिर्वाक्येनोक्ता स्यादित्यर्थः । वाक्यान्यथासिद्धिं दूषयति—नेति । अविदुषामेषा गतिर्नेत्यत्र श्रुतिं हेतुमाह—विद्येति । तदित्युक्तं ब्रह्मलोकाख्यस्थानं विशिनष्टि—यत्रेति । यस्मिन्प्राप्ते कामाः क्षुद्रविषयाः परागता व्यावृत्ताः कामक्रोधादिस्पर्शवर्जितं प्राप्यं ब्रह्मलोकस्थानमित्यर्थः । दक्षिणा दक्षिणमार्गगामिनः(णः) केवलकर्मिणस्तपस्विनोऽप्यविद्वांसो न तत्र गच्छन्तीत्यपिशब्दो ज्ञेयः । ये चेत्यादिवाक्यस्य तर्हि का गतिस्तत्राऽऽह—तस्मादिति । उक्तच्छन्दोगवाक्यमिहेत्युक्तम् । उपलक्षणमन्तरेणापि विद्यान्तरशीलिनामियं गतिरवगतेत्याह—वाजेति । तत्रापि सत्यशब्देन सत्यार्थोक्तेरेव संग्रहात्कुतो विद्यान्तरयुक्तानां गतिधीरित्याशङ्क्याऽऽह—तत्रेति । तेऽर्चिषमभिसंभवन्तीति संबन्धः । सत्यशब्देन ब्रह्मोक्तौ हेतुमाह—सत्येति । " सत्यं ज्ञानमनन्तं ब्रह्म " " तत्सत्यं स आत्मा " " सत्यस्य सत्यम् " इत्येवमादावित्यर्थः । सत्यार्थवचनग्रहात्सत्यार्थग्रहो लघीयानित्युक्तम् । इदानीं पञ्चाग्निविद एव सत्यमुपासत इति कस्मान्न गृह्यन्त इत्याशङ्क्य तेषां पृथग्गृहीतत्वादित्याह—पञ्चेति । इतश्च विद्यान्तरशीलानां गतिरिति

---

१ ङ. ज. ञ. श्रद्धां त° । २ ङ. ञ. ठ. °शीलाना° । ३ ज. °यावाद्भिः । ४ ङ. ञ. ट. °शीलाना° । ५ ङ. ञ. °तिश्रुतिरि° । ६ ठ. ड. °सिद्धा दू° । ७ क. ख. ठ. ड. °काख्यं स्था° । ८ ठ. ड. °मा: प° । ९ क. ख. ड. उक्तं छ° । १० ख. ठ. ड. गृह्यत । ११ क. °शीलिमां ।

(ब्रह्मतत्त्वज्ञानिनां मुक्तेर्नियतत्वं न पाक्षिकत्वम् , अधि० १९)

न्तरपरायणानामेवैतदुपादानं न्याय्यम् । " अथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम् " [बृ० ६-२-१६] इति च मार्गद्वयभ्रष्टानां कष्टामधोगतिं गमयन्ती श्रुतिर्देवयानपितृयाणयोरेवैनानन्तर्भावयति । तत्रापि विद्याविशेषादेषां देवयानप्रतिपत्तिः । स्मृतिरपि—

" शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः "

[भ० गी० ८-२६] इति । यत्पुनर्देवयानस्य पथो द्विरात्मानमुपकोसलविद्यायां पञ्चाग्निविद्यायां च तदुभयत्राप्यनुचिन्तनार्थम् । तस्मादनियमः ॥ ३१ ॥ (१८)

(ब्रह्मतत्त्वज्ञानिनां मुक्तेर्नियतत्वं न पाक्षिकत्वम् , अधि० १९)

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥ (१९)

विदुषो वर्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति चिन्त्यते । ननु विद्यायाः साधनभूतायाः संपत्तौ कैवल्यनिर्वृत्तिः स्यान्न वेति नेयं चिन्तोपपद्यते, न हि पाकसाधनसंपत्तावोदनो भवेन्न वेति चिन्ता संभवति, नापि भुञ्जानस्तृप्येन्न वेति चिन्त्यते।

लिङ्गदर्शनं समुच्चिनोति—अथेति । एनानिति विद्यान्तरपरा गृह्यन्ते । तथाऽपि कथं देवयानयोगस्तेषामित्याशङ्क्य योग्यतयेत्याह—तत्रापीति । श्रुतिस्मृतिभ्यां प्रकरणविरोधसमाधिं प्रतिज्ञाय श्रुतिरुक्ता । संप्रति स्मृतिमाह—स्मृतिरिति । जगतो ज्ञानकर्माधिकृतस्येत्यर्थः । पूर्वोक्तं लिङ्गमनूद्यान्यथासिद्धिमाह—यदिति । लिङ्गवाक्याभ्यां प्रकरणं भङ्क्त्वा सगुणविद्यासु गतेः सार्वत्रिकत्वमुपसंहरति—तस्मादिति॥३१॥(१८)

सगुणविद्यासु व्यवहितफलासु सर्वास्वपि गतिरर्थवतीत्युक्तम् । इदानीं निर्गुणायामपि विद्यायां सद्योमुक्तिफलत्वानवगमात्कालान्तरभाविफलत्वाविशेषादविशिष्टा गतेरर्थवत्तेत्याशङ्क्याऽऽह—यावदिति । विषयसंशयौ दर्शयति—विदुष इति । अकारणकसंशययायोगं मन्वानो विचारमाक्षिपति—नन्विति । तदेव दृष्टान्तेन स्पष्टयति—न हीति । सत्यां सामग्र्यामसति प्रतिबन्धे कार्यनिश्चयेऽपि कुतो विद्यया सद्योमुक्तिरित्याशङ्क्याऽऽह—नापीति । संशयाभावादधिकरणा-

---

१ क. ङ. ञ. 'मेवेदमुपा' । २ घ. 'क इति । ३ क. ङ. ज. ञ. ट. 'न्ती देव' । ४ ञ. 'वैतामन्त' । ५ ङ. 'नामन्त' । ६ ङ. ञ. 'थोऽविरादेर्द्विरा' । ७ ठ. 'रोक्तलि' । ८ ठ. ड. अक' । ९ ठ. ड. विद्यायां ।

उपपन्ना त्वियं चिन्ता, ब्रह्मविदामपि केषांचिदितिहासपुराणयोर्देहान्तरोत्पत्तिदर्शनात् । तथा हि—अपान्तरतमा नाम वेदाचार्यः पुराणर्षिर्विष्णुनियोगात्कलिद्वापरयोः संधौ कृष्णद्वैपायनः संबभूवेति स्मरन्ति [महाभा० १२ ३५१] । वसिष्ठश्च ब्रह्मणो मानसः पुत्रः सन्निमिशापादपगतपूर्वदेहः पुनर्ब्रह्मादेशान्मित्रावरुणाभ्यां संबभूवेति । भृग्वादीनामपि ब्रह्मण एव मानसपुत्राणां वारुणे यज्ञे पुनरुत्पत्तिः स्मर्यते । सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वयं रुद्राय वरदानात्स्कन्दत्वेन प्रादुर्बभूव । एवमेव दक्षनारदप्रभृतीनां भूयसी देहान्तरोत्पत्तिः कथ्यते तेन तेन निमित्तेन स्मृतौ । श्रुतावपि मन्त्रार्थवादयोः प्रायेणोपलभ्यते । ते च केचित्प्रतिते पूर्वदेहे देहान्तरमाददते केचित्तु स्थित एव तस्मिन्योगैश्वर्यवशादनेकदेहादानन्यायेन । सर्वे चैते समधिगतसकलवेदार्थाः स्मर्यन्ते । तदेतेषां देहान्तरोत्पत्तिदर्शनात्प्राप्तं ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वेति ।

नारम्भं परिहरति—उपपन्नेति । विदुषामपि केषांचिदमुक्तेः संशयसिद्धिरित्युपपत्तिमेव दर्शयति—ब्रह्मेति । दर्शनमेव विशदयति—तथा हीति । सर्वेषामेव तेषां कर्मनिष्ठत्वमाशङ्क्योक्तम्—सनत्कुमारोऽपीति । उक्तन्यायमतिदिशति—एवमिति । स्मृतेर्मूलाभावादप्रामाण्यमाशङ्क्याऽऽह—श्रुताविति । उपलभ्यते पूर्वोक्ता कथेति शेषः । सनत्कुमारादीनां पूर्वदेहत्यागान्न देहान्तरोत्पत्तिरित्याशङ्क्याऽऽह—ते चेति । एकस्यैव मायाविनो युगपदनेकदेहादानदृष्टान्तोऽनेकदेहादानन्यायः । तर्हि ते न ब्रह्मविदस्तत्राऽऽह—सर्वे चेति । अनुपलब्धिहेतुकं संशयमुपसंहरन्विचारोपपत्तिं निगमयति—तदेतेषामिति । निर्गुणविद्यायां गतिं प्रतिषिध्य सगुणविद्यायां तत्प्रयोजनैश्वर्यविशेषदर्शनादर्थवती सर्वत्र गतिरित्युक्ते निर्गुणविद्यायामपि मोक्षासिद्धेरैश्वर्यफलत्वे वाच्ये गतिरुपसंहर्तव्येति पूर्वपक्षमाह—अहेतुत्वमिति । वाशब्दोऽवधारणे । ब्रह्मविद्या न संसारविरोधिनी ब्रह्मविद्यात्वाद्वसिष्ठादिनिष्ठब्रह्मविद्यावत् । न च तस्य तावदेव चिरमित्यादिश्रुतिविरोधः प्रशंसार्थतया तदुपपत्तेरिति भावः । निचाय्य तमित्यादिश्रुतेर्ब्रह्मविद्याया मोक्षहेतुत्वोक्तौ तात्पर्यसिद्धेः स्तुति-

---

१ ङ. ञ. स्मरणम् । २ क. ङ. ज ञ. 'नसानां पु' । ३ घ. झ. ट. श्रूयते । ४ क. ङ. ज. ञ. ट. 'रप्रदा' । ५ ङ. ञ. 'तीनामपि भृ' । ६ क. ङ. ञ. 'त्पत्तिकथा ते' । ७ ङ. ञ.'न भवति स्मृ' । ८ ट. सर्ववे' । ९ झ. 'निष्ठात्व' । १० क. ठ. ड. 'देहत्या' । ११ क. ख. ठ. ड. 'हिं न ते ब्र' । १२ क. ख. झ. 'ह । हें' ।

(ब्रह्मतत्त्वज्ञानिनां मुक्तौ नियतत्वं न पाक्षिकत्वम् , अधि० १९)

अत उत्तरमुच्यते–न, तेषामपान्तरतमःप्रभृतीनां वेदप्रवर्तनादिषु लोकस्थितिहेतुष्वधिकारेषु नियुक्तानामधिकारतन्त्रत्वात्स्थितेः । यथाऽसौ भगवान्सविता सहस्रयुगपर्यन्तं जगतोऽधिकारं चरित्वा तदवसान उदयास्तमयवर्जितं कैवल्यमनुभवति, " अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता " [छा० ३-११-१] इति श्रुतेः । यथा च वर्तमाना ब्रह्मविद आरब्धभोगक्षये कैवल्यमनुभवन्ति, "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" [छा०६-१४ २] इति श्रुतेः । एवमपान्तरतमःप्रभृतयोऽपीश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः सन्तः सत्यपि सम्यग्दर्शने कैवल्यहेतावक्षीणकर्माणो " यावदधिकारम् " अवतिष्ठन्ते । तदवसाने चापवृज्यन्त इत्यविरुद्धम् । सकृत्प्रवृत्तमेव हि ते फलदानाय कर्माशयमतिवाहयन्तः स्वातन्त्र्येणैव गृहादिव गृहान्तरमन्यमन्यं देहं संचरन्तः स्वाधिकारानि-

---

मात्रत्वानुपपत्तेर्वसिष्ठादीनां ब्रह्मविदामधिकारप्रतिबन्धान्मुक्त्यभावस्यान्यथा सिद्धेरप्रतिबद्धाया विद्याया न मोक्षं प्रत्यहेतुतेति कुतो गत्युपसंहार इत्युक्त्वा वाक्यार्थधीहेतुनिरूपणात्पादादिसंगतिः । पूर्वपक्षे धियो मोक्षाहेतुत्वाद्गत्युपसंहारः । सिद्धान्ते तस्यास्तद्धेतुत्वध्रौव्यात्तदनुपसंहार इत्यभिप्रेत्य सिद्धान्तयति—अत इति । ब्रह्मविद्याया मोक्षं प्रत्यहेतुत्वं निषेधति—नेति । ब्रह्मवित्स्वेव केषुचिन्मोक्षादृष्टेरहेतुत्वं कथं निषिध्यत इत्याशङ्क्य प्रतिबन्धाभावमपेक्ष्य विद्या मोक्षहेतुरिति मत्वाऽऽह–तेषामिति । यावदधिकारं तावदवस्थितिरित्यत्र दृष्टान्तमाह—यथेति । तत्र मानमाह—अथेति । आधिकारिकैश्वर्यहेतुकर्मक्षयानन्तरं ततः पश्चादूर्ध्वो विलक्षणः सन्नुदेत्योद्गम्य पुनरादित्यो नैवोदेता नास्तमेता किं त्वेकल एवाद्वितीयो मध्ये स्वात्मनि स्थाता स्यादित्यर्थः । तत्रोदाहरणान्तरमाह—यथा चेति । तत्रापि मानमाह—तस्येति । दृष्टान्तयोरर्थं दार्ष्टान्तिके योजयति—एवमिति । ब्रह्मविदोऽपि देहान्तरप्राप्तिः प्रारब्धकर्मातिरिक्तकर्मकृता देहान्तरप्राप्तित्वादविद्वद्देहान्तरप्राप्तिवदित्याह—सकृदिति । देहान्तरं कर्मान्तरायत्तमिति न व्याप्तिरेकस्मादपि ब्रह्मवधादेः श्वसूकराद्यनेकदेहस्मरणादित्यर्थः । किं तर्हि तेषामस्मदादिभ्यो वैषम्यं तत्राऽऽह—स्वातन्त्र्येणेति । स्वतन्त्राश्चेत्किमिति देहान्तरं गृह्णन्तीत्याशङ्क्याऽऽरब्धाधिकारफलकर्मक्षयायेत्याह—स्वाधिकारेति ।

---

१ ज. °कहे° । २ ज. °क ए° । ३ ङ. ञ. °विदः प्रार° । ४ ङ. ञ. ट. तेऽधिकारफ° । ५ क. ज. ञ. °न्त्र्येण गृ° । ६ ट. ङ. °प्राप्तिरार° ।

वर्तनायापरिमुषितस्मृतय एव देहेन्द्रियप्रकृतिवशित्वान्निर्माय देहान्युगपत्क्रमेण वाऽधितिष्ठन्ति न चैते जातिस्मरा इत्युच्यन्ते त एवैते इति स्मृतिप्रसिद्धेः। यथा हि[1] सुलभा[2] नाम ब्रह्मवादिनी जनकेन विवदितुकामा व्युदस्य स्वं देह[3]मजानंकं देहमाविश्य व्युद्य तेन पश्चात्स्वमेव देहमाविवेशेति स्मर्यते। यदि ह्युपयुक्ते सकृत्प्रवृत्ते कर्मणि कर्मान्तरं देहारम्भकारणमाविर्भवेत्ततोऽन्यदप्यदग्धबीजं कर्मान्तरं तद्वदेव प्रसज्येतेति ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वा शङ्क्येत न त्वियमाशङ्का युक्ता ज्ञानात्कर्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात्। तथा हि श्रुतिः—

" भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे "

[मुण्ड० २-२-८] इति। " स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः " [छा० ७ २६-२] इति चैवमाद्या। स्मृतिरपि—

" यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा "

[भ० गी० ४-३७] इति।

" बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः।
ज्ञानदग्धैस्तथा क्लेशैर्नाऽऽत्मा संपद्यते पुनः "

देहान्तरग्रहे स्मृतिभ्रंशः स्यादित्याशङ्क्याऽऽह—अपरिमुषितेति। तथाऽपि देहादिपारतन्त्र्यमाशङ्क्याऽऽह—देहेति। तथाऽपि कथमनेकेषु देहेष्वधिष्ठातृत्वं तत्राऽऽह—निर्मायेति। उत्पद्यमानानामपरिमुषितस्मृतित्वेऽपि जातिस्मरत्वमेव न वसिष्ठादिनामत्वमित्याशङ्क्याऽऽह—न चेति। ब्रह्मविदां स्वातन्त्र्येण देहान्तरसंचारे दृष्टान्तमाह—यथेति। व्युद्य विवादं कृत्वा। कथमेतावता ज्ञानस्य नियतफलत्वमित्याशङ्क्य व्यतिरेकेणैतदुपपादयति—यदीति। कर्मान्तरमारब्धकर्मातिरिक्तं कर्मेति यावत्। देहान्तरं वर्तमानदेहातिरिक्तो भाविदेहः। ज्ञानस्यैकान्तिकफलत्वं व्यतिरेकतः श्रुतिस्मृतिभ्यामुक्त्वा क्रमेण श्रुतिस्मृती दर्शयति—तथा हीत्यादिना। अनादिभवपरम्परासंचितस्यानियतकालविपाकस्य कर्मणोऽसंख्यत्वात्कुतो

---

१ ङ. ज. ञ. 'था सु। २ क. च। ३ क. 'भा च ब्र'। ज. ञ. ट. 'भा ब्र'। ४ झ. 'हं जन'। ५ क. ज. झ. ट. 'नकमा'। ६ ञ. 'श्चात्तं स्वमा'। ७ ज. ट. 'त्स्वयमेवाऽऽवि'। ८ क. 'क्लेष्व'।

(ब्रह्मतत्त्वज्ञानिनां मुक्तौनैयतत्यं न पाक्षिकत्वम्, अधि० १९)

इति चैवमाद्या। न चाविद्यादिक्लेशदाहे सति क्लेशबीजस्य कर्माशयस्यैकदेशदाह एकदेशप्ररोहश्चेत्युपपद्यते। न ह्यग्निदग्धस्य शालिबीजस्यैकदेशप्ररोहो दृश्यते। प्रवृत्तफलस्य तु कर्माशयस्य मुक्तेषोरिव वेगक्षयान्निवृत्तिः, " तस्य तावदेव चिरम् " [छा० ६.१४.२] इति शरीरपातावधिक्षेपकरणात्। तस्मादुपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः। न च ज्ञानफलस्यानैकान्तिकता। तथा च श्रुतिरविशेषेणैव सर्वेषां ज्ञानान्मोक्षं दर्शयति-" तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम् " [बृ० १.४.१०] इति। ज्ञानान्तरेषु चैश्वर्यादिफलेष्वासक्ताः स्युर्महर्षयः। ते पश्चादैश्वर्यक्षयदर्शनेन निर्विण्णाः परमात्मज्ञाने परिनिष्ठाः कैवल्यं प्रापुरित्युपपद्यते।

" ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् "

निःशेषकर्मक्षयस्तत्राऽऽह—न चेति। नाशपुष्कलहेतुयोगे नाशस्यैकदेशस्यार्थक्रियाभावे दृष्टान्तमाह—न हीति। तर्हि प्रारब्धमपि कर्म नाशहेतुसांनिध्यान्नश्येदिति कुतो वसिष्ठादेर्देहधारणेत्याशङ्क्याऽऽह—प्रवृत्तेति। यथा मुक्तस्येषोर्बलवत्प्रतिबन्धकाभावे मध्ये न क्षयस्तथा प्रवृत्तफलस्यापि कर्मणो मध्ये नास्ति क्षयः। जातेऽपि ज्ञाने मोक्षस्य देहपातावधिकरणादारब्धकर्मोपादानाज्ञाननिवर्तने तस्यासामर्थ्यात्। अतः श्रुतिस्मृतिप्रामाण्यादनारब्धमेव कर्म नश्यति न त्वारब्धमित्यर्थः। अप्रवृत्तफलकर्मनिवृत्तावपि प्रवृत्तफलस्य कर्मणो न भोगादृते निवृत्तिरिति स्थिते ज्ञानिनोऽपि देहान्तरं ज्ञानस्यैकान्तिकफलत्वं चाविरुद्धमित्युक्तमुपसंहरति—तस्मादिति। कर्मज्ञानाधिकृतानां मनुष्याणामेव तर्हि मोक्षो नान्येषां तदभावादित्याशङ्क्याऽऽह—तथा चेति। किं चाऽऽधिकारिकेषु केषुचिदमुक्त्या ज्ञानस्यानैकान्तिकफलत्वं किंवा सर्वेषु तेष्विति विकल्प्याऽऽद्ये पूर्वोक्तसमाधिं सिद्धवत्कृत्य द्वितीयं प्रत्याह—ज्ञानान्तरेष्विति। तेषां ज्ञानाभावादेवामुक्तिरित्यर्थः। ऐश्वर्यभेदस्त्वादिशब्दार्थः। तर्हि तेषामैश्वर्यासक्तानां न कदाचिन्मुक्तिस्तत्राऽऽह—ते पश्चादिति। निर्विण्णा विरक्ताः। तेषां क्रममुक्तौ मानमाह-ब्रह्मणेति। प्रतिसंचरो महाप्रलयः। कृतात्मानः संस्कृतान्तः-

---

१ ट. 'स्य क'। २ ङ. ज. ञ. पातक्षे'। ३ ट. 'था श्रु'। ४ ङ. ञ. 'थो दे'। ५ ञ. 'म'। ६ ङ. ञ. 'निष्ठाय कै'। ७ ङ. ञ. 'त्यं वयुरि'।

इति स्मरणात् । प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशङ्कानुपपत्तिः । कर्मफले हि स्वर्गादावनुभवानारूढे स्यादाशङ्का भवेद्वा न वेति । अनुभवारूढं तु ज्ञानफलम् " यत्साक्षादपरोक्षाद्ब्रह्म " [बृ० ३-४-१] इति श्रुतेः । " तत्त्वमसि " [छा० ६-८-७] इति सिद्धवदुपदेशात् । न हि " तत्त्वमसि " [छा० ६-८-७] इत्यस्य वाक्यस्यार्थस्तत्त्वं मृतो भविष्यसीत्येवं परिणेतुं शक्यः । " तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च " [बृ० १-४-१०] इति च सम्यग्दर्शनकालमेव तत्फलं सर्वात्मत्वं दर्शयति । तस्मादैकान्तिकी विदुषः कैवल्यसिद्धिः ॥ ३२ ॥ (१९)

(आत्मस्वरूपलक्षकनिषेधानां परस्परोपसंहर्तव्यत्वम्, अधि० २०)

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥ (२०)

वाजसनेयके श्रूयते—" एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहम् " [बृ० ३-८-८]

करणा ज्ञानिनः । ज्ञानस्य नियतफलत्वे हेत्वन्तरमाह—प्रत्यक्षेति । भुजिवद्धियोऽन्वयव्यतिरेकसिद्धफलत्वान्न फलाभावशङ्केत्यर्थः । उक्तमर्थं व्यतिरेकद्वारा स्फोरयति—कर्मेति । ज्ञानफले तुल्यमनुभवानारूढत्वमित्याशङ्क्याऽऽह—अनुभवेति । तत्कथमित्यपेक्षायां प्रत्यक्षवस्तुविषयत्वादित्याह—यदिति । परिनिष्पन्नवस्तुविषयत्वाच्च ज्ञानस्य प्रत्यक्षफलतेत्याह—तत्त्वमिति । उपास्तिसाध्यत्वाद्ब्रह्मभावस्यासिद्धं ज्ञानस्य परिनिष्पन्नविषयत्वमित्याशङ्क्याऽऽह—न हीति । वर्तमानापदेशस्य भविष्यदर्थता मृतशब्दाध्याहारश्चायुक्त इत्यर्थः । इतश्च ज्ञानस्यैकान्तिकफलतेत्याह—तद्धेति । अव्यवहिते क्रियाहेतौ शातुर्विधानात्पुष्कलहेतुत्वं सर्वात्मत्वं प्रति सम्यग्धियः सिद्धमित्यर्थः । श्रुतिस्मृतिन्यायसिद्धमर्थमुपसंहरति—तस्मादिति ॥ ३२ ॥ (१९)

आधिकारिकाणामारब्धकर्मवशाद्देहान्तरारम्भासिद्धेर्न कर्मान्तरनिमित्ततेत्युक्तम् । तथेहापि तत्तत्प्रकरणाधीतनिषेधैरेवोपलक्षणतया सर्वद्वैतनिषेधसिद्धेर्न शाखान्तरीयनिषेधानां तत्र ब्रह्मप्रमितिहेतुतेत्याशङ्क्याऽऽह—अक्षरेति । विषयं वक्तुं वाक्यमुदाहरति—वाजसनेयक इति । अन्यत्रापीत्यदृश्येऽनात्म्य इत्यादाविति यावत् । निषेधमुखेन

---

१ ङ. ञ. स्यादपि कदाचिदा । २ ङ. ञ. °ति सं । ३ क. ले तु तुं । ४ ङ. शतविधा° । ५ ख. °सिद्धं कर्मोपं । ६ क. °द्धमुं । ७ ञ. °रिणा° । ८ क. ख. °धीनानि° । ९ क. ख. °क्षणार्थत° । १० ठ. ड. °त्र ब्राह्ममि° ।

(आत्मस्वरूपलक्षकनिषेधानां परस्परोपसंहर्तव्यत्वम्, अधि० २०)

इत्यादि । तथाऽऽथर्वणे श्रूयते—" अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम् " [मुण्ड० १-१-६] इत्यादि । तथैवान्यत्रापि विशेषनिराकरणद्वारेणाक्षरं परं ब्रह्म श्राव्यते । तत्र च क्वचित्केचिदतिरिक्ता विशेषाः प्रतिषिध्यन्ते । तासां विशेषप्रतिषेधबुद्धीनां किं सर्वासां सर्वत्र प्राप्तिरुत व्यवस्थेति संशये श्रुतिविभागाद्व्यवस्थाप्राप्तावुच्यते—अक्षरविषयास्तु विशेषप्रतिषेधबुद्धयः सर्वाः सर्वत्रावरोद्धव्याः "सामान्यतद्भावाभ्याम्" । समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारः । तदेव च सर्वत्र प्रतिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते । तत्र किमन्यत्र कृता बुद्धयोऽन्यत्र न स्युः । तथा च " आनन्दादयः प्रधानस्य " [ब्र० सू० ३-३-११] इत्यत्र व्याख्यातम् । तत्र विधिरूपाणि विशेषणानि चिन्तिता-

---

ब्रह्मवादितत्तद्वाक्यस्थापुनरुक्तशब्दान्विषयत्वेन परिशिनष्टि—तत्रेति । तानधिकृत्य न्यायसंभवोपकारासंभवाभ्यां संशयमाह—तासामिति । बुद्धिग्रहणं तत्पूर्वकशब्दोपलक्षणार्थम् । विद्यैक्येऽपि शरीरानुपसंहारवदनुपसंहारो निषेधशब्दानामिति पूर्वपक्षयति—श्रुतीति । तत्र श्रुतानामेव निषेधशब्दानामुपलक्षणत्वेनाशेषद्वैतनिषेधद्वारा निर्विशेषब्रह्मोक्तिसामर्थ्यादित्यर्थः । अपुनरुक्तनिषेधशब्दोपसंहारोक्तिद्वारा वाक्यार्थधीहेतुवादात्पादादिसंगतिः । पूर्वपक्षे श्रुतेरेव निषेधैरुपलक्षणतया सर्वनिषेधे निर्विशेषब्रह्मप्रमित्या लाघवम् । सिद्धान्ते लक्षणैकदेशपरिशेषौ परिहृत्य निर्विशेषब्रह्मप्रमितिनैराकाङ्क्ष्यमिति मत्वा सिद्धान्तयति—उच्यत इति । अक्षरे धर्मिणि द्वैतनिषेधधियोऽक्षरस्य धिय इत्यर्थकं सूत्रपदं व्याचष्टे—अक्षरेति । तत्र हेतुमवतार्य विभजते—सामान्येति । आरोपितविशेषनिरासेन ब्रह्मोक्तेस्तत्र तत्र तुल्यत्वाद्ब्रह्मणश्च प्रतिपाद्यस्य सर्वत्रैक्येन प्रत्यभिज्ञानात्तद्योगिनां शब्दप्रत्ययानामुपसंहार इत्यर्थः । श्रुतकतिपयनिषेधैरेव सर्वनिषेधोपलक्षणात्किमुपसंहारेणेत्याशङ्क्याऽऽह—तत्रेति । अन्यत्रेति शाखाभेदोक्तिः । अनुपसंहारश्चेदश्रुतद्वैतनिषेधाय तत्र तत्र कतिपयनिषेधशब्दानां लक्षणा द्वैतैकदेशशेषो वा स्यात्ततो वरं द्वैतनिषेधात्कृत्स्नशब्दोपसंहारेणैकवाक्यत्वमित्यर्थः । तत्रानुग्राहकन्यायं दर्शयति—तथा चेति । तर्हि पुनरुक्तिरित्याशङ्क्य भावाभावधर्मविषयतया परिहरति—तत्रेति । तथाऽपि न्यायसाम्यात्त-

---

१ ट. तथाऽन्य° । २ ज. °रं ब्र° । ३ क. ङ. अ. °त्र क्व° । ४ ट. °गात्तु व्यव° । ५ ङ. अ. °रधियस्तु । ६ ङ. अ. च हि स° । ७ क. ङ. ज. अ. ट. किमित्यन्यः । ८ घ. ङ. श्रुता । ९ ठ. ङ. °रुक्तिद्वा° । १० क. °गतयः । पू° । ११ ठ. ङ. °षप्र° । १२ ख. °रधि° । १३ ख. °त्यर्थं सू° । ठ, ङ. °त्यत्र सू° । १४ क. ख. °नां शाब्दं° ।

नीह प्रतिषेधरूपाणीति विशेषः । प्रपञ्चार्थश्चायं चिन्ताभेदः । "औपसदवत्" इति निदर्शनम् । यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदितासु पुरोडाशप्रदानमन्त्राणाम् "अग्नेर्वैहोत्रं वेरध्वरम्" [तैत्ति० ३ २१-१०-१] इत्येवमादीनामुद्गातृवेदोत्पन्नानामप्यध्वर्युभिरभिसंबन्धो भवति । अध्वर्युकर्तृकत्वात्पुरोडाशप्रदानस्य प्रधानतन्त्रत्वाच्चाङ्गानाम् । एवमिहाप्यक्षरतन्त्रत्वात्तद्विशेषणानां यत्र क्वचिदप्युत्पन्नानामक्षरेण सर्वत्राभिसंबन्ध इत्यर्थः । तदुक्तं प्रथमे काण्डे—"गुणमुख्यव्यतिक्रमे तदर्थत्वान्मु-

---

दवस्थं पौनरुक्त्यं तत्राऽऽह—प्रपञ्चेति । ब्रह्मस्वरूपत्वादानन्दाद्युपसंहारेऽपि निषेधानामनात्मत्वान्निषेध्यानन्त्येनाऽऽनन्त्याच्चैकत्रोपसंहारायोगात्किंचिन्निषेधेनान्यलक्षणायां च श्रुतेनैव सिद्धेरुपसंहारानर्थक्याच्च निषेधोपसंहारसिद्धिरित्याशङ्क्य निषेधानामनात्मत्वेऽप्यात्मलक्षणतया तत्प्रमित्यर्थं सार्वत्रिकत्वान्निषेध्यद्वैतस्य भूतभौतिकत्वादिरूपस्य मितत्वेन तत्रापि मितिसिद्धेरुपसंहारः स्यादित्यभिप्रेत्योक्तम्—प्रपञ्चार्थश्चेति । शाखान्तरोक्तानामपि प्रधानयोगिनामुपसंहार इत्यत्र दृष्टान्तमाह—औपसदवदिति । निदर्शनं विवृणोति—यथेति । जमदग्निः पुष्टिकामश्चतूरात्रेण यैजेतेत्युत्पन्ने जामदग्न्येऽहीने पुरोडाशिन्य उपसदो भवन्तीति तैत्तिरीये पुरोडाशयुक्तासूपसत्स्विष्टिषूपदिष्टासु पुरोडाशप्रदानमन्त्राणामुद्गातृवेदोत्पन्नानामुद्गात्रा प्रयोगे प्राप्तेऽध्वर्युप्रदानके पुरोडाशे विनियोगात्तस्य चोत्पत्त्यपेक्षायाः प्राधान्यात्तदनुरोधेनाध्वर्युणैव तेषां प्रयोगो नोद्गात्रेत्यर्थः । उक्तमर्थं दार्ष्टान्तिके योजयति—एवमिति । अत्रैवोदाहरणान्तरविवक्षया तार्तीयं सूत्रमुदाहरति—तदुक्तमिति । याजुर्वेदिकेऽग्न्याधाने य एवं विद्वानग्निमाधत्त इति श्रुतेस्तदङ्गत्वेन य एवं विद्वान्वारवन्तीयं गायति य एवं विद्वान्यज्ञायज्ञीयं गायति य एवं विद्वान्वामदेव्यं गायतीति तत्रैव सामगानं श्रुतं, तत्र किमेतानि वारवन्तीयादीनि सामवेदोत्पन्नत्वात्तत्रोत्पन्नैश्चैस्त्वेन स्वरेणाऽऽधाने प्रयोक्तव्यानि किंवा यत्र विनियुज्यन्ते तत्रोत्पन्नोपांशुत्वेनेति संदेहे सत्युत्पत्तिविधिनैवापेक्षितोपायत्वात्मना विहितत्वादङ्गानां तस्यैव प्राधान्यात्तन्निमित्तोच्चैः स्वरे प्राप्ते प्रत्याह—गुणेति । उत्पत्तिविधिर्गुणो विनियोगविधिर्मुख्यस्तयोर्व्यतिक्रमो विरोध उत्पत्तिविध्यालोचनयोच्चैस्त्वं विनियोगविध्यालोचनयोपांशुत्वमिति तस्मिन्व्यतिक्रमे सति मुख्येन प्रधानेन विनियुज्यमानेन रूपेण वारवन्तीयादेर्वेदस्य संयोगो ग्राह्यो नोत्पद्यमानत्वेन गुणेनेति प्रतिज्ञायां हेतुमाह—तदर्थत्वादिति । उत्पद्यमानस्य विनियुज्यमानार्थत्वाद्यद्यपि सामवेदे सामानि विहितानि तथाऽपि तद्वाक्यानां तदुत्पत्तिमात्रपरत्वं विनियोगस्य याजुर्वेदिकवाक्यैरेव प्राप्तेस्तत एव

---

१ क. ग. °शेषप्र° । २ ट. °र्युभिः सं° । ३ ठ. ड. यजत इत्यु° । ४ क. ठ. ड. °पेक्षया प्रा° ।

(ऋतं पिबन्तौ द्वा सुपर्णावितिमन्त्रयोर्वैद्यैक्यम्, अधि० २१)

रूपेण वेदसंयोगः " [जै० सू० ३-३-९] इत्यत्र ॥ ३३ ॥ (२०)

(ऋतं पिबन्तौ द्वा सुपर्णावितिमन्त्रयोर्वैद्यैक्यम्, अधि० २१)

इयदामननात् ॥ ३४ ॥ (२१)

" द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति " [मुण्ड० ३-१-१ श्वे० ४ ६] इत्यध्यात्माधिकारे मन्त्रमाथर्वणिकाः श्वेताश्वतराश्च पठन्ति । तथा कठाः—" ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः " [कठ० ३-१] इति । किमत्र विद्यैकत्वमुत विद्यानानात्वमिति संशयः । किं तावत्प्राप्तं विद्यानानात्वमिति । कुतः । विशेषदर्शनात् । द्वा सुपर्णेत्यत्र ह्येकस्य भोक्तृत्वं दृश्यत एकस्य चाभोक्तृत्वं दृश्यते । ऋतं पिबन्ताविति[3]त्वत्रोभयोरपि भोक्तृ[4]त्वमेव दृश्यते तद्वैद्यरूपं

समीहितार्थप्रतिलम्भात्तदर्थान्येवोत्पत्तिवाक्यानीति तस्यैव स्वरस्यार्थसंस्पर्शिनो ग्रहणमित्यर्थः । उदाहरणान्तरं तु समानन्यायतया दर्शितमिति न शाबरविरोधः ॥३३॥(२०)

प्रतिपाद्यब्रह्मप्रत्यभिज्ञानाज्ज्ञानैक्येऽक्षरधियामुपसंहारवत्प्रतिपाद्यभेदाद्विद्याभेदः स्यादित्याशङ्क्याऽऽह—इयदिति । गुहां प्रविष्टावित्यत्र सिद्धार्थमपि वाक्यमुपसंहारानुपसंहारप्रसङ्गात्पुनरुदाहरति—द्वा सुपर्णेति । तथाविधमेव काठकवाक्यमपि पठति—तथेति । मन्त्रद्वयं विषयीकृत्य प्रतिपादनप्रकारभेदाद्विद्याभेदमानात्प्रतिपाद्यासंसार्यात्मदृष्टेस्तदैक्यदृष्टेश्च संशयमाह—किमिति । मन्त्रद्वयेऽपि विद्यैक्योक्त्या वाक्यार्थधीहेतोरेवोक्तत्वात्पादादिसंगतिः । पूर्वपक्षे गुणानुपसंहारः सिद्धान्ते तदुपसंहार इत्यङ्गीकृत्य विमृश्य पूर्वपक्षमाह—किं तावदिति । अथैक्यदृष्टेर्न विद्यानानात्वमिति शङ्कते—कुत इति । रूपभेददृष्टेरर्थैक्यधीरसिद्धेत्याह—विशेषेति । तदेव विवृणोति—द्वा सुपर्णेति । भोक्तृभोक्त्रे द्वा सुपर्णेत्यत्र वेद्यता भोक्तृरेवान्यत्रेति वेद्यभेदाद्विद्याभेदः । न च च्छत्रिन्यायेन पिबन्ताविति लक्षणा मुख्यसंभवे तदयोगात् । न च वाक्यशेषालक्षणोपक्रमस्य मुख्यलाक्षणिकग्रहणविषये तुल्यबलत्वाभावादेव संशयानुपपत्तेः । न च प्रकरणं लक्षणाबीजं वाक्येन बाधादिति मत्वोपसंहरति—तादिति । मन्त्रयोर्विद्यानाना-

---

१ क. ज. 'रार्धे । छा' । २ क. ङ. ज ञ. ट. 'कृतत्वम् । ऋ' । ३ क. ङ. 'त्यत्र तूभ' । ४ ङ. ञ. 'कृतृत्वं दृ' । ५ ठ. शाबर' । ६ ठ. 'पाद्यादि' । ७ क. ख. 'हारप्र' । ८ क. ख. 'क्यमिति प' । ९ ठ. ङ. 'ष्टेश्च' ।

भिद्यमानं विद्यां भिन्द्यादित्येवं प्राप्ते ब्रवीति—विद्यैकत्वमिति । कुतः । यत उभयोरप्यनयोर्मन्त्रयोरियत्तापरिच्छिन्नं द्वित्वोपेतं वेद्यं रूपमभिन्नमामनन्ति । ननु दर्शितो रूपभेदः । नेत्युच्यते । उभावप्येतौ मन्त्रौ जीवद्वितीयमीश्वरं प्रतिपादयतो नार्थान्तरम् । " द्वा सुपर्णा " इत्यत्र तावत् "अनश्नन्नन्यो अभिचाकशीति" इत्यशनायाद्यतीतः परमात्मा प्रतिपाद्यते । वाक्यशेषेऽपि च स एव प्रतिपाद्यमानो दृश्यते । " जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानम् " [श्वे० ४-७] इति । "ऋतं पिबन्तौ " इत्यत्र तु जीवे पिबत्यशनायाद्यतीतः परमात्माऽपि साहचर्याच्छत्रिन्यायेन पिबतीत्युपचर्यते । परमात्मप्रकरणं चैतत् " अन्यत्र धर्मादन्यत्राधर्मात् " [कठ० २-१४] इत्युपक्रमात् । तद्विषय एव चात्रापि वाक्यशेषो भवति " यः सेतुरीजानानामक्षरं ब्रह्म यत्परम् " [कठ० ३-२] इति । " गुहां प्रविष्टावात्मानौ हि " [ब्र० सू० १-२-११] इत्यत्र चैतत्प्रपञ्चितम् । तस्मान्नास्ति वेद्यभेदस्तस्माच्च विद्यैकत्वम् । अपि च त्रिष्वप्येतेषु

त्वमनुपसंहारश्चेति पक्षमनूद्य बहिरेव सिद्धान्तमाह—एवमिति । तत्र प्रश्नपूर्वकं हेतुत्वेन सूत्रं योजयति—कुत इति । इयत्तापरिच्छिन्नमित्येतदेव व्याचष्टे—द्वित्वेति । रूपभेदाद्विद्याभेदं स्मारयति—नन्विति । रूपभेदासिद्ध्या प्रत्याह—नेति । अर्थान्तरशब्देन जीवो गृह्यते । जीवानुवादेन तद्याथार्थ्यं परमात्मतत्त्वं प्रतिपाद्यमित्येतदाथर्वणादिमन्त्रे साधयति—द्वा सुपर्णेति । तत्र वाक्यशेषमनुकूलयति—वाक्येति । तमेव दर्शयति—जुष्टमिति । तथाऽपि काठके भोक्त्रोरेवोक्तेर्नेश्वरार्थतेत्याशङ्क्याऽऽह—ऋतमिति । मन्त्रद्वयेऽपि द्वित्वसंख्यादृष्टेरुभयोस्तुल्यतां विना च द्वित्वसंख्यायोगाच्चेतनस्य जीवस्य परमात्मैव चेतनत्वात्तुल्य इति पिबन्ताविति शेषस्य लक्षणा बलादायातीत्यर्थः । किंच प्रकरणादपि परमात्मैवात्र भातीत्याह—परमात्मेति । उपक्रमवदुपसंहारोऽपि तद्विषय एवेत्याह—तादिति । अत्रापीत्यपिशब्दादाथर्वणिकादिवाक्यं दृष्टान्त्यते । उपक्रमोपसंहारैकरूप्यान्मध्यमपि तथा नेयमिति भावः । सिद्धार्थत्वाच्च मन्त्रद्वयस्य परविषयतेत्याह—गुहामिति । मन्त्रद्वयस्य परमात्मैकार्थत्वाद्रूपभेदाद्विद्याभेदो नेति निगमयति—तस्मादिति । न केवलं मन्त्रद्वयमेव परविषयं किंतु तत्संनिध्यान्नातं सर्वमपि मन्त्रजातमित्याह—अपि चेति । आथर्वणिकश्वेताश्वतरकाठकविवक्षया त्रिष्वित्युक्तम् ।

---

१ ङ. ज. ट. 'भिद्यादि' । २ क. ङ. ज. ञ. वेद्यरू । ३ ङ. ञ. 'यातीं' । ४ क. ङ. ज. ञ. ट. 'शम्' । ५ ङ. ञ. 'पि तत्साह' । ६ ठ. ड. 'त्मत्वं प्र' । ७ ठ. 'द्रूपभे' ।

(एकशाखास्थोषस्तकहोलब्राह्मणयोर्विद्यैक्यप्रतिपादनम् , अधि० २२)

वेदान्तेषु पौर्वापर्यालोचने परमात्मविद्यैवावगम्यते तादात्म्यविवक्षयैव जीवोपादानं नार्थान्तरविवक्षया। न च परमात्मविद्यायां भेदाभेदविचारावतारोऽस्तीत्युक्तम्। तस्मात्प्रपञ्चार्थ एवैष योगः। तस्माच्चाधिकधर्मोपसंहार इति ॥ ३४ ॥ (२१)

(एकशाखास्थोषस्तकहोलब्राह्मणयोर्विद्यैक्यप्रतिपादनम् , अधि० २२)

अन्तरा भूतग्रामवत्स्वात्मनः[1] ॥ ३५ ॥

"यत्साक्षादपरोक्षाद्ब्रह्म" "य आत्मा सर्वान्तरः" [बृ० ३-४-१-३-५-१] इत्येवं द्विरुपस्तकहोलप्रश्नयोर्नैरन्तर्येण वाजसनेयिनः समामनन्ति। तत्र संशयः—विद्यैकत्वं वा स्याद्विद्यानानात्वं वेति[3]। विद्यानानात्वमिति तावत्प्राप्तम्[4]। अभ्याससामर्थ्यात्। अन्यथा ह्येनूनानतिरिक्तार्थे[5] द्विरान्नानमनर्थकमेव स्यात्। तस्माद्यथाऽभ्यासात्कर्मभेद एवमभ्यासाद्विद्याभेद इत्येवं

किमिति तर्हि जीवोपादानं तदाह—तादात्म्येति। ऐक्यं वक्तुं जीवोऽनूद्यत इत्यर्थः। तदनुवादेन परप्रतिपादनेऽपि कुतो विद्यैक्यं तत्राऽऽह—न चेति। प्रागेव मन्त्रद्वयस्य सिद्धार्थत्वे किमनेनाधिकरणेनेत्याशङ्क्याऽऽह—तस्मादिति। गुणोपसंहारप्रस्तावे मन्त्रद्वयविवरणं कुत्रोपयुक्तं तत्राऽऽह—तस्माच्चेति ॥ ३४ ॥ (२१)

मन्त्रयोरर्थभेदोक्तिप्रसङ्गेन ब्राह्मणयोरपि तुल्यार्थतामाह—अन्तरेति। बृहदारण्यके पाञ्चमिकं ब्राह्मणद्वयमुदाहरति—यादिति। घटादि संवित्कर्मत्वेनापरोक्षं ब्रह्म तु साक्षादपरोक्षं तदेव प्रत्यगात्मेत्याह—य इति। स च सर्वान्तरो ब्रह्मणि सिद्धस्य सर्वान्तरत्वस्याऽऽत्मनि स्थितस्य चापरोक्षत्वस्य ब्रह्मणि संकीर्तनादुभयोरैक्यमित्यर्थः। तन्मे व्याचक्ष्वेति शेषः। ब्राह्मणद्वयं विषयीकृत्याभ्यासात्सर्वान्तरत्वप्रत्यभिज्ञानाच्च संशयमाह—तत्रेति। पिबन्तावित्यस्य लाक्षणिकत्वं गृहीत्वा मन्त्रयोर्भोक्त्रभोक्तृपरत्वेनाऽऽत्मैक्याद्विद्यैक्यमुक्तम्। इह त्वर्थैक्येऽपि न विद्यैक्यमभ्यासादिति पूर्वपक्षमाह—विद्येति। हेतुं व्यतिरेकतः स्फोरयति—अन्यथेति। एकस्यैव पुनःश्रुतिरविशेषादनर्थकं[10] हि स्यादितिन्यायाद्यजत्यभ्यासे[11] पूर्वकर्मभेदवद्विद्याभेद इत्युपसंहरति—तस्मादिति। ब्राह्मणयोरेकार्थत्वेन विद्यैक्योक्त्या वाक्यार्थधीहेतोरेवात्र चिन्तनात्पादादिसंगतिः। पूर्वपक्षे विद्याभेदाद्गुणानुपसंहारः। सिद्धान्ते तदैक्यात्तदुपसंहाराऽसिद्धिरिति सिद्धवत्कृत्य सिद्धान्तयति—एवमिति। पूर्वसूत्रस्थमाननादितिपदमिहानुषक्तमित्य-

---

१ ब. °नः ॥ ३५ ॥ यः साक्षा° । २ ङ. अ. °षस्तिकं° । ३ ङ. अ. °ति । किं तावत्प्राप्तम् । वि° । ४ ङ. अ. °ति । कुतः । अ° । ५ क. ङ. अ. ट. ह्यन्यूना° । ६ क. अ. °नाति° । ७ क. ङ. अ. °क्तार्थे द्वि° । ८ ठ. ड. °ने कु° । ९ ठ. ड. °स्यैव पु° । १० ठ. °नर्थं त्वेकं स्या° । ११ ठ. ड. °से क° ।

प्राप्ते प्रत्याह—" अन्तरा "ऽऽत्मज्ञानाविशेषात् " स्वात्मनो " विद्यैकत्वमिति । सर्वान्तरो हि[1] स्वाऽऽत्मोभयत्राप्यविशिष्टः पृच्छ्यते[2] प्रत्युच्यते च । न हि द्वावात्मानावेकस्मिन्देहे सर्वान्तरौ संभवतः । तदा ह्येकस्याऽऽत्मनः सर्वान्तरत्वमवकल्प्येत[3] । एकस्य तु भूतग्रामवन्नैव सर्वान्तरत्वं स्यात् । यथा[4] च पञ्चभूतसमूहे[5] देहे पृथिव्या आपोऽन्तरा अद्भ्यस्तेजोऽन्तरमिति सत्यप्यापेक्षिकेऽन्तरत्वे नैव मुख्यं सर्वान्तरत्वं भवति[6] तथेहापीत्यर्थः । अथ वा भूतग्रामवदिति श्रुत्यन्तरं निदर्शयति[7] । यथा—

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा"[8]

[श्वे० ६-११] इत्यस्मिन्मन्त्रे समस्तेषु भूतग्रामेष्वेक एव सर्वान्तर आत्माऽऽम्नायते । एवमनयोरपि ब्राह्मणयोरित्यर्थः । तस्माद्विद्यैक्यात्[9] विद्यैकत्वमिति ॥ ३५ ॥

अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥३६॥ (२२)

अथ यदुक्तमनभ्युपगम्यमाने विद्याभेद आम्नानभेदानुपपत्तिरिति तत्परिहर्तव्यम् । अत्रोच्यते—नायं दोषः । उपदेशान्तरवदुपपत्तेः । यथा ताण्डिनामुपनिषदि षष्ठे प्रपाठके " स आत्मा तत्त्वमसि श्वेतकेतो " [छा० ६-८-७] इति नवकृत्वोऽ-[13]

ङ्गीकृत्य स्वात्मनोऽन्तराम्नानाविशेषादित्युक्तं तदेव स्फुटयति—सर्वेति । तथाऽपि कथं ब्राह्मणयोरैक्यार्थं(कार्थ्यं) तत्राऽऽह—न हीति । द्वयोः सर्वान्तरत्वायुक्ते रैक्यसिद्धेर्विद्यैक्यमित्यर्थः । कथं पुनर्द्वयोः सर्वान्तरत्वानुपपत्तिर्मनोमयत्वादिवदुपपत्तेस्तत्राऽऽह—तदा हीति । भूतग्रामदृष्टान्तं व्याचष्टे—यथेति । तमेवानूद्य विधान्तरेण व्याकरोति—अथ वेति । द्वयोः सर्वान्तरत्वायोगलभ्यमर्थमुपसंहरति—तस्मादिति ॥ ३५ ॥

पूर्वपक्षबीजमनूद्य दूषयति—अन्यथेति । तत्रानुवादं व्याकरोति—अथेति । परिहारमवतारयति—अत्रेति । नन्वोऽर्थमुक्त्वा दृष्टान्तेनाऽऽम्नानभेदोपपत्तिं सूत्रावयवार्थमाह—नेत्यादिना । तदेव विवृणोति—यथेति । दृष्टान्तोऽपि संमतो नेति

---

१ ब. ट. हि स्व आत्मो' । २ क. ट. 'ते च प्र' । ३ ङ. अ. 'रं-यं क । ४ क. ज. ट. 'कल्पेत । ५ क. ज. अ. 'था प' । ६ ङ 'हे पृ' । ७ ङ. अ. 'श्यश्च तेजोऽ' । ८ क. ज. ट. 'ब स' । ९ ङ. दर्शयति । १० ब. 'ति । एको । ११ ज. ट. 'त्मा" इत्येतस्मि' । १२ क. ङ. ज. अ. 'यैकत्वाद्वि' । १३ क. ङ. ज. अ. 'कृत्व उप' । १४ ठ. योगाल्लभ्य' ।

(उपासनार्थं पृथक्त्वेनोपास्यस्य द्वैधज्ञानम् , अधि० २३)

प्युपदेशे न विद्याभेदो भवत्येवमिहापि भविष्यति । कथं चैवकृत्वोऽप्युपदेशे विद्याभेदो न भवति । उपक्रमोपसंहाराभ्यामेकार्थतावगमात् । " भूय एव मा भगवान्विज्ञापयतु " [छा० ६-५-४] इति चैकस्यैवार्थस्य पुनः पुनः प्रतिपिपादयिषितव्यत्वेनोपक्षेपात् । आशङ्कान्तरनिराकरणेन चासकृदुपदेशोपपत्तेः । एवमिहापि प्रश्नरूपाभेदात् " अतोऽन्यदार्तम् " [बृ० ३-४-२] इति च परिसमाप्त्यविशेषादुपक्रमोपसंहारौ तावदेकार्थविषयौ दृश्येते । " यदेव साक्षादपरोक्षाद्ब्रह्म " [बृ० ३-५-१] इति द्वितीये प्रश्न एवकारं प्रयुञ्जानः पूर्वप्रश्नगतमेवार्थमुत्तरत्रानुकृष्यमाणं दर्शयति । पूर्वस्मिंश्च ब्राह्मणे कार्यकरणव्यतिरिक्तस्याऽऽत्मनः सद्भावः कथ्यते । उत्तरस्मिंस्तु तस्यैवाशनायादिसंसारधर्मातीतत्वं कथ्यते । इत्येकार्थतोपपत्तिः । तस्मादेका विद्येति ॥ ३६ ॥ (२२)

(उपासनार्थं पृथक्त्वेनोपास्यस्य द्वैधज्ञानम् , अधि० २३)

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥ (२३)

शङ्कते—**कथं चेति** । दृष्टान्ते विद्यैक्यं साधयति—**उपक्रमेति** । ऐकार्थ्यसिद्धौ हेत्वन्तरमाह—**भूय इति** । एकस्यैव भूयःशब्दात्प्रतिपाद्यत्वे पौनरुक्त्यमित्याशङ्क्याऽऽह—**आशङ्कान्तरेति** । दार्ष्टान्तिकमाह—**एवमिति** । इहेति ब्राह्मणद्वयोक्तिः । एवकारसामर्थ्यादपि विद्यैक्यमित्याह—**यदेवेति** । यत्साक्षादपरोक्षादेव न कदाचिदपि परोक्षमित्येवमेवकारो योज्यतामित्याशङ्क्य व्यवहितान्वयान्नैवमिति मत्वाऽऽह—**पूर्वेति** । कथं तर्हि पौनरुक्त्यादानर्थक्यापत्तिसमाधिस्तत्राऽऽह—**पूर्वस्मिन्निति** । उपस्तप्रश्ने कार्यकरणविरहः साध्यते यः प्राणेन प्राणितीत्यादिनिर्देशात्कहोलप्रश्ने त्वशनायादिविरहो योऽशनायापिपासे शोकं मोहमित्यादिदर्शनात्तथा चैकस्यैवाऽऽकारभेदेनोक्तौ पौनरुक्त्यं कुतस्त्यमित्याह—**इत्येकार्थतेति** । ऐकार्थ्ये फलितमाह—**तस्मादिति** ॥ ३६ ॥ (२२)

तत्त्वमसीत्येकत्वोपदेशस्योपदेशान्तरवदित्यनेन सूत्रावयवेनोदाहृतत्वात्तत्प्रसङ्गेनैकत्ववादिवाक्यान्तराणां तात्पर्यमाह—**व्यतिहार इति** । ऐतरेयकवाक्यं जाबालवाक्यं

---

१ क. ङ. ञ. च न नं° । २ क. ङ. ञ. °दो भं° । ३ क. ङ. ज. ञ. °भ्यामैकार्थ्यांव° । ४ क. °तिपादयित° । ट. °तिपत्तव्य° । ५ ङ. ञ. °तत्वें° । ६ ज. °न वाऽस° । ७ क. ज. °ति च द्वि° । ८ ङ. ञ. °येऽपि प्र° । ९ क. ङ. ज. ञ. °त्राऽऽकृ° ।

यथा "तद्योऽहं सोऽसौ योऽसौ सोऽहम्" [ऐ०आ०२-२ ४-६] इत्यादित्यपुरुषं प्रकृत्यैतरेयिणः समामनन्ति । तथा जाबालाः— "त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि" इति । तत्र संशयः— किमिह व्यतिहारेणोभयरूपा मतिः कर्तव्योतैकरूपैवेति । एकरूपैवेति तावदाह । न ह्यत्राऽऽत्मन ईश्वरेणैकत्वं मुक्त्वाऽन्यत्किंचिच्चिन्तयितव्यमस्ति । यदि चैवं चिन्तयितव्यविशेषः परिकल्प्येत संसारिणश्चेश्वरात्मत्वमीश्वरस्य संसार्यात्मत्वमिति । तत्र संसारिणस्तावदीश्वरात्मत्व उत्कर्षो भवेदीश्वरस्य तु संसार्यात्मत्वे निकर्षः कुतः स्यात् । तस्मादैकरूप्यमेव मतेः, व्यतिहाराम्नायस्त्वेकत्वदृढीकारार्थ इति । एवं प्राप्ते प्रत्याह—"व्यतिहारः" अयमाध्यानायाऽऽम्नायते । "इतरवत्" । यथेतरे गुणाः सर्वात्मत्वप्रभृतय आध्यानायाऽऽम्नायन्ते तद्वत् । तथा हि "विशिषन्ति" समाम्नातार उभयोच्चारणेन "त्वमहमस्म्यहं च त्वमसि" इति । तच्चोभयरूपायां मतौ कर्तव्यायामर्थवद्भवति । अन्यथा हीदं विशेषेणोभयाम्नानमनर्थकं स्यात् । एकेनैवं कृतत्वात् । ननूभयाम्नानस्यार्थविशेषे

चोदाहरति—तादिति । वाक्यद्वयमधिकृत्य व्यतिहारस्यान्यान्यं विशेषणविशेष्यत्वस्य दृष्टेरुत्कृष्टदृष्टिर्निकृष्टे फलवतीति न्यायाच्च संशयमाह—तत्रेति । उषस्तकहोलयोर्विद्यैक्येऽपि यथाऽऽदरार्थोऽभ्यासस्तथाऽयमपीति मत्वा पूर्वपक्षयति—एकेति । पदान्तराणामर्थान्तरपरत्वस्वारस्यात्कथं मतेरैकरूप्यमित्याशङ्क्याऽऽह—न हीति । अन्योन्यात्मत्वमर्थान्तरमित्याशङ्क्याऽऽह—यदीति । अन्योन्यात्मनाऽनुचिन्तनस्यायुक्तत्वे फलितमाह—तस्मादिति । तर्हि किमर्थं व्यतिहाराम्नानं तदाह—व्यतिहारेति । व्यतिहारपाठे द्विरूपाया मतेरनुष्ठेयत्वोक्त्या विद्यैक्योक्तिर्वाक्यार्थधीहेतोरेव चिन्तनात्पादादिसंगतिः । पूर्वपक्षे मतेरेकरूपत्वे लाघवम् । सिद्धान्ते तस्या द्वैरूप्ये दृढत्वमैक्यस्य सिध्यतीति मन्वानः सिद्धान्तयति—एवमिति । व्यतिहारो मिथो विशेषणविशेष्यत्वमाध्यानमुभयरूपमतिकरणम् । प्रतिज्ञातमर्थं दृष्टान्तेन स्पष्टयति—इतरवादिति । दृष्टान्तदार्ष्टान्तिकभागौ व्याख्याय हेतुं व्याख्याति—तथा हीति । उभयरूपोच्चारणेऽपि कथं प्रतिज्ञासिद्धिस्तत्राऽऽह—तच्चेति । तदेव व्यतिरेकमुखेनाऽऽ(णाऽऽ)ह—अन्यथेति । जीवे ब्रह्मधीरेकैव चेत्तदा त्वमहमित्येतावतैव सिद्धेरुभयोच्चारणमनर्थकं तस्मात्तदर्थवत्त्वानुपपत्त्या मतिरुभयरूपैव कार्येत्यर्थः । उक्तं स्मारयति—नन्विति । निर्गुणस्य सगुणत्वोक्तिवदन्योन्यात्मतया ध्यानमात्रस्य विधानान्न वस्तुतो निकृष्टते-

---

१ ट. मन्तव्यम् । २ ड. म. °यस्तावदेक° । ३ ड. ल. °ढीकरणार्थ । ४ ट. °व तु कृ ।

(सत्यविद्याया एकत्वप्रतिपादनम् , अधि० २४)

परिकल्प्यमाने देवतायाः संसार्यात्मत्वापत्तेर्निकर्षः प्रसज्येतेत्युक्तम् । नैष दोषः । ऐकात्म्यस्यैवानेन प्रकारेणानुचिन्त्यमानत्वात् । नन्वेवं सति स एवैकत्वदृढीकार आपद्येत । न वयमेकत्वदृढीकारं वारयामः किं तार्हि व्यतिहारेणेह द्विरूपा मतिः कर्तव्या वचनप्रामाण्यान्नैकरूपेत्येतावदुपपादयामः । फलतस्त्वेकत्वमपि दृढी भवति। यथाऽऽध्यानार्थेऽपि सत्यकामादिगुणोपदेशे तद्गुणं ईश्वरः प्रसिध्यति तद्वत् । तस्मादयमाध्यातव्यो व्यतिहारः समाने च विषय उपसंहर्तव्यो भवतीति ॥३७॥ (२३)

(सत्यविद्याया एकत्वप्रतिपादनम् , अधि० २४)

सैव हि सत्यादयः ॥ ३८ ॥ (२४)

" स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म " [बृ०५-४-१]

त्याह —नेत्यादिना । ईश्वरे जीवतादात्म्यस्याऽऽरोप्योपास्यत्वान्नेश्वरस्योत्कर्षनिवृत्तिरित्यर्थः । वचनादुभयत्रोभयानुचिन्तने मदुक्तमेवाऽऽयातमिति शङ्कते—नन्विति । किमिह नान्तरीयत्वैनैकत्वमपि दृढी भवतीत्युच्यते किंवा तत्त्वमस्यादिवैक्यदेवोपदिश्यत इति तत्राऽऽद्यं प्रत्याह—न वयमिति । न द्वितीयो ध्यानविधिपरत्वाद्वाक्यस्येत्याह—किं तर्हीति । इहेत्युदाहरणोक्तिः । एकत्वज्ञानस्यापीह भानात्तत्परत्वं किं न स्यात्तत्राऽऽह—फलतस्त्विति । अर्थादित्यर्थः । कथमुपास्तिपरत्वेऽर्थादपि तद्दृढीकरणं तत्राऽऽह —यथेति । अन्यपरस्यापि मानान्तरविरुद्धेऽर्थे स्यान्मानत्वमित्यर्थः । उभयोच्चारणसामर्थ्यसिद्धमुपसंहरति—तस्मादिति । व्यतिहारानुचिन्तनकार्यताकीर्तनस्य पादसंगतिं सूचयति—समाने चेति । यत्र यत्राहंग्रहेणोपास्तिस्तत्र तत्रेति यावत् । उभयरूपमतिकरणे सत्येकत्वमर्थतो दृढीभवतीति वक्तुमितीत्युक्तम्॥३७॥(२३)

जीवब्रह्मणोरन्योन्यात्मत्वोक्तिभेदाद्विरूपा मतिरनुष्ठेयेत्युक्तम् । संप्रति जयतीमाँल्लोकान्हन्ति पाप्मानमिति च फलोक्तिभेदाद्विद्याभेदमाशङ्क्योक्तम्—सैवेति । सत्यविद्यामुदाहरति—स यो हेति । अविशेषेणाधिकारी सर्वनामभ्यामुक्तः । उपास्यप्रसिद्ध्यर्थो हशब्दः । एतदिति बुद्धिस्थमुपास्यं परामृश्यते । तस्य व्यापकत्वमाह—महदिति । यक्षं पूज्यं प्रथमजं भौतिकानां मध्ये प्रथमं जातं सच्च त्यच्चेति सत्यं ब्रह्म हिरण्यगर्भाख्यं वेदोपास्ते तस्य लोकजयः फलमित्यर्थः । तदेतदक्षरं सत्यमिति स

---

१ ट. किंतु व्य° । २ ङ. ञ. °रेणैव द्वि° । ३ ङ. ञ. °णक ई° । ४ ज. °र्तव्य इति । ५ ङ. ञ. ट. °वति । ६ च °वत्सदे° । ७ ठ. ड. °पि दृढी° । ८ क. झ. °शेषणा° । ९ झ. °प्रतिसि° । १० झ. °थमजा° ।

इत्यादिना वाजसनेयके सत्यविद्यां सनामाक्षरोपासनां विधायानन्तरमाम्नायते-" तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः " [बृ० ५-५-२] इत्यादि । तत्र संशयः—किं द्वे एते सत्यविद्ये किं वैकैकेति । द्वे इति तावत्प्राप्तम् । भेदेन हि फलसंयोगो भवति " जयतीमाल्लोकान् " [बृ० ५-४-१] इति पुरस्तात् " हन्ति पाप्मानं जहाति चैनं " [बृ० ५-५-३] इत्युपरिष्टात् । प्रकृताकर्षणं तूपास्यैकत्वादिति । एवं प्राप्ते ब्रूमः—एकैवेयं सत्यविद्येति । कुतः । " तद्यत्तत्सत्यम् " [बृ० ५ ५-२] इति प्रकृताकर्षणात् । ननु विद्याभेदेऽपि प्रकृताकर्षणमुपास्यैकत्वादुपपद्यत इत्युक्तम् । नैतदेवम् । यत्र तु विस्पष्टात्कारणान्तराद्विद्याभेदः प्रतीयते तत्रैतदेवं स्यात् । अत्र तूभयथा संभवे " तद्यत्तत्सत्यम् " इति प्रकृताकर्षणात्पूर्वविद्यासंबद्धमेव सत्यमुत्तरत्राऽऽ-

---

इत्येकमक्षरमित्यादिना सत्यनामविशिष्टमुपासनमुक्तमित्याह—सनामेति । तत्तत्र ब्रह्मणो हृदयात्मत्वे सिद्धे यत्तद्ब्रह्म सत्यं हृदयाख्यं सोऽसावादित्य इति योजना । विशेष्यादित्यवशेन स इत्युक्तम् । तस्य मण्डलमात्रत्वं व्यावर्तयति—य एष इति । तस्यैवाऽऽध्यात्मिकत्वमाह—यश्चेति । वाक्यद्वये श्रुतां सत्यविद्यां विषयीकृत्य फलभेदात्प्रकृताकर्षणाच्च संशयमाह—तत्रेति । विद्याभेदाभेदनिरूपणद्वारा वाक्यार्थधीहेतूक्तेरत्र पादादिसंगतिः । पूर्वपक्षे गुणव्यवस्था सिद्धान्ते तदव्यवस्थेत्यभिप्रेत्य पूर्वपक्षयति—द्वे इति । सत्यनामाक्षरत्रयविशिष्टादहरहर्गुणविशिष्टस्य विलक्षणतया रूपभेदाद्विद्याभेद इत्यर्थः । तत्रैव फलसंयोगभेदं हेत्वन्तरमाह—भेदेनेति । तद्यदितिप्रकृताकर्षणाद्ब्रह्मणः सत्यनामाक्षरविशिष्टस्योत्तरत्र स्थानगुणसंबन्धकथनाद्वैपैक्ये कुतो विद्यानानात्वं तत्राऽऽह—प्रकृतेति । फलभेदस्योक्तत्वान्नित्यकाम्यदर्शपूर्णमासवदनुबन्धाभेदेऽपि विद्यानानात्वमिति भावः । विद्याभेदाद्गुणव्यवस्थेति पक्षमनूद्य सैवेति सूत्रावयवेन सिद्धान्तमाह—एवमिति । तत्र हेतुं हिशब्दसूचितं प्रश्नपूर्वकमाह—कुत इति । खल्वेतस्यैवाक्षरस्योपव्याख्यानमितिवद्विद्याभेदेऽपि प्रकृताकर्षणं स्यादिति शङ्कते—नन्विति । तत्र कारणान्तरादपवादाद्विद्याभेदेऽपि प्रकृते तदभावात्तच्छब्देन प्रकृतग्रहादभेदेन प्रत्यभिज्ञानाद्विद्यैक्यमित्याह—नैतदिति । खल्वेतस्येत्यादि यत्रेत्युक्तम् । कारणान्तरं फलभेदादि । एतदिति प्रकृताकर्षणमुक्तम् । एवमिति तस्य विद्यै-

---

१ ङ. ञ. 'संबन्धो भ' । २ ङ. च य एवं वेद " इ' । ३ ज. ट. 'यं विद्या स' । ४ क. ङ. ज. ञ हि । ५ क. 'ग्रहणाभे' । ६ क. ख. 'यैक्यं ।

(सत्यविद्याया एकत्वप्रतिपादनम् , अधि० २४)

कृष्यत इत्येकविद्यात्वनिश्चयः । यत्पुनरुक्तं फलान्तरश्रवणाद्विद्यान्तरमिति । अत्रोच्यते—" तस्योपनिषदहः " 'अहम्' इति चाङ्गान्तरोपदेशस्य स्तावकमिदं फलान्तरश्रवणमित्यदोषः । अपि चार्थवादादेव फले कल्पयितव्ये सति विद्यैकत्वे चावयवेषु श्रूयमाणानि बहून्यपि फलान्यवयविन्यामेव विद्यायामुपसंहर्तव्यानि भवन्ति । तस्मात्सैवेयमेका सत्यविद्या तेन तेन विशेषणोपेताऽऽम्नातेत्यतः सर्व एव " सत्यादयो " गुणा एकस्मिन्प्रयोग उपसंहर्तव्याः । केचित्पुनरस्मिन्सूत्र इदं च वाजसनेयकमक्ष्यादित्यपुरुषविषयं वाक्यं छान्दोग्ये च " अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते " [छा० १-६-६] " य एषोऽन्तरक्षिणि पुरुषो दृश्यते " [छा० १-७-५] इत्युदाहृत्य सैवेयमक्ष्यादित्यपुरुषविषया विद्योभयत्रैकैवेति कृत्वा सत्यादीन्गुणान्वाजसनेयिभ्यश्छन्दोगानामुपसंहार्यान्मन्यन्ते । तन्न साधु लक्ष्यते । छान्दोग्ये हि कर्मसंबन्धिन्युद्गीथव्यपाश्रया विद्या विज्ञायते । तत्र द्यादिमध्यावसानेषु हि कर्मसंबन्धिचिह्नानि भवन्ति " इयमेवर्गग्निः साम " [छा० १-६-

---

क्यव्यभिचारित्वमिति भेदः । अत्रेति सत्यविद्योच्यते । उभयथा संभवो भेदाभेदाभ्यामुपपत्तिः । प्रकृते फलसंयोगभेदो भेदोपपादकोऽस्तीत्युक्तं तत्राऽऽह—यत्पुनरिति। प्रशंसार्थवादैकत्वेनास्य फलविधित्वाभावान्न फलसंयोगभेदसिद्धिरित्याह—अत्रेति । इतश्च फलभेदाद्विद्याभेदो नात्रेत्याह—अपि चेति । विध्युद्देशे फलान्तराश्रुते रात्रिसत्रवत्फले कल्प्ये सत्यगृहीताविशेषतया सर्वस्यापि फलस्य तत्संबन्धिताकल्पनान्न फलभेदाद्विद्याभेदाशङ्केत्याह—अर्थेति । अपवादरहितं हेतुमुक्त्वा प्रतिज्ञातं विद्यैक्यमुपसंहरति—तस्मादिति । अवशिष्टं सूत्रावयवं व्याकुर्वन्पूर्वापरवाक्यार्थविशेषणान्येकीकृत्य ध्यानं कार्यमित्याह—इत्यत इति । परकीयव्याख्यामुत्थापयति—केचिदिति। तद्दूषयति—तन्नेति । कर्मसंबन्धिनीत्यत्र कर्म ज्योतिष्टोमस्तदङ्गभूतोद्गीथव्यपाश्रयत्वमेव विद्याया विशदयति—तत्रेति । उद्गीथशब्दवाच्यैकर्सामगेष्णत्वात्परमात्मो-

---

१ ङ. ञ. °कत्वमि° । २ ट. °मितीत्य° । ३ ङ. ञ. °म्नायत इत्य° । ४ ङ. ज. ञ. °दं वा° । ५ क. ज. ञ. ट. °ते" अथ य । ६ घ. ङ. झ. °षोऽक्षि° । ७ क. ङ. ञ. °त्रैकेति । ८ ङ. ञ. °त्यादिगुणा° । ९ ट. हि ज्योतिष्टोमक° । १० क. ङ. ज. ञ. °न्धिनीयमुद्गी° । ११ क. घ. ङ. ज. ञ. °धु क° । १२ ठ. ड. °पत्तितः । प्र° । १३ ठ. ड. °दत्वे° । १४ ङ. °कीयां व्या° । १५ ठ. ङ °च्यवाक्प्राणक्सा° ।

(दहराकाशहार्दाकाशयोरुपसंहर्तव्यत्वम्, अधि० २५)

१] इत्युपक्रमे " तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथः " [छा० १ ६-८] इति मध्ये " य एवं विद्वान्साम गायति " [छा० १ ७ ९] इत्युपसंहारे। नैवं वाजसनेयके किंचित्कर्मसंबन्धि चिह्नमस्ति। तत्र प्रक्रमभेदाद्विद्याभेदे सति गुणव्यवस्थैव युक्तेति ॥ ३८ ॥ (२४)

(दहराकाशहार्दाकाशयोरुपसंहर्तव्यत्वम्, अधि० २५)

कामादीतरत्र तत्र चाऽऽयतनादिभ्यः ॥ ३९ ॥ (२५)

" अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः " [छा० ८-१ १] इति प्रस्तुत्य च्छन्दोगा अधीयते—" एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः " [छा० ८-१-५] इत्यादि। तथा वाजसनेयिनः—" स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते सर्वस्य वशी " [बृ० ४-४-२२] इत्यादि। तत्र विद्यैकत्वं परस्परगुणयोगश्च किं वा नेति संशये विद्यैकत्व-

---

द्वीथशब्दवाच्य इत्याह—तस्मादिति। अथ य एषोऽन्तरादित्य इत्यस्याऽऽदित्यमध्यावर्सान ऋक्सामयोः कर्माङ्गयोः पृथिव्यादिदृष्टिविशिष्टयोर्धर्येयत्वदृष्टेरादित्याक्षिपुरुषविशिष्टकर्माङ्गोद्गीथध्यानं छान्दोग्येऽभीष्टमित्यर्थः। वाजसनेयकेऽपि कर्माङ्गावबद्धमेव ध्यानमिष्टमिति न विद्यानानात्वमित्याशङ्क्याऽऽह—नैवमिति। नित्यकाम्याग्निहोत्रयोर्धात्वर्थभेदेऽपि साध्यभेदेन भेदवदुपास्यैक्येऽपि फलभेदेन विद्ययोर्भेदे गुणानुपसंहार इत्युपसंहरति—तत्रेति ॥ ३८ ॥ (२४)

तद्यत्तत्सत्यमिति प्रकृताकर्षणाद्रूपाभेदाद्गुणोपसंहारश्चेत्कचिदाकाशस्योपास्यत्वं कचित्तदाश्रयस्य ज्ञेयतेति रूपभेदाद्गुणानुपसंहारः स्यादित्याशङ्क्याऽऽह—कामादीति। सगुणनिर्गुणविद्याविषयं वाक्यमुदाहरति—अथेति। परावरविद्यागता वशित्वादयः सत्यकामादयश्च गुणा विषयास्ते किमन्योन्यत्र नोपसंहर्तव्याः किंवोपसंहर्तव्या इत्यभयत्रोभयेषामुपयोगभावाभावाभ्यां संशये ध्यानैस्तुत्युपयोगित्वेन गुणानामन्योन्यत्रोपसंहारोक्त्या वाक्यार्थधीतद्धेतुचिन्तनात्पादादिसंगतिः। पूर्वपक्षे कचिदाकाशस्य ध्येयत्वं कचित्तदाश्रयस्य ज्ञेयतेति विशेषसिद्धिः। सिद्धान्तेऽपि ब्रह्मण एवाऽऽ-

---

१ ख. 'सानेष्वृक्सा'। २ झ. 'नश्रुत्यु'।

(दहराकाशहार्दाकाशयोरुपसंहर्तव्यत्वम्, अधि० २५)

मिति। तत्रेदमुच्यते—"कामादि" इति, सत्यकामादीत्यर्थः। यथा देवदत्तो दत्तः सत्यभामा भामेति। यदेतच्छान्दोग्ये हृदयाकाशस्य सत्यकामत्वादिगुणजातमुपलभ्यते तदितरत्र वाजसनेयके "स वा एष महानज आत्मा" इत्यत्र संबध्येत। यच्च वाजसनेयके वशित्वाद्युपलभ्यते तदपीतरत्र च्छान्दोग्ये "एष आत्माऽपहतपाप्मा" [छा० ८-१-५] इत्यत्र संबध्येतेँ। कुतः। आयतनादिसामान्यात्। समानं ह्युभयत्रापि हृदयमायतनं समानश्च वेद्य ईश्वरः समानं च तस्य सेतुत्वं लोकासंभेदप्रयोजनमित्येवमादि बहुसामान्यं दृश्यते। ननु विशेषोऽपि दृश्यते छान्दोग्ये हृदयाकाशस्य गुणयोगो वाजसनेयके त्वाकाशाश्रयस्य ब्रह्मण इति। न। "दहर उत्तरेभ्यः" [ब्र० सू० १-३-१४] इत्यत्र च्छान्दोग्येऽप्याकाशशब्दं ब्रह्मैवेति प्रतिष्ठापितत्वात्। अयं त्वत्र विद्यते विशेषः। सगुणा हि ब्रह्मविद्या छान्दोग्य उपदिश्यते "अथ य इहाऽऽत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्" [छा० ८-१-६] इत्यात्मवत्कामानामपि वेद्यत्वश्रवणात्। वाजसनेयके तु निर्गुणमेवँ ब्रह्मोपदिश्यमानं दृश्यते "अत ऊर्ध्वं विमोक्षाय ब्रूहि" [बृ० ४ ३-१४] "असङ्गो ह्ययं पुरुषः" [बृ० ४-३-१५] इत्यादिप्रश्नप्रतिवचनसमन्वयात्। वशित्वादि तुं स्तुत्यर्थमेव गुणजातं वाजसनेयके संकीर्त्यते। तथा चोपरिष्टात् "स एष नेति

काशशब्दत्वादुक्तविशेषोपपत्तिरित्यङ्गीकृत्य सिद्धान्तमाह—तत्रेति। अवयववाचके नावयविग्रहे दृष्टान्तमाह—यथेति। पदार्थमुक्त्वा वाक्यार्थमाह—यदेतदिति। हेतुमुक्तं विवृणोति—समानं हीति। आदिपदेनाऽऽत्मत्वादि गृह्यते। बहुतरसाम्यदर्शनादितरेतरगुणोपसंहार इत्यर्थः। अस्याधिकरणस्य पूर्वपक्षमाह—नन्विति। नायं विशेषस्तत्राप्याकाशस्य ब्रह्मत्वादित्याह—नेत्यादिना। सगुणनिर्गुणतया विद्याभेदादपहतपाप्मत्वादीनां वशित्वादीनां चेतरेतरत्रानुपसंहार इत्याशङ्क्याऽऽह—अयं त्विति। वाजसनेयकेऽपि वशित्वाद्युपदेशदर्शनाद्ब्रह्म सगुणमेवेत्याशङ्क्याऽऽह—स्तुत्यर्थमिति। तत्र निर्णायकत्वेन वाक्यशेषं दर्शयति—तथा चेति। कथं तर्हि

---

१ क. ट. संबध्यते। २ ज. त्वादिगुणजातमुप°। ३ क. ज. °दपि तत्र ४ क. ज. झ. ट. °त। आ। ५ ङ. ञ. °हुतरं सा°। ६ ज. °र्गुणं परं ब्र°। ७ क. ङ. °व परं ब्र°। ८ क. ते। "वि। ९ ङ. ञ. °क्षायैव ब्रू°। १० ङ. ञ. तु तत्स्तुत्य°। ११ ठ. °विशयोपपत्ति°। १२ ञ. °मं चे°। १३ ठ. ङ. °शना°।

नेत्यात्मा " [बृ०४ ४ २] इत्यादिना निर्गुणमेव ब्रह्मोपसंहरति । गुणवतस्तु ब्रह्मण एकत्वाद्विभूतिप्रदर्शनायायं गुणोपसंहारः सूत्रितो नोपासनायेति द्रष्टव्यम् ॥ ३९ ॥ (२५)

(उपासकस्य भोजने प्राणाहुतिलोपापत्तिः, अधि० २६)

आदरादलोपः ॥ ४० ॥

छान्दोग्ये वैश्वानरविद्यां प्रकृत्य श्रूयते-"तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहा " [छा० ५-१९-१] इत्यादि । तत्र पञ्च प्राणाहुतयो विहिताः । तासु च परस्तादग्निहोत्रशब्दः प्रयुक्तः " य एतदेनं विद्वानग्निहोत्रं जुहोति " [छा० ५-२४-२] इति,

" यथेह क्षुधिता बाला मातरं पर्युपासते ।
एवं सर्वाणि भूतान्यग्निहोत्रमुपासते "

[छा० ५-२४-५] इति च । तत्रेदं विचार्यते—किं

गुणोपसंहारः सूत्रितस्तत्राऽऽह—गुणवतस्त्विति । साम्यबाहुल्याद्ब्रह्मणो ध्येयस्य स्तूयमानस्येतरेतरत्र संनिधानाच्च क्वचिदुपास्यत्वाय क्वचिच्च स्तुतिपौष्कल्यायाऽऽकाङ्क्षितत्वात्तद्गुणसंयोगयोग्यत्वाच्च ब्रह्मणो वशित्वादीनामपहतपाप्मत्वादीनां चेतरेतरत्रोपसंहारः । स्तुतिर्हि दृष्टेन द्वारेण कर्तुं शक्येति सगुणविद्यासु ध्येयत्वेनोक्तानामपि गुणानां निर्गुणविद्यायां युक्तः स्तुत्यर्थत्वेनान्वयः । ध्येयत्वं त्वपूर्वविध्येकगम्यम् । यत्र वशित्वादयः श्रुता न तत्रैषां ध्येयत्वेन विधानमित्यन्यत्र गतानामपि न ध्येयत्वम् । स्तुत्यर्थत्वं तु स्यात्तदपि न शब्दतस्तत्रैषां नयनमपेक्षते सत्यकामत्वादिसामर्थ्यादेव सर्वेश्वरत्वादिसिद्धिः । अतोऽन्तर्भावमात्रमुपसंहार इति भावः ॥ ३९ ॥ (२५)

उपास्तिलोपेऽपि स्तुत्यर्थत्वेन गुणालोपवत्पूर्वोऽतिथिभ्य इत्यादिश्रुत्युपपत्तये भोजनलोपेऽपि प्राणाग्निहोत्रालोप इति चोदयति—आदरादिति । वैश्वानरविद्यागतं प्राणाग्निहोत्रं विषयत्वेनोपन्यस्यति—छान्दोग्य इति । स इति वैश्वानरविद्याविदुक्तः । श्रुतितात्पर्यार्थं संगृह्णाति—तत्रेति । संदेहार्थं शब्दान्तरप्रयोगं पूर्वपक्षबीजमाह—तास्विति । न कश्चिदपि पाप्मा तं स्पृशतीति यच्छब्दस्य संबन्धः । प्राणाग्निहोत्रे यच्छब्दाग्निहोत्रशब्दाभ्यां संशयमाह—तत्रेति । उपास्तिविचारप्रस्तावेन तद्गतप्रथम-

---

१ ज. 'मेवोप' । २ ङ. ञ. इति । ३ झ. ट. 'ति । त' । ४ क. 'णयो' । ५ ठ. ङ. तिदृष्टे' । ६ क. ख. 'त्वं सु पू' । ठ. ड. 'त्वं पू' । ७ ठ. ड. 'त्वं स्याद' । ८ ठ ड. 'दिस्तुत्यु' । ९ क. ख. 'क्तः । स्तुति' ।

(उपासकस्य भोजने प्राणाहुतिलोपापत्तिः, अधि० २६)

भोजनलोपे लोपः प्राणाग्निहोत्रस्योतालोप इति । तद्यद्भक्तमिति भक्तागमनसंयोगश्रवणाद्भक्तागमनस्य च भोजनार्थत्वाद्भोजनलोपे लोपः प्राणाग्निहोत्रस्येति । एवं प्राप्ते न लुप्येतेति तावदाह । कस्मात् । "आदरात्" । तथा हि वैश्वानरविद्यायामेव जाबालानां श्रुतिः "पूर्वोऽतिथिभ्योऽश्नीयात् । यथा ह वै स्वयमहुत्वाऽग्निहोत्रं परस्य जुहुयादेवं तत्" इत्यतिथिभोजनस्य प्राथम्यं निन्दित्वा स्वामिभोजनं प्रथमं प्रापयन्ती प्राणाग्निहोत्र आदरं करोति । या हि न प्राथम्यलोपं सहते नतरां सा प्राथम्यवतोऽग्निहोत्रस्य लोपं सहेतेति मन्यते । ननु भोजनार्थभक्तागमनसंयोगाद्भोजनलोपे लोपः प्रापितः । न । तस्य द्रव्यविशेषविधानार्थत्वात् । प्राकृते ह्यग्निहोत्रे पयःप्रभृतीनां

भोजनाश्रितविचारद्वारा वाक्यार्थधीहेतुविचारसंक्रान्तेरास्ति पादादिसंगतिः । पूर्वपक्षे प्रतिनिधिन्यायेन प्राणाग्निहोत्रकार्यताध्रौव्यम् । सिद्धान्ते तदनवतारात्तदनावश्यकत्वमित्याशयेन पूर्वपक्षसूत्रव्यावर्त्यां सिद्धान्ताशङ्कामुत्थापयति—तद्यदिति । भक्तागमनसंबन्धात्प्राणाग्निहोत्रस्येति संबन्धः । न च होमस्य भक्तागमनप्रयोजकत्वं भोजनप्रयुक्तभक्तोपजीवित्वादतस्तल्लोपे लोपात्पूर्वपक्षाभावादधिकरणमनारम्भमित्यर्थः । सूत्रेण पूर्वपक्षं समादधानोऽधिकरणारम्भमुपपादयति—एवमिति । तावच्छब्दः सिद्धान्तशङ्कानिरासार्थः । पूर्वपक्षी प्रश्नपूर्वकं स्वं हेतुमवतारयति—कस्मादिति । आदरमेव स्फोरयति—तथा हीति । विध्यपेक्षितमर्थवादं दर्शयति—यथेति । ननु स्वामिभोजनस्य प्राथम्याभावोऽत्र निन्द्यते कथमेतावता भोजनलोपेऽपि प्राणाग्निहोत्रं न लुप्यते तत्राऽऽह—या हीति । अतिथिभोजनोत्तरकालविहितमपि स्वामिभोजनमपोह्यातिथिभोजनात्प्रागेव प्राणाग्निहोत्रलक्षणं स्वामिभोजनं प्रतिपादयन्ती श्रुतिस्तस्य प्राथम्यधर्मलोपमपि न सहते तत्र धर्मिलोपसहनं तु दूरनिरस्तमित्यर्थः । पूर्वपक्षाक्षेपं स्मारयति—नन्विति । तद्यद्भक्तमितिवाक्यस्यान्यार्थत्वाद्भोजनलोपेऽपि नास्ति लोपोऽग्निहोत्रस्येति दूषयति—नेति । तदेव प्रपञ्चयति—प्राकृते हीति । इहापीति प्राणाग्निहोत्रं सप्तम्यर्थः । कौण्डपायिनामयनवदिति स्थितं भेदलक्षणे "प्रकरणान्तरे प्रयोजनान्यत्वम्" [पू० मी० सू० २-३-२४] कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीत्यत्र नित्याग्निहोत्रे मासगुणो वा विधीयते कर्मान्तरं वेति संदेहे प्रदेशभेदे सत्यपि नाम्ना नित्याग्निहोत्रस्य बुद्धिसंनिधापनात्तत्समभिव्याहृताख्यातस्य तत्संनिधापितार्थपरत्वान्नि-

---

१ ट. सहत इति । २ ठ. ड. 'कं हे' । ३ क. 'मिनो भो' । ४ ठ. 'ते ता' । ५ क. ख. घ लो' । ६ ख. ठ. ड. 'थिन' । ७ झ. प्रवेश' ।

द्रव्याणां नियतत्वादिहाप्यग्निहोत्रशब्दात्कौण्डपायिनामयनवत्तद्धर्मप्राप्तौ सत्यां भक्तद्रव्यतागुणविशेषविधानार्थमिदं वाक्यं "तद्यद्भक्तम्" इति। अतो गुणलोपे न मुख्यस्येत्येवं प्राप्तम् [जै० सू० भा० १०-२-६३]। भोजनलोपेऽप्यद्भिर्वाऽन्येन वा द्रव्येणाविरुद्धेन प्रतिनिधानन्यायेन प्राणाग्निहोत्रस्यानुष्ठानमिति ॥ ४० ॥

त्याग्निहोत्रानुवादेन मासविधिरिति प्राप्ते कालस्य पुरुषानिष्पाद्यत्वेनानुपादेयत्वाज्जुहोतीत्याख्यातेन होमानुवादेन मासविधेरयोगात्तदुद्देशेन नित्याग्निहोत्रविधेरपि तदसंनिधेरसंभवान्नाम्ना च सिद्धार्थबोधिना पूर्वापरीभूततयाऽऽख्यातेनोक्तस्यानुपस्थापनात्प्रकरणभेदे प्रयोजनस्य विधेयभावनाख्यस्यान्यत्वमिति कर्मान्तरविधिरिति तद्धर्मप्राप्ताविति सप्तमे स्थितम्। "उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात्" [पू०मी०सू० ७-३-१] मासमग्निहोत्रं जुहोतीत्यत्रैवाग्निहोत्रशब्दो नित्याग्निहोत्रधर्मानिहातिदिशेन्न वेति संदेहे गौणत्वाभावादग्निहोत्रशब्दस्य जुहोतिसामानाधिकरण्याविशेषादत्रापि नामधेयत्वान्नातिदिशेदिति प्राप्ते सिद्धे कर्मभेदेऽनेकार्थत्वस्यान्याय्यत्वादेकत्राग्निहोत्रशब्दस्य मुख्यत्वादन्यत्र गौणत्वान्नित्याग्निहोत्रे च नामप्रवृत्तिनिमित्तस्याग्निदेवतासंबन्धस्य भावात्तत्रैव मुख्यत्वात्परशब्दस्य परत्र सादृश्यात्प्रवृत्तिरिति तत्सिद्धयर्थं नित्यधर्मानतिदिशति क्रियाया नित्याग्निहोत्रस्याभिधानं नामधेयमग्निहोत्रपदमुक्तं तत्प्रख्याधिकरणे। तस्यान्यत्र श्रवणे विधिप्रदेशो विधेयधर्मातिदेशः स्यादिति सूत्रार्थः। तथाच यथा कुण्डपायिनामयनगते कर्मणि प्रकरणान्तरान्नैयमिकाग्निहोत्राद्भिन्नत्वेन सिद्धे नैयमिकाग्निहोत्रवाचकाग्निहोत्रशब्दप्रयोगात्तद्धर्मातिदेशरूपधर्मान्तरप्राप्तिः। तथा नैयमिकाग्निहोत्रे पयोघृतादीनां प्रसिद्धत्वात्प्राणाग्निहोत्रे च नित्याग्निहोत्रवाचिशब्दात्तद्धर्माणां पयःप्रभृतीनां प्राप्तौ भोजनगतभक्तद्रव्यकृताभिधानार्थं तद्यद्भक्तमिति वाक्यमित्यर्थः। तथाऽपि भोजनार्थभक्तोपजीवित्वात्प्राणाग्निहोत्रस्य भोजनलोपे लोपः स्यात्तत्राऽऽह—**अत इति**। अग्न्याधाने पवमानेष्टिष्वग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपतीत्याद्यासु प्रकृतावग्निहोत्रहवण्या हविर्निर्वपेदिति विहितो हविर्निर्वापोऽतिदेशेन प्राप्तो न चाऽऽधानकालेऽग्निहोत्रमिति कुतोऽग्निहोत्रहवणी येन तन्निर्वापस्य तल्लोपे लोपप्राप्तौ दाशमिकं सिद्धान्तमाह—**गुणेति**। विकृतौ हि कार्यद्वारा पदार्थाः प्राप्नुवन्ति तेन हविःसंस्कारार्थो निर्वापः प्रथमं प्राप्तस्तद्वारा च तदङ्गमग्निहोत्रहवणी पश्चात्प्राप्नोति तेनाङ्गस्याग्निहोत्रहवण्या लोपेऽपि मुख्यस्य लोपो नास्तीति प्रकृते भोजनलोपेऽपि

---

१ क. ङ. ज. ञ. 'द्रव्यैकता'। २ क. ङ. ज. ञ. 'द्भिरन्ये'। ३ क. तत्संनि'। ४ ठ. ङ. 'नुत्थाना'। ५ क. 'न्धस्याभा'। ६ ठ. ङ. 'त्प्रत्याख्या'। ७ ख. 'देशे वि'। ८ क. ठ. ङ. 'जनाग'। ९ झ. 'वने'। १० क. क. 'तेऽपि भो'।

अत उत्तरं पठति—

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥ (२६)

"उपस्थिते" भोजने "अतः" तस्मादेव भोजनद्रव्यात्प्रथमोपनिपतितात्प्राणाग्निहोत्रं निर्वर्तयितव्यम्। कस्मात्। "तद्वचनात्"। तथा हि—"तद्यद्भक्तं प्रथममागच्छेतद्धोमीयम्" [छा०५-१९-१] इति सिद्धवद्भक्तोपनिपातपरामर्शेन परार्थद्रव्यसाध्यतां प्राणाहुतीनां विदधाति ता अप्रयोजकलक्षणापन्ना आहुतयः सत्यः कथं भोजनलोपे द्रव्यान्तरं प्रतिनिधापयेयुः। न चात्र प्राकृताग्निहोत्रधर्मप्राप्तिरस्ति। कुण्डपायिनामयने "मासमग्निहोत्रं जुहोति" [कात्या० श्रौ० २४-४-२४] इति विध्युद्देन लुप्यते प्राणाग्निहोत्रमित्यर्थः। प्रतिनिधिन्यायेनेत्यग्निहोत्रादिनित्यकर्मसु घृतवीह्याद्यलाभे कर्मोत्सर्गे प्राप्ते नित्यानामनित्यानां वाऽऽरब्धानामवश्यकार्यत्वात्प्रतिनिहितैः श्रुतैश्च क्रियमाणप्रयोगस्यावशिष्टत्वेन प्रत्यभिज्ञानात्प्रतिनिधायापि कर्म कर्तव्यमित्यधिकारलक्षणे स्थितम्। तथाच भोजनलोपेऽपि जलादिना केनापि द्रव्येण प्राणाग्निहोत्रमनुष्ठेयमित्यर्थः ॥ ४० ॥

अङ्गलोपेऽपि प्रधानस्य न लोपोऽस्तीति प्राप्ते सिद्धान्तयति—**अत इति**। तत्र प्रतिज्ञां विभजते—**उपेति**। पूर्वोऽतिथिभ्योऽश्नीयादितिश्रुत्या विशिनष्टि—**प्रथमेति**। भोजनाभावे तत्प्रयुक्तद्रव्याभावेऽपि स्वतन्त्रद्रव्येण प्राणाग्निहोत्रं निर्वर्त्यमिति शङ्कते—**कस्मादिति**। सौत्रं हेतुमादत्ते—**तदिति**। तद्धोमीयमिति तच्छब्देन प्रकृताकाङ्क्षेण स्वोक्तिपर्यवसानार्थं यद्भक्तं प्रथममागच्छेदिति संनिहितं भोजनार्थं भक्तं गमयितव्यमिति न स्वतन्त्रद्रव्यं प्रयोक्तव्यं तच्छब्दविरोधादिति व्याचष्टे—**तथा हीति**। सिद्धस्य प्रमितस्यानन्तरप्रकृतस्यार्थस्य यथा तच्छब्देन परामर्शस्तथा भक्तस्य भोजनार्थमुपनिपातो नामाऽऽगमनं तस्य यैस्तच्छब्देन परामर्शस्तेन परार्थं भोजनार्थं यद्भक्तं द्रव्यं तेन साध्यतां निर्वर्त्यतामिति यावत्। भोजनार्थागतभक्तद्रव्योद्देशेन तद्धोमीयमित्याहुतिविधाने फलितमाह—**ता इति**। आहवनीयाभावे होमाभाववदामिक्षार्थदध्यानयनाभावे वाजिनाभाववच्चोद्देश्याभावे सत्युपादेयस्याप्रवृत्तेर्भोजनार्थद्रव्यलोपे लोप एव प्राणाग्निहोत्रस्येत्यर्थः। यत्त्वग्निहोत्रशब्दात्तद्धर्मप्राप्तौ भक्तद्रव्यकतागुणविधानार्थं तद्यद्भक्तमित्यादि वाक्यमिति तत्राऽऽह—**नचेति**। अर्थवादस्थाग्निहोत्रशब्दस्य किंचित्सादृश्यमादाय स्तावकत्वेनापि संभवान्न तद्बलात्प्राणाग्निहोत्रे नैयमिकाग्निहोत्रधर्मप्राप्तिरित्यर्थः। कौण्डपायिनवदित्युक्तं विघटयति—**कुण्डेति**। दार्ष्टान्तिके प्रागुक्तमेव वैषम्यं विशदयति—

१ क. ङ. ञ. 'पन्नाः स'। २ ट. 'त्र प्रकृ'। ३ क. ङ. ञ. 'ने हि मा'। ४ क. 'ध्येणा'। ५. ठ. ङ. 'तत्रं द्र'। ६ ख. यथा तच्छ'। ठ. ङ. यतस्त'। ७ क. ख. 'क्षार्थं द'।

शगतोऽग्निहोत्रशब्दस्तद्धर्मं विधापयेदिति युक्ता तद्धर्मप्राप्तिः । इह पुनरर्थवादगतोऽग्निहोत्रशब्दो न तद्धर्मं विधापयितुमर्हति । तद्धर्मप्राप्तौ चाभ्युपगम्यमानायामग्न्युद्धरणादयोऽपि प्राप्येरन् । न चास्ति संभवः । अग्न्युद्धरणं तावद्धोमाधिकरणभावाय, न चायमग्नौ होमो भोजनार्थताव्याघातप्रसङ्गात्। भोजनोपनीतद्रव्यसंबन्धाच्चाऽऽस्य एवैष होमः। तथा च जाबालश्रुतिः— " पूर्वोऽतिथिभ्योऽश्नीयात् " इत्यास्याधारामेवेमां होमनिर्वृत्तिं दर्शयति।अत एव चेहापि सांपादिकान्येवाग्निहोत्राङ्गानि(णि) दर्शयति "उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः " [छा० ५-१८-२] इति । वेदिश्रुतिश्चात्र स्थण्डिलमात्रोपलक्षणार्था द्रष्टव्या । मुख्याग्निहोत्रे वेद्यभावात् । तदङ्गानां चेह संपिपादयिषितत्वात् । भोजनेनैव च कृतकालेन संयोगान्नाग्निहोत्रकालावरोधसंभवः । एवमन्येऽप्युपस्थानादयो धर्माः केचित्कथंचिद्विरुध्यन्ते। तस्माद्भोजनपक्ष एवैते मन्त्रद्रव्यदेवतासंयोगात्पञ्च होमा निर्वर्तयितव्याः।यत्त्वा-

---

इहेति । प्राणाग्निहोत्रं सप्तम्यर्थः। विपक्षे दोषमाह—तद्धर्मेति।तेषामपि प्राप्तौ का हानिस्तत्राऽऽह—न चेति। असंभवमेव तेषां साधयति—अग्नीति। अग्न्याधारहोमाभावात्प्राणाग्निहोत्रे नाग्न्युद्धरणसिद्धिरित्यर्थः । अस्तु प्रस्तुतेऽपि तदर्थमेवाग्न्युद्धरणं नेत्याह—न चेति । आहुतीनामग्न्याधारत्वाभावे युक्त्यन्तरमाह—भोजनेति । तर्हि किमिहाऽऽहुतीनामधिकरणं तदाह—आस्य इति । प्राणाग्निहोत्रे होमाधिकरणमास्यमेवेत्यत्र श्रुत्यन्तरमाह—तथा चेति । आहुतीनामास्याधारत्वे प्राणाग्निहोत्रेऽग्निहोत्रशब्दान्नैर्यामिकाग्निहोत्रधर्मप्राप्तौ च गमकमाह—अत इति । तद्धर्मप्राप्तौ मुख्यानामेव संभवात्संपादनवैयर्थ्यमित्यर्थः । उर एव वेदिरित्यत्रावान्तरविशेषमाह—वेदीति । अत्रेति प्राणाग्निहोत्रोक्तिः । वेदिकरणस्यापि संपादनार्थमितराङ्गवदिह संकीर्तनं स्यात्तत्राऽऽह—मुख्येति । दर्शपूर्णमासवन्मुख्येऽग्निहोत्रे वेदिकरणाभावेऽपि प्रकृते ध्यानार्था वेदिरुच्यतामित्याशङ्क्याऽऽह—तदङ्गानां चेति । अग्निहोत्रवदग्न्युद्धरणायोगमुक्त्वा कालद्वयावरोधोऽपि नास्तीत्याह—भोजनेनेति । अग्न्युद्धरणादावुक्तन्यायमतिदिशति—एवमिति । आदिशब्देन परिस्तरणादयो गृह्यन्ते । सिद्धान्तसूत्रार्थमुपसंहरति—तस्मादिति । धर्मलोपमपि श्रुतिरसहमाना सुतरां न सहते धर्मिलोपमित्युक्तमनूद्य दूषयति—यत्त्विति । धर्मिलोपाभावपक्षे धर्मोऽपि न लुप्यते न

---

१ ज. न चैवम् । २ ङ. ञ. 'जनार्थोप' । ३ ट. एवेहा' ।

(उद्गीथकर्माङ्गदेवतोपासनाया अनियतत्वम्, अधि० २७)

दरदर्शनवचनं तद्भोजनपक्षे प्राथम्यविधानार्थम् । न ह्यस्ति वचनस्यातिभारः । न त्वनेनास्य नित्यता शक्यते दर्शयितुम् । तस्माद्भोजनलोपे लोप एव प्राणाग्निहोत्रस्येति ॥४१॥ (२६)

(उद्गीथकर्माङ्गदेवतोपासनाया अनियतत्वम्, अधि० २७)

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ह्यप्रतिबन्धः फलम् ॥ ४२ ॥ (२७)

सन्ति कर्माङ्गव्यपाश्रयाणि विज्ञानानि "ओमित्येतदक्षरमुद्गीथमुपासीत" [छा० १-१] इत्येवमादीनि। किं तानि नित्यान्येव स्युः कर्मसु पर्णमयीत्वादिवदुतानित्यानि गोदोहनादिवदिति

चैतावता धर्मिणो नित्यतेत्यर्थः । अतिथिभोजनोत्तरकालता स्वामिभोजनस्य श्रुतिस्मृतिसिद्धा तत्कथं प्राथम्यविधानं तत्राऽऽह—न हीति । प्राणाग्निहोत्रातिरिक्तविषयं स्वामिभोजनस्योत्तरकालत्वविधानमित्यर्थः । प्राणाग्निहोत्रस्य प्राथम्ये कथमागन्तुकत्वं तत्राऽऽह—न त्विति । अनेन प्राथम्यविधानेनेति यावत् । अस्य प्राणाग्निहोत्रस्येत्यर्थः । तस्य नित्यतां विना प्राथम्यसिद्धेरुक्तत्वादिति भावः । आदरोक्तेरन्यथासिद्धौ फलितमाह—तस्मादिति । प्रतिनिधिन्यायो नावतरतीति फलितं वक्तुमितीत्युक्तम् ॥ ४१ ॥ (२६)

वैश्वानरविद्याङ्गप्राणाहुतीनामनित्यत्वोक्तिप्रसक्त्या कर्माङ्गसङ्किनामपि ज्ञानानामनित्यत्वमाह—तन्निर्धारणेति । अङ्गावबद्धोपासनानि विषयत्वेनोपन्यस्यति—सन्तीति । उभयविधदृष्टान्तदृष्ट्या संशयमाह—किमिति । यथा द्रव्यसंस्कारकर्मसु क्रत्वर्थेषु फलश्रुतेरर्थवादत्वादगत्या रात्रिसत्राणां विपरिणामेऽपि प्रकृतेषु क्रतूपकारस्य सिद्धत्वाद्विपरिणामायोगात्क्रतूपकारद्वारा पर्णमयीत्वं प्रयाजादिवत्तत्र नित्यमिष्टं तथैतान्यङ्गसङ्गीन्युपासनानि कर्मसु नित्यान्येवेत्येको विकल्पः । यथा प्राकृताप्प्रणयनाश्रयो गोदोहनोपरागः पशुभ्यो विधीयते यथा च कांस्योपरागस्तदाश्रयो ब्रह्मवर्चसफलोऽभिलप्यते वैल्वश्चान्नाद्यफलो यूपाश्रयो दृश्यते तथैतान्युपासनानि कर्मस्वनित्यानीति विकल्पान्तरम् । अत्र चाङ्गाश्रितोपास्तीनां क्रतुषु नित्यत्वानित्यत्वनिरूपणद्वारा वाक्यार्थधीहेतुनिरूपणात्पादादिसंगतिः । पूर्वपक्षे यथोक्तोपास्तीनां क्रतुषु पर्णतादिवदावश्यकत्वम् । सिद्धान्ते तद्राहित्यमङ्गीकृत्य विमृशति—किमिति । अनित्यभोजनाश्रितप्राणाग्निहोत्रानित्यत्ववन्नित्यकर्माङ्गाश्रितोपास्तीनां नित्यतेति पूर्वपक्षयति—नित्यानीति । क्रतुप्रकरणपाठात्प्रयोगवचनापरिग्रहादुपास्तीनां नास्ति क्रतुषु नित्य-

---

१ ङ. ञ. तत्तु भोज° । २ क. ख. ठ. ङ. फलं । ३ क. ख. ठ. ङ. °ति कं° । ४ ठ. ङ. °न्यमित्यङ्गी° । ५ ख. ञ. ठ. ङ. °रणपा° ।

विचारयामः । किं तावत्प्राप्तं,नित्यानीति । कुतः। प्रयोगवचनपरिग्रहात् । अनारभ्याधीतान्यपि ह्येतान्युद्गीथादिद्वारेण क्रतुसंबन्धात्क्रतुप्रयोगवचनेनैवाङ्गान्तरवत्संस्पृश्यन्ते । यच्चैषां स्ववाक्येषु फलश्रवणम् " आपयिता ह वै कामानां भवति " [छा० १-१-७] इत्यादि तद्वर्तमानापदेशरूपत्वादर्थवादमात्रमेवापापश्लोकश्रवणादिवन्न फलप्रधानम् । तस्माद्यथा " यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति " [तै० सं० ३-५-७२] इत्येवमादीनामप्रकरणपठितानामपि जुह्वादिद्वारेण क्रतुप्रवेशात्प्रकरणपठितवन्नित्यतैवमुद्गीथाद्युपासनानामपीति। एवं प्राप्ते ब्रूमः— तन्निर्धारणानियम इति । यान्येतान्युद्गीथादिकर्मगुणयाथात्म्यनिर्धारणानि रसतम आप्तिः संमृद्धिर्मुख्यप्राण आदित्य इत्येवमादीनि नैतानि नित्यवत्कर्मसु नियम्येरन् । कुतः । "तद्दृष्टेः" ।

तेति शङ्कते—कुत इति । अव्यभिचारितक्रतुसंबद्धजुहूद्वारा पर्णतावदुद्गीथादिद्वारेणोपास्तीनामपि क्रतुसंबन्धात्प्रयोगवचनपरिग्रहादमूषां क्रतुषु नित्यतेत्याह— प्रयोगेति । क्रत्वङ्गताप्रयोगवचनपरिग्रह्योरन्योन्याश्रयत्वात्प्रकरणान्तरत्वाच्च नोपास्तीनां तत्परिग्रहः स्यादित्याशङ्क्याऽऽह—अनारभ्येति । अङ्गान्तरं पर्णमयीत्वादि। उपास्तीनां फलान्तरश्रुतेरस्ति स्वातन्त्र्यमित्याशङ्क्याऽऽह—यच्चेति । क्रतूपकारद्वारेण व्यवहितफलोपादानादव्यवहितश्रुतफलस्य साध्यत्वविपरिणामः श्रेयानित्यपापश्लोकश्रुतेरपि फलविधित्वमेवेत्याशङ्क्याऽऽह—नेति । क्वचिदगत्या विपरिणामेऽपि प्रकृते कर्माङ्गत्वं गतिरिति न विपरिणामसिद्धिरित्यर्थः । अङ्गाश्रितोपासनानि प्रयोगवचनेन क्रत्वङ्गतयोपादेयानि साध्यफलोक्तिशून्यत्वे सति क्रत्वङ्गसङ्गितया विहितत्वात्पर्णमयीत्वादिवदिति मत्वोपसंहरति—तस्मादिति । एवमादीनामित्यादिशब्देन यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते यत्प्रयाजानूयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियत इत्यादि गृह्यते । जुह्वादिद्वारेणेत्यत्राऽऽदिपदेन कर्तृग्रहणम् । उद्गीथाद्युपासनानां कर्मसु नित्यत्वादविदुषो न कर्मेति प्राप्तमनूद्य सिद्धान्तयति—एवमिति । प्रतिज्ञां विभजते—यानीति । नित्यपर्णमयीत्वादिवदित्येतदनुमानतो नियमे निवेदिते नानियमप्रतिज्ञेति शङ्क्ते—कुत इति । तत्र सूत्रपदमवतारयति—तद्दृष्टेरिति । तस्य नियमस्य दृष्टेरिति व्याचक्षाणः श्रौतैर्लिङ्गैर्विद्यानामनङ्गत्वसाधनैरनुमानं बाध्यमि-

---

१ क. ङ. ज. ञ. °नेनाङ्गा° । २ क. ङ. ज. ञ. °त्रमपा° । ६ ट. °वणत्व° । ४ ङ. लोकं । ५ ङ. ञ. °शास्त्वप्रक° । ६ क. ख. ठ. ङ. °बन्धजु° । ७ ठ. ङ. °त्प्रकारान्त° । ८ क. ख. ठ. ङ. °त्यवत्पर्ण° । ९ ठ. ङ. तस्यानि° । १० ठ. ङ. °मस्याद्द° ।

(उद्गीथकर्माङ्गदेवतोपासनाया अनियतत्वम्, अधि० २७)

तथा ह्यनित्यत्वमेवंजातीयकानां दर्शयति श्रुतिः— " तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद " [छा० १-१.१०] इत्यविदुषोऽपि क्रियाभ्यनुज्ञानात्। प्रस्तावादिदेवताविज्ञानविहीनानामपि प्रस्तोत्रादीनां याजनाध्यवसानदर्शनात् " प्रस्तोतर्यां देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि " [छा० १-१०-९] "तां चेदविद्वानुद्गास्यसि" [छा० १-१०-१०] " तां चेदविद्वान्प्रतिहरिष्यसि " [छा० १-१०-११] इति च । अपि चैवंजातीयकस्य कर्मव्यपाश्रयस्य विज्ञानस्य पृथगेव कर्मणः फलमुपलभ्यते कर्मफलसिद्ध्यप्रतिबन्धस्तत्समृद्धिरतिशयविशेषः कश्चित् " तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद। नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति " [छा० १-१-१०] इति। तत्र " नाना तु " इति विद्वदविद्वत्प्रयोगयोः पृथक्करणात् " वीर्यवत्तरम् " इति च तरप्प्रत्ययप्रयोगाद्विद्याहीनमपि वीर्यवदिति गम्यते। तच्चानित्यत्वे विद्याया उपपद्यते। नित्यत्वे तु कथं तद्विहीनं कर्म वीर्यवदित्य-

---

त्याह—तथाहीति। तेनेत्योंकाराख्यमक्षरमुक्तम्। एतदक्षरमुद्गीथावयवभूतमेवं रसतमादिगुणकं यो वेद यश्च न तथा तावुभावपि ज्ञाज्ञौ कर्म कुरुत इति योजना। विद्यायाः कर्माङ्गत्वानियमे लिङ्गान्तरमाह—**प्रस्तावादीति**। तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति चाक्रायणेनाऽऽक्षेपकरणादविद्वत्ता प्रस्तोत्रादेः सिद्धेत्यर्थः। उद्गीथाद्युपास्तीनां पृथक्फलश्रवणादपि न कर्माङ्गतेत्यवशिष्टसूत्रावयवं व्याचष्टे—**अपि चेति**। ज्ञानाभावे कर्मफलप्रतिबन्धे ज्ञानस्य कर्माङ्गता स्यादित्याशङ्क्याऽऽह—**तदिति**। कर्मफलस्य वीर्यवत्तरत्वं ज्ञानफलं तदभावेऽपि वीर्यवदेव कर्मेत्यर्थः। फलभेदे मानमाह—**तेनेति**। पूर्वपक्षमुपन्यस्य श्रुतिः स्वयमेव तुशब्देन निरस्यति—**नाना त्विति**। भिन्नफलत्वं नानात्वम्। दृष्टं हि मणिविक्रये शबरवणिजोर्ज्ञानभावाभावाभ्यां फलवैलक्षण्यम्। तस्माद्यदेव कर्म विद्यया प्रकृतोद्गीथाद्यर्थया करोति श्रद्धयाऽऽस्तिक्यबुद्ध्या तथोपनिषदा तत्तद्देवताध्यानेनेत्यर्थः। श्रुतेस्तात्पर्यमाह—**तत्रेति**। किं तावता ते सिद्धं तत्राऽऽह—**तच्चेति**। विद्याहीनस्य कर्मणो वीर्यवत्त्वं कर्मणि तदनित्यत्वगमकमिति व्यतिरेकतः स्फुटयति—**नित्यत्वे त्विति**। अङ्गिमात्रस्य फलं वीर्य-

---

१ ङ. ञ. °मेवैवं। २ क. ज. °पि च प्र°। ३ ङ. ज. ञ. ट. °ति। अ°। ४ क. ज. रपः प्रयो°। ५ ङ. ज. ञ. °द्याविही°। ६ क. ङ. ज. ञ. °पि कर्म वी°। ७ क. मन्यते। ८ क. ङ. ज. °वदभ्यनु°।

नुज्ञायेत । सर्वाङ्गोपसंहारे हि वीर्यवत्कर्मेति स्थितिः । तथा लोकसामादिषु प्रतिनियतानि प्रत्युपासनं फलानि शिष्यन्ते "कल्पन्ते हास्मै लोका ऊर्ध्वाश्चाऽऽवृत्ताश्च" [छा० २-२ ३] इत्येवमादीनि । न चेदं फलश्रवणमर्थवादमात्रं युक्तं प्रतिपत्तुम् । तथा हि गुणवाद आपद्येत फलोपदेशे तु मुख्यवादोपपत्तिः । प्रयाजादिषु त्वितिकर्तव्यताकाङ्क्षस्य क्रतोः प्रकृतत्वात्तादर्थ्ये सति युक्तं फलश्रुतेरर्थवादत्वम् । तथाऽनारभ्याधीतेष्वपि पर्णमयीत्वादिषु । न हि पर्णमयीत्वादीनामक्रियात्मकानामाश्रयमन्तरेण फलसंबन्धोऽवकल्पते । गोदोहनादीनां हि प्रकृताप्रणय-

---

वत्त्वमङ्गसहितस्य तु वीर्यवत्तरत्वमित्यनुज्ञोपपत्तिमाशङ्क्याऽऽह—सर्वेति । कर्मसमृद्ध्यतिरिक्तमपि फलं विद्यायाः श्रुतं ततोऽपि तस्या न कर्माङ्गतेत्याह—तथेति । लोकसामादिषु लोकदृष्ट्या सामाद्युपासनेष्विति यावत् । कल्पन्ते भोगाय समर्था भवन्त्यस्मै विदुषे लोका भोगभूमयो भूमेरुपरिष्टात्ततोऽधस्ताच्च व्यवस्थिता ऊर्ध्वा आवृत्ताश्चेत्युक्ताः । आपयिता ह वै कामानामित्यादेरर्थवादत्वान्न च फलप्रधानतेत्युद्गीथाद्युपास्तीनां कर्मसु नित्यत्वोक्तिरित्याशङ्क्याऽऽह—न चेति । अर्थवादमात्रत्वे फलश्रुतेर्विधेयप्राशस्त्यलक्षणयाऽत्यन्तपरोक्षा वृत्तिः स्यात् । फलपरत्वे तु वर्तमानापदेशिनोऽपि साक्षात्फलप्रतीतेर्मुख्यवादसिद्धिः । ततो मुख्ये संभवति लक्षणाश्रयणमयुक्तमित्याह—तथा हीति । तर्हि प्रयाजादिष्वपि फलश्रुतेर्नार्थवादमात्रत्वं तत्राऽऽह—प्रयाजादिष्विति । दर्शपूर्णमासादिप्रकरणस्थत्वेन प्रयाजादीनां तदङ्गत्वान्न पृथक्फलवत्त्वमिति तत्फलश्रुतेरर्थवादतेत्यर्थः । तर्हि पर्णमयीत्वादिषु प्रकरणाभावात्पृथक्फलवत्त्वसिद्धेर्न फलश्रुतेरर्थवादमात्रत्वं तत्राऽऽह—तथेति । किं तेषां साक्षादेव फलवत्त्वं किंवा क्रतुद्वारेति विकल्प्याऽऽद्यं दूषयति—न हीति । द्वितीये क्रतोर्द्रव्यसाकाङ्क्षत्वात्पर्णमयीत्वस्य च पुमर्थत्वाय तद्योगापेक्षत्वाज्जुहूप्रकृतिद्रव्यार्पकवाक्यात्क्रतुयोगे पृथक्फलवत्त्वायोगादुक्तफलश्रुतेरर्थवादतेति भावः । गोदोहनादीनामपि तर्हि द्रव्यत्वात्पर्णमयीत्वादिवत्क्रतुसंबन्धान्न पृथक्फलवत्त्वं तत्राऽऽह—गोदोहनेति । तस्मिन्सीदेतिमन्त्रपदानां साकाङ्क्षत्वेऽपि स्योनं ते सदनमित्यादीनामाकाङ्क्षाभावान्मिथःसंबन्धाभाववद्गोदोहनकांस्यादीनां साकाङ्क्षत्वेऽपि प्रणयनादेश्चमसयूपाद्याश्रयलाभादाकाङ्क्षाभावाद्वाक्यीयक्रतुसंबन्धासिद्धेस्तादर्थ्येनाविधेयत्वाद्युक्तं पृथगेव फलमुद्दिश्य विधानमित्यर्थः । बैल्वमन्नाद्यकामस्य यूपं कुर्यात्खादिरं वीर्यकामस्येत्यादिषु फले विधानवत्पर्णमयीत्वा-

---

१ ज. ट. °पत्तेः । प्र° । २ क. ठ. ड. °त्र फ° । ३ ठ. °क्षाऽनुवृ° । ४ क. ख. °त्वेऽपि व° । ५ क. ख. °लत्वायो° ।

(संवर्गविद्योक्ताधिदैववाय्वध्यात्मप्राणयोरनुचिन्तनस्य पृथक्त्वम्, अधि० २८)

नाद्याश्रयलाभादुपपन्नः फलविधिः। तथा बैल्वादीनामपि प्रकृतयूपाद्याश्रयलाभादुपपन्नः फलविधिः। न तु पर्णमयीत्वादिष्वेवंविधः कश्चिदाश्रयः प्रकृतोऽस्ति। वाक्येनैव तु जुह्वाद्याश्रयतां विवक्षित्वा फलेऽपि विधिं विवक्षतो वाक्यभेदः स्यात्। उपासनानां तु क्रियात्मकत्वाद्विशिष्टविधानोपपत्तेरुद्गीथाद्याश्रयाणां फले विधानं न विरुध्यते। तस्माद्यथा क्रत्वाश्रयाण्यपि गोदोहनादीनि फलसंयोगादनित्यान्येवमुद्गीथाद्युपासनानीत्यपि द्रष्टव्यम्। अत एव च कल्पसूत्रकारा नैवंजातीयकान्युपासनानि क्रतुषु कल्पयांचक्रुः ॥ ४२ ॥ (२७)

(संवर्गविद्योक्ताधिदैववाय्वध्यात्मप्राणयोरनुचिन्तनस्य पृथक्त्वम्, अधि० २८)

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ (२८)

दिष्वपि स्यादित्याशङ्क्याऽऽह—तथेति। बैल्वखादिरदध्यादीनामुपपन्नः फले विधिरिति संबन्धः। तत्र हेतुमाह—प्रकृतेति। तेषु प्रकृतक्रतुसंबन्धियूपहोमादिराश्रयोऽस्ति प्रत्यक्षविधिश्रुतेः साक्षात्कर्मिवादयुक्तफलश्रुतेश्च युक्तस्तेषां फले विधिरित्यर्थः। पर्णमयीत्वादिषु वैषम्यमाह—न त्विति। एवंविधो यूपादितुल्यस्तेषामनारम्याधीतत्वादित्यर्थः। ननु पर्णमयीत्वादीनां विना प्रकरणं वाक्यादेव फले विधिः स्यान्नेत्याह—वाक्येनेति। पर्णतादीनां जुह्वादिद्वारा क्रत्वाश्रयताया वाक्यीयत्वात्तत्र वाक्यतात्पर्यकल्पने फलसंबन्धप्रतिपादने च तत्कल्पने तात्पर्यभेदाद्वाक्यभेदापातान्न युक्तस्तेषु फले विधिरित्यर्थः। पर्णमयीत्वादिषु फलश्रुतेरर्थवादत्वमुपपाद्योद्गीथाद्युपासनेषु तेभ्यो वैषम्यमाह—उपासनानां त्विति। तासां व्यापाररूपत्वादव्यापारात्मकपर्णतादिभ्यो वैलक्षण्यात्फलवत्त्वेऽपि च विधानसिद्धेः स्वर्गकामो यजेतेत्यादिवद्वाक्यभेदाभावाद्युक्तं फलविधानमित्यर्थः। प्रस्तुतोपास्तीनां प्रकरणादिना क्रत्वर्थाश्रिततायाः सिद्धत्वात्तदाश्रयेण गोदोहनादिवद्विशिष्टफलोद्देशेन विधानसंभवे फलितमुपसंहरति—तस्मादिति। उद्गीथादिविद्यानां पर्णतादिवत्कर्माङ्गत्वाभावे लिङ्गान्तरमाह—अत इति। अङ्गत्वाभावादेवेति यावत्। तथाच विदुष इवाविदुषोऽपि कर्माधिकारोऽस्तीति भावः ॥ ४२ ॥ (२७)

पृथगप्रतिबन्धः फलमिति फलपृथक्त्ववदुपगमनपृथक्त्वमाह—प्रदानवदिति।

---

१ क ङ. फले वि°। २ क. °भात्। न। ३ ट. °व जु°। ४ क. ज. ट. °ले वि°। अ. °ले च वि°। ५ ज. अ. फलवि°। ६ क. ङ. ज. अ. ट. °नान्यपीति द्र°। ७ क. ख. ठ. ड. °बन्धी यू°। ८ क. झ. °त्कमिवा°। ९ ठ. ड. °त्वेन वि°। १० झ. °धानासि°। ११ ठ. ड. फले वि°। १२ क. ख. °श्रयेण गो°। १३ क. ख. °र्णत्वादि°। १४ ठ. ड. °थक्त्वाप्र°।

(संवर्गविद्योक्ताधिदैवाध्यात्मप्राणयोरनुचिन्तनस्य पृथक्त्वम्, अधि० २४)

वाजसनेयके "वदिष्याम्येवाहमिति वाग्दध्रे" [बृ० १-५-२१] इत्यत्राध्यात्मं वागादीनां प्राणः श्रेष्ठोऽवधारितोऽधिदैवमग्न्यादीनां वायुः। तथा छान्दोग्ये "वायुर्वाव संवर्गः" [छा० ४-३-१] इत्यत्राधिदैवमग्न्यादीनां वायुः संवर्गोऽवधारितोऽध्यात्मं वागादीनां प्राणः। तत्र संशयः—पृथग्वेमौ वायुप्राणावुपगन्तव्यौ स्यातामपृथग्वेति। अपृथगेवेति तावत्प्राप्तं तत्त्वाभेदात्। न ह्यभिन्ने तत्त्वे पृथगनुचिन्तनं न्याय्यम्। दर्शयति च श्रुतिरध्यात्ममधिदैवं च तत्त्वाभेदम् "अग्निर्वाग्भूत्वा मुखं प्राविशत्" [ऐत० २-४] इत्यारभ्य। तथा "त एते सर्व एव समाः सर्वेऽनन्ताः" [बृ० १-५-१३] इत्याध्यात्मिकानां प्राणानामाधिदैविकीं विभूतिमात्मभूतां दर्शयति। तथाऽन्यत्रापि तत्र तत्राध्यात्ममधिदैवतं च बहुधा तत्त्वाभेददर्शनं भवति। क्वचिच्च "यः प्राणः स वायुः" इति स्पष्टमेव वायुं प्राणं चैकं करोति। तथोदा-

---

बृहदारण्यके छान्दोग्ये चाधिदैवाध्यात्मभेदेनोक्तौ वायुप्राणावुदाहरति—**वाजसनेयक** इत्यादिना। श्रेष्ठत्वमभिन्नव्रतत्वेनोत्कृष्टत्वम्। तयोर्भेदाभेदवादिवाक्याभ्यां संशयमाह—**तत्रेति**। अत्र वायुप्राणयोरुपगमनविद्योक्त्या वाक्यार्थधीहेतोरेव कथनात्पादादिसंगतिः। पूर्वपक्षे विद्यैक्यात्प्रवृत्तिभेदासिद्धिः। सिद्धान्ते तदैक्येऽपि गुणभेदात्तत्सिद्धिरिति सिद्धवत्कृत्य पूर्वपक्षयति—**अपृथगिति**। फलभेदात्कर्माङ्गानां(णां) तद्युक्तोपास्तीनां च नित्यत्वान्नित्यत्वरूपप्रयोगभेदवद्वायुप्राणयोस्तत्त्वाभेदात्तत्प्राप्तिफलैक्याच्चोपास्तिप्रयोगैक्यमिति भावः। तत्त्वाभेदेऽपि कथमपृथगनुचिन्तनं तत्राऽऽह—**नेति**। न खल्वेकस्मिन्नग्निहोत्रे प्रयोगभेदोऽस्तीत्यर्थः। तत्त्वाभेदे मानमाह—**दर्शयतीति**। वायुः प्राणो भूत्वा नासिके प्राविशादिति श्रुतिरत्रोपयुक्ता। आध्यात्मिकप्राणस्याऽऽधिदैविकवाय्वभेदे लिङ्गमाह—**तथेति**। अध्यात्ममधिदैवं च तयोस्तत्त्वाभेदे सर्वश्रुतिसंमतिमाह—**तथाऽन्यत्रेति**। वायुप्राणयोस्तत्त्वाभेदे वाक्यमपि मानमित्याह—**क्वचिन्नेति**। अथेममेव नाऽऽप्नोन्मृत्युर्योऽयं मध्यमः प्राण इत्युपक्रम्य प्राणाद्वा एष सूर्य उदेतीत्युपसंहाराच्च तयोरैक्यमित्याह—**तथेति**। यदि पृथगनुचिन्तनं तयोर्विधित्सितं तर्हि

---

१ क ङ. ञ. 'वम'। २ क. ङ. ञ. 'वम'। ३ ङ. ञ. 'रितः "प्राणो वाव संवर्गः" इत्यध्या'। ४ ङ. ञ. 'यः। किं पू'। ५ ङ. ज. ट. 'थगेवेमौ। ६ क. ङ. ज. ञ. 'थगिति। ७ ङ. ञ. 'था "अत। ८ क. ङ. ञ. 'दैवं च। ९ ङ. ञ. 'ति विस्प'। १० ङ. ञ. चैकी क'। ११ क. 'दात्प्रा'। १२ ठ. ङ. तत्त्वा'।

(संवर्गविद्योक्ताधिदैववाध्यात्मप्राणयोरनुचिन्तनस्य पृथक्त्वम्, अधि० २८)

हृतेऽपि वाजसनेयिब्राह्मणे "यतश्चोदेति सूर्यः" [बृ० १-५-२३] इत्यस्मिन्नुपसंहारश्लोके "प्राणाद्वा एष उदेति प्राणेऽस्तमेति" [बृ० १-५-२३] इति प्राणेनैवोपसंहरन्नेकत्वं दर्शयति । "तस्मादेकमेव व्रतं चरेत्प्राण्यां चैवापान्याच्च" [बृ० १-५-२३] इति च प्राणव्रतेनैकेनोपसंहरन्नेतदेव द्रढयति । तथा छान्दोग्येऽपि परस्तात् "महात्मनश्चतुरो देव एकः कः स्विज्जगारं भुवनस्य गोपाः" [छा० ४-३-६] इत्येकमेव संवर्गं गमयति न ब्रवीत्येक एवैषां चतुर्णां संवर्गोऽपरोऽपरेषामिति । तस्मादपृथक्त्वमुपगमनस्येति ।

एवं प्राप्ते ब्रूमः—पृथगेव वायुप्राणावुपगन्तव्याविति । कस्मात् । पृथगुपदेशात् । आध्यानार्थो ह्ययमध्यात्माधिदैवविभागोपदेशः

तदङ्गव्रतोपदेशोऽपि पृथगेव स्यात् । इह च प्राण्यादिति प्राणे प्राप्तेऽपान्यादित्यपाननमुक्त्वा तस्मिन्प्राप्ते प्राण्यादिति प्राणनवचनेन प्राणापाननिरोधं कुर्यादित्येकमेव व्रतं दर्शयति । ततश्चापृथगनुचिन्तनमित्याह—तस्मादिति । छान्दोग्यालोचनायामपि तयोः स्वरूपाभेदधीरित्याह—तथेति । वायुं प्राणं च संवर्गगुणकं भेदेनोपक्रम्य परस्ताद्वाक्यशेषे संवर्गमेकमेव गमयतीति संबन्धः । महात्मन इति द्वितीयाबहुवचनम् । चतुरश्चतुःसंख्याकानग्निसूर्योदकचन्द्रान्यांश्च वाक्चक्षुःश्रोत्रमनोलक्षणानेको निरपेक्षः सन्को देवः प्रजापतिर्जगार गीर्णवानुपसंहृतवानिति यावत् । भेदे मानाभावादपि तयोरैक्यमित्याह—नेति । बहुश्रुत्यालोचनया वायुप्राणैक्यसिद्धेस्तदुपास्तेरपि तदधीनत्वादभेदः । न चाध्यात्माधिदैवगुणभेदाद्भेदस्तदभेदोक्तेरुत्पन्नोपास्तिसंयोगाद्भेदकत्वायोगान्नो खल्वग्निहोत्रं जुहोतीत्युत्पन्नाग्निहोत्रस्य दधितण्डुलादिभेदाद्भेद उत्पद्यमानकर्मयोगिगुणभेदस्यैव भेदकत्वात् । तस्मादुत्पन्नोपास्तियोगित्वाद्गुणभेदस्योपास्तिभेदाभावादपृथगनुचिन्तनमित्युपसंहरति—तस्मादिति ।

उक्तेनीत्या विद्यैक्येऽप्यध्यात्माधिदैवगुणभेदात्प्रवृत्तिभेदः सायंप्रातःकालगुणभेदादेकस्मिन्नप्यग्निहोत्रे प्रवृत्तिभेदवदिति सिद्धान्तयति—एवमिति । उपास्त्यैक्यात्प्रयोगैक्योक्तेर्न पृथगनुचिन्तनमिति शङ्कते—कस्मादिति । अग्निहोत्रस्येव दधितण्डुलादेर्ध्यानस्य प्रकृते भेदोपदेशात्पृथगनुचिन्तनसिद्धिरित्याह—पृथगिति । तदेव विवृणोति—आध्यानेति । तौ वा एतौ संवर्गाविति वाक्यस्योपास्यगुणविशिष्टभेदवाचिनो

---

१ ट. °प्याच्चापा° । २ क. °नैकैके° । ङ. ज. ञ. नैवैके° । ३ क ङ. ज. झ. ञ. ट. सो । ४ क. ज. ट. °रे" इ° । ५ ङ. ट. गोप्ता" इ° । ६ ङ. ज. ञ. ट. एकेषां । ७ ङ. ञ. °षाम् । त° । ८ झ. ट. °यमाध्या° । ९ ठ. °न्दोग्ये लो° । १० क. ख. °क्तरीत्या । ११ क. ख. °र्ध्यानाप्रक्र° ।

(संवर्गविद्योक्ताधिदैववाय्वध्यात्मप्राणयोरनुचिन्तनस्य पृथक्त्वम्, अधि० २८)

सोऽसत्याध्यानपृथक्त्वेऽनर्थक एव स्यात्। ननूक्तं न पृथगनुचिन्तनं तत्त्वाभेदादिति। नैष दोषः। तत्त्वाभेदेऽप्यवस्थाभेदादुपदेशभेदवशेनानुचिन्तनभेदोपपत्तेः। श्लोकोपन्यासस्य च तत्त्वाभेदाभिप्रायेणाप्युपपद्यमानस्य पूर्वोदितध्येयभेदनिराकरणसामर्थ्याभावात्। "स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुः" [बृ०१-५-२२] इति चोपमानोपमेयकरणात्। एतेन व्रतोपन्यासो व्याख्यातः। "एकमेव व्रतम्" [बृ०१-५-२३] इति चैवकारो वागादिव्रतनिवर्तनेन प्राणव्रतप्रतिपत्त्यर्थः, भग्नव्रतानि हि वागादीन्युक्तानि "तानि मृत्युः श्रमो भूत्वोपयेमे" [बृ० १-५-२१] इति श्रुतेः। न वायुव्रतनिवृत्त्यर्थः, "अथातो व्रतमीमांसा" [बृ० १-५-२१] इति प्रस्तुत्य तुल्यवद्वायुप्राणयोरभग्नव्रतत्वस्य निर्धारितत्वात्। "एकमेव व्रतं

भेदेनानुचिन्तने तात्पर्याद्वाक्यप्रामाण्याद्भेदेनैव चिन्तनमित्यर्थः। पूर्वपक्षबीजमनुवदति—नन्विति। उपास्यतया प्रधानभूतसंवर्गगुणकवायुप्राणधर्मिभेदविषयेण वाक्येन गुणभूतसमीरणस्वभावैक्यविषयं वाक्यं बाध्यमित्यभिप्रेत्याऽऽह—नेति। यतश्चोदेतीत्यादिश्लोकोक्तेर्वायुप्राणैक्यसिद्धेरुपास्तेरपि तथात्वादपृथगुपगतिरित्याशङ्क्याऽऽह—श्लोकेति। सूर्योदयास्तमययोर्वाय्वधीनत्वात्तद्भेदधिया प्राणात्सूर्योदयास्तमयावुक्तौ ततोऽध्यात्माधिदैवविभागोक्तस्य ध्येयभेदस्य निरासे श्लोकस्य न सामर्थ्यमित्यर्थः। इतोऽपि विशिष्टध्येयभेदोऽस्तीत्याह—स यथेति। यत्तु प्राणव्रतेनोपसंहारादैक्ये सत्यपृथगुपगमनमिति तत्राऽऽह—एतेनेति। श्लोकस्य स्वरूपैक्याभिप्रायत्ववादेन व्रतवचनमपि तत्त्वाभेदाभिप्रायं युक्तमित्यर्थः। एवकारश्रुतेरपृथक्प्रवृत्तिरत्र भातीत्याशङ्क्याऽऽह—एकमिति। किमिति वागादिव्रतनिवर्तनेन प्राणव्रतं साध्यते तत्राऽऽह—भग्नेति। वायुव्रतनिवृत्त्यर्थमेवावधारणं किं न स्यात्तत्राऽऽह—नेति। अथेममेव नाऽऽप्नोदित्यध्यात्मं मुख्यप्राणस्य मृत्युनाऽनाप्तत्वमधिदैवतं चाग्न्यादीनां ज्वलनादिव्रतभङ्गमुक्त्वा वायोरभग्नव्रतत्वमुक्तम्। निम्लोचेत्यन्या देवता न वायुरिति न वायुव्रतनिवृत्तिरेवकारार्थ इत्यर्थः। फलोक्तिरपि वायुव्रतनिवृत्त्यभावं दर्शयतीत्याह—एकमिति। तेन व्रतेनापिशब्देन समानार्थः सन्नुशब्दः सायुज्यं सलोकतामपीत्युपरि संबध्यते। एतस्या एतस्या देवतायाः सायुज्यं समानदेहतां वा सालोक्यं समानलोकतां चोपास्तेस्तारतम्याज्जायते प्राप्नोतीत्यर्थः। अन्यव्रतानुष्ठानादन्याप्राप्तेरत्र

---

१ ज. ट. °भेदेनोप°। २ ठ. ड. °पपत्तिरि°। ३ ठ. ड. °प्रायमुक्त°। ४ ठ. ड. °तमु°। ५ क. ख. ड. °चल्यन्या। ६ ठ. ड. °तां वोपा°। ७ ठ. ड. °त्र वा°।

(संवर्गविद्योक्ताधिदैववाय्वध्यात्मप्राणयोरनुचिन्तनस्य पृथक्त्वम्, अधि० २८)

चरेत् " [बृ० १-५-२३] इति चोक्त्वा " तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति " [बृ० १-५-२३] इति वायुप्राप्तिं फलं ब्रुवन्वायुव्रतमनिवर्तितं दर्शयति । देवतेत्यत्र वायुः स्यादपरिच्छिन्नात्मैकत्वस्य प्रेप्सितत्वात् । पुरस्तात्प्रयोगाच्च " सैषाऽनस्तमिता देवता यद्वायुः " [बृ० १-५-२२] इति। तथा " तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु " [छा० ४-३-४] इति भेदेन व्यपदिशति " ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतम् । " [छा० ४-३-८] इति च भेदेनैवोपसंहरति । तस्मात्पृथगेवोपगमनम् " प्रदानवत् " । यथा " इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रियाधिराजायेन्द्राय स्वराज्ञे " [तै० सं० २-३-६-१] इत्यस्यां त्रिपुरोडाशिन्यामिष्टौ " सर्वेषामभिगमयन्नवद्यत्यछंवट्कारम् " [तै० सं० २-३-६-२] इति । अतो वचनादिन्द्राभेदाच्च सह-

---

च वायुप्राप्तिनिर्देशान्न तद्व्रतनिवृत्तिरिति श्रुतितात्पर्यमाह—वायुरिति । देवताप्राप्तिरेवात्र श्रुता न वायुप्राप्तिरित्याशङ्क्याऽऽह—देवतेति । अग्न्यादीनपेक्ष्यानवच्छिन्नो देवो वायुस्ते[4] तु तेनैवावच्छिन्ना इति संवर्गगुणो वायुरनवच्छिन्ना देवता तदात्मत्वमेत्याऽऽप्नुमिष्टमतो देवताप्तिर्वायुप्राप्तिरित्यर्थः । न केवलं प्रकरणालोचनया देवता वायुः किंतु साक्षादेव श्रुतेरित्याह—पुरस्तादिति । यत्तु पृथगुपदेशात्पृथगुपनयनमुक्तं तदिदानीं विवृणोति—तथेति । संवर्गभेदेनोपक्रमवद्भेदेनोपसंहारादपि पृथगनुचिन्तनमित्याह—ते वा इति । उपक्रमोपसंहारैकरूप्यफलमुपसंहरति—तस्मादिति । तत्रोदाहरणमवतार्य व्याचष्टे—प्रदानवदिति । त्रयः पुरोडाशा यस्यां सा त्रिपुरोडाशिनी तस्यामुत्पत्तिवाक्यमुदाहरति—इन्द्रायेति । किं तस्यां सह प्रदानं किंवा भेदेनेति संदेहे पूर्वपक्षमाह—सर्वेषामिति । याज्ञिकाः खल्वस्यामिष्टौ युगपदेवावदानं कुर्वन्ति तेन सर्वेषां देवताविशेषाणामभिगमयन्प्रापयन्नपर्यायेणैव पुरोडाशानवद्यति तत्तद्भागं गृह्णातीत्यत्र हेतुमाह—अछंवट्कारमिति । अव्यर्थत्वायेति यावत् । एकार्थं सर्वतोऽवदाने शेषो यागानर्हः स्याद्युगपत्सर्वार्थमवदाने त्ववैयर्थ्यमित्यर्थः । उक्ताद्वाक्यात्सर्वार्थं सहावदानश्रुतेर्देवतायां भेदाभावाच्चैं तत्रयाणां पुरोडाशानां सहप्रदानं प्राप्तमित्याह—अत इति ।

---

१ ङ. ञ. °वता ह्यत्र । २ ङ. ञ. °त्मत्वं । ३ ङ. ञ. °मिष्टयां स° । ४ क. °स्ते नु ते° । ५ क. ख. °मत्र प्राप्तु° । ६ क. ख. ठ. ङ. °पगमनमु° । ७ ठ. ड. °च त्रया° ।

प्रदानाशङ्कायां राजादिगुणभेदाद्याज्यानुवाक्याव्यत्यासविधानाच्च यथान्यासमेव देवतापृथक्त्वात्प्रदानपृथक्त्वं भवति । एवं तत्त्वाभेदेऽप्याध्येयांशपृथक्त्वादाध्यानपृथक्त्वमित्यर्थः।"तदुक्तं" संकर्षे " नाना वा देवता पृथग्ज्ञानात् " इति । तत्र तु द्रव्यदेवताभेदाद्यागभेदो विद्यते नैवमिह विद्याभेदोऽस्ति । उपक्रमोपसंहाराभ्यामध्यात्माधिदैवोपदेशेष्वेकविद्याविधानप्रतीतेः । विद्यैक्येऽपि त्वध्यात्माधिदैवभेदात्प्रवृत्तिभेदो भवति । अग्निहोत्र इव सायंप्रातःकालभेदात् । इत्येतावदभिप्रेत्य प्रदानवदित्युक्तम् ॥ ४३ ॥ (२८)

सिद्धान्तमाह—राजादीति । उत्पत्तिवाक्य एव राजाधिराजस्वराजगुणभेदाद्यथान्यासं यथावचनं तैत्तद्गुणविशिष्टदेवताभेदात्प्रदानस्य प्रक्षेपस्य पृथक्त्वमित्यर्थः । किंच त्रिपुरोडाशिन्यामिष्टौ प्रथमपुरोडाशप्रदाने या याज्या सा पुनः प्रयोगेऽनुवाक्या याऽत्र पूर्वमनुवाक्या सा पश्चाद्याज्येति व्यत्यासमन्वाहेत्यनेन विहितं तत्प्रयोगभेदे युज्यत एकस्या ऋच एकस्मिन्प्रयोगे याज्यानुवाक्यात्वविरोधादित्याह—याज्येति । अध्वर्युणा यजेति प्रैषे कृते होत्रा प्रयुज्यमानो मन्त्रो याज्याऽनुब्रूहीति प्रैषानन्तरं प्रयुज्यमानस्तु मन्त्रोऽनुवाक्येति भेदः । पूर्वोत्तरपक्षाभ्यां दृष्टान्तं व्याख्याय दार्ष्टान्तिकमाह—एवमिति । उक्तेऽर्थे देवताकाण्डस्थमधिकरणं प्रदानभेदविषयमुदाहरति—तदुक्तमिति । संकृष्यते कर्मकाण्डस्थमेवावशिष्टं कर्म संक्षिप्योच्यत[अस्मिन्] इति संकर्षो देवताकाण्डं तस्मिन्निति यावत् । वाशब्दो देवतैकत्वाशङ्काव्यावृत्त्यर्थः । नाना देवतेत्यत्र हेतुमाह—पृथगिति । उत्पत्तिवाक्य एव राजाधिराजादिगुणानां पृथग्ज्ञानात्तत्तद्गुणविशिष्टदेवतानामपि पृथक्त्वस्य युक्तत्वादित्यर्थः । दृष्टान्ते देवताद्रव्यभेदात्कर्मभेदवदिहापि वायुः प्राण इतिशब्दादादित्यं चरुं सौर्यं चरुमित्यादिष्वादित्यसूर्यादिशब्दभेदादिव देवताभेदेन विद्याभेदः स्यादित्याशङ्क्याऽऽह—तत्रेति । यत्रोत्पत्तिवाक्यादेव नानाद्रव्यदैवतं कर्म दृष्टं तत्र तद्भेदो वैश्वदेव्यामिक्षेत्यादिवत् । यत्र तूत्पत्तित एव कर्मैक्यं तत्र देवतादिभेदेऽपि न कर्मभेदोऽग्निहोत्रादिर्वदेव विद्यैक्यमित्यर्थः । तर्हि केन साम्येन प्रदानवदित्युक्तं तत्राऽऽह—विद्येति । आग्निहोत्रे हि सायमग्निः प्रजापतिश्च देवता सूर्यः प्रजापतिश्च प्रातरनुष्ठानं चोभयत्रान्यादृशं तथेहापि ध्यानभेदसिद्धिरित्यर्थः ॥ ४३ ॥ (२८)

---

१ ट. 'दानश' । २ ख. ग. 'भ्यामाध्या' । ३ ग. त्वमाध्या' । ४ ङ. ज. इत्याभि' । ५ क. ठ. तद्धं' । ६ ख. ङ. या च पूं' । ७ ठ. ङ. 'कत्वश' । ८ ठ. ङ. 'व्यदेव' । ९ ख. ठ. ङ. 'वदिह त्वमिहोत्रादिवदे' ।

(मनश्चिदादीनां स्वतन्त्राविद्यात्वस्वीकारः, अधि० २९)

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥

वाजसनेयिनोऽग्निरहस्ये "नैव वा इदमग्रे सदासीत्" [शत० १०-५-३-१] इत्येतस्मिन्ब्राह्मणे मनोऽधिकृत्याधीयते "तत्षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चितः" [१०-५-३-३] इत्यादि । तथैव वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचित इति पृथगग्नीनामनन्ति सांपादिकान् । तेषु संशयः—किमेते मनश्चिदादयः क्रियानुप्रवेशिनस्तच्छेषभूता उत स्वतन्त्राः केवलविद्यात्मका इति। तत्र प्रकरणात्क्रियानुप्रवेशे प्राप्ते स्वातन्त्र्यं तावत्प्रतिजानीते—लिङ्गभूयस्त्वादिति । भूयांसि हि लिङ्गान्यस्मिन्ब्राह्मणे केवलविद्यात्मकत्वमेषामुपोद्बलयन्ति दृश्यन्ते "तद्यत्किंचेमानि भूतानि

वायुविद्योक्त्यनन्तरं सांपादिकाग्निविद्याचिन्तामारभते—लिङ्गेति । सांपादिकानग्नीन्क्रियाप्रकरणस्थान्मनश्चिदादीन्विषयत्वेनोपन्यस्यति—वाजसनेयिन इति । उत्पत्तेः प्रागिदं सर्वं नैव सदासीन्नाप्यसदित्युपक्रम्य मनसः प्रादुर्भावमुक्त्वा तदात्मानमैक्षतेतीक्षणपूर्वकं तन्मन आत्मनोऽग्नीनपश्यदिति मनोऽधिकृत्य पठन्तीत्यर्थः । पुरुषस्याऽऽयुष्टेन कृत्स्नशतवर्षान्तर्गतषट्त्रिंशत्सहस्राहोरात्रावच्छिन्नैर्मनोवाक्प्राणचक्षुःश्रोत्रैत्वक्कायवृत्तिनिचयैरिष्टकात्वेन भाव्यमानैश्चीयमानान्सांपादिकानग्नीन्वदन्तीत्याह—तदिति । अर्कानर्चनीयान्मनोमयान्मनोवृत्तिभावितत्वाद्वागादिवृत्तिभिरिष्टकात्वेन भाविताभिश्चीयन्त इति वाक्चिदादीनग्नीनात्मनो वागादयोऽप्यपश्यन्नित्याह—तथैवेति । क्रत्वर्थत्वपुरुषार्थत्वविनियोजकमानदृष्ट्या संशयमाह—तेष्विति । केवलविद्यात्मकत्वं क्रियानुप्रवेशं विना भावनामयत्वम् । वायुप्राणयोरेकप्रयोगायोगात्प्रयोगभेदेन ध्येयत्वेऽपि मनश्चिदादीनां कर्माङ्गत्वेनैकप्रयोगत्वं युक्तमित्याह—तत्रेति । सांपादिकाग्नीनां केवलविद्यात्मत्वेन पुरुषार्थत्वसमर्थनद्वारा वाक्यार्थबीहेतोरेवोक्तेरत्र पादादिसंगतिः । पूर्वपक्षे क्रियार्थानामग्नीनां क्रियात्वं सिद्धान्ते पुमर्थानां तेषां केवलविद्यामयत्वमित्यङ्गीकृत्य सिद्धान्तमुपक्रमते—स्वातन्त्र्यमिति । सूत्राक्षराणि योजयति—भूयांसीति । सर्वाण्यपीमानि भूतानि यत्किमपि मनसा संकल्पयन्ति तेषामेवाग्नीनां सा कृतिः करणमित्येतत् । प्रकृताग्नीनां स्वातन्त्र्येण भावनामयत्वे लिङ्गं न हि क्रियाङ्गं यत्किंचित्करणे सिध्यति चोदनैकलभ्यत्वादित्याह—तद्यदिति । एवंविदे स्वपते जाग्र-

---

१ क. ग्र. अ. 'ते षट्' । २ ग्र. 'दृत्रिंश' । ३ क. 'स्थान्वि' । ४ ड. सदासीदि' । ५ ठ. ड. 'त्रकाय' । ६ ठ. ड. 'न संभा' । ७ क. ख. षाडेति । ८ ठ. ड. 'धेषु' । ९ ग्र. 'त्मरक्षं' । १० ग्र. 'ध्यतीति ।

मनसा संकल्पयन्ति तेषामेव सा कृतिः " [१०-५-३-१] इति " तान्हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते " [शत० १०-५-३-१२] इति चैवंजातीयकानि । तद्धि लिङ्गं प्रकरणाद्बलीयः । तदप्युक्तं पूर्वस्मिन्काण्डे—" श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् । " [जै० सू० ३-३-१४] इति ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात्स्याक्रिया मानसवत् ॥ ४५ ॥

नैतद्युक्तं स्वतन्त्रा एतेऽग्नयोऽनन्यशेषभूता इति । पूर्वस्य क्रियामयस्याग्नेः प्रकरणात्तद्विषय एवायं विकल्पविशेषोपदेशः स्यान्न स्वतन्त्रः । ननु प्रकरणाल्लिङ्गं बलीयः । सत्यमेवमेतत् । लिङ्गमपि स्वेवंजातीयकं न प्रकरणाद्बलीयो भवति । अन्यार्थदर्शनं ह्येतत् । सांपादिकाग्निप्रशंसारूपत्वात् ।

तेऽपि तानेतानग्नीन्भूतानि सर्वाणि सर्वदा चिन्वन्तीति लिङ्गान्तरं न हि कर्माङ्गं सर्वदा सर्वैरनुष्ठीयते प्रतिनियतदेशकालनिमित्तेषु चोदितत्वादित्याह—तानिति । कार्यकरणव्यापारैः षट्त्रिंशत्सहस्राहोरात्रावच्छिन्नैरिष्टकात्वेन भावितैरेतैः संपाद्यन्ते । तत्रेष्टकास्वग्निषु च संख्याधिक्यमग्नीनां केवलविद्यात्वे लिङ्गम् । न हि क्रियाङ्गत्वे प्रसिद्धसंख्यातिरेकसिद्धिरिति मत्वाऽऽह—एवमिति । प्रकरणादेषां क्रियाङ्गत्वं सिद्धं लिङ्गाच्च स्वातन्त्र्यं तेन संशयः स्यादित्याशङ्क्याऽऽह—तद्धीति । प्रमाणत्वाविशेषे कुतो बलाबलव्यवस्थेत्याशङ्क्याऽऽह—तदपीति ॥ ४४ ॥

सिद्धान्तेनोपक्रम्याधुना पूर्वपक्षयति—पूर्वेति । पूर्वपक्षं विवृण्वन्नुक्तसिद्धान्तप्रतिज्ञां निषेधति—नैतदिति । संप्रति सहेतुकं पूर्वपक्षं प्रतिजानीते—पूर्वस्येति । इष्टकाभिरग्नींश्चिनुत इत्युक्तक्रियामयाग्न्यधिकारे श्रवणादयमपि सांपादिकाग्न्युपदेशस्तद्विषयो विकल्पोपदेशस्तथाच यथा क्रियाङ्गं क्रियामयोऽग्निस्तथा सांपादिकाग्निरपि तदङ्गं स्यादित्यर्थः । विकल्पविशेषः प्रकारभेदः । उक्तं सैद्धान्तिकं मतमनुवदति—नन्विति । तेन प्राकरणिकं क्रियाशेषत्वं हित्वा लैङ्गिकं पुमर्थत्वमेष्टव्यमिति शेषैः । विध्युद्देशस्थमर्थवादस्थं वा लिङ्गं प्रकरणाद्बलवदिति विकल्प्याऽऽद्यमङ्गी करोति—सत्यमिति । द्वितीयं दूषयति—लिङ्गमिति । एवंजातीयकं सर्वदा सर्वाणि भूतानि चिन्वन्तीत्याद्यर्थवादस्थमिति यावत् । तदेव साधयति—अन्यार्थेति ।

---

१ ङ. ञ. 'व तं' । २ ञ. 'दा विचिं' । ३ क. ख. विशेषः । ४ ञ. ठ. 'नि विचिं' ।

(मनश्चिदादीनां स्वतन्त्रविद्यात्वस्वीकारः अधि० २९)

अन्यार्थदर्शनं चासत्यामन्यस्यां प्राप्तौ गुणवादेनाप्युपपद्यमानं न प्रकरणं बाधितुमुत्सहते। तस्मात्सांपादिका अप्येतेऽग्नयः प्रकरणात्क्रियानुप्रवेशिन एव स्युः। " मानसवत् "। यथा

न हीदं साधनात्मकं लिङ्गं विध्युद्देशकवाक्यतया तत्परत्वादतो नेदं स्वातन्त्र्येण प्रमापकं स्तुतिमात्रत्वादित्यर्थः। अन्यार्थदर्शनानामपि प्रमापकत्वमाशङ्क्य मूलप्रमाणभावे तथाभावेऽपि प्रकृते तदभावान्नैवमित्याह—**अन्येति**। प्रकृतलिङ्गस्य प्रकरणाबाधकत्वे फलितमाह—**तस्मादिति**। एतेन क्रियेति पदं व्याख्यातम्। कथमक्रियारूपाणामेतेषां क्रियाशेषत्वं तत्राऽऽह—**मानसवदिति**। द्वादशाहे श्रूयतेऽनया त्वा पात्रेण समुद्रं रसया प्राजापत्यं मनोग्रहं गृह्णातीति। तत्र किं मानसं द्वादशाहादहरन्तरं किंवा तन्मध्यपातिनो दशमस्याङ्गमिति संदेहे वाग्वै द्वादशाहो मनो मानसमिति भेदोक्त्या मानसस्य द्वादशाहाद्भेदसिद्धेर्द्वादशाहस्य गतरसान्यङ्गानि मानसेनैवाऽऽप्याययन्तीति च मानसेन द्वादशाहस्य स्तुतेः स्तुतिस्तुत्यभावस्य भेदाकाङ्क्षत्वात्पत्नीसंयाजान्तान्यहानि संतिष्ठन्त इत्युक्त्वा द्वादशाहान्तर्गतानामङ्गां पत्नीसंयाजान्तत्वदृष्टेर्मानसस्य च पत्नीसंयाज्यमानसाय प्रसर्पन्तीति पत्नीसंयाजादुपरिष्टादेव श्रुतेर्द्वादशाहसंज्ञायाश्च त्रयोदशाहेऽपि द्वादशाहसत्त्वेन कथंचिदुपपत्तेर्द्वादशाहादहरन्तरं मानसमिति प्राप्ते मानसस्य त्रयोदशाहत्वे मानाभावाद्वादशाहसंज्ञाया गुणवृत्त्या नेतुमयुक्तत्वादङ्गाङ्गिभेदेनोक्तिभेदस्य स्तुतिस्तुत्यभावस्य च सिद्धेरङ्गां पत्नीसंयाजान्ततायाश्चौत्सर्गिकत्वाद्विशेषोक्त्या दशमस्याह्नो ग्रहणादीनां मानसानां पत्नीसंयाजात्परत्वाविरोधादेष वै दशमस्याह्नो विसर्गो यन्मानसमिति चोक्तेर्विसर्गस्यान्तस्यान्तवतो धर्मत्वाद्दशमाहरङ्गतावगतेर्दशमेऽहनि मानसाय प्रसर्पन्तीति चाऽऽधारत्वोक्तेस्तदङ्गमेव मानसं नाहरन्तरमिति राद्धान्तितम्। तदेवं द्वादशाहयोगिनो दशमस्याह्नो मानसमङ्गमिति कर्ममीमांसायामुक्तं तथाऽपि दशरात्रस्य द्वादशाहविकृतित्वात्क्रमेणाहर्धर्मेष्वतिदिष्टेषु दशरात्रगतदर्शमाहन्यपि द्वादशाहान्तर्गतदशमाहरङ्गस्य मानसस्यास्ति प्राप्तिरित्यभिप्रेत्य व्याचष्टे—**यथेति**। अविवाक्यमिति दशमस्याह्नो नामधेयं विविधानि वाक्यानि यत्र मानसत्वादृत्विजां न सन्ति तत्तथेति व्युत्पत्तेः। तत्रेदं श्रुतमनया त्वा पात्रेणेत्यादि त्वां समुद्रमनया रसया पृथिव्या पात्रेण प्रजापतिदेवताकं मनोग्रहं ध्यानमयं ग्रहमापाद्याध्वर्युर्गृह्णातीति

---

१ क. ज. ञ. ट. °था द°। २ ठ. °सिद्धद°। ३ ठ. ड. °त्युक्त्या द्वा°। ४ ड. °शमेऽह°। ठ. ड. °ह्नो मानसमङ्गमिति ना°। ६ क. ख. ठ. ड. °मयग्र°।

द्वादशरात्रस्य दशमेऽहन्यविवाक्ये पृथिव्या पात्रेण समुद्रस्य सोमस्य प्रजापतये देवतायै गृह्यमाणस्य ग्रहणासादनहवनाहरणोपह्वानभक्षणानि मानसान्येवाऽऽम्नायन्ते। स च मानसोऽपि ग्रहकल्पः क्रियाप्रकरणात्क्रियाशेष एव भवत्येवमयमप्यग्निकल्प इत्यर्थः ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥

अतिदेशश्चैषामग्नीनां क्रियानुप्रवेशमुपोद्बलयति " षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्वः " [शत० १०-५-३-११] इति। सति हि सामान्येऽतिदेशः प्रवर्तते। ततश्च पूर्वेणेष्टकाचितेन क्रियानुप्रवेशिनाऽग्निना सांपादिकानग्नीनतिदिशन्क्रियानुप्रवेशमेवैषां द्योतयति ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥

तुशब्दः पक्षं व्यावर्तयति। विद्यात्मका एवैते स्वतन्त्रा मनश्चिदादयोऽग्नयः स्युर्न क्रियाशेषभूताः। तथा हि निर्धारयति " ते हैते विद्याचित एव " इति। " विद्यया हैवैत एवंविदश्चिता भवन्ति " [शत० १०-५-३-१२] इति च ॥४७॥

वाक्यार्थः। तमिमं सोपस्करमुपन्यस्यति—पृथिव्येति। ग्रहणं सोमाधारपात्रस्योपादानमासादनं गृहीतस्य स्वस्थाने स्थापनं ततः सोमस्य होमो हवनं हुतशेषादानमाहरणं पश्चादृत्विजां तद्भक्षणाय मिथोऽनुज्ञाकरणमुपह्वानं ततोऽवशिष्टस्य सोमस्य भक्षणमित्येतानि मानसान्येवेत्यर्थः। कथमन्यग्रहयोगिनो(णो) मानसस्य कल्पनाभेदस्य क्रियानुप्रवेशित्वं तत्राऽऽह—स चेति। उक्तदृष्टान्तादग्निसंबन्धिकल्पनाभेदोऽपि क्रियाधिकारात्क्रियानुप्रवेशीति दार्ष्टान्तिकमाह—एवमिति ॥ ४५ ॥

मनश्चिदाद्यग्नीनां क्रियानुप्रवेशे लिङ्गान्तरमाह—अतिदेशाच्चेति। सूत्रं व्याकरोति—अतिदेशश्चेति। तमेवं दर्शयति—षडिति। कथं तावता क्रत्वङ्गत्वं तदाह—सतीति। क्रियानुप्रवेशमन्तरेणान्यदेव तादृश्यमतिदेशकृतमित्याशङ्क्य तस्य योग्यानुपलम्भान्नैवमित्याह—ततश्चेति ॥ ४६ ॥

सिद्धान्तमाह—विद्यैवेति। परपक्षनिषेधं प्रतिजानीते—तुशब्द इति। सिद्धान्तप्रतिज्ञामाह— विद्येति। हेतुं व्याचष्टे—तथा हीति। एवकारश्रुत्या प्रकरणं बाध्यमिति भावः। मनश्चिदाद्यग्नीनां विद्यात्मत्वे श्रुतितात्पर्यं वक्तुं श्रुत्याभासं दर्शयन्वाक्यमपि समुच्चिनोति—विद्ययेति ॥ ४७ ॥

---

१ ङ. °णोपाह्वा°। २ ठ. ड. °पस्कार°। ३ क. °व च द°।

(मनश्चिदादीनां स्वतन्त्रविद्यात्वस्वीकारः, अधि० २९)

दर्शनाच्च ॥ ४८ ॥

दृश्यते चैषां[1] स्वातन्त्र्ये लिङ्गम्। तत्पुरस्तादर्शितम् " लिङ्गभूयस्त्वात् " [ब्र० सू० ३-३-४४] इत्यत्र ॥ ४८ ॥

ननु लिङ्गमप्यसत्यामन्यस्यां प्राप्तावसाधकं कस्यचिदर्थस्येत्यपास्य तत्प्रकरणसामर्थ्यात्क्रियाशेषत्वमध्यवसितमित्यत उत्तरं पठति—

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

नैवं प्रकरणसामर्थ्यात्क्रियाशेषत्वमध्यवसाय स्वातन्त्र्यपक्षो बाधितव्यः। श्रुत्यादेर्[2]बलीयस्त्वात्। बलीयांसि हि प्रकरणाच्छ्रुतिलिङ्गवाक्यानीति स्थितं श्रुतिलिङ्गसूत्रे [जै० ३-३-१४] तानि चेह स्वातन्त्र्यपक्षं साधयन्ति दृश्यन्ते। कथम्। श्रुतिस्तावत् " ते हैते विद्याचित एव " [शत० १०-५-३-१३] इति। तथा लिङ्गम् " सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते " [शत० १०-५-३-१३] इति। तथा वाक्यमपि " विद्यया हैवैत एवंविदश्चिता भवन्ति " [शत० १०-५-३-१३] इति। " विद्याचित एव " इति हि सावधारणेयं श्रुतिः क्रियानुप्रवेशेऽमीषामभ्युपगम्यमाने [3]पीडिता स्यात्। नन्वबाह्यसाधनत्वाभिप्रायमिदमवधारणं भविष्यति। नेत्युच्यते। तदभिप्रायतायां हि "विद्याचितः" इतीयत्[4] स्वरूपसं-

---

न श्रुत्यैव प्रकरणं बाध्यं लिङ्गादपीत्याह—दर्शनाच्चेति। तद्विभजते—दृश्यते चेति। किं तदित्यपेक्षायामाह—तत्पुरस्तादिति ॥ ४८ ॥

उत्तरसूत्रव्यावर्त्यं पूर्वोक्तं चोद्यमनुस्मारयति—नन्विति। तदुत्तरं सूत्रमवतारयति—अत इति। न बाध इत्येतद्व्याचष्टे—नैवमिति। हेतुमवतार्य व्याचष्टे—श्रुत्यादीति। तेषां प्रकरणाद्बलीयस्त्वेऽपि प्रकृते किं जातं तत्राऽऽह—तानि चेति। स्वातन्त्र्यसाधकश्रुत्यादिदृष्टिमेव प्रश्नद्वारा स्फुटयति—कथमित्यादिना। तत्र श्रुतिं विवृणोति—विद्येति। अवधारणश्रुतेरन्यथासिद्धिं शङ्कते—नन्विति। दूषयति—नेत्युच्यत इति। कृतत्वादभिप्रेतस्याबाह्यसाधनत्वस्य ज्ञातत्वादिति

---

१ क. चैतेषां। २ क. ङ. ज. ञ. 'त्यादिबली'। ३ ङ. ञ. बाधिता। ४ ङ. ञ. ट. 'ता वियास्व'। ५ ठ. ड. 'स्वे प्र'। ६ क. ख. ठ. ड. तदाह।

कीर्तनेनैव कृतत्वादनर्थकमवधारणं भवेत् । स्वरूपमेव ह्येषामबाह्यसाधनमिति । अबाह्यसाधनत्वेऽपि तु मानसग्रहवत्क्रियानुप्रवेशशङ्कायां तन्निवृत्तिफलमवधारणमर्थवद्भविष्यति । तथा स्वपते जाग्रते चैवंविदे सर्वदा सर्वाणि भूतान्येतानग्नींश्चिन्वन्तीति सातत्यदर्शनमेषां स्वातन्त्र्येऽवकल्पते । यथा सांपादिके वाक्प्राणमयेऽग्निहोत्रे " प्राणं तदा वाचि जुहोति वाचं तदा प्राणे जुहोति " [कौषी० २-५] इति चोक्त्वोच्यते " एते अनन्ते अमृते आहुती जाग्रच्च स्वपंश्च सततं जुहोति " [कौषी०२-५] इति । तद्वत् । क्रियानुप्रवेशे तु क्रियाप्रयोगस्याल्पकालत्वेन न सातत्येनैषां प्रयोगः कल्पेत । न चेदमर्थवादमात्रमिति न्याय्यम् । यत्र हि विस्पष्टो विधायको लिङादिरुपलभ्यते युक्तं तत्र संकीर्तनमात्रस्यार्थवादत्वम् । इह तु विस्पष्टविध्यन्तरानुपलब्धेः संकीर्तनादेवैषां विज्ञानविधानं कल्पनीयम् । तच्च यथासंकीर्तनमेव कल्पयितुं शक्यत इति सातत्यदर्शनात्तथाभूतमेव

यावत् । स्वरूपसंकीर्तनेन कृतत्वमेव स्फुटयति—स्वरूपमिति । विद्याशब्देनैव बाह्यसाधनत्वं व्यावर्त्यते चेत्तन्मतेऽपि किमर्थमवधारणमित्याशङ्क्याऽऽह—अबाह्येति । संप्रत्यवधारणश्रुतिवदेव लिङ्गं व्यनक्ति—तथेति । सातत्यं सर्वकालसर्वपुरुषव्यापित्वं तेन हेतुना क्रियानुप्रवेशाभावे दृष्टान्तमाह—यथेति । तदेति संपादनावस्थोक्तिः । आहुत्योरनन्तत्वमक्षयफलत्वादित्याह—अमृते इति । तयोरपि क्रियाङ्गत्वशङ्कां प्रत्याह—जाग्रच्चेति । उक्तदृष्टान्तात्प्रकृताग्नीनां सातत्यदृष्टेर्न क्रियाप्रवेशितेति दार्ष्टान्तिकमाह—तद्वदिति । सातत्यप्रयोगेऽपि किमित्यग्नीनां क्रियाप्रवेशो न स्यात्तत्राऽऽह—क्रियेति । यत्पुनरर्थवादस्थं लिङ्गं न प्रकरणबाधकमिति तत्राऽऽह—न चेति । अन्येषां श्रुतिविध्युद्देशानामन्यार्थदर्शनानामप्रापकत्वेऽपि प्रकृतेषु वचनानि त्वपूर्वत्वादिति न्यायेन सर्वदा सर्वाणि भूतानि मदर्थमग्निं चिन्वन्तीति मन्वीतेति विधिः कल्प्यते । अपूर्वार्थवादितया भासमानानां द्योतकत्वमात्राङ्गीकारेण गुणवादाश्रयणायोगादिति मत्वाऽऽह—यत्रेति । उक्तन्यायं

---

१ ङ. अ. °कमिदम° । २ ङ. अ. °नत्वमि° । ३ ज. °त्वे तु । ४ ङ. अ. °पि मा° । ५ ट. °याप्र° । ६ क. ङ. ज. अ. °मेतेषां । ७ ङ. अ. °क्येनैव क° । ८ ङ. अ. इत्युक्त्वो° । ९ क. ङ. ज. अ. °लत्वान्न सा° । १० ङ. ज. अ. लिङादि° । ११ ङ. अ. °ज्ञानानां वि° । १२ ङ. °तेनकृ° । १३ ठ. °यासु प्र° । १४ क. उक्तं न्या° ।

(मनश्चिदादीनां स्वतन्त्रविद्यात्वस्वीकारः, अधि० २९)

कल्प्यते । ततश्च सामर्थ्यादेषां स्वातन्त्र्यसिद्धिः । एतेन "तद्यत्किंचेमानि भूतानि मनसा संकल्पयन्ति तेषामेव सा कृतिः [शत० १०-५-३-३] " इत्यादि व्याख्यातम् । तथा वाक्यमपि "एवंविदे" इति पुरुषविशेषसंबन्धमेवैषामाचक्षाणं न क्रतुसंबन्धं मृष्यते । तस्मात्स्वातन्त्र्यपक्ष एव ज्यायानिति ॥ ४९ ॥

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ५० ॥

इतश्च प्रकरणमुपमृद्य स्वातन्त्र्यं मनश्चिदादीनां प्रतिपत्तव्यम्। यत्क्रियावयवान्मनआदिव्यापारेष्वनुबध्नाति " ते मनसैवाऽऽधीयन्त मनसा चीयन्ते मनसैव ग्रहा अगृह्यन्त मनसाऽस्तुवन्मनसाऽशंसन्यत्किंच यज्ञे कर्म क्रियते यत्किंच यज्ञियं कर्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमेव क्रियते " [शत० १०-५-३-३] इत्यादिना । संपत्फलो ह्ययमनुबन्धः । न च मत्यक्षाः

वाक्यान्तरेऽपि संचारयति—एतेनेति । श्रुतिलिङ्गे विविच्य वाक्यं विविनक्ति—तथेति । श्रुतिलिङ्गवाक्येभ्यो भग्ने प्रकरणे फलितमाह—तस्मादिति ॥ ४९ ॥

स्वातन्त्र्ये हेत्वन्तराण्याह—अनुबन्धादिभ्य इति । सूत्रस्य हेत्वन्तरोक्तौ तात्पर्यमाह—इतश्चेति । तत्रानुबन्धं हेतुं विवृणोति—यदिति । क्रियाङ्गानां(णां) मनआदिव्यापारेषु संयोजनान्यथानुपपत्त्याऽपि न क्रियाशेषत्वं मनश्चिदादीनामित्यर्थः । तेऽग्नयो विदुषा मनसैवाऽऽधीयन्ताऽऽधीयन्ते छंदसि कालानियमात् । मनसा चीयन्त इष्टकाश्चीयन्ते । मानसेषु मनश्चित्स्वग्निषु ग्रहाः पात्राणि विदुषाऽगृह्यन्त गृह्यन्ते । मनसैवास्तुवन्नुद्गातृप्रभृतयः स्तुवन्ति । मनसैवाशंसन्होत्रादयः शंसन्ति । अन्यदपि यत्किंचिद्यज्ञेषु पुरुषार्थं क्रियते यच्च यज्ञार्हं क्रत्वर्थं तत्रानुष्ठीयते तत्सर्वमेव मनोमयं भावनामयं विदुषा मनसैवाक्रियत क्रियत इत्यर्थः । किमर्थमिदमनुबन्धकरणं तदाह—संपादिति । उपास्त्यर्थो ह्यनुबन्धस्तथाऽपि मनश्चिदादीनामक्रियाङ्गत्वे किमायातं तदाह—न चेति । तेषां क्रियाङ्गत्वे साक्षादेवाऽऽधानादिप्रसिद्धेरनर्थिका संपदित्यर्थः । तर्हि कर्माङ्गयोगादुद्गीथाद्युपासनावदिदमपि क्रियागतमुपासनं स्यान्नेत्याह—

---

१ क. यतः क्रिया° । २ ङ. °यन्ते म° । ३ ङ. अ. °नसैवाऽऽची° । ४ क. ङ अ. °यन्त म° । ५ क. °वत मन° । ६ ङ. अ. °त्किंचिद्यज्ञे । ७ ङ. अ. °त्किंचिद्यज्ञीयं । ८ ट. यज्ञीयं । ९ ज. °मयं क्रि° । १० क. ङ. अ. °यमक्रि° । ११ क. ङ. अ. °यत" इ° । १२ क. ङ. °बन्धहे° । १३ ख. ठ. ङ. °षा गृह्यन्ते ।

क्रियावयवाः सन्तः संपदा लिप्सितव्याः । न चात्रोद्गीथाद्युपासनवत्क्रियाङ्गसंबन्धात्तदनुप्रवेशित्वमाशङ्कितव्यं श्रुतिवैरूप्यात् । न ह्यत्र क्रियाङ्गं किंचिदादाय तस्मिन्नदो नामाध्यवसि(सा)तव्यमिति वदति । षट्त्रिंशत्सहस्राणि तु मनोवृत्तिभेदानादाय तेष्वग्नित्वं ग्रहादींश्च कल्पयति पुरुषयज्ञादिवत् । संख्या चेयं पुरुषायुषस्याहःसु दृष्टा सती तत्संबन्धिनीषु मनोवृत्तिष्वारोप्यत इति द्रष्टव्यम् । एवमनुबन्धात्स्वातन्त्र्यं मनश्चिदादीनाम् । आदिशब्दादतिदेशाद्यपि यथासंभवं योजयितव्यम् । तथा हि—" तेषामेकैक एव तावान्यावानसौ पूर्वः " [शत० १०-५-३-११] इति क्रियामयस्याग्नेर्माहात्म्यं ज्ञानमयानामेकैकस्यातिदिशन्क्रियायामनादरं दर्शयति । न च सत्येव क्रियासंबन्धे विकल्पः पूर्वेणोत्तरेषामिति शंक्यं वक्तुम् । न हि येन व्यापारेणाऽऽहवनीयधारणादिना पूर्वः क्रियार्थामुपकरोति तेनोत्तर उपकर्तुं शक्नुवन्ति । यत्तु पूर्वपक्षेऽप्यतिदेश उपोद्बलक इत्युक्तं सति हि सामान्येऽतिदेशः प्रवर्तत इति तदस्मत्पक्षेऽग्नि-

---

न चेति । उपासनं सप्तम्यर्थः । उद्गीथाद्युपास्तिर्वृत्तिश्रुतिविधिवैपरीत्यमेव प्रस्तुतोपास्तिविधौ दर्शयति—न हीति । कथं तर्हीह विधानं तदाह—षडिति । मनोवृत्तिभेदेष्वग्नित्वादिरहितेषु तत्कल्पनायां दृष्टान्तमाह—पुरुषेति । कथं मनोवृत्तिषु संख्याभेदोपादानं तदाह—संख्या चेति । अनुबन्धसामर्थ्यसिद्धेमर्थमुपसंहरति—एवमिति । सौत्रमादिशब्दं योजयति—आदीति । तत्र मनश्चिदादीनां स्वातन्त्र्यप्रापकमतिदेशं विशदयति—तथा हीति । वाक्यतात्पर्यमाह—क्रियेति । ननु पूर्वेणेष्टकाचितेनाग्निना मनश्चिदादीनां विकल्पः स्यादित्युक्तं तेन विकल्पार्थोऽतिदेशो नाऽऽदरार्थ इति तत्राऽऽह—न चेति । व्रीहिभिर्यावत्क्रियते यवैरपि तावदिति युक्तो विकल्पः । प्रकृते तु मनश्चिदादीनां तदभावान्नेष्टकाचितेन विकल्पः स्यादित्याह—न हीति । अतिदेशस्य पूर्वपक्षानुगुण्यात्कथमादिशब्देन ग्रहणमित्याशङ्क्यानुवदति—यच्चिति । अग्नित्वसाम्येनाप्यतिदेशसिद्धेर्न पारिशेष्यमिति दूषयति—तादिति ।

---

१ ज. ठ. न चोद्गी° । २ झ. °शितत्व° । ३ क. °माध्यासि° । ४ ङ. ज. ञ. ट. °ध्यसि° । ५ क. ङ. ञ. °शतं तु सह° । ६ ज. ट. °णि मं° । ७ ङ ञ. शक्यते । ८ क. ङ. ज. ञ. °या उप° । ९ क. ङ. ज. ञ. °क्षेऽप्यग्नि° । १० ठ. ड. °स्तिविधिश्रुतिवै° । ११ क. ख. प्रकृतौ° । १२ ठ. ड. °द्धमु° । १३ झ. °नां नेष्ट° ।

(मनश्चिदादीनां स्वतन्त्रविद्यात्वस्वीकारः, अधि० २९)

स्वसामान्येनातिदेशसंभवात्प्रत्युक्तम्। अस्ति हि सांपादिकानामप्यग्नीनामग्नित्वमिति। श्रुत्यादीनि च कारणानि दर्शितानि। एवम् " अनुबन्धादिभ्यः" कारणेभ्यः स्वातन्त्र्यं मनश्चिदादीनाम्। " प्रज्ञान्तरपृथक्त्ववत् "। यथा प्रज्ञान्तराणि शाण्डिल्यविद्याप्रभृतीनि स्वेन स्वेनानुबन्धेनानुबध्यमानानि पृथगेव कर्मभ्यः प्रज्ञान्तरेभ्यश्च स्वतन्त्राणि भवन्त्येवमिति। दृष्टश्चावेष्टे राजसूयप्रकरणपठितायाः प्रकरणादुत्कर्षो वर्णत्रयानुबन्धाद्राजयज्ञत्वाच्च राजसूयस्य। " तदुक्तं " प्रथमे काण्डे—

अग्नित्वसाम्यसंभवमेव स्फुटयति—अस्तीति। बहुवचनं घटयति—श्रुत्यादीनीति। उक्तहेतुफलं निगमयति—एवमिति। दृष्टान्तमवतार्य व्याचष्टे—प्रज्ञान्तरेति। उक्तदृष्टान्तानुसारादनुबन्धाद्युक्तहेतुभ्यो मनश्चिदादीनामपि स्वातन्त्र्यमिति दार्ष्टान्तिकमाह—एवमिति। सूत्रे[1]विभागव्याख्यासमाप्तावितिशब्दः। मनश्चिदादीनां स्वातन्त्र्ये क्रियाप्रकरणपाठासिद्धिरित्याशङ्क्याऽऽह—दृष्टश्चेति। उत्कर्षे हेतुमाह—वर्णेति। तथाऽपि राजसूयाङ्गत्वयोगादुत्कर्षासिद्धिस्तत्राऽऽह—राजेति। राजा स्वाराज्यकामो राजसूयेन यजेतेत्यारभ्याऽऽग्नेयोऽष्टाकपालो हिरण्यं दक्षिणेत्यादिनाऽवेष्टिर्नामेष्टिरान्नाता। तत्र यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाऽऽहुतिमाहुतिं हुत्वाऽभिघारयेद्यदि वैश्यो वैश्वदेवं यदि राजन्यस्तदैन्द्रमिति श्रूयते। तत्र किं ब्राह्मणादीनां राजसूये प्राप्तानां निमित्तार्थेन श्रवणमुत तेषामेष यो[3]गो विधीयत इति संदेहे प्रजापालनकण्टकोद्धरणादि राज्यं तस्य कर्ता राजे[4]त्यौर्यप्रसिद्धेस्त्रैवर्णिकानामपि तत्कर्तृत्वप्रसिद्ध्या राज[5]शब्दत्वेन राजसूयाधिकारित्वाद्यदि ब्राह्मणो यजेतेत्याद्याः श्रुतयो निमित्तार्था इति नास्ति प्रकरणादुत्कर्षोऽवेष्टेरिति प्राप्ते " गुणवचनब्राह्मणादिभ्यः कर्मणि च " [पा० सू० ५-१-१-१२४] इति पाणिनिना गुणवचनेभ्यः शुक्लादिशब्देभ्यो ब्राह्मणादिशब्देभ्यश्च कर्मणि ष्यञ्त्ययस्मरणाद्राज्ञः कर्म राज्यमिति राजकर्तृयोगाद्राज्यमित्यवगमात्कोऽसौ राजेत्यपेक्षायामार्येषु तत्प्रसिद्ध्यभावेऽपि म्लेच्छानां क्षत्रियमात्रे राज[6]शब्दप्रयोगान्म्लेच्छप्रसिद्ध्या राजशब्दार्थनिर्णयादब्राह्मणादौ च पालनादिकर्तरि राजशब्दस्य गौणत्वात्क्षत्रियस्यैव राजसूयेऽधिकाराद्ब्राह्मणवैश्ययोस्तत्राप्राप्ते राजसूयप्रकरणं हित्वा ब्राह्मणादिकर्तृकाणि कर्मान्तराणि विधीयन्त इति राजसूयप्रकरणादुत्कर्षोऽवेष्टेरिति द्वितीये स्थितम्। तत्र यथा क्षत्रियकर्तृके राजसूये ब्राह्मणादेरनधिकारादवेष्टे राजसूयप्रकरणादुत्कर्षस्तथा मनश्चिदादीनामपि क्रियाप्रकरणादुत्कर्षो लिङ्गादिभिरिति भावः। एकादशेऽपि चिन्तितमेतादित्याह—तदुक्तमिति। राजसूयप्रक्रियायामवेष्टि[7]र्नामेष्टिरान्नाता—आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणा बार्हस्पत्यं चरुं शिति-

---

१ ह. 'बन्धबन्धा'। २ ख. ठ. ड. °त्रभा'। ३ क. ख. प्रयोगो। ४ ख. °जेत्यर्थात्प्रसि°। ५ ठ. ड. °त्यार्थसि'। ६ ठ. ड. °शब्देन। ७ ठ. ड. °शब्दान्म्ले'। ८ ठ. ड. °ष्टिरा'।

" क्रत्वर्थायामिति चेन्न वर्णत्रयसंयोगात् " [जै० सू० ११ ४ ११] इति ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥

यदुक्तं " मानसवत् " [सू० ३-३-४५] इति तत्प्रत्युच्यते । " न " मानसग्रहसामान्यादपि मनश्चिदादीनां क्रियाशेषत्वं कल्प्यम् । पूर्वोक्तेभ्यः श्रुत्यादिहेतुभ्यः केवलपुरुषार्थत्वोपलब्धेः। न हि किंचित्कस्यचित्केनचित्सामान्यं न संभवति । न च तावता यथास्वं वैषम्यं निवर्तते । " मृत्युवत् " यथा " स एषं एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषः " [शत० १०-५-२-३] इति " अग्निर्वै मृत्युः " [बृ० ३-२-१०] इति चाग्न्यादित्यपुरुषयोः समानेऽपि मृत्युशब्दप्रयोगे नात्यन्तसाम्यापत्तिः । यथा च " असौ वाव लोको गौतमाग्निस्त-

---

पृष्ठो दक्षिणेति । तत्राऽऽग्नेयादिहविःष्वङ्गानां तन्त्रेण प्रयोगः किं वाऽऽवृत्त्येति संशये पूर्वपक्षसूत्रमवेष्टौ त्वेकतन्त्रं स्याल्लिङ्गदर्शनादिति बार्हस्पत्यं मध्ये निधायेति लिङ्गोपलम्भात्प्रयोगभेदे च मध्ये निधानायोगादेतयाऽऽद्याद्यकाममित्येकवचनाच्चैकतन्त्र्यमवेष्टावेकस्मिन्प्रयोगे लिङ्गानां तन्त्रेण भावः सकृदनुष्ठानमिति पूर्वपक्षं कृत्वाऽऽद्याद्यकामप्रयोगेऽवेष्टेरिदं लिङ्गदर्शनादि तेन क्रत्वर्थप्रयोगे तस्य तु दक्षिणाभेदाद्भेद इत्यङ्गावृत्तिरेवेति राद्धान्तिते क्रत्वर्थायामपीष्टाविदं लिङ्गदर्शनाद्यस्तीत्यङ्गानावृत्तिरित्याशङ्कामनूद्य दूषयति—क्रत्वर्थायामिति चेदिति । काम्यायामिष्टौ यदि ब्राह्मण इत्यादिना वर्णत्रयसंयोगात्तस्यां च मध्यनिधानादिसिद्धेर्न राजकर्तृकक्रत्वर्थेष्टौ तत्प्राप्तिरतोऽङ्गावृत्तिरित्यर्थः । अत्र चैकप्रयोगत्वलिङ्गस्य क्रत्वर्थेष्टावसंभवं काम्येष्टौ च संभवं वदताऽनेन सूत्रेण काम्येष्टेः क्रत्वर्थेष्टिवैलक्षण्यसूचनाद्वारेणार्थात्प्रकरणादुत्कर्षोऽपि सिध्यतीति क्रियाप्रकरणान्मनश्चिदादीनामुत्कर्षो भवत्येतदनुगुणमुदाहरणमिति द्रष्टव्यम् ॥ ५० ॥

परोदीरितमुदाहरणं विघटयति—नेति । परोक्तमनूद्य तदुत्तरत्वेन सूत्राक्षराणि व्याचष्टे—यदित्यादिना । मानसेन ग्रहेण सह मनश्चिदादीनां च भावनामयत्वे तुल्ये कथं श्रुत्यादिभिः स्वातन्त्र्यं तत्राऽऽह—न हीति । सत्यपि सादृश्ये यथास्वं वैषम्यमव्यावृत्तमित्यत्र दृष्टान्तमादाय व्याचष्टे—मृत्युवदिति । न हीत्यादि विभजते—यथा चेति।

---

१ क. ङ. ज. ञ. 'दिभ्यो हे' । २ क ज भवति ६ ङ. ञ. स वा ए' । ४ क. ज. ष मृ' । ५ ज. झ. ट. 'सौ वै लो' । क 'सौ लोकोऽग्निर्गौतम तस्याऽऽ' । ६ ङ. ञ. 'को गोत' । ७ ङ. ञ. 'मास्याऽऽ' । ८ ठ. ङ. 'देन नि' । ९ ठ. ङ 'न्त्र्यमाचष्ट एक' । १० झ. 'णाद्भेदा' । ११ ठ. ङ. 'क्षावृ' । १२ ट. ङ. 'नां भा' । १३ ठ ङ. तदाह ।

(मनश्चिदादीनां स्वतन्त्रविद्यात्वस्वीकारः, अधि० २९)

स्याऽऽदित्य एव समित् " [छा० ५-४-१] इत्यत्र न समिदादिसामान्यात्लोकस्याग्निभावापत्तिस्तद्वत् ॥ ५१ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्वनुबन्धः ॥ ५२ ॥ (२९)

परस्तादपि " अयं वाव लोक एषोऽग्निश्चितः " [शत० १०-५-४-१] इत्यस्मिन्ननन्तरे ब्राह्मणे ताद्विध्यं केवलविद्याविधित्वं शब्दस्य प्रयोजनं लक्ष्यते न शुद्धकर्माङ्गविधित्वम् । तत्र हि—

" विद्यया तदारोहन्ति यत्र कामाः परागताः ।
न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः "

[शत० १०-५-४-१६] इत्यनेन श्लोकेन केवलं कर्म निन्दन्विद्यां च प्रशंसन्निदं गमयति । तथा पुरस्तादपि "यदेतन्मण्डलं तपति" [शत० १०-५-२-१] इत्यस्मिन्ब्राह्मणे विद्याप्रधानत्वमेव लक्ष्यते "सोऽमृतो भवति मृत्युर्ह्यस्याऽऽत्मा भवति" [शत० १०-५-२-२३] इति विद्याफलेनैवोपसंहारान्न कर्मप्रधानता तत्सामान्यादिहापि तथात्वम् । भूयांसस्त्वग्न्यवयवाः संपादयितव्या विद्यायामित्येतस्मात्कारणादग्निनाऽनुबध्यते विद्या न कर्माङ्गत्वात्। तस्मान्मनश्चिदादीनां केवलविद्यात्मकत्वसिद्धिः ॥५२॥ (२९)

उक्तदृष्टान्तानुरोधान्मानसग्रहस्य मनश्चिदादीनां च भावनामयत्वाविशेषेऽपि पारतन्त्र्यस्वातन्त्र्ययोः सिद्धिरित्याह—तद्वदिति ॥ ५१ ॥

पूर्वोत्तरब्राह्मणयोर्विद्याप्राधान्यदर्शनात्तन्मध्यपातिनोऽस्यापि तत्प्राधान्यमित्याह—परेण चेति । संदिग्धस्य निर्णयो वाक्यशेषादितिन्यायेन सूत्रावयवं व्याकुर्वन्वाक्यशेषमनुसंधत्ते—परस्तादिति । उत्तरब्राह्मणस्य विद्याप्राधान्ये गमकमाह—तत्रेति । ब्राह्मणस्य विद्याप्राधान्यमेतदित्युक्तम् । उपक्रमतन्त्रेणोपसंहारेणैकस्मिन्वाक्ये भवितव्यमितिन्यायेन चकारं व्याकुर्वन्पूर्वमपि ब्राह्मणमनुसंधत्ते—तथेति । तस्य विद्याप्राधान्ये लिङ्गमाह—सोऽमृत इति । पूर्वोत्तरब्राह्मणयोर्विद्याप्राधान्येऽपि प्रकृतब्राह्मणस्य कर्मप्राधान्ये का हानिस्तत्राऽऽह—तदिति । कथं तर्हि विद्यायाः स्वातन्त्र्ये कर्माधिकारे समाम्नानमित्याशङ्क्य भूयस्त्वादित्यादि व्याचष्टे—भूयांसस्त्विति । श्रुतिलिङ्गादिभिः सिद्धमर्थमुपसंहरति—तस्मादिति ॥ ५२ ॥ (२९)

---

१ ट °न्यालोक° । २ ज. °तः " एतस्मि° । ३ ङ. ञ. इत्येतस्मि° । ४ ङ. ञ. लभ्यते । ५ क. °यां प्र° । ६ क. ङ. ज ञ. °सन्नेतदर्शय° । ७ ङ. ज. ञ °त्युर्यस्याऽऽ° । ८ ङ. ज. ञ. °स्माच्च कार° । ९ ट. °त्मस्व° । १० ठ. ड. °णवि° ।

(भौतिकस्याऽऽत्मत्वनिराकरणपूर्वकतदन्यस्याऽऽत्मत्वप्रतिपादनम्, अधि० ३०)

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

इह देहव्यतिरिक्तस्याऽऽत्मनः सद्भावः समर्थ्यते बन्धमोक्षाधिकारसिद्धये। न ह्यसति देहव्यतिरिक्तात्मनि परलोकफलाश्रोदना उपपद्येरन्कस्य वा ब्रह्मात्मत्वमुपदिश्येत । ननु शास्त्रप्रमुख एव प्रथमे पादे [जै० १-१-५] शास्त्रफलोपभोगयोग्यस्य देहव्यतिरिक्तस्याऽऽत्मनोऽस्तित्वमुक्तम् । सत्यमुक्तं भाष्यकृता, न तु तत्राऽऽत्मास्तित्वे सूत्रमस्ति। इह तु स्वयमेव सूत्रकृता तदस्तित्वमाक्षेपपुरःसरं प्रतिष्ठापितम्। इत एव चाऽऽकृष्याऽऽचार्येण शबरस्वामिना प्रमाणलक्षणे वर्णितम्। अत एव च भगवतोपवर्षेण प्रथमे तत्र आत्मास्तित्वाभिधानप्रसक्तौ "शारीरके वक्ष्यामः" इत्युद्धारः कृतः। इह चेदं चोदनालक्षणेषूपासनेषु विचार्यमाणे-

---

मनश्चिदादीनां न पुरुषार्थत्वं पुरुषस्यैव देहातिरिक्तस्याभावादित्याक्षिपति—एक इति। अधिकरणस्य तात्पर्यमाह—इहेति। तत्समर्थनफलमाह—बन्धेति। साधनानुष्ठानसामर्थ्याद्देहस्यैव स्वर्गापवर्गाधिकारित्वसिद्धौ कृतं व्यतिरेकचिन्तयेत्याशङ्क्याऽऽह—न हीति। व्यतिरेकविचारस्य पूर्वतन्त्रेण पौनरुक्त्यं शङ्कते—नन्विति। सूत्रकृता तत्रातिरिक्तात्मानुक्तेर्न पौनरुक्त्यमित्याह—सत्यमिति। प्रकृते पूर्वमीमांसातो विशेषमाह- इह त्विति। कथं तर्हि प्रथमे पादे दर्शितमात्मास्तित्वं न हि मूलभूतं सूत्रं विना भाष्यं युक्तं तत्राऽऽह-इत इति। यज्ञायुधी यजमानः स्वर्गं लोकं यातीतिवाक्यस्यातिरिक्तात्माभावादप्रामाण्यप्राप्तौ तत्परिहारेण प्रथमाध्यायोपयोगितया तदस्तित्वमिदमेवाधिकरणमवष्टभ्योक्तमिति सूचयति—प्रमाणेति। एतस्मादेवाऽऽकृष्य तत्राऽऽत्मास्तित्वमुक्तमित्यत्र वृत्तिकारवचनं गमकमित्याह—अत इति। यस्मादत्र सूत्रकारो निरूपयति तस्मादेवेति यावत्। आत्मास्तित्वस्यास्मात्पूर्वकाण्डं प्रति नयनमपकर्षस्तस्योद्धारो निवृत्तिरित्यर्थः। अथात्रापि प्रथमसूत्रेऽथशब्दोपात्तोऽधिकारी विचारितस्तत्कथमिह पुनस्तन्निरूपणं तत्राऽऽह—इह चेति। तत्र लोकसिद्धात्मादानेनाधिकारी दर्शितो न तद्विशेषश्चिन्तितः। प्रकृते तु विधिप्रमाणकेषूपासनेषु विचार्यमाणेषु विचार्यते विशेषतस्तदस्तितेत्यस्ति भेद इत्यर्थः। प्रासङ्गिकीमध्यायपादसंगतिमधिकरण-

---

१ क. ङ. ज. ञ. ट. 'रिक्त आत्म'। २ ङ. ञ. एवाऽऽकृ'। ट. एवापकृ'। ३ ट. 'द भ'। ४ झ. 'क्ते न पौ'। ५ ठ. ड. 'रितत्वमिति चोद्यते न। ६ क. ख. ठ. ड. स्वर्गलो' ७ ड. 'ति। त'। ८ च. ठ. ड. 'सूत्रस्थाथ'।

(भौतिकस्याऽऽत्मत्वनिराकरणपूर्वकतदन्यस्याऽऽत्मत्वप्रतिपादनम्, अधि० ३०)

ष्वात्मास्तित्वं विचार्यते कृत्स्नशास्त्रशेषत्वप्रदर्शनाय । अपि च पूर्वस्मिन्नधिकरणे प्रकरणोत्कर्षाभ्युपगमेन मनश्चिदादीनां पुरुषार्थत्वं वर्णितं कोऽसौ पुरुषो यदर्था एते मनश्चिदादय इत्यस्यां प्रसक्ताविदं देहव्यतिरिक्तस्याऽऽत्मनोऽस्तित्वमुच्यते। तदस्तित्वाक्षेपपार्थमिदमादिमं सूत्रम्। आक्षेपपूर्विका हि परिहारोक्तिर्विवक्षितेऽर्थे स्थूणानिखननन्यायेन दृढां बुद्धिमुत्पादयति। अत्रैके देहमात्रात्मदर्शिनो लोकायतिका देहव्यतिरिक्तस्याऽऽत्मनोऽभावं मन्यमानाः समस्तव्यस्तेषु बाह्येषु पृथिव्यादिष्वदृष्टमपि चैतन्यं शरीराकारपरिणतेषु भूतेषु स्यादिति संभावयन्तस्तेभ्यश्चैतन्यं मदशक्तिवद्विज्ञानं चैतन्यविशिष्टः

स्योक्त्वा श्रुतिशास्त्रसंगतिं सूचयति—कृत्स्नेति । सर्वस्यैवाऽऽत्मार्थस्य तदर्थविचारात्मनश्च शास्त्रस्य शेषभूतमधिकरणमतिरिक्तात्माविचारे सर्वस्यास्य दुर्घटत्वादतोऽतिरिक्तस्याऽऽत्मनः शेषत्वं दर्शयितुमेष विचार इत्यर्थः । संगतिचतुष्टयमित्थमुक्त्वा पूर्वोत्तराधिकरणसंगतिमाह—अपि चेति । इतश्चेदमिह संगतमित्यर्थः । अनेन सूत्रेण तन्नोच्यत इत्याशङ्क्याऽऽद्यसूत्रस्यावान्तरसंगतिमाह—तदस्तित्वेति । अतिरिक्तात्मास्तित्वे साध्ये किं तदाक्षेपेणेत्याशङ्क्याऽऽह—आक्षेपेति । इत्याक्षेपस्योपयुक्ततेति शेषः । मनश्चिदादयोऽग्नयो यदर्थाः स पुरुषो विषयः स किं देहस्तदतिरिक्तो वेति विप्रतिपत्तेः संशये पूर्वपक्षयति—अत्रेति । पूर्वपक्षे देहात्मवादसिद्धिः । सिद्धान्ते वैदिकात्मसिद्धिरिति फलभेदः । परीक्षकव्यवहारभूमिः सप्तम्यर्थः । स्वतन्त्रमन्याधारं वा चैतन्यमात्रं वा व्यावर्तते मनुष्योऽहमितिदेहस्याहंप्रत्ययालम्बनत्ववदतिरिक्तात्मसत्त्वे मानाभावं गृहीत्वाऽऽह—देहेति । चैतन्याधारस्याऽऽत्मत्वाद्भौतिकत्वेनाचेतनस्य कथमात्मत्वमित्याशङ्क्याऽऽह—समस्तेति । एकैकस्मिन्नविद्यमानं कथं संघाते स्यात्तत्राऽऽह—तेभ्य इति । चैतन्यं संभावयन्त इति संबन्धः । संघातविशेषे कार्यविशेषसत्त्वे दृष्टान्तमाह—मदेति । यथैकैकस्मात्ताम्बूलादेरदृष्टाऽपि मदशक्तिः संघाते दृश्यते तथेदं ज्ञानमेकैकस्मिन्नदृष्टमपि देहाकारपरिणतभूतेषु संहतेषु भवतीति चाऽऽहुरिति योजना । देहस्यैव भोक्तृत्वे मृतदेहेऽपि भोगः स्यादित्याशङ्क्याऽऽह—चैतन्येति । अग्नि-

---

१ क. घ. ङ. म. 'पार्थ चेदमाद्यं सू'। २ क. ङ. ज. ञ. 'दयेदिति। ३ क. 'षु पृ'। ४ क. ज. ट. 'षु स्था'। ५ क. 'वैस्याऽऽत्मा'। ६ क. ख. 'यस्यैत'। ७ क. ख. ठ. ड. 'तमिदम'। ८ ङ. 'नत्वाद'। ९ ञ. 'त्वेन चे'। १० ञ. 'स्मिन्विद्य'।

कायः पुरुष इति चाऽऽहुः । न स्वर्गगमनायापवर्गगमनाय वा समर्थो देहव्यतिरिक्त आत्माऽस्ति यत्कृतं चैतन्यं देहे स्यात् । देह एव तु चेतनश्चाऽऽत्मा चेति प्रतिजानते । हेतुं चाऽऽचक्षते "शरीरे भावात्" इति । यद्धि यस्मिन्सति भवत्यसति च न भवति तत्तद्धर्मत्वेनाध्यवसीयते यथाऽग्निधर्मावौष्ण्यप्रकाशौ । प्राणचेष्टाचैतन्यस्मृत्यादयश्चाऽऽत्मधर्मत्वेनाभिमता आत्मवादिनां तेऽप्यन्तरेव देह उपलभ्यमाना बहिश्चानुपलभ्यमाना असिद्धे देहव्यतिरिक्ते धर्मिणि देहधर्मा एव भवितुमर्हन्ति । तस्मादव्यतिरेको देहादात्मन इति ॥ ५३ ॥

एवं प्राप्ते ब्रूमः—

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ (३०)

न त्वेतदस्ति यदुक्तमव्यतिरेको देहादात्मन इति। "व्यतिरेकः" एवास्य देहाद्भवितुमर्हति । "तद्भावाभावित्वात्" । यदि देहभावे भावादेहधर्मत्वमात्मधर्माणां मन्येत ततो देहभावेऽप्यभावादत-

---

संनिधानादयः पिण्डस्यौष्ण्यमिवाऽऽत्मसंनिधेर्देहचैतन्यमित्यतिरिक्तस्याऽऽत्मनः स्वर्गापवर्गान्वयिनोऽभावान्न देहस्य चैतन्यवैशिष्ट्यमित्याशङ्क्याऽऽह—नेत्यादिना । आत्मा तर्हि कः स्यादित्यपेक्षायामाह—देहेति । सूत्रभागेन(ण) प्रतिज्ञातेऽर्थे हेतुमवतार्य व्याचष्टे—यद्धीति । अन्वयव्यतिरेकाभ्यां चैतन्यस्य देहधर्मतैवेति नातिरिक्तात्मसिद्धिरित्यर्थः । प्राणचेष्टादयः साश्रयाः कार्यत्वात्संमतवदित्यनुमानात्प्राणाद्याश्रयस्यातिरिक्तात्मनः सिद्धिरित्याशङ्क्यानुमानाप्रामाण्यात्प्रामाण्येऽपि सिद्धसाध्यत्वान्नैवमित्याह—प्राणेति । चेष्टा हिताहितप्राप्तिपरिहारार्थो व्यापारः । आदिपदेनेच्छाद्वेषादय उक्ताः । तेषां देहधर्मत्वेनादृष्टानां कथं तद्धर्मतेत्याशङ्क्याऽऽह—असिद्ध इति । प्रत्यक्षेणातिरिक्तात्मनोऽदृष्टेर्मानान्तरे चासंभवेर्गौरोऽहं स्थूलोऽहमिति च देहस्यैवाऽऽत्मत्वेनाध्यक्षत्वात्तदाधारत्वमेव प्राणादीनामित्यर्थः । देहात्मवादी प्रत्यक्षफलमुपसंहरति—तस्मादिति॥ ५३ ॥

सिद्धान्तसूत्रमवतारयति—एवमिति । तत्र न त्विति पूर्वपक्षनिषेधप्रतिज्ञां विभजते—न त्विति । उत्तरपक्षप्रतिज्ञां व्याकरोति—व्यतिरेकेति । तत्र हेतुमवतार्य व्याचष्टे—तदिति । देहभावेऽपि प्राणादीनामभावो मृतावस्थायामास्थेयः । चैतन्यादयो न देहस्य विशेषगुणास्तद्भावाभावित्वात् । ये तद्विशेषगुणास्ते न तद्भावाभाविनो

---

१ ङ. अ. 'दि हि दे' । २ ठ. ङ. 'मानप्रा' ।

द्धर्मत्वमेवैषां किं न मन्येत । देहधर्मवैलक्षण्यात् । ये हि देहधर्मा रूपादयस्ते यावद्देहं भवन्ति । प्राणचेष्टादयस्तु सत्यपि देहे मृतावस्थायां न भवन्ति । देहधर्माश्च रूपादयः परैरप्युपलभ्यन्ते न त्वात्मधर्माश्चैतन्यस्मृत्यादयः । अपि च सति हि तावद्देहे जीवदवस्थायामेषां भावः शक्यते निश्चेतुं न त्वसत्यभावः । पतितेऽपि कदाचिदस्मिन्देहे देहान्तरसंचारेणाऽऽत्मधर्मा अनुवर्तेरन् । संशयमात्रेणापि परपक्षः प्रतिषिध्यते । किमात्मकं च पुनरिदं चैतन्यं मन्यते यस्य भूतेभ्य उत्पत्तिमिच्छतीति परः पर्यनुयोक्तव्यः । न हि भूतचतुष्टयव्यतिरेकेण लोकायतिकः किंचित्तत्त्वं प्रत्येति । यदनुभवनं भूतभौतिकानां तच्चैतन्यमिति चेत् । तर्हि विषयत्वात्तेषां न तद्धर्मत्वमश्नुवीत स्वात्मनि

यथा रूपादय इत्याह—देहेति । वैलक्षण्यं स्पष्टयन्दृष्टान्तस्य साधनाव्यावृत्तिं वारयति—ये हीति । हेत्वसिद्धिं प्रत्याह—प्राणेति । तेषां विशेषगुणत्वाभावेऽपि न देहमात्रप्रभवत्वं मृतावस्थायामदर्शनात् । अतो देहातिरिक्तस्तदधिष्ठातेति भावः । चैतन्यादीनां देहधर्मत्वाभावे हेत्वन्तरमाह—देहेति । विमता न देहधर्माः परैरनुपलभ्यमानत्वाद्ये तद्धर्मास्ते परैरुपलभ्यन्ते यथा रूपादय इत्यर्थः । इतश्च तेषां न देहधर्मतेत्याह—अपि चेति । न हि धर्मधर्मित्वमन्वयमात्राद्युक्तमतिप्रसङ्गादतो व्यतिरेकोऽपि वाच्यः सोऽत्र संदिग्ध इति न धर्मधर्मितेत्याह—सतीति । व्यतिरेकसंदेहे हेतुमाह—पतितेऽपीति । तत्रापि न प्रमाणमित्याशङ्क्याऽऽह—संशयेति । न तावत्तवादर्शनमभावनिश्चायकं प्रत्यक्षस्यैव प्रामाण्यान्मम त्वात्मनो देहान्तरसंचारात्तद्धर्मदार्ष्टिरिति संदिह्यते तावन्मात्रेण चैतन्यादीनां देहधर्मत्वासिद्धिरावयोरुभयोरपि निश्चितान्वयादेरेव साधकत्वाविवादादिति भावः । उपलब्धिवदिति पदं चोद्यमुखेन व्याख्यातुं पृच्छति—किमात्मकमिति । तत्किं भूतचतुष्टयातिरिक्तं न वेति विमर्शार्थः । अप्रकृतेऽर्थे कथं प्रश्नः स्यात्तत्राऽऽह—यस्येति । आद्ये सिद्धान्तविरोधमाह—न हीति । धर्मधर्मिणोस्तादात्म्याभेदपक्षमालम्बते—यदिति । भूतपरिणामत्वाच्चैतन्यस्य रूपादिवद्भूतेभ्योऽर्थान्तरत्वाभावान्न त्वतिरेकापत्तिरिति भावः । भूतपरिणामत्वं चैतन्यस्य रूपादिवैषम्योक्त्या प्रत्युक्तमिति मन्वानो दोषान्तरमाह—तदिति । उक्तरूपं चेच्चैतन्यं तर्हि स्वात्मानं प्रति भूतभौतिकानां विषयत्वान्न तद्धर्मत्वेन तदभेदं प्रतिपद्येतेत्यत्र हेतुमाह—स्वात्मनीति । असिधारा स्वात्मानं छिनत्तीतिवदेकत्र विषयविषयित्वायोगादिति

---

१ क. ङ. ज. ञ. 'मेषां । २ ङ. ञ. भवन्तु । ३ क. ङ. ज. ञ. 'ति ता' । ४ ट. 'तिषध्य' । ५ क. ङ. ज. ञ 'तिका: किं' । ६ क. ङ. ज. ञ. प्रतियन्ति । ७ क. ख. ठ. ङ. 'प्रस्तुतेऽ'।

(भौतिकस्याऽऽत्मत्वनिराकरणपूर्वकतदन्यस्याऽऽत्मत्वप्रतिपादनम्, अधि० ३०)

क्रियाविरोधात् । *न ह्यग्निरुष्णः सन्स्वात्मानं दहति । न हि नटः शिक्षितः सन्स्वस्कन्धमधिरोक्ष्यति । न हि भूतभौतिकधर्मेण सता चैतन्येन भूतभौतिकानि विषयी क्रियेरन् । न हि रूपादिभिः स्वरूपं परंरूपं वा विषयी क्रियते । विषयी क्रियन्ते तु बाह्याध्यात्मिकानि भूतभौतिकानि चैतन्येन । अतश्च यथैवास्या भूतभौतिकविषयाया उपलब्धेर्भावोऽभ्युपगम्यत एवं व्यतिरेकोऽप्यस्यास्तेभ्योऽभ्युपगन्तव्यः । उपलब्धिस्वरूप एव च न आत्मेत्यात्मनो देहव्यतिरिक्तत्वम् । नित्यत्वं चोपलब्धेरैकरूप्यात् । अहमिदमद्राक्षमिति चावस्थान्तरयोगेऽप्युपलब्धृत्वेन प्रत्यभिज्ञानात् । स्मृत्याद्युपपत्तेश्च । यत्तूक्तं शरीरे भावाच्छरीरधर्म उपलब्धिरिति तद्दूषितेन प्रकारेण प्रत्युक्तम् । अपि च सत्सु प्रदीपादिषूपकरणेषूपलब्धिर्भवत्यसत्सु न भवति । न चैतावता प्रदीपादिधर्म एवोपलब्धिर्भवति । एवं सति देह उपलब्धिर्भवत्य-

---

हेत्वर्थः । किंच यो यस्य धर्मः स न तत्साधको यथा रूपादिः । तथाच चैतन्यस्य भूतभौतिकसाधकत्वादेव तदतिरेकसिद्धिरित्याह—न हीति । रूपादिदृष्टान्तं स्पष्टयति—न हीति । तर्हि चैतन्यस्यापि साधकत्वं मा भूत्तत्राऽऽह—विषयीति । सूत्रावयवं फलितपरत्वेन योजयति—अतश्चेति । भवतु तर्हि भूतेभ्योऽतिरिक्तौ स्वतन्त्रोपलब्धिस्तथाऽपि कथमात्मसिद्धिस्तत्राऽऽह—उपलब्धीति । क्षणिकत्वात्तस्या नित्यात्मरूपत्वमयुक्तमित्याशङ्क्याजानतस्तद्भेदाभावाद्विषयोपरागात्तद्ग्रानादसावेवानित्यो नोपलब्धिरित्याह—नित्यत्वं चेति । किं च स्थूलदेहाभिमानहीनस्य स्वप्ने प्रत्यभिज्ञानादतिरिक्तात्मसिद्धिरित्याह—अहमिति । स्वप्नेऽपि स्थूलदेहान्तरस्यैवोपलब्धृत्वमित्याशङ्क्याऽऽह—स्मृत्यादीति । उपलब्धृस्मर्त्रोर्भेदे सत्यन्योपलब्धेऽन्यस्य स्मृतिरिच्छादयश्च नेति न तयोरन्यतेत्यर्थः । दूषितमपि दोषान्तरं वक्तुमनुभाषते—यत्त्विति । तद्भावाभावित्वव्याख्यानेनैनं प्रत्याख्यातमेतदित्युक्तं स्मारयति—तदिति । अधिकं दोषं दर्शयति—अपि चेति । अनन्यथासिद्धावन्वयव्यतिरेकौ वाच्यौ देहस्य च चैतन्यान्वयव्यतिरेकावधिष्ठानविषयतयाऽन्यथासिद्धाविति सदृष्टान्तं साधयति—सत्स्विति । उपकरणत्वमपि देहस्योपलब्धौ न सिध्यतीत्याह—न चेति । उपलब्धिर्न देहजन्या

---

* एतदादिरधिरोक्ष्यतीत्यन्तो ग्रन्थः क. ज. ट. पुस्तकेषु नोपलभ्यते ।

---

१ ङ. ञ. ट. 'भिः स्वं रू' । २ क. 'रस्य रू' । ३ ट. 'पल' । ४ क. 'वतीति । ५ ङ. ञ. 'वं च स' । ६ ङ. ञ देहभाव । ७ क. ख. 'क्ता स्वातन्त्र्योप' । ८ ख. 'ब्धेरन्य' । ९ क. ख. दूषणान्तरं । १० ठ. ड. 'न व्याख्या' ।

(ऐतरेयगतोक्थोपासनायां पृथिव्यादिदृष्टेः कौषीतक्यामपि समानत्वम्, अधि० ३१)

सति च न भवतीति न देहधर्मो भवितुमर्हति । उपकरणत्वमात्रेणापि प्रदीपादिवद्देहोपयोगोपपत्तेः । न चात्यन्तं देहस्योपलब्धावुपयोगोऽपि दृश्यते निश्चेष्टऽप्यस्मिन्देहे स्वप्ने नानाविधोपलब्धिदर्शनात् । तस्मादनवद्यं देहव्यतिरिक्तस्याऽऽत्मनोऽस्तित्वम् ॥ ५४ ॥ (३०)

(ऐतरेयगतोक्थोपासनायां पृथिव्यादिदृष्टेः कौषीतक्यामपि समानत्वम्, अधि० ३१)

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

समाप्ता प्रासङ्गिकी कथा, संप्रति प्रकृतामेवानुवर्तामहे । "ओमित्येतदक्षरमुद्गीथमुपासीत" [छा० १-१-१] "लोकेषु पञ्चविधं सामोपासीत" [छा० २-२-१] "उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थमियमेव पृथिवी" [ऐत० आर० २-१-२-१] "अयं वाव लोक एषोऽग्निश्चितः" [शत० १०-५-४-१] इत्येवमाद्या य उद्गीथादिकर्माङ्गावबद्धाः प्रत्ययाः प्रतिवेदं शाखाभेदेषु विहितास्ते तच्छाखागतेष्वेवोद्गीथादिषु भवेयुरथ वा सर्वशाखागतेष्विति विशयः । प्रतिशाखं

तस्मिन्नव्याप्रियमाणेऽपि सत्त्वादर्थान्तरवत् । जागरे तु व्यञ्जकजनकतया कथंचिदुपयोगमङ्गीकृत्यात्यन्तमित्युक्तम् । स्वप्ने द्रष्टर्यहं पश्यामीत्याद्यबाधिताध्यक्षस्य स्थूलदेहाकारहीनस्य देहातिरिक्तात्मविषयत्वान्न देहात्मवादसिद्धिरिति भावः । अनुमानाद्यप्रामाण्यं तु प्रतिज्ञामात्रमिति मत्वोपसंहरति—तस्मादिति ॥ ५४ ॥ (३०)

देहभावे भवतश्चैतन्यस्य तद्भावेऽप्यभाववदुद्गीथादिभावे भवत उपासनस्य तद्भावेऽप्यभावमाशङ्क्याऽऽह—अङ्गेति । अवान्तरसंगतिमाह—समाप्तेति । उद्गीथाद्यङ्गाश्रितोपासनानि विषय इति तत्तद्वाक्योक्त्या दर्शयति—ओमित्येतदिति । इदं वाक्यं व्याप्तेश्चेत्येतदधिकरणे व्याख्यातम् । लोकेषु पृथिव्यादिषु । लोकशब्दो लोकालोकेषु लाक्षणिकः । पृथिव्यादिदृष्ट्या पञ्चविधं सामोपासीतेत्यर्थः । पृथिवी हिंकारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमिति । उक्थं कर्माङ्गं शस्त्रमिति वीप्सया यत्प्रजा वदन्ति तदिदमेव येयं पृथिवीत्युक्थे पृथिवीदृष्टिविधिः । चितोऽग्निः कर्माङ्गभूतस्तत्रायं लोकदृष्टिरित्यर्थः । उद्गीथादिप्रत्ययानुक्तानधिकृत्य प्रकरणादुद्गीथादिशब्दसाधारण्याच्च संशयमाह—त इति । उद्गीथादीनां सर्वशाखास्वैक्यादुपास्तिव्यवस्थाशङ्कामावादनारभ्यमिदमधिकरणमित्याशङ्क्याऽऽह—प्रतीति । नीचैस्त्वादि-

---

१ क. घ. ङ. ज. ञ. 'गो दृ' । २ क. ङ. ज. ञ. 'ष्टेऽपि ह्यस्मि' । ३ ङ. ञ. 'कीयं क' । ४ ट. तत्तच्छा' । ५ ङ. 'रिक्तत्वात्म' । ६ ट. ङ. 'वेन भ' । ७ क. 'र्वथा शा' । ८ क. 'शाखैक्या' ।

(ऐतरेयगतोक्थोपासनायां पृथिव्यादिदृष्टेः कौषीतक्यामपि समानत्वम्, अधि० ३१)

च स्वरादिभेदादुद्गीथादिभेदानुपादायायमुपन्यासः । किं तावत्प्राप्तम् । स्वशाखागतेष्वेवोद्गीथादिषु विधीयेरन्निति । कुतः । संनिधानात् । "उद्गीथमुपासीत" [छा० १-१-१] इति हि सामान्यविहितानां विशेषाकाङ्क्षायां संनिकृष्टेनैव स्वशाखागतेन विशेषेणाऽऽकाङ्क्षादिनिवृत्तेः । तदतिलङ्घनेन शाखान्तरविहितविशेषोपादाने कारणं नास्ति । तस्मात्प्रतिशाखं व्यवस्थेति । एवं प्राप्ते ब्रवीति—"अङ्गावबद्धास्तु" इति । तुशब्दः पक्षं व्यावर्तयति । नैते प्रतिवेदं स्वशाखास्वेव व्यवतिष्ठेरन् । अपि तु सर्वशाखास्वनुवर्तेरन् । कुतः । उद्गीथादि-

---

स्वरभेदादध्ययनधर्मभेदाच्चोद्गीथादेरपि भेदमङ्गीकृत्य विद्याविचार इत्यर्थः । अत्र हि श्रौतेन सौमान्येन प्राकरणिकस्य विशेषनियमस्य बाधात्सर्वशाखाविहितप्रधानकर्माङ्गत्वेन प्रयुक्तसर्वोद्गीथादिविशेषेषु तदालम्बनोपास्तीनामुपसंहारोक्त्या सर्वशाखाभिरनुष्ठेयत्वोक्तेर्वाक्यार्थधीहेतोरेव चिन्तनात्पादादिसंगतिः । पूर्वपक्षेऽनुष्ठानव्यवस्थासिद्धिः सिद्धान्ते तदव्यवस्थेत्यास्थाय पूर्वपक्षयितुं विमृशति—किमिति । यथा देहात्मनोर्भेदादात्मधर्मा देहे न भवन्त्येवमेकशाखागतोद्गीथधर्माणां भिन्नशाखोद्गीथादौ न प्राप्तिरिति पूर्वपक्षमाह—स्वशाखेति । विद्याचित एवेत्येवश्रुत्या मनश्चिदादीनां क्रियाप्रकरणभङ्गेन पुरुषार्थत्ववदिहाप्युद्गीथादिश्रुतेर्बलीयस्त्वात्तया प्रकरणभङ्गान्नास्त्युपास्तीनां व्यवस्थेत्याह—कुत इति । उद्गीथादिसामान्यश्रुतेः प्रकरणोपनीतविशेषाकाङ्क्षत्वेनाबाधकत्वादुपास्तिव्यवस्था युक्तेति मत्वाऽऽह—संनिधानादिति । प्रकरणं विवृणोति—उद्गीथमिति । उद्गीथोक्तचित्याग्नीनां प्रत्ययालम्बनानां वेदत्रयोक्तप्रधानकर्मस्वङ्गत्वेन प्रयुक्तानां प्रतिशाखं स्वरादिभेदेन भेदादुद्गीथादिश्रुतिभिः प्रत्ययालम्बनानामुद्गीथादीनां सामान्येनोपात्तानां विशेषाकाङ्क्षायां तत्तच्छाखास्थप्रधानकर्माङ्गत्वेन प्रयुक्तोद्गीथादिविशेषेषूद्गीथमुपासीतेत्यादिप्रत्ययाः प्रकरणान्नियम्यन्त इत्यर्थः । प्रकरणाव्यवस्थायां यच्छाखास्थं यदुपासनं तत्तच्छाखिभिरेवानुष्ठेयमित्युपसंहरति—तस्मादिति । पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति । सूत्राक्षराणि योजयति—तुशब्द इति । हिशब्दोपात्तं हेतुं प्रश्नपूर्वकमाह—कुत इति । सामान्यप्रवृत्तश्रुतेर्विशेषाकाङ्क्षायां प्रकरणाद्विशेषनियमो युक्तः । प्रकृते तूद्गीथादिसामान्येषूपास्तिसंभवेन विशेषाकाङ्क्षाभावे श्रौतसामान्येन प्राकरणिकविशेषनियमबाधात्सर्वशाखास्थप्रधानकर्माङ्गत्वेन विनियुक्तो-

---

१ क. ङ. अ. 'भेदमादाया' । २ क. ङ. अ. 'क्षानि' । ३ ट. 'दानका' । ४ ङ. अ. परपक्षं । ५ क. ख. साम्येन । ६ झ. 'लम्बोपा' । ७ ख. 'युक्तेषूद्गी' ।

(ऐतरेयगतोक्थोपासनायां पृथिव्यादिदृष्टेः कौषीतक्यामपि समानत्वम्, अधि० ३१)

श्रुत्यविशेषात्। स्वशाखाव्यवस्थायां ह्युद्गीथमुपासीतेति सामान्यश्रुतिरविशेषप्रवृत्ता सती संनिधानवशेन विशेषे व्यवस्थाप्यमाना पीडिता स्यात्। न चैतदयाय्यम्। संनिधानात्तु श्रुतिर्बलीयसी। न च सामान्याश्रयः प्रत्ययो नोपपद्यते। तस्मात्स्वरादिभेदे सत्यप्युद्गीथत्वाद्यविशेषात्सर्वशाखागतेष्वेवोद्गीथादिष्वेवंजातीयकाः प्रत्ययाः स्युः ॥ ५५ ॥

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥ (३१)

अथ वा नैवात्र विरोधः शङ्कितव्यः, कथमन्यशाखागतेषूद्गीथादिष्वन्यशाखाविहिताः प्रत्यया भवेयुरिति। मन्त्रादिवदविरोधोपपत्तेः। तथा हि मन्त्राणां कर्मणां गुणानां च शाखान्तरोत्पन्नानामपि शाखान्तर उपसंग्रहो दृश्यते। येषामपि हि शाखिनां "कुटरुरसि" [मैत्रा० सं० १-१-६] इत्यश्मादानमन्त्रो नाऽऽम्नातस्तेषामप्यसौ विनियोगो दृश्यते "कुक्कुटोऽसीत्यश्मानमादत्ते कुटरुरसीति वा" इति। येषामपि

द्गीथादिविशेषेषु तदालम्बनधियामुपसंहारः स्यादिति हेतुं विवृणोति—स्वेति। प्रकरणेन विशेषार्थे सामान्यश्रुत्यबाधेऽपि संकोचे मानाभावात्सामान्यद्वारा सर्वविशेषगामिश्रुतेरेकस्मिन्विशेषे नियमनं पीडैवेति मत्वोक्तम्—पीडितेति। त्वत्पक्षे श्रुत्या प्रकरणबाधवन्मत्पक्षेऽपि तेन श्रुतिर्बाध्यतामविशेषादित्याशङ्क्याऽऽह—संनिधानादिति। सामान्यस्योपास्यत्वायोगाद्विशेषाकाङ्क्षायां तदर्थकं प्रकरणं कथं श्रुत्या बाध्यमित्याशङ्क्याऽऽह—न चेति। तथाऽपि प्रतिवेदं स्वरादिभेदेनोद्गीथादिभेदादुपास्तिव्यवस्थोक्तेत्याशङ्क्याऽऽह—तस्मादिति। श्रुतिप्राबल्यं तच्छब्दार्थः ॥ ५५ ॥

उद्गीथादिश्रुत्यवष्टम्भेन यत्र यत्रोद्गीथादिरुक्तस्तत्र तत्र सर्वत्रैवं क्वचित्कस्यापि प्रत्ययस्यानुवृत्तिरित्युक्तम्। इदानीमुदाहरणेनापीममर्थं समर्थयते—मन्त्रादिवदिति। वाशब्दार्थं कथयति—अथ वेत्यादिना। हेतुमवतार्याक्षरार्थमाह—मन्त्रेति। तत्र मन्त्रोदाहरणं दर्शयति—येषामिति। तण्डुलपेषणार्थं कुटरुरसीत्यश्मादानमन्त्रो येषां शाखिनां नाऽऽम्नातः कुक्कुटोऽसि मधुजिह्व इत्ययमेव मन्त्रः समाम्नायते तथाऽपि तेषां प्रयोगसूत्रेण विनियोगे सोऽपि मन्त्रो दृश्यते तेन शाखान्तरोत्पन्नस्य मन्त्रस्य शाखान्तरे संग्रहोऽस्तीत्यर्थः। कर्मणामुदाहरणमाह—येषामपीति। मैत्रायणीयानां

---

१ क. ख. ज. ञ. °नाद्धि श्रु°। २ क. ङ. ज. ञ. °रोध आश°। ३ ट. °पि शा°। ४ क. ङ. ज. ञ. °पि च सं°। ५ क. °रुक्तो न तत्र तत्र सं°। ६ क. °ब क्वचि°। ७ ट. ड. °ति मं°। ८ ठ. ड. °णीनां।

(ऐतरेयगतोक्थोपासनायां पृथिव्यादिदृष्टेः कौषीतक्यामपि समानत्वम्, अधि० ३१)

समिदादयः प्रयाजा नाऽऽम्नातास्तेषामपि तेषु गुणविधिराम्नायते " ऋतवो वै प्रयाजाः समानत्र होतव्याः " इति। तथा येषामपि " अजोऽग्नीषोमीयः " इति जातिविशेषोपदेशो नास्ति तेषामपि तद्विषयो मन्त्रवर्ण उपलभ्यते " छागस्य वपाया मेदसोऽनुब्रूहि " [शत० ३-८-२-२६] इति । तथा वेदान्तरोत्पन्नानामपि " अग्नेर्वर्होत्रं वेरध्वरम् " [ताण्ड्य० २१-१०-११] इत्येवमादिमन्त्राणां वेदान्तरे परिग्रहो दृष्टः। तथा बह्वृचपठितस्य सूक्तस्य " यो जात एव प्रथमो मनस्वान् " [ऋक्सं० २-१२-१] इत्यस्य " अध्वर्यवे सजनीयं शस्यम् " [तै० सं० ७-५-५-२] इत्यत्र परिग्रहो दृष्टः। तस्माद्यथाऽऽश्रयाणां कर्माङ्गानां(णां) सर्वत्रानुवृत्तिरेवमाश्रितानामपि प्रत्ययानामित्यविरोधः ॥ ९६ ॥ (३१)

समिधो यजति तनूनपातं यजतीडो यजति बर्हिर्यजति स्वाहाकारं यजतीति समिदादयः प्रयाजा नाऽऽम्नातास्तथाऽपि तेषु संख्यादिगुणविधिराम्नायते द्वादश मासाः पञ्चर्तव इत्यत्र हेमन्तशिशिरयोरेकीकरणेन पञ्चर्तवः प्रसिद्धाः । तथा चर्तुवत्पञ्चसंख्याकाः प्रयाजाः समानत्र समानदेशे होतव्या इति यावत्। तत्र शाखान्तरोत्पन्नकर्मणां शाखान्तरे संग्रहो दृष्टोऽन्यथा तत्र गुणविध्ययोगादित्यर्थः । गुणोदाहरणमाह— तथेति । अग्नीषोमीयं पशुमालभेतेति यजुर्वेदिनामग्नीषोमीयः पशुराम्नायते नाज इति जातिविशेषस्तेन विशेषाश्रवणाद्यः कश्चित्पशुरालम्भनीय इति प्राप्ते " छागो वा मन्त्रवर्णात् " इतिसूत्रेण च्छागादेर्होमार्थमनुवाक्यं पठ होतरित्यध्वर्युप्रैषार्थं लिङ्गस्य नियमकारणस्य भावाच्छागोऽग्नीषोमीयः पशुरिति स्थितम्। अतश्च गुणस्यापि प्रैषमन्त्रलिङ्गादुपसंग्रहो दृष्ट इत्यर्थः। मन्त्राणामुदाहरणान्तरमाह—तथेति । वेदान्तरशब्दाभ्यामुद्गात्रध्वर्युवेदावुच्येते। तत्रैवोदाहरणान्तरमाह—तथेति । यो जातो बाल एव सन्प्रथमो गुणैः श्रेष्ठो मनस्वान्विवेकवान्स जनास इन्द्र इति शेषः । जनासो जनास्ते संबोध्यन्ते स इन्द्र एवंविध इति यावत् । अध्वर्यवे तत्कर्तृकप्रयोगार्थं सजनीयं स जनास इत्येतेनोपलक्षितं सूक्तं शस्यं शंसनीयमित्यर्थः । दृष्टान्तानुवादेन दार्ष्टान्तिकं निगमयति—तस्मादिति। शाखान्तरोत्पन्नस्य शाखान्तरे संग्रहबाहुल्यं तच्छब्दार्थः ॥ ९६ ॥ (३१)

---

१ ङ. ञ. °द्विशेषविष°। २ क. ञ. °ग्नेर्वो°। ३ ङ. ञ. इत्यादि°। ४ ठ. ङ. सिद्धाः। ५ क. °श्रयणा°। ६ ठ. ङ. °प्रैषलि°। ७ क ख. °यं ज°। ८ क. इत्यन्तेनो°। ख. ठ. ङ इत्यनेनो°।

(विराड्रूपवैश्वानरस्य कृत्स्नस्यैव ध्येयत्वं न तदंशस्य, अधि० ३२)

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७ ॥ (३२)

" प्राचीनशाल औपमन्यवः " [छा० ५-११-१] इत्यस्यामाख्यायिकायां व्यस्तस्य समस्तस्य च वैश्वानरस्योपासनं श्रूयते। व्यस्तोपासनं तावत् " औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से " [छा० ५-१२-१] इत्यादि। तथा समस्तोपासनमपि " तस्य ह वा एतस्याऽऽत्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्माऽऽत्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ " [छा० ५-१८-२] इत्यादि । तत्र संशयः—किमिहोभयथाऽप्युपासनं स्याद्व्यस्तस्य समस्तस्य चोत समस्तस्यैवेति । किं तावत्प्राप्तम् । प्रत्यवयवं सुतेजःप्रभृतिषूपास्स इति क्रियापदश्रवणात् " तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते " [छा० ५-१२-१]

उद्गीथाद्युपासनं तत्तदङ्गविशेषालम्बनं नेत्युक्तिप्रसङ्गेन वैश्वानरोपास्तिरापि तत्तदङ्गविशेषालम्बना नेति साधयति—**भूम्न इति** । सैव हीत्यत्र तद्यत्तत्सत्यमिति तच्छब्देन प्रकृतपरामर्शाद्विद्यैक्यमुक्तम् । अत्र तु तद्वदभेदे हेत्वभावादगतार्थतेति मत्वा व्यस्तस्य समस्तस्य च वैश्वानरस्योपासनं श्रौतमुदाहरति—**प्राचीनेति** । तत्र प्रश्नप्रतिवचनरूपवाक्येन(ण) व्यस्तोपास्तिमुपन्यस्यति—**व्यस्तेति** । वैश्वानराधिकरणे व्याख्यातं वाक्यमनुस्मृत्य समस्तोपास्तिं दर्शयति—**तथेति** । द्विविधामुपास्तिमधिकृत्योभयत्र विधिफलश्रुतिभ्यामेकवाक्यत्वोपपत्तेश्च संशयमाह—**तत्रेति** । एकवाक्यतालाभेन समस्तस्यैव वैश्वानरस्योपास्तिरित्युक्त्या वाक्यार्थधीहेतोरेवात्रापि चिन्तनात्पादादिसंगतिः । पूर्वपक्षे वाक्यभेदः सिद्धान्ते तदैक्यमित्यङ्गीकृत्य पूर्वपक्षार्थं विमृशति—**किमिति** । उद्गीथादिश्रुत्या संनिधिं[3] बाधित्वोद्गीथाद्युपास्तीनां सर्वशाखासूपसंहारोक्तिवदत्रापि व्यस्तोपासनस्य विधिफलयोः श्रुतेः समस्तोपास्तिसंनिधिप्राप्तं स्तुत्यर्थत्वं बाधित्वा विधेयतेति पूर्वपक्षमाह—**प्रतीति** । सुतमित्यभिषवस्य कण्डनस्य कर्मतापन्नं सोमरूपम् । प्रसुतमासुतमित्यवस्थाविशेषापेक्षं तस्यैव विशेषणम् । सोमयागकरणसंपत्तिस्तव कुले दृश्यत इति यावत् । आत्मनो वैश्वानरस्येत्यादिवाक्यप्रकरणाभ्यां समस्तोपासनाङ्गत्वेन तद-

---

१ क. च । २ क. ख. °रस्यैवोपा° । ट. ड. °रस्य चोपा° । ३ क. °धिं बोधि° ।

इत्यादिफलभेदश्रवणाच्च व्यस्तान्युपासनानि स्युरिति प्राप्तम्।

ततोऽभिधीयते " भूम्नः " पदार्थोपचयात्मकस्य समस्तस्य वैश्वानरोपासनस्य " ज्यायस्त्वं " प्राधान्येनाभिसन्धाक्ये विवक्षितं भवितुमर्हति न प्रत्येकमवयवोपासनानामपि। "क्रतुवत्"। यथा क्रतुषु दर्शपूर्णमासप्रभृतिषु सामस्त्येन साङ्गप्रधानप्रयोग एवैको विवक्ष्यते न व्यस्तानामपि प्रयोगः प्रयाजादीनाम्। नाप्येकदेशाङ्गयुक्तस्य प्रधानस्य तद्वत्। कुत एतद्भूमैव ज्यायानिति। " तथा हि " श्रुतिर्भूम्नो ज्यायस्त्वं " दर्शयति "। एकवाक्यतावगमात्। एकं हीदं वाक्यं वैश्वानरविद्याविषयं पौर्वापर्यालोचनात्प्रतीयते। तथा हि—प्राचीनशालप्रभृतय उद्दालकावसानाः षड्ऋषयो वैश्वानरविद्यायां [छा० ५-११-४] परिनिष्ठामप्रतिपद्यमाना अश्वपतिं कैकेयं राजानमभ्याजग्मुरित्युपक्रम्यैकैकस्यर्षेरुपास्यं द्युप्रभृतीनामेकैकं श्रावयित्वा " मूर्धा त्वेष आत्मन इति होवाच " [छा० ५-१२-२] इत्यादिना मूर्धादिभावं तेषां विदधाति। " मूर्धा ते व्यपतिष्यद्यन्नां नाऽऽगमिष्यः " [छा० ५-१२-२]

न्तर्भावेऽपि व्यस्तोपासनानामैकैकत्वन्नं पश्यति प्रियमित्यादिना प्रत्यवयवं विधिफलश्रुतेः स्वातन्त्र्येणापि विधानं कल्प्यं तेनोभयथोपासनं कार्यमिति भिन्नान्येवैतानि वाक्यानीत्यर्थः।

सिद्धान्तसूत्रमवतार्य भूम्नो ज्यायस्त्वमिति प्रतिज्ञां व्याचष्टे—तत इति। समस्तोपासनवद्व्यस्तोपासनमपीष्यतां तत्राऽऽह—नेति। तत्र दृष्टान्तमादाय विभजते—क्रतुवदिति। सौमस्त्येनेत्यौत्सर्गिकोक्तिः। प्रयाजादीनां प्रत्येकमप्रयोगेऽपि नित्यादीनां किंचिदूनवतामपि प्रयोगोऽस्तीत्याशङ्क्य काम्येषु नैवमित्याह—नापीति। सर्वाङ्गोपेतकाम्यक्रतोरिष्टत्ववद्वैश्वानरोपासनस्यापि समस्तस्यैव प्राधान्येनेष्टेत्याह—तद्वदिति। हेतुं प्रश्नपूर्वकमेव व्याकरोति—कुत इति। साक्षाज्ज्यायस्त्वोक्तिरदृष्टेत्याशङ्क्याऽऽह—एकेति। वाक्यप्रकरणाभ्यामेकवाक्यत्वं साधयति—एकं हीति। विहितानामपि व्यस्तोपास्तीनां समस्तोपास्त्यन्तर्भावान्न पृथक्कार्यतेति मत्वाऽऽह—तथा हीति। व्यस्तोपास्त्यपवादश्रुतेश्च समस्तस्यैवोपासनस्य ज्यायस्त्वमित्याह—मूर्धेति। सम-

---

१ क. ङ. ज. ञ. ट. 'स्तान्यप्युपा'। २ ङ. ञ. 'क्यत्वाव'। ३ क. 'कर्षे'। ४ झ. ठ. ढ. 'मत्यन्तं प'। ५ क. ख. ठ. 'सामान्येने'। ६ ठ. ड. काम्ये। ७ क. ख. 'नरस्योपा'।

(विराड्रूपवैश्वानरस्य कृत्स्नस्यैव ध्येयत्वं न तदंशस्य, अधि० ३२)

इत्यादिना च व्यस्तोपासनमपवदति । पुनश्च व्यस्तोपासनं व्यावर्त्य समस्तोपासनमेवानुवर्त्य " स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति " [छा०५-१८-१] इति भूमाश्रयमेव फलं दर्शयति । यत्तु प्रत्येकं सुतेजःप्रभृतिषु फलभेदश्रवणं तदेवं सत्यङ्गफलानि प्रधान एवाभ्युपगतानीति द्रष्टव्यम् । तथोपास्स इत्यपि प्रत्यवयवमाख्यातश्रवणं पराभिप्रायानुवादार्थं न व्यस्तोपासनविधानार्थम् । तस्मात्समस्तोपासनपक्ष एव श्रेयानिति । केचित्त्वत्र समस्तोपासनपक्षं ज्यायांसं प्रतिष्ठाप्य ज्यायस्त्ववचनादेव किल व्यस्तोपासनपक्षमपि सूत्रकारोऽनुमन्यत इति कथयन्ति । तदयुक्तम् । एकवाक्यतावगतौ सत्यां वाक्यभेदकल्पनस्यान्याय्यत्वात् । "मूर्धा ते व्यपतिष्यत्" [छा०५-१२-२] इति चैवमादिनिन्दाविरोधात् । स्पष्टे चोपसंहारस्थे समस्तोपासनावगमे तदभावस्य पूर्वपक्षे वक्तुमशक्यत्वात् । सौत्रस्य च ज्यायस्त्ववचनस्य प्रमाणत्वाभिप्रायेणाप्युपपद्यमानत्वात्॥५७॥ (३२)

स्तोपासने वैफल्यान्न तस्य ज्यायस्त्वमित्याशङ्क्याऽऽह—पुनश्चेति । व्यस्तोपासनेऽपि फलश्रवणमस्तीत्युक्तं तत्राऽऽह—यच्चेति । व्यस्तोपास्तीनां प्रकरणवाक्याभ्यां समस्तोपास्त्यन्तर्भावेन प्रयाजदर्शपूर्णमासवदेकप्रयोगत्वे सिद्धे प्रधानतदङ्गफलानामर्थवादगतानामेकीकरणेन समस्तोपास्तिरेव ज्यायसीत्याह—तदिति । प्रत्यवयवमुपास्तिविधिश्रुतेर्व्यस्तोपास्तिर्भातीत्युक्तमित्याशङ्क्याऽऽह—तथेति । औपमन्यवाद्यवगतरूपानुवादेन समस्तोपास्तिरेवात्र विधित्सितेत्यर्थः । स्वपक्षमुपसंहरति—तस्मादिति । एकदेशिव्याख्यामनूद्य दूषयति—केचित्त्विति । किलकारोऽनिच्छायाम् । एकवाक्यताभङ्गेन वाक्यभेदं कृत्वा व्यस्तोपासनान्यपि पृथग्विधीयन्तामित्याशङ्क्याऽऽह—मूर्धेति । यदोभयथोपास्तिः सिद्धान्तस्तदा व्यस्तोपास्तिरेवात्र समस्तोपास्तिरेव वा पूर्वपक्षः स्यान्नाऽऽद्य इत्याह—स्पष्टे चेति । द्वितीयश्च तेनायुक्तो वाक्योपक्रमस्थव्यस्तोपास्तिधीविरोधात्समस्तोपास्तिविध्यर्थं पराभिप्रायानुवादे सिद्धान्तादविशेषादिति भावः । समस्तोपास्तिरेव कार्या न व्यस्तोपास्तिरित्यत्र किमपेक्ष्य सौत्रं ज्यायस्त्ववचनं तत्राऽऽह—सौत्रस्येति । समस्तोपास्तेर्मानवत्त्वोक्त्या व्यस्तोपास्तेर्वाक्यतात्पर्यविषयत्वेनाप्रामाणिकत्वं द्योतयितुं सूत्रे भूम्नो ज्यायस्त्वमुक्तम् । अतः समस्तोपास्तिरेव कार्येत्येकवाक्यता सिद्धेत्यर्थः ॥ ५७ ॥ (३२)

---

१ क. ज. ट. 'र्त्य सर्वे'। २क. ङ. ञ. 'भ्युच्चिनोतीति । ज. 'भ्युच्चिता'। ३ क. ज. कल्पय'। ४ ङ. ञ. 'वाक्याव'। ५ क. ज. ट. 'क्यग'। ६ ङ. ञ. 'न्दावचनवि'। ७ ङ. ञ. ट. 'हारे स'। ८ ज. ट. 'स्य ऽया'। ९ क. ख. 'पास्तिसि'। १० ठ. ड. 'रेव वा स'। ११ क. तत्रायु'।

(अनुष्ठातव्यशाण्डिल्यादिविद्यानां वेद्याभिन्नत्वेन भिन्नत्वम्, अधि० ३३)

नाना शब्दादिभेदात् ॥ ५८ ॥ (३३)

पूर्वस्मिन्नधिकरणे सत्यामपि सुतेजःप्रभृतीनां फलभेदश्रुतौ समस्तस्योपासनं ज्याय इत्युक्तम्। अतः प्राप्ता बुद्धिरन्यान्यपि भिन्नश्रुतीन्युपासनानि समस्योपाशिष्यन्त इति । अपि च नैव वेद्याभेदे विद्याभेदो विज्ञातुं शक्यते । वेद्यं हि रूपं विद्याया द्रव्यदैवतमिव यागस्य । वेद्यश्चैक एवेश्वरः श्रुतिनानात्वेऽप्यवगम्यते " मनोमयः प्राणशरीरः " [छा० ३-१४-२] " कं ब्रह्म खं ब्रह्म " [छा० ४-१०-५] " सत्यकामः सत्यसंकल्पः " [छा० ८-१-५] इत्येवमादिषु । तथैक एव प्राणः " प्राणो वाव संवर्गः " [छा० ४-३-३] " प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च " [छा० ५-१-१] " प्राणो ह पिता प्राणो माता " [छा० ७-१५-१] इत्येवमादिषु । वेद्यैकत्वाच्च विद्यैकत्वम् । श्रुतिनानात्वमप्यस्मिन्पक्षे गुणान्तरपरत्वान्नानर्थकम्। तस्मात्स्वपरशाखाविहितमेकवेद्यव्यपाश्रयं गुणजातमुपसंहर्तव्यं विद्याकात्स्न्यायेति ।

भिन्नश्रुतीनामपि सुतेजस्त्वप्रभृतीनां समस्तोपासनं ज्यायश्चेत्तर्हि सर्वोपास्तीनामपि भिन्नश्रुतीनां समस्तोपासनं ज्यायः स्यादित्याशङ्क्याऽऽह—नानेति । दहरविद्यादिब्रह्मोपासनानि प्राणोपासनानि च वेद्याभेदादभिन्नानि वा शब्दादिभेदाद्भिन्नानि वेति संदेहे पूर्वन्यायेन पूर्वपक्षयति—पूर्वस्मिन्निति । शाण्डिल्यविद्यादीनामभेदे हेत्वन्तरमाह—अपि चेति । तत्र सदृष्टान्तं हेतुमाह—वेद्यं हीति । तत्र तत्र श्रुतिषु सत्यसंकल्पत्वादिगुणविशिष्टब्रह्मभेदाद्वेद्याभेदोऽपि नास्तीत्याशङ्क्य ब्रह्मणः सिद्धत्वात्तदुपाधौ तद्गुणानामपि व्यवस्थानाद्युक्तं वेद्यैक्यमित्याह—वेद्यश्चेति । श्रुतिनानात्वेऽपि तत्तदाध्येयगुणश्रुतिभेदेऽपीति यावत्। ब्रह्मोपासनेषु वेद्याभेदेऽपि कथमब्रह्मोपासनेष्वित्याशङ्क्याऽऽह—तथेति । तदेकत्वेऽपि विद्यानानात्वं किं न स्यादित्याशङ्क्य रूपाभेदान्नैवमित्याह—वेद्येति । विद्यैक्यं चेदेकत्र विहितायास्तस्या नान्यत्र विधानमर्थवदित्याशङ्क्याऽऽह—श्रुतीति । ब्रह्मप्राप्तिफलसंयोगस्योपास्यब्रह्मरूपप्रकृत्यर्थोपासनाभ्यामविच्छिन्नप्रत्ययार्थप्रयत्नचोदनार्थाश्च ब्रह्मविद्यासमारूढायाश्चैक्याद्विद्यैक्ये फलितमाह—तस्मादिति । शब्दादिभेदाद्विद्याभेदोक्त्या वाक्यार्थधीहेतोरेवात्रापि चिन्तनात्पादादिसंगतिः ।

---

१ ङ. ञ. ट. °मस्तोपा° । २ क. ङ. ज. ञ. °पि च भि° । ३ क. ट. °मस्तस्यो° । ४ ट. °ता मा° । ५ ङ. ञ. °कत्वं श्रुतम् । ६ क. °मस्योपा° । ७ क. °मस्योपा° । ८ झ. °नि च । ९ क. ख. °कल्पादि° । १० ठ. ड. °मवच्छि° । ११ ठ. ड. °या ब्र° ।

(अनुष्ठातव्यशाण्डिल्यादिविद्यानां वेद्यभिन्नत्वेन भिन्नत्वम्, अधि० ३३)

एवं प्राप्ते प्रतिपद्यते—"नाना" इति। वेद्याभेदेऽप्येवंजातीयका विद्या भिन्ना भवितुमर्हति। कुतः। "शब्दादिभेदात्"। भवति हि शब्दभेदः "वेद" "उपासीत" "स क्रतुं कुर्वीत" [छा० ३-१४-१] इत्येवमादिः। शब्दभेदश्च कर्मभेदहेतुः समधिगतः पुरस्तात् "शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्" इति [जै० सू० २-२-१]। आदिग्रहणाद्गुणादयोऽपि यथासंभवं भेदहेतवो योजयितव्याः। ननु वेदेत्यादिषु शब्दभेद एवावगम्यते न यजतीत्यादिवदर्थभेदः सर्वेषामेवैषां मनोवृत्त्यर्थत्वाभेदात्। अर्थान्तरासंभवाच्च। तत्कथं शब्दभेदाद्विद्याभेद इति। नैष दोषः। मनोवृत्त्यर्थत्वाभेदेऽप्यनुबन्धभेदाद्वेद्यभेदे सति विद्याभेदोपपत्तेः। एकस्यापीश्वरस्योपास्यस्य प्रतिप्रकरणं व्या-

---

पूर्वपक्षे पूर्ववद्विद्यैक्यम्। सिद्धान्ते तदयोगात्तन्नानात्वमिति सिद्धवत्कृत्य सिद्धान्तयति—**एवमिति**। सूत्राक्षराणि योजयति—**वेद्येति**। रूपाभेदादभेदोक्तेर्न विद्यानानात्वमित्याह—**कुत इति**। सौत्रहेतुमुक्त्वा शब्दभेदं विभजते—**शब्दादीति**। तद्भेदेऽपि मा भूदुपास्तिनानात्वमित्याशङ्क्याऽऽह—**शब्देति**। पुरस्तादिति पूर्वतन्त्रोक्तिः। भिन्नभावार्थविषयः शब्दः शब्दान्तरम्। यथा यजति ददाति जुहोतीति। तस्मिन्सति कर्मभेदः कृतानुबन्धत्वाद्धात्वर्थावच्छेदे भिन्नधात्वर्थावच्छिन्नतया विधेर्भेदादित्यर्थः। शब्दान्तराधिकरणं तु सर्ववेदान्तप्रत्ययाधिकरणेऽनुक्रान्तम्। सौत्रमादिशब्दं व्याकरोति—**आदीति**। गुणादयोऽपीत्यादिग्रहणेन संयोगरूपसमाख्यादयो गृह्यन्ते। तत्तत्प्रकरणोक्तगुणजातविशिष्टोपास्यरूपभेदात्प्रतिविद्यं फलभेदान्नामधेयभेदात्कौण्डपायिवत्कृत्स्नोपसंहारस्याशक्यानुष्ठानत्वाच्च विद्यानानात्वमित्यर्थः। सत्यपि शब्दभेदेऽनुबन्धभेदाभावान्न विद्या भिन्नेति शब्दभेदमाक्षिपति—**नन्विति**। वेदोपासीतेत्यादिशब्दानां क्वचिज्ज्ञानं क्वचिद्ध्यानमित्यर्थभेदमाशङ्क्य ज्ञानस्याविधेयत्वाद्विधीयमानमुपासनमेवेत्याह—**अर्थान्तरेति**। अनुबन्धभेदाभावे फलितमाह—**तदिति**। क्रियात्वाविशेषेऽपि यागदानहोमानामवान्तरभेदवद्वेदोपासीत्यादीनां मनोवृत्तित्वाविशेषेऽपि तत्तत्प्रकरणेषूत्पत्तिशिष्टतत्तद्गुणविशिष्टवेद्यरूपभेदाद्विशिष्टोपास्त्यनुबन्धो भिद्यत इत्याह—**नेत्यादिना**। गुणानामपि ब्रह्मोपाधौ व्यवस्थानान्नानुबन्धभेद इत्याशङ्क्य वस्तुनिष्ठत्वाभावादुपास्तिवाक्यानां तत्तत्फलाय क्वचित्केनचिद्गुणेन विशिष्टब्रह्मोपास्तिविधेरनुबन्धभेदः स्यादित्यभिप्रेत्याऽऽह—**एकस्यापीति**। ब्रह्मण्युक्तं न्यायं

---

१ क. ङ. ञ. °दाद्विद्या°। २ क. ङ. ञ. °स्यापि हीश्व°। ३ क. ख. ठ. ङ. सौत्रं हे°। ४ ठ. °स्यभे°। ५ ठ. ङ. °भिन्नेति।

वृत्ता गुणाः शिष्यन्ते । तथैकस्यापि प्राणस्य तत्र तत्रोपास्यस्याभेदेऽप्यन्याद्दग्गुणोऽन्यत्रोपासितव्योऽन्याद्दग्गुणश्चान्यत्रेत्येवमनुबन्धभेदाद्विधिभेदे सति विद्याभेदो विज्ञायते । न चात्रैको विद्याविधिरितरे गुणविधय इति शक्यं वक्तुम् । विनिगमनायां हेत्वभावात् । अनेकत्वाच्च प्रतिप्रकरणं गुणानां प्राप्तविद्यानुवादेन विधानानुपपत्तेः । न चास्मिन्पक्षे समानाः सन्तः सत्यकामादयो गुणा असकृच्छ्रावयितव्याः । प्रतिप्रकरणं चेदं कामेनेदमुपासितव्यमिदंकामेन चेदमिति नैराकाङ्क्ष्यावगमादैकवाक्यतापत्तिः । न चात्र वैश्वानरविद्यायामिव समस्तचोदनाऽपराऽस्ति यद्बलेन प्रतिप्रकरणवर्तीन्यवयवोपासनानि भूत्वैकवाक्यतामियुः । वेद्यैकत्वनिमित्ते च विद्यैकत्वे सर्वत्र निरङ्कुशे प्रतिज्ञायमाने समस्तगुणोपसंहारोऽशक्यः प्रतिज्ञायेत । तस्मात्सुष्ठूच्यते " नाना शब्दादिभेदात् " इति । स्थितेऽ चैतस्मिन्नधिकरणे सर्ववेदान्तप्रत्ययमित्यादि द्रष्टव्यम् ॥१८॥ (३३)

प्राणेऽपि दर्शयति—तथेति । प्रतिप्रकरणं गुणभेदोक्तौ फलितमाह—एवमिति । यत्तु श्रुतिनानात्वं गुणान्तरपरमिति तद्दूषयति—न चेति । गुणान्तरविधिपरत्वे वाऽप्राप्तानेकगुणपरतया वाक्यभेदान्न युक्तेयं व्यवस्थेति दोषान्तरमाह—अनेकत्वाच्चेति । विद्यैक्ये सत्येकत्रोक्तानां गुणानामन्यत्रोक्तिरयुक्ता पौनरुक्त्यात् । विद्याभेदे तु नैवं[1] विद्यान्तरस्यापि तद्गुणत्वाय पुनरुक्तिसंभवादतोऽपि विद्यानानात्वमित्याह—न चेति । तत्रैव हेत्वन्तरमाह—प्रतीतीति । सर्वेषु लोकेषु कामचारो भवति सर्वेष्वात्मस्वन्नमत्ति जयतीमाल्लोकानित्यादिफलसंयोगभेदादाकाङ्क्षाभावादेकवाक्यत्वायोगाद्विद्यानानात्वमित्यर्थः । यत्तु पूर्वन्यायेन समस्तोपास्तेर्ज्यायस्त्वमुक्तं तत्प्रत्याह—न चेति । अत्रेति शाण्डिल्यादिविद्योक्तिः । यत्तु वेद्यैक्याद्विद्यैक्यमिति तत्राऽऽह—वेद्येति । सर्वगुणानुपसंहृत्य प्रत्ययकर्तुरधिकारिणोऽसंभवान्न विद्यैक्यमित्यर्थः । शब्दादिभेदकृतं विद्याभेदमुपसंहरति—तस्मादिति । शब्दादिभेदाद्विद्याभेदे[2] सति कथं सर्ववेदान्तप्रत्ययाधिकरणे विद्यैक्यमुक्तं तत्राऽऽह—स्थिते चेति । शब्दादिभेदाद्विद्याभेदे सिद्धे सति सर्वशाखागतत्तद्ब्रह्मज्ञानं प्राणज्ञानं च भिन्नमेवेति शङ्कते सर्ववेदान्तगतं[3] तद्विज्ञानमेकमित्युक्तमतोऽस्याधिकरणस्य पादादावेवाऽऽर्थिकी संगतिरत्र तु प्रसङ्गादुक्तमित्यर्थः ॥ १८ ॥ (३३)

---

१ घ. 'दाद्वेद्यभे' । २ क. ङ. ज. ञ. 'गमनहे' । ३ ङ. ञ. 'न गुणवि' । ४ क. घ. ङ. ज. ञ. ट. 'कामत्वाद' । ५ क. ङ. ज्ञ. ञ. 'कयतां ययु' । ६ ज. 'तामीयु' । ७ क. ज. 'ते त्वेत' । ८ ठ. ड. 'त्वे चाप्रा' । ९ ठ. ड. नैव । १० क. ख. ठ. 'मस्योपा' । ११ क. ख. ठ. ड. 'ण्डिल्यविद्यादि' । १२ क. ख. ठ. ड. 'दे क' । १३ ख. ठ. ड. 'न्तगतं । १४ क. 'गैतत' ।

(आत्मसगुणोपासनायामेकस्य द्वयोर्बहूनां चोपासनानां वैकल्पिकनियमः, अधि० ३४)

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥ (३४)

स्थिते विद्याभेदे विचार्यते—किमासामिच्छया समुच्चयो विकल्पो वा स्यात् । अथ वा विकल्प एव नियमेनेति । तत्र स्थितत्वात्तावद्विद्याभेदस्य न समुच्चयनियमे किंचित्कारणमस्ति । ननु भिन्नानामप्यग्निहोत्रदर्शपूर्णमासादीनां समुच्चयनियमो दृश्यते। नैष दोषः । नित्यताश्रुतिर्हि तत्र कारणं, नैवं विद्यानां काचिन्नित्यताश्रुतिरस्ति । तस्मान्न समुच्चयनियमः । नापि विकल्पनियमः । विद्यान्तराधिकृतस्य विद्यान्तराप्रतिषेधात् । पारिशेष्याद्याथाकाम्यमापद्यते । ननु "अविशिष्टफलत्वात्" आसां "विकल्पो" न्याय्यः । तथा हि—"मनोमयः प्राणशरीरः" [छा० ३-१४-२] "कं ब्रह्म खं ब्रह्म" [छा० ४-१०-५] "सत्यकामः सत्यसंकल्पः" [छा० ८-१-५] इत्येवमाद्यास्तुल्यवदीश्वरप्राप्तिफला लक्ष्यन्ते । नैष दोषः । समानफलेष्वपि स्वर्गादिसाधनेषु कर्मसु याथाकाम्यदर्शनात् । तस्माद्याथाकाम्यप्राप्तावुच्यते—"विकल्पः"

विद्याभेदमुक्त्वा तदनुष्ठानभेदं वदन्नादावहंग्रहोपास्तीनामनुष्ठानप्रकारमाह—**विकल्प इति** । अहंग्रहोपासनान्यधिकृत्य याथाकाम्यविकल्पयोर्विद्यानानात्वसाम्यादधिकरणसंगतिगर्भं संशयमाह—**स्थित इति** । अहंग्रहोपास्तीनां विकल्पेनानुष्ठानोक्त्या वाक्यार्थधीहेतोरेवोक्तेरत्र पादादिसंगतिः । पूर्वपक्षे स्वेच्छया प्रवृत्तेरनुष्ठानानियमः । सिद्धान्ते व्रीह्यादिष्विव तन्नियतिरिति मत्वा याथाकाम्येनानुष्ठानमिति पूर्वपक्षयिष्यन्नादौ समुच्चयनियमं निरस्यति—**तत्रेति** । उपासनानां भिन्नत्वेऽपि समुच्चयनियमे नियमो युक्तो नित्याग्निहोत्रदर्शपूर्णमासादिवदिति शङ्कते—**नन्विति** । उपास्तीनां काम्यत्वान्नैवमित्याह—**नेत्यादिना** । अग्निहोत्रादिषु समुच्चयस्तत्रेत्युक्तः । तर्हि किमिति विकल्पनियमो नाऽऽश्रीयते तत्राऽऽह—**नापीति** । समुच्चयविकल्पयोर्नियमायोगादिच्छयाऽन्यतरोऽङ्गीकर्तव्य इत्याह—**पारिशेष्यादिति** । यथा व्रीहिभिरेव पुरोडाशे सिद्धे यवा न समुच्चीयन्ते कृतकरणत्वप्रसङ्गात्, तथाऽत्रापि ब्रह्मप्राप्तिफलमविशिष्टं तदेकेनैवोपासनेन कृतं चेन्नावकाशः समुच्चयस्येति शङ्कते—**नन्विति** । तदेवाविशिष्टफलत्वं स्पष्टयति—**तथा हीति** । काम्यदर्शपूर्णमासज्योतिष्टोमादिवत्फलभूमार्थिनः समुच्चयः स्यादित्याह—**नेत्यादिना** । विकल्पसमुच्चयनियमनिवृत्तिफलमुपसंहृत्य सिद्धान्तसूत्रमवतार्य प्रतिज्ञां विभजते—**तस्मादित्यादिना** । उक्तेऽर्थे प्रश्नपू-

---

१ क. °मिच्छास' । २ क. °नायनि । ३ क, परिशेषादिति ।

(विकल्पेन समुच्चयेन वा प्रतीकोपासनायामैच्छिकत्वम्, अधि० ३५)

एवाऽऽसां भवितुमर्हति न समुच्चयः । कस्मात् । "अविशिष्टफलत्वात्" । अविशिष्टं ह्यासां फलमुपास्यविषयसाक्षात्करणम् । एकेन चोपासनेन साक्षात्कृत उपास्ये विषय ईश्वरादौ द्वितीयमनर्थकम् । अपि चासंभवः । साक्षात्करणस्य समुच्चयपक्षे चित्तविक्षेपहेतुत्वात् । साक्षात्करणसाध्यं च विद्याफलं दर्शयन्ति श्रुतयः—"यस्य स्याद्धा न विचिकित्साऽस्ति" [छा० ३-१४-४] इति, "देवो भूत्वा देवानप्येति" [बृ० ४-१-२] इति चैवमाद्याः । स्मृतयश्च "सदा तद्भावभावितः" [भ० गी० ८-६] इत्येवमाद्याः । तस्मादविशिष्टफलानां विद्यानामन्यतमामादाय तत्परः स्याद्यावदुपास्यविषयसाक्षात्करणेन तत्फलं प्राप्तमिति ॥ ५९ ॥ (३४)

(विकल्पेन समुच्चयेन वा प्रतीकोपासनायामैच्छिकत्वम्, अधि० ३५)

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥ (३५)

अविशिष्टफलत्वादित्यस्य प्रत्युदाहरणम् । यासु पुनः काम्यासु

र्वकं हेतुमादाय व्याचष्टे—कस्मादित्यादिना । ध्येयसाक्षात्कारार्थमेव समुच्चयाङ्गीकारे का क्षतिस्तत्राऽऽह—एकेनेति । अभीष्टफलघातित्वाच्च समुच्चयोऽत्र नास्तीत्याह—अपि चेति । उपास्तेरदृष्टद्वारा यागादिवत्फलोपायत्वोपपत्तेरुपास्यसाक्षात्कारापेक्षैव नास्तीत्याशङ्क्याहंग्रहोपास्तीनां साक्षात्कारसाध्यफलं तथाश्रुतेरित्याह—साक्षादिति । यस्योपासकस्याद्धा साक्षादुपास्यं स्यान्न विचिकित्सा संशयोऽस्ति प्राप्नुयामहं फलं न वेति तस्य ब्रह्मप्राप्तिः स्यादित्यर्थः । देवो भूत्वा जीवन्नेव साक्षात्कारेण देवभावमनुभूय पतिते देहे देवानप्येति प्राप्नोतीत्यर्थः । न चाविशिष्टफलत्वे फलभूमार्थिनः समुच्चयानुष्ठानमुपास्यसाक्षात्कारे तन्निमित्तं तत्प्राप्तौ च विशेषाभावादित्याशयेनोपसंहरति—तस्मादिति ॥ ५९ ॥ (३४)

अहंग्रहोपास्तीनामनुष्ठानप्रकारमुक्त्वा प्रतीकोपास्तीनां तत्प्रकारमाह—काम्यास्त्विति । अनहंग्रहाण्यकर्माङ्गावबद्धानि च मनो ब्रह्मेत्युपासीतेत्येवमादीन्यभ्युदयफलान्युपासनानि विषयस्तेषु किं विकल्पनियमो यथाकाम्यं चेत्युभयोपपत्त्या संशये प्रतीकोपास्तीनामुपास्तित्वादहंग्रहोपास्तिवद्विकल्पनियमे प्राप्ते तद्विपरीत्याह—अविशिष्टेति । अत्र प्रतीकोपास्तिषु पूर्ववैपरीत्येनानुष्ठानस्य यथाकाम्योक्त्या वाक्यार्थधीहेतोरेव कथनात्पादादिसंगतिः । पूर्वपक्षे व्रीह्यादिष्विवानुष्ठाननियमसिद्धिः । सिद्धान्ते फलवशादत्तन्नियतिरित्यङ्गीकृत्य सूत्राक्षराणि योजयति—यास्विति । स

---

१ ङ. अ. ट. 'पास्यवि' । २ ङ. अ 'भव एव सा' । ३ ङ. अ. इत्येव' । ४ ज. 'क्षात्कारेण त' । ५ ङ. अ. 'त्फलप्राप्तिरिति । ६ क. ख. ठ. ङ. 'साध्यं फ' ।

(विकल्पसमुच्चययोर्याथाकाम्यम्, अधि० ३६)

विद्यासु "स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदिति" [छा० ३-१५-२] "स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य[1] यथाकामचारो भवति" [छा० ७-१-५] इति चैवमाद्यासु क्रियावददृष्टेनाऽऽत्मनाऽऽत्मीयं फलं[2] साधयन्तीषु साक्षात्करणापेक्षा नास्ति। ताः "यथाकामं समुच्चीयेरन्न वा" समुच्चीयेरन् "पूर्वहेत्वभावात्"। पूर्वस्याविशिष्टफलत्वाँदित्यस्य[3] विकल्पहेतोरभावात् ॥ ६० ॥ (३५)

(विकल्पसमुच्चययोर्याथाकाम्यम्, अधि० ३६)

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥

कर्माङ्गेषूद्गीथादिषु य आश्रिताः प्रत्यया वेदत्रयविहिताः किं ते समुच्चीयेरन्किंवा यथाकामं स्युरिति संशये "यथाश्रयभावः" इत्याह। यथैवैषामाश्रयाः[4] स्तोत्रादयः संभूय भवन्त्येवं प्रत्यया अपि। आश्रयतन्त्रत्वात्प्रत्ययानाम् ॥ ६१ ॥

यः कश्चिदेतं वायुं दिशां गोत्वेन कल्पितानां वत्सं वेद नासौ पुत्रमरणनिमित्तं रोदं रोदनं रोदिति लभते किंतु नित्यमवियुक्तवत्सादिगुणोपासनाज्जीवत्पुत्रो भवतीत्यर्थः। अहंग्रहोपास्तिषु साक्षात्कारसाधनत्वमुपाधिरिति मत्वा विशिनष्टि—साक्षादिति। विमतान्युपासनानि याथाकाम्येनानुष्ठेयान्यविरुद्धभिन्नफलत्वाच्चित्राज्योतिष्टोमादिवदिति भावः ॥ ६० ॥ (३५)

प्रतीकोपास्तीनामनुष्ठानक्रममुक्त्वाऽङ्गावबद्धोपास्तीनां क्रमं निरूपयिष्यन्पूर्वपक्षमाह—अङ्गेष्विति। अधिकरणस्य विषयं वक्तुमङ्गेष्विति पदं व्याचष्टे—कर्मेति। तदाश्रितोपासनानि विषयत्वेन दर्शयति—य इति। अङ्गद्वारा क्रतुसंबन्धात्फलसंनिकर्षाच्च संशय इत्याह—किं त इति। तन्निर्धारणानियमाधिकरणे पुरुषार्थत्वमङ्गोपास्तीनामुक्तमिह सत्यपि पुरुषार्थत्वे समुच्चये मानं[5] नेत्युच्यते। अङ्गोपास्तीनामङ्गवत्समुच्चयनियमः किंवा प्रतीकदृष्टिवद्यथाकाम्यमिति संशयमनूद्य पूर्वाधिकरणवद्यथारुच्यनुष्ठानं नेति पूर्वपक्षयति—इति संशय इति। अत्र चाङ्गोपास्तिषु यथारुच्यनुष्ठानोक्त्या वाक्यार्थधीसाधनस्यैव चिन्तनात्पादादिसंगतिः। पूर्वपक्षे समुच्चयानुष्ठानात्फलबाहुल्यसिद्धिः। सिद्धान्ते समुच्चयस्याप्रामाणिकत्वात्तथाऽनुष्ठाने[6] फलबाहुल्यायोगाद्यथारुच्यनुष्ठाने प्रवृत्तिसौकर्यमित्युपेत्य पूर्वपक्षसूत्रं योजयति—यथेति। अङ्गाश्रितोपासनानि नियमेन क्रतौ समुच्चित्यानुष्ठेयानि नियमेन समुच्चीयमानाङ्गाश्रितत्वात्तदाश्रितोपाङ्गवदित्यर्थः ॥ ६१ ॥

---

१ ङ. ञ. 'मेव वा'। २ ङ. ञ. 'स्य का'। ३ ङ. ञ. तत्तत्फलं। ४ ङ. ञ. 'त्वादादि'। ङ. ज. ञ. 'थैषा'। ६ ख. ठ. ङ. 'मानाश्नेत्यु'। ७ क. ख. ठ. ङ. 'ष्ठानात्फल'।

शिष्टेश्च ॥ ६२ ॥

यथा वाऽऽश्रयाः स्तोत्रादयस्त्रिषु शिष्यन्त एवमाश्रिता अपि प्रत्ययाः । नोपदेशकृतोऽपि कश्चिद्विशेषोऽङ्गानां तदाश्रयाणां च प्रत्ययानामित्यर्थः ॥ ६२ ॥

समाहारात् ॥ ६३ ॥

" होतृषदनाद्वैवापि दुरुद्गीतमनुसमाहरति " [छा० १-५-५] इति च प्रणवोद्गीथैकत्वविज्ञानमाहात्म्यादुद्गाता स्वकर्मण्युत्पन्नं क्षतं होत्रात्कर्मणः प्रतिसमादधातीति ब्रुवन्वेदान्तरोदितस्य प्रत्ययस्य वेदान्तरोदितपदार्थसंबन्धसामान्यात्सर्ववेदोदितप्रत्ययोपसंहारं सूचयतीति लिङ्गदर्शनम् ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

विद्यागुणं च विद्याश्रयं सन्तमोंकारं वेदत्रयसाधारणं श्रावयति " तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शंस-

---

इतश्चाङ्गोपास्तीनां समुच्चित्यानुष्ठानमित्याह—शिष्टेश्चेति । शिष्टिः शासनं विधानं तस्या विशेषाभावादङ्गानां प्रत्ययानां च समुच्चयनियम इत्यर्थः । सूत्रस्याक्षरोत्थमर्थमाह—यथा वेति । तस्यैव तात्पर्यार्थमाह—नेत्यादिना ॥ ६२ ॥

इतश्चोपासनानि समुच्चित्यानुष्ठेयेरन्नित्याह—समाहारादिति । समाहरणं समताकरणं क्षतस्य संधानं समाहारस्तस्माल्लिङ्गात्समुच्चयो गम्यते प्रत्ययानामिति योजना । यः प्रणवो बह्वृचानां स च्छन्दोगानामुद्गीथः । यश्च तेषामुद्गीथः स प्रणवोऽन्येषामिति प्रणवोद्गीथयोरेकत्वेन यदुपासनमुद्गात्रा कृतं तत्फलवादिवाक्यं सूत्रं व्याकर्तुमनुवदति—होतृषदनादिति । होतुः सदनं स्थानं होता यत्रस्थः शंसति तद्धोतृषदनं तेन चै हौत्रं कर्म लक्ष्यते । ततः सम्यगनुष्ठितादुरुद्गीतं दुष्टं यदुद्गानं स्वरव्यञ्जनादिप्रमादादुद्गात्रा कृतं तदप्युद्गाता तेनैक्यविज्ञानेनानुसमाहरति प्रतिसंदधात्येव क्षतमिव वैद्य इत्यर्थः । वाक्यस्याभीष्टमर्थं कथयति—प्रणवेति । तथाऽपि प्रकृते किमायातं तदाह—इति ब्रुवन्निति । वेदद्वययुक्तप्रणवोद्गीथयोरैक्यज्ञानस्येदृशं फलं ब्रुवाणः सर्ववेदस्थानां प्रत्ययानां सर्वत्रोपसंहारं समुच्चयं सूचयति । सर्वोपासनेषु वेदान्तरोक्तप्रत्ययस्य वेदान्तरोक्तपदार्थेन संबन्धस्य समानत्वादिति योजना ॥ ६३ ॥

ॐकारस्योपास्यस्य साधारण्यादप्युपासनानां साधारण्यं समुच्चित्यानुष्ठानमिति हेत्वन्तरमाह—गुणेति । विद्यागुणमित्यस्य व्याख्या विद्याश्रयमिति । विद्योद्गीथविद्या । तेनेत्योंकारोक्तिः । त्रयी विद्या वेदत्रयविहितं कर्मेत्यर्थः । अन्वयमुखेन व्याख्या-

---

१ ङ. ज. ञ. ट. 'था चाऽऽश्र' । २ ट. 'त्म्याद्दुरुद्गा' । ३ क. ख. ठ. ड. चेति । ४ क. ख, ठ. ड. बह्वृचां । ५ ख. च होतृक' ।

त्योमित्युद्गायति " [छा० १-१-९] इति च । ततश्चाऽऽश्रयसाधारण्यादाश्रितसाधारण्यमिति लिङ्गदर्शनमेव । अथ वा " गुणसाधारण्यश्रुतेश्च " इति । यदीमे कर्मगुणा उद्गीथादयः सर्वे सर्वप्रयोगसाधारणा न स्युर्न स्यात्ततस्तदाश्रयाणां प्रत्ययानां सहभावः । ते तूद्गीथादयः सर्वाङ्गग्राहिणा प्रयोगवचनेन सर्वे सर्वप्रयोगसाधारणाः श्राव्यन्ते । ततश्चाऽऽश्रयसहभावात्प्रत्ययसहभाव इति ॥ ६४ ॥

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥

" न वा " इति पक्षव्यावर्तनम् । न यथाश्रयभाव आश्रितानामुपासनानां भवितुमर्हति । कुतः " तत्सहभावाश्रुतेः " । यथा हि त्रिवेदविहितानामङ्गानां स्तोत्रादीनां सहभावः श्रूयते " ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति " [तै० सं० ३-१-२-४] " स्तोत्रमनुशंसति प्रस्तोतः साम गाय होतरेतद्यज " इत्यादिना । नैवमुपासनानां सहभावश्रुतिरस्ति । ननु प्रयोगवचन एषां सहभावं प्रापयेत् । नेति ब्रूमः । पुरुषार्थत्वादुपासनानाम् । प्रयोगवचनो हि ऋत्वर्थानामुद्गीथादीनां

मुपसंहरति—ततश्चेति । आश्रयसाधारण्ये सत्याश्रितसाधारण्यमन्वयस्तमेवाऽऽश्रयसाधारण्याभावे सत्याश्रितसाधारण्याभावरूपव्यतिरेकव्याख्यया द्रढयितुं सूत्रमादत्ते—अथ वेति । व्यतिरेकेण सूत्रं योजयति—यदीति । उद्गीथादीनामपि तर्हि साधारण्यं मा भूत्तत्राऽऽह—ते त्विति । गुणेन सहैव गुणिनः प्रत्ययस्याऽऽगमनं सूच्यत इति फलितमाह—ततश्चेति ॥ ६४ ॥

यस्मिन्नुपासने यस्याभिरुचिः स तदनुतिष्ठति सर्वोपासनसमुच्चये तु न मानमिति सिद्धान्तयति—न वेति । तत्र वाकारार्थमाह—नेत्यादिना । नञ्पदं व्याचष्टे—न यथेति । प्रश्नपूर्वकमवशिष्टमादाय व्याकरोति—कुत इति । नियमेन समुच्चीयमानाङ्गाश्रयत्वादित्युक्त्वाऽनुमानधिया शङ्कते—नन्विति । विमतोपासनानि न क्रतौ समुच्चित्यानुष्ठेयान्यङ्गाश्रितत्वे सति भिन्नफलत्वाद्दोहनादिवदिति मत्वाऽऽह—नेतीति । उक्तमेव व्यक्ती करोति—प्रयोगेति । शिष्टेश्चेत्युक्तं विघटयति—

---

१ ङ. ञ. ट. °वेदीवि° । २ क. ङ. ञ. °ति स्तुतम° । ३ घ. ज. ट. स°मानि । ४ ङ. ञ. °त्वाऽऽसां स° । ५ ङ. ञ. प्रापयति ।

सहभावं प्रापयेत् । उद्गीथाद्युपासनानि[1] कृत्वर्थाश्रयाण्यपि[2] गोदोहनादिवत्पुरुषार्थानीत्यवोचाम "पृथग्ह्यप्रतिबन्धः फलम्" [ब्र० सू० ३-३-४२] इत्यत्र । अयमेव चोपदेशाश्रयो विशेषोऽङ्गानां तदालम्बनानां चोपासनानां यदेकेषां[3] कृत्वर्थत्वमेकेषां पुरुषार्थत्वमिति । परं च लिङ्गद्वयमकारणमुपासनसहभावस्य श्रुतिन्यायाभावात् । न च प्रतिप्रयोगमाश्रयकात्स्न्योंपसंहारादाश्रितानामपि तथात्वं विज्ञातुं शक्यम्[4] । अतत्प्रयुक्तत्वादुपासनानाम् । आश्रयतन्त्राण्यपि[5] ह्युपासनानि काममाश्रयाभावे[6] मा भूवन्न त्वाश्रयसहभावेन सहभावनियममर्हन्ति तत्सहभावाश्रुतेरेव । तस्माद्यथाकाममेवोपासनान्यनुष्ठीयेरन्[7] ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥ (३६)

इति महर्षिव्यासप्रणीतब्रह्मसूत्रतृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

दर्शयति च श्रुतिरसहभावं प्रत्ययानाम् "एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वाश्चर्त्विजोऽभिरक्षति" [छा० ४-१७-१०] इति । सर्वप्रत्ययोपसंहारे हि " सर्वे सर्वविदः " इति

अयमेवेति । समाहाराद्गुणसाधारण्यश्रुतेश्चेत्येतद्दूषयति—परं चेति । यदर्थवादसामर्थ्यं तदन्यतः प्राप्तस्यावद्योतकं न चेहोपासनानां समुच्चये प्रापकमस्तीत्यर्थः । गुणसाधारण्येत्यादौ व्यतिरेकव्याख्यानं प्रत्याह—न चेति । उपासनानामाश्रयभावेऽपि सत्त्वाभावे कथमाश्रयतन्त्रत्वं तत्राऽऽह—आश्रयेति । इदमेवाऽऽश्रितानामाश्रयतन्त्रत्वं यदाश्रये सत्येव वृत्तिर्नासतीति । न तु तत्र वृत्तिरेव नावृत्तिरिति कामानामनित्यत्वात्तदुपबन्धोपास्तीनामपि तथात्वान्नित्यसंयोगविरोधादित्यर्थः । अङ्गोपास्तीनामङ्गवदसमुच्चये प्रतीकदृष्टिवद्यथारुच्यनुष्ठानमित्युपसंहरति—तस्मादिति ॥ ६५ ॥

किंच विदुषा ब्रह्मणाऽन्येषामृत्विजां पाल्यत्वोक्तेरपि न सर्वविज्ञानोपसंहारधीरित्याह—दर्शनाच्चेति । सूत्रं विभजते—दर्शयतीति । ऋग्वेदादिविहिताङ्गलोपे व्याहृतिहोमप्रायश्चित्तादिविज्ञानवत्त्वमेवंवित्त्वं ब्रह्मणोऽभीष्टं कथं तावता विवक्षितानुपसंहारस्तत्राऽऽह—सर्वेति । अस्ति च तेनेतरेषामृत्विजां पाल्यत्वकीर्तनं तेन प्रत्यया-

---

१ ङ. ञ. प्रापयति । २ क. ङ. ज. ञ. 'नि तु क' । ३ क. ङ. ज. ञ. °त्वङ्गाश्र° । ४ झ. °म्यमाना° । ५ ङ. ञ. शक्यते । ६ क. ङ. ञ. 'वे स° । ७ ट. °क्षतिति । ८ क. °र्वज्ञा° ।

(आत्मज्ञानस्य स्वतन्त्रत्वं न क्रत्वर्थत्वम्, अधि० १)

न विज्ञानवता ब्रह्मणा परिपाल्यत्वमितरेषां संकीर्त्येत। तस्मा-
द्यथाकाममुपासनानां समुच्चयो विकल्पो वेति ॥ ६६ ॥ (३६)

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ
श्रीमच्छारीरकमीमांसाभाष्ये तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

अथ साधनाख्यतृतीयाध्यायस्य चतुर्थः पादः।

(निर्गुणज्ञानस्य बहिरङ्गसाधनभूताश्रमयज्ञादीनामन्तरङ्गसाधनभूत-
शमादीनां च निरूपणम्।)

(आत्मज्ञानस्य स्वतन्त्रत्वं न क्रत्वर्थत्वम्, अधि० १)

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

अथेदानीमौपनिषदमात्मज्ञानं किमधिकारिद्वारेण कर्मण्येवा-

नुपसंहारधीरिति शेषः। अनुमानाल्लिङ्गाच्च सिद्धमर्थमुपसंहरति—तस्मादिति। यथा-
काम्यं व्याचष्टे—समुच्चयो विकल्पो वेतीति ॥ ६६ ॥ (३६)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचिते
शारीरकभाष्यविभागे न्यायनिर्णये तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥

कर्माङ्गत्वसङ्गिविद्योक्तिप्रसङ्गाद्ब्रह्मज्ञानस्य कर्माङ्गत्वमाशङ्क्य परिहरति—**पुरुषार्थ इति**। परापरब्रह्मविद्यानां गुणोपसंहारोक्त्या परिमाणमवधार्य तासां कर्मानपेक्षाणामेव पुरुषार्थसाधनत्वमवसरप्राप्तौ निरूप्यते। तत्र कर्मानपेक्षाणाममूषां का नामेतिकर्तव्यता न हि तां विना कारणतेत्याशङ्क्य यज्ञादयः श्रवणादयः शमदमादयश्च विद्योत्पत्त्यु-
पयोगिन्य इतिकर्तव्यता निरूप्यन्ते तदभिप्रेत्याऽऽह—**अथेति**। फलभेदाभेदौ विना न विद्याभेदाभेदौ न च तौ विना गुणोपसंहारानुपसंहारौ तेन प्रागेव विद्यानां पुरुषार्थहेतुत्वे स्थिते प्रथममौपनिषदमात्मज्ञानमधिकृत्य वादिविप्रतिपत्त्या संशयमाह—**औपनिषदमिति**। अनेन चाऽऽत्मज्ञानविशेषणेन शास्त्रश्रुतिसंगतिरुच्यते। सिद्धे फलवत्त्वे स्वतन्त्रमेवेदं फलवदिति साधनाद्ध्यायपादसंगतिः। पूर्वपक्षे समुच्चयपक्षसिद्धिः। सिद्धान्ते केवलस्य ज्ञानस्य कैवल्यसाधनतेति मत्वा पूर्वपक्षमग्रे दर्शयिष्यन्नादौ

१ क. संकीर्त्यते। २ ङ. 'ङ्गत्वि'। ३ ग. 'ङ्गिविद्यो'। ४ क. ख. ङ. म. ठ. ङ. शमा'।
५ ङ. 'द आत्म'। ६ ङ. म. 'गतिः। पू'। ७ ङ. ञ. 'ल्यस्य सा'। ८ ङ. म. 'शयन्ना'।

नुप्रविशत्याहोस्वित्स्वतन्त्रमेव पुरुषार्थसाधनं भवतीति मीमांसमानः सिद्धान्तेनैव तावदुपक्रमते—" पुरुषार्थोऽतः " इति । अस्माद्वेदान्तविहितादात्मज्ञानात्स्वतन्त्रात्पुरुषार्थः सिध्यतीति "बादरायणः" आचार्यो मन्यते । कुत एतदवगम्यते, "शब्दात्" इत्याह । तथा हि—"तरति शोकमात्मवित्" [छा० ७-१-३] "स यो ह वैतत्परमं ब्रह्म वेद ब्रह्मैव भवति " [मुण्ड० ३-२-९] " ब्रह्मविदाप्नोति परम् " [तै० २-१-१] " आचार्यवान्पुरुषो वेद" " तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" [छा० ६-१४-२] इति । " य आत्माऽपहतपाप्मा " [छा० ८-७-१] इत्युपक्रम्य "स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानाति " [छा० ८-७-१] इति । " आत्मा वा अरे द्रष्टव्यः " [बृ० ४-५-६] इत्युपक्रम्य "एतावदरे खल्वमृतत्वम् " [बृ० ४-५-१५] इत्येवंजातीयका श्रुतिः केवलाया विद्यायाः पुरुषार्थहेतुत्वं श्रावयति ॥ १ ॥

अथात्र प्रत्यवतिष्ठते—

शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥ २ ॥

कर्तृत्वेनाऽऽत्मनः कर्मशेषत्वात्तद्विज्ञानमपि व्रीहिप्रोक्षणादि-

---

सिद्धान्तमाह—सिद्धान्तेनेति । सूत्रस्थां प्रतिज्ञां योजयति—अस्मादिति । तत्र प्रमाणं पृच्छति—कुत इति । सूत्रावयवेनोत्तरमाह—शब्दादित्याहेति । प्रमाणं विवृणोति—तथा हीत्यादिना । सगुणब्रह्मज्ञानस्यापि स्वातन्त्र्येण पुमर्थहेतुतेति वक्तुं तद्विषयां श्रुतिमाह—य आत्मेति । निर्गुणविद्याविषयं वाक्यान्तरमाह—आत्मेति । उक्तश्रुतिषु विद्याफलयोः साध्यसाधनत्वं न भातीत्याशङ्क्य तयोरेकपुरुषसंबन्धसामर्थ्यादेव तद्धीरित्याशयेनाऽऽह—केवलाया इति ॥ १ ॥

पूर्वपक्षमवतारयति—अथेति । सिद्धान्तोक्त्यनन्तरमात्मज्ञाने विषये फलश्रुतिमधिकृत्य मीमांसकश्चोदयतीत्यर्थः । पुरुषार्थवाद इत्यत्रार्थग्रहणं तन्त्रेणोपात्तं तेन पुरुषार्थार्थवाद इति द्रष्टव्यम् । तत्त्वज्ञानं कर्माङ्गकर्तृद्वारा प्रयोगविधिनाऽऽदेयमादीयमानकर्माङ्गकर्त्राश्रयेण शास्त्रसिद्धत्वाद्यजमानसंस्काराज्ज्ञानादिवदिति मत्वा शेषत्वादित्येतद्व्याचष्टे—कर्तृत्वेनेति । तत्त्वज्ञानं प्रयोगविधिनाऽऽदेयं साध्यफलोक्ति-

---

१ क. ङ. ञ. ंति । अतोऽस्मा° । २ ङ. ञ. °नाति " " आ° । ३ क. ङ. ज. ञ. इति चोप° । ४ ङ. ञ. श्रुतिर्विद्या° । ५ ङ. ञ °याः केवलायाः पु° । ६ ङ. ञ. °त्र परः प्र° । ७ ङ. ञ. °णविष° । ८ क. ख. ङ. ञ. °षार्थवादोऽर्थ° । ९ क. ख. ङ. ञ. °श्रयण° ।

(आत्मज्ञानस्य स्वतन्त्रत्वं न क्रत्वर्थत्वम्, अधि० १)

वद्विषयद्वारेण कर्मसंबन्ध्येव । इत्यतस्तस्मिन्नवगतप्रयोजन आत्मज्ञाने या फलश्रुतिः सार्थवाद इति जैमिनिराचार्यो मन्यते, यथाऽन्येषु द्रव्यसंस्कारकर्मसु " यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति " [तै० सं० ३-५-७-२] " यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते " [तै० सं० ६-१-१ ५] " यत्प्रयाजानूयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्यै " [तै० सं० २-६-१-५] इत्येवंजातीयका फलश्रुतिरर्थवादः, तद्वत् । कथं पुनरस्यानारभ्याधीतस्याऽऽत्मज्ञानस्य प्रकरणादीनामन्यतमेनापि हेतुना विना क्रतुप्रवेश आशङ्क्यते कर्तृद्वारेण वाक्यात्तद्विज्ञानस्य क्रतुसंबन्ध इति चेत् । न । वाक्यादिनियोगानुपपत्तेः । अव्यभिचारिणा हि केनचिद्द्वारेणानारभ्याधीतानामपि वाक्यनिमित्तः क्रतुसंबन्धोऽवकल्पते । कर्ता तु व्यभिचारि द्वारं लौकिकवैदिककर्मसाधारण्यात् । तस्मान्न तद्द्वारेणाऽऽत्मज्ञानस्य क्रतुसंब-

---

शून्यत्वे सति कर्माङ्गाश्रयैत्वात्पर्णमयीत्वादिवदिति प्रयोगः । स्वतन्त्रफलस्य कथं प्रोक्षणादिवत्कर्माङ्गतेत्याशङ्क्य पुरुषार्थवाद इत्यस्यार्थमाह—इत्यत इति । वेदार्थजिज्ञासायां तत्त्वनिर्णयार्थं संशयादिप्रतिभासो गुरोरग्रे शिष्येण दर्शनीयो गुरुणा च तन्निरासेन तत्त्वमाविष्करणीयमिति शिष्टाचारं दर्शयितुं जैमिनिग्रहणं न प्रतिपक्षतया शिष्यस्य तदयोगात् । फलश्रुतेरर्थवादत्वे सूत्रितं दृष्टान्तं व्याचष्टे—यथेति । पर्णमयीद्रव्ये यजमानस्याञ्जनादिसंस्कारे प्रयाजादिकर्मसु च क्रमेण फलश्रुतीराह—यस्येत्यादिना । सा च फलश्रुतिर्न फलपरा फलवत्क्रत्वर्थत्वात्पर्णतादेः फलशेषत्वायोगात् । अतः सार्थवाद एवेति पर्णमयीत्वाधिकरणे समर्थितम् । तथाऽऽत्मज्ञानेऽपि फलश्रुतिरर्थवाद एव स्यादित्याह—तद्वदिति । विनियोजकमानाभावादात्मधियोऽनङ्गत्वात्तत्र फलश्रुतिर्नार्थवाद इति शङ्कते—कथमिति । प्रकरणादिना क्रत्वसंबन्धेऽपि जुहूद्वारा पर्णमयीत्वस्य वाक्यात्क्रतुसंबन्धवदात्मधियोऽपि कर्तृद्वारा वेदान्तवाक्यात्क्रतुसंगतिरिति पूर्ववाद्याह—कर्त्रेति । सिद्धान्ती दूषयति—नेति । तदेव विवृणोति—अव्यभिचारिणेति । जुहूवदात्मज्ञाने कर्तैवाव्यभिचारि द्वारमित्याशङ्क्याऽऽह—कर्तेति । तस्य व्यभिचारित्वे फलितमाह—तस्मादिति । किं देहातिरिक्तात्मज्ञानस्य कर्माङ्गत्वं विनियोजकाभावान्निरस्यते किं वाऽपहतपाप्मत्वादिवि-

---

१ ट. आशङ्क्येत । २ क. ङ ञ. °ण तद्वि° । ३ क. ङ. ञ. °स्य वाक्यात्क्रतु° । ४ ङ. ञ. वाक्यविनि° । ५ ङ. ञ. °यणात्य° । ६ ठ. ड °तिरर्थ° ।

न्धसिद्धिरिति । न । व्यतिरेकविज्ञानस्य वैदिकेभ्यः कर्मभ्योऽन्यत्रानुपयोगात् । न हि देहव्यतिरिक्तात्मज्ञानं लौकिकेषु कर्मसूपयुज्यते । सर्वथा दृष्टार्थप्रवृत्त्युपपत्तेः । वैदिकेषु तु देहपातोत्तरकालफलेषु देहव्यतिरिक्तात्मज्ञानमन्तरेण प्रवृत्तिर्नोपपद्यत इत्युपयुज्यते व्यतिरेकविज्ञानम् । नन्वपहतपाप्मत्वादिविशेषणादसंसार्यात्मविषयमौपनिषदं दर्शनं न प्रवृत्यङ्गं स्यात् । न । प्रियादिसंसूचितस्य संसारिण एवाऽऽत्मनो द्रष्टव्यत्वोपदेशात् । अपहतपाप्मत्वादि विशेषणं तु स्तुत्यर्थं भविष्यति । ननु तत्र तत्र प्रसाधितमेतदधिकमसंसारि ब्रह्म जगत्कारणं तदेव च संसारिण आत्मनः पारमार्थिकं स्वरूपमुपनिषत्सूपदिश्यत इति। सत्यं प्रसाधितं, तस्यैव तु स्थूणानिखननवत्फलद्वारेणाऽऽक्षेपसमाधाने क्रियेते दाढर्ष्याय ॥ २ ॥

शेषितासंसार्यात्मविषयौपनिषदज्ञानस्येति विकल्प्याऽऽद्यं पूर्ववादी दूषयति—नेति । तस्य विषयद्वारा तेष्वनुप्रवेशान्न कर्माङ्गत्वं निषेद्धुं शक्यमित्यर्थः । लौकिककर्मणोऽपि कर्मत्वाद्वैदिककर्मवत्कर्तृद्वारेणातिरिक्तज्ञानापेक्षेति कर्तुः साधारण्यमित्याशङ्क्याऽऽह—न हीति । सर्वथेति व्यतिरेकज्ञानाज्ञानयोरित्यर्थः । तर्हि वैदिकान्यपि कर्माणि कर्मत्वादितरवन्न व्यतिरेकज्ञानापेक्षाणीत्याशङ्क्याऽऽह—वैदिकेष्विति । कारीर्यादिनिवृत्त्यर्थं देहपातेत्यादिविशेषणम् । द्वितीयमाशङ्कते—नन्विति । अनुपयोगित्वाद्विरोधित्वाच्च तस्यं न क्रत्वङ्गतेति भावः । क्रत्वपेक्षितं रूपं हित्वाऽन्यदविवक्षितमित्याह—नेत्यादिना । जायादीनामात्मार्थत्वेन प्रियत्वमुक्त्वाऽऽत्मा द्रष्टव्य इति वदता जायादिना भोग्येन सूचितस्य संसारिणो भोक्तुरेव द्रष्टव्यत्वमिष्टं भोक्तृज्ञानं च कर्मसूपयुक्तमतो भोक्त्रतिरिक्तमात्मरूपं न श्रौतमित्यर्थः । अपहतपाप्मत्वादिविशेषणस्य भोक्तर्ययुक्तत्वादतिरिक्तमात्मरूपमेष्टव्यमित्याशङ्क्याऽऽह—अपहतेति । जन्मादिसूत्रमारभ्य तत्र तत्राप्रपञ्चब्रह्मात्मपरता वेदान्तानामुक्ता तत्कथमपहतपाप्मत्वादिकीर्तनस्य स्तुत्यर्थतेति शङ्कते—नन्विति । अधिकमितिविशेषणादाशङ्कितं द्वैतं वारयति—तदेवेति । संसारिणोऽसंसारीश्वरो रूपमिति व्याहतिं प्रत्याह—पारमार्थिकमिति । ऐक्ये प्रमाणं पूर्वोक्तं सूचयति—उपनिषत्स्विति । पूर्वपक्षाक्षेपं समाधत्ते—सत्यमित्यादिना । फलद्वारेणेत्यात्मज्ञानं वेदान्तानां फलं तत्क्रत्वर्थं पुरुषार्थं वेति विचारद्वारेणेत्यर्थः। साधितस्यैवाऽऽक्षेपसमाधिभ्यां साधनस्य फलमाह—दार्ढ्यायेति॥२॥

---

१ ट. °कज्ञा° । २ ङ. ज. ञ °त्मविज्ञा° । ३ क. ङ. ञ. °त्मविज्ञा° । ४ क. °व्यत्वेनोप° । ५ ट. °कं रू° । ६ क. ङ. ज. ञ. °पप्रतिस° । ७ क. ङ. ञ. ठ. ङ. °मालम्बते । ८ झ. ठ. °स्य क° । ९ ङ. ञ. °श्वररू° । १० झ. °क्षापेक्षं स° । ११ क. ङ. ञ. °नां त° । १२ ङ. ञ. °र्थं वे° ।

(आत्मज्ञानस्य स्वतन्त्रत्वं न ऋत्वर्थत्वम्, अधि० १)

आचारदर्शनात् ॥ ३ ॥

" जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे " [बृ० ३-१-१] " यक्ष्यमाणो वै भगवन्तोऽहमस्मि " [छा० ५-११-५] इत्येवमादीनि ब्रह्मविदामप्यन्यपरेषु वाक्येषु कर्मसंबन्धदर्शनानि भवन्ति । तथोद्दालकादीनामपि पुत्रानुशासनादिदर्शनाद्गार्हस्थ्यसंबन्धोऽवगम्यते । केवलाच्चेज्ज्ञानात्पुरुषार्थसिद्धिः स्यात्किमर्थमनेकायाससमन्वितानि कर्माणि ते कुर्युः । " अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् " [जै० सू० भा० १-२-४] इति न्यायात् ॥ ३ ॥

तच्छ्रुतेः ॥ ४ ॥

" यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति " [छा० १-१-१०] इति च कर्मशेषत्वश्रवणाद्विद्याया न केवलायाः पुरुषार्थहेतुत्वम् ॥ ४ ॥

किंच जनकादीनां विद्यया सह कर्माचरणदर्शनान्न केवलैव विद्या मोक्षहेतुरतः सहानुष्ठानं विद्यायाः स्वातन्त्र्याभावेन कर्माङ्गत्वे लिङ्गमित्याह—आचारेति । सूत्रं व्याचष्टे—जनको हेति । विदेहामामधिपतिर्जनको नाम राजा बहुदक्षिणसंज्ञेन यज्ञेनाश्वमेधेन वा बहुदक्षिणायुक्तेन पुरा कदाचिदीजे यागं कृतवान् । कैकेयस्य राज्ञो ब्रह्मविदो वाक्यमाह—यक्ष्यमाण इति । विद्यार्थिनः समागतान्प्राचीनशालादीन्भगवन्त इति संबोध्याहं यक्ष्यमाणोऽस्मि ततश्च कतिचिद्दिनान्याध्वमिति राजोक्तवानित्यर्थः । उक्तवाक्यानि विद्यार्थानि न कर्मार्थानीत्याशङ्क्याऽऽह—अन्येति । इतश्च ब्रह्मविदामस्ति कर्मसंगतिरित्याह—तथेति । आदिपदेन व्यासयाज्ञवल्क्यादिसंग्रहः । द्वितीयेन भार्यानुशासनादि गृह्यते । कर्म कृतं विद्वद्भिरेव कैश्चिदित्येतावता विद्याशक्तेरपङ्गवायोगात्केवलैव सा मुक्तिहेतुरित्याशङ्क्याऽऽह—केवलादिति । अल्पायासमुपायं हित्वा न कोऽपि महायासं तमादियत इत्यत्र लौकिकन्यायमाह—अर्के चेदिति । समीषवचनोऽर्कशब्दः ॥ ३ ॥

न केवलं विद्याया लिङ्गादेव कर्माङ्गत्वं किंतु तृतीयाश्रुतेरपीत्याह—तदिति । सूत्रार्थं विवृणोति—यदेवेति ॥ ४ ॥

---

१ ङ. अर्के । ज. ट. अर्क्ते । २ ङ. ञ. °नादयो गृ° । ३ ङ. ञ. गृह्यन्ते । ४ ङ. ञ. °द्रियेतेत्य° । ५ ङ. अर्के । ६ ङ. °नोऽर्केश° ।

समन्वारम्भणात् ॥ ५ ॥

" तं विद्याकर्मणी समन्वारभेते " [बृ० ४-४-२] इति च विद्याकर्मणोः फलारम्भे सहकारित्वदर्शनान्न स्वातन्त्र्यं विद्यायाः ॥ ५ ॥

तद्वतो विधानात् ॥ ६ ॥

" आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः " [छा० ८-१५-१] इति चैवंजातीयका श्रुतिः समस्तवेदार्थविज्ञानवतः कर्माधिकारं दर्शयति, तस्मादपि न विज्ञानस्य स्वातन्त्र्येण फलहेतुत्वम् । नन्वत्राधीत्येत्यध्ययनमात्रं वेदस्य श्रूयते नार्थविज्ञानम् । नैष दोषः । दृष्टार्थत्वाद्वेदाध्ययनमर्थावबोधपर्यन्तमिति स्थितम् ॥ ६ ॥

नियमाच्च ॥ ७ ॥

" कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे "

इतश्च न स्वतन्त्रा विद्या पुमर्थहेतुरित्याह—**समन्वारम्भणादिति**। सूत्रं विवृणोति—**तमित्यादिना**। तं परलोकं व्रजन्तं विद्याकर्मणी समनुगच्छत इति यावत् ॥ ५ ॥

तदस्वातन्त्र्ये लिङ्गान्तरमाह—**तद्वत इति** । तद्व्याकरोति—**आचार्येति**। तस्य कुलं गृहमुपनयनं कृत्वा तत्प्राप्त्यनन्तरं गुरोः शुश्रूषारूपं कर्म विधायातिशेषेण शिष्टेन कालेन यथाविधानं पवित्रपाणित्वप्राङ्मुखत्वादिविधानमनतिक्रम्य वेदमधीत्यानन्तरमभिसमावृत्य व्रतविसर्गं कृत्वा दारानाहृत्य कुटुम्बे गार्हस्थ्ये स्थितः शुचौ देशे स्वाध्यायाध्ययनं कुर्वन्कर्मान्तराणि च विहितानि यथाशक्ति कुर्वाणो ब्रह्मलोकमभिसंपद्यत इत्यर्थः । अध्ययनशब्दस्य यथाश्रुतमर्थं गृहीत्वा शङ्कते—**नन्विति** । अध्ययनविधेरवघातादिविधिवदृष्टार्थत्वादर्थावबोधान्तो व्यापारोऽस्तीति प्रथमे तन्त्रे समर्थितमित्याह—**नेत्यादिना** ॥ ६ ॥

इतश्च न स्वतन्त्रा विद्या पुमर्थहेतुरित्याह—**नियमाच्चेति** । नियमं विभजते—**कुर्वन्निति** । इह देहे शतं समाः शतसंख्याकान्संवत्सरान्यज्जिजीविषेत्तत्कर्माणि

---

१ क. ङ. ञ. °म्भे साहित्यद° । २ क. ङ. ञ. °नि च य° । ३ क. ङ. ञ. ट. °राज्जिजी° । ४ ञ. °षेत्क° ।

(आत्मज्ञानस्य स्वतन्त्रत्वं न क्रत्वर्थत्वम्, अधि० १)

[ईशा० २] इति। तथा " एतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यते मृत्युना वा " [शत० १२-४-१-१] इत्येवंजातीयकान्नियमादपि कर्मशेषत्वमेव विद्याया इति ॥ ७ ॥

एवं प्राप्ते प्रतिविधत्ते—

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुशब्दात्पक्षो विपरिवर्तते। यदुक्तम् " शेषत्वात्पुरुषार्थवादः " [ब्र० सू० ३-४-२] इति तन्नोपपद्यते। कस्मात्। अधिकोपदेशात्। यदि संसार्येवाऽऽत्मा शारीरः कर्ता भोक्ता च शरीरमात्रव्यतिरेकेण वेदान्तेषूपदिष्टः स्यात्ततो वर्णितेन प्रकारेण फलश्रुतेरर्थवादत्वं स्यात्। अधिकस्तावच्छारीरादात्मनोऽसंसारीश्वरः कर्तृत्वादिसंसारिधर्मरहितोऽपहतपाप्मत्वादिविशेषणः परमात्मा वेद्यत्वेनोपदिश्यते वेदान्तेषु। न च तद्विज्ञानं कर्मणां प्रवर्तकं भवति प्रत्युत कर्माण्युच्छिनत्तीति वक्ष्यति " उपमर्दं च " [ब्र० सू० ३-४-१६] इत्यत्र। तस्मात् " पुरुषार्थोऽतः शब्दात् " [ब्र० सू० ३-४-१] इति यन्मतं भगवतो बादरायणस्य तत्तथैव तिष्ठति न शेषत्वप्रभृति-

---

कुर्वन्नेवेति नियमविधिः। एवं त्वयि नरे वर्तमाने सत्यशुभं कर्म न लिप्यते तेन त्वं न लिप्यस इति यावत्। इतः प्रकारादन्यथा प्रकारान्तरं नास्ति यतो न कर्मलेपः स्यादित्यर्थः। नियमान्तरमाह—तथेति। जरामर्यं जरामरणावधिकम्। तदेव विशदयति—जरयेति। श्रुत्यादिभिरात्माधियः सिद्धे कर्माङ्गत्वे तत्फलेनैव फलवत्त्वमित्युपसंहर्तुमितीत्युक्तम् ॥ ७ ॥

पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति। सूत्रं योजयति—तुशब्दादिति। पक्षविपरिवर्तनमेव पक्षमनूद्य दर्शयति—यदिति। अनुपपत्तिहेतुं प्रश्नपूर्वकमाह—कस्मादिति। अधिकोपदेशं व्यतिरेकतो दर्शयति—यदीति। यः कर्ता कर्माङ्गं नासौ वेदान्तवेद्यो यच्च ब्रह्म तद्वेद्यं न तत्कर्माङ्गमतस्तज्ज्ञानस्य कुतः शेषता कुतस्तरां फलश्रुतेरर्थवादतेत्यर्थः। ब्रह्मात्मधीर्न क्रतुप्रयोगविधिनोपादेया तद्विरोधित्वादादीयमानोदितहोमविरोध्यनुदितहोमवदिति मत्वाऽऽह—प्रत्युतेति। बादरायणस्येत्यादि व्याचष्टे—तस्मादिति। उक्तात्मज्ञानस्य क्रतुशेषत्वायोगस्तच्छब्दार्थः। अधिकोप-

---

१ ट. 'रात्मं'। २ क. ङ. ज. ञ. 'सारधं'। ३ क. ङ. ज. ञ. 'त तत्कर्मा'। ४ ङ. ञ. इतश्च प्रं'।

भिर्हेत्वाभासैश्चालयितुं शक्यते । तथा हि तमधिकं शारीरादीश्वरमात्मानं दर्शयन्ति श्रुतयः " यः सर्वज्ञः सर्ववित् " [मुण्ड० १-१-९] "भीषाऽस्माद्वातः पवते " [तै० २-८-१] " महद्भयं वज्रमुद्यतम् " [कठ० ६-२] " एतस्य वा अक्षरस्य प्रशासने गार्गि " [बृ० ३-८-९] " तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत " [छा० ६-२-३] इत्येवमाद्याः । यत्तु प्रियादिसंसूचितस्य संसारिण एवाऽऽत्मनो वेद्यतयाऽनुकर्षणम् "आत्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः" [बृ० २-४-५] " यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः [बृ० ३-४-१] " य एषोऽक्षिणि पुरुषो दृश्यते " [छा० ८-७ ४] इत्युपक्रम्य " एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" [छा० ८-९-३] इति चैवमादि तदपि " अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः " [बृ० २-४-१०] " योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति " [बृ० ३-५-१] " परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः "[छा० ८-१२-३] इत्येवमादिभिर्वाक्यशेषैः सत्यामेवाधिकोपदिदिक्षायामत्यन्ताभेदाभिप्रायमित्यविरोधः । पारमेश्वरमेव हि शारीरस्य पारमार्थिकं स्वरूपम् । उपाधिकृतं

देशासिद्धिमाशङ्क्य तद्दर्शनादित्यनेन प्रत्याह—तथा हीति । क्रत्वपेक्षितं रूपं हित्वाऽन्यदात्मरूपमनिष्टमित्युक्तं तत्राऽऽह—यत्त्विति । आत्मनस्तु कामायेत्युपक्रम्याऽऽत्मा वा अरे द्रष्टव्य इति वाक्यं ब्रह्मोपदिदिक्षायां सत्यामेव ब्रह्मात्मैक्याभिप्रायमित्यत्र वाक्यशेषमाह—अस्येति । यः प्राणेनेत्यादि वाक्यमप्यैक्यपरमित्यत्र वाक्यशेषं दर्शयति—योऽशनायेति । य एषोऽक्षिणीत्यादिवाक्यमपि तथेत्यस्मिन्नर्थे शेषानुगुण्यमाह—परमिति । उक्तैः शेषैः संसारिणो यदाधिकं ब्रह्म तस्योपदिदिक्षायां सत्यामेव ब्रह्मणो जीवस्यात्यन्तभेदाभावधिया द्रष्टव्यादिवाक्यमिति क्रत्वनपेक्षितमात्मरूपं वेदान्तेषु विवक्षितमित्युपगमे न कश्चिद्विरोधोऽस्तीति योजना । कुतो जीवब्रह्मैक्यं मिथो विरोधादित्याशङ्क्य तात्त्विको विरोधो नास्तीत्याह—पारमेश्वरमिति । प्रातिभासिकस्तु विरोधस्तात्त्विकाभेदाविरोधीति मत्वाऽऽह—उपाधीति । जीवस्य तात्त्विकं रूपं

---

१ क. ट. °यः "स° । २ ङ. ञ. °ते । भीषोदेति सूर्यः" । " म° । ३ ङ. ञ. °ग्वेदो यजुर्वेदः । ४ क. ज. 'भिसंपद्य' । ५ क. ङ. ञ. °क्षायां नात्यन्तभे° । ६ ट. रूपम् । ७ ट. °तं शा° ।

(आत्मज्ञानस्य स्वतन्त्रत्वं न क्रत्वर्थत्वम्, अधि० १)

तु शारीरत्वम् " तत्त्वमसि " [छा० ६-८-७] " नान्यदतोऽस्ति द्रष्टृ[1]" [बृ० ३-८-११] इत्यादिश्रुतिभ्यः। सर्वं चैतद्विस्तरेणास्माभिः[2] पुरस्तात्तत्र तत्र वर्णितम् ॥ ८ ॥

तुल्यं तु दर्शनम् ॥ ९ ॥

यत्तूक्तमाचारदर्शनात्कर्मशेषो विद्येति। अत्र ब्रूमः—तुल्यमाचारदर्शनमकर्मशेषत्वेऽपि विद्यायाः। तथा हि श्रुतिर्भवति, " एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे "। " एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रिरे " [कौषी० २-५] " एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति " [बृ० ३-५-१] इत्येवंजातीयका। याज्ञवल्क्यादीनामपि ब्रह्मविदामकर्मनिष्ठत्वं दृश्यते " एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रव्रव्राज " [बृ० माध्य० ४-५-२५] इत्यादिश्रुतिभ्यः। अपि च " यक्ष्यमाणो वै भगवन्तोऽहमस्मि " [छा० ५-११-५] इत्येतल्लिङ्गदर्शनं वैश्वानरविद्याविषयम्। संभवति च सोपाधि-

---

ब्रह्मैवेत्यत्र श्रुतिसंवादमाह—तत्त्वमिति। संपदादिविषयं तत्त्वमादिवाक्यं न वस्तुविषयमित्याशङ्क्याऽऽह—सर्वं चेति ॥ ८ ॥

परोक्तं लिङ्गदर्शनं प्रत्याह—तुल्यं त्विति। उक्तमनूद्य सूत्रमुत्तरत्वेन योजयति—यदित्यादिना। इतश्च विद्याया न शेषतेत्याह—याज्ञवल्क्येति। आदिशब्देन शुकादयो गृह्यन्ते। कथं तेषामकर्मनिष्ठत्वं तदाह—एतावदिति। उभयथालिङ्गदर्शने संशयमाशङ्क्य परकीयलिङ्गानामन्यथासिद्धिं वक्तुमारभते—अपि चेति। अत्र यक्ष्यमाण इत्यादिलिङ्गदर्शनस्यान्यथासिद्धिमाह—यक्ष्यमाण इति। तत्रापि वेद्यात्वान्न कर्मसाहित्यमन्यथा ब्रह्मविद्यायामपि तत्प्रसङ्गादित्याशङ्क्याऽऽह—संभवतीति। तर्हि वैश्वानरविद्याया न स्वातन्त्र्येण फलवत्त्वं कर्माङ्गत्वाङ्गीकारात्तत्राऽऽह—

---

१ ङ. त्र. नान्योऽतो°। २ ङ. ञ द्रष्टा" इत्येवमादि°। ३ क. ज. °तद्वस्तु विस्त°। ४ ङ. ञ. यदुक्त°। ५ ट. एवं चैत°। ६ ठ. ड. अत्रापि।

कायां ब्रह्मविद्यायां कर्मसाहित्यदर्शनम् । न त्वत्रापि कर्माङ्गत्वमस्ति । प्रकरणाद्यभावात् ॥ ९ ॥

यत्पुनरुक्तम् " तच्छ्रुतेः " [ब्र० सू० ३-४-४] इति, अत्र ब्रूमः—

असार्वत्रिकी ॥ १० ॥

" यदेव विद्यया करोति " [छा० १-१-१०] इत्येषा श्रुतिर्न सर्वविद्याविषया । प्रकृतविद्याभिसंबन्धात् । प्रकृता चोद्गीथविद्या " ओमित्येतदक्षरमुद्गीथमुपासीत " [छा० १-१-१] इत्यत्र ॥ १० ॥

विभागः शतवत् ॥ ११ ॥

यदप्युक्तम् " तं विद्याकर्मणी समन्वारभेते " [बृ० ४-४-२] इत्येतत्समन्वारम्भवचनमस्वातन्त्र्ये विद्याया लिङ्गमिति तत्प्रत्युच्यते । " विभागः " अत्र द्रष्टव्यो विद्याऽन्यं पुरुषंसमन्वारभते कर्मान्यमिति । " शतवत् " । यथा शतमाभ्यां दीयतामित्युक्ते विभज्य दीयते पञ्चाशदेकस्मै पञ्चाशदपरस्मै तद्वत् । न चेदं समन्वारम्भवचनं मुमुक्षुविषयम् "इति नु कामयमानः"

न त्विति । येषां च ब्रह्मविदामपि कर्म दृश्यते न तत्तेषां कर्म तद्धि चोदनालक्षणं तेषां चाहंममाभिमानाभावेन[3] चोदनाभावात्कथंचिदनुवर्तमानमपि तदाभासमात्रमिति भावः ॥ ९ ॥

परोक्तां श्रुतिमनूद्य तदुत्तरत्वेन सूत्रमवतारयति—**यदिति** । तद्विभजते—**यदेवेति** । विद्याशब्दस्य सामान्यविषयस्य विशेषाकाङ्क्षस्य प्राकरणिकविशेषेण चरितार्थत्वादिति हेतुमाह—**प्रकृतेति** । आत्माधियस्तथात्वशङ्कां प्रत्याह—**प्रकृता चेति** ॥ १० ॥

परकीयं लिङ्गान्तरं दूषयति—**विभाग इति** । चोद्यमनूद्योत्तरत्वेन सूत्रं व्याचष्टे—**यदपीत्यादिना** । सामान्यश्रुतौ कथं विभागः स्यात्तत्रॉं सदृष्टान्तमाह—**शतवदिति** । समन्वारम्भवचनस्य मुमुक्षुविषयत्वमुपेत्य कर्मसाहित्येन तल्लिङ्गं विभागादित्युक्तम् । इदानीममुमुक्षुविषयत्वादविभागेऽपि न दूषणमित्याह—**न चेति** । तस्यामुमुक्षुविषयत्वे

---

१ ङ. ञ 'रुषं सम' । २ ट. 'षमार' । ३ ङ. ञ. 'वे च चो' । ४ ठ. ड. 'त्र द' । ५ क. ङ. ञ. 'भागोऽपि ।

(आत्मज्ञानस्य स्वतन्त्रत्वं न क्रत्वर्थत्वम्, अधि० १)

[बृ० ४-४-६] इति संसारिविषयत्वोपसंहारात्। " अथाकामयमानः " [बृ० ४-४-६] इति च मुमुक्षोः पृथगुपक्रमात्। तत्र संसारिविषये विद्या विहिता प्रतिषिद्धा च परिगृह्यते विशेषाभावात्। कर्मापि विहितं प्रतिषिद्धं च यथाप्राप्तानुवादित्वात्। एवं सत्यविभागेनापीदं समन्वारम्भवचनमवकल्पते॥ ११॥

यच्चैतत् "तद्वतो विधानात्" [ब्र० सू० ३-४-६] इति, अत उत्तरं पठति—

अध्ययनमात्रवतः ॥ १२ ॥

" आचार्यकुलाद्वेदमधीत्य " [छा० ८-१५-१] इत्यत्राध्ययनमात्रस्य श्रवणात् " अध्ययनमात्रवतः " एव कर्मविधिरित्यध्यवस्यामः। नन्वेवं सत्यविद्यत्वादनधिकारः कर्मसु प्रसज्येत। नैष दोषः। न वयमध्ययनप्रभवं कर्मावबोधनमधिकारकारणं वारयामः किं तर्ह्यौपनिषदमात्मज्ञानं स्वातन्त्र्येणैव प्रयोजनवत्प्रतीयमानं न कर्माधिकारकारणतां प्रतिपद्यत इत्येतत्प्रतिपादयामः। यथा च न क्रत्वन्तरज्ञानं क्रत्वन्तराधिकारेणापेक्ष्यत एवमेतदपि द्रष्टव्यमिति ॥ १२ ॥

हेत्वन्तरमाह—अथेति। संसारिविषये तं विद्येत्यादिवाक्ये विद्याशब्दार्थमाह—तत्रेति। उद्गीथादिविषया विहिता विद्या प्रतिषिद्धा च नग्नस्त्रीदर्शनादिरूपा। तथाभूतकर्मसाहचर्यादपि तथाविधैव विद्येत्याह—कर्मापीति। प्रकृते वाक्येऽपि विद्याकर्मणोरविशेषोपादाने हेतुमाह—यथेति। उक्तार्थवाक्यस्य संसारिविषयत्वे फलितमाह—एवमिति ॥ ११ ॥

लिङ्गान्तरमनूद्य सूत्रमादत्ते—यच्चेति। यच्चैतदुक्तमित्यर्थः। सूत्रं विवृणोति—आचार्येति। मात्रग्रहणेनार्थज्ञानमात्रं व्यवच्छिन्नमिति मन्वानः शङ्कते—नन्विति। अविद्यत्वाद्विद्याहीनत्वादिति यावत्। मात्रग्रहणमात्मज्ञानापेक्षं न कर्मावबोधापेक्षमित्याह—नेत्यादिना। वेदार्थत्वादात्मनस्तज्ज्ञानमपि कर्मबोधवदधिकारेऽपेक्षितव्यमित्याशङ्क्याऽऽह—यथेति। पूर्वसूत्रव्याख्यासमाप्तावितिशब्दः ॥ १२ ॥

---

१ ज. °ति मु°। २ ङ. अ. °षया वि°। ३ ङ. °तं प्राहितं प्र°। ४ क. यदुक्तं तद्व°। ङ. °यश्चोक्तं तद्व°। ५ ज. °त्यध्य°। ६ ङ. अ. °विद्वत्वाद°। ७ क. ङ. ज. अ. °त्येतावत्प्र°। ८ ङ. °णाऽपे°। ९ ज. °रेऽप्यपे°। १० ङ. घ. °विद्वत्त्वाद्वि°। ११ ङ. अ. कर्मावबो°।

यदप्युक्तम् " नियमाच्च " [बृ० सू० ३-४-७] इति, अत्राभिधीयते—

नाविशेषात् ॥ १३ ॥

" कुर्वन्नेवेह कर्माणि जिजीविषेत् " [ईशा० २] इत्येवमादिषु नियमश्रवणेषु न विदुष इति विशेषोऽस्ति । अविशेषेण नियमविधानात् ॥ १३ ॥

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

" कुर्वन्नेवेह कर्माणि " [ईशा० २] इत्यत्रापरो विशेष आख्यायते । यद्यप्यत्र प्रकरणसामर्थ्याद्विद्वानेव कुर्वन्निति संबध्येत तथाऽपि विद्यास्तुतये कर्मानुज्ञानमेतद्द्रष्टव्यम् । " न कर्म लिप्यते नरे" [ईशा०२] इति हि वक्ष्यति । एतदुक्तं भवति—यावज्जीवं कर्म कुर्वत्यपि विदुषि पुरुषे न कर्म लेपाय भवति विद्यासामर्थ्यादिति तदेवं विद्या स्तूयते ॥ १४ ॥

कामकारेण चैके ॥ १५ ॥

अपि " चैके " विद्वांसः प्रत्यक्षीकृतविद्याफलाः सन्तस्तदवष्टम्भात्फलान्तरसाधनेषु प्रजादिषु प्रयोजनाभावं परामृशन्ति ।

लिङ्गान्तरमनूद्य सूत्रान्तरमादत्ते—यदपीति । अविद्वद्विषयं नियमविधानमिति व्याचष्टे—कुर्वन्निति ॥ १३ ॥

विद्वद्विषयत्वमुपेत्य परिहारान्तरमाह—स्तुतय इति । एवं तर्हि प्रकरणमभग्नमिति मत्वा सूत्रं विभजते—कुर्वन्नेवेति । विशेषमेव विशदयति—यद्यपीति । स्तुत्यर्थं कर्मानुज्ञानमित्यत्र वाक्यशेषमनुकूलयति—नेति । तथाऽपि कथं स्तुतिस्तत्राऽऽह—एतदिति । एवं कर्म कुर्वत्यपि त्वयि नेतो ब्रह्मभावाद्विद्यागम्यादन्यथा संसारापत्तिरस्ति यतो न कर्म लिप्यत इति योजनां गृहीत्वोपसंहरति—तदेवमिति ॥ १४ ॥

पूर्वपक्षहेतूनेवमुन्मथ्य स्वपक्षे हेत्वन्तरमाह—कामेति । इतश्च विद्याया न कर्माङ्गतेति चकारार्थमाह—अपि चेति । स्वेच्छातः कर्मसाधनप्रजात्यागलिङ्गादपि विद्यायाः स्वातन्त्र्यमिति हेत्वन्तरमेव स्फोरयति—एक इति । येषां नोऽस्माकमय-

---

१ ज्ञ. °नेव क° । २ ङ. ञ. संबध्यते । ३ ङ. ञ. °पि पुरुषे विदुषि न । ट. °पि त्वयि वि° । ४ ठ. ड. °वं हि प्र° । ५ क. ख. ड. ञ. °पक्षे हे° ।

(आत्मज्ञानस्य स्वतन्त्रत्वं न क्रत्वर्थत्वम्, अधि० १)

" कामकारेण " इति श्रुतिर्भवति वाजसनेयिनाम् " एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः " [बृ० ४-४-२२] इति । अनुभवारूढमेव च विद्याफलं न क्रियाफलवत्कालान्तरभावीत्यसकृदवोचाम । अतोऽपि न विद्यायाः कर्मशेषत्वं नापि तद्विषयायाः फलश्रुतेरयथार्थत्वं शक्यमाश्रयितुम् ॥ १५ ॥

उपमर्दं च ॥ १६ ॥

अपि च कर्माधिकारहेतोः क्रियाकारकफललक्षणस्य समस्तस्य प्रपञ्चस्याविद्याकृतस्य विद्यासामर्थ्यात्स्वरूपोपमर्दमामनन्ति--" यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत् " [बृ० २-४-१४] इत्यादिना । वेदान्तोदितात्मज्ञानपूर्विकां[2] तु कर्माधिकारसिद्धिं प्रत्याशासानस्य कर्माधिकारोच्छित्तिरेव प्रसज्येत[3] । तस्मादपि स्वातन्त्र्यं विद्यायाः ॥ १६ ॥

मपरोक्षः सन्नात्माऽयं लोकः प्रत्यक्षं फलं ते वयं किं प्रजया करिष्याम इति निश्चित्याग्निहोत्रादि न[4] हुतवन्त इत्यर्थः । मोक्षस्यादृष्टफलत्वात्कथं मुक्तत्वनिश्चयात्प्रजादित्यागसिद्धिस्तत्राऽऽह—अनुभवेति । ब्रह्मधीर्न क्रतुप्रयोगविधिनाऽऽदेया क्रत्वङ्गसंबन्धित्वेऽपि फलान्तरयोगित्वाद्गोदोहनवदिति मत्वाऽऽह—अतोऽपीति ॥ १५ ॥

अधिकोपदेशादित्यत्राऽऽत्मनोऽशनायोद्यत्ययात्तद्धीर्न कर्माङ्गमित्युक्तम् । इदानीमशेषक्रियादिविभागोपमर्दकत्वादपि न कर्माङ्गमित्याह—उपमर्दं चेति । इतश्चाऽऽत्मधीर्न कर्माङ्गमिति चकारार्थमाह—अपि चेति । हेत्वन्तरं स्फोरयति—कर्मेति । विद्यासामर्थ्यात्प्रपञ्चोपमर्दे फलितमाह—वेदान्तेति । आत्मज्ञानस्याऽऽदीयमानक्रत्वङ्गविरोधित्वे फलितं निगमयति--तस्मादिति ॥ १६ ॥

---

१ ङ. °द्वांसो न । २ ट. °कां क° । ३ क. ज. ट. प्रसज्यते । ४ ङ. ञ. न; हुत° ।
५ क. °र्थात्य° ।

ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥ (१)

" ऊर्ध्वरेतःसु च " आश्रमेषु विद्या श्रूयते। न च तत्र कर्माङ्गत्वं विद्याया उपपद्यते। कर्माभावात्। न ह्यग्निहोत्रादीनि वैदिकानि कर्माणि तेषां सन्ति। स्यादेतत्। ऊर्ध्वरेतस आश्रमा न श्रूयन्ते वेद इति, तदपि नास्ति, तेऽपि हि वैदिकेषु शब्देष्ववगम्यन्ते " त्रयो धर्मस्कन्धाः " [छा० २-२३-१] " ये चेमेऽरण्ये श्रद्धा तप इत्युपासते " [छा० ५-१०-१] " तपःश्रद्धे ये ह्युपवसन्त्यरण्ये " [मुण्ड० १-२-११] " एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति " [बृ० ४-४-२२] " ब्रह्मचर्यादेव प्रव्रजेत् " [जाबा० ४] इत्येवमादिषु। प्रतिपन्नाप्रतिपन्नगार्हस्थ्यानामपाकृतानपाकृतर्णत्रयाणां चोर्ध्वरेतस्त्वं श्रुतिस्मृतिप्रसिद्धम्। तस्मादपि स्वातन्त्र्यं विद्यायाः ॥ १७ ॥ (१)

विद्यास्वातन्त्र्ये हेत्वन्तरमाह—ऊर्ध्वरेतःस्विति। विद्याकर्मणी नाङ्गाङ्गिभूते मिथो व्यतिरेकित्वादृतुगमननैष्ठिकव्रतवदिति मत्वा योजयति—ऊर्ध्वेत्यादिना। तथाऽपि कथं कर्माङ्गत्वं विद्याया व्यासिध्यते तत्राऽऽह—न चेति। तेषामपि स्नानादि कर्मास्तीत्याशङ्क्याऽऽह—न हीति। बाधितानुवृत्त्या तत्सद्भावेऽपि वैदिकाग्निहोत्राद्यभावान्न क्रत्वङ्गता ज्ञानस्येत्यर्थः। शब्दे हीतिसूत्रावयवव्यावर्त्यामाशङ्कामाह—स्यादिति। सूत्रावयवेनोत्तरमाह—तदपीति। कर्मानधिकृतान्धादिविषयं पारिव्राज्यमित्याशङ्क्याऽऽह—प्रतिपन्नेति। ऋणापाकरणे श्रुतिस्मृतिभ्यां गृहस्थस्यैवापाकृतर्णत्रयस्यैवोर्ध्वरेतःशब्दितमैथुनासमाचारोपलक्षितं पारिव्राज्यमित्याशङ्क्याऽऽह—अपाकृतेति। साक्षाद्विधिश्रुतिविरोधेऽर्थवादश्रुतिस्मृत्योर्बाध्यतेत्यभिप्रेत्योक्तम्—श्रुतीति। श्रुतिर्ब्रह्मचर्यादेव प्रव्रजेदित्याद्या दर्शिता। स्मृतिस्तु तस्याऽऽश्रमविकल्पमेके ब्रुवते यमिच्छेत्तमावसेदित्याद्योदाहार्या। ऊर्ध्वरेतःस्वाश्रमेषु विद्यायाः सिद्धौ फलितमाह—तस्मादिति। तस्याः स्वातन्त्र्ये केवलायाः सिद्धा मुक्तिफलतेति वक्तुमितीत्युक्तम् ॥ १७ ॥ (१)

---

१ क. घ. ङ. ज. ञ. ट. 'तर्णानां चो'। २ क. ख. 'ङ्गाङ्गीभू'। ३ क. ञ. 'सेध्येत त'। ४ ङ. ञ 'वात्क्रत्व'। ५ ख. ङ. 'ब्दितं मै'। ६ ङ. ञ. 'स्तु यस्याऽऽ'। ७ क. ख. ङ. ञ. मुक्तिः फलिते'।

(ऊर्ध्वरेतोरूपाश्रमाणामस्तित्वं लोककामिनामाश्रमिणां ब्रह्मनिष्ठानर्हत्वं च, अधि० २)

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

" त्रयो धर्मस्कन्धाः " [छा० २ २३-१] इत्यादयो ये शब्दा ऊर्ध्वरेतसामाश्रमाणां सद्भावायोदाहृतास्[1] न ते तत्प्रतिपादनाय प्रभवन्ति । यतः परामर्शमेषु शब्देष्वाश्रमान्तराणां जैमिनिराचार्यो मन्यते न विधिम् । कुतः । न ह्यत्र लिङ्गादीनामन्यतमश्चोदनाशब्दोऽस्ति । अर्थान्तरपरत्वं चैषु[2] प्रत्येकमुपलभ्यते । " त्रयो धर्मस्कन्धाः " इत्यत्र तावत् " यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवन्ति " [छा० २-२३-१-२] इति परामर्शपूर्वकमाश्रमाणामनात्यन्तिकफलत्वं संकीर्त्याऽऽत्यन्तिकफलतया ब्रह्मसंस्थता स्तूयते " ब्रह्मसंस्थोऽमृतत्वमेति [छा० २-२३-२] इति । ननु परामर्शेऽप्याश्रमा गम्यन्त एव । सत्यं गम्यन्ते । स्मृत्याचाराभ्यां तु तेषां प्रसिद्धिर्न प्रत्यक्षश्रुतेः । अतश्च प्रत्यक्षश्रुतिविरोधे सत्यनादरणीयास्ते भविष्यन्ति ।

पूर्वाधिकरणावान्तरसूत्रेणाऽऽक्षेपलक्षणां संगतिं विवक्षन्नाक्षिपति—**परामर्शमिति** । ऊर्ध्वरेतःशब्दितं पारिव्राज्यं नानुष्ठेयमनुष्ठेयं वेतिभ्रान्तिप्रमाणमूलत्वाभ्यां संदेहे पूर्वपक्षयति—**त्रय इति** । अत्र शास्त्रीयसम्यग्ज्ञानस्यान्तरङ्गसाधनप्रसङ्गादनुष्ठेयमुच्यत इति स्फुटा पादादिसंगतिः । पूर्वपक्षे पारिव्राजके विद्याप्रसिद्धेर्विभ्रमत्वात्तस्या न स्वातन्त्र्यसिद्धिः । सिद्धान्ते तस्यास्तत्र प्रामाणिकत्वात्तत्सिद्धिरिति स्वीकृत्य परामर्शं जैमिनिरिति व्याख्याय हेत्वाकाङ्क्षायामचोदनेति हेतुत्वेन व्याचष्टे—**कुत इति** । पूषा प्रपिष्टभाग इतिवत्कल्प्यतां विधिरित्याशङ्क्य ब्रह्मसंस्थतादिविधिपरत्वाद्वाक्यजातस्य नैवमिति चशब्दार्थमाह—**अर्थान्तरेति** । तत्र ब्रह्मसंस्थतादिविधिपरत्वं त्रय इत्यादिवाक्यस्य साधयति—**त्रय इत्यादिना** । अन्यत्र विहितस्यान्यत्र परामर्शादन्यत्र विधिकल्पनादिहैव कल्पना लघ्वीत्याशङ्कते—**नन्विति** । परामर्शस्यानुवादाख्यस्य पुंरोवादापेक्षत्वात्तद्वशादाश्रमप्रतीतिमङ्गी करोति—**सत्यमिति** । तर्हि तद्विषयश्रुतेरन्यत्राऽऽश्रितत्वाद्दौर्बल्यमित्याशङ्क्याऽऽह—**स्मृतीति** । तयोरपि[10] श्रुतिमूलत्वाद्विधियुक्तश्रुतिकल्पनादिहैव तत्कल्पन[11] लाघवमित्याशङ्क्याऽऽह—**अतश्चेति** । प्रत्यक्षश्रुतिर्यावज्जीवादिश्रुतिः ।

---

१ झ. वादयो° । २ ट. °ता नैते । ३ ड. ञ. चैतेषां प्र° । ४ क. ङ. ज. ञ. °त्यक्षाया: श्रु° । ५ ङ. ञ. °वक्ष्यन्ना° । ६ क. °ष्ठेयं । ७ क. ङ. ञ. °क्षे पारि° । ८ क. ङ. ञ. पुरावा° । ९ झ. °श्रयप्र° । १० झ. °पि स्मृति° । ११ ठ. ड. °नेत्यला° ।

अनधिकृतविषया वा । ननु गार्हस्थ्यमपि सदैवोर्ध्वरेतोभिः परामृष्टं " यज्ञोऽध्ययनं दानमिति प्रथमः " इति । सत्यमेवं, तथाऽपि तु गृहस्थं प्रत्येवाग्निहोत्रादीनां कर्मणां विधानाच्छ्रुतिप्रसिद्धमेवै हि तदस्तित्वम् । तस्मात्स्तुत्यर्थ एवायं परामर्शो न चोदनार्थः । अपि " चापवदति हि " प्रत्यक्षा श्रुतिराश्रमान्तरम् " वीरहा वा एष देवानां योऽग्निमुद्वासयते " [तै० सं० १-५-२-१] " आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः" [तै०आ० १-११-१] "नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः" [ऐत० ब्रा० ७-१३-१२] इत्येवमाद्या । तथा " ये चेमेऽरण्ये श्रद्धा तप इत्युपासते " [छा० ५-१०-१] " तपःश्रद्धे ये ह्युपवसन्त्यरण्ये " [मुण्ड० १-२-११] इति च देवयानोपदेशो नाऽऽश्रमान्तरोपदेशः । संदिग्धं चाऽऽश्रमान्तराभिधानम् " तप एव द्वितीयः " [छा० २-२३-२] इत्येवमादिषु । तथा " एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति " [बृ० ४-४-२२] इति लोकसंस्तवोऽयं न पारि-

---

निरालम्बनत्वात्कथमपि सालम्बनत्वं युक्तमिति कल्पान्तरमाह—अनधिकृतेति । येऽन्धादयो नित्यादिकर्मस्वनधिकृतास्तद्विषया आश्रमान्तरस्मृतयस्तदाचाराश्चेत्यर्थः । आश्रमान्तराणां परामर्शेऽपि गार्हस्थ्यवत्प्रामाणिकत्वसिद्धेरनुष्ठेयतेति शङ्कते—नन्विति । परामर्शसाम्यमङ्गी करोति—सत्यमिति । तर्हि प्रामाणिकत्वेनानुष्ठेयत्वमपि तुल्यं स्यादित्याशङ्क्य न परामर्शमात्राद्गार्हस्थ्यासेद्धिः, अपि तु प्रत्यक्षश्रुतिविधानादिति विशेषमाह—तथाऽपीति । गार्हस्थ्यमेकमेव श्रौतमिति स्थिते ब्रह्मसंस्थतास्तुत्यर्थमेव त्रय इत्याद्याश्रमान्तरवचनमित्युपसंहरति—तस्मादिति । निन्द्यमानत्वाच्चाऽऽश्रमान्तरमननुष्ठेयमित्याह—अपि चेति । तत्र सूत्रावयवं योजयति—अपवदतीति । तत्र त्रय इत्यादिवाक्यस्यान्यार्थत्वमुक्त्वा वाक्यान्तरस्यापि तद्वदेवार्थान्तरपरत्वमाह—तथेति । तेऽर्चिषमभिसंभवन्ति सूर्यद्वारेण ते विरजाः प्रयान्तीतिवाक्यशेषाद्देवयानोक्तिपरं तदित्यर्थः । आश्रमवाचकशब्दाभावाच्चार्थान्तरपरत्वमित्याह—संदिग्धं चेति । प्रव्रजन्तीत्याश्रमवाचिशब्ददृष्टेरनुष्ठेयं पारिव्राज्यमित्याशङ्क्याऽऽह—तथेति । एवंविशिष्टोऽयमात्मलोको यदेनं साक्षात्कर्तुमिच्छन्तो दुरनुष्ठेयामपि प्रव्रज्यां कुर्वन्तीति स्तुतिर्न तद्विषयो विधिर्वर्तते मानापदेशादित्यर्थः । पूर्वपक्षमा-

---

१ ङ. ञ. यो । २ क. ङ. ज. ञ. ट. 'व त' । ३ ज. ट. 'ति दे' । ४ झ. 'कस्तन्तवोऽ' । ५ ङ. ञ. कल्पनान्त' । ६ ठ. ड. 'ति । त्रय । ७ ङ. ञ. 'ति । ते विरजाम' । ८ ङ. ञ. 'को येनेदं सा' । ९ ङ. ञ. 'ति श्रुति' । १० ख. ङ. ञ. 'मानोप' ।

(ऊर्ध्वरेतोऽपाश्रमाणामस्तित्वं लोककामिनामाश्रमिणां ब्रह्मनिष्ठानर्हत्वं च, अधि० २)

व्राज्यविधिः । ननु च "ब्रह्मचर्यादेव प्रव्रजेत्" इति [जाबा० ४] विस्पष्टमिदं प्रत्यक्षं पारिव्राज्यविधानं जाबालानाम् । सत्यमेवमेतत् । अनपेक्ष्य त्वेतां श्रुतिमयं विचार इति द्रष्टव्यम् ॥ १८ ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

"अनुष्ठेयम्" आश्रमान्तरं "बादरायणः" आचार्यो मन्यते । वेदे[2] श्रवणात् । अग्निहोत्रादीनां चावश्यानुष्ठेयत्वात्तद्विरोधादनधिकृतानुष्ठेयमाश्रमान्तरमिति[3]मां मतिं निराकरोति गार्हस्थ्यवदेवाऽऽश्रमान्तरमप्यनिच्छता प्रतिपत्तव्यमिति मन्यमानः । कुतः । "साम्यश्रुतेः" । समा[4] हि गार्हस्थ्येनाऽऽश्रमान्तरस्य परामर्शश्रुतिर्दृश्यते—"त्रयो धर्मस्कन्धाः" [छा० २-२३-१] इत्याद्या । यथेह श्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृष्टमेवमाश्रमान्तरमपीति प्रतिपत्तव्यम् । यथा च शास्त्रान्तरप्राप्तयोरेव निवीत-

---

क्षिपति—नन्विति । प्रत्यक्षविधानमङ्गी करोति—सत्यमिति । तर्हि पूर्वपक्षासिद्धिरित्याशङ्क्य नास्तीदं विधानमिति कृत्वाचिन्तेयमित्याह—अनपेक्ष्येति ॥ १८ ॥

सिद्धान्तसूत्रमवतार्य व्याकरोति—अनुष्ठेयमिति । पूर्वपक्षमनुभाष्य तन्निरासप्रतिज्ञां विवृणोति—वेद इति । तत्र प्रश्नपूर्वकं हेतुमाह—कुत इति । तस्याक्षरार्थमाह—समा हीति । तस्यैव तात्पर्यार्थमाह—यथेति । त्रयो धर्मस्कन्धा इत्यत्रोर्ध्वरेतस आश्रमाः श्रुत्यन्तरप्रसिद्धा एव परामृश्यन्त एतद्वाक्यपरामृष्टत्वाद्गार्हस्थ्यवदित्यर्थः । परामर्शस्य विधिपूर्वकत्वे दृष्टान्तमाह—यथेति । निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुत इत्यत्रोपवीतविधिपरे वाक्ये विध्यन्तरसिद्धयोरेव निवीतप्राचीनावीतयोर्यथा परामर्शस्तथाऽत्रापीत्यक्षरार्थः । निवीतं मनुष्याणामित्यादि दर्शपूर्णमासयोः श्रुतं तत्रोपवीतं विधीयत एवेतरयोस्तु विधिरर्थवादो वेति संशये सत्यपूर्वार्थलाभान्मनुष्यशब्दस्य च मनुष्यप्राधान्यवर्चित्वादातिथ्ये कर्मणि निवीतं पित्र्ये च प्राचीनावीतमिति प्राप्ते मनुष्याणां क्रियासु सौकर्याय कण्ठलम्बिवस्त्रधारणस्य वा देहार्धबन्धस्य वा निवीतस्य प्राप्तत्वात्प्राचीनावीतस्य च पितृयज्ञे वाक्यान्तरेण प्राप्तेस्तदनुवादेन निवीतमित्यादिरुपवीतं स्तोतुमर्थवाद इति प्राच्यां मीमांसायां स्थितम् । तथैव परामर्शश्रुतावपि त्रय इत्याद्यायां गार्हस्थ्यवदाश्रमान्तरमपि विहितमेवान्यत्र परामृश्यते तस्य विध्यपेक्षत्वादित्यर्थः । साम्यश्रुतिफ-

---

१ ङ. अ. 'नु ब्र'। २ क. ङ. अ. वेदेषु । ३ ङ. ज. अ. 'मिति हीमां । ४ ङ अ. समाना । ५ ठ. ङ. 'त्पर्यमा'। ६ ङ. अ. 'रसि'। ७ ठ. ङ. 'र्शवि'। ८ क. ङ. अ. ठ. ट. 'वादित्वा'।

(ऊर्ध्वरेतोरूपाश्रमाणामस्तित्वं लोककामिनामाश्रमिणां ब्रह्मनिष्ठानर्हत्वं च, अधि० २)

प्राचीनावीतयोः परामर्श उपवीतविधिपरे वाक्ये [जै० सू० ३-४-१-९]। तस्मात्तुल्यमनुष्ठेयत्वं गार्हस्थ्येनाऽऽश्रमान्तरस्य। तथा " एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति " [बृ० ४-४-२१] इत्यस्य वेदानुवचनादिभिः समभिव्याहारः। " ये चेमेऽरण्ये श्रद्धा तप इत्युपासते " [छा० ५-१०-१] इत्यस्य च पञ्चाग्निविद्यया। यत्तूक्तम् " तप एव द्वितीयः " [छा० २-२३-२] इत्यादिष्वाश्रमान्तराभिधानं संदिग्धमिति । नैष दोषः। निश्चयकारणसद्भावात्। " त्रयो धर्मस्कन्धाः " [छा० २-२३-१] इति[2] हि[3] धर्मस्कन्धत्रित्वं प्रतिज्ञातम्। न च यज्ञादयो भूयांसो धर्मा उत्पत्तिभिन्नाः सन्तोऽन्यत्राऽऽश्रमसंबन्धात्त्रित्वेऽन्तर्भावयितुं शक्यन्ते । तत्र यज्ञादिलिङ्गो गृहाश्रम एको धर्मस्कन्धो निर्दिष्टो ब्रह्मचारीति च स्पष्ट आश्रमनिर्देशस्तप इत्यपि कोऽन्यस्तपःप्रधानादाश्रमाद्धर्मस्कन्धोऽभ्युपगम्येत। " ये चेमेऽरण्ये " [छा० ५-१०-१] इति चारण्यलिङ्गाच्छ्रद्धातपोभ्यामाश्रमगृहीतिः। तस्मात्परामर्शेऽप्यनुष्ठेयमाश्रमान्तरम् ॥ १९ ॥

लमाह—**तस्मादिति** । त्रय इत्यत्राऽऽश्रमान्तरस्य गार्हस्थ्येन साम्यश्रुतिरुक्ता, संप्रति पारिव्राज्यवाक्येऽपि साम्यश्रुतिमाह—**तथेति** । अस्येति पारिव्राज्योक्तिः । विधेयसाहित्यादस्याऽपि विधेयतेत्यर्थः । वाक्यान्तरेऽपि साम्यश्रुतिमाह—**ये चेति** । अस्येति वानप्रस्थोक्तिः । विधेयपञ्चाग्निविद्यया तस्य सहोक्तिरस्ति तेन तद्वदेव वानप्रस्थमनुष्ठेयमित्यर्थः । परोक्तिमुद्भाव्य प्रत्याह—**यत्त्वित्यादिना** । किं तन्निश्चयैकारणं तदाह—**त्रय इति** । स्कन्धशब्दस्य समूहवाचित्वेऽपि त्रित्वप्रतिज्ञा स्यादित्याशङ्क्याऽऽह—**न चेति** । यजेत दद्यादित्याद्युत्पत्तिविधिभिन्नाः सन्तो बहवो धर्मा नाऽऽश्रमसंबन्धमन्तरेण त्रित्वेऽन्तर्भावयितुं शक्यन्ते । यद्याश्रमपरः स्कन्धशब्दो न स्यान्न स्यात्ततो यज्ञादीनां त्रित्वं तेषामधिकृतत्वादतः स्कन्धशब्दस्य समूहार्थत्वायोगात्त्रित्वमेव स्कन्धानामाश्रमत्वनिश्चायकमित्यर्थः । कथं तर्हि तेषामाश्रमाणां विभागस्तत्राऽऽह—**तत्रेति** । वाक्यान्तरेऽपि निश्चायकं दर्शयति—**ये चेति** । परोक्तं निरस्य स्वमतमुपसंहरति—**तस्मादिति** ॥ १९ ॥

---

१ ट. 'वीतिवि' । २ ट. 'ति ध' । ३ ङ. ज. अ. हि स्क' । ४ क. ङ. अ. 'क्ये सा' । ५ झ. 'यप्रप' । ६ ठ. ङ. 'रोक्तमु' । ७ ङ. अ. 'यकर' । ८ झ. 'स्यात्त' । ९ ङ. अ. ठ. ढ. 'धिकत्वा' । १० ङ. ज. 'र्थयो' ।

(ऊर्ध्वरेतोरूपाश्रमाणामस्तित्वं लोककामिनामाश्रमिणां ब्रह्मनिष्ठानर्हत्वं च, अधि० २)

विधिर्वा धारणवत् ॥ २० ॥ (२)

" विधिर्वा " अयमाश्रमान्तरस्य न परामर्शमात्रम् । ननु विधित्वाभ्युपगम एकवाक्यताप्रतीतिरुपरुध्येत प्रतीयते चात्रैकवाक्यता पुण्यलोकफलास्त्रयो धर्मस्कन्धा ब्रह्मसंस्थता त्वमृतत्वफलेति, सत्यमेतत् । सतीमपि त्वेकवाक्यताप्रतीतिं परित्यज्य विधिरेवाभ्युपगन्तव्योऽपूर्वत्वात् । विध्यन्तरस्यादर्शनात् । विस्पष्टाच्चाऽऽश्रमान्तरप्रत्ययाद्गुणवादकल्पनयैकवाक्यत्वयोजनानुपपत्तेः । " धारणवत् " यथा " अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति " इत्यत्र सत्यामप्यधोधारणेनैकवाक्यताप्रतीतौ विधीयत एवोपरिधारणमपूर्वत्वात् । तथा चोक्तं

परामर्शमुपेत्यानुष्ठेयत्वमुक्तमिदानीं विधिरेवायमित्याह—विधिर्वेति । प्रतिज्ञां विभजते—विधिरिति । स्मृत्याचारयोराश्रमचतुष्टयनिविष्टयोर्भ्रान्तित्वायोगान्मूलकल्पनायां विधियुक्तवाक्यकल्पनाल्घीयस्त्वय इत्यादिष्वाश्रमविधिकल्पनमिति भावः । अल्पफलत्वेनाऽऽश्रमत्रयनिन्दया ब्रह्मसंस्थतास्तुतेरेकवाक्यत्वनिश्चयात्तद्भङ्गेनात्राऽऽश्रमविधिकल्पनमयुक्तमिति शङ्कते—नन्विति । एकवाक्यताधीरेव कथं तत्राऽऽह—प्रतीयते चेति । एकवाक्यत्वसंभवे तद्भेदो न युक्तिमानित्यङ्गी करोति—सत्यमिति । आश्रमाणां पूर्वसिद्धेरभावात्तत्परामर्शेन स्तुतेरयोगादेकवाक्यतैवात्रायुक्तेत्याह—सतीमिति । किंच विधियुक्तवाक्यान्तरकल्पनायामाश्रमान्तराणां विहितत्वोपगमप्रसक्त्या स्वपक्षहानात्तत्कल्पनादिहैवाभीष्टे वाक्ये विधिमात्रकल्पना युक्तेत्याह—विध्यन्तरस्येति । किंच मुख्यमाश्रमान्तरप्रत्ययं त्यक्त्वा स्तुतिलक्षणयैकवाक्यत्वकल्पनायोगाद्वाक्यभेदेन विधिरेवायमित्याह—विस्पष्टाच्चेति । एकवाक्यताज्ञानेऽपि तत्त्यागेनापूर्वार्थविधौ दृष्टान्तमाह—धारणवदिति । महापितृयज्ञे दिष्टंगताग्निहोत्रे च श्रुतं वाक्यमुदाहरति—अधस्तादिति । उदाहरणव्याख्योपयोगित्वेन वाक्यस्याभीष्टमर्थमाह—अत्रेति । प्रकृते कर्मविशेषे स्रुचि प्रक्षिप्तं हविराहवनीयं प्रति यदा नीयते तदा पित्र्ये होमे तस्य हविषोऽधस्तात्समिधं धारयन्ननुद्रवेदित्यधोधारणस्य विहितत्वादुपरि हीतितच्छेषानुवादतया तदेकवाक्यत्वासिद्धौ[6]वुपरिष्टात्समिद्धारणस्यापूर्वत्वाद्दैवे होमे वाक्यभेदं कृत्वा तद्विधीयत इत्यर्थः । उक्तेऽर्थे तार्तीयं सूत्रमुदाहरति—तथेति । उपरि हि देवेभ्यो धारयतीत्य-

---

१ ड. अ. °त्वप्रयो° । २ ड. अ °तीमपीति । ३ ड. अ. °गमाप्र° । ४ ड. अ. °क्षणैक° । ५ क. ड. अ. °त्यत्राधो° । ६ क. ख. ड. अ. °द्धावप्युप° ।

(ऊर्ध्वरेतोरूपाश्रमाणामास्तित्वं लोककामिनामाश्रमिणां ब्रह्मनिष्ठानर्हत्वं च, अधि० २)

शेषलक्षणे " विधिस्तु धारणेऽपूर्वत्वात् " [जै० सू० ३-४-१९] इति, तद्वदिहाप्याश्रमपरामर्शश्रुतिर्विधिरेवेति कल्प्यते । यदाऽपि परामर्श एवायमाश्रमान्तराणां तदाऽपि ब्रह्मसंस्थता तावत्संस्तवसामर्थ्यादवश्यविधेयाऽभ्युपगन्तव्या । सा च किं चतुर्ष्वाश्रमेषु यस्य कस्यचिदाहोस्वित्परिव्राजकस्यैवेति विवेक्तव्यम् । यदि च ब्रह्मचर्यान्तेष्वाश्रमेषु परामृश्यमानेषु परिव्राजकोऽपि परामृष्टस्तत्रश्चतुर्णामप्याश्रमाणां परामृष्टत्वाविशेषादनाश्रमित्वानुपपत्तेश्च यः कश्चिच्चतुर्ष्वाश्रमेषु ब्रह्मसंस्थो भविष्यति । अथ न परामृष्टस्ततः परिशिष्यमाणः परिव्राडेव ब्रह्मसंस्थ इति सेत्स्यति । तत्र तपःशब्देन वैखानस-

---

त्रोपरिधारणं विधीयते न वेति संदेहे धारयतीतिवर्तमानोपदेशादुपरि हीति हिशब्दश्रुतेश्चोपरि समिधः प्राप्तेर्हविषश्चाभ्यर्हितद्रव्यत्वेन येन केनाऽऽच्छादनप्राप्तौ स्रुग्दण्डे समिधमुपसंगृह्यानुद्रवेतीतिवाक्यान्तरप्राप्तसमित्रियमनादृयमनुवादो न विधिरिति प्राप्ते स्रुग्दण्डे समिधमुपसंगृह्येति हविषः प्राग्देशे समिद्धारणस्य प्राप्तत्वेऽपि तस्मादुपरि तद्धारणस्याप्राप्तेर्भङ्क्त्वा हिशब्दं पञ्चमलकारेण विधिरेवायमित्याह—विधिस्त्विति । दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह—तद्वदिति । परामर्शपक्षमेवावलम्ब्याऽऽश्रमाणां परामर्शेऽपि पारिव्राज्यस्य विधिरेष्टव्योऽन्यथा स्तुत्ययोगादित्याह—यदेति । ब्रह्मसंस्थतोया यत्स्तूयते तद्विधीयत इति न्यायाद्विधेयत्वेऽपि पारिव्राज्यस्य किं स्यादित्याशङ्क्य तदर्थं विचारमवतारयति—सा चेति । पक्षद्वयस्य निर्बीजत्वान्नेदं विचार्यमित्याशङ्क्य परामर्शश्रुतौ परिव्राजकोऽपि परामृष्टो न वेति विकल्प्याऽऽद्यमनूद्य प्रथमपक्षप्राप्तिमाह—यदीति । परामृष्टत्वाविशेषाच्चतुर्ष्वाश्रमेषु यः कश्चिद्ब्रह्मसंस्थो भविष्यतीति संबन्धः । ब्रह्मसंस्थोऽनाश्रमी कस्मान्न स्यादित्याशङ्क्यानाश्रमित्वस्य निन्द्यमानत्वादित्याह—अनाश्रमित्वेति । द्वितीयमनूद्य द्वितीयपक्षप्राप्तिमाह—अथेति । पक्षयोः संभावनया विचारारम्भमुक्त्वा पूर्वपक्षमाह—तत्रेति । परिव्राजकस्यापि यमानियमादितपःसंभवादित्यर्थः । आश्रमाणामेकैकशोऽसाधारणधर्म-

---

१ क. ज. झ. ट. 'वश्यं वि' । २ अ. ट. 'ह्मचार्या' । ३ क. ठ ड. 'मानाप' । झ. 'मानादुप' । ४ ठ. ड. 'नुवदती' । ५ ठ. ढ. 'वन्तीति' । ६ ड. अ. 'दनु' । ७ ड. अ. 'रदेशस' । ८ झ. 'क्ष एवा' । ९ ड. अ. 'ता यावत्स्तू' । १० ड. अ. विचार्यश्रुतौ । ११ ड. अ. 'क्षव्याप्ति' । १२ क. ड. अ. 'च्च चतु' । १३ ड. अ. 'द्य तत्पक्षव्याप्ति' ।

(ऊर्ध्वरेतोरूपाश्रमाणामस्तित्वं लोककामिनामाश्रमिणां ब्रह्मनिष्ठानर्हत्वं च, आधि० २)

ग्राहिणा परामृष्टः परिव्राडपीति केचित्। तदयुक्तम्। न हि सत्यां गतौ वानप्रस्थविशेषणेन परिव्राजको ग्रहणमर्हति। यथाऽत्र ब्रह्मचारिगृहमेधिनावसाधारणेनैव स्वेन स्वेन विशेषणेन[२] विशेषितावेवं भिक्षुवैखानसावपीति युक्तम्। तपश्चासाधारणो धर्मो वानप्रस्थानां कायक्लेशप्रधानत्वात्। तपःशब्दस्य तत्र रूढेः। भिक्षोस्तु धर्म इन्द्रियसंयमादि[3]लक्षणो नैव तपःशब्देनाभिलप्येत। चतुष्टेन च प्रसिद्धा आश्रमास्त्रित्वेन परामृश्यन्त इत्यन्याय्यम्। अपि च भेदव्यपदेशोऽत्र भवति त्रय एते पुण्यलोकभाज एकोऽमृतत्वभागिति। पृथक्त्वे चैं भेदव्यपदेशोऽवकल्पते। न ह्येवं भवति देवदत्तयज्ञदत्तौ मन्दप्रज्ञावन्यतरस्त्वनयोर्महाप्रज्ञ इति। भवति त्वेवं देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ विष्णुमित्रस्तु महाप्रज्ञ इति। तस्मात्पूर्वे त्रय आश्रमिणः पुण्यलोकभाजः परिशिष्यमाणः परिव्राँडमृतत्वभाक्।

---

[५]रूपदर्शनायोपक्रमात्तदनुसारेण चोपसंहारस्य युक्तत्वात्तपःशब्देन नोभयग्रहणमिति दूषयति—तादिति। किं तर्हि युक्तं तदाह—यथेति। कस्तर्हि तपःशब्दार्थस्तत्राऽऽह—तपश्चेति। तेषां तत्प्रधानत्वेऽपि तपःशब्दस्य साधारण्यं किं न स्यात्तत्राऽऽह—तपःशब्दस्येति। तस्य कृच्छ्रादौ[१०] रूढेरन्यत्र तदभावात्तेन वानप्रस्थ एव परामृश्यत इत्यर्थः। कथं तर्हि परिव्राजकधर्मेऽपि तपःशब्दप्रयोगस्तत्राऽऽह—भिक्षोस्त्विति। इतश्च पूर्वं परिव्राजको नोक्त इत्याह—चतुष्टेनेति। न हि प्रसिद्धसंख्याभेदेषु संख्यान्तरोक्तिर्युक्तेत्यर्थः। पृथगुक्तिसामर्थ्यादपि प्रकृताश्रमत्रयातिरिक्तो ब्रह्मसंस्थ इत्याह—अपि चेति। भेदव्यपदेशेऽपि कथं पृथक्त्वं तत्राऽऽह—पृथक्त्वे चेति। सर्व एते पुण्यलोका इत्यत्र भिक्षुरपि परामृष्टश्चेत्तस्याब्रह्मसंस्थत्वाभावादमृतत्वमेवेति न पुण्यलोकत्वं विरोधात्। न च तपःशब्देन भिक्षोरपि ग्रहे तद्वर्जनं युक्तमेत इति प्रकृतानां कात्स्न्र्येन परामर्शात्। तस्माद्भेदोक्त्या पृथक्त्वमेवेत्यर्थः। अपृथक्त्वे भेदोक्तिरयुक्तेत्यत्र दृष्टान्तमाह—न हीति। पृथक्त्वे तु तदुक्तिर्युक्तेत्याह—भवतीति। न चावस्थाभेदापेक्षया दृष्टान्तदार्ष्टान्तिकयोः सिद्धिरपृथक्त्वेऽपीति[१२] वाच्यम्। सति कर्मित्वे मन्दप्रज्ञत्वे च ब्रह्मसंस्थताया महाप्रज्ञत्वस्य चायोगात्पृथक्त्वध्रौव्यादिति मत्वोपसंहरति—तस्मादिति।

---

१ ट. °था तु ब्रं°। २ ज. °णेनैवं। ३ ज. °दिर्लक्षं°। ४ ज क्षणयैव। ट °क्षणायैव। ५ ट. °रामर्श्यन्त। ६ क. घ. ङ. ज. ञ. ट. च व्यं°। ७ ङ. °व्राडेवामृं°। ८ क. ख ङ. ञ. °क्रमस्तदं°। ९ क. ङ. ञ. °रेणोपं°। १० ङ. ञ. °दौ रुचेरं°। ११ ङ. ञ. °त्तस्य ब्रं°। १२ क. ङ. ञ. °क्त्वेऽपि वा°।

(ऊर्ध्वरेतोरूपाश्रमाणामस्तित्वं लोककामिनामाश्रमिणां ब्रह्मनिष्ठानर्हत्वं च, अधि० २)

कथं पुनर्ब्रह्मसंस्थशब्दो योगात्प्रवर्तमानः सर्वत्र संभवन्परिव्राजक एवावतिष्ठेत । रूढ्यभ्युपगमे चाऽऽश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसङ्ग इति । अत्रोच्यते—ब्रह्मसंस्थ इति हि ब्रह्मणि परिसमाप्तिरनन्यव्यापारतारूपं तन्निष्ठत्वमभिधीयते । तच्च त्रयाणामाश्रमाणां न संभवति । स्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात् । परिव्राजकस्य तु सर्वकर्मसंन्यासात्प्रत्यवायो न संभवत्यननुष्ठाननिमित्तः । शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थतायाः उपोद्बलको न विरोधी ब्रह्मनिष्ठत्वमेव हि तस्य शमाद्युपबृंहितं स्वाश्रमविहितं कर्म यज्ञादीनि चेतरेषां तद्व्यतिक्रमे च तस्य प्रत्यवायः । तथा च " न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा । तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत् " [तै० आर० १०-६२]

किमेष ब्रह्मसंस्थशब्दो यौगिको रूढो वेति विकल्प्याऽऽद्ये न परिव्राजकमात्रविषयतेति शङ्कते—कथमिति । द्वितीयं निराह—रूढीति । यौगिकत्वमुपेत्य परिहरति—अत्रेति । यथोक्तं ब्रह्मसंस्थत्वमन्येषामपि सिध्यतीत्याशङ्क्याऽऽह—तच्चेति । तुल्यं संन्यासिनोऽपि स्वाश्रमकर्माननुष्ठाने प्रत्यवायित्वं तत्कृतोऽस्य ब्रह्मसंस्थत्वं तत्राऽऽह—परिव्राजकस्येति । तस्यापि शमदमाद्यनुष्ठेयमिति कुतो ब्रह्मसंस्थतेत्याशङ्क्याऽऽह—शमेति । तत्र हेतुः—ब्रह्मेति । शमादेर्ब्रह्मसंस्थताङ्गत्वान्न तद्विरोधितेत्यर्थः । गृहस्थादीनामपि ब्रह्मसंस्थितत्वाविरोध्येव स्वाश्रमविहितं कर्मेत्याशङ्क्याऽऽह—यज्ञेति । तानि हि रागाद्याक्षिप्तानि न च रागादिमतां ब्रह्मसंस्थतेति भावः । शमदमाद्युपेतं ब्रह्मनिष्ठत्वमेव संन्यासिनः स्वाश्रमकर्मेत्युक्तं तदकरणे तस्य प्रत्यवायित्वं त्वंपदार्थविवेकायैवेति स्मृतेरित्याह—तदिति । चकारादितरेषामपि तत्तदाश्रमकर्मातिक्रमे प्रत्यवायित्वमकुर्वन्विहितं कर्मेत्यादिस्मृतिरपि सूच्यते । संन्यासिनः सर्वकर्मत्यागेन ब्रह्मसंस्थत्वमेव स्वाश्रमकर्मेत्यत्र मानमाह—तथा चेति । न्यासः संन्यासो ब्रह्मेति स्तूयते । तत्र हेतुमाह—ब्रह्मा हीति । हिरण्यगर्भो हि श्रुतिस्मृतिषु परोऽभीष्टस्तथाऽपि कथं संन्यासस्तदात्मकस्तत्राऽऽह—परो हीति । तस्य परत्वे हेतुः—ब्रह्मेति । तद्धीहेतुत्वात्परो यस्मादेष संन्यासस्तस्माद्ब्रह्मेत्यर्थः । तस्य परत्वं स्फोरयति—तानीति । पूर्वोक्तानि सैत्यादीनि प्रसिद्धानि तानि ज्ञानहीनान्यवराण्येतानि तपांसि

---

१ ङ. °ति ब्रं° । २ ट. °संस्थाया । ३ क. ङ. ज. ञ. ट. शमदमा° । ४ ङ. ञ. °ज्ञादि चे° । ५ झ. °थोक्तब्रं° । ६ ङ ञ. °पि तस्याऽऽश्रं° । ७ क. ख. ङ. ञ. ठ. ड. °संस्थत्वा° । ८ ठ. ड. °स्मृतेरिति सू° । ९ ङ. ञ. ठ. ड. °स्तदाह । १० ठ. ड. संन्यासादीनि ।

(ऊर्ध्वरेतोरूपाश्रमाणामस्तित्वं लोककामिनामाश्रमिणां ब्रह्मनिष्ठानर्हत्वं च, अधि० २)

" वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्त्वाः "
[मुण्ड० ३-२-६ तै० आर० १०-१०-६ कैवल्य० ३]

इत्याद्याः श्रुतयः। स्मृतयश्च—

" तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः "
[भ० गी० ५-१७] इत्याद्या ब्रह्मसंस्थस्य कर्माभावं दर्शयन्ति। तस्मात्परिव्राजकस्याऽऽश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसङ्ग इत्येषोऽपि दोषो नावतरति। तदेवं परामर्शेऽपीतरेषामाश्रमाणां पारिव्राज्यं तावद्ब्रह्मसंस्थतालक्षणं लभ्येतैव। अनपेक्ष्यैव जाबालश्रुतिमाश्रमान्तरविधायिनीमयमाचार्येण विचारः प्रवर्तितः। विद्यत एव त्वाश्रमान्तरविधिश्रुतिः प्रत्यक्षा। " ब्रह्मचर्यं समाप्य गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेत्। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा " [जाबा०

निकृष्टत्वहेतुत्वान्न्यास एवैभ्योऽतिरिक्तः श्रेष्ठो ब्रह्मसंस्थताद्वाराऽमृतत्वहेतुत्वादित्यर्थः। तस्य कर्मान्तराभावे वाक्यान्तरमाह—**वेदान्तेति**। शुद्धबुद्धयो विरक्ताः संन्यासयोगाद्वेदान्तविज्ञानेन सुनिश्चितार्था मुच्यन्त इति वचनात्कर्मान्तराभावः संन्यासिनां भातीत्यर्थः। न कर्मणा न प्रजयेत्याद्या भूयस्यः श्रुतयोऽत्र सन्तीति वक्तुमादिपदम्। तस्मिन्ब्रह्मणि बुद्धिर्मनो येषां ते तथा तदेव ब्रह्माऽऽत्मा स्वरूपं येषां ते तदात्मानः। तत्रैव निश्चयेन स्थितिमाह—**तन्निष्ठा इति**। विषयान्तरपारवश्यं व्यावर्तयति—**तदिति**। यथोक्तान्यपि कर्माणि परिहायेत्यादिस्मृतिसंग्रहार्थमादिपदम्। उक्तश्रुतिस्मृतितात्पर्यमाह—**ब्रह्मेति**। ब्रह्मसंस्थशब्दस्य परिव्राजके रूढिमुपेत्योपसंहरति—**तस्मादिति**। यथा गृहस्थशब्दस्य यौगिकत्वे सत्यतिप्रसङ्गपरिहारायाऽऽश्रमविशेषे रूढत्वेऽपि न गार्हस्थ्यमात्रात्पुण्यलोकाप्तिः। किंतु यथोक्ताग्निहोत्रादिकरणात्। तथा पारिव्राजकस्यापि ब्रह्मसंस्थस्य वाक्यार्थसाक्षात्कारद्वारैव मुख्यममृतत्वमिति कुतो ज्ञानानर्थक्यमित्यर्थः। एवमेकदेशिमतं प्रत्याख्याय ब्रह्मसंस्थशब्दस्य परिव्राजकविषयत्वे स्थिते संस्तवसामर्थ्याद्ब्रह्मसंस्थत्वं पारिव्राज्यमितरपरामर्शेऽपि विधेयमिति परमप्रकृतमुपसंहरति—**तदेवमिति**। शिष्यबुद्धिविकासार्थं परामर्शश्रुतिमाश्रित्य कृत्वाचिन्तया विचारं कृत्वा कृत्वाचिन्तामुद्घाटयति—**अनपेक्ष्येति**। यदि वेतरथेति ब्रह्मचर्ये स्थितस्यैव पारिव्राज्येच्छा गार्हस्थ्ये च वैराग्यं दैवयोगाद्यदि स्यादित्यर्थः। यत्त्वनधिकृता-

---

१ ङ. ञ. लभ्यत एव। ट. लभेतैं। २ क. ङ. ञ. °रपरामृश्यं। ३ ङ. ञ. °लोकप्राप्तिः। ४ ङ. ञ. °द्वारेणैव। ५ ठ. ड. °मुद्धारय°।

४] इति। न चेयं श्रुतिरनधिकृतविषया शक्या वक्तुम् । अविशेषश्रवणात् । पृथग्विधानाच्चानधिकृतानाम् " अथ पुनरेव व्रती वाऽव्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा " [जाबा० ४] इत्यादिना । ब्रह्मज्ञानपरिपाकाङ्गत्वाच्च पारिव्राज्यस्य नानधिकृतविषयत्वम् । तच्च दर्शयति—"अथ पारिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति " [जाबा० ५] इति । तस्मात्सिद्धा ऊर्ध्वरेतसामाश्रमाः। सिद्धं चोर्ध्वरेतःसु विधानाद्विद्यायाः स्वातन्त्र्यमिति ॥२०॥(२)

(उद्गीथावयवस्योंकारस्य ध्येयत्वम्, अधि० ३)

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

" स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः " [छा० १-१-३] " इयमेवर्गग्निः साम " [छा० १-६ १]

न्धादिविषयः संन्यासः स्यादिति तत्राऽऽह—**न चेति** । अविशेषश्रुतिरसति बाधके न विशेषे संकोचमर्हतीत्यर्थः । इतश्चेदं वाक्यं नानधिकृतविषयमित्याह—**पृथगिति** । अनधिकृतानां संन्यासस्येति शेषः । व्रती गोदानादिवेदव्रतवान् । अव्रती तद्विपरीतः । स्नातको गुरुकुलनिवृत्तिरूपस्नानानन्तरमपि गुरुशुश्रूषापरः । तद्विपरीतोऽस्नातकः । उत्सन्नाग्निर्मृतभार्यः पूर्वमेवाग्निपरिग्रहरहितो वा । पारिव्रज्येदिति कर्माधिकारप्रतिपत्तिहीनानामपि संन्यासस्य पृथगुक्तेर्न वाक्यमनधिकृतविषयमित्यर्थः । संन्यासविधेरनधिकृताविषयत्वे हेत्वन्तरमाह—**ब्रह्मेति** । श्रवणादिद्वारा संन्यासस्य ब्रह्मज्ञानदार्ढ्यार्थित्वं प्रकरणादिसिद्धं तेन समर्थस्यैवाधिकारस्तस्मिन्नित्यर्थः । पारिव्राज्यस्य ब्रह्मधीदार्ढ्यार्थित्वे श्रुतिं प्रमाणयति—**तच्चेति** । ब्रह्मभूयार्थं ब्रह्मभावाय तत्साक्षात्कारायेत्यर्थः । अन्तर्गर्भिताधिकरणार्थमुपसंहरति—**तस्मादिति** । प्रामाणिकत्वं तच्छब्दार्थः । तेषां प्रमितत्वेनानुष्ठीयमानत्वेऽपि प्रकृते किं जातमित्याशङ्क्य प्रथमाधिकरणार्थं निगमयति—**सिद्धं चेति** ॥ २० ॥ (२)

अनुष्ठेयसाम्यश्रुतेराश्रमान्तरमनुष्ठयतयो विधेयमित्युक्तम् । संप्रति रसतमत्वादीनामङ्गाश्रितत्वेनेयमेव जुहूरित्यादिश्रुतितुल्यतया स्तुत्यर्थत्वमित्याशङ्क्य प्रत्याह—**स्तुतीति** । अधिकरणस्य विषयं वदन्वाक्यानि पठति—**स इति** । एषां भूतानां पृथिवी रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुरुषः पुरुषस्य वाग्वाच ऋगृचः

---

१ क. घ. ट. 'नरव्रती व्रती वा स्ना' । २ क. ङ. ज. ञ. ट. 'तस आश्र' । ३ क. ख. ङ. ञ. ठ. ड. 'शेषसं' । ४ क ख. ङ. ञ 'रूपः स्ना' । ङ. 'रूपं स्ना' । ५ ख. ठ. ड. 'सस्य वि' । ६ ङ. ञ. 'य त' । ७ ङ ञ 'त्वेऽपि । ८ क. ख ङ ञ. ठ. ड. 'दिस्तुति' ।

(उद्गीथावयवस्योंकारस्य ध्येयत्वम्, अधि० ३)

" अयं वाव लोक एषोऽग्निश्चितः " [शत० १०-५-४ १] । " तदिदमेवोक्थमियमेव पृथिवी " [ऐ० आर० २-१-२-१] इत्येवंजातीयकाः श्रुतयः किमुद्गीथादेः स्तुत्यर्था आहोस्विदुपासनाविध्यर्था इत्यस्मिन्संशये स्तुत्यर्था इति युक्तम् । उद्गीथादीनि कर्माङ्गान्युपादाय श्रवणात् । यथा " इयमेवैं जुहूः " " आदित्यः कूर्मः " " स्वर्गो लोक आहवनीयः " इत्याद्या जुह्वादिस्तुत्यर्थास्तद्वदिति चेत् । नेत्याह । नैं हि स्तुतिमात्रमासां श्रुतीनां प्रयोजनं युक्तम् " पूर्वत्वात् " । विध्यर्थतायां ह्यपूर्वोऽर्थो विहितो भवति स्तुत्यर्थतायां त्वानर्थक्यमेव स्यात् । विधायकस्य हि शब्दस्य वाक्यशेषभावं प्रतिपद्यमाना स्तुतिरुपयु-

---

साम साम्न उद्गीथो रस इत्युपक्रम्य श्रूयते स एष रैसानां पृथिव्यादीनां सामान्यानां भूतेषूत्तरोत्तरं सारत्वेनोक्तानामतिशयेन सारो रसतमः परमः परमात्मप्रतीकत्वात्परस्य ब्रह्मणोऽर्घं स्थानं तदर्हतीति परार्ध्यः परब्रह्मवदुपास्य इत्यर्थः । पृथिव्याद्यपेक्षयाऽष्टमः कोऽसौ यदुद्गीथो य उद्गीथ ओंकार इत्यर्थः । उद्गीथाद्यङ्गाववद्धश्रुतीरधिकृत्य पर्णमयीत्वादावङ्गसंबन्धे विध्युपलब्धेस्तथाविधेऽपि स्वर्गो लोक इत्यादौ स्तुत्युपलब्धेश्च संशयमाह—**किमिति** । अङ्गाववद्धानामपि बुद्धीनां स्तुतित्वाभावाद्विधेयतया स्वातन्त्र्येण पुरुषार्थहेतुत्वे सत्यनङ्गात्माधियः स्वतन्त्रतया फलवत्त्वमुपनिषदुत्पन्नायाः किं वक्तव्यमित्युक्तेरत्र पादादिसंगतिः । पूर्वपक्षे स्तुतित्वादङ्गधीष्वनुष्ठानासिद्धिः । सिद्धान्ते तासां विधेयत्वात्तत्सिद्धिरित्यङ्गीकृत्य संशयमनूद्य पूर्वपक्षयति—**इत्यस्मिन्निति** । विमताः प्रत्ययाः स्तुतयः कर्माङ्गेषूत्कृष्टपदार्थाध्यासप्रत्ययरूपत्वात्स्वर्गो लोक आहवनीय इत्यादिप्रत्ययवदित्यर्थः । जुहूरियमेव पृथिवीति स्तूयते कूर्मश्चयनगतः सन्नादित्य इत्याहवनीयोऽग्निः स्वर्गो लोक इतिवत्स्तुतिरेवेत्यर्थः । स्तुतिकल्पनाद्विधिकल्पनमेव युक्तमनुष्ठानफलाभावादिति परिहरति—**नेत्यादिना** । विमताः प्रत्यया न कर्माङ्गस्तुतयोऽपूर्वार्थत्वात्कर्त्वन्तरवदित्याह—**नेति** । विमता धियो न कर्माङ्गस्तुतयो विशिष्टफलसंबोधित्वात्संमतवदित्याह—**विधीति** । वायुर्वै क्षेपिष्ठेत्यादिवदुद्गीथादिश्रुतीनां स्तुत्यर्थत्वेऽपि कस्मादर्थवत्त्वं न स्यादित्याशङ्क्याऽऽह—**विधायकस्येति** । अस्तु तर्हि विधायकशब्दशेषत्वेनैवोद्गीथादिश्रुतीनामपि स्तावकतयाऽर्थवादत्वं तत्र वाच्यम् । किमुद्गीथादिप्रत्ययैरुद्गीथादिविधिः स्तूयते किंवा तदुपास्तिविधिरिति विक-

---

१ ङ. ञ. 'थादिस्तु । २ क. ङ. ज. ञ. ट. 'सनवि' । ३ ङ. ञ. 'व पृथिवी जु' । ४ ङ. ञ. स्वर्लोक' । ५ क. ङ. ज. ञ. ट. न स्तु' । ६ ङ. ञ. 'पूर्वार्थो । ७ झ. 'तिविद्य' । ८ क. ख. रसादीनां । ९ क ख. ङ. ञ. ठ. ड. 'त्तरसा' । १० ङ. ञ. 'शयत्वेन । ११ ङ. ञ. 'त्यमनं' । १२ ठ. ड. 'यत्वा' । १३ झ. 'श्च जलग' । १४ क. ख. ङ. ञ ठ. स्वर्गलो' । १५ ठ. ड. 'बन्धात्सं'

ज्यत इत्युक्तम्, " विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः " [जै० सू० १-२-७] इत्यत्र । प्रदेशान्तरविहितानां तूद्गीथादीनामियं प्रदेशान्तरपठिता स्तुतिर्वाक्यशेषभावमप्रतिपद्यमानाऽनर्थिकैव स्यात् । " इयमेव जुहूः " इत्यादि[1] तु विधिसंनिधावेवाऽऽम्नातमिति वैषम्यम् । तस्माद्विध्यर्था एवंजातीयकाः श्रुतयः ॥ २१ ॥

भावशब्दाच्च ॥ २२ ॥ (३)

" उद्गीथमुपासीत " [छा० १-१-१] " सामोपासीत " [छा० २-२-१] " अहमुक्थमस्मीति विद्यात् " [ऐ० आर० २-१-२-६] इत्यादयश्च विस्पष्टा विधिशब्दाः श्रूयन्ते ते च स्तुतिमात्रप्रयोजनतायां व्याहन्येरन् । तथा च न्यायविदां स्मरणम्—

" कुर्यात्क्रियेत कर्तव्यं भवेत्स्यादिति पञ्चमम् ।
एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम् "

ल्प्याऽऽद्यं दूषयति—प्रदेशान्तरेति । उद्गीथादिविधेः कर्मप्रकरणस्थत्वेन व्यवधानान्न तेनोद्गीथादिश्रुतीनामेकवाक्यता । विमता धियो न कर्माङ्गस्तुतयोऽतत्प्रकरणस्थत्वात्कत्वन्तरवदिति भावः । परोक्तं दृष्टान्तं विघटयति—इयमेवेति । अनुमानत्रयफलं निगमयति—तस्मादिति ॥ २१ ॥

न द्वितीय उपास्यविषयार्पणेन विध्यन्वययोगे लक्षणया स्तुत्यर्थत्वायोगादित्याह—भावेति । संनिहितविधेर्विषयार्पणेनार्थवत्त्वे रसतमादिवादानां संभवति तदीयस्तुतिपरत्वमपि तत्रायुक्तं स्तुत्यपेक्षया[2] विषयार्पणस्यान्तरङ्गत्वात् । तत्र कर्माङ्गस्तुतिपरत्वं नेति किमु वक्तव्यमिति मन्वानो व्याचष्टे—उद्गीथमिति । निमन्त्रणादिष्वपि लिङादिस्मरणात्कथमुपासीतेत्यादिशब्दस्य विधिपरतेत्याशङ्क्याऽऽह—तथा चेति । धातूनामनेकत्वेऽपि[3] "डुकृञ् करणे" " भू सत्तायाम् " " अस्भुवि " इति त्रीनेव धातून्भावनासामान्यवाचिनः सर्वव्याप्त्यर्थमुदाहरति—कुर्यादिति । आक्षिप्तकर्तृका भावना कुर्यादित्यैुक्ता सैवाऽऽक्षिप्तकर्मिका क्रियेतेत्युदाहृता । सैव कर्तव्यमिति धात्वर्थोपसर्जनभूताऽभिहितेति भेदैः । भवेदित्यत्रापि भूयेत भवितव्यमित्युदाहार्यम् । भवतेरस्तेश्चैकार्थ्येऽपि प्राप्त्याद्यर्थं भवतिं दृष्ट्वा पृथगस्तिमुदाहरति—स्यादितीति । यथापूर्वमुदाहरणमिहापि द्रष्टव्यम् । पाठक्रममनुसृत्य पञ्चममित्युक्तम् । एतद्धात्वनुगतप्रत्ययैः सर्वभावनानुगैतश्रेयःसाधनत्वरूपो विधिरुच्यते न तु प्रतिधार्तुप्रत्ययं च भावनाभेदोऽस्तीति मत्वाऽऽह—एतादिति । कथं तर्हि निमन्त्रणादिषु लिङादिस्मरणं मिथोविरोधादित्याश-

---

१ ट. 'दिषु वि' । २ ठ. ड. 'पेक्षाया । ३ झ. 'नेकार्थत्वेऽ' । ४ ङ. ञ. 'त्युक्त्वा सै' । ५ ङ. ञ. भावः । ६ ठ. ड. 'त्वर्थानु' । ७ ङ. ञ. 'गतः श्रे' । ८ ख. ङ. ञ ठ. ड. तु प्रतिप्र' ।

(औपनिषदाख्यानानां विद्यास्तावकत्वम्, अधि० ४)

इति लिङाद्यर्थो विधिरिति मन्यमानास्त एवं स्मरन्ति । प्रतिप्रकरणं च फलानि श्राव्यन्ते—"आपयिता ह वै कामानां भवति" [छा० १-१-७] "एष ह्येव कामागानस्येष्टे" [छा० १-७-९] "कल्पन्ते हास्मै लोका ऊर्ध्वाश्चाऽऽवृत्ताश्च" [छा० २-२-३] इत्यादीनि । तस्मादप्युपासनविधानार्था उद्गीथादिश्रुतयः ॥ २२ ॥ (३)

(औपनिषदाख्यानानां विद्यास्तावकत्वम्, अधि० ४)

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

"अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च" [बृ० ४-५-१] "प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम" [कौषी० ३-१] "जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस" [छा० ४-१-१] इत्येवमादिषु वेदान्तपठितेष्वाख्यानेषु संशयः—किमिमानि पारिप्लवप्रयोगार्थान्याहोस्वित्संनिहितविद्याप्रतिपत्त्यर्थानीति । "पारिप्लवार्था" इमा आख्यानश्रुतयः । आख्यान-

---

ङ्कयोत्सर्गतो वेदे विधिपरा लिङादयोऽपवादादन्यथात्वमित्यभिप्रेत्याऽऽह—**लिङादीति**। उद्गीथादिश्रुतीनां स्तुत्यर्थत्वाभावे हेत्वन्तरं चकारसूचितमाह—**प्रतीति** । फलभेदश्रवणमुपसंहरति—**तस्मादिति**। पूर्वोक्तापूर्वत्वादिसमुच्चयार्थमपीत्युक्तम् ॥२२॥ (३)

उद्गीथादिश्रुतेरुपास्तिविषयार्थकत्वं ज्यायो रसतमत्वादेरित्युक्तम् । अधुनाऽऽख्यानानामपि विद्यास्तुतेः सकाशात्पारिप्लवशेषत्वं ज्यायोऽनुष्ठानावसानयोगादित्याशङ्क्य परिहरति—**पारिप्लवेति** । विषयोक्तिपूर्वकमाख्यानत्वसाम्याद्विद्यासंनिधेश्च संशयमाह—**अथेत्यादिना** । पारिप्लवप्रयोगो नामाश्वमेधे पुत्रामात्यपरिवृताय राज्ञे पारिप्लवमाचक्षीतेत्यादिना नानाविधाख्यानकथनं विहितम् । अत्र चोपनिषद्गतास्वाख्यानानां तादर्थ्यनिरासेन तत्र तत्र संनिहितस्वतन्त्रपुरुषार्थहेतुविद्यार्थत्वसमर्थनात्पादादिसंगतिः । पूर्वपक्षे प्रयोगशेषत्वादाख्यानानां वेदान्तगतामामपि तद्भावाद्विद्याप्राधान्यासिद्धिः । सिद्धान्ते विशेषणादुपनिषदाख्यानानां व्यवच्छेदात्तेषामप्रयोगशेषत्वाद्विद्याप्रधानत्वसिद्धिरिति स्वीकृत्य पूर्वपक्षयति—**पारिप्लवेति** । गुरुशिष्यसमाचारप्रदर्शनेन बुद्धिसौकर्यद्वारा च विद्याशेषत्वं सामर्थ्यलिङादासां सिद्धमित्याशङ्क्य पारिप्लवश्रुतिविरोधे

---

१ ङ. ञ. 'इत्येवमादी' । २ क. ङ. ञ. 'वंवत्त्वादि' । ३ ठ. ड. दिस्तुते' । ४ क ख. ङ. ञ. 'दिनानावि' । ५ ङ. ञ 'विद्याख्या' । ६ ठ. ड. 'द्गतोपाख्या' । ७ झ. 'गविशे' । ८ ठ. ड. 'दान्तानां' । ९ ङ. ञ. 'कृते पू' । १० झ. 'मर्थ्य लि' । ११ ङ. ञ. 'लिङादौ संसि' ।

सामान्यात् । आख्यानप्रयोगस्य च पारिप्लवे चोदितत्वात् । ततश्च विद्याप्रधानत्वं वेदान्तानां न स्यात् । मन्त्रवत्प्रयोगशेषत्वादिति चेत् । तन्न । कस्मात् । "विशेषितत्वात्" । "पारिप्लवमाचक्षीत" इति हि प्रकृत्य "मनुर्वैवस्वतो राजा" [शत० १३-४-३-३] इत्येवमादीनि कानिचिदेवाऽऽख्यानानि तत्र विशेष्यन्ते । आख्यानसामान्याच्चेत्सर्वगृहीतिः स्यादनर्थकमेवेदं विशेषणं भवेत् । तस्मान्न पारिप्लवार्था एता आख्यानश्रुतयः ॥ २३ ॥

लिङ्गमप्रयोजकमित्याह—**आख्यानेति** । यस्याऽऽश्विने शस्यमाने सूर्योऽभ्युदियादपि सर्वा दाशतयीरनुब्रूयादिति सर्वासामृचामाश्विनग्रहशंसने[२] सर्वश्रुत्या विनियुक्तानामपि प्रातिस्विकविनियोगवदाख्यानानां पारिप्लवे पारिप्लवमाचक्षीतेति चोदितानामतेन[३] लिङ्गेन संनिधेर्वा विद्यायां विनियोगः स्यादित्याशङ्क्य प्रातिस्विकविनियोगस्य समुदायविनियोगस्य च श्रौतत्वेन तुल्यत्वात्प्रकृते च तदभावान्नैवमित्याह—**ततश्चेति** । आख्यानानां प्रयोगशेषत्वेऽपि सर्वेषां वेदान्तानामतच्छेषत्वाद्युक्तं[५] विद्याप्रधानत्वमित्याशङ्क्याऽऽह—**मन्त्रवदिति** । देवस्य त्वेत्यादिमन्त्रे कस्यचिदेव[५] पदस्य समवेतार्थतया प्रयोगशेषत्वे सिद्धे तदेकवाक्यतया पदान्तराणामपि तच्छेषत्वमिष्टम् । तथाऽऽख्यानानां प्रयोगशेषत्वे तदेकवाक्यत्वेन सर्वोपनिषदां तच्छेषत्वान्न विद्याप्रधानतेत्यर्थः । सामान्यश्रुतेर्विशेषोक्त्याऽतत्परत्वान्न तया लिङ्गादिबाधोऽस्तीति सिद्धान्तयति—**तन्नेत्यादिना** । अश्वमेधे प्रथमेऽहनि मनुर्वैवस्वतो राजेत्याह । द्वितीयेऽहनि यमो वैवस्वत इति । तृतीयेऽहनि वरुण आदित्य इत्याद्याख्यानविशेषा वाक्यशेषे[६] श्रुतास्तद्बलादुपक्रमस्य संकोचो युक्तः । न चोपक्रमस्थसर्वशब्दादुपसंहारेऽस्था[७] विशेषोक्तिरुपलक्षणार्थेति वाच्यम् । आदौ सर्वाण्याख्यानानि पारिप्लवे शंसतीत्युक्त्वा पारिप्लवमाचक्षीतेति च विधाय मनुर्वैवस्वत इत्यादि पठ्यते । तत्र पुनर्विधानं वाक्यशेषस्थाख्यानैर्[८]नियमार्थमन्यथा वैयर्थ्यात् । सर्वशब्दोऽपि वाक्यशेषस्थोपाख्यानमध्यस्थकतिपयप्रयोगमात्रेणोपरमं व्यावर्तयितुमित्यर्थवानिति मत्वा सिद्धान्तं विवृणोति—**पारिप्लवमिति** । यत्त्वाख्यानसामान्यात्पारिप्लवार्था इमाः श्रुतय इति तत्राऽऽह—**आख्यानेति** । विशेषणफलं निगमयति—**तस्मादिति** ॥ २३ ॥

---

१ ङ. ञ. °चामस्मिन्ग्रह° । २ ङ. ञ. °ने पूर्वं° । ३ ख. ठ. ड. °मेव लिं° । ४ ङ. ञ. °गसिद्धत्वेऽ° । ५ ङ. ञ. °च्चिदेव । ६ झ. ड. 'शेषश्रु° । ७ क. ख. ङ. ञ. ठ. ड. °रस्यवि° । ८ ङ. ञ. °नमन्य° ।

(आत्मबोधस्य कर्मानपेक्षत्वम्, अधि० ५)

तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥ (४)

असति च पारिप्लवार्थत्व आख्यानानां संनिहितविद्याप्रतिपादनोपयोगितैव न्याय्या । " एकवाक्यतोपबन्धात् " । तथा हि तत्र तत्र संनिहिताभिर्विद्याभिरेकवाक्यता दृश्यते प्ररोचनोपयोगात्प्रतिपत्तिसौकर्योपयोगाच्च । मैत्रेयीब्राह्मणे तावत्–"आत्मा वा अरे द्रष्टव्यः " [बृ० २-४-५] इत्याद्यया विद्ययैकवाक्यता दृश्यते प्रातर्दनेऽपि " प्राणोऽस्मि प्रज्ञात्मा " [कौ० ३-२] इत्याद्यया जानश्रुतिरित्यत्रापि " वायुर्वाव संवर्गः "[छा० ४-३-१] इत्याद्यया । यथा "स आत्मनो वपामुदखिदत्" [तै० सं० २-१-१-४] इत्येवमादीनां कर्मश्रुतिगतानामाख्यानानां संनिहितविधिस्तुत्यर्थता तद्वत् । तस्मान्न पारिप्लवार्थत्वम् ॥ २४ ॥(४)

(आत्मबोधस्य कर्मानपेक्षत्वम्, अधि० ५)

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥(५)

" पुरुषार्थोऽतः शब्दात् " [ब्र० सू० ३-४-१] इत्ये-

तर्हि कुत्राऽऽख्यानान्युपयुक्तानीत्याशङ्क्य विशेषणश्रुत्या सर्वश्रुतौ भग्नायां निर्बाधः संनिधिर्विद्यास्वेवोपनिषदाख्यानानि[2] नियुञ्जीतेत्याह—**तथा चेति** । सूत्रार्थं विवृणोति—**असतीति** । एकवाक्यतोपसंबन्धं विभजते—**तथा हीति** । प्ररोचनमनुरागजननम् । संनिहितविद्याभि[3]राख्यानानामेकवाक्यताप्रतीतिमुदाहरति—**मैत्रेयीति** । आख्यानत्वेऽपि पारिप्लवार्थत्वादर्शनाच्च न तादर्थ्यं प्रकृताख्यानानामित्याह—**यथेति** । उदखिदद्धृतवान्होमायेति यावत् । श्रुतिलिङ्गसंनिधिभिर्विद्यार्थत्वे सिद्धे फलितमुपसंहरति—**तस्मादिति** ॥ २४ ॥ (४)

कथानां विद्याशेषत्वे दर्शिते कर्मणामपि तर्हि तच्छेषत्वं तच्छेषत्वाभावेऽपि स्यादित्याशङ्क्य प्रसङ्गागतं विचारं परिसमाप्य पुरुषार्थाधिकरणस्य फलमाह—**अत इति** । ब्रह्मविद्या मोक्षे कर्माणीतिकर्तव्यत्वेनापेक्षते न वेति वादिविप्रतिपत्तेः संदेहे यज्ञेनेति विविदिषायां विनियुक्तयज्ञादीनां विषयसौन्दर्यलभ्यायां तस्यामनन्वयात्तद्विषयज्ञानसाध्यमोक्षान्वयस्य युक्तत्वादपेक्षत इति पूर्वपक्षे काष्ठैः पचतीत्यत्र पाकसाधनज्वालाजनककाष्ठानां पाकहेतुत्वदर्शनाज्ज्ञानेच्छाजनकान्तःकरणशुद्धिहेतुत्वेन यज्ञादीनां ज्ञानेच्छाहेतुत्वसिद्धेः साक्षादेव मोक्षान्वये च यज्ञेनेत्यादिकरणविभक्तिभङ्गात्पारम्पर्यस्यैवोपेयत्वान्नापेक्षत इति सिद्धान्तः । एतदभिप्रेत्य संनिहितस्यातःशब्दपरामर्शयोग्यस्याभावादतःपदानुपपत्तिमाशङ्क्य सूत्राक्षराणि योजयति—**पुरुषार्थ इति** ।

---

१ ङ. अ. °बन्धनात्। २ख. ङ. ञ. ठ. ड. °नि विनि°। ३ ङ. ञ. °हिताभिर्विद्या°। ४ठ. ड. °क्तिसङ्गा°।

तद्व्यवहितमपि संभवादत इति परामृश्यते । " अत एव च" विद्यायाः पुरुषार्थहेतुत्वादग्नीन्धनादीन्याश्रमकर्माणि विद्यायाः स्वार्थसिद्धौ नापेक्षितव्यानीत्याद्यस्यैवाधिकरणस्य फलमुपसंहरत्यधिकविवक्षया ॥ २५ ॥ (५)

(विद्यायाः स्वोत्पत्तौ कर्मसापेक्षत्वम्, अधि०६)

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

इदमिदानीं चिन्त्यते—किं विद्याया अत्यन्तमेवानपेक्षाऽऽश्रमकर्मणामुतास्ति काचिदपेक्षेति । तत्रात एवाग्नीन्धनादीन्याश्र-

---

आद्याधिकरणे यथा विद्यायाः स्वातन्त्र्येण पुमर्थहेतुत्वमुक्तं तच्च तथैवानूद्यते । तथा चाऽऽग्नेयादिष्वदर्शनान्न पुरुषार्थहेतुत्वं कर्मापेक्षाविरोधीति निरस्तम् । न चात्र पादादिसंगतिर्वक्तव्या प्रथमाधिकरणस्यैव तत्फलविषयस्यास्य तस्याः सुगमत्वात्फलमपि पूर्वोत्तरपक्षयोस्तद्वदेवेत्यभिप्रेत्याऽऽह—आद्यस्येति । स्वार्थसिद्धावेवानपेक्षा न तु स्वसिद्धौ तत्र तदपेक्षाऽस्तीत्यनन्तराधिकरणे निर्देष्टुमुपसंहार इति तत्फलमाह—अधिकेति ॥ २५ ॥ (५)

ब्रह्मविद्या स्वफले न कर्मापेक्षा प्रमात्वात्संमतवादित्युक्तम् । तर्हि न स्वोत्पत्तावपि तदपेक्षा प्रमात्वात्तद्वदेवेत्याशङ्क्याऽऽह—सर्वेति । अधिकाविवक्षयेत्युक्तं व्यक्तीकुर्वन्ब्रह्मविद्यामधिकृत्य पूर्वाधिकरणन्यायाद्विविदिषाश्रुतेश्च संशयमाह—इदमिति । अत्र च स्वतन्त्रपुरुषार्थहेत्वौपनिषदात्मज्ञानोत्पत्तौ यज्ञादीनां शमादीनां च विविदिषावाक्यीयविनियोगोक्तेरस्ति पादादिसंगतिः । पूर्वपक्षे यज्ञादीनां विज्ञानान्वये तत्फलेऽपि तत्प्रसक्त्या समुच्चयसिद्धिः । सिद्धान्ते परम्परया तेषां ज्ञानान्वयेऽपि तत्फलान्वये हेत्वभावात्तदसिद्धया ज्ञानस्यैव तद्धेतुतासिद्धिरित्यङ्गीकृत्य पूर्वपक्षयति—तत्रेति । अपरोक्षधियो मानमात्रायत्तत्वात्प्रामाणिकज्ञानस्य मानहेतुषु सत्सु कर्माद्यभावेनानुदयादर्शनात्केवलव्यतिरेकाभावे च यज्ञादीनां हेतुत्वकल्पनायोगाद्विविदिषाश्रुतेश्च वर्तमानापदेशित्वाद्विनियोजकत्वायोगाज्ज्ञानस्य फलवदुत्पत्तावपि नान्वयस्तेषामिति भावः । विविदिषावाक्ये वर्तमानापदेशेऽपि यस्य पर्णमयीत्यादाविवापूर्वत्वात्पञ्चमलकारेण ब्रह्मानुभवकामो यज्ञादीनि कुर्यादिति विध्युपगमादागमस्य केवलव्यतिरेकानपेक्षत्वाद्विषयसौन्दर्यलम्भायामिच्छायां साक्षादन्वययोगात्तत्फले ज्ञाने यज्ञाद्यन्वयसिद्धेर्यज्ञेनेत्यादिकरणश्रुत्या च तेषामिष्यमाणापरोक्षधीसाधनत्वदृष्टेर्ज्ञानस्य च मानायत्ततया साक्षाद्यज्ञाद्यसाधनत्वेऽपि तेषां चित्तशुद्धया प्रत्यक्प्रवणतामुत्पाद्याप-

---

१ ङ. ञ. विद्यया । २ ङ. ञ. 'यस्य' । ३ ङ. ञ. हि तस्योत्प' । ४ ङ. ञ. तत्तद्धे' । ५ ठ. ङ. 'न्दर्येच्छा' । ६ झ. 'दनन्व' । ७ क. ख. ङ. ञ. ठ. ड. 'साध्यत्वेऽ' ।

(विद्यायाः स्वोत्पत्तौ कर्मसापेक्षत्वम्, अधि० ६)

मकर्माणि विद्यायाः स्वार्थसिद्धौ नापेक्ष्यन्त[1] एवमत्यन्तमेवानपेक्षायां प्राप्तायामिदमुच्यते—" सर्वापेक्षा च " इति । " अपेक्षते च विद्या सर्वाण्याश्रमकर्माणि नात्यन्तमनपेक्षैव । ननु विरुद्धमिदं वचनमपेक्षते चाऽऽश्रमकर्माणि विद्या नापेक्षते चेति । नेति ब्रूमः—उत्पन्ना हि विद्या फलसिद्धिं प्रति न किंचिदन्यदपेक्षत उत्पत्तिं प्रति त्वपेक्षते । कुतः । " यज्ञादिश्रुतेः, " तथा हि श्रुतिः—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " [बृ० ४ ४-२२] इति यज्ञादीनां विद्यासाधनभावं दर्शयति । विविदिषासंयोगाच्चैषामुत्पत्तिसाधनभावोऽवसीयते " अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तत् " [छा० ८ ५-१ इति । अत्र[2] विद्यासाधनभूतस्य ब्रह्मचर्यस्य यज्ञादिभिः संस्तवाद्यज्ञादीनामपि[3] हि साधनभावः सूच्यते ।

"सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि[4] "

[कठ० २-१५] इत्येवमाद्या च श्रुतिराश्रमकर्मणां विद्यासाधनभावं सूचयति । स्मृतिरपि—

रोक्षज्ञाने पर्यवसानात्पारम्पर्येऽपि पचति काष्ठैरितिवत्करणविभक्तिसंभवादुत्पत्तौ ज्ञानस्य कर्मापेक्षाऽस्तीति सिद्धान्तयति—इदमिति । आपातेन पूर्वापरविरोधप्रतीतिं शङ्कते—नन्विति । विभागोक्त्या प्रत्याह—नेतीति । उक्तव्यवस्थायां प्रश्नपूर्वकं हेतुमाह—कुत इति । हेतुं विवृणोति—तथा हीति । नन्वत्र विविदिषासंयोगो यज्ञादीनां ज्ञायते यदि तस्यां विषयसौन्दर्यलभ्यायां तेषामन्वयायोगादिष्यमाणे ज्ञानेऽन्वयोऽभ्युपगम्यते तर्हि ज्ञानस्य मानाधीनत्वात्कर्मणां तत्रान्वयासिद्धेः श्रुतत्यागेन तत्फले मोक्षे किमित्यन्वयो नेष्यते तत्राऽऽह—विविदिषेति । मोक्षहेतुत्वकल्पनायां न्यास्यकृतः कृतेनेत्यादिविरोधात्परम्परयाऽपि हेतुत्वे बाधाभावाद्बुद्धिशुद्ध्या तदुत्पत्तावेवान्वयो यज्ञादीनामित्यर्थः । यज्ञादिश्रुतेरिति[5] वाक्यान्तरमपि ग्रहीतव्यमित्याह—अथेति । तत्र यज्ञादीनां ज्ञानसाधनत्वे विज्ञातं लिङ्गमाह—अत्रेति[6] । तत्रैव लिङ्गान्तरमाह—सर्व इति । परम्परया कर्मणां धीहेतुत्वे स्मृतिमपि दर्शयति—स्मृतिरिति ।

---

१ क. ङ ज. ञ. °न्त इत्येवं । २ क. ङ. ज. ट. °त्र च वि° । ३ ङ. ञ. °पि सा° । ४ ङ. ञ. °वीम्योम् " इ° । ५ ङ. ञ. किमन्व° । ६ ख. ङ. ञ. विज्ञानं ।

" कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः ।
कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते "

इत्येवमाद्या । " अश्ववत् " इति योग्यतानिदर्शनम् । यथा च योग्यतावशेनाश्वो न[1] लाङ्गलाकर्षणे युज्यते रथचर्यायां तु युज्यते। एवमाश्रमकर्माणि विद्यया फलसिद्धौ[2] नापेक्ष्यन्त उत्पत्तौ[3] चापेक्ष्यन्त इति ॥ २६ ॥

शमदमाद्युपेतः स्यात्तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥ (६)

यदि कश्चिन्मन्येत[4] यज्ञादीनां विद्यासाधनभावो[5] न न्याय्यो विध्यभावात् " यज्ञेन विविदिषन्ति " इत्येवंजातीयका हि श्रुतिरनुवादस्वरूपा विद्याभिष्टवपरा[6] । इत्थं महाभागा विद्या यद्यज्ञादिभिरेतामवाप्तुमिच्छन्तीति । " तथाऽपि तु शमदमाद्युपेतः स्यात् " विद्यार्थी, " तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति " [बृ० ४-४-२३] इति विद्यासाधनत्वेन शमदमादीनां विधानाद्विहितानां चावश्यानुष्ठेयत्वात् । नन्वत्रापि शमाद्युपेतो भूत्वा " पश्यति " इति वर्तमानापदेश उपलभ्यते न विधिः । नेति ब्रूमः—" तस्मात् " इति प्रकृतप्रशंसापरिग्रहाद्वि-

---

उत्पत्ताविव फलेऽपि ज्ञानस्य कर्मापेक्षा किं न स्यादित्याशङ्क्य दृष्टान्तमादाय व्याकरोति—अश्ववदित्यादिना ॥ २६ ॥

ज्ञानोत्पत्तौ बहिरङ्गमुक्त्वा तत्रैवान्तरङ्गमुपदिशति—शमदमादीति । अत्र व्यावर्त्या शङ्कामाह—यदीति । विद्यास्तावकत्वेनापि संभवत्यर्थवत्त्वे वर्तमानताभङ्गेन विधिकल्पनमयुक्तं वाक्यभेदप्रसङ्गात् । अतः शब्दमात्रलभ्या विद्येति भावः । एवं तवाभिप्रायेऽपि हेत्वन्तरमवश्यमनुष्ठेयं न शब्दमात्रलभ्या विद्येति सूत्रयोजनया परिहरति—तथाऽपीति । विविदिषावाक्यतुल्यतया शमादिवाक्यस्य नास्ति विधिपरतेति शङ्कते—नन्विति । यस्मादेवमात्मानं विदित्वा पापेन कर्मणा न लिप्यते तस्मादेवं विद्यार्थी शमाद्युपेतो भूत्वा विचारयेदिति गम्यते विधिरित्याह—नेतीति ।

---

१ ङ. ञ. °था यो° । २ ट. विद्यायाः । ३ ङ. ञ. °त्तौ त्वपे° । ४ ङ. ञ. °त न य° । ५ ङ. ञ. °वो न्या° । ६ ङ. ञ. °द्यास्तुतिप° । ट. °द्यास्तव° । ७ ठ. ड. °दित्यत्र द° । ८ ङ. ञ. तत्र । ९ ङ. ञ. विचरेदि° ।

(विद्यायाः स्वोत्पत्तौ कर्मसापेक्षत्वम्, अधि० ६)

धित्वप्रतीतेः। पश्येदिति च माध्यंदिना विस्पष्टमेव विधिमधीयते। तस्माद्यज्ञाद्यनपेक्षायामपि शमादीन्यपेक्षितव्यानि। यज्ञादीन्यपि त्वपेक्षितव्यानीति यज्ञादिश्रुतेरेव। ननूक्तं यज्ञादिभिर्विविदिषन्तीत्यत्र न विधिरुपलभ्यत इति। सत्यमुक्तं, तथाऽपि त्वपूर्वत्वात्संयोगस्य विधिः परिकल्प्यते। न ह्ययं यज्ञादीनां विविदिषासंयोगः पूर्वं प्राप्तो येनानूद्येत। "तस्मात्पूषा प्रपिष्टभागोऽदन्तको हि" [तै० सं० २-६-८-५] इत्येवमादिषु चाश्रुतविधिकेष्वपि वाक्येष्वपूर्वत्वाद्विधिं परिकल्प्य "पौष्णं पेषणं विकृतौ प्रतीयेत" [जै० सू० ३-३-३४] इत्यादिविचारः प्रथमे तन्त्रे प्रवर्तितः। तथा चोक्तम्—"विधिर्वा धारणवत्" [ब्र० सू० ३-४-२०] इति। स्मृतिष्वपि भगवद्गीताद्यास्वनभिसंधाय फलमनुष्ठितानि यज्ञादीनि मुमुक्षोर्ज्ञानसाधनानि भवन्तीति प्रपञ्चितम्। तस्माद्यज्ञादीनि शमदमादीनि

विध्यभावे तत्प्रशंसावैयर्थ्यादुक्तविधिसिद्धिरित्यर्थः। काण्वपाठे विधिमुक्त्वा माध्यंदिनपाठे विध्यभावशङ्काऽपि नास्तीत्याह—**पश्येदिति चेति**। विधिफलमाह—**तस्मादिति**। यज्ञादीनामसाधनत्वशङ्कामापाततोऽभ्युपेत्य साधनान्तरापेक्षोक्ता। इदानीं तदसाधनत्वशङ्काऽपि न युक्तेत्याह—**यज्ञादीनीति**। उक्तं स्मारयित्वा परिहरति—**नन्वित्यादिना**। संयोगस्यापूर्वत्वमेव स्पष्टयति—**न हीति**। सत्यपि महावाक्यैक्येऽनुष्ठानयोग्यापूर्वार्थविधिरवान्तरवाक्येन(ण) क्रियते न तत्र वाक्यभेदो दोष इत्यत्र पूर्वतन्त्रसंमतिमाह—**तस्मादिति**। दर्शपूर्णमासयोः श्रुतं तस्मात्पूषेत्यादि। तत्र पूर्णः पिष्टद्रव्यसंबन्धः सामासिकः। न च पूषा देवता पिष्टभागो द्रव्यं दर्शपूर्णमासयोरस्ति तेन तदेकवाक्यतायोगात्कालत्रयास्पृष्टद्रव्यदेवतासंबन्धस्याविनाभावेन यागविध्युपस्थापकत्वाद्व्यवहारसिद्धये विधिपदमध्याहृत्य प्रकरणादुत्कर्षेण पूषोद्देशेन पिष्टभागः कर्तव्य इति विकृतौ संबन्धः "पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात्प्रकृतौ" [जै० सू० ३-३-३०] इत्यत्र विचारित इत्यर्थः। अवान्तरवाक्यभेदेन सूत्रकृताऽपि स्वीकृतो विधिरित्याह—**तथा चेति**। स्मृत्यनुसारेणाप्यवान्तरवाक्यस्य विधायकत्वं वाच्यमित्याह—**स्मृतिष्विति**। कर्मणां ज्ञानोत्पत्तिहेतुत्वे श्रुतिस्मृतिन्यायसिद्धे फलितमाह—**तस्मादिति**।

---

१ ट. °धिप्र°। २ ट. °दिनाः स्प°। ३ क. ङ. ज. ञ. °व्यानि य°। ४ ङ. ञ. °संबन्धः पू°। ५ क. ङ. ज. ञ. ट. शमा°। ६ ङ. ञ. °क्षोक्त्येदा°। ७ क. ङ. ञ. °र्वत्वमे°। ८ ङ. ञ. °ष्णः प्रपि°।

च यथाश्रमं सर्वाण्येवाऽऽश्रमकर्माणि विद्योत्पत्तावपेक्षितव्यानि । तत्राप्येवंविदिति विद्यासंयोगात्प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यम् ॥ २७ ॥ (६)

(आपदि सर्वान्नाभ्यनुज्ञानम्, अधि० ७)

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

प्राणसंवादे श्रूयते छन्दोगानाम्—" न ह वा एवंविदि किंचनानन्नं भवति " [छा० ५-२-१] इति । तथा वाजसनेयिनाम्—" न ह वा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतम् " [बृ० ६-१-१४] इति । सर्वमस्यादनीयमेव भवतीत्यर्थः । किमिदं सर्वान्नानुज्ञानं शमादिवद्विद्याङ्गं विधीयत उत स्तुत्यर्थं संकीर्त्यत इति संशये विधिरिति तावत्प्राप्तम् । तथा हि प्रवृत्तिविशेषकर उपदेशो भवत्यतः प्राणविद्यासंनिधानात्तदङ्गत्वेनेयं नियमनिवृत्तिरुपदिश्यते । नन्वेवं सति भक्ष्याभक्ष्यवि-

---

यज्ञादीनामपि श्रुतिस्मृतिन्यायेभ्योऽनुष्ठेयत्वे शमादीनां तेभ्यो विशेषाभावाद्यावद्विद्योदयमविशेषेणानुष्ठानं स्यादित्याशङ्क्याऽऽह—तत्रापीति ॥ २७ ॥ (६)

यज्ञादीनां शमादीनां च विद्यासंनिहितानां तच्छेषतोक्ता तत्प्रसङ्गाद्विद्यासंनिधियुक्तसर्वान्नाभ्यनुज्ञानस्यापि विद्याशेषतामाशङ्क्य प्रत्याह—सर्वान्नेति । प्राणविदः सर्वान्नानुज्ञानं विषयं वक्तुं शाखाद्वयस्थां श्रुतिमाह—प्राणेति । जग्धं भक्षितम् । विषयवाक्यार्थं संगृह्णाति—सर्वमिति । अपूर्वत्वाद्विधेर्श्रुतेश्च संशयमाह—किमिति । अत्र प्राणविद्यायाः स्वतन्त्रपुरुषार्थहेतोर्वाक्यार्थज्ञानोपयुक्तायाः स्तुत्यर्थं सर्वान्नानुज्ञानकीर्तनमिति कथनात्पादादिसंगतिः । पूर्वपक्षे प्राणविदो भक्ष्याभक्ष्यविभागासिद्धिः । सिद्धान्ते विदुषोऽविदुषश्चानापदि तत्सिद्धिरिति मन्वानः संशयमनूद्य पूर्वपक्षयति—विधिरितीति । विधिपक्षेऽनुष्ठानविशेषलाभं हेतुमाह—तथा हीति । सर्वान्नानुज्ञानं स्वतन्त्रमेव विधीयतामित्याशङ्क्य संनिधिविरोधान्मैवमित्याह—अत इति । सर्वान्नात्तृत्वं प्राणविद्याङ्गं चेत्तर्हि न कलञ्जं भक्षयेदित्यादि शास्त्रं विरुध्येतेति शङ्कते—नन्विति ।

---

१ ड. अ. बाह्यानीत° । २ ट. °ते छान्दो° । ३ घ. °न्नं परिगृ° । ४ क. ख. ड. अ. 'द्विधिश्रु° । ५ ड. अ. तत्र° । ६ ड. अ. °पुरुषार्थज्ञा° । ७ ड. अ. इतीति । ठ. ड. इति संशय इति । ८ ठ. ड. °नुष्ठानं ।

(आपदि सर्वान्नाभ्यनुज्ञानम्, अधि० ७)

भागशास्त्रव्याघातः स्यात्। नैष दोषः। सामान्यविशेषभावाद्बाधोपपत्तेः। यथा प्राणिहिंसाप्रतिषेधस्य पशुसंज्ञपनविधिना बाधः। यथा च "न कांचन स्त्रियं परिहरेत्तद्व्रतम्" [छा० २-१३-२] इत्यनेन वामदेव्यविद्याविषयेण सर्वरूपपरिहारवचनेन तत्सामान्यविषयं गम्यागम्यविभागशास्त्रं बाध्यते। एवमनेनापि प्राणविद्याविषयेण सर्वान्नभक्षणवचनेन भक्ष्याभक्ष्यविभागशास्त्रं बाध्येतेति। एवं प्राप्ते ब्रूमः—नेदं सर्वान्नानुज्ञानं विधीयत इति। न ह्यत्र विधायकः शब्द उपलभ्यते, "न ह वा एवंविदि किंचनानन्नं भवति" [छा० ५-२-१] इति वर्तमानापदेशात्। न चासत्यामपि विधिप्रतीतौ प्रवृत्तिविशेषकरत्वलोभेनैव विधिरभ्युपगन्तुं शक्यते। अपि च श्वादिमर्यादं प्राणस्यान्नमित्युक्त्वेदमुच्यते नैवंविदः किंचिदनन्नं भवतीति। न च श्वादिमर्यादमन्नं मानुषेण देहेनोपभोक्तुं शक्यते।

प्राणविदतिरिक्तविषयं तदिति विरोधं परिहरति—नेत्यादिना। उपपत्तिमेव कर्मविषयदृष्टान्तेनोदाहरति—यथेति। तत्रैव विद्याविषयं दृष्टान्तमाह—यथा चेति। यदुपमन्त्रयते स हिंकार इत्यादिना ग्राम्यव्यापारगतचेष्टासु हिंकारादिदृष्टिर्विहिता सा वामदेव्यविद्या तत्रोपमन्त्रणं संकेतकरणम्। दृष्टान्तयोरर्थं दार्ष्टान्तिके योजयति—एवमिति। विविदिषावाक्ये वर्तमानापदेशेऽप्यपूर्वत्वात्पञ्चमलकाराङ्गीकारेण विधिकल्पनवन्न हेत्यादौ वर्तमानापदेशेऽप्यपूर्वत्वाद्विधिरिति मतमनूद्य सूत्राद्धहिरेव सिद्धान्तमाह—एवमिति। तत्र हेतुमाह—न हीति। यस्य पर्णमयीत्यादाविव वर्तमानापदेशेऽपि कल्प्यो विधिरित्याशङ्क्याऽऽह—न चेति। सामान्यविधिबाधकत्वं श्रुतविशेषविधेरिष्टं विशेषकल्पनां तु सामान्यविधिना बाध्या कल्पनाया विरोधाभावापेक्षत्वादित्यर्थः। इतश्च स्तुत्यर्थमेवेदं वचो न विधिरित्याह—अपि चेति। आ श्वभ्य आ शकुनिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमिति श्रवणादशक्यविषयो विधिर्न संभवतीत्याह—न चेति। तर्हि वचनवैयर्थ्यमित्याशङ्क्य सर्वं प्राणस्यान्नमिति धीस्तुत्यर्थत्वान्नैवमि-

---

१ क ङ. ज. ञ 'न प'। २ क. ङ. ज. ञ. ट. 'न सामा'। ३ ट. 'भागे शा'। ४ ज. 'क्ष्यशा'। ५ ङ. ञ. 'विदि किं'। ६ ज. किंचनान'। ७ ङ. 'न्नं मनुष्यदे'। ८ ङ. ञ. 'नापू'। ९ क. ङ. ञ. 'ल्पनाव'। १० ठ. ङ. श्रुतिवि'। ११ ङ. ञ. 'ना सा'। ङ. 'नाऽत्र सा'।

शक्यते तु प्राणस्यान्नमिदं सर्वमिति विचिन्तयितुम् । तस्मात्प्राणान्नविज्ञानप्रशंसार्थोऽयमर्थवादो न सर्वान्नानुज्ञानविधिः । तद्दर्शयति-"सर्वान्नानुमतिश्च प्राणात्यये" इति । एतदुक्तं भवति-प्राणात्यय एव हि परस्यामापदि सर्वमन्नमदनीयत्वेनाभ्यनुज्ञायते "तद्दर्शनात्" । तथा हि श्रुतिश्चाक्रायणस्यर्षेः कष्टायामवस्थायामभक्ष्यभक्षणे प्रवृत्तिं दर्शयति—"मटचीहतेषु कुरुषु" [छा० १-१०-१] इत्यस्मिन्ब्राह्मणे । चाक्रायणः किलर्षिरापद्गत इभ्येन सामिखादितान्कुल्माषांश्चखाद । अनुपानं तु तदीयमुच्छिष्टदोषात्प्रत्याचचक्षे । कारणं चात्रोवाच "न वा अजीविष्यमिमानखादन्" [छा० १-१०-४] इति, "कामो म उदपानम्" [छा० १-१०-४] इति च । पुनश्चोत्तरेद्युस्तानेव स्वपरोच्छिष्टान्पर्युषितान्कुल्माषान्भक्षयांबभूवेति । तदेतदुच्छिष्टोच्छिष्टपर्युषितभक्षणं दर्शयन्त्याः श्रुतेराशयातिशयो लक्ष्यते प्राणात्ययप्रसङ्गे प्राणसंधारणायाभक्ष्यमपि भक्षयितव्यमिति । स्वस्थावस्थायां तु तन्न कर्तव्यं विद्यावताऽपीत्यनुपानप्रत्याख्या-

---

स्याह—शक्यते त्विति । उक्तेऽर्थे सूत्रमादत्ते—तदिति । तदक्षराणि व्याकरोति—एतदिति । मटच्योऽशनयः पाषाणवृष्टयो रक्तवर्णाः क्षुद्रपक्षिविशेषा वा तैर्हतेषु कुरुषु तद्देशस्थसस्येष्विति यावत् । आख्यायिकार्थमाह—चाक्रायण इति । स हि दुर्भिक्षे जाते जायया ऽनुपजातपयोधरादिस्त्रीव्यञ्जनया सह देशान्तरं प्रतिचक्रमे स कदाचिदिभ्यग्रामे निवसन्निभ्येन सह हस्त्यारोहेण सामिभोजितानर्धभक्षितान्कुल्माषान्कुत्सितमाषान्भक्षितवानित्यर्थः । अनुपानं गृहाणेत्युक्ते सत्युच्छिष्टं मे पीतं स्यादिति प्रतिषिध्य किमेतेऽप्युच्छिष्टा नेति परेणोक्ते कारणं चानुपाननिषेधे कथितवानित्याह—अनुपानं त्विति । कुल्माषाश्चेन्न भक्ष्यन्ते जीवनमेवं मे न स्यात्कामः स्वेच्छातो मे तटाकादिषूदकपानं भविष्यतीत्यर्थः । स्वयं खादित्वा शिष्टाज्ञायार्थमाजहार तया च भर्तृस्वभावज्ञया निहितानुत्तरदिने प्रातरेव भक्षितवानित्याह—पुनश्चेति । कुल्माषभक्षणश्रुतेरभिप्रायमाह—तदिति । अनुपाननिषेधश्रुतेस्तात्पर्यमाह—स्वस्थेति । सर्वा-

---

१ क. ज. °णर्षेः । २ ट. °क्षणप्र° । ३ अ. °न स्वामि° । ४ क. ज. °दकपा° । ५ ङ. अ. उक्तार्थे । ६ ङ. अ. °न हस्त्या° । ७ ङ. अ. °ण स्वामि° । ८ क. ख. ङ. अ. ठ. ड. °स्तिताम्माषा° । ९ ठ. ड. °ष न । १० ङ. अ. तडागादि° ।

(आपदि सर्वान्नाभ्यनुज्ञानम् , अधि० ७)

नाद्रियते । तस्मादर्थवादो " न ह वा एवंविदि " [छा० ५-२-१] इत्येवमादिः ॥ २८ ॥

अबाधाच्च ॥ २९ ॥

एवं च सति " आहारशुद्धौ सत्त्वशुद्धिः " [छा० ७-२६-२] इत्येवमादि भक्ष्याभक्ष्यविभागशास्त्रमबाधितं भविष्यति ॥ २९ ॥

अपि च स्मर्यते ॥ ३० ॥

" अपि च " आपदि सर्वान्नभक्षणमपि " स्मर्यते " विदुषोऽविदुषश्चाविशेषेण—

" जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा "

इति [मनु० १०-१०४] । तथा " मद्यं नित्यं ब्राह्मणः " [गौ० सू० २-२०] " सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः " [गौत० २३-१] " सुरापाः कृमयो भवन्त्यभक्ष्यभक्षणात् " इति च स्मर्यते वर्जनमनन्नस्य ॥ ३० ॥

शब्दश्चातोऽकामकारे ॥ ३१ ॥ (७)

" शब्दश्च " अनन्नस्य प्रतिषेधकः कामकारनिवृत्तिप्रयो-

न्नभक्षणस्य निरङ्कुशत्वाभावे फलितमाह—तस्मादिति ॥ २८ ॥

तस्यार्थवादत्वे हेत्वन्तरमाह—अबाधाच्चेति । सामान्यशास्त्रविरोधान्न करुण्यो विशेषविधिरित्युक्तम् । अधुना सामान्यशास्त्रं दर्शयन्सूत्रं योजयति—एवं चेति । स्वस्थावस्थायां भक्ष्याभक्ष्यभेदे सतीति यावत् ॥ २९ ॥

आपद्यवस्थायाममक्ष्यभक्षणानुज्ञाने स्मृतिं संवादयति—अपीति । स्मृतिरपि विद्वद्विषयेत्याशङ्क्याऽऽह—अपि चेति । सुरापानमवस्थाद्वयेऽपि न कार्यमित्याह—तथेति । ब्राह्मणो वर्जयेदिति शेषः । जीवितात्ययस्मृत्या सुराऽपि तदत्यये पातव्येत्याशङ्क्याऽऽह—सुरापस्येति । उष्णां सुरामिति शेषः । उष्णामग्निना तप्तामिति यावत् । मरणान्तिकप्रायश्चित्तदृष्टेस्तत्प्रसङ्गेऽपि सा न पातव्येत्यर्थः । इतश्च सा सदा न पेयेत्याह—सुरापा इति । तत्र हेतुः—अभक्ष्येति । मद्यमित्यादिस्मृतेस्तात्पर्यमाह—वर्जनमिति ॥ ३० ॥

स्मृतिप्रामाण्यार्थं तन्मूलश्रुतिमाह—शब्दश्चेति । तस्माद्ब्राह्मणस्य सुरापस्य मरणा-

---

१ ङ. ञ. 'युः सुरापास्ये सु' । ज. ट. 'युः सुरामास्ये सु' । २ क्ष. 'पद्मव' । ३ ङ. ब. 'मित' ।

(विद्यार्थानामाश्रमधर्माणां च यज्ञादीनां सकृदनुष्ठानम्, अधि० ८)

जनः कौठकानां[2] संहितायां श्रूयते " तस्माद्ब्राह्मणः सुरां न पिबेत् " इति। सोऽपि " न ह वा एवंविदि " [छा० ५-२-१] इत्यस्यार्थवादत्वादुपपन्नतरो भवति। तस्मादेवंजातीयका अर्थवादा न विधय इति ॥ ३१ ॥ (७)

(विद्यार्थानामाश्रमधर्माणां च यज्ञादीनां सकृदनुष्ठानम्, अधि० ८)

विहितत्वाच्चाऽऽश्रमकर्मापि ॥ ३२ ॥

" सर्वापेक्षा च " [ब्र० सू० ३-४-२६] इत्यत्राऽऽश्रमकर्मणां विद्यासाधनत्वमवधारितम्। इदानीं तु किममुमुक्षोरप्याश्रममात्रनिष्ठस्य विद्यामकामयमानस्य तान्यनुष्ठेयान्युताऽऽहो नेति चिन्त्यते। तत्र " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति " [बृ० ४-४-२२] इत्यादिनाऽऽश्रमकर्मणां विद्यासाधनत्वेन " विहितत्वात् " विद्यामनिच्छतः फलान्तरं कामयमानस्य नित्यान्यननुष्ठेयानि। अथ तस्याप्यनुष्ठेयानि। न तर्ह्येषां विद्यासाधनत्वं नित्यानित्यसंयोगविरोधादिति। अस्यां प्राप्तौ पठति—

न्तिकप्रायश्चित्तदर्शनादिति यावत्। श्रौतनिषेधस्य प्रकृतोपयोगमाह—सोऽपीति। श्रुतिस्मृतिसिद्धमर्थमुपसंहरन्नतःशब्दं व्याचष्टे—तस्मादिति ॥ ३१ ॥ (७)

सर्वान्नत्वोक्तिः शास्त्रान्तरविरोधे स्तुतिरित्युक्तम्। एवं विद्यार्थत्वोक्तिर्यज्ञानां स्तुतिर्नित्यत्वश्रुतिविरोधादित्याशङ्क्याऽऽह—विहितत्वाच्चेति। व्यवहितेन संबन्धमाह—सर्वापेक्षेति। अग्निहोत्रादिकर्माण्यधिकृत्य विहितत्वाद्विनियुक्तविनियोगायोगाच्च संशयमाह—इदानीं त्विति। अत्राग्निहोत्रादीनामुभयथात्वोक्त्या स्वतन्त्रपुरुषार्थहेतुशास्त्रोत्थात्मविद्योपायोपवर्णनात्पादादिसंगतिः। पूर्वपक्षे विद्याहेतुत्वोक्तेः स्तुतित्वाद्विविदिषावाक्यस्य विवक्षितार्थत्वासिद्धिः। सिद्धान्ते संयोगपृथक्त्वन्यायात्कर्मणामुभयत्वसंभवात्तत्सिद्धिरित्यभिप्रेत्य पूर्वपक्षमाह—तत्रेति। यावज्जीवश्रुतेरमुमुक्षोरपि तान्यनुष्ठेयानीत्याशङ्क्याऽऽह—अथेति। विविदिषाश्रुतेर्विद्यासंयोगोऽपि तेषामवश्यंभावीत्याशङ्क्याऽऽह—नित्येति। आवश्यकत्वाभावाद्विद्याकामनायाः काम्यतया कर्मणामनावश्यकत्वं नित्यतया चाऽऽवश्यकत्वमित्येकत्रैवाऽऽवश्यकत्वानावश्यकत्वे विरुद्धे स्याताम्। अतो विद्योपायत्वोक्तिः स्तुतिरेवेत्यर्थः। सिद्धान्तसूत्रमवतार्य व्याकरोति—अस्यामिति

---

१ ट. °जकः का°। २ क. ङ. ज. ञ. कठानां। ३ क. ख. ङ. ञ. ठ. ड. °ज्ञादीनां ४ ङ. ड. °गाच्च। ५ ङ. ञ. °ति तत्रा°। ६ ङ. अग्नि°। ७ ङ. ञ. °न्ते यो°। ८ ङ. ञ. °क्ति श्रुति°।

(विद्यार्थानामाश्रमधर्माणां च यज्ञादीनां सकृदनुष्ठानम्, अधि० ८)

आश्रममात्रनिष्ठस्याप्यमुमुक्षोः कर्तव्यान्येव नित्यानि कर्माणि "यावज्जीवमग्निहोत्रं जुहोति" इत्यादिना विहितत्वात्। न हि वचनस्यातिभारो नाम कश्चिदस्ति ॥ ३२ ॥

अथ यदुक्तं नैवं सति विद्यासाधनत्वमेषां स्यादित्यत उत्तरं पठति—

सहकारित्वेन च ॥ ३३ ॥

विद्यासहकारीणि चैतानि स्युर्विहितत्वादेव "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" [बृ० ४-४-२२] इत्यादिना। तदुक्तम् "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" [ब्र०सू० ३-४-२६] इति। न चेदं विद्यासहकारित्ववचनमाश्रमकर्मणां प्रयाजादिवद्विद्याफलविषयं मन्तव्यम्। अविधिलक्षणत्वाद्विद्यायाः। असाध्यत्वाच्च विद्याफलस्य। विधिलक्षणं हि साधनं दर्शपूर्णमासादिस्वर्गफलसिषाधयिषया सहकारिसाधनान्तरमपेक्षते नैवं विद्या। तथा चोक्तम्—"अत एव चाग्नीन्धनाद्यनपेक्षा" [ब्र० सू० ३-४-२५] इति। तस्मादुत्पत्तिसाधनत्व एवैषां सहका-

---

नित्यतया विहितानां विद्यार्थतया विधानं गौरवादयुक्तमित्याशङ्क्याऽऽह—न हीति ॥ ३२ ॥

उक्तमनूद्योत्तरत्वेन सूत्रमवतारयति—अथेत्यादिना। नित्यत्वेऽपि विद्यासंयुक्तत्वमग्निहोत्रादीनां विधिवशादेष्टव्यमिति व्याचष्टे—विद्येति। विविदिषासंयोगमात्रमत्र श्रुतं कुतो विद्यासंयुक्तत्वं तत्राऽऽह—तदुक्तमिति। सहकारित्वोक्त्या फलं प्रत्येवोपकारित्वमाचार्यैमीष्टं कर्मणामित्याशङ्क्याऽऽह—न चेति। शास्त्रीयमन्वयव्यतिरेकसिद्धं चोपकारकत्वं न चात्रोभयमस्तीत्याह—अविधीति। ब्रह्मधीः स्वकार्ये न चोदितापेक्षाऽचोदितत्वान्मर्दनवदित्यर्थः। ब्रह्मधीः स्वफले नेतिकर्तव्यतापेक्षा स्वतोऽसाध्यफलत्वात्कूपखननव्यापारवदित्याह—असाध्यत्वादिति। अविधिलक्षणत्वं व्यतिरेकोदाहरणेन प्रपञ्चयति—विधीति। अङ्गभावस्य ग्राहकग्रहणपूर्वकत्वाद्विधेर्ग्राहकत्वाद्विहितं दर्शपूर्णमासादि प्रयाजादिभिर्ग्राहकगृहीतैरङ्गैर्युज्यते नाविहिता विद्येत्यर्थः। तथाऽपि कथमसाध्यफलत्वेन विद्यायां कर्मणामन्वयराहित्यं तदाह—तथा चेति। कथं तर्हि सहकारित्ववचनं तदाह—तस्मादिति। सह पुत्रैर्भारं वहति गर्दभीतिव-

---

१ ङ. ज. ञ. °रमाकाङ्क्षते।

रित्ववाचोयुक्तिः। न चात्र नित्यानित्यसंयोगविरोध आशङ्क्यः, कर्मभेदेऽपि संयोगभेदात्। नित्यो ह्येकः संयोगो यावज्जीवादिवाक्यकल्पितो न तस्य विद्याफलत्वम्। अनित्यस्त्वपरः संयोगः " तमेतं वेदानुवचनेन " [बृ० ४-४-२२] इत्यादिवाक्यकल्पितस्तस्य विद्याफलत्वम्। यथैकस्यापि खादिरस्य नित्येन संयोगेन क्रत्वर्थत्वमनित्येन संयोगेन पुरुषार्थत्वं तद्वत् ॥ ३३ ॥

सर्वथाऽपि त एवोभयलिङ्गात् ॥ ३४ ॥

"सर्वथाऽपि" आश्रमैकर्मत्वपक्षे विद्यासहकारित्वपक्षे च "त एव" अग्निहोत्रादयो धर्मा अनुष्ठेयाः। त एवेत्यवधारयन्नाचार्यः किं निवर्तयति। कर्मभेदशङ्कामिति ब्रूमः। यथा कुण्डपायिनामयने " मासमग्निहोत्रं जुहोति " [कात्या० श्रौ० २४ ४-२४]

त्कर्मसु सत्स्वेव विद्या स्वकार्याय व्याप्रियत इत्यभिप्रेत्य सहकारित्वोक्तिरित्यर्थः। परोक्तमुद्भाव्य प्रत्याह—न चेति। संयोगभेदं विशदयति—नित्यो हीति। तुल्यबलश्रुतिद्वयेन पृथगेव संबन्धविधिः संयोगभेदस्तस्मादुभयथात्वमविरुद्धमित्यर्थः। " एकस्य तूभयत्वे संयोगपृथक्त्वम् " [पू० मी० सू० ४-३-६] इत्यत्रैतच्चिन्तितमित्युदाहरणेन दर्शयति—यथेति। बैल्वो वा खादिरो वा पालाशो वेत्येको नित्यः संयोगस्तेन क्रत्वर्थस्य खादिरत्वस्य खादिरं वीर्यकामस्येत्यपरः संयोगोऽनित्यस्तेन पुरुषार्थतेत्येकस्य खादिरत्वस्योभयार्थत्वे संयोगपृथक्त्वं हेतुस्तथा कर्मस्वभेदेऽपि संयोगभेदादुभयथात्वमित्यर्थः ॥ ३३ ॥

ननु प्रकरणान्तरस्थेभ्यो नित्यकर्मभ्यो भिन्नान्येव कर्माणि विविदिषावाक्ये विद्यासंयुक्ततया विधीयन्ते प्रकरणभेदस्य भेदकत्वात्तत्कथं तस्योभयत्वं तत्राऽऽह—सर्वथेति। प्रतिज्ञां व्याचष्टे—सर्वथाऽपीति। एवकारव्यावर्त्यं शङ्कया दर्शयति—त एवेतीति। भेदशङ्कानिवृत्तिं व्यतिरेकदृष्टान्तेन स्पष्टयति—यथेति। कुण्डपायिनामयनगताग्निहोत्रस्य प्रकरणभेदात्प्रसिद्धाग्निहोत्रात्कर्मान्तरत्ववद्विविदिषन्तीति विद्या-

---

१ ज. 'लम्। २ ङ. ञ. 'पि खदि'। ३ ज. ट. 'रत्वस्य। ४ ङ. ञ. 'र्थताऽनि'। ५ ङ. ञ. 'र्थता च त'। ६ ङ. ञ. 'मधर्मं'। ७ क. ङ. ञ. 'भेदाश'। ८ ज ठ. 'था मा'। ९ ङ. ज. ञ. जुहोति। १० ठ. ङ. 'रस्य। ११ ठ. ङ. 'रस्यो'। १२ क. ख. 'भयथार्थं'। ठ. ङ. 'भयथात्वे।

(विद्यार्थानामाश्रमधर्माणां च यज्ञादीनां सकृदनुष्ठानम्, अधि० ८)

इत्यत्र नित्यादग्निहोत्रात्कर्मान्तरमुपदिश्यते नैवमिह कर्मभेदोऽस्तीत्यर्थः । कुतः । " उभयलिङ्गात् " । श्रुतिलिङ्गात्स्मृतिलिङ्गाच्च । श्रुतिलिङ्गं तावत् " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति " [बृ० ४-४-२२] इति सिद्धवदुत्पन्नरूपाण्येव यज्ञादीनि विविदिषायां विनियुङ्क्ते न तु " जुहुति " इत्यादिवदपूर्वमेषां रूपमुत्पादयतीति । स्मृतिलिङ्गमपि—

" अनाश्रितः कर्मफलं कार्यं कर्म करोति यः "

[भ०गी०६-१] इति विज्ञातकर्तव्यताकमेव कर्म विद्योत्पत्त्यर्थं दर्शयति । " यस्यैतेऽष्टाचत्वारिंशत्संस्काराः " इत्याद्यं च संस्कारप्रसिद्धिर्वैदिकेषु कर्मसु तत्संस्कृतस्य विद्योत्पत्तिमभिप्रेत्य स्मृतौ भवति । तस्मात्साध्विदमभेदावधारणम् ॥ ३४ ॥

संयुक्ततया विहितानामपि कर्मणां प्रकरणभेदादेव कर्मान्तरत्वशङ्कायां दृष्टान्ते जुहुतीतिहोमविधिश्रुतेर्मासाख्यकालस्य चानुपादेयत्वेनाविधेयत्वादग्निहोत्रशब्दस्य चाऽऽख्यातपारतन्त्र्यादाख्यातस्य च जुहोतेः संनिहितरूपवत्कर्म हित्वा व्यवहितनैयमिकाग्निहोत्रपरामर्शित्वायोगादाख्यातार्थवाचिनोऽग्निहोत्रशब्दस्यापि कर्मान्तरविषयत्वमेवेति युक्तम् । विविदिषावाक्ये तु विविदिषायामेव विधिश्रवणात्प्रसिद्धानामेव यज्ञादीनां यज्ञादिशब्दैरनुवादाद्विद्यासंयोगमात्रं विधीयते तेषामिति न कर्मान्तरतेत्यर्थः । उक्तमेवार्थं प्रश्नद्वारा हेतुमवतार्य स्फोरयति—कुत इत्यादिना । प्रसिद्धकर्मसु संस्कारत्वप्रसिद्धिरपि तेषां चित्तमलनिरासेन ज्ञानोत्पत्तावुपकारकत्वमावेदयन्ती कर्मभेदं सूचयतीत्याह—अष्टेति । गर्भाधानादयः सहधर्मचारिणीसंयोगान्ताश्चतुर्दश पञ्च महायज्ञाः सप्त सोमसंस्थाः सप्त हविःसंस्थाः सप्त पाकसंस्था इति चत्वारिंशत्संस्काराः । अनभ्यसंहिताध्ययनं प्रायणं कर्म जप उत्क्रमणं दैहिकं भस्मसमूहनमस्थिसंचयनं श्राद्धानीत्येवमष्टाचत्वारिंशत्संस्काराः । कर्मभेदाशङ्कायोगे फलितमाह—तस्मादिति ॥ ३४ ॥

नित्यानि कर्माणि स्वतः पुण्यलोकावाप्तिफलान्यपि ज्ञानकामेनानुष्ठितानि ज्ञानार्थानीत्युक्तम् । इदानीं ब्रह्मचर्यादीनामाश्रमकर्मणां क्लेशतनूकरणेन विद्योदये हेतुतेत्यत्र

---

१ क ज. ञ. ट. न जु° । २ ङ. ञ. °मेवैषां । ३ ट. °ति निर्शात° । ४ क. ज. °तात्मक° । ५ झ. °द्या सं° । ६ झ. °रत्वप्र° । ७ ट. ड. °मर्शायो° । ८ ङ. ञ. °षाया° । ९ ठ. ड. °हकर्म° । १० क. °णीसहसं: । ११ क. ख. ङ. ञ. °संस्थाः । अ° । १२ क. ख. ङ. ञ. °नीत्यष्टेत्ये° ।

(अनाश्रमिणो ज्ञानसंभावनम्, अधि० ९)

अनभिभवं च दर्शयति ॥ ३५ ॥ (८)

सहकारित्वस्यैवैतदुपोद्बलकं लिङ्गदर्शनम् " अनभिभवं च दर्शयति " श्रुतिर्ब्रह्मचर्यादिसाधनसंपन्नस्य रागादिभिः क्लेशैः " एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दति[1] " [छा० ८-५-३] इत्यादिना । तस्माद्यज्ञादीन्याश्रमकर्माणि च भवन्ति विद्यासहकारीणि चेति स्थितम् ॥ ३५ ॥ (८)

(अनाश्रमिणो ज्ञानसंभावनम्, अधि० ९)

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

विधुरादीनां द्रव्यादिसंपद्रहितानां चान्यतमाश्रमप्रतिपत्तिहीनानामन्तरालवर्तिनां किं विद्यायामधिकारोऽस्ति किंवा नास्तीति संशये नास्तीति तावत्प्राप्तम् । आश्रमकर्मणां विद्याहेतुत्वावधारणात् । आश्रमकर्मासंभवाच्चैतेषामिति । एवं प्राप्त इदमाह—" अन्तरा चापि तु " अनाश्रमित्वेन[3] वर्तमानोऽपि विद्यायामधिक्रियते । कुतः । " तद्दृष्टेः " । रैक्ववाचक्नवीप्रभृतीनामेवंभूतानामपि ब्रह्मवित्त्वश्रुत्युपलब्धेः ॥ ३६ ॥

लिङ्गमाह—**अनभिभवं चेति** । सूत्रस्य तात्पर्योक्तिपूर्वकमक्षरार्थं कथयति—**सहकारित्वस्येति** । उभयविध्यधीनमर्थमुपसंहरति—**तस्मादिति** ॥ ३५ ॥ (८)

आश्रमकर्मणां विद्योपायत्वे सत्यनाश्रमकर्मणां नैवमिति मन्वानं प्रत्याह—**अन्तरेति** । अनाश्रमिणो विधुरादीन्विषयीकृत्य तेषां कर्मित्वप्रसिद्धेर्निन्दाप्रसिद्धेश्च संशयमाह—**विधुरेति** । अत्रानाश्रमकर्मणामुक्तविद्याहेतुत्वोक्त्या पादादिसंगतिः । पूर्वपक्षे यथा विधुरकर्मणां विद्याहेतुत्वासिद्धिस्तथैवाऽऽश्रमकर्मणामपि विद्याहेतुत्वासिद्धिः । सिद्धान्ते त्वाश्रमित्वस्य ज्यायस्त्वात्तत्कर्मणां सुतरां तत्सिद्धिरिति मन्वानः संशयमनूद्य पूर्वपक्षमाह—**नास्तीत्यादिना** । विविदिषावाक्ये यज्ञादिषु प्रत्येकं करणविभक्तिश्रुतेराश्रमकर्माभावेऽपि वर्णमात्रधर्माणां दानादीनां संभवाद्विधुरादीनामपि विद्याधिकारः स्यादित्याशङ्क्य केवलवर्णधर्माणां विद्यासाधनत्वे सत्याश्रमकर्मणां वैयर्थ्यादनाश्रमिणामनधिकारो विद्यायामित्याह—**आश्रमेति** । अनाश्रमकर्मणां न विद्याहेतुतेति पूर्वपक्षमनूद्य सिद्धान्तयति—**एवमिति** । प्रतिज्ञां व्याकरोति—**अनाश्रमित्वेनेति** । तद्दृष्टेरिति व्याचष्टे—**रैक्वेति** ॥ ३६ ॥

---

१ ड. ञ. 'न्दते " इ' । २ ज. 'स्मात्तु यज्ञा' । ३ ड. ञ. 'त्वेनान्तराले व' । ४ ड. 'स्त्वात्क' । ५ ठ ड. 'मधर्माणां ।

(अनाश्रमिणो ज्ञानसंभावनम्, अधि० ९)

अपि च स्मर्यते ॥ ३७ ॥

संवर्तप्रभृतीनां च नग्नचर्यादियोगादनपेक्षिताश्रमकर्मणामपि महायोगित्वं "स्मर्यते" इतिहासे ॥ ३७ ॥

ननु लिङ्गमिदं श्रुतिस्मृतिदर्शनमुपन्यस्तं का नु खलु प्राप्तिरिति साऽभिधीयते—

विशेषानुग्रहश्च ॥ ३८ ॥

तेषामपि[२] च विधुरादीनामविरुद्धैः पुरुषमात्रसंबन्धिभिर्जपोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहो विद्यायाः संभवति। तथा च स्मृतिः—

जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते"

इत्यसंभवदाश्रमकर्मणोऽपि जप्येऽधिकारं दर्शयति। जन्मान्तरानुष्ठितैरपि चाऽऽश्रमकर्मभिः संभवत्येव विद्याया अनुग्रहः। तथा च स्मृतिः—

"अनेकजन्मसंसिद्धस्ततो याति परां गतिम्"

श्रौतीं दृष्टिं शिष्ट्वा स्मार्तीमपि दर्शयति—अपीति ॥ ३७ ॥

श्रुतिस्मृतिभ्यां सिद्धे सिद्धान्तेऽनन्तरसूत्रनिरस्यं चोद्यमाह—नन्विति। जन्मान्तरकृतादपि कर्मणो रैक्कादीनां विद्यासंभवाद्वर्णोपाधावुक्तात्कर्मणो विद्येत्यत्र श्रुतिस्मृत्योरनियामकत्वान्नियामकान्तरं वक्तव्यमित्यर्थः। आश्रमधर्माभावेऽपि वर्णधर्मविशेषैरनुगृहीता विद्योदेष्यतीति सूत्रेण समाधत्ते—सेति। अविरुद्धैरनाश्रमित्वाविरोधिभिरिति यावत्। अत एव पुरुषमात्रसंबन्धिभिरित्युक्तम्। आश्रमधर्मशून्यानां जपादिष्वपि शूद्रादिवन्नाधिकारोऽस्तीत्याशङ्क्याऽऽह—तथा चेति। मैत्रो मित्रे भवः सर्वभूताहिंसको दयावानित्यर्थः। किंच नैयोगिकफलेषु कर्मस्वानन्तर्यस्याचोदितत्वादनियतकालत्वे नैयोगिककर्माभावेऽप्यामुष्मिकैरेव कर्मभिर्विद्या भविष्यतीति सूत्रस्य व्याख्यान्तरमाह—जन्मान्तरेति। जन्मान्तरसंचितकर्मणां विद्यानुग्राहकत्वे मानमाह—तथा चेति। अनेकेषु जन्मसु संचितसंस्कारैः सिद्धः सम्यग्धीपरिपाकवानित्यर्थः। यथाऽस्मिञ्जन्मन्यधीतवेदो धर्मजिज्ञासाधिकारी तथाऽस्मिन्नेव जन्मन्याश्रमै-

---

१ झ. °कर्मिणा°। २ ङ. ज. ञ. °पि वि°। ३ ङ. ञ. ट. °भवादा°। ४ ङ. ञ. जपेऽधि°। ५ क. °मशू°। ६ झ. तथा तस्मि°। ७ ठ. ड. °मकर्मभिरु°।

[भ० गी० ६-४५] इति जन्मान्तरसंचितानपि संस्कारविशेषाननुग्रहीतॄन्विद्यायां दर्शयति। दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणाप्यर्थिनमधिकरोति श्रवणादिषु। तस्माद्विधुरादीनामप्यधिकारो न विरुध्यते ॥ ३८ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥ (९)

अतस्त्वन्तरालवर्तित्वादितरदाश्रमवर्तित्वं "ज्यायो" विद्यासाधनम्। श्रुतिस्मृतिसंदृष्टत्वात्। श्रुतिलिङ्गाच्च " तेनैति ब्रह्मविदपुण्यकृत्तैजसश्च " [बृ० ४-४-९] इति।

" अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः।
संवत्सरमनाश्रमी स्थित्वा कृच्छ्रमेकं चरेत् "

इति च स्मृतिलिङ्गात् ॥ ३९ ॥ (९)

(आश्रमिणामवरोहाभावनिरूपणम्, अधि० १०)

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः ॥ ४० ॥ (१०)

र्धर्मैरुत्पादितविविदिषो विद्याधिकारी स्यादित्याशङ्क्याऽऽह—दृष्टार्थेति। अविद्यानिवृत्तेर्दृष्टफलत्वान्नियमापेक्षाभावाद्विघातकनिषेधस्याभावमात्रेण तत्र पुरुषस्य प्रवृत्तिरित्यर्थः। श्रुतिस्मृतिन्यायसिद्धमर्थमुपसंहरति—तस्मादिति ॥३८॥

वर्णोपाधावुक्तधर्ममात्रादापि विद्योत्पद्यते चेदाश्रमित्वमनर्थकमित्याशङ्क्याऽऽह—अतस्त्विति। विद्यायाश्चिराचिरव्यक्तिहेतुतयाऽऽश्रमित्वानाश्रमित्वयोर्विशेषान्न वैयर्थ्यमिति मत्वा व्याचष्टे—अत इति। साधनोपचयादचिरेण विद्याहेतुत्वं ज्यायस्त्वम्। आश्रमित्वस्य ज्यायस्त्वे श्रुतिस्मृत्यनुगृहीतत्वं हेतुमाह—श्रुतीति। श्रुतौ पुण्यकृत्त्वविशेषणालिङ्गाच्च श्रेष्ठमाश्रमित्वमित्याह—श्रुतीति। तेन ज्ञानमार्गेण ब्रह्मविदेति गच्छति ब्रह्म प्राप्नोति स च पुण्यं स्वाश्रमोक्तं कर्म करोतीति पुण्यकृदुच्यते। तेजसि परमात्मन्यात्मत्वेन वर्तत इति तैजसः। तत्र पुण्यकृत्त्वविशेषणादाश्रमित्वं ब्रह्मप्राप्तिहेतुतया श्रेष्ठं सिद्धमित्यर्थः। आश्रमित्वस्य श्रेष्ठत्वे स्मार्तमपि लिङ्गमनुकूलयति—अनाश्रमीति ॥ ३९ ॥ (९)

अनाश्रमिणां कर्मापि विद्याहेतुश्चेदारूढपतितस्य पूर्वाश्रमं प्राप्तस्य धीपूर्वकं प्रच्युतस्य कर्म किमु वाच्यमित्याशङ्क्याऽऽह—तद्भूतस्येति। वृत्तानुवादेन विषयं

---

१ क ङ. ञ. ट. °द्याया द°। २ ङ. ञ. °दृब्धत्वा°। ३ ङ. °स्य ना°। ४ ञ, °धर्मोत्पा°। ५ क. ख. ङ. ञ. ट. ड. °षणलिङ्गा°। ६ ठ. ड. °स्य क°।

(आश्रमिणामवरोहाभावनिरूपणम्, अधि० १०)

सन्त्यूर्ध्वरेतस आश्रमा इति स्थापितम् । तांस्तु प्राप्तस्य कथंचित्ततः प्रच्युतिरस्ति नास्ति वेति संशयः । पूर्वधर्मस्वनुष्ठानचिकीर्षया[1] वा रागादिवशेन वा प्रच्युतोऽपि स्याद्विशेषाभावादिति । एवं प्राप्त उच्यते—"तद्भूतस्य तु" प्रतिपन्नोर्ध्वरेतोभावस्य न कथंचिदे[2]प्यतद्भावो न ततः प्रच्युतिः स्यात् । कुतः । "नियमातद्रूपाभावेभ्यः" । तथा हि "अत्यन्तमात्मानमाचार्यकुलेऽवसादयन्" [छा० २-२३-२] इति "अरण्यमियादिति पदं ततो न पुनरेयादित्युपनिषत्" इति ।

"आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम् ।
आ विमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधि"

[महाभा० १२-२३४-४]

इति चैवंजातीयको नियमः प्रच्युत्यभावं दर्शयति । यथा च "ब्रह्मचर्यं समाप्य गृही भवेत्" [जाबा० ४] "ब्रह्मचर्यादेव प्रव्रजेत्" [जाबा० ४] इति चैवमादीन्यारोहरूपाणि

सूचयति—सन्तीति । तानाश्रमान्प्राप्तस्य धीपूर्वं प्रच्युतस्य कर्म विषयस्तत्किं विद्याहेतुर्न वेति संशयं सिद्धवत्कृत्य तद्धेतुमाह—तांस्त्विति । कथंचिद्रागाद्युद्रेकादित्यर्थः । सा मानवती न वेति संशयार्थः । ऊर्ध्वरेतसां बुद्धिपूर्वं प्रच्युतानां कर्म यथोक्तविद्याहेतुर्नेत्युक्त्या पादादिसंगतिः । पूर्वपक्षे पूर्वोक्ताश्रमित्वश्रैष्ठ्यासिद्धिः । सिद्धान्ते प्रच्युतेरप्रामाणिकत्वात्तत्सिद्धिरिति स्वीकृत्य पूर्वपक्षयति—पूर्वेति । पूर्वाश्रमोक्तो यागादिधर्मः सुखेन शक्योऽनुष्ठातुमिति तच्चिकीर्षया रागद्वेषवशेन च प्रत्यवरोहोऽपि प्रामाणिकः स्यात्तथाचानाश्रमिकर्म निन्दितमपि यथा विद्यासाधनमुक्तं तथा प्रत्यवरूढस्यापि कर्म विद्याहेतुराश्रमावरोहोऽनुष्ठेयस्तदारोहावरोहयोरन्यतरत्वात्तदारोहवदित्यवरोहस्य प्रामाणिकत्वादित्यर्थः । सिद्धान्तसूत्रमवतार्य व्याकरोति—एवमिति । उत्तराश्रमं प्राप्तस्य पूर्वाश्रमप्राप्तिरप्रामाणिकीत्यत्र प्रश्नपूर्वकं हेतुत्रयमाह—कुत इति । तत्र नियमं व्याचष्टे—तथा हीति । अरण्यमित्येकान्तोपलक्षितमूर्ध्वरेतस्त्वं तदियाद्गच्छेदिति पदं शास्त्रमार्गस्ततस्तस्मादरण्यान्न पुनरेयात्पुनर्नाऽऽगच्छेन्न प्रत्यवरोहेदित्युपनिषद्रहस्यमित्यर्थः । स्मार्तमपि नियमं कथयति—आचार्येणेति । उक्तनियमतात्पर्यमाह—एवमिति । अतद्रूपमप्रत्यवरोहं (हत्वेन) व्याकरोति—यथा चेति ।

---

१ क. ङ. ञ. °या रा° । २ ट. °दत° । ३ क. ख. ङ. ञ. ठ. ड. °ति विमर्शार्थः । ४ ङ. ञ. ठ. ड. °मोक्तया° । ५ क. ख. °न प्र° ।

वचांस्युपलभ्यन्ते नैवं प्रत्यवरोहरूपाणि । न चैवमाचाराः शिष्टा विद्यन्ते । यत्तु पूर्वधर्मस्वनुष्ठानचिकीर्षया प्रत्यवरोहणमिति तदसत्,

" श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् "

[भ० गी० ३-३५] इति स्मरणात् । न्यायाच्च । यो हि यं प्रति विधीयते स तस्य धर्मो न तु यो येन स्वनुष्ठातुं शक्यते चोदनालक्षणत्वाद्धर्मस्य । न च रागादिवशात्प्रच्युतिः । नियमशास्त्रस्य बलीयस्त्वात् । "जैमिनेरपि "इत्यपिशब्देन जैमिनिबादरायणयोरत्र संप्रतिपत्तिं शास्ति प्रतिपत्तिदार्ढ्याय॥४०॥(१०)

(भ्रष्टोर्ध्वरेतसः प्रायश्चित्तसद्भावः, अधि० ११)

न चाऽऽधिकारिकमपि पतनानुमानात्तदयोगात् ॥४१॥

यदि नैष्ठिको ब्रह्मचारी प्रमादादवकीर्येत किं तस्य " ब्रह्मचार्यवकीर्णो नैर्ऋतं गर्दभमालभेत " इत्येतत्प्रायश्चित्तं स्यादुत नेति । उच्यते—यद्प्यधिकारलक्षणे निर्णीतं प्रायश्चित्तम्

अभावं शिष्टाचाराभावं(वत्वेन) व्याचष्टे—न चेति । परोक्तमनुमानमनूद्य स्मृतिविरोधेन दूषयति—यत्त्विति । इतश्चानुमानमयुक्तमित्याह—न्यायाच्चेति । यत्तु रागादिवशात्प्रत्यवरोहणमिति तत्राऽऽह—न चेति । ततो न पुनरित्यादि नियमशास्त्रम् । अवशिष्टं सूत्रावयवं व्याचष्टे—जैमिनेरिति । अत्रेति प्रामाणिकप्रच्युत्यभावोक्तिः । उभयसंप्रतिपत्तिफलमाह—प्रतिपत्तीति ॥ ४० ॥ (१०)

प्रत्यवरोहणमशास्त्रीयमित्युक्तम् । संप्रति प्रमादात्प्रत्यवरोहे प्रायश्चित्तमस्तीति वक्तुं पूर्वपक्षमाह—न चेति । ऊर्ध्वरेतसोऽधीपूर्वच्युतब्रह्मचर्यं विषयस्तेषां किं नास्ति प्रायश्चित्तमुताऽस्तीति प्रायश्चित्ताभावस्मृतेर्महापातकेष्वनुक्तेश्च संशयमाह—यदीति । प्रमादादित्यधीपूर्वच्युतब्रह्मचर्याणामेवोर्ध्वरेतसां प्रायश्चित्तचिन्तेयमिति द्योतयति । अवकीर्येत योनौ रेतः सिञ्चेदवकीर्णं योनौ क्षिप्तं रेतोऽस्यास्तीत्यवकीर्णी । प्रमादाच्युतब्रह्मचर्याणामूर्ध्वरेतसां कृतप्रायश्चित्तानां कर्म विद्याहेतुरित्युक्त्या पादादिसंगतिः । पूर्वपक्षे प्रमादिनामूर्ध्वरेतसामात्यन्तिकोऽधःपातात्पुमर्थासिद्धिः । सिद्धान्ते तेषामपि प्रायश्चित्तेन पतनसमाधानात्तत्सिद्धिरित्युपेत्य पूर्वपक्षसूत्रमवतार्य योजयति—उच्यत इति।

---

१ ङ. 'वर्कर्मं' । २ क. ज. स्यादिति । नेत्युच्य' । ३ ङ. ञ. 'ति । नेत्युच्य' । ४ ङ. 'दात्तत्प्र' । ५ ठ. 'पूर्व च्यु' । ६ ङ. 'वंप्रच्यु' । ७ झ. ठ. ड. 'ताऽस्ति प्रा' । ८ ठ. ड. 'न्तेति । ९ झ 'काधः' ।

(भ्रष्टोर्ध्वरेतसः प्रायश्चित्तसद्भावः, अधि० ११)

"अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वात्" [पू०मी०सू०६-८-२२] इति तदपि न नैष्ठिकस्य भवितुमर्हति । किं कारणम्,

" आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ।

प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा "

इत्यप्रतिसमाधेयपतनस्मरणाच्छिन्नशिरस इव प्रतिक्रियानुपपत्तेः । उपकुर्वाणस्य तु तादृक्पतनस्मरणाभावादुपपद्यते तत्प्रायश्चित्तम् ॥ ४१ ॥

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥४२॥ (११)

" अपि त्वेके " आचार्या उपपातकमेवैतदिति मन्यन्ते । यन्नैष्ठिकस्य गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यं विशीर्येत[1] न तन्महापातकं भवति गुरुतल्पादिषु महापातकेष्वपरिगणनात् ।

तदेव षष्ठाध्याये निर्धारितं प्रायश्चित्तमुदाहरति--अवकीर्णीति । ब्रह्मचार्यवकीर्णीत्यत्र पशुहोमार्थमाधानं कर्तव्यं किंवा लौकिकेष्वेवाग्निषु तत्कर्मेति संदेहे पूर्वाधिकरणे यदाहवनीये जुहोति तेन सूर्योऽस्याभीष्टः प्रीतो भवतीत्याहवनीयस्य सर्वहोमार्थत्वादाहवनीये तावदुपनयनहोमाः कार्या इति प्राप्य्य जातपुत्रोऽग्नीनादधीतेति कृतदारस्याग्न्याधानविधानादुपनयनकाले दाराभावादाधानस्याप्राप्तकालत्वादाहवनीयाभावाल्लौकिकाग्निषूपनयनहोमा[2] इति राद्धान्तिते ब्रह्मचारी ययाऽवकीर्णी सैव तस्य भार्या स्यात्ततोऽग्न्याधानमित्यधिकां शङ्कां निराकर्तुमतिदेशाधिकरणमवकीर्णिपशुश्चेति यथोपनयनकाले लौकिकाग्नौ होमस्तथाऽवकीर्णिपशुश्च तत्रैव होतव्यः । आधानस्य पत्नीपरिग्रहोत्तरकालतया पूर्वं[3] प्राप्त्यभावादितरस्यार्थे परपरिग्रहभूताया भार्यात्वकल्पनयाऽऽधाने मानाभावादित्यर्थः । यदधिकारलक्षणे निर्णीतमाधिकारिकं प्रायश्चित्तं तदपि नैष्ठिकस्य भवितुं नार्हतीति संबन्धः । प्रश्नपूर्वकं हेतुमाह--किमित्यादिना । किंविषयं तर्हि प्रायश्चित्तवचनं ब्रह्मचारित्वाविशेषादुपकुर्वाणस्यापि तदयोगात्तत्राऽऽह--उपेति । तादृगित्यप्रतिसमाधेयत्वोक्तिः ॥ ४१ ॥

सिद्धान्तयति--उपपूर्वमिति । उपपदं पूर्वं यस्य पतनस्य तदुपपूर्वमिति व्याकरोति--अपि त्विति । प्रायश्चित्ताभावं व्यावर्तयितुमपीति प्रयुक्तम्[4] । एवकारार्थमाह--नेति । नैष्ठिकव्रतलोपस्योपपातकत्वेऽपि प्रायश्चित्तसत्त्वे किं जातमित्याशङ्क्योपपात-

---

१ क. ङ. ज. ञ. विशीर्यते । २ क. क. ठ. ड. °धिकाग्नि° । ङ. ञ. °धिकग्नि° । ३ क. ङ. ञ. पूर्वप्रा° । ४ ङ. °श्च परि° । ५ ङ. ञ. प्रत्युक्तं° ।

तस्मादुपकुर्वाणवन्नैष्ठिकस्यापि प्रायश्चित्तस्य भावमिच्छन्ति ब्रह्मचारित्वाविशेषादवकीर्णित्वाविशेषाच्च। "अशनवत्" यथा ब्रह्मचारिणो मधुमांसाशने व्रतलोपः पुनः संस्कारश्चैवमिति। ये हि प्रायश्चित्तस्याभावमिच्छन्ति तेषां न मूलमुपलभ्यते। ये तु भावमिच्छन्ति तेषां " ब्रह्मचार्यवकीर्णी" इत्येतदविशेषश्रवणं मूलम्। तस्माद्भावो युक्ततरः। तदुक्तं प्रमाणलक्षणे—" समा विप्रतिपत्तिः स्यात्" [पू० मी० सू० १-३-८]"शास्त्रस्था वा

कसामान्यप्रायश्चित्तं स्यादिति सूत्रावयवं व्याकुर्वन्नाह—**तस्मादिति**। उक्तमर्थं दृष्टान्तमवतार्य स्पष्टयति—**अशनवदिति**। प्रायश्चित्तं न पश्यामीति स्मरणात्कथं तद्भावधीरित्याशङ्क्याऽऽह—**ये हीति**। प्रायश्चित्तं नास्तीति स्मरणाभावान्न पश्यामीति दर्शनाभावमात्रस्मरणादित्यर्थः। भाववादिनामपि तुल्या मूलानुपलब्धिरित्याशङ्क्याऽऽह—**ये त्विति**। ननु न पश्यामीति स्मरणस्य प्रायश्चित्तनिषेधार्थत्वमनुमाय तदर्थश्रुतिकल्पनात्तद्विरोधे सामान्यश्रुत्या प्रायश्चित्तसत्ता नाभ्युपगम्यते तत्राऽऽह—**तस्मादिति**। यावद्दर्शनाभावस्मरणस्य प्रायश्चित्तनिषेधार्थत्वकल्पनया तदर्था श्रुतिरनुमीयते तावद्विशेषप्रवृत्ता प्रायश्चित्तं श्रुतिर्गमयतीति न स्मृत्या प्रायश्चित्ताभावधीरिति भावः। उक्तेऽर्थे यववराहाधिकरणसंमतिमाह—**तदुक्तमिति**। यवमयश्चरुर्वाराही उपानहावित्यत्र यववराहशब्दाभ्यां प्रियंगुकृष्णशकुनिग्रहो वा दीर्घशूकंसूकरग्रहो वेति संदेहे पूर्वपक्षमाह—**समेति**। केचिद्दीर्घशूके यवशब्दं प्रयुञ्जते प्रियंगुषु चापरे वराहशब्दमपि सूकरे केचिदाहुः कृष्णशकुनौ चान्ये तेन प्रयोगसाम्यात्समा तुल्या विकल्पेन प्रतिपत्तिः स्यादित्यर्थः। सिद्धान्तमाह—**शास्त्रस्था वेति**। वाशब्दः पक्षव्यावृत्त्यर्थः। या शास्त्रमूला धीः सैव ग्राह्या शास्त्रनिमित्तत्वात्तद्धर्मादिज्ञानस्य। शास्त्रं च यदा वाऽन्या ओषधयो म्लायन्त्यथैते मोदमानास्तिष्ठन्ति वराहं गावोऽनुधावन्तीति च यववराहशब्दयोर्दीर्घशूकसूकरविषयम्। तस्माद्धीसाम्याभावाद्विकल्पासिद्धेर्या शास्त्रमूला प्रसिद्धिः सैव ग्राह्येति प्रथमेऽसिद्धम्। तथाऽत्रापि शास्त्रमूलत्वात्प्रायश्चित्तभावेप्रसिद्धेस्तत्सत्त्वमुक्तमित्यर्थः। प्रायश्चित्तं न पश्यामीति-

---

१ क. ज. ट. °णकव°। २ ङ. अ. °त्तभा°। ३ ङ. अ. °श्चित्ताभा° ४ ङ. अ. °न्ति न ते°। ५ ङ. अ. °षां मू°। ६ ङ. अ. °ति श्रवणा°। ७ ङ. अ. °दर्थश्रु°। ८ ङ. अ. °दतिशे°। ९ ङ. अ. °षवृत्त्या प्रा°। १० ङ. अ. °कशूक°। ११ ङ. अ. शूकरे। १२ ङ. अ. °दा चान्या। ठ. °दाऽन्या। १३ क. ख. ङ. अ. ठ. ङ. °मेऽध्याये सि°। १४ ङ. अ. °श्चित्ताभा°। १५ ङ. अ. °वसि°। १६ ङ. अ. ट. ङ. °त्सत्त्वं युक्त°।

(ऊर्ध्वरेतसः प्रायश्चित्तसद्भावः, अधि० ११)

तन्निमित्तत्वात् " [पू० मी० सू० १-३-९] इति । प्रायश्चित्ताभावस्मरणं त्वेवं सति यत्नगौरवोत्पादनार्थमिति व्याख्यातव्यम् । एवं भिक्षुवैखानसयोरपि वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षं वर्धयेत् । भिक्षुर्वानप्रस्थवत्सोमवृद्धिवर्जं स्वशास्त्रसंस्कारश्चेत्येवमादि प्रायश्चित्तस्मरणमनुस्मर्तव्यम् ॥ ४२ ॥ (११)

स्मृतेस्तर्हि का गतिस्तत्राऽऽह—**प्रायश्चित्तेति** । एवं सति सामान्यश्रुत्या प्रायश्चित्तसत्त्वे निश्चिते सतीत्यर्थः । यदि कथंचिन्नैष्ठिकस्य ब्रह्मचर्यं लुप्येत तदा न प्रायश्चित्तं दृश्यते तेन नैष्ठिकेन ब्रह्मचर्ये यत्नवता भाव्यमिति तद्विषयं यत्नस्याप्रमादेन सदाकार्यतारूपं गौरवमुत्पादयितुं प्रायश्चित्ताभावस्मरणमित्यर्थः । नैष्ठिके हि दर्शितन्यायमितरयोरतिदिशति—**एवमिति** । विशेषतोऽपि प्रायश्चित्तविधेस्तयोरस्ति प्रामादिके व्रतलोपे प्रायश्चित्तमित्याह—**वानप्रस्थ इति** । दीक्षाभेदे व्रतलोपे प्रमादतो ब्रह्मचर्यभङ्गे कृच्छ्रं चरित्वा महाकक्षं बहुतृणकाष्ठं देशं वर्धयेदिति संबन्धः । कृच्छ्रं विशिनष्टि—**द्वादशेति** । दिनत्रयमेकवारभोजनं दिनत्रयं रात्रिभोजनं दिनत्रयमयाचितं दिनत्रयमुपवासकरणमित्येवंरूपमित्यर्थः । पारिव्राजकेऽपि प्रमादतो व्रतलोपे तुल्यं कृच्छ्रानुष्ठानमित्याह—**भिक्षुरिति** । सोमस्य यज्ञाङ्गत्वात्तदभिवृद्धिमनादृत्य महाकक्षं वर्धयेदित्याह—**सोमेति** ।

" सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् ।
पुनः स पूतो भवति किं पुनः पावन एव च ॥
मनोवाक्कायजान्दोषाञ्ज्ञानोत्थांश्च प्रमादजान् ।
सर्वान्दहति योगाग्निस्तूलराशिमिवानलः ॥
उपपातकसंघेषु पातकेषु महत्सु च ।
प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेत् ॥
नित्यमेव तु कुर्वीत प्राणायामांस्तु षोडश ।
अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः "

इत्यादि परिव्राजकविषयं शास्त्रं तेनाभिहितः संस्कारो ध्यानादिः स च कर्तव्यो भिक्षुणेत्याह—**स्वशास्त्रेति** । ऊर्ध्वरेतसां प्रमादच्युतब्रह्मचर्याणां कृतप्रायश्चित्तानामधिकारोऽस्ति विद्यायामिति भावः ॥ ४२ ॥ (११)

---

१ क. 'रवापाद' । २ क. ङ. ज. ञ. ट. 'नुसर्त' । ३ ङ. ञ. 'यस्य य' । ४ क ङ.'र्थः । पारि' । ५ झ. ध्यायेन्नि' । ६ ट. ड. 'षानज्ञा' । ७ ठ. ड. 'नोत्थान्प्रमा' । ८ ङ. ञ. 'पातेषु सर्वेषु पा' । ९ ख. ठ. ड. 'तकेषु सर्वेषु पा' ।

(भ्रष्टोर्ध्वरेतसः प्रायश्चित्तेनाऽऽमुष्मिकशुद्धिः, तादृशशुद्धिमतो व्यवहारानर्हत्वं च, अधि० १२)

बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥ ४३ ॥ (१२)

यद्यूर्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकं यदि वोपपातकमुभयथाऽपि शिष्टैस्ते बहिष्कर्तव्याः,

" आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ।
प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा " इति,

" आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम् ।
उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत् "

इति चैवमादिनिन्दातिशयस्मृतिभ्यः । शिष्टाचाराच्च । न हि यज्ञाध्ययनविवाहादीनि तैः सहाऽऽचरन्ति शिष्टाः ॥ ४३ ॥ (१२)

(उपासनस्यार्त्विक्कर्मत्वम् , अधि० १३)

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

कृतप्रायश्चित्तानामपि तेषां शिष्टाव्यवहार्यत्वमाह—बहिस्त्विति । कृतप्रायश्चित्तैः सह शिष्टाचाररूपं कर्म विषयस्तत्किं विद्याङ्गं किंवा नेति संशये प्रागुक्तप्रायश्चित्तेनैव तेषां व्यवहार्यताऽसिद्धेरङ्गमिति प्राप्ते सिद्धान्तमाह—यदीति । प्रतिज्ञार्थमुक्त्वा हेतुद्वयं व्याकरोति—आरूढ इत्यादिना । दुश्चरिताचरणकृतमेनो लोकद्वयेऽपि कर्तुरशुद्धिमादधाति । तत्र प्रायश्चित्तेन लोकद्वयेऽपि कस्यचिदशुद्धिरपनीयते कस्यचित्तु पारलौकिकाशुद्धिरपाक्रियत ऐहिकाशुद्धिरनुवर्तते । उक्तं हि—

" बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः ।
शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवदेत् " इति ।

तथेहापि " आरूढो नैष्ठिकम् " इत्यादिस्मृतिलिङ्गादाचाराच्च परलोकाशुद्धेरपनीतत्वेऽप्यव्यवहार्यत्वावगमान्न तैर्व्यवहाररूपाचारस्य विद्याङ्गत्वम् । तदेवमुक्ताचारस्योक्तविद्यानङ्गत्वाभिधानात्प्रासङ्गिकी पादादिसंगतिः । पूर्वपक्षे " बालघ्नान् " इत्यादिस्मृतिविरोधः । सिद्धान्ते तदानुगुण्यमिति भावः ॥ ४३ ॥ (१२)

अन्यस्मिन्पापैकारिणि तेन व्यवहारादन्यस्य त्वपकारवदन्यस्मिन्नुपास्तिकर्तरि तेन व्यवहारात्फललक्षणोपकारमन्ययजमानस्य दर्शयन्पूर्वपक्षयति—स्वामिन इति । कर्मा-

---

१ क. झ. ट. यदूर्ध्वं । २ क. घ. ज. 'दि चोप' । ३ झ. 'त्तैः शि' । ४ क. ख. ङ. ञ. 'श्चित्तैरेव । ५ ख. 'चित्पार' । ६ ख. 'किंक्यशु' । ७ झ. 'पहारि' ।

(उपासनस्यार्त्विक्कर्मत्वम्, अधि० १३)

अङ्गेषूपासनेषु संशयः—किं तानि यजमानकर्माण्याहोस्विदृत्विक्कर्माणीति। किं तावत्प्राप्तं यजमानकर्माणीति। कुतः। "फलश्रुतेः"। फलं हि श्रूयते—"वर्षति हास्मै वर्षयति ह य एतदेवं विद्वान्हृष्टौ पञ्चविधं सामोपास्ते" [छा० २-३-२] इत्यादि। तच्च स्वामिगामि न्याय्यम्। तस्य साङ्गे प्रयोगेऽधिकृतत्वात्। अधिकृताधिकारत्वाच्चैवंजातीयकस्य। फलं च कर्तुर्युपासनानां श्रूयते "वर्षत्यस्मै य उपास्ते" इत्यादि। नन्वृत्विजोऽपि फलं दृष्टम्। "आत्मने वा यजमानाय वा यं कामं कामयते तमागायति" [बृ० १-३-२८] इति। न। तस्य वाचनिकत्वात्। तस्मात्स्वामिन एव फलवत्सूपासनेषु कर्तृत्वमित्यात्रेय आचार्यो मन्यते ॥ ४४ ॥

अङ्गसङ्गीन्युपासनानि विषयस्तेषूभयकर्तृकर्तृत्वधिया संशयमाह—अङ्गेष्विति। शास्त्रीयाङ्गाश्रितोपास्तीनां स्वतन्त्रफलानामृत्विक्कर्तृकत्वेऽपि यजमानगामिफलत्वोक्तेरस्ति पादादिसंगतिः। पूर्वपक्षे कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यासिद्धिः। सिद्धान्ते प्रकृतस्य कर्तुरस्वातन्त्र्यात्तस्य यजमानाधीनत्वात्तत्कर्तृत्वमपि तदधीनमित्यैकाधिकरण्यस्याविरुद्धतेति सिद्धवत्कृत्य प्रश्नपूर्वकं पूर्वपक्षमाह—किमिति। तत्र हेतुं प्रश्नद्वारा दर्शयति—कुत इति। फलश्रुतिमेव विशदयति—फलं हीति। श्रुतमपि फलमृत्विग्गतं किं न स्यात्तत्राऽऽह—तच्चेति। तत्र हेतुः—तस्येति। उद्गीथाद्युपास्तिविधीनां प्राप्तोद्देशनत्वात्क्रत्वधिकारिण एव प्राप्तेस्तस्यैवोद्देशनयोगात्तदाश्रितोपास्तीनां गोदोहनवदधिकृताधिकारत्वात्क्रत्वधिकारिण एव गोदोहनफलवद्विद्याफलेन संगतिरित्याह—अधिकृतेति। तथाऽपि कथमुपास्तीनां यजमानत्वं तत्राऽऽह—फलं चेति। अकर्तृत्वे फलित्वमपि यजमानस्य न स्यात्कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यादित्यर्थः। यजमानगामि फलमित्यत्र व्यभिचारं शङ्कते—नन्विति। उत्सर्गतो यजमानं फलं वचनात्क्वचिदपवादः स्यादित्याह—न तस्येति। वाचनिकापवादाभावे तूत्सर्गस्थितिरित्युपसंहरति—तस्मादिति ॥ ४४ ॥

---

१ ङ. ज. ञ. 'र्माणि किं। २ ट. 'मि फलं न्या'। ३ ज. 'नायां श्रू'। ४ ट. 'दिना। न'। ५ झ. 'यं यं कामं। ६ ङ. ञ. 'सङ्गान्यु'। ७ ङ. ञ. षयास्ते'। ८ ठ. ड. 'कधि'। ९ ख. 'मित्येका'। १० ख. 'रणतावि'। ११ झ. 'धिकरण। १२ क. ख. ङ. ञ. ठ. ड. 'कारित्वा'। १३ झ. ठ. ड. 'धिकरण। १४ ङ. ञ. 'बतो विद्या'। १५ क. ङ. ञ. 'लितत्व'।

(उपासनस्यार्त्विक्कर्मत्वम्, अधि० १३)

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४५ ॥

नैतदस्ति स्वामिकर्माण्युपासनानीति । ऋत्विक्कर्माण्येतानि स्युरित्यौडुलोमिराचार्यो मन्यते । किं कारणं, " तस्मै हि " साङ्गाय कर्मणे[1] यजमानेनार्त्विक् " परिक्रीयते "। तत्प्रयोगान्तःपातीनि चोद्गीथाद्युपासनान्यधिकृताधिकारत्वात्[2] । तस्माद्धोदोहनादिनियमवदेवर्त्विग्भिर्निर्वर्त्येरन्[3] । तथा च " तं ह बको दाल्भ्यो विदांचकार स ह नैमिशीयानामुद्गाता बभूव "[4] [छा० १-२-१३] इत्युद्गातृकर्तृकतां विज्ञानस्य दर्शयति । यत्तूक्तं कर्त्राश्रयं[5] फलं श्रूयत इति । नैष दोषः । परार्थत्वादृत्विजोऽन्यत्र वचनात्फलसंबन्धानुपपत्तेः ॥ ४५ ॥

श्रुतेश्च ॥ ४६ ॥ (१३)

" यां वै कांचन यज्ञ ऋत्विज आशिषमाशासत इति यजमानायैव तामाशासत इति होवाचेति " [शत० १-३-१-२६]

अङ्गोपास्तीनां याजमानत्वान्न स्वतन्त्रफलतेति प्राप्ते सिद्धान्तयति—**आर्त्विज्यमिति** । तत्र प्रतिज्ञां विभजते— **नैतदिति** । अन्यकर्तृकत्वे कथमन्यस्य फलमिति शङ्कते—**किं कारणमिति** । सूत्रावयवेनोत्तरमाह—**तस्मै हीति** । ऋत्विजो यजमानेन स्वगामिने फलाय क्रीतत्वान्नानुपपत्तिरित्यर्थः । साङ्गकर्मार्थं क्रीतत्वेऽपि ध्यानार्थमक्रीतत्वात्कथमुपास्तीनामृत्विक्कर्मत्वं तत्राऽऽह—**तदिति** । अङ्गोपास्तीनामधिकृताधिकारत्वे फलितमाह—**तस्मादिति** । तासामृत्विक्कर्तृकत्वे श्रौतं लिङ्गमाह—**तथा चेति** । तमुद्गीथाख्यं प्रणवं प्राणादिदृष्टिविशिष्टं बको नामतो दैल्भस्यापत्यं दाल्भ्यो विदांचकार विदितवान् । विदित्वा च नैमिशीयानां सत्रिणामुद्गाताऽऽसीदित्यर्थः । पूर्वपक्षबीजमनुवदति—**यत्त्विति** । उत्सर्गतो याजमानत्वेऽपि फलस्य वचनादपवादो यत्र नैवं तत्रोत्सर्गस्थितिरित्युक्तमित्याह—**नेत्यादिना** ॥ ४५ ॥

इतश्चोपास्तीनामृत्विक्कर्तृकत्वं यजमानगामिफलत्वं चेत्याह—**श्रुतेश्चेति** । उत्स-

---

१ क. ङ. ज ञ. ट. 'र्मण ऋत्विक्प' । २ ङ ञ 'दिकर्मनि' । ३ ट. °र्निवर्त्ये' । ४ ङ. ञ. °र्वर्तेर' । ५ ङ. ञ. °मिषीयाणामु' । ६ ट. °श्रयफ' । ७ क. झ. ट. °ष आशा' । ८ क. ङ. ञ. 'कारित्वे । ९ ङ. दल्भ्यस्या' । १० ङ. ञ. 'मिषीया' । ११ ङ. ज. °याणां स' । १२ क. ङ. ञ. 'त्रियाणा' । १३ ङ. ञ. °नफलगामित्वं ।

(मौनस्य विधेयत्वम्, अधि० १४)

" तस्मादु हैवंविदुद्गाता ब्रूयात्कं ते काममागायानि " [छा० १-७-८] इति[1]। तच्चर्त्विक्कर्तृकस्य विज्ञानस्य यजमानगामि फलं दर्शयति। तस्मादङ्गोपासनानामृत्विक्कर्मत्वसिद्धिः ॥४६॥(१३)

(मौनस्य विधेयत्वम्, अधि० १४)

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥

" तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य[2] बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः" [बृ० ३-५-१] इति बृहदारण्यके श्रूयते। तत्र संशयो मौनं विधीयते न वेति। न विधीयत इति तावत्प्राप्तम्। "बाल्येन

र्गतः श्रुतिलिङ्गैश्च सिद्धमर्थमुपसंहरति—**तस्मादिति**। सिद्धे चोपास्तीनामृत्विक्कर्तृकत्वे तन्निर्धारणानियमन्यायेन स्वतन्त्रफलैत्वसिद्धिरिति भावः ॥ ४६ ॥ (१३)

विधुरप्रभृतीनां मन्दाधिकारिणां धीसाधनोक्तिप्रसङ्गेनाङ्गोपासनमधमधीसाधनमेव[4] निर्धार्य पुनरुत्तममेव धीसाधनं वक्तुमारभते—**सहकार्यन्तरेति**। विषयवाक्यमुदाहरति—**तस्मादिति**। यस्मात्पूर्वे ब्राह्मणा विदित्वाऽऽत्मानमेषणाभ्यो व्युत्थाय[5] भिक्षाचर्यं चरन्तिस्म तस्मादधुनातनोऽपि ब्राह्मणः[6] पाण्डित्यं पण्डाऽध्ययनजा ब्रह्मबुद्धिस्तद्वान्पण्डितस्तस्य कृत्यं पाण्डित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलभावेन युक्तितोऽसंभावनानिरासरूपमननेन शुद्धधीत्वेन वा तिष्ठासेत्स्थातुमिच्छेत्। उक्तदार्ढ्यार्थं बाल्यं चेत्यादिरनुवादः। श्रवणमननानन्तरं मुनिर्मननशीलो निदिध्यासनपरः स्यात्। मौनादन्यद्बाल्यं पाण्डित्यं चामौनं मौनं च निदिध्यासनं निश्चयेन लब्ध्वोक्तहेतुत्रयस्य ब्रह्मधीहेतुत्वाद्ब्रह्माहमित्यवगच्छतीति ब्राह्मणः साक्षात्कृतब्रह्मा भवतीत्यर्थः। तत्र श्रुतं मौनं विषयीकृत्य मौनशब्दस्य सिद्धे पारिव्राज्ये साध्ये च ज्ञानाभ्यासे प्रयोगसिद्धेः संशयमाह—**तत्रेति**। निरुपाधिविद्यान्तरङ्गसाधनमौनविधिसाधनात्पादादिसंगतिः। पूर्वपक्षे मौनस्यानुष्ठेयत्वासिद्धिः सिद्धान्ते तस्यानुष्ठेयत्वसिद्धिरिति मत्वा तं हेत्यादिवाक्यशेषादङ्गोपासनमृत्विक्कर्मेतिवदथ ब्राह्मण इति विधिहीनवाक्यशेषादथ मुनिरित्येषोऽपि न विधिरिति पूर्वपक्षयति—**नेत्यादिना**। ननु बाल्येनेत्युपक्रमे विधिश्रुतेर्मौनेऽपि विधिरस्तु नेत्याह—**बाल्येनेति**। तदेवोपपा-

---

१ क. ङ. ञ. °ति चर्त्वि° । २ ट. °र्विद्याथ ब्रा° । ३ क. ख. °लवत्त्वसि° । ठ. ड. °लसि° । ४ क. ख. ड. ञ. °भेवं नि° । ५ ड. ञ. °मेवैष° । ६ ड. ञ. °त्थायाथ भि° । ७ ठ. ड. °णः प° । ८ ङ. ञ. ठ. ड. °ब्रह्म भ° ।

तिष्ठासेत् " इत्यत्रैव विधेरवसितत्वात् । न ह्यथ मुनिरित्यत्र विधायिका विभक्तिरुपलभ्यते तस्मादयमनुवादो युक्तः । कुतः प्राप्तिरिति चेत् । मुनिपण्डितशब्दयोर्ज्ञानार्थत्वात् " पाण्डित्यं निर्विद्य " इत्येव प्राप्तं मौनम् । अपि च " अमौनं च मौनं च निर्विद्याथ ब्राह्मणः " इत्यत्र तावन्न ब्राह्मणत्वं विधीयते प्रागेव प्राप्तत्वात् । तस्मादथ ब्राह्मण इति प्रशंसावादस्तथैवाथ मुनिरित्यपि भवितुमर्हति समाननिर्देशत्वादिति ।

एवं प्राप्ते ब्रूमः—" सहकार्यन्तरविधिः " इति । विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवद्विधिरेवाऽऽश्रयितव्योऽपूर्वत्वात् । ननु पाण्डित्यशब्देनैव मौनस्यावगतत्वमुक्तम् । नैष दोषः । मुनिशब्दस्य ज्ञानातिशयार्थत्वात् । मननान्मुनिरिति च व्युत्पत्तिसंभवात् " मुनीनामप्यहं व्यासः " [भ० गी०

दयति—न हीति । यद्यत्रापि विधेयत्वं तर्हि विधिः श्रूयेत बाल्यवन्न च श्रूयतेऽतः श्रोतव्यत्वे सत्यश्रवणाद्विध्यभावसिद्धिरित्यर्थः । तर्हि मौनवाक्यस्य का गतिस्तत्राऽऽह—तस्मादिति । अनधिगतस्यानुवादायोगादन्यत्र विध्यनुपलब्धेर्विधिरेवायमिति शङ्कते—कुत इति । पाण्डित्यविधानादेव मौनमपि सिद्धं तस्यैव मौनत्वादित्याह—मुनीति । मुनिशब्दस्य भिक्षुवचनत्वेऽपि तस्यान्यत्र विधानादत्रानुवाद एवेति मत्वा मौनस्याविधेयत्वे हेत्वन्तरमाह—अपि चेति । एकवाक्यतानुरोधान्मौनवाक्येऽपि न विधिरित्यर्थः । यदा पाण्डित्येन मौनस्य प्राप्तिस्तदा विधीयमानबाल्यस्येत्थं प्रशंसा । न हि पाण्डित्यं स्वरूपेण ज्ञानं किंतु बाल्येऽनुष्ठितेऽनन्तरं मननापरपर्यायं पाण्डित्यं कृतं स्यात्तस्माद्बाल्यं प्रशस्तम् । यदा मौनस्योक्तमाश्रमस्य विध्यन्तरप्राप्तस्यानुवादस्तदा बाल्यमात्रानुष्ठानवानुक्तमाश्रमित्वेन स्तूयत इति व्यक्ता स्तुतिरिति मत्वाऽऽह—तस्मादिति ।

बाल्यपाण्डित्यातिरिक्तस्य मौनस्याविधेयत्वान्न तन्मुमुक्षोरनुष्ठेयमिति प्राप्तं पक्षमनूद्य सिद्धान्तमाह—एवमिति । अपूर्वत्वमसिद्धमिति शङ्कते—नन्विति । पण्डितशब्दस्य ज्ञानमात्रार्थत्वान्मुनिशब्दस्य तदतिशयगामित्वादर्थभेदान्न पण्डितशब्देन मुनिशब्दस्य प्राप्तार्थतेत्याह—नेत्यादिना । वृद्धप्रयोगाभावे कथं तदर्थत्वं तत्राऽऽह—मुनीनामिति । आश्रमेऽपि प्रयोगदर्शनादनियतं ज्ञानातिशयवाचित्वं तस्य चान्यत्र

---

१ क. ज. ट. 'त्वेवं प्रा' । २ ङ. ञ. 'वद्ब्राह्म' । ३ ज. 'ह्मण्यं वि' । ४ ङ. ञ 'त्वं न वि' । ५ ख. ङ. ञ. 'तिरस्ति तत्राऽऽ' । ठ. ड. 'तिरस्तु तत्राऽऽ' । ६ क. 'न्तरं प्रा' । ७ ङ. ञ 'ञ पाण्डित्यश' । ८ ङ. ञ. 'पि यो' । ९ ठ. ड. 'योगादनि' । १० क. ङ. ञ. ठ. ड. चात्रावि' ।

१०-४७] इति च प्रयोगदर्शनात् । ननु मुनिशब्द उत्तमाश्रमवचनोऽपि श्रूयते " गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थम् " [आपस्त० धर्म० २-९-२१-१] इत्यत्र । न । " वाल्मीकिर्मुनिपुंगवः " [रामा० १-१-१] इत्यादिषु व्यभिचारदर्शनात् । इतराश्रमसंनिधानात्तु पारिशेष्यात्तत्रोत्तमाश्रमोपादानं ज्ञानप्रधानत्वादुत्तमाश्रमस्य । तस्माद्बाल्यपाण्डित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते । यत्तु बाल्य एव विधिपर्यवसानमिति तथाऽप्यपूर्वत्वान्मुनित्वस्य विधेयत्वमाश्रीयते मुनिः स्यादिति । निर्वेदनीयत्वनिर्देशादपि मौनस्य बाल्यपाण्डित्यवद्विधेयत्वाश्रयणम् । तद्वतो विद्यावतः संन्यासिनः । कथं च विद्यावतः संन्यासिन इत्यवगम्यते । तदधिकारात् " आत्मानं विदित्वा" पुत्राद्येषणाभ्यो " व्युत्थायाथ भिक्षाचर्यं चरन्ति " [बृह० ३-५-१] इति । ननु सति विद्यावत्त्वे प्राप्तेत्येव

विधानादनुवाद्यत्वमेवेति शङ्कते—नन्विति । उत्तमाश्रमे मुनिशब्दोऽसाधारणः साधारणो वेति विकल्प्याऽऽद्यं प्रत्याह—नेति । साधारणत्वं त्वेकस्यानेकार्थत्वायोगादयुक्तमित्यभिप्रेत्य प्रयोगस्यान्यथासिद्धिमाह—इतरेति । मौनस्यापूर्वत्वमुपपाद्य तृतीयमिति पदं व्याकुर्वन्फलितमाह—तस्मादिति । वाक्यभेदप्रसङ्गादेकत्रैव विधिरित्युक्तं तत्राऽऽह—यच्चिति । उपरिधारणवन्मौनं वाक्यभेदेन विधेयमित्यत्रैव हेत्वन्तरमाह—निर्वेदनीयत्वेति । कस्येदं मौनं विद्यासहकारितया विधीयते तत्राऽऽह—तद्वत इति । विशेषणप्रापकं पृच्छति—कथमिति । प्रकरणं तथेत्याह—तदिति । पक्षेणेति पदं शङ्कोत्तरत्वेनावतारयति—नन्वित्यादिना । ब्रह्मैव प्रत्यगद्वयं वस्तु द्वैतं सर्वमविद्यामयमिति शास्त्रयुक्तिभ्यां सिद्धे तत्साक्षात्कारसाधनाभ्यासे स्वयमेव पुरुषस्यौन्मुख्यादनर्थको विधिरिति चोदिते संन्यासप्रकरणात्तद्धर्मस्य श्रवणादेः साक्षात्कारहेतुभावस्यापूर्वत्वादेष्टव्यस्तद्विधिरिति समाधिः । विद्यावन्तमधिकारिविशेषं प्रति विधेरानर्थक्यमुक्तमित्याशङ्क्य विद्यावत इति विद्यातिशययुक्तो नोच्यते किंतु विद्योदयाय तदुपायाभ्यासे प्रवृत्तस्तेनास्य पक्षे कदाचिद्भेददर्शनं प्राप्नोत्यतो विधेरर्थवत्तेति सूत्रपदार्थं विवृ-

---

१ ङ. अ. दृश्यते । २ ङ. ज. अ. 'प्रस्थ्यम्" । ३ ङ. अ. 'नात्र पा' । ४ ङ. ज. अ. विधेः प' । ५ ङ. ज. अ. 'थं वि' । ६ ज. 'ल्येवाति' ७ ङ. अ. 'वादत्व' । ८ ङ. अ. 'ति । असा' । ९ ङ. 'त्वं चैक' । १० ङ. अ. 'र्थत्वयो' । ११ ङ. ज. 'व पुरु' । १२ क. 'त्कारे हे' । १३ ङ. अ. 'क्यमयुक्त' ।

तत्रातिशयः। किं मौनविधिनेत्यत आह—" पक्षेण " इति। एतदुक्तं भवति—यस्मिन्पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मिन्नेष विधिरिति। " विध्यादिवत् "। यथा " दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत " इत्येवंजातीयके विध्यादौ सहकारित्वेनाङ्गान्यन्वाधानादिकर्मजातं विधीयते। एवमविधिप्रधानेऽप्यस्मिन्विद्यावाक्ये मौनविधिरित्यर्थः ॥ ४७ ॥

एवं बाल्यादिविशिष्टे कैवल्याश्रमे श्रुतिमति विद्यमाने कस्माच्छान्दोग्ये गृहिणोपसंहारः " अभिसमावृत्य कुटुम्बे " [छा० ८-१५-१] इत्यत्र। तेन ह्युपसंहरंस्तद्विषयमादरं दर्शयतीति। अत उत्तरं पठति—

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४८ ॥

तुशब्दो विशेषणार्थः कृत्स्नभावोऽस्य विशिष्यते बहुलायासानि हि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्तव्यतयोपदिष्टान्याश्रमान्तरकर्माणि च यथासंभवमहिंसेन्द्रियसंयमादीनि तस्य विद्यन्ते। तस्माद्गृहमेधिनोपसंहारो न विरुध्यते ॥ ४८ ॥

णोति—एतदिति। अतन्निष्ठवाक्यस्य तद्विधायकत्वे दृष्टान्तमाह—विध्यादिवदिति। तदेव व्याचष्टे—यथेति। आदिर्मुख्यं प्रधानं विधेरादिर्विध्यादिर्दर्शपूर्णमासविधिः समिदादिस्तु विध्यन्तस्तत्राश्रुतविधिकेऽपि विधिरास्थेय इत्यर्थः। दृष्टान्तस्थमर्थं दार्ष्टान्तिके योजयति—एवमिति ॥ ४७ ॥

बाल्यादिप्रधानः संन्यासो यद्यनुष्ठेयस्तर्हि कस्माद्गार्हस्थ्येनोपसंहरति श्रुतिरित्यनन्तरसूत्रव्यावर्त्यमाह—एवमिति। गृहिणोपसंहारेऽपि कैवल्याश्रमस्य किं जातमित्याशङ्क्यानास्थाविषयत्वं प्राप्तमित्याह—तेनेति। बहुलायाससाध्यधर्मबाहुल्यात्तेनोपसंहारो न तेनैव समापनादित्याह—अत इति। सूत्रं व्याचष्टे—तुशब्द इति। ननु यथा गृहिणो यज्ञादीनि कर्तव्यत्वेनोक्तानि तथाऽऽश्रमान्तराणामपि करणसंयमादिकर्मान्तराण्युच्यन्ते तथा च कोऽस्य विशेषस्तत्राऽऽह—आश्रमान्तरेति। गृहमेधिनि विशेषे सिद्धे फलितमाह—तस्मादिति ॥ ४८ ॥

---

१ ङ. ञ. तत्र विद्यातिं। २ झ. तन्निषेधविं। ३ क. ङ ज. ञ. °नाग्न्याधा°। ४ ट. °कर्माङ्गं°। ५ ङ. ञ. श्रुतिसिद्धे। ६ क. ज. ट. °संहारस्तं°। ७ क. ज. ट. विशेष्य°। ८ ङ. ञ. तस्यापि विं°। ९ झ. अन्तर्निष्ठ°। १० ङ. ञ. °रास्थीयत इं°। ११ झ. °हि तस्मा°। १२ क. ङ. ञ. ठ. ड. °ध्यकर्म°। १३ क. °रो नै°।

(बाल्यस्य भावशुद्धित्वं न वयःकामोभयरूपत्वम्, अधि० १५)

मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥ (१४)

यथा मौनं गार्हस्थ्यं चैतावाश्रमौ श्रुतिमन्तावेवमितरावपि वानप्रस्थगुरुकुलवासौ। दर्शिता हि पुरस्ताच्छ्रुतिः "तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः" [छा० २-२३-१] इत्याद्या। तस्माच्चतुर्णामप्याश्रमाणामुपदेशाविशेषात्तुल्यवद्विकल्पसमुच्चयाभ्यां प्रतिपत्तिः। "इतरेषाम्" इति द्वयोराश्रमयोर्बहुवचनं वृत्तिभेदापेक्षयाऽनुष्ठातृभेदापेक्षया वेति द्रष्टव्यम् ॥ ४९ ॥ (१४)

(बाल्यस्य भावशुद्धित्वं न वयःकामोभयरूपत्वम्, अधि० १५)

अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥ (१५)

"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" [बृ० ३-५-१] इति बाल्यमनुष्ठेयतया श्रूयते। तत्र बालस्य भावः कर्म वा बाल्यमिति तद्धिते सति बालभावस्य वयोविशे-

---

मौनं गार्हस्थ्यमित्याश्रमद्वयोक्तेरितराश्रमाभावाशङ्का कस्यचिद्भवेत्तन्निरासार्थमाह—**मौनवदिति**। कथं तयोः श्रुतिमत्त्वं तत्राऽऽह—**दर्शितेति**। श्रुतिमत्त्वाविशेषे फलितमाह—**तस्मादिति**। इतरेषामिति बहूक्त्या गार्हस्थ्यस्यापि परामर्शो न तु सिद्धवदुपन्यास इत्याशङ्क्याऽऽह—**इतरेषामितीति**। गायत्रो ब्राह्मः प्राजापत्यो बृहन्निति ब्रह्मचारी चतुर्विधः। गृहस्थोऽपि वार्तावृत्तिः शालीनवृत्तिर्यायावरो घोरसंन्यासीति चतुर्विधः। वानप्रस्थश्च वैखानसौदुम्बरवालखिल्यफेनपप्रभेदैश्चतुर्विधः। तथा परिव्राडपि कुटीचकबहूदकहंसपरमहंसभेदैश्चतुर्विध इति षोडशप्रभेदास्तावदाश्रमास्तत्तद्धर्मविशेषयुक्ताः श्रुतिस्मृतिप्रसिद्धाः। ततो ब्रह्मचारिणि वानप्रस्थे चानुष्ठातृभेदमनुष्ठानभेदं वाऽपेक्ष्य बहूक्तिर्न गार्हस्थ्यमपेक्ष्य तस्य प्रागेवासंदिग्धत्वेनोक्तत्वादित्यर्थः ॥ ४९ ॥ (१४)

बाल्यस्य विधेयत्वमुपेत्यावान्तरवाक्यभेदेन मौनमपि विधेयत्वान्मुमुक्षुणा कार्यमित्युक्तम्। इदानीं किं तद्बाल्यमिति वीक्षायामाह—**अनाविष्कुर्वन्निति**। अनुष्ठेयत्वेन श्रुतं बाल्यं विषयत्वेनोदाहरति—**तस्मादिति**। तत्र बाल्ये विषये संशय इति संबन्धः। संशयकारणमाह—**बालस्येति**। तर्हि बालभावो वयोविशेषोऽपि कल्प्यतामित्याशङ्क्य तदग्रहे हेतुमाह—**बालेति**। तद्धितश्रुत्या परिशिष्टं बाल्यमाश्रित्य

---

१ क. ज. अ. ट. °तिसंमतावे। २ ज. °कुलावा°। ३ ङ. ज. अ °ष्ठानभे°। ४ ङ. अ. °भावश°। ५ क. ङ. अ. °सप्रभे°। ६ झ. °स्तत्र धर्म°। ७ झ. ठ. ङ. °दं चापे°। ८ झ. बाल्यवि°।

षस्येच्छया संपादयितुमशक्यत्वात् । यथोपपादं मूत्रपुरीषत्वादिबालचरितमन्तर्गतं वा भावविशुद्धेरप्ररूढेन्द्रियत्वं दम्भादिरहितत्वं वा बाल्यं स्यादिति संशयः । किं तावत्प्राप्तं, कामचारवादभक्षतां यथोपपादमूत्रपुरीषत्वं च प्रसिद्धतरं लोके बाल्यमिति तद्ग्रहणं युक्तम् । ननु पतितत्वादिदोषप्राप्तेर्न युक्तं कामचारतायाश्रयणम् । न । विद्यावतः संन्यासिनो वचनसामर्थ्यादोषनिवृत्तेः पशुहिंसादिष्विवेति । एवं प्राप्तेऽभिधीयते—न, वचनस्य गत्यन्तरसंभवात् । अविरुद्धे ह्यन्यस्मिन्बाल्यशब्दाभिलप्ये लभ्यमाने न विध्यन्तरव्याघातकल्पना युक्ता । प्रधानोपकाराय चाङ्गं विधीयते । ज्ञानाभ्यासश्च प्रधानमिह यतीनामनुष्ठेयम् । न च सकलायां बालचर्यायामङ्गीक्रियमाणायां

संशयमभिनयति—यथेति । बाल्यशब्दार्थविवेचनेन स्वतन्त्रपुमर्थहेतुविद्यान्तरङ्गस्यैवात्रापि निरूपणात्पादादिसंगतिः । पूर्वपक्षे तिष्ठन्मूत्रत्वाद्यपि विदुषोऽनुष्ठेयं सिध्यति । सिद्धान्ते बाल्यस्याप्ररूढेन्द्रियत्वादिरूपभावशुद्धेरनुष्ठेयत्वान्न विदुषो यथेष्टचेष्टासिद्धिरिति मत्वा प्रश्नपूर्वकं पूर्वपक्षमाह—किं तावदिति । चरणं चारो वदनं वादो भक्षणं भक्षस्ते कामतो यस्य स तथा तस्य भावस्तत्ता । यथोपपादं यथासंभवं यत्र क्वापि मूत्रं च पुरीषं चास्येति तथोक्तस्तस्य भावस्तत्त्वम् । तत्र लोकप्रसिद्धं हेतुमाह–प्रसिद्धेति । शास्त्रान्तरविरोधादयुक्तमुक्तविधबाल्यस्य विधेयत्वमिति शङ्कते—नन्विति । आदिशब्देन शिष्टगर्हा गृह्यते । सामान्यशास्त्रसंकोचो विशेषविधेः स्यादित्याह—नेत्यादिना । सामान्यविधेर्विशेषविधिना संकोचे दृष्टान्तमाह—पश्विति । विदुषो यथेष्टचेष्टायामपि न दोषोऽस्तीति प्राप्तमनूद्य सिद्धान्तमाह–एवमिति । विदुषो यथेष्टचेष्टा न विधेया शास्त्रान्तरविरोधादिति प्रतिजानीते—नेति । सामान्यशास्त्रस्योक्तः संकोचो बाल्येन तिष्ठासेदितिवचनादित्याशङ्क्याऽऽह—वचनस्येति । सामान्यप्रवृत्तिविधिशास्त्राविरुद्धेऽर्थे संभवति तद्विरुद्धार्थकल्पनायोगान्न कामचारादि विधेयमित्युक्तमेव व्यनक्ति—अविरुद्धे हीति । इतश्च कामचारादि न विधेयमित्याह—प्रधानेति । किं तत्प्रधानं यदङ्गत्वेन बाल्यादि विधीयते तदाह—ज्ञानेति । उक्तप्रधानोपकारित्वाभावान्न कामचारादि विधेयमित्युक्तम् । तद्विरोधित्वाच्च तदविधेयमित्याह—न चेति ।

---

१ क. ङ. ञ. °पादमू° । २ ट °ता भा° । ३ क. °वशु° । ४ ङ. ज. ञ °द्विर्दम्भदर्पप्र° । ५ ङ. ज. ञ. °यत्वादिरहितता वा । ६ ज. ट. °क्षगता । ७ ङ. ञ. °द्याचरण° । ८ ङ. ञ. °रगतस्यै° । ९ ङ. ञ. °त्रं पु° । १० ङ. ञ. °ना । समानवि° । ११ क्ष. ठ. ड. °त्तनियमशा° । १२ क्ष. °विरोधमि° ।

(इह जन्मान्तरे वा ज्ञानोत्पत्तिरिति ज्ञानोत्पत्तेः पाक्षिकत्वम्, अधि० १६)

ज्ञानाभ्यासः संभाव्यते । तस्मादान्तरो भावविशेषो बालस्या-
प्ररूढेन्द्रियत्वादिरिह बाल्यमाश्रीयते । तदाहानाविष्कुर्वन्निति ।
ज्ञानाध्ययनधार्मिकत्वादिभिरात्मानमविख्यापयन्दम्भदर्पादि-
हितो भवेत् । यथा बालोऽप्ररूढेन्द्रियतया न परेषामात्मानमा-
विष्कर्तुमीहते तद्वत् । एवं ह्यस्य वाक्यस्य प्रधानोपकार्यार्थानु-
गम उपपद्यते । तथा चोक्तं स्मृतिकारैः—

" यं न सन्तं न चासन्तं नाश्रुतं न बहुश्रुतम् ।
न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः ॥
गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत् ।
अन्धवज्जडवच्चापि मूकवच्च महीं चरेत् " ॥

" अव्यक्तलिङ्गोऽव्यक्ताचारः "

इति चैवमादि ॥ ९० ॥ (१५)

(इह जन्मान्तरे वा ज्ञानोत्पत्तिरिति ज्ञानोत्पत्तेः पाक्षिकत्वम्, अधि० १६)

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्-
र्शनात् ॥ ९१ ॥ (१६)

किं तर्हि विधेयं बाल्यं तदाह—तस्मादिति । इहेति प्रकृतवाक्योक्तिः । उक्तेऽर्थे सूत्रमादाय योजयति—तदाहेति । कथं यथोक्तेऽर्थे बाल्यशब्दः प्रयुज्यते तत्राऽऽह—यथेति । अन्वयादिति पदं व्याकरोति—एवं हीति । अप्ररूढेन्द्रियत्वादिरूपभावशुद्धिलक्षणबाल्यस्य प्रधानोपकारित्वे मानमाह—तथा चेति । कुलीनत्वप्रकटनं सत्त्वं तद्वैपरीत्यमसत्त्वम् । शास्त्रार्थज्ञानराहित्यमश्रुतत्वं तद्वैपरीत्यं बहुश्रुतत्वम् । सदाचारनिरतत्वं सुवृत्तत्वं, दुराचारनिष्ठत्वं दुर्वृत्तत्वमिति भेदः । तत्किमिदानीं ब्रह्मधीयोग्यस्य मुमुक्षोर्नास्त्येव किंचिदनुष्ठेयं तत्राऽऽह—गूढेति । चक्षुरिन्द्रियपारवश्यं निरसितुमन्धवदित्युक्तम् । रसनादिपारवश्यं निरस्यति—जडवदिति । ज्ञानेन्द्रियपारवश्यं परिहृत्य कर्मेन्द्रियपारवश्यं परिहरति—मूकवदिति । धर्मध्वजित्वाप्रकटनमव्यक्तलिङ्गत्वम् । तदेवं मुमुक्षोरुपरतसर्वेन्द्रियस्य श्रवणादिपरस्य मोक्षसाधनं तत्त्वज्ञानमवर्ज्यंभावीति भावः ॥ ९० ॥ (१५)

बाल्यान्तमुच्चावचं विद्याहेतुमुक्त्वा तत्फलं विद्याजन्मकालं निरूपयति—ऐहिकमिति । उक्तहेत्वधीनधीजन्मविषये कारीर्यादिफले चित्रादिफले चोभयोपलब्धेर्वृत्ता-

---

१ ङ. ञ. 'रेष्वात्मा' । २ ङ. ञ. ठ. 'कार्यर्था' । ३ क. 'न वाऽस' । ४ ट. चरन् । ५ ङ. ञ. 'व्यक्तचर' । ६ झ. एवमिति । ७ ङ. ञ. 'ह्ययो' । ८ इ. 'श्यं भवतीति ।

(इह जन्मान्तरे वा ज्ञानोत्पत्तिरिति ज्ञानोत्पत्तेः पाक्षिकत्वम्, अधि० १६)

" सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् " [ब्र० सू० ३-४-२६] इत्यतेआरभ्योच्चावचं विद्यासाधनमवधारितं तत्फलं विद्या सिध्यन्ती किमिहैव जन्मनि सिध्यत्युत कदाचिदमुत्रापीति चिन्त्यते । किं तावत्प्राप्तम् । इहैवेति । किं कारणम् । श्रवणादिपूर्विका हि विद्या । न च कश्चिदमुत्र मे विद्या जायतामित्यभिसंधाय श्रवणादिषु प्रवर्तते । समान एव तु जन्मनि विद्याजन्माभिसंधायैतेषु प्रवर्तमानो दृश्यते । यज्ञादीन्यपि श्रवणादिद्वारेणैव विद्यां जनयन्ति प्रमाणजन्यत्वाद्विद्यायाः । तस्मात् " ऐहिकम् " एव विद्याजन्मेति ।

एवं प्राप्ते वदामः—ऐहिकं विद्याजन्म भवत्यसति प्रस्तुतप्रतिबन्ध इति । एतदुक्तं भवति—यदा प्रक्रान्तस्य विद्यासाधनस्य

नुवादपूर्वकं संशयमाह—सर्वेति । श्रवणादिसामग्रीप्रतिबन्धशून्या विशिष्टधीप्रसवभूमिरित्युक्तेरत्र पादादिसंगतिः । पूर्वपक्षे श्रवणादीनां विद्योपायत्वनियमासिद्धिः । सिद्धान्ते प्रतिबन्धाभावापेक्षया तेषां तन्नियमसिद्धिरित्युपेत्य प्रश्नपूर्वकमैहिकत्वनियमं पूर्वपक्षमाह—किमिति । फलैर्द्वैविध्योपलब्धौ तन्नियमे नास्ति हेतुरिति शङ्कते—किमिति । तत्र कारणमाह—श्रवणादीति । चित्रादिवदमुत्रापि धीहेतुत्वं श्रवणादेः स्यादित्याशङ्क्याऽऽह—न चेति । कथं तर्हि तेषु प्रवृत्तिरित्याशङ्क्य तेषां कारीर्यादितुल्यत्वमाह—समान इति । श्रवणादीनां चक्षुरादिर्वद्धीसाधनत्वात्कालान्तरीयकुम्भोपलम्भाय चक्षुरुन्मीलनाभाववज्जन्मान्तरीयविद्यायै श्रवणादिषु प्रवृत्त्ययोगादुपलभ्यमानसंसारदुःखनिवृत्तये च विद्यासाधनादानाज्ज्ञानात्कारीर्यादिवत्तुल्यजन्मन्येव विद्याजन्मेत्यर्थः । यज्ञादीनां जन्मान्तरीयफलानां धीहेतुत्वस्य विविदिषावाक्यीयत्वाज्जन्मान्तरे धीजन्मेत्याशङ्क्याऽऽह—यज्ञेति । तेषां धीशुद्ध्या श्रवणादिघटकत्वाद्घटितेषुं तेषु धियाऽवश्यं भाव्यमित्यैहिकत्वनियम इत्यर्थः । श्रवणादीनां कारीर्यादितुल्यत्वे फलितमाह—तस्मादिति ।

श्रवणादिषु कृतेष्वपि न चेदत्र धीः स्यात्तेषामतदुपायतैवेति प्राप्तमनूद्य चित्रावदनियतफलधीसाधनमिति सिद्धान्तमाह—एवमिति । कृतेष्वपि श्रवणादिषु कदाचिद्विद्या नोत्पद्यते चेत्तर्हि तेषां तदुपायत्वमनियतं स्यादित्याशङ्क्याऽऽह—एतदिति ।

---

१ क. ङ. ञ. °तेरित्यं । २ ण. °तश्चाऽऽर° । ३ ट. °न्तीति किं° । ४ ङ. ञ. °त्र विद्या मे जा° । ५ क. ङ. ज. ञ. °धाय ते° । ६ ट. °यैव प्र° । ७ ङ. ञ. °लत्रैवि° । ८ ङ. ञ. °वत्तद्धी° । ९ ङ. ञ. °धनत्वात्का° । ठ. ङ. °धनात्का° । १० ङ. ज. °षु धि° ।

(इह जन्मान्तरे वा ज्ञानोत्पत्तिरिति ज्ञानोत्पतेः पाक्षिकत्वम्, अधि० १६)

कश्चित्प्रतिबन्धो न क्रियत उपस्थितविपाकेन कर्मान्तरेण तदेहैव विद्योत्पद्यते, यदा तु खलु तत्प्रतिबन्धः क्रियते तदाऽमुत्रेति। उपस्थितविपाकत्वं च कर्मणो देशकालनिमित्तोपनिपाताद्भवति। यानि चैकस्य कर्मणो विपाचकानि देशकालनिमित्तानि तान्येवान्यस्यापीति न नियन्तुं शक्यते। यतो विरुद्धफलान्यपि कर्माणि भवन्ति। शास्त्रमप्यस्य कर्मण इदं फलमित्येतावति पर्यवसितं न देशकालनिमित्तविशेषमपि संकीर्तयति। साधनवीर्यविशेषात्त्वतीन्द्रियाः कस्यचिच्छक्तिराविर्भवति तत्प्रतिबद्धा परस्य तिष्ठति। न चाविशेषेण विद्यायामभिसंधिर्नोत्पद्यत इहामुत्र वा मे विद्या जायतामित्यभिसंधेर्निरङ्कुशत्वात्। श्रवणादिद्वारेणापि विद्योत्पद्यमाना प्रतिबन्धक्षयापेक्षयैवोत्पद्यते। तथा च श्रुतिर्दुर्बोधत्वमात्मनो दर्शयति—

कृतेष्वपि श्रवणादिष्वत्र विद्यानुदये कारीर्यादाविव प्रतिबन्धो वा पौष्कल्याभावो वा तेषां कल्पनीयः प्रतिबन्धहीना हि सामग्री कार्यहेतुर्न चैतावता तद्धेतुत्वंहतिरित्यर्थः। उपस्थितविपाकश्रवणादिविरोधात्कर्मण एव प्रतिबन्धमाशङ्क्याऽऽह—उपस्थितेति। तैरेवं देशादिभिर्विद्यार्थमेव श्रवणादि कर्म किमिति न विपच्यते तत्राऽऽह—यानीति। भोगार्थस्य कर्मणो ज्ञानार्थस्य च श्रवणादेर्देशकालनिमित्तैकरूप्याभावे हेतुमाह—यत इति। कर्मणा श्रवणादीनां प्रतिबन्धे तेभ्यो विद्योत्पत्तिवादि शास्त्रं व्याहन्येतेत्याशङ्क्याऽऽह—शास्त्रमिति। तथाऽपि कर्मण एव प्रतिबन्धकत्वं न श्रवणादीनामिति कुतो नियमस्तत्राऽऽह—साधनेति। यत्त्विह विद्याभावे कारीर्यादिवत्प्रतिबन्धादिसंस्त्वेकल्पनेन धिय आमुष्मिकत्वकल्पनमयुक्तमिहैव मे विद्या स्यादित्यभिसंधिदृष्टेरिति तत्राऽऽह—न चेति। दृश्यमानसंसारदुःखस्यानेकजन्ममामित्वं जानतो यदा कदाचिदनर्थनिवृत्तिः स्यादित्यभिसंधेः साधनसामर्थ्यानुसारेण संभावितत्वादित्याह—अभिसंधेरिति। यत्तु श्रवणादीनां चक्षुरादिवदृष्टफलत्वमिति तत्राऽऽह—श्रवणादीति। विधानाददृष्टद्वाराऽपि साधनत्वमवघातवदवगतं यज्ञादीनामनियतकालफलानां ज्ञानसाधनत्वविधेश्च विद्योत्पत्तेरनियतत्वमित्यर्थः।यत्तु यज्ञादीनां घटकत्वाद्घाटितेषु श्रवणादिषु विद्याऽवश्यंभाविनीति तत्र प्रतिबन्धसत्त्वस्य श्रौतलिङ्गसिद्धत्वान्नैवमित्याह—तथा चेति।

---

१ घ. ट. विद्या विपच्यते। २ ङ. ञ. 'द्योपपद्य'। ३ ङ. ज. ञ. 'लु प्रति'। ४ ङ. ञ. 'नि न ता'। ५ ङ. ञ. 'ति नि'। ६ ङ. ञ. 'या हि क'। ७ ङ. ञ. 'वतीति। ८ ङ. ञ. 'त्पद्येतेहा'। ९ ख. 'त्वहानिरि'। १० ट, ड, 'र्मेणां श्र'। ११ ठ, ड, 'व ब'। १२ ठ. ड. 'सत्त्वं कल्पयमि'। १३ ङ. ञ. ज्ञानादीनां।

(इह जन्मान्तरे वा ज्ञानोत्पत्तिरिति ज्ञानोत्पत्तेः पाक्षिकत्वम्, अधि० १६)

" श्रवणायापि बहुभिर्यो न लभ्यः
शृण्वन्तोऽपि बहवो यं न विद्युः[1]।
आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽ-
श्चर्यो ज्ञाता कुशलानुशिष्टः "
[कठ० २-७] इति।

गर्भस्थ एव[2] च वामदेवः प्रतिपेदे ब्रह्मभावमिति वदन्ती जन्मान्तरसंचितात्साधनाज्ज्ञन्मान्तरे[3] विद्योत्पत्तिं दर्शयति। न हि गर्भस्थस्यैवैहिकं किंचित्साधनं संभाव्यते। स्मृतावपि—

" अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति "
[भ० गी० ६-३७] इत्यर्जुनेन पृष्टो भगवान्वासुदेवः—

" न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति "
[भ० गी० ६-४०] इत्युक्त्वा पुनस्तस्य पुण्यलोकप्राप्तिं साधुकुले संभूतिं चाभिधायानन्तरम्—

" तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् "
[भ० गी० ६-४३] इत्यादिना—

" अनेकजन्मसंसिद्धस्ततो याति परां गतिम् "
[भ० गी० ६-४५] इत्यन्तेनैतदेव दर्शयति। तस्मादैहिकमामुष्मिकं वा विद्याजन्म प्रतिबन्धक्षयापेक्षयेति स्थितम्॥५१॥(१६)

आत्मनः श्रवणमपि दुष्करं बहूनामित्याह—**श्रवणायेति**। कथंचन श्रवणेऽपि तत्फलं ज्ञानं दुर्लभमित्याह—**शृण्वन्तोऽपीति**। तत्र हेतुः—**आश्चर्य इति**। यथावदस्याऽऽत्मनो वक्ताऽऽश्चर्योऽद्भुतवत्कश्चिदेव संभवति। सम्यगाचार्यसिद्धावपि तच्छ्रुत्वा लब्धा साक्षात्कर्ताऽस्याऽऽश्चर्यः। तिष्ठतु साक्षात्कारः कुशलेनाऽऽचार्येणानुशिष्टोऽपि शास्त्रात्परोक्षतो ज्ञाताऽप्याश्चर्य एवेत्यर्थः। संप्रत्यामुष्मिकत्वे धियो लिङ्गमाह—**गर्भस्थ इति**। कयाऽनुपपत्त्या श्रुतिरिममर्थं दर्शयति तत्राऽऽह—**न हीति**। जन्मान्तरसंचितं साधनं जन्मान्तरेऽपि धियं साधयतीत्यत्र स्मृतिमाह—**स्मृताविति**। श्रवणादीनां पौष्कल्येऽपि श्रुतिस्मृतिलिङ्गात्पश्वादिफलचित्रादिवदनियतकालत्वसिद्धेर्नानैकान्तिकफलत्वं तेषामित्युपसंहरति—**तस्मादिति**॥ ५१ ॥ (१६)

---

१ ङ. ञ. विदुः। २ ट. °व वा°। ३ ङ. ञ. °नादपि जन्मा°। ४ क. ङ. ञ. °त्फलज्ञा°। ५ ङ. ञ. °ण्वन्त इति।

(सालोक्यादिमुक्तीनां जन्यत्वेन सातिशयत्वं निर्वाणमुक्तेश्च निरतिशयत्वम्, अधि० १७)

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५२ ॥ (१७)

इति महर्षिव्यासप्रणीतब्रह्मसूत्रतृतीयाध्याये चतुर्थः पादः ॥ ४ ॥
इति महर्षिव्यासप्रणीतब्रह्मसूत्रतृतीयाध्यायः ॥ ३ ॥

यथा मुमुक्षोर्विद्यासाधनावलम्बिनः साधनवीर्यविशेषाद्विद्यालक्षणे फल ऐहिकामुष्मिकफलत्वकृतो विशेषप्रतिनियमो दृष्टः । एवं मुक्तिलक्षणेऽप्युत्कर्षापकर्षकृतः कश्चिद्विशेषप्रतिनियमः स्यादित्याशङ्क्याऽऽह–"मुक्तिफलानियमः" इति । न खलु मुक्तिफले कश्चिदेवंभूतो विशेषप्रतिनियम आशङ्कितव्यः । कुतः । " तदवस्थावधृतेः " मुक्त्यवस्था हि सर्ववेदान्तेष्वेकरूपैवावधार्यते । ब्रह्मैव हि मुक्त्यवस्था । न च ब्रह्मणोऽनेकाकारयोगोऽस्ति । एकलिङ्गत्वावधारणात् " अस्थूलमनणु " [बृ० ३-८-

---

विद्यारूपे फले कालोत्कर्षापकर्षकृतो विशेषनियमो दर्शितः । संप्रति विद्याफले मोक्षे कस्यचिदपि विशेषनियमस्याभावं दर्शयति—**एवमिति** । विद्याफलं मुक्तिर्विषयः सा किं विद्यावदुत्कर्षापकर्षकृतविशेषवती किंवा नेति फलस्योभयथादृष्टे संशये प्रकृतविद्याफलस्य प्रसङ्गतो निरतिशयत्वोक्त्या पादादिसंगतिः । पूर्वपक्षे मोक्षस्य कर्मसाध्यतया पुरुषार्थाधिकरणासिद्धिः । सिद्धान्ते तस्य ज्ञानैकसाध्यत्वात्तत्सिद्धिरित्यभिप्रेत्य पूर्वपक्षमाह—**यथेति** । मुक्तिरुपचयापचयवती फलत्वाद्विद्यावदित्यनुमानात्तस्याः कर्मसाध्यत्वाधिगमात्पुरुषार्थाधिकरणमयुक्तमित्याशङ्क्य सिद्धान्तमवतार्य प्रतिज्ञां विभजते—**न खल्विति** । उक्तेऽनुमाने जाग्रति कथमाशङ्का निरवकाशेति शङ्कते—**कुत इति** । मुक्तिस्वरूपब्रह्मैकरूप्यावधारणशास्त्रविरोधान्नानुमेति मत्वा सूत्रावयवमादाय व्याचष्टे—**तदवस्थेति** । मुक्तिर्नाम काचिदवस्था विद्यते चेदद्वितीयत्वविरोधादवस्थात्वाज्जाग्रदवस्थावदसावपि निवृत्तिमती स्यादित्याशङ्क्याऽऽह—**ब्रह्मैवेति** । कथमेतावता मुक्तेरुत्कर्षनिकर्षकृतविशेषराहित्यमित्याशङ्क्याऽऽह—**न चेति** । न स्थानतोऽपीत्यधिकरणे निर्विशेषत्वमस्थूलादिश्रुत्या ब्रह्मणो निरूपितमिति स्मारयति—**एकेति** । इतश्च मुक्ते-

---

१ ट. °म्बिना सा° । २ ङ. °णे व्युत्क° । ३ ज. मुक्ताव° । ४ क. ङ. ञ. °फलमो° । ५ ज्ञ. °शयोक्त्या । ६ क. ङ. ञ. °यतोक्त्या । ७ ठ. ङ. °स्य धर्म° । ८ ठ. ङ. °धिकारिणाऽसि° । ९ ङ. ञ. °नैक्यसा° । १० ठ. ङ. °द्यादिव° । ११ क. ङ. ञ °णत्वम° । १२ ङ. ञ. °र्षकृ° ।

८] " स एष नेति नेत्यात्मा " [बृ० ३-९-२६] " यत्र नान्यत्पश्यति " [छा० ७-२४-१] " ब्रह्मैवेदममृतं पुरस्तात् " [मुण्ड० २-२-११] " इदं सर्वं यदयमात्मा " [बृ० २-४-६] " स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म " [बृ० ४-४-२५] " यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् " [बृ० ४-५-१५] इत्यादिश्रुतिभ्यः। अपि च विद्यासाधनं स्ववीर्यविशेषात्स्वफल एव विद्यायां कंचिदतिशयमासञ्जयेन्न विद्याफले मुक्तौ तद्ध्यसाध्यं नित्यसिद्धस्वभावमेव विद्ययाऽधिगम्यत इत्यसकृदवादिष्म। न च तस्यामप्युत्कर्षनिकर्षात्मकोऽतिशय उपपद्यते निकृष्टाया विद्यात्वाभावादुत्कृष्टैव हि विद्या भवति। तस्मात्तस्यां चिराचिरोत्पत्तिरूपोऽतिशयो भवेन्भवेत्। न तु मुक्तौ कश्चिदतिशयसंभवोऽस्ति। विद्याभेदाभावादपि तत्फलभेदनियमाभावः कर्मफलवत्। न हि मुक्तिसाधनभूताया विद्यायाः कर्मणामिव भेदोऽस्तीति। सगुणासु तु

निरतिशयत्वमित्याह—अपि चेति। काष्ठोपचयापचयाभ्यां ज्वालोपचयापचयदृष्टेरन्तरङ्गबहिरङ्गतदभ्यासादिसाधनोपचयापचयाभ्यां विद्यायामुपचयापचयसंभवात्तत्फले मुक्तावपि तौ स्यातामित्याशङ्क्य हेत्वन्तरं स्फोरयति—न विद्येति। विद्यैव सातिशया स्वसाध्येऽपि कथंचिदतिशयमादध्यादित्याशङ्क्याऽऽह—तद्धीति। तर्हि मुमुक्षूणां विद्यार्थिनां प्रवृत्त्यानर्थक्यं तत्राऽऽह—विद्ययेति। तस्यामतिशयमाश्रित्य मुक्तौ नातिशयोऽस्तीत्युक्तम्। इदानीं विद्याऽपि मोक्षहेतुतत्त्वसाक्षात्कारलक्षणा नातिशयवतीत्याह—न चेति। कथं तर्हि पूर्वाधिकरणे विद्याया विशेषो दर्शितस्तत्राऽऽह—तस्मादिति। मुक्तावपि तर्हि तादृशोऽतिशयो भविष्यति तत्राऽऽह—न त्विति। विद्योत्पत्तिनान्तरीयकत्वेनाविद्यानिवृत्तिरूपाया मुक्तेरावश्यकत्वादित्यर्थः। मुक्तेर्निर्विशेषत्वे हेत्वन्तरमाह—विद्येति। एकरूपत्वादात्मनस्तदाकारविद्यायां विशेषाभावादनेकरूपफलोत्पादकत्वायोगात्तत्फले विशेषासिद्धिरित्यर्थः। विद्यायां भेदाभावं प्रपञ्चयति—न हीति। सगुणविद्यावद्विद्यात्वादात्मविद्यायां भेदः स्यादित्याशङ्क्य विषयभेदात्तत्र भेदेऽपि नात्र विषयभेदोऽस्तीत्याह—सगुणास्विति। तत्र फलभेदे मानमाह—

---

१ ट. °रोऽमृ°। २ ङ. ञ. ट. °वभूतमे°। ३ ट. निष्कृष्टायां। ४ ङ. ञ. °त्तिस्वरू°। ५ ट. °वन्संभ°। ६ ङ. ञ. °दोऽस्ति। स°। ७ क. ख. ङ. ञ. विद्योपचया°। ८ ङ. ञ. °त्तिर्नान्त°। ९ क. ख. ङ. ञ. °द्यायां भे°।

(सालोक्यादिमुक्तीनां जन्यत्वेन सातिशयत्वं निर्पाणमुक्तेश्च निरतिशयत्वम्, अधि० १७)

विद्यासु " मनोमयः प्राणशरीरः " [छा० ३-१४-२] इत्याद्यासु गुणावापोद्वापवशाद्भेदोपपत्तौ सत्यामुपपद्यते यथास्वं फलभेदनियमः कर्मफलवत् । तथा च लिङ्गदर्शनम् " तं यथा यथोपासते तदेव भवति " इति । नैवं निर्गुणायां विद्यायां गुणाभावात् । तथा च स्मृतिः—

" न हि गतिरधिकाऽस्ति कस्यचित्
सति हि गुणे प्रवदन्त्यतुल्यताम् "

[महाभा० १२-१९४-६०] इति ।

" तदवस्थावधृतेस्तदवस्थावधृतेः " इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति ॥ ५२ ॥ (१७)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ शारीरकमीमांसाभाष्ये तृतीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तोऽयं तृतीयाध्यायः ॥ ३ ॥

तथा चेति । दार्ष्टान्तिके विशेषमाह—नैवमिति । तत्त्वविद्याविशेषे गुणाभावे स्मृतिमाह—तथा चेति । कस्यचिन्निर्गुणविद्यावतः पुरुषस्य गतिः फलमिति यावत् । तत्र न्यूनाधिकभावाभावे हेतुमाह—सति हीति । पुनरुक्तेरर्थवत्त्वमाह—तदवस्थेति । तदेवं मुक्तेर्निरतिशयत्वान्न कर्मसाध्यतेति युक्तं पुरुषार्थाधिकरणमिति भावः ॥ ५२ ॥ (१७)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृते शारीरकभाष्यविभागे न्यायनिर्णये तृतीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥

इति तृतीयाध्यायः समाप्तः ॥ ३ ॥

---

१ क. ज. झ. ट. °लनि° ।

समाप्तोऽयं सटीकशारीरकभाष्यसमेतब्रह्मसूत्राणां
तृतीयोऽध्यायः ॥ ३ ॥
॥ ॐ ॥

ॐ तत्सद्ब्रह्मणे नमः ।

अथ फलाख्यश्चतुर्थोऽध्यायः ।

(तत्र श्रवणाद्यावृत्त्युपासनाभ्यां निर्गुणं सगुणं वा ब्रह्म साक्षात्कृतवतः पुण्यपापलेशनाशरूपमुक्तेरभिधायकः प्रथमः पादः ।)

(श्रवणादीनामावर्तनीयत्वम् , अधि० १)

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

तृतीयेऽध्याये परापरासु विद्यासु साधनाश्रयो विचारः प्रायेणात्यगात् । अथेह चतुर्थे फलाश्रय आगमिष्यति । प्रसङ्गागतं चान्यदपि किंचिच्चिन्तयिष्यते । प्रथमं तावत्कतिभिश्चिदधिकरणैः साधनाश्रयविचारशेषमेवानुसरामः । " आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः " [बृ० ४-५-६] " तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत " [बृ० ४-४-२१] " सोऽन्वेष्टव्यः स विजिज्ञासितव्यः " [छा० ८-७-१] इति चैवमादिश्रवणेषु संशयः—किं सकृत्प्रत्ययः कर्तव्य आहोस्विदावृत्त्येति । किं तावत्प्राप्तं, सकृत्प्रत्ययः स्यात्प्रयाजादिवत् ।

पूर्वाध्यायान्तिमाधिकरणे मोक्षे प्रतिनियमाभावो दर्शितः । संप्रति मोक्षौपयिकविद्यासाधनेषु श्रवणादिष्वावृत्त्याऽनुष्ठानप्रतिनियमं दर्शयति—**आवृत्तीति** । पूर्वोत्तराध्याययोः संबन्धं हेतुहेतुमद्भावं वक्तुं तार्तीयमर्थमनुद्रवति—**तृतीय इति** । साधनविचारशेषद्योतनाय प्रायेणेत्युक्तम् । साधनाधीनत्वात्फलसिद्धेस्तद्विचारयोरपि युक्तं पौर्वापर्यमित्याशयवानाह—**अथेति** । कथं तर्हीहार्चिरादिवचनमित्याशङ्क्य फलोक्तिप्रसङ्गेन तदुक्तिरपि भविष्यतीत्याह—**प्रसङ्गेति** । अध्यायसंबन्धमुक्त्वा तदधिगमाधिकरणात्प्राक्तनाधिकरणानां तात्पर्यं दर्शयन्नवान्तरसंबन्धमाह—**प्रथमामिति** । साक्षादेव श्रुत्युक्तं साधनं चिन्तितम् । अधुना फलार्थापत्तिलब्धमावृत्त्यादि चिन्त्यते तदर्थापत्त्यायत्ता च तच्चिन्ता फलाध्याये संगतैवेति भावः । प्रथमाधिकरणस्य विषयमनूद्य संशयमाह—**आत्मेति** । साधनेषूभयथात्वदृष्टेः श्रवणादिसाधनेषु संशयमुक्त्वा मुक्तिहेतुश्रौतात्मधीसाधनश्रवणादिष्वावृत्त्याऽनुष्ठानसाधनात्पादादिसंगतिः । पूर्वपक्षे श्रवणादीनामदृष्टार्थत्वम् । सिद्धान्ते दृष्टार्थतैव तेषां फलतीत्यङ्गीकृत्य प्रश्नपूर्वकं पूर्वपक्षयति—**किं तावदिति** । यथा प्रयाजादयः सकृदनुष्ठिता दर्शपूर्णमासफलोपकारिणस्तथा

---

१ ङ. ञ. °तुर्थेऽध्याये फ° । २ ञ. °रविशे° । ३ क. ठ. ङ. °रविशे° ।

तावता शास्त्रस्य कृतार्थत्वात्। अश्रूयमाणायां ह्यावृत्तौ क्रियमाणायामशास्त्रार्थः कृतो भवेत्। नन्वसकृदुपदेशा उदाहृताः "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्येवमादयः। एवमपि यावच्छब्दमावर्तयेत्सकृच्छ्रवणं सकृन्मननं सकृन्निदिध्यासनं चेति नातिरिक्तम्। सकृदुपदेशेषु तु वेदोपासीतेत्येवमादिष्वनावृत्तिरिति।

एवं प्राप्ते ब्रूमः—प्रत्ययावृत्तिः कर्तव्या। कुतः। "असकृदुपदेशात्" "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्येवंजातीयको ह्यसकृदुपदेशः प्रत्ययावृत्तिं सूचयति। ननूक्तं यावच्छब्दमेवाऽऽवर्तयेन्नाधिकमिति। न। दर्शनपर्यवसानत्वादेषाम्। दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति। यथाऽवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि हि तद्वत्। अपि चोपासनं निदिध्यासनं चेत्यन्तर्णीतावृत्तिगुणैव

श्रवणादिप्रत्ययोऽऽपि सकृदनुष्ठितः सम्यग्धीहेतुरित्यानर्थक्यमित्यर्थः। अवघातादिवत्फलपर्यन्तमावृत्त्यनुष्ठानमाशङ्क्याऽऽह—तावतेति। शास्त्रस्य सकृदनुष्ठानेन कृतार्थत्वेऽपि तत्पर्यन्तमनुष्ठानं किं न स्यात्तत्राऽऽह—अश्रूयमाणायामिति। दर्शनक्रियायाः साधनाकाङ्क्षायां सकृदेव साधनोपदेशेन नैराकाङ्क्ष्ये संभवत्यसकृदुपदेशानुपपत्त्या तात्पर्यमावृत्तौ कल्प्यते तथा च नाशास्त्रार्थः कृतः स्यादिति शङ्कते—नन्विति। समुच्चितानां श्रवणादीनां साधनत्वधियाऽप्यसकृदुपदेशोपपत्तेरविरोधान्नाऽऽवृत्तौ तात्पर्यमित्याह—एवमिति। निर्विशेषब्रह्मसाक्षात्कारफलेषु श्रवणादिष्वावृत्तिमपाकृत्य सविशेषब्रह्मसाक्षात्कारफलेष्वहंग्रहोपासनेष्वावृत्तिमपाकरोति—सकृदिति।

श्रवणादीनामहंग्रहोपास्तीनां च प्रयाजादिवदनुष्ठानाददृष्टार्थतेति प्राप्तं पूर्वपक्षमनूद्य सिद्धान्तयति—एवमिति। आवृत्तौ हेत्वभावमाशङ्क्य हेतुमवतार्य व्याचष्टे—कुत इत्यादिना। पूर्ववादी पूर्वोक्तं स्मारयति—नन्विति। अविद्योच्छेदेनाऽऽत्मनः स्वरूपावस्थानरूपाया मुक्तेः श्रुत्यनुभवसिद्धत्वादविद्यायाश्च विद्यानान्तरीयकतयोच्छेदस्य रज्जुतत्त्वसाक्षात्कारादौ दृष्टत्वेन श्रवणादीनां दृष्टफलत्वाद्यावत्फलमवघातादिवदावर्तनीयानि तानीत्याह—नेत्यादिना। उक्तमेव स्फोरयति—दर्शनेति। यत्त्वहंग्रहोपासनेषु सकृदुक्तेष्वावृत्तिशङ्कैव नास्तीति तत्राऽऽह—अपि चेति। यस्य स्यादद्धा न विचिकित्साऽस्ति देवो भूत्वा देवानप्येतीति लिङ्गादहंग्रहोपास्तीनामुपास्यसाक्षात्कारद्वारा दृष्टार्थत्वस्य वक्तव्यत्वाद्यावत्फलमावृत्तिस्तास्वपि गम्यते शब्दसामर्थ्याच्च तास्वावृत्ति-

---

१ ङ. ञ. इत्यादं। २ झ. 'वसितत्वा'। ३ क. ज. झ. 'वर्तमा'। ४ ख. 'त्यावृत्त्यान'। ५ ठ. ढ. 'धनका'। ६ क. प्राप्तपू। ठ. ढ. प्राप्तम'। ७ ख. अत्राविं।

क्रियाऽभिधीयते । तथा हि लोके गुरुमुपास्ते राजानमुपास्त इति च, यस्तात्पर्येण गुर्वादीननुवर्तते स एवमुच्यते । तथा ध्यायति प्रोषितनाथा पतिमिति, या निरन्तरस्मरणा पतिं प्रति सोत्कण्ठा सैवमभिधीयते । विद्युपास्त्योश्च वेदान्तेष्वव्यतिरेकेण प्रयोगो दृश्यते । क्वचिद्विदिनोपक्रम्योपासिनोपसंहरति यथा— " यस्तद्वेद यत्स वेद स मयैतदुक्तः " [छा० ४-१-४] इत्यत्र "अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से " [छा० ४-२-२] इति । क्वचिच्चोपासिनोपक्रम्य विदिनोपसंहरति यथा— " मनो ब्रह्मेत्युपासीत " [छा० ३-१८-१] इत्यत्र " भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद " [छा० ३-१८-३] इति । तस्मात्सकृदुपदेशेष्वप्यावृत्तिसिद्धिः । असकृदुपदेशस्त्वावृत्तेः सूचकः ॥ १ ॥

लिङ्गाच्च ॥ २ ॥ (१)

लिङ्गमपि प्रत्ययावृत्तिं प्रत्याययति । तथा ह्युद्गीथविज्ञानं

रित्यर्थः । अन्तर्णीतावृत्तिगुणमुपासनमित्यत्र लोकसंमतिमाह—तथा हीति । ध्यानमपि तथाविधमित्यत्र तामेव दर्शयति—तथेति । उपासनशब्दश्रुतावावृत्तिसिद्धावपि वेदेत्यादिप्रयोगे कथं तत्सिद्धिरित्याशङ्क्याऽऽह—विदीति । विदिनोपक्रम्योपासिनोपसंहारे संवर्गविद्यामुदाहरति—यथेति । स रैक्को यद्वेद तत्प्राणतत्त्वं सर्वं धर्मफलमभिसंगच्छते । एवं रैक्कवदन्योऽपि यद्वैक्कवेद्यं वेद तस्यापि सर्वसाधुफलावाप्तिर्भवति स तथाभूतो रैक्को मयोक्तः । एतदिति क्रियाविशेषणम् । रैक्कमिव जानश्रुतिमल्पकं कमात्थेति हंसान्तरं प्रति हंसवचनम् । हे भगवो रैक्क यां देवतामुपास्से तामेतां मामनुशाधि शिक्षय ज्ञापयेति जानश्रुतेरुक्तिः । अत्रोपक्रमोपसंहारयोरैक्यरूप्यसिद्धये विद्युपास्त्योरैक्यमर्थ्यं वाच्यम् । उपासिनोपक्रम्य विदिनोपसंहारे दृष्टान्तमाह—यथेति । विद्युपास्त्योरैक्यमुपास्तिश्चाऽऽवृत्तिगुणेति स्थिते फलितमाह—तस्मादिति । श्रवणादिष्वावृत्तेः शब्दसामर्थ्यलभ्यत्वाभावात्कथं तेषु तत्सिद्धिस्तत्राऽऽह—असकृदिति ॥ १ ॥

विषयसाक्षात्कारफलेषु प्रत्ययेष्वावृत्तौ हेत्वन्तरमाह—लिङ्गाच्चेति । न केवलमसकृदुक्तेरावृत्तिसिद्धिरपि तु लिङ्गादपीत्यर्थः । तदेव विवृणोति—लिङ्गमपीति ।

---

१ ङ. ञ. °न्तेषु व्यतिकरेण । २ क ङ. ज. ञ. ट. °त्यत्रानु । ३ ङ. ञ. °पास्तिनो° । ४ ठ. ड. यस्तद्वै° । ५ ह्म. °कनिरू° ।

प्रस्तुत्य " आदित्य उद्गीथः " [छा० १-५-१] इत्येतदेकपुत्रतादोषेणापोद्य " रश्मींस्त्वं पर्यावर्तयात् " [छा० १-५-२] इति रश्मिबहुत्वविज्ञानं बहुपुत्रतायै विदधत्सिद्धवत्प्रत्ययावृत्तिं दर्शयति[1]। तत्सामान्यात्सर्वप्रत्ययेष्वावृत्तिसिद्धिः। अत्राऽऽह— भवतु नाम साध्यफलेषु प्रत्ययेष्वावृत्तिः। तेष्वावृत्तिसाध्यस्यातिशयस्य संभवात्। यस्तु परब्रह्मविषयः प्रत्ययो नित्यशुद्धबुद्धमुक्तस्वभावमेवाऽऽत्मभूतं परं ब्रह्म समर्पयति तत्र किमर्थाऽऽवृत्तिरिति। सकृच्छ्रुतौ[2] च ब्रह्मात्मत्वप्रतीत्यनुपपत्तेरावृत्त्यभ्युपगम इति चेत्। न। आवृत्तावपि तदनुपपत्तेः। यदि हि " तत्त्वमसि " [छा० ६-८-७] इत्येवंजातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं[3] नोत्पादयेत्ततस्तदेवाऽऽवर्त्यमानमुत्पादयिष्यतीति का प्रत्याशा स्यात्। अथोच्येत न केवलं वाक्यं कंचिदर्थ

हे पुत्र त्वं रश्मीनादित्यं च भेदेन पर्यावर्तयादिति तकारमन्तर्भाव्य पर्यावर्तयतादिति मध्यमैकवचनं त्वंयोगात्। पर्यावर्तयोपास्स्वेत्यर्थः। आदित्यस्यैकस्यैवोद्गीथे संपाद्योपासनात्वमेको मे पुत्रोऽसि त्वं तु रश्मीनुद्गीथे संपाद्य पर्यावर्तयतात्ततो बहवस्ते पुत्रा भविष्यन्तीत्यत्र सिद्धवत्प्रत्ययावृत्तिर्दर्शितेत्येतल्लिङ्गमित्यर्थः। उद्गीथप्रत्ययावृत्तावपि कथं प्रत्ययान्तरेषु तत्सिद्धिस्तत्राऽऽह—तेंदिति। तेन प्रकृतेनोद्गीथप्रत्ययेन साक्षात्कारफलतया ध्यानत्वेन वा सादृश्यादिति यावत्। सर्वप्रत्ययेष्वहंग्रहोपासनादिषु श्रवणादिषु चेत्यर्थः। अधिकरणार्थमुक्त्वा तस्य निर्गुणब्रह्मविषयत्वमाक्षिपति—अत्रेति। अहंग्रहोपास्तयः श्रवणादयश्च सविशेषनिर्विशेषब्रह्मसाक्षात्कारफलास्तावदिहोदाहरणं तत्राहंग्रहोपास्तिष्वावृत्तिमङ्गी करोति—भवत्विति। श्रवणादिषु तां निराचष्टे—यस्त्विति। निर्गुणब्रह्मण्यापरोक्ष्यातिशयः साध्यो नास्ति तस्य नित्यापरोक्षत्वात्तेन तत्र श्रवणाद्यावृत्तिरनर्थिकेत्यर्थः। ब्रह्मणो नित्यापरोक्षत्वेऽपि तावताऽविद्याध्वस्तेरभावात्तदर्थमागन्तुकः साक्षात्कारः श्रवणाद्यावृत्तिसाध्योऽस्तीति शङ्कते—सकृदिति। पूर्ववाद्याह—नाऽऽवृत्ताविति। अनुपपत्तिमेव प्रकटयति—यदीति। ज्योतिष्टोमादिवाक्यवदावृत्तिमदपि तत्त्वमादिवाक्यं न स्वार्थे साक्षात्कारक्षममित्यर्थः। युक्तिप्रसंख्यानसहितं वाक्यं स्वार्थे साक्षात्कारं जनयेदित्याह—अथेति। युक्तिसाहित्यमुपेत्याऽऽवृत्तिं प्रत्याह—

---

१ क. ङ. ञ. ट. °ति। तस्मात्तत्सा°। ज. °ति। तस्मात्सा°। २ क. ङ. ज. ञ. °तौ ब्र°। ३ ङ. ञ. °देव चाऽऽव°। ४ ङ. तस्मादि°। ५ क. ख. ठ. ङ. °र्गुणे ब्र°।

(श्रवणादीनामावर्तनीयत्वम्, अधि० १)

साक्षात्कर्तुं शक्नोत्यतो युक्त्यपेक्षं वाक्यमनुभावयिष्यति ब्रह्मात्मत्वमिति। तथाऽप्यावृत्त्यानर्थक्यमेव। साऽपि हि युक्तिः सकृत्प्रवृत्तैव स्वमर्थमनुभावयिष्यति। अथापि स्याद्युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयम्। यथाऽस्ति मे हृदये शूलमित्यतो वाक्याद्वात्रकम्पादिलिङ्गाच्च शूलसद्भावसामान्यमेव परः प्रतिपद्यते न विशेषमनुभवति यथा स एव शूली। विशेषानुभवश्चाविद्याया निवर्तकस्तदर्थाऽऽवृत्तिरिति चेत्। न। असकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसंभवात्। न हि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो विशेषः शतकृत्वोऽपि प्रयुज्यमानाभ्यामवगन्तुं शक्यते। तस्माद्यदि शास्त्रयुक्तिभ्यां विशेषः प्रतिपाद्येत यदि वा सामान्यमेवोभयथाऽपि सकृत्प्रवृत्ते एव ते स्वकार्यं कुरुत इत्यावृत्त्यनुपयोगः। न च सकृत्प्रयुक्ते शास्त्रयुक्ती कस्यचिदप्यनुभवं नोत्पादयत इति शक्यते नियन्तुं विचित्रप्रज्ञत्वात्प्रतिपत्तॄणाम्। अपि चानेकांशोपेते लौकिके पदार्थे सामान्यविशेषवत्येकेनावधानेनैकमंशमवधारयत्यपरेणापरमिति स्यादप्यभ्यासोपयोगो यथा दीर्घप्रपाठकग्रहणादिषु। न तु निर्विशेषे ब्रह्मणि सामान्यविशेषरहिते चैतन्यमात्रात्मके प्रमोत्पत्तावभ्यासापेक्षा युक्तेति।

तथाऽपीति। आवृत्तेरर्थवत्त्वं समर्थयमानः स्वयूथ्यश्चोदयति—अथापीति। तदेव दृष्टान्तेन स्पष्टयति—यथेति। शूलविशेषस्यानुभवायोग्यत्वादेवमित्याशङ्क्याऽऽह—यथेति। अस्तु प्रस्तुतेऽपि सामान्यधीरेव किं विशेषधियेत्याशङ्क्याऽऽह—विशेषेति। स तर्हि भावनाजन्यो वा शास्त्रयुक्तिजन्यो वा नाऽऽद्यस्तस्यामानजन्यत्वेनाविद्याध्वंसित्वायोगादिति मत्वा द्वितीयं प्रत्याह—नेति। प्रत्यक्षातिरिक्तस्य न साक्षात्कारहेतुतेत्यर्थः। किंच युक्तिवाक्ये साक्षात्कारक्षमे तदक्षमे वा समर्थे चेदावृत्त्यानर्थक्यम्। द्वितीयं निराह—न हीति। सामर्थ्यासामर्थ्ययोरावृत्त्यानर्थक्यमुपसंहरति—तस्मादिति। शास्त्रयुक्त्योः साक्षात्कारहेतुत्वोपगमेऽपि व्यर्थाऽऽवृत्तिरित्याह—न चेति। मानस्वभावानुसारेणाऽऽवृत्त्यानर्थक्यमुक्त्वा मेयस्वभावालोचनयाऽपि तदानर्थक्यमाह—अपि चेति।

यं कंचिदधिकारिणं प्रति श्रवणाद्यावृत्त्यानर्थक्यं चोद्यते सर्वानेव वा प्रतीति विक-

---

१ क. 'दिवेदनालिं'। २ ट. 'स्ततस्तदं'। ३ ट. 'त्प्रयुक्ते ए'। ४ क. ज. 'त्प्रवृत्ते शा'। ५ क. ङ. ञ. 'न्यर'। ६ ग. ठ. 'ह। न विशे'। ७ क. ख. 'कत्वा फलस्व'।

अत्रोच्यते—भवेदावृत्त्यानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात् । यस्तु न शक्नोति तं प्रत्युपयुज्यत एवाऽऽवृत्तिः । तथा हि च्छान्दोग्ये—"तत्त्वमसि श्वेतकेतो" [छा० ६-८-७] इत्युपदिश्य "भूय एव मा भगवान्विज्ञापयतु" [छा० ६-८-७] इति पुनः पुनः परिचोद्यमानस्तत्तदाशङ्काकारणं निराकृत्य तत्त्वमसीत्येवासकृदुपदिशति । तथा च "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [बृ० ४-५-६] इत्यादि दर्शितम् । ननूक्तं सकृच्छ्रुतं चेत्तत्त्वमसिवाक्यं स्वमर्थमनुभावयितुं न शक्नोति तत आवर्त्यमानमपि नैव शक्ष्यतीति । नैष दोषः । न हि दृष्टेऽनुपपन्नं नाम । दृश्यन्ते हि सकृच्छ्रुताद्वाक्यान्मन्दप्रतीतं वाक्यार्थमावर्तयन्तस्तत्तदाभासव्युदासेन सम्यक्प्रतिपद्यमानाः । अपि च तत्त्वमसीत्येतद्वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे । तत्पदेन च प्रकृतं सद्ब्रह्मेक्षितृ जगतो जन्मादिकारणमभिधीयते "सत्यं ज्ञानमनन्तं ब्रह्म" [तै० २-१-१] "विज्ञानमानन्दं ब्रह्म" [बृ० ३-९-२८] "अदृष्टं द्रष्टृ" [बृ० ३-८-११] "अविज्ञातं विज्ञातृ" [बृ० ३-८-११] "अजमजरममरम्" [नृसिंहोत्त० २] "अस्थूलमनण्वह्रस्वमदीर्घम्" [बृ० ३ ८-८] इत्यादिशास्त्रप्रसिद्धम् । तत्राजादिशब्दैर्जन्मादयो भावविकारा

रूपयति—अत्रेति। आद्यमङ्गी करोति—भवेदिति। ब्रह्मणोऽपरोक्षत्वाद्वाक्यस्य परोक्षबोधित्वे प्रामाण्यायोगादसति चित्तविक्षेपादिप्रतिबन्धे तस्यापरोक्षबोधित्वमेवेत्यर्थः। द्वितीयं दूषयति—यस्त्विति। असंभावनादिप्रतिबन्धे तन्निवृत्त्यर्थमावृत्तिरर्थवतीत्यर्थः। तत्र श्रौतं लिङ्गमाह—तथा हीति । सूत्रकृताऽपि लिङ्गमङ्गीकृतमित्याह—तथा चेति । पूर्ववादी स्वोक्तं स्मारयति—नन्विति । अनुभवानुसारेण परिहरति—नेत्यादिना । कथमावृत्तेरर्थवत्त्वं दृष्टं येन नानुपपत्तिस्तत्राऽऽह—दृश्यन्ते हीति । वाक्यार्थज्ञानस्य पदार्थधीपूर्वकत्वात्पदार्थयोश्च दुर्ज्ञानत्वादावृत्त्या क्रमेणैव धीरिति हेत्वन्तरमाह—अपि चेति । तत्र तत्पदवाच्यमर्थमाह—तदिति । तस्यैव लक्ष्यमर्थमाह—सत्यमिति । अजमित्यादिवाक्यस्यार्थमाह—तत्रेति । अस्थूलादिवाक्यस्यार्थमाह—

---

१ ट. नामेति । दृ° । २ झ. °तिपाद्य° । ३ ङ. ञ. °र्जन्याद° । ४ ख. ठ. ड. °त्वात्तद्वा° । ५ ठ. ड. °र्वत्वा° । ६ क. °र्ज्ञातत्वा° ।

(श्रवणादीनामावर्तनीयत्वम्, अधि० १)

निवर्तिताः। अस्थूलादिशब्दैश्च स्थौल्यादयो द्रव्यधर्माः। विज्ञानादिशब्दैश्च चैतन्यप्रकाशात्मकत्वमुक्तम्। एष व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः। तथा त्वंपदार्थोऽपि प्रत्यगात्मा श्रोता देहादारभ्य प्रत्यगात्मतया संभाव्यमानश्चैतन्यपर्यन्तत्वेनावधारितः। तत्र येषामेतौ पदार्थावज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां तत्त्वमसीत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति पदार्थपूर्वकत्वाद्वाक्यार्थस्येत्यतस्तान्प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः। यद्यपि च प्रतिपत्तव्य आत्मा निरंशस्तथाऽप्यध्यारोपितं तस्मिन्बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणं तत्रैकेनावधानेनैकमंशमपोह्यपरेणापरमिति युज्यते तत्र क्रमवती प्रतिपत्तिः। तत्तु पूर्वरूपमेवाऽऽत्मप्रतिपत्तेः। येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुमिति तान्प्रत्यावृत्त्यानर्थक्यमिष्टमेव। सकृदुत्पन्नैव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते।

अस्थूलादीति। सत्यज्ञानादिवाक्यस्यापुनरुक्तमर्थमाह—विज्ञानादीति। श्रौते तदर्थे विद्वदनुभवमपि प्रमाणयति—एष इति। तत्पदार्थं वाच्यं लक्ष्यं च सप्रमाणमुक्त्वा त्वंपदार्थमपि विभज्य दर्शयति—तथेति। अवधारितो योऽयं विज्ञानमयः प्राणेषु यः प्राणेन प्राणितीत्यादिनेति शेषः। स्यातामेतौ पदार्थौ तथाऽपि कथमावृत्तेरर्थवत्त्वं तत्राऽऽह—तत्रेति। यत्तु मेयस्यानंशत्वादावृत्त्यानर्थक्यमिति तत्राऽऽह—यद्यपीति। आरोपितव्यावर्त्यांशबाहुल्यात्क्रमवत्त्वं प्रतिपत्तेरर्थवदित्यर्थः। तत्त्वमसिवाक्यादहंब्रह्मेतिवाक्यार्थज्ञाने सति कथं क्रमापेक्षेत्याशङ्क्याऽऽह—तत्त्विति। क्रमेण जातं पूर्वज्ञानमात्मसाक्षात्कारात्पूर्वकालमेव ततोऽसंभावनादिनिरासससहितवाक्योत्थतत्त्वसाक्षात्कारे नास्त्येवाऽऽवृत्त्यपेक्षेत्यर्थः। मन्दमध्यमौ प्रति साक्षात्कारात्पूर्वं श्रवणाद्यावृत्तेरर्थवत्त्वमुक्तम्। इदानीमुत्तमं प्रत्यावृत्त्यानर्थक्यमुक्तं विवृणोति—येषामिति। उत्पन्नाऽपि धीरावृत्तिमपेक्षते फलायेत्याशङ्क्याऽऽह—सकृदिति।

---

१ ग. °त्मा द्रष्टा श्रो°। २ ङ. ज. ट. श्रोतुर्देहा°। क. श्रौतो। ३ क. ज. °क्यं न स्वा°। ४ क. ज. प्रमामुत्पा°। ५ ङ. ज. ञ. ट. °थैज्ञानपू°। ६ ङ. ञ. °थैज्ञानस्ये°। ७ ट. °शकत्वं। ८ ञ. °त्र विक्र°। ९ ट. °त्यान°।

सत्यमेवं युज्येत यदि कस्यचिदेवं प्रतिपत्तिर्भवेत् । बलवती ह्यात्मनो दुःखित्वादिप्रतिपत्तिः । अतो न दुःखित्वाद्यभावं कश्चित्प्रतिपद्यत इति चेत् । न । देहाद्यभिमानवद्दुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वोपपत्तेः । प्रत्यक्षं हि देहे छिद्यमाने दह्यमाने वाऽहं छिद्ये दह्य इति च मिथ्याभिमानो दृष्टः । तथा बाह्यतरेष्वपि पुत्रमित्रादिषु संतप्यमानेष्वहमेव संतप्य इत्यध्यारोपो दृष्टः । तथा दुःखित्वाद्यभिमानोऽपि स्यात् । देहादिवदेव चैतन्याद्बहिरुपलभ्यमानत्वाद्दुःखित्वादीनाम् । सुषुप्तादिषु चाननुवृत्तेश्चैतन्यस्य तु सुषुप्तेऽप्यनुवृत्तिमामनन्ति—" यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति " [बृ० ४-३-२३] इत्यादिना । तस्मात्सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहमित्येष आत्मानुभवः । न चैवमात्मानमनुभवतः किंचिदन्यत्कृत्यमवशिष्यते । तथा च श्रुतिः " किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः " [बृ० ४-४-२२] इत्यात्मविदः कर्तव्याभावं दर्शयति । स्मृतिरपि—

उत्पन्ने ज्ञाने यदावृत्त्यानर्थक्यं तदङ्गीकुर्वन्नाह—सत्यमिति । वाक्यादीदृशी धीः स्यादित्याशङ्क्याध्यक्षादिविरोधान्नैवमित्याह—बलवतीति । सा वाक्यीयविद्योच्छेद्यत्वाद्भ्रान्तिरित्याशङ्क्याऽऽह—अत इति । दुःखित्वादिप्रत्ययस्य सर्वदा सर्वेषामुत्पद्यमानस्य बलवत्त्वादेव विद्योच्छेद्यत्वायोगान्न भ्रान्तितेत्यर्थः । तथाविधस्यापि देहात्माभिमानस्य भ्रान्तित्वाद्दुःखित्वाद्यभिमानस्यापि युक्तिबाधितस्य भ्रान्तित्वसिद्धेर्नैवमित्याह—नेत्यादिना । उक्तं दृष्टान्तं प्रत्यक्षदृष्टान्ताभ्यां स्पष्टयति—प्रत्यक्षं हीति । दुःखादयस्तत्त्वतो नाऽऽत्मधर्मा वेद्यत्वात्संमतवदिति दार्ष्टान्तिकमाह—तथेति । व्यभिचारित्वाच्च दुःखादीनां रूपादिवत्तत्त्वतो नाऽऽत्मधर्मतेत्याह—सुषुप्तेति । तर्हि चैतन्यमपि न स्वरूपमननुवृत्तत्वाद्दुःखादिवदित्याशङ्क्याऽऽह—चैतन्यस्येति । दुःखित्वादिधीर्मिथ्याभिमानश्चैतन्यमेवाव्यभिचारिस्वरूपमिति स्थिते फलितमाह—तस्मादिति । यथोक्तानुभवे वाक्यादविरुद्धेऽपि किमित्यावृत्तिर्नेष्यते तत्राऽऽह—न चेति । तस्मादेवानुभवात्कृतकृत्यतेत्यत्र मानमाह—तथा चेति । रतिरासक्तिस्तत्फलं तृप्तिस्तृप्तेरपि फलं संतोष इति भेदः । यत्तु साक्षात्कारात्पूर्वमावृत्तेरर्थवत्त्वमुक्तं तदधिकविवक्षया

---

१ क. °व चै° । २ ज. °खनि° । ३ ङ. ञ. ट. °विमुक्तै° । ४ क. °त्वाभि° । ५ ख. °द्धेर्मैव° ।

(ज्ञात्रा जीवेन स्वात्मतया ब्रह्मणो प्राप्यत्वम्, अधि० २)

" यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते "

[भ० गी० ३-१७] इति । यस्य तु नैषोऽनुभवो द्रागिव जायते तं प्रत्यनुभवार्थ एवाऽऽवृत्त्यभ्युपगमः । तत्रापि न तत्त्वमसिवाक्यार्थात्प्रत्याव्याऽऽवृत्तौ प्रवर्तयेत् । न हि वरघाताय कन्यामुद्वाहयन्ति । नियुक्तस्य चास्मिन्नधिकृतोऽहं कर्ता मयेदं कर्तव्यमित्यवश्यं ब्रह्मप्रत्ययाद्विपरीतप्रत्यय उत्पद्यते । यस्तु स्वयमेव मन्दमतिरप्रतिभानात्तं वाक्यार्थं जिहासेत्तस्यैतस्मिन्नेव वाक्यार्थे स्थिरीकार आवृत्त्यादिवाचोयुक्त्याऽभ्युपेयते । तस्मात्परब्रह्मविषयेऽपि प्रत्यये तदुपायोपदेशेष्वावृत्तिसिद्धिः॥२॥(१)

(ज्ञात्रा जीवेन स्वात्मतया ब्रह्मणो प्राप्यत्वम्, अधि० २)

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ (२)

निगमयति—यस्येति । द्रागिति झटिति । नियोगबलादावृत्तौ प्रवृत्तेर्नियोगार्थाऽऽवृत्तिर्नानुभवार्थेत्याशङ्क्याऽऽह—तत्रापीति । अहं ब्रह्मास्मीतिप्रत्ययात्प्रत्याव्यानाऽऽवृत्तौ पुरुषं प्रवर्तयेत्प्रधानविरोधात् । अकर्त्रात्मानुभवाय हि श्रवणादिविधिर्न नियोगायेत्यर्थः । प्रधानविरोधायोगे दृष्टान्तमाह—न हीति । नियोगार्थमावृत्त्युपगमेऽपि तस्मादेवाकर्त्रात्मधीसिद्धेर्न तद्व्याहतिरित्याशङ्क्याऽऽह—नियुक्तस्येति । नियोगानङ्गीकारे कुतः श्रोतव्यादिवाक्यैः श्रवणाद्यावृत्तिसिद्धिस्तत्राऽऽह—यस्त्विति । अप्रतिभानादसंभावनादिप्रतिबन्धादिति यावत् । स्थिरीकारोऽसंभावनाद्यपोहेनावगमदार्ढ्यं वेदोपासीतेत्यावृत्तिर्वाचोयुक्तिः । आदिशब्देन श्रोतव्यादिवाक्यं गृह्यते । अहंग्रहोपासनेषु श्रवणादिषु च सगुणनिर्गुणसाक्षात्कारफलेष्वावृत्त्याऽनुष्ठानमित्यधिकरणार्थमुपसंहरति—तस्मादिति । अपरब्रह्मविषयप्रत्यये स्वरूपावृत्तिवदित्यपेरर्थः ॥ २ ॥ (१)

श्रवणमननिदिध्यासनादिसाधनान्यावृत्त्याऽनुष्ठेयानीत्युक्तम् । तत्र निदिध्यासनकाले कथं प्रत्ययावृत्तिस्तत्राऽऽह—आत्मेति त्विति । यद्यपि शब्दादेव प्रमित इत्यादिषु जीवब्रह्मैक्यं श्रुतिभिरुक्तं तथाऽपि तासामेव विरुद्धार्थत्वादुपचरितविषयत्वमाशङ्क्यात्र समाधीयते । विरोधसमाधेरविरोधाध्यायसंगतत्वेऽपि महावाक्यार्थविरोधसमाधेः समाधावन्तरङ्गत्वादिह संगतिरिति मत्वा विषयोक्तिपूर्वकमुभयथाप्रसिद्धेः संश-

---

१ क. जायेत । २ क. ङ. ज. ञ. ट. 'स्ययापि' । ३ क. ङ. ञ. 'नाद्वाक्या' । ४ ङ. 'ति । नि' । ५ क. 'वृत्त्यभ्युप' ।

(ज्ञात्रा जीवेन स्वात्मतया ब्रह्मणो प्राप्यत्वम्, आधि० २)

यः शास्त्रोक्तविशेषणः परमात्मा स किमहमिति ग्रहीतव्यः किं वा मदन्य इत्येतद्विचारयति । कथं पुनरात्मशब्दे प्रत्यगात्मविषये श्रूयमाणे संशय इति । उच्यते—अयमात्मशब्दो मुख्यः शक्यतेऽभ्युपमन्तुं सति जीवेश्वरयोरभेदसंभव इतरथा तु गौणोऽयमभ्युपगन्तव्य इति मन्यते । किं तावत्प्राप्तं, नाहमिति ग्राह्यः । न ह्यपहतपाप्मत्वादिगुणो विपरीतगुणत्वेन शक्यते ग्रहीतुं विपरीतगुणो वाऽपहतपाप्मत्वादिगुणत्वेन । अपहतपाप्मादिगुणश्च परमेश्वरस्तद्विपरीतगुणस्तु शारीरः । ईश्वरस्य च संसार्यात्मत्व ईश्वराभावप्रसङ्गः । ततः शास्त्रानर्थक्यम् । संसारिणोऽपीश्वरात्मत्वेऽधिकार्यभावाच्छास्त्रानर्थक्यमेव । प्रत्यक्षादिविरोधश्च । अन्यत्वेऽपि तादात्म्यदर्शनं शास्त्रात्कर्तव्यं प्रतिमादिष्विव विष्ण्वादिदर्शनमिति चेत्कामभेवं भवतु । न तु संसारिणो मुख्य आत्मेश्वर इत्येतन्नः प्रापयितव्यम् ।

यमाह—य इति । संशयाभावादधिकरणमाक्षिपति—कथमिति । आत्मशब्दस्य मुख्यार्थत्वे सत्यभेदसिद्धिस्तत्सिद्धौ च तस्य मुख्यार्थत्वसिद्धिरित्यन्योन्याश्रयान्मानान्तरविरोधाच्च तन्मुख्यार्थत्वासिद्धेस्तदालम्बनेन संशयानाक्षेपादधिकरणमारभ्यमित्याह—उच्यत इति । अत्र च विरोधपरिहारफले समाध्युपयोगितया प्रासङ्गिके ध्यानावस्थायां प्रत्यक्त्वेन ब्रह्मप्रतिपत्त्यनुष्ठानोक्त्या पादादिसंगतिः । पूर्वपक्षे श्रुतीनामैक्यगोचराणामुपचरितार्थत्वम् । सिद्धान्ते तासां मुख्यार्थत्वं फलतीत्याशयवान्विमृश्य पूर्वपक्षं गृह्णाति—किमिति । द्वा सुपर्णेत्यादिभेदश्रुतेरुपास्योपासकादिभावभेदलिङ्गैश्च भेद इत्यर्थः । युक्तितो भेदमाह—न हीति । तयोर्विरुद्धगुणत्वमसिद्धमित्याशङ्क्याऽऽह—अपहतेति । किं चाभेदेऽपि किमीश्वरस्य जीवात्मता किं वा जीवस्येश्वरात्मतेति विकल्प्याऽऽद्यं दूषयति—ईश्वरस्येति । द्वितीयं प्रत्याह—संसारिणोऽपीति । अहं सुखीत्याद्यनुभवेन विरुद्धस्वभावत्वाद्भेदो दहनतुहिनवदित्यनुमानेन च विरोधान्न तयोरैक्यमित्याह—प्रत्यक्षादीति । एकत्वोपदेशानां तर्हि का गतिरित्याशङ्क्य व्याजेन तद्गतिमाह—अन्यत्वेऽपीत्यादिना । तादात्म्यदर्शनाङ्गीकारे नास्ति विप्रतिपत्तिरित्याशङ्क्याऽऽह—न त्विति ।

---

१ ङ. ञ. इति तावद्वि°। २ ट. °शयः । उ° । ३ क. °पाप्मादि° । ४ ङ. ज. ञ. ट °पाप्मत्वादि°। ५ क. °श्वरो विप° । ६ क. °गुणः शा° । ७ ट. °सङ्गात्ततः । ८ ट. °क्यमेव । सं° । ९ क. ज. ञ. °त्येतावन्नः । १० ङ. ञ. °व्यमिति । ए° । ११ ठ. ड. °पाधि° । १२ क. °त्र वि° । १३ झ. ठ. °शङ्क्याव्या° ।

(ज्ञात्रा जीवेन स्वात्मतया ब्रह्मणो प्राप्यत्वम्, अधि० २)

एवं प्राप्ते ब्रूमः—"आत्मेति" एव परमेश्वरः प्रतिपत्तव्यः। तथा हि परमेश्वरप्रक्रियायां जाबाला आत्मत्वेनैवैतमुपगच्छन्ति "त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि देवते" इति। तथाऽन्येऽपि "अहं ब्रह्मास्मि" [बृह० १-४-१०] इत्येवमादय आत्मत्वोपगमा द्रष्टव्याः। "ग्राहयन्ति च" आत्मत्वेनैवेश्वरं वेदान्तवाक्यानि "एष त आत्मा सर्वान्तरः" [बृ० ३-४-१] "एष त आत्माऽन्तर्याम्यमृतः" [बृ० ३-७ ३] "तत्सत्यं स आत्मा तत्त्वमसि" [छा० ६-८-७] इत्येवमादीनि। यदुक्तं प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यतीति तदयुक्तं गौणत्वप्रसङ्गात्। वाक्यवैरूप्याच्च। यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति। यथा "मनो ब्रह्म" [छा० ३-१८-१] "आदित्यो ब्रह्म" [छा० ३-१९-१] इत्यादि। इह पुनस्त्वमहमस्म्यहं च त्वमसीत्याहातः प्रतीकश्रुतिवैरूप्यादभेदप्रतिपत्तिः। भेददृष्ट्यपवादाच्च। तथा हि—"अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद" [बृ० १-४-१०] "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" [बृ० ४-४-१९ कठ० ४-१० आत्मप्रबो० १] "सर्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्वं वेद" [बृ० ४-५-७] इत्येवमाद्या भूयसी श्रुतिर्भेददर्शनमपवदति। यत्तूक्तं न विरुद्धगुणयोरन्योन्यात्मत्वसंभव इति। नायं

एकत्वश्रुतीनां प्राप्तमुपचरितार्थत्वमनूद्य सिद्धान्तयति—एवमिति। सिद्धान्तन्तसूत्रं योजयति—आत्मेत्येवेति। तत्र मानमाह—तथा हीति। आत्मत्वोपगमान्तराणि दर्शयति—तथेति। आदिशब्देन तद्योऽहं सोऽसौ योऽसौ सोऽहमित्यादयो गृह्यन्ते। सूत्रावयवमवशिष्टं व्याचष्टे—ग्राहयन्तीति। परोक्तमनूद्य दूषयति—यदुक्तमित्यादिना। एकत्वश्रुतीनामपूर्वार्थत्वफलवत्त्वाभ्यां तात्पर्यसिद्धेर्मुख्यवृत्तिसंभवे गौणत्वायोगाद्भेदश्रुतीनां तल्लिङ्गानां च तद्विपरीतात्कल्पितभेदालम्बनत्वान्मुख्यमेव जीवब्रह्मणोरैक्यमित्यर्थः। इतश्च नेदं प्रतीकदर्शनमित्याह—वाक्येति। भेदस्य निन्द्यमानत्वाच्चाभेदस्यैव प्रतिपाद्यतेत्याह—भेदेति। विरुद्धस्वभावत्वाद्भेदो जीवब्रह्मणोरित्युक्तमनूद्य प्रत्याह—यत्त्विति। बिम्बप्रतिबिम्बवदुपाधिकृतो विरुद्धध-

---

१ क. ज. ञ. ट. °वैनमुं। २ ङ. ञ. ब्रह्मेत्यादित्यो। ३ ज्ञ. च तत्त्वम'।

दोषः । विरुद्धगुणताया मिथ्यात्वोपपत्तेः । यत्पुनरुक्तमीश्वराभावप्रसङ्ग इति तदसत् । शास्त्रप्रामाण्यादनभ्युपगमाच्च । न हीश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः किं तर्हि संसारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितमिति । एवं च सत्यद्वैतेश्वरस्यापहतपाप्मत्वादिगुणता, विपरीतगुणतो त्वितरस्य मिथ्येति व्यवतिष्ठते । यदप्युक्तमधिकार्यभावः प्रत्यक्षादिविरोधश्चेति । तदप्यसत् । प्राक्प्रबोधात्संसारित्वाभ्युपगमात् । तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य । "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् " [बृ०२-४-१४] इत्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शयति । प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्ग इति चेत् । न । इष्टत्वात् । " अत्र पिताऽपिता भवति " [बृ० ४-३-२२] इत्युपक्रम्य " वेदा अवेदाः " [बृ०४-३-२२] इति वचनादिष्यत एवास्माभिः श्रुतेरप्यभावः प्रबोधे । कस्य पुनरयमप्रबोध इति चेत् । यस्त्वं पृच्छसि तस्य त इति वदामः । नन्वहमीश्वर एवोक्तः श्रुत्या, यद्येवं प्रतिबु-

---

र्माध्यासो न वास्तवस्तथा च तात्त्विकमैक्यमित्यर्थः । अभेदेऽपि संसार्यात्मत्वमीश्वरस्य संसारिणो वा तदात्मत्वमिति विकल्प्याऽऽद्ये यद्दूषणं तदनुभाष्य दूषयति—यत्पुनरिति। अनभ्युपगमं विवृणोति-न हीति । द्वितीयं प्रश्नपूर्वकमङ्गी करोति—किमिति । विरुद्धांशहान्या जीवस्य ब्रह्मत्वे प्रतिपाद्ये विरुद्धधर्मत्वमुक्तमसिद्धमेवेति फलितमाह—एवं चेति। संसारिणः संसारित्वापोहेन ब्रह्मत्वे साध्ये परोक्तमनूद्य निरस्यति—यदपीति । अधिकार्यभावादिरेकत्वज्ञानात्पूर्वमूर्ध्वं वेति विकल्प्याऽऽद्यं निराह—प्रागिति । द्वितीयमङ्गी करोति—यत्रेति । श्रुतिश्रद्धालुतया शङ्कते—प्रत्यक्षादीति । तत्त्वज्ञानादूर्ध्वं श्रुत्यभावस्येष्टत्वान्नानिष्टापत्तिरित्याह—नेष्टत्वादिति । तदेव स्पष्टयति—अत्रेति । गूढाभिप्रायः सन्पृच्छति—कस्येति । यस्य भ्रान्तिस्तस्याज्ञानमित्याह—यस्त्वमिति । स्वाभिप्रायं पूर्ववादी प्रकटयति—नन्विति । अविद्यातज्जभ्रान्त्योरनिर्वाच्यत्वाद्बोधे सति तयोरसत्त्वान्नाऽऽश्रयापेक्षेत्याह—यद्येवमिति । अनिर्वाच्यत्वादविद्यायाश्चोद्यान्तरमपि निरस्तमित्याह—

---

१ क. ज. °वं स° । २ ब. °ता त्वीश्वर° । ३ ज. °रस्येति । ४ झ प्रभुं । ५ क. °द्य तदूषयति ।

(प्रतीकेऽहंदृष्ट्यभावः, अधि० २)

द्धोऽसि नास्ति कस्यचिदप्रबोधः। योऽपि दोषश्चोद्यते कैश्चि-
दविद्यया किलाऽऽत्मनः सद्वितीयत्वादद्वैतानुपपत्तिरिति सो-
ऽप्येतेन प्रत्युक्तः। तस्मादात्मेत्येवेश्वरे मनो दधीत ॥ ३ ॥ (२)

(प्रतीकेऽहंदृष्ट्यभावः, अधि० ३)

न प्रतीके न हि सः ॥ ४ ॥ (३)

"मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेति" [छा० ३-१८-१] तथा " आदित्यो ब्रह्मेत्यादेशः " [छा० ३-१९-१] " स यो नाम ब्रह्मेत्युपास्ते " [छा० ७-१-५] इत्येवमादिषु प्रतीकोपासनेषु संशयः—किं तेष्वप्यात्मग्रहः कर्त-
व्यो न वेति। किं तावत्प्राप्तं, तेष्वप्यात्मग्रह एव युक्तः। कस्मात्। ब्रह्मणः श्रुतिष्वात्मत्वेन प्रसिद्धत्वात्। प्रतीकानामपि ब्रह्मविकारत्वाद्ब्रह्मत्वे सत्यात्मत्वोपपत्तेरिति। एवं प्राप्ते ब्रूमः—
न प्रतीकेष्वात्ममतिं कुर्वीत। न हि स उपासकः प्रतीकानि
व्यस्तान्यात्मत्वेनाऽऽकलयेत्। यत्पुनर्ब्रह्मविकारत्वात्प्रतीकानां

योऽपीति। अभेदश्रुतीनां सिद्धे मुख्यार्थत्वे फलितमुपसंहरति—तस्मादिति ॥३॥ (२)

आत्मैत्वमतिरीश्वरे कार्येत्युक्तम्। इदानीं प्रतीकविशेषणस्यापीश्वरस्याऽऽत्मत्वात्त-
द्द्वारा प्रतीकेष्वात्मत्वधीरिति प्राप्ते प्रत्याह—न प्रतीक इति। प्रतीकोपासनान्युदाह-
त्योपास्तिषूभयथादृष्टेः संशयमाह—मन इत्यादिना। जीवब्रह्माभेदं पूर्वोक्तमुपजीव्य ब्रह्मदृष्टिभाक्षु प्रतीकेषु ब्रह्माभिन्नजीवदृष्टिरहमिति कार्येति प्रश्नपूर्वकं पूर्वपक्षमाह—किं तावदिति। अत्र प्रासङ्गिकाहंमतिनिरासेन प्रतीकोपास्तिषु प्रयोगभेदोक्त्या पादा-
दिसंगतिः। पूर्वपक्षे प्रतीकोपास्तीनामहंग्रहोपास्तिभिरविशेषः। सिद्धान्ते विशेषः सिध्यतीत्यङ्गीकृत्य पूर्वपक्षे हेतुं पृच्छति—कस्मादिति। प्रतीकेष्वात्मत्वग्रहे तेषामा-
त्मत्वोपपत्तिहेतुमाह—ब्रह्मण इति। तस्याऽऽत्मत्वेऽपि तेषां कथमात्मत्वं तत्राऽऽह—
प्रतीकानामिति। ब्रह्मधीयुक्तानि प्रतीकान्यहमिति ग्राह्याणि ब्रह्माभिन्नत्वात्तद्वदित्यर्थः। द्विविधोपास्तिष्वविशेषे प्राप्ते सिद्धान्तमाह—एवमिति। न प्रतीकेष्वात्ममतिं कुर्यादै-
क्यचोदनाभावे सति स्वतोभिन्नत्वादुद्गीथादिवदित्याह—नेत्यादिना। यत्तु ब्रह्मरूप-
त्वादहमिति ग्राह्याणीति तत्र किमात्मैत्वानुभवादात्मत्वेन ग्राह्याणि किं वा मानान्तरसि-
द्धत्वान्नाऽऽद्य इत्याह—न हीति। द्वितीयमनूद्य दूषयति—यदिति। प्रसङ्गमेव

---

१ ङ. ञ. 'दात्मन्येवे'। २ ट. 'त। आत्मेश्वराधिकरणम्। न। ३ ट. तेष्वात्म'। ४ ञ. ट. 'नि यस्ता'। ५ ट. 'त्वेनावक'। ६ ठ. ड. 'त्मतत्त्वम'। ७ ड. 'पक्षहे'। ८ क. ज्ञ. 'पत्ति हे'। ९ क. 'त्मतत्त्वानु'।

ब्रह्मत्वं ततश्चाऽऽत्मत्वमिति । तदसत् । प्रतीकाभावप्रसङ्गात् । विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाऽऽश्रितं भवति । स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मग्रहो वा । न च ब्रह्मण आत्मत्वाद्ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्या । कर्तृत्वाद्यनिराकरणात् । कर्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशः । तदनिराकरणेन चोपासनविधानम् । अतश्चोपासकस्य प्रतीकैः समत्वादात्मग्रहो नोपपद्यते । न हि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति । सुवर्णात्मनैवं तु ब्रह्मात्मनैकत्वे प्रतीकाभावप्रसङ्गमवोचाम । अतो न प्रतीकेष्वात्मदृष्टिः क्रियते ॥ ४ ॥ (३)

(अब्रह्मणि प्रतीके ब्रह्मदृष्टेः कर्तव्यत्वम्, अधि० ४)

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥ (४)

तेष्वेवोदाहरणेष्वन्यः संशयः—किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः किं वा ब्रह्मदृष्टिरादित्यादिष्विति । कुतः संशयः ।

प्रकटयति—विकारेति । तथाऽपि को दोषस्तत्राऽऽह—स्वरूपेति । वस्तुवृत्तेन विकाररूपेण नामादीनां ब्रह्मत्वायोगाज्जीवत्वलयेन जीवस्य ब्रह्मत्वोक्तिवत्प्रतीकत्वलयेन तेषामपि ब्रह्मत्वोक्तावालम्बनाभावादुपास्तिविधिर्न स्यादित्यर्थः । यत्तु ब्रह्मत्वे सत्यात्मत्वमिति तत्राऽऽह—न चेति । प्रतीकोपदेशेषु कथं कर्तृत्वाद्यनिराकरणं तदाह—कर्तृत्वादीति । तन्निराकरणे तद्विधिरेव न स्यादिति भावः । प्रतीकानां जीवस्य च परिच्छिन्नतया साम्यं गृहीत्वा फलितमाह—अतश्चेति । सत्यपि तुल्यत्वे किमिति जीवस्य तेषु विधिवशादहंग्रहो न स्यात्तत्राऽऽह—न हीति । स्वरूपेणैक्याभावेऽपि रुचकस्वास्तिकयोः सुवर्णात्मनैक्यवदिहापि ब्रह्मात्मनैक्यादहंग्रहः स्यादित्याशङ्क्याऽऽह—सुवर्णेति । विकाररूपतिरस्कारेणैक्ये न प्रतीकतेत्युक्तमित्यर्थः । रुचकस्वस्तिकयोरपि मिथोव्यावृत्तयोर्नानुवृत्तसुवर्णाद्यात्मत्वकल्पनामृते सिध्यतीति सिद्धवत्कृत्योपसंहरति—अत इति ॥ ४ ॥ (३)

अहंग्रहोपासनेष्विव प्रतीकोपासनेष्वहंग्रहेणानुष्ठानं नेत्युक्तम् । इदानीं प्रतीकोपासनेष्वेव क्व किंदृष्टिरध्यस्यतामिति संदिहानं प्रत्याह—ब्रह्मदृष्टिरिति । एकविषयत्वेनाधिकरणयोः संगतिं मन्वानो विषयसंशयौ दर्शयति—तेष्वेवेति । प्रश्नपूर्वकं संशयबीजमाह—कुत इति । उक्तमेव व्यक्तीकर्तुं सामानाधिकरण्यधियं तावद्दर्शयति—

---

१ क. °व ब्र° । २ ङ. ञ. °त्मत्वेनै° । ३ ट. ते । प्रतीकाधिकरणम् । ब्र° । ४ ट. °ण्यध्यासि° । ५ ख. °ह । नेति । ६ ठ. ड. °णात्मकत्वं क° ।

सामानाधिकरण्ये कारणानवधारणात् । अत्र हि ब्रह्मशब्दस्याऽऽदित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते। " आदित्यो ब्रह्म " " प्राणो ब्रह्म " [कौ० १-२] " विद्युद्ब्रह्म " [बृह० ५-७-१] इत्यादिसमानविभक्तिनिर्देशात् । न चात्राऽऽञ्जसं सामानाधिकरण्यमवकल्पते । अर्थान्तरवचनत्वाद्ब्रह्मादित्यादिशब्दानाम् । न हि भवति गौरश्व इति सामानाधिकरण्यम् । ननु प्रकृतिविकारभावाद्ब्रह्मादित्यादीनां मृच्छरावादिवत्सामानाधिकरण्यं स्यात् । नेत्युच्यते । विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात्स्यात् । ततश्च प्रतीकाभावप्रसङ्गमवोचाम । परमात्मवाक्यं चेदं तदानीं स्यात्ततश्चोपासनाधिकारो बाध्येत । परिमितविकारोपादानं च व्यर्थम् । तस्माद्ब्राह्मणोऽग्निर्वैश्वानर इत्यादिवदन्यत्रान्यदृष्ट्यध्यासे सति क किंदृष्टिरध्यस्यतामिति संशयः । तत्रानियमो नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्तम् । अथ वाऽऽदित्यादिदृष्टय एव ब्रह्मणि कर्तव्या

अत्रेति । तथाऽपि यथाकथंचिदस्य सामानाधिकरण्यस्य संभवे कुतः संशयसिद्धिरित्याशङ्क्य सोऽयमितिवदेकत्वनिमित्तं वा प्रकृतिविकारत्वनिमित्तं वा समारोपकृतं वा तदिति विकल्प्याऽऽद्यं दूषयति—न चेति । भिन्नार्थशब्देषु तदभावमुदाहरति—न हीति । द्वितीयमादत्ते—नन्विति । उपास्तिर्विरोधान्मैवमित्याह—नेतीति । प्रविलयपरमेव वाक्यं नोपास्तिपरमित्याशङ्क्योपासीतेतिश्रुतिविरोधान्मैवमित्याह—परमात्मेति । प्रपञ्चप्रविलयद्वारा परमात्मपरत्वे वाक्यस्य कतिपयादित्यादिग्रहणमनर्थकम् । न च सर्वोपलक्षणार्थं तद्ग्रहणं मुख्यसंभवे लक्षणायोगादित्याह—परिमितेति । पक्षद्वयायोगात्परिशिष्टे तृतीये पूर्वोक्तः संशयः स्यादित्युपसंहरति—तस्मादिति । प्रासङ्गिकप्रकृतप्रतीकोपासनेषु स्वतन्त्रपुमर्थहेतुषु ब्रह्मदृष्ट्याऽनुष्ठानोक्त्या पादादिसंगतिः । पूर्वपक्षे लौकिकन्यायविरोधः । सिद्धान्ते तदविरोधः सिध्यतीत्यभिप्रेत्य पूर्वपक्षयति—तत्रेति । यथाऽऽत्यन्तिकभेदो नामादिष्वहंग्रहाभावे हेतुरुक्तस्तथा तेष्वेव ब्रह्मधीनियामकं न किंचिदृष्टं तस्मादनियम इत्यर्थः । उत्कृष्टनिकृष्टयोरुत्कृष्टमेवोपास्यं फलविशेषवत्त्वाद्राजादिवदित्याशङ्क्य साक्षात्पूर्वपक्षमाह—अथ वेति । आदित्यादिशब्दानां

---

१ ट. °रवि° । २ क. °लय एव ह्ये° । ३ क. ङ. ज. ञ °न्यतरत्रा° । ४ क. ज. °न्यतरद्° । ५ ट. °मित्यस्ति सं° । ६ ठ. ड. °स्तिविधिवि° । ७ क. ख. °श्ववि° । ८ क. झ. °रुक्तः । हेत्वर्थे विवृणोति । एवमिति । तथा । ९ ठ. ड. °त्वाद्रा° ।

इत्येवं प्राप्तम्। एवं ह्यादित्यादिदृष्टिभिर्ब्रह्मोपासितं भवति, ब्रह्मोपासनं च फलवदिति शास्त्रमर्यादा। तस्मान्न ब्रह्मदृष्टिरादित्यादिष्विति।

एवं प्राप्ते ब्रूमः-"ब्रह्मदृष्टिः" एवाऽऽदित्यादिषु स्यादिति। कस्मात्। "उत्कर्षात्"। एवमुत्कर्षेणाऽऽदित्यादयो दृष्टा भवन्ति। उत्कृष्टदृष्टेस्तेष्वध्यासात्। तथा च लौकिको न्यायोऽनुमतो भवति। उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः। यथा राजदृष्टिः क्षत्तरि। स चानुसर्तव्यः। विपर्यये प्रत्यवायप्रसङ्गात्। न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षे नीयमानः श्रेयसे स्यात्। ननु शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गो न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति। अत्रोच्यते—निर्धार्यते शास्त्रार्थ एतदेवं स्यात्। संदिग्धे तु तस्मिंस्तन्निर्णयं प्रति लौकिकोऽपि न्याय आश्रीयमाणो न विरुध्यते। तेन चोत्कृष्टदृष्ट्यध्यासे शास्त्रार्थेऽवधार्य-

---

प्रथमश्रुतानामनुरोधेन चरमश्रुतं ब्रह्मपदं नेतव्यमिति चेन्न। तथा सति फलाभावापातादित्याह—**ब्रह्मेति**। पक्षद्वयेऽपि फलितमाह—**तस्मादिति**।

आदित्यादिदृष्ट्या ब्रह्मोपास्यमिति प्राप्ते सिद्धान्तयति—**एवमिति**। नियमहेतुं प्रश्नपूर्वकमाह—**कस्मादिति**। हेत्वर्थं विवृणोति—**एवमिति**। उत्कृष्टनिकृष्टयोरुत्कृष्टस्य द्रष्टव्यत्वादादित्यादिदृष्ट्या ब्रह्मैवोपास्यमित्युक्तमाशङ्क्याऽऽह—**तथा चेति**। किं तदनुसरणेनेत्याशङ्क्याऽऽह—**स चेति**। प्रसङ्गमेव दृष्टान्तेन स्पष्टयति—**न हीति**। ब्रह्मण एव फलमत इतिन्यायात्फलदातृत्वात्तस्यैवाऽऽदित्यादिधीभिरुपास्यतेति शङ्कते—**नन्विति**। किंच शास्त्रस्य स्वत एव प्रामाण्यान्न लौकिकन्यायापेक्षेत्याह—**न चेति**। ब्रह्मण एव फलदातृत्वेऽपि शास्त्रमादित्यादौ प्रतीके ब्रह्मधिया ध्येये तत्फलदमिति वा ब्रवीत्यादित्यादिधिया ब्रह्मण्युपास्ये वेति शास्त्रार्थसंदेहे लोकानुसारेण निर्धारणमित्याह—**अत्रेति**। लौकिकन्यायस्य निश्चयहेतुत्वे विपक्षे दोषमाह—**तेनेति**। न केवलं लौकिकन्यायो निश्चायकः किं त्वादित्यादिशब्दानां प्रथमश्रुतत्वेन

---

१ क. °दृष्ट्या ब्रह्मो°। २ ङ. °पासनं भ°। ३ ट. °दिषु। ए°। ४ क. ङ. ञ. ट. °नुगतो। ५ क. ज. ञ. ट. °नुगन्तव्यः। ६ क. °सङ्गो न। ७ क. °रितशा°। ८ च. ठ. ङ. °वादित्याशङ्क्याऽऽह। ९ ट. ङ. °मित्याश°।

(अब्रह्मणि प्रतीके ब्रह्मदृष्टेः कर्तव्यत्वम्, अधि० ४)

माणे निकृष्टदृष्टिमध्यस्यन्प्रत्येवेयादिति श्लिष्यते। प्राथम्याच्चाऽऽदित्यादिशब्दानां मुख्यार्थत्वमविरोधाद्ग्रहीतव्यम्। तैः स्वार्थवृत्तिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मशब्दस्य मुख्यया वृत्त्या सामानाधिकरण्यासंभवाद्ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते। इतिपरत्वादपि ब्रह्मशब्दस्यैष एवार्थो न्याय्यः। तथा हि 'ब्रह्मेत्यादेशः' 'ब्रह्मेत्युपासीत' 'ब्रह्मेत्युपास्ते' इति च सर्वत्रेतिपरं ब्रह्मशब्दमुच्चारयति शुद्धांस्त्वादित्यादिशब्दान्। ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिर्वचन एव शुक्तिकाशब्दो रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः। प्रत्येत्येव हि केवलं रजतमिति न तु तत्र रजतमस्ति। एवमत्राप्यादित्यादीन्ब्रह्मेति प्रतीयादिति गम्यते। वाक्यशेषोऽपि च द्वितीयानिर्देशेनाऽऽदित्यादीनेवोपास्तिक्रियया व्याप्यमानान्दर्शयति "स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते" [छा० ३-१९-४] "यो वाचं ब्रह्मेत्युपास्ते" [छा०७-२-२] "यः संकल्पं ब्रह्मेत्युपास्ते" [छा० ७-४-१] इति च। यत्तूक्तं ब्रह्मोपासनमेवात्राऽऽदरणीयं फलवत्त्वायेति। तदयुक्तम्। उक्तेन न्यायेनाऽऽदित्यादीनामेवोपास्यत्वावगमात्। फलं त्वतिध्याय्युपासन

मुख्यार्थत्वमपीत्याह—प्राथम्यादिति। ब्रह्मशब्दस्य धीपरत्वे युक्त्यन्तरमाह—इतिपरत्वादिति। तस्येतिपरत्वमेव स्फोरयति—तथा हीति। आदित्यादिशब्देषु वैलक्षण्यमाह—शुद्धानिति। अस्तु ब्रह्मशब्दस्येतिपरत्वेऽपरत्वमादित्यादिशब्दानां च शुद्धत्वं तथाऽपि कथं दृष्टिपरत्वार्थपरत्वव्यवस्थेत्याशङ्क्याऽऽह—ततश्चेति। रजतशब्दस्यापि शुक्तिशब्दवदर्थपरत्वं चेदितिशब्दयोगो व्यर्थः स्यादित्यर्थः। प्रतीतिश्चेत्तस्या निरालम्बनत्वायोगादस्त्येव रजतमपीत्याशङ्क्याऽऽह—प्रत्येत्येवेति। प्रतीतेराभासत्वान्न योग्यमालम्बनमस्तीत्यर्थः। लोकसिद्धमर्थं प्रकृते योजयति—एवमिति। किं चाऽऽदित्यादीनां द्वितीयाश्रुत्योपास्तिकर्मत्वेन प्राधान्यसिद्धेर्ब्रह्मशब्दस्य धीपरत्वमेवेत्याह—वाक्येति। उत्कृष्टनिकृष्टयोरुत्कृष्टमेवोपास्यं फलविशेषपरत्वाद्राजादिवदित्युक्तमनूद्यति—यच्चिति। आदित्यादीनामेवोपास्यत्वार्थकद्वितीयाश्रुतिविरुद्धमनुमानमित्याह—तदिति। कथं तर्हि फलसिद्धिरित्याशङ्क्य हेतोरन्यथासिद्धिमाह—फलं त्विति।

---

१ ङ. म. °स्य प्रत्य°। २ ज ट °धान्न हात°। ३ क.ङ. ज. झ. ञ्यवृ। ४ क. °तैव व्यव। ५ ट. °ति स°। ६ ज. ट शुद्धास्त्वा°। ७ ज. ट. °शब्दाः। ततश्च। ८ क. °क्तिकाव°। ९ क °पासिक्रि°। १० ज.ट. °स्ते° °मनो ब्रह्मेत्युपास्ते° °यः। ११ क. ज. °ति। य°। १२ ङ. ड. °त्वमा°।

(कर्माङ्गेष्वादित्यादिदृष्टीनां कर्तव्यत्वम्, अधि० ५)

इवाऽऽदित्याद्युपासनेऽपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात् । वर्णितं चैतत् "फलमत उपपत्तेः" [ब्र० सू० ३-२-३८] इत्यत्र । ईदृशं चात्र ब्रह्मण उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्यध्यारोपणं प्रतिमादिष्विव विष्ण्वादीनाम् ॥ ५ ॥ (४)

(कर्माङ्गेष्वादित्यादिदृष्टीनां कर्तव्यत्वम्, अधि० ५)

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥ (५)

" य एवासौ तपति तमुद्गीथमुपासीत " [छा० १-३-१] " लोकेषु पञ्चविधं सामोपासीत " [छा० २-२-१] " वाचि सप्तविधं सामोपासीत " [छा० २-८-१] " इयमेवर्गग्निः साम " [छा० १-६-१] इत्येवमादिष्वङ्गावबद्धेषूपासनेषु संशयः—किमादित्यादिषूद्गीथादिदृष्टयो विधीयन्ते किं वोद्गीथादिष्वेवाऽऽदित्यादिदृष्टय इति । तत्रानियमो नियमकारणाभावादिति प्राप्तम् । न ह्यत्र ब्रह्मण इव कस्यचिदु-

---

धर्मस्यैव फलदत्वात्कुतो ब्रह्मणस्तथात्वं तत्राऽऽह—वर्णितं चेति । द्वितीयेतिशब्दश्रुतिभ्यामुत्कृष्टदृष्ट्या निकृष्टमुपास्यमितिन्यायानुगृहीताभ्यामुक्तानुमानभङ्गादसंजातविरोधित्वेन प्रथमश्रुता आदित्यादय एव चरमश्रुततया संजातविरोधात्प्रत्ययमात्रपरब्रह्मशब्देनार्पितब्रह्मदृष्टिविशिष्टा विशेषणतयोपास्यब्रह्मसामर्थ्यलब्धफलविशेषा ध्येया भवन्तीति भावः । कथं तर्हीदं ब्रह्मोपासनमिति प्रसिद्धिस्तत्राऽऽह—ईदृशं चेति ॥ ५ ॥ (४)

पूर्ववदुत्कर्षरूपविशेषानवधारणादनियमेन वा गीतित्वेन क्रियारूपोद्गीथादीनां फलसंनिकर्षेणोत्कर्षादादित्यादिषु तद्दृष्टिकरणे प्रथमनिर्दिष्टानामादित्यादिषु ब्रह्मदृष्टित्वप्राप्तामेकादित्यादिषूद्गीथादिदृष्टिकरणे वा प्राप्ते प्रत्याह—आदित्यादीति । अङ्गाश्रितोपासनान्युदाहृत्य विशेषानुपलब्ध्या संशयमाह—य एवेत्यादिना । पृथिव्यग्न्यन्तरिक्षादित्यद्युसंज्ञकेषु लोकेषु हिंकारप्रस्तावोद्गीथप्रतिहारनिधनरूपं पञ्चप्रकारं सामोपास्यं लोकालोकदृष्ट्या तदुपास्यमित्यर्थः । वाचि सप्तविधमिति हिंकारप्रस्तावोंकारोद्गीथप्रतिहारोपद्रवनिधनरूपं सप्तप्रकारं साम वाच्युपास्यं वाग्दृष्ट्या सामोपास्यमित्यर्थः । प्रासङ्गिकाङ्गावबद्धोपासनेषु स्वतन्त्रफलेष्वनङ्गदृष्ट्याऽनुष्ठाननिरूपणात्पादादिसंगतिः । पूर्वपक्षे दृष्टिकरणस्य फलवत्त्वम् । सिद्धान्तेऽपि तदविरुद्धं सिध्यतीति स्वीकृत्य पूर्वपक्षमाह—तत्रेति । नियमकारिणः शास्त्रस्याभावादित्युक्तं व्यनक्ति—न हीति । वैध-

---

१ क. °के त° । २ ट. °म् । ब्रह्मदृष्ट्यधिकरणम् । आ° । ३ ट. °श्चाङ्गेषूपपत्तेः । ४ ट. °त । लोकेषु वा° । ५ ङ. ञ. °वरुद्धे° । ६ ट. °द्धेषु । ७ क. ङ. ज. ञ. °दित्या° । ८ ज्ञ. °शिष्टवि° । ९ क. ठ. ङ. °स्तावाद्गी° ।

(कर्माङ्गेष्वादित्यादिदृष्टीनां कर्तव्यत्वम्, अधि० ५)

त्कर्षविशेषोऽवधार्यते। ब्रह्म हि समस्तजगत्कारणत्वादपहतपाप्मत्वादिगुणयोगाच्चाऽऽदित्यादिभ्य उत्कृष्टमिति शक्यमवधारयितुं न त्वादित्योद्गीथादीनां विकारत्वाविशेषात्किंचिदुत्कर्षविशेषावधारणे कारणमस्ति। अथ वा नियमेनैवोद्गीथादिमतय आदित्यादिष्वध्यस्येरन्। कस्मात्। कर्मात्मकत्वादुद्गीथादीनां कर्मणश्च फलप्राप्तिप्रसिद्धेः। उद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मात्मकाः सन्तः फलहेतवो भविष्यन्ति। तथा च "इयमेवर्गग्निः साम" [छा० १-६-१] इत्यत्र "तदेतदेतस्यामृच्यध्यूढं साम" [छा० १-६-१] इत्यृक्शब्देन पृथिवीं निर्दिशति सामशब्देनाग्निं तच्च पृथिव्यग्न्योर्ऋक्सामदृष्टिचिकीर्षायामवकल्पते न ऋक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षायाम्। क्षत्तरि हि राजदृष्टिकरणाद्राजशब्द उपचर्यते न राजनि क्षत्तृशब्दः। अपि च "लोकेषु पञ्चविधं सामोपासीत" [छा० २-२-१] इत्यधिकरणनिर्देशाल्लोकेषु सामाध्यासितव्यमिति

र्थदृष्टान्तं स्पष्टयति—ब्रह्मेति। अङ्गानङ्गयोरपि कस्यचिद्विशेषो गम्यतामित्याशङ्क्याऽऽह—न त्विति। कर्मरूपाणामुद्गीथादीनामुत्कर्षभानमुपेत्य साक्षात्पूर्वपक्षमाह—अथ वेति। नियमहेतुं पृच्छति—कस्मादिति। उद्गीथादिकर्माङ्गानां क्रियासमवायात्फलसाधनतयोत्कृष्टत्वादिति हेतुमाह—कर्मेति। किंच सिद्धरूपादित्याद्यात्मना चेदुद्गीथादयो दृष्टास्तदा न फलहेतवः। यदा तूद्गीथादिदृष्ट्याऽऽदित्यादयो दृष्टास्तदा तेषामपि फलहेतुत्वं स्यादित्याह—उद्गीथादीति। अनङ्गेष्वेवाङ्गमतिकर्तव्यत्वं पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगादपि भातीत्याह—तथा चेति। तदेतदग्न्याख्यं साम[1] एतस्यां पृथ्वीलक्षणायामृच्यध्यूढमुपरि[2] श्रितमिति यावत्। उक्तमेव दृष्टान्तेन स्पष्टयति—क्षत्तरीति। ऋचि पृथिवीदृष्टिः साग्नि चाग्निदृष्टिरिष्टा चेत्तदा प्रयोगवैपरीत्यं स्यात्तस्मात्पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगानुपपत्त्या तत्र कर्माङ्गभूतक्सामाध्याससिद्धिरित्यर्थः। इतश्चानङ्गेष्वङ्गमतिः कर्तव्येत्याह—अपि चेति। सप्तम्या लोकानां सामधीविषयत्वनिर्देशादित्याह—अधिकरणेति। अन्यत्रापि सप्तमीश्रुतेरनङ्गेष्वङ्गधीर्भातीत्याह—

---

१ क. ङ. ज. ञ. ट. 'क्यतेऽव'। २ ज. ट. 'रणका'। ३ क. ट. 'तस्या'। ४ क. ख. ठ. ड. पृथिवील'। ५ क. ख. ठ. ड. 'रि स्थित'। ६ ख. 'थिव्या द'।

प्रतीयते । " एतद्वायत्रं प्राणेषु प्रोतम् " [छा० २-११-१] इति चैतदेव दर्शयति । प्रथमनिर्दिष्टेषु चाऽऽदित्यादिषु चरमनिर्दिष्टं ब्रह्माध्यस्तम् " आदित्यो ब्रह्मेत्यादेशः " [छा० ३-१९-१] इत्यादिषु । प्रथमनिर्दिष्टाश्च पृथिव्यादयश्चरमनिर्दिष्टा हिंकारादयः " पृथिवी हिंकारः " [छा० २-२-१] इत्यादिश्रुतिषु । अतोऽनङ्गेष्वादित्यादिष्वङ्गमतिक्षेप इति ।

एवं प्राप्ते ब्रूमः—" आदित्यादिमतयः " एवाङ्गेषूद्गीथादिषु क्षिप्येरन् । कुतः । " उपपत्तेः " । उपपद्यते ह्येवमपूर्वसंनिकर्षादादित्यादिमतिभिः संस्क्रियमाणेषूद्गीथादिषु कर्मसमृद्धिः । "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" [छा० १-१-१०] इति च विद्यायाः कर्मसमृद्धिहेतुत्वं दर्शयति । भवतु कर्मसमृद्धिफलेष्वेवं स्वतन्त्रफलेषु तु कथम् " य एतदेवं विद्वाल्लोकेषु पञ्चविधं सामोपास्ते " [छा० २-२-३] इत्यादिषु । तेष्वप्यधिकृताधिकारात्मकृतापूर्वसंनिकर्षेणैव फलकल्पना युक्ता गोदोहनादिनियमवत् । फलात्मकत्वाच्चाऽऽदित्यादीनामु-

---

एतदिति । पूर्वाधिकरणसिद्धान्तन्यायेनाप्यनङ्गेष्वङ्गदृष्टिः शिष्टेत्याह—प्रथमेति । आदित्यादावुद्गीथादिधीकरणात्तस्य फलवत्त्वसिद्धिरिति प्राप्तमनूद्य सिद्धान्तयति—एवमिति । अनङ्गेष्वङ्गमतिरुक्ता तथा चान्यथा नियमो निर्बीजत्वादयुक्त इति शङ्कते—कुत इति । नियमहेतुमवतार्य व्याकरोति—उपपत्तेरिति । यथा प्रोक्षणादिना व्रीह्यादिषु संस्कृतेषु कर्मापूर्वमुत्पद्यते तथा प्रकृतकर्मापूर्वसंनिधानादुद्गीथादीनामादित्यादिमतिभिस्तेषु संस्क्रियमाणेषु कर्मसमृद्धिरुपपद्यते तथा च कर्मसमृद्धिफलोपपत्तेरङ्गेष्वनङ्गमतिक्षेप इत्यर्थः । कर्मसमृद्धिरुपास्तिफलमित्येतदेवासिद्धमित्याशङ्क्याऽऽह—यदेवेति । यत्र कर्मसमृद्धिः फलं श्रूयते तत्राङ्गेष्वनङ्गमतिक्षेपोऽस्त्वादित्यादिमतिसंस्कृतानामङ्गानां कर्मातिशयहेतुत्वात्स्वतन्त्रफलेषु पुनरुपासनेषु कथं मतिक्षेपः स्यादिति विवेको नास्तीति शङ्कते—भवत्विति । स्वतन्त्रफलेष्वपि तेषु प्रकृतकर्माङ्गव्यपाश्रयेणाङ्गेष्वेव मतिकरणात्फलकल्पना युक्ता कर्माधिकृतस्यैव तदङ्गसंबन्धेषूपासनेष्वधिकारात् । यथाऽधिकृताधिकारेषु गोदोहनादिषु स्वतन्त्रफलेष्वपि प्रकृतकर्माङ्गावष्टम्भेनैव फलमिष्टं तथेहापीति परिहरति—तेष्वपीति । यत्त्वादित्यादीनामुद्गीथादीनां चोत्कर्षविशेषानवधारणमिति तत्राऽऽह—फलेति । तदेव स्फुटयति—

---

१ ङ. ञ. °तद्दर्शं° । २ क. °षु प्रक्षि° । ग. °षु प्रतिक्षि° । ३ ञ. °मसिद्धिः । ४ ङ. ज. °तुतां द° । ५ क. ख. °षु तदुपा° । ६ क. स्पष्टयति ।

द्वीथादिभ्यः[1] कर्मात्मकेभ्य उत्कर्षोपपत्तिः । आदित्यादिप्राप्तिलक्षणं[2] हि कर्मफलं शिष्यते श्रुतिषु । अपि च " ओमित्येतदक्षरमुद्गीथमुपासीत " [छा० १-१-१] "खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति " [छा० १-१-१०] इति चोद्गीथमेवोपास्यत्वेनोपक्रम्याऽऽदित्यादिमतीर्विदधाति ।

यत्तूक्तमुद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मभूयं भूत्वा फलं करिष्यन्तीति । तदयुक्तम् । स्वयमेवोपासनस्य कर्मत्वात्फलवत्त्वोपपत्तेः । आदित्यादिभावेनापि च दृश्यमानानामुद्गीथादीनां कर्मात्मकत्वानपायात्[3] । " तदेतदेतस्यामृच्यध्यूढं साम " [छा० १-६-१] इति तु लाक्षणिक एव पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगः । लक्षणा च यथासंभवं संनिकृष्टेन विप्रकृष्टेन वा स्वार्थसंबन्धेन प्रवर्तते । तत्र यद्यप्यृक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षा तथाऽपि प्रसिद्धयोर्ऋक्सामयोर्भेदेनानुकीर्तनात्पृथिव्यग्न्योश्च संनिधानात्तयोरेवैष ऋक्सामशब्दप्रयोग

आदित्यादीति । उपक्रमानुसारादप्यादित्यादिधीरुद्गीथादिषु कार्येत्याह—अपि चेति ।

द्वितीयां पूर्वपक्षोपपत्तिमनुभाष्य दूषयति—यदित्यादिना । कर्मभूयं भूत्वा कर्मभावमनुभूयेति यावत् । सिद्धरूपैरादित्यादिभिरध्यस्तैः साध्यरूपत्वं कर्मणोऽभिभूयेतेत्याशङ्क्याऽऽह—आदित्यादीति । माणवकेऽग्निधीवदुद्गीथादिष्वादित्यादिधियां गौणत्वादनभिभवाद्भक्ष्येष्वनङ्कधीरविरुद्धेत्यर्थः । यत्तु पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगानुपपत्त्या पृथिव्यादावृगादिधीरिति तत्राऽऽह—तदेतदिति । तदृष्टिमन्तरेणापि लक्षणोपपत्तौ पृथिव्यादावृगाद्यध्यासो न कल्पनीय इत्यर्थः । संबन्धाभावे कथं लक्षणेत्याशङ्क्याऽऽह—लक्षणा चेति । शोणो धावतीत्यत्र गुणवाचिशोणशब्देन गुणी लक्ष्यत इति संनिकृष्टा लक्षणा, अग्निरधीतेऽनुवाकमित्यत्राग्निशब्दस्तीव्रत्वादिगुणं लक्षयित्वा माणवकं लक्षयतीति विप्रकृष्टा । न हि साक्षादेवाग्निशब्दार्थस्य माणवकसंबन्धोऽस्तीत्यर्थः । लक्षणाद्वैविध्येऽपि प्रकृते किं जातं तदाह—तत्रेति । ऋक्सामयोः पृथिव्यग्न्योश्च संनिकृष्टवास्तवसंबन्धाभावेऽपि विप्रकृष्टेन पृथिव्यग्निबुद्धिसंबन्धेन तयोः संबन्धात्तच्छब्दाभ्यां तल्लक्षणा युक्तेत्यर्थः । तथाऽपि तयोरेव पृथिव्यग्न्योरेष तदेतदस्यामृच्यध्यूढं सामेत्यृक्सामशब्दप्रयोग इति योजना । मुख्यासंभवे हेतुमाह—प्रसिद्धयोरिति ।

---

१ क. °दिभ्य उ° । २ ङ. ज. ञ. °णं क° । ३ ज्ञ. °त्मत्वा° । ४ ज. ञ. ट. एव । ५ क. ख. ठ. ड. यस्त्वित्या° । ६ ठ. ड. °वनाम° । ७ ख. श्वेतो । ८ क. ख. °चिविशेषण° । ९ ज्ञ. °रेव त° । १० क. ठ. °तस्य° । ख. ड. °तदेतस्या° ।

ऋक्सामसंबन्धादिति निश्चीयते। क्षत्तृशब्दोऽपि हि कुतश्चित्कारणाद्राजानमुपसर्पन्न निवारयितुं पार्यते। "इयमेवर्क्" [छा० १-६१] इति च यथाक्षरन्यासमृच एव पृथिवीत्वमवधारयति। पृथिव्या ह्यृक्त्वेऽवधार्यमाण इयमृगेवेत्यक्षरन्यासः स्यात्। "य एवं विद्वान्साम गायति" [छा० १-७-७] इति चाङ्गाश्रयमेव विज्ञानमुपसंहरति न पृथिव्याद्याश्रयम्। तथा "लोकेषु पञ्चविधं सामोपासीत" [छा० २-२-१] इति यद्यपि सप्तमीनिर्दिष्टा लोकास्तथाऽपि साम्न्येव तेऽध्यस्येरन्द्वितीयानिर्देशेन साम्न उपास्यत्वावगमात्। सामनि हि लोकेष्वध्यस्यमानेषु साम लोकात्मनोपासितं भवति। अन्यथा पुनर्लोकाः सामात्मनोपासिताः स्युः। एतेन "एतद्वायत्रं प्राणेषु प्रोतम्" [छा० २-११-१] इत्यादि व्याख्यातम्। यत्रापि तुल्यो द्वितीयानि-

---

ऋच्यध्यूढं हि सामेति प्रसिद्धयोः पृथगुक्तेस्तदेतदेतस्यामित्यत्रापि तयोरेवोक्तौ पौनरुक्त्यात्पृथिव्यग्न्योश्चाध्यस्तऋक्सामसंनिधानादृक्सामशब्दयोर्लक्षणया पृथिव्यग्न्यर्थतेत्यर्थः। ऋचि पृथिवीधीः साम्नि चाग्निधीरित्येतावता संबन्धेन पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगो लाक्षणिको नोपपद्यते क्षत्तरि राजधीकरणेऽपि राजनि क्षत्तृशब्दप्रयोगादर्शनादित्युक्तमित्याशङ्क्याऽऽह—क्षत्रिति। यदा राजाऽपि क्षत्तुः सूतस्य रथनयनादि कर्माऽऽचरति तदा तत्र क्षत्तृशब्दो लक्षणया प्रयुज्यत एव। न च सति निमित्ते प्रयोगस्याऽऽवश्यकत्वं पङ्कजादिशब्दे व्यभिचारादिति भावः। ऋगादावेव पृथिव्यादिधीरित्यत्र हेत्वन्तरमाह—इयमेवेति। एतदेव व्यतिरेकद्वारा स्फोरयति—पृथिव्येति। ऋगनुवादेन पृथिवीत्वं विधेयमित्यवधारणसामर्थ्यादधिगतमित्यर्थः। इतश्चाङ्गेष्वनङ्गधीरित्याह—य एवमिति। यत्त्वधिकरणनिर्देशादुपास्तिविषयत्वं लोकानामिति तत्राऽऽह—तथेति। यदि सामधीर्लोकेष्वारोप्येत तदा साम्नेतितृतीयार्थे द्वितीयाश्रुतिः परिणेया, लोकेष्विति च सप्तमी द्वितीयार्थे कथंचिन्नेया, तथा सत्युभयथाऽपि सप्तम्याः कल्प्यार्थत्वात्कल्पनालाघवाद्यथाश्रुतद्वितीयार्थानुरोधाय तृतीयार्थे सप्तमी व्याख्येया तेन पृथिव्यादिलोकालोकबुद्ध्या हिंकारादिसामोपास्यं ततः सप्तमी पूर्वपक्षे द्वितीयार्था सिद्धान्ते तृतीयार्थेत्युभयथा भज्यनीया पूर्वपक्षे तु सामगतद्वितीयाभङ्गोऽधिक इत्यर्थः। पृथिव्याद्यात्मना हिंकारादेरुपास्यत्वोपदेशेन गायत्रस्यापि प्राणात्मनोपास्यत्वमुक्तमित्यतिदिशति—एतेनेति। यत्र द्वितीयासप्तम्यौ तत्रास्तु श्रुतिद्वयभङ्गगौरवपरिहारार्थमङ्गेष्वनङ्गधीः। यत्र तूभयत्र द्वितीया तत्रान्यतरश्रुतिमात्रभङ्गस्य पूर्वपक्षसिद्धान्तयोस्तुल्यत्वात्कथं नियमसिद्धिरित्याशङ्क्याऽऽह—यत्रापीति।

---

१ ज. °व्या ऋक्त्वेऽ°। ट. °व्यामृत्वेऽ°। २ ट. °व्याश्र°। ३ क. ट. सामन्येव. ४ ट. °तेऽप्यध्य°।

(उपासनायामासनस्य नियतत्वम्, अधि० ६)

देशः " अथ खल्वमुमादित्यं सप्तविधं सामोपासीत " [छा० २-९-१] इति तत्रापि समस्तस्य खलु साम्न उपासनं साधु । " इति तु पञ्चविधस्य " [छा० २-७-२] " अथ सप्तविधस्य" [छा० २-८-१] इति च साम्न एवोपास्यत्वोपक्रमात्तस्मिन्नेवाऽऽदित्याद्यध्यासः । एतस्मादेव च साम्न उपास्यत्वावगमात् । " पृथिवी हिंकारः " [छा० २-२-१] इत्यादिनिर्देशविपर्ययेऽपि हिंकारादिष्वेव पृथिव्यादिदृष्टिः । तस्मादनङ्गाश्रया आदित्यादिमतयोऽङ्गेषूद्गीथादिषु क्षिप्येरन्निति सिद्धम् ॥ ६ ॥ (५)

(उपासनायामासनस्य नियतत्वम् , अधि० ६)

आसीनः संभवात् ॥ ७ ॥

कर्माङ्गसंबद्धेषु तावदुपासनेषु कर्मतन्त्रत्वान्नाऽऽसनादिचिन्ता,

---

छान्दोग्ये हि समस्तस्य सप्तविधस्य पञ्चविधस्य च साम्नो ध्यानं साधुगुणकमित्युपक्रम्य लोकेषु पञ्चविधं सामोपासीतेति पृथिवी हिंकारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनमित्यादिना पञ्चविधस्य साम्नो ध्यानमुक्त्वेति तु पञ्चविधस्येत्युपसंहृत्याथ तु सप्तविधस्येत्युपक्रम्य वाचि सप्तविधं सामोपासीतेत्यादिना सप्तविधस्याप्युपासनमुक्तमेवं च समस्तस्य साम्न उपासनं साध्विति साम्न एवोपास्यत्वश्रुतेरिति तु पञ्चविधस्य साम्न उपासनं साध्विति पञ्चविधस्यापि तस्योपास्यत्वश्रुतेः साम्न्येवाऽऽदित्याद्यध्यासः सिध्यतीत्यर्थः । यत्तु पूर्वाधिकरणन्यायेन प्रथमश्रुते चरमश्रुतमध्यस्यत इति तत्राऽऽह—एतस्मादिति । हिंकारोद्देशेन पृथिवीत्वविधाने हिंकारः पृथिवीति निर्देशो युक्तस्तस्य वैपरीत्येऽपि साम्नोऽधिकाराद्ध्येयत्वावगमादङ्गेषु हिंकारादिष्वेवानङ्गपृथिव्यादिदृष्टिः कार्येत्यर्थः । प्रथमश्रुत्यनुसाराच्चरमश्रुतं नेयमिति न्यायोऽपि द्वितीयाश्रुत्या बाध्यो दुर्बलत्वादिति मत्वोपसंहरति—तस्मादिति ॥ ६ ॥ (५)

अङ्गाश्रितोपासनेष्वासीनकर्मतानियमाभाववदितरोपासनास्वपि तन्नियमाभावमाशङ्क्याऽऽह—आसीन इति । विषयं परिशिनष्टि—कर्मेति । आदिपदेन स्थितिशयने गृह्येते । सम्यग्दर्शनशब्देन श्रवणाद्यभ्यासवासितमनःसहकृतवाक्यकृतसाक्षात्कारो निरुच्यते । अङ्गोपासनेभ्यः सम्यग्दर्शनाच्चातिरिक्तान्युपासनानि विषयीकृ-

---

१ क. ट. °ति सा° । २ क. ङ. म. °त्याध्या° । ३ क. °दिषु पृ° । ४ क. ग. °बन्धिषु । ट. °बन्धेषु । ५ ङ. °ति पञ्चविधस्यापि । ६ ठ. ङ. °त्याध्या° । ७ ख. °नुचारा° ।

नापि सम्यग्दर्शने, वस्तुतन्त्रत्वाद्विज्ञानस्य । इतरेषु तूपासनेषु किमनियमेन तिष्ठन्नासीनः शयानो वा प्रवर्तेतोत नियमेनाऽऽसीन एवेति चिन्तयति । तत्र मानसत्वादुपासनस्यानियमः शरीरस्थितेरिति । एवं प्राप्ते ब्रवीति—"आसीनः" एवोपासीतेति । कुतः । " संभवात् " । उपासनं नाम समानप्रत्ययप्रवाहकरणं न च तद्गच्छतो धावतो वा संभवति गत्यादीनां चित्तविक्षेपकत्वात् । तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमं भवति । शयानस्याप्यकस्मादेव निद्रयाऽभिभूयते । आसीनस्य त्वेवंजातीयको भूयान्दोषः सुपरिहर इति संभवति तस्योपासनम् ॥ ७ ॥

ध्यानाच्च ॥ ८ ॥

अपि च ध्यायत्यर्थ एष यत्समानप्रत्ययप्रवाहकरणम् । ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकाविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते ध्यायति बको ध्यायति प्रोषितबन्धुरिति ।

त्यानेकधानुष्ठानदृष्टेः संशयमाह—इतरेष्विति । शास्त्रीयेषु प्रस्तुतोपासनेष्वनुष्ठानविशेषचिन्तया पादादिसंगतिः । पूर्वपक्षे कर्माङ्गानाश्रितोपासनेषु दैहिकनियमासिद्धिः । सिद्धान्ते ध्यानस्य मनोव्यापारत्वेऽपि देहानवस्थाने मनोनवस्थानात्तेषु तन्नियमसिद्धिरिति मत्वा पूर्वपक्षयति—तत्रेति । मनोदेहयोर्भिन्नत्वान्मनोव्यापारमुपासनं प्रति देहव्यापारस्यानुपकारित्वादासीनेन तिष्ठता वा यथाकथंचिदनुष्ठेयानि प्रकृतान्युपासनानीत्यर्थः । अनङ्गाश्रितोपासनानां यथाकथंचिदनुष्ठानमिति पक्षमनूद्य सिद्धान्तयति—एवमिति । प्रश्नपूर्वकं नियामकमाह—कुत इति । संभवं वक्तुमुपासनशब्दार्थमाह—उपासनमिति । तथाऽपि कथं तदासीनस्यैवेति नियम्यते तत्राऽऽह—न चेति । तर्हि तिष्ठतो भविष्यति विक्षेपाभावात्तत्राऽऽह—तिष्ठतोऽपीति । तर्हि शयानस्य देहधारणव्यापाराभावादुपासनं स्यान्नेत्याह—शयानस्येति । देहेऽनवस्थिते मनोनवस्थितेरध्यक्षत्वादासीनस्यैवोपासनमनुष्ठेयमिति पारिशेषसिद्धमर्थमाह—आसीनस्य त्विति ॥ ७ ॥

इतश्चोपासनमासीनकर्मेत्याह—ध्यानाच्चेति । सूत्रं विवृणोति—अपि चेति । उपास्तिध्यायत्योरेकार्थत्वेऽपि प्रकृते किं जातं तदाह—ध्यायतिश्चेति । अथ

---

१ क. ङ. ज. ञ. ट. °त्वाज्ज्ञान° । २ ज्ञ. °वा व° । ३ क. ङ. ज. ञ. °करत्वा° । ४ ट. °रणव्या° । ५ ङ. ञ. °नश्चाप्य° । ६ ज्ञ. °भूयेत । °आ । ७ ज्ञ. °रिहार । ८ क. ज्ञ. °श्रितेषूपा° । ९ ज्ञ. °षु वैदिक° । १० क. °रणाव्या° ।

(ध्यानसाधनैकाग्र्यस्य प्रधानत्वेन दिग्देशकालानियमः, अधि० ७)

आसीनश्चानायासो भवति। तस्मादप्यासीनकर्मोपासनम् ॥ ८ ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥

अपि च "ध्यायतीव पृथिवी" [छा० ७-६-१] इत्यत्र पृथिव्यादिष्वचलत्वमेवापेक्ष्य ध्यायतिवादो भवति तच्च लिङ्गमुपासनस्याऽऽसीनकर्मत्वे ॥ ९ ॥

स्मरन्ति च ॥ १० ॥ (६)

स्मरन्त्यपि च शिष्टा उपासनाङ्गत्वेनाऽऽसनम्—

"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः"

[भ० गी० ६-११] इत्यादिना। अत एवं पद्मकादीनामासनविशेषाणामुपदेशो योगशास्त्रे ॥ १० ॥ (६)

(ध्यानसाधनैकाग्र्यस्य प्रधानत्वेन दिग्देशकालानियमः, अधि० ७)

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ (७)

दिग्देशकालेषु संशयः—किमस्ति कश्चिन्नियमो नास्तिं वेति। प्रायेण वैदिकेष्वारम्भेषु दिगादिनियमदर्शनात्स्यादिहापि कश्चि-

---

ध्यायतिर्यस्यां प्रयुज्यते साऽवस्था तिष्ठतोऽपि संभवति नेत्याह—आसीनश्चेति। लौकिकं लिङ्गमुपसंहरति—तस्मादिति ॥ ८ ॥

तत्रैव वैदिकं लिङ्गमाह—अचलत्वं चेति। सूत्रं विभजते—अपि चेति ॥ ९ ॥

आसनविधानानुपपत्त्याऽप्युपासनस्याऽऽसीनकर्मतेत्याह—स्मरन्तीति। बाह्यासनविधानविषयत्वेन सूत्रं योजयति—स्मरन्त्यपीति। शारीरासनविधानविषयत्वेनापि तदेव योजयति—अत इति। उपासनस्याऽऽसीनकर्मत्वादेवेत्यर्थः ॥ १० ॥ (६)

अनङ्गाश्रितोपासनेष्वासननियमवद्दिगादिनियमोऽपि स्यादित्याशङ्क्याऽऽह—यत्रेति। अनङ्गाश्रितोपासनानि विषयस्तेषु दिगादिनियमोऽस्त्युत नेति विहितेषु द्विधा दृष्ट्वा संशयमाह—दिगिति। अङ्गोपास्त्यतिरिक्तोपास्तिषु शास्त्रीयास्वेव दिगादिनियमं विनाऽनुष्ठानक्रमचिन्तनात्पादादिसंगतिः। पूर्वपक्षे दिगादिनियमादेतेषु चित्तैकाग्र्यमन्तरेणानुष्ठानम्। सिद्धान्ते दिगादिष्वास्थाभावेऽपि प्रधानानुगुण्यादनुष्ठानमित्यङ्गीकृत्यानङ्गोपासनानि नियतदिग्देशकालानि चोदनालक्षणत्वाद्वैश्वदेववदित्याशयेन पूर्वपक्षयति—प्रायेणेति। प्रदोषादिकाले प्राच्यादिदिशि तीर्थादिदेशे प्रकृतोपासनानुष्ठा-

---

१ ङ. ञ. °नस्याना'। २ ङ. ञ. °दर्यादासी'। ३ क. ङ. ञ. °व च प°। ४ क. °स्ति वा। प्रा°। ५ ङ. °दिकलि°। ६ ङ. °ति। शरी°। ७ ठ. ड. °ण्यानु°।

नियम इति यस्य मतिस्तं प्रत्याह दिग्देशकालेष्वर्थलक्षण एव नियमः। यत्रैवास्य दिशि देशे काले वा मनसः सौकर्येणैकाग्रता भवति तत्रैवोपासीत प्राचीदिक्पूर्वाह्णप्राचीनप्रवणादिवद्विशेषाश्रवणात्। एकाग्रतायाः इष्टायाः सर्वत्राविशेषात्। ननु विशेषमपि केचिदामनन्ति—

" समे शुचौ शर्करावह्निवालुका-
विवर्जिते शब्दजलाश्रयादिभिः।
मनोनुकूले न तु चक्षुपीडने
गुहानिवाताश्रयणे प्रयोजयेत् ॥ "

[श्वेता० २-१०] इति[1] यथेति[2]। उच्यते—सत्यमस्त्येवंजातीयको नियमः। सति[3] त्वेतस्मिंस्तद्गतेषु विशेषेष्वनियम इति सुहृद्भूत्वाऽऽचार्य आचष्टे। " मनोनुकूले " इति चैषा श्रुतिर्यत्रैकाग्रता तत्रैवेत्येतदेव दर्शयति[4] ॥ ११ ॥ (७)

नमिति प्राप्ते सिद्धान्तयति—तमिति। चोदनादिवशेनोक्तोपासनेषु न देशादिनियमः किंतूपास्ये चित्तैकाग्र्यलक्षणार्थाक्षिप्त एव तन्नियम इत्युक्तं विवृणोति—यत्रेति। यत्तु चोदनालक्षणत्वादित्यनुमानं तत्र श्रुतदेशादिमत्त्वमुपाधिरिति वदन्नविशेषादिति व्याचष्टे—प्राचीनेति। प्राचीनप्रवणे प्राग्देशनिम्ने देशे वैश्वदेवेन यागविशेषेण यजेतेत्यादिवदत्र विशेषो न श्रूयते। ऐकाग्र्यं हि ध्यानं प्रत्यन्तरङ्गं तस्मिन्मध्याह्नादावपि संभवति प्रदोषाद्यपेक्षायां शेषित्वाधादनियम इत्यर्थः। ध्यानान्तरङ्गमैकाग्र्यमपि नियतदिगाद्यपेक्षमित्याशङ्क्य हेतोरर्थान्तरमाह—एकाग्रताया इति। विशेषाश्रवणमसिद्धमिति शङ्कते—नन्विति। शर्कराः सूक्ष्मपाषाणाः। जलाशयवर्जनं शीतनिवृत्त्यर्थम्। चक्षुपीडनो मशकः। यथा श्रुतिसिद्धो विशेषस्तथाऽन्योऽपि कालादिविशेषो ध्याने स्यादित्यर्थः। वाचनिके नियमे सत्येव दिगादिनियमनिरसनमित्याह—उच्यत इति। तद्गतेष्विति। तच्छब्देन श्रौतो विशिष्टो देशो गृह्यते तस्मिन्गता विशेषास्तु प्राचीनप्रवणादयस्तन्नियमे कदाचिदेकाग्रतायोगेनोपासनायोगात्प्रधानविरोधात्तदनियमः श्रेयानित्यर्थः। नियमादनियमो युक्तः शेष्यानुगुण्यादित्यत्र सूत्रकारसंमतिमाह—इति सुहृदिति। उक्ताऽपि हि श्रुतिरस्माकमनुकूलैवेत्याह—मन इति ॥ ११ ॥ (७)

---

१ ज. °ति। उ°। २ ड. ञ. °ति स°। ३ ट. °ति चैत°। ४ ट. °ति। एकाग्रताधिकरणम्। आ°। ५ ठ. ड. तत्तस्मि°।

(उपास्तीनामामरणमावृत्तिः, अधि० ८)

आप्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥ (८)

आवृत्तिः सर्वोपासनेष्वादर्तव्येति स्थितमाद्येऽधिकरणे। तत्र यानि तावत्सम्यग्दर्शनार्थान्युपासनानि तान्यवघातादिवत्कार्यपर्यवसानानीति ज्ञातमेवैषामावृत्तिपरिमाणम्। न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्नान्तरं किंचिच्छासितुं शक्यम्। अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः[1] शास्त्रस्याविषयत्वात्। यानि पुनरभ्युदयफलानि तेष्वेषा चिन्ता—किं कियन्तंचित्कालं प्रत्ययमावर्त्यो परमेदुत यावज्जीवमावर्तयेदिति। किं तावत्प्राप्तम्। कियन्तंचित्कालं प्रत्ययमभ्यस्योत्सृजेदावृत्तिविशिष्टस्योपासनशब्दार्थस्य कृतत्वादिति। एवं प्राप्ते ब्रूमः—" आप्रायणात् " एवाऽऽवर्तयेत्प्रत्ययम्। अन्त्यप्रत्ययवशाद्दृष्टफलप्राप्तेः। कर्माण्यपि हि जन्मान्तरोपभोग्यं फलमारभमाणानि तदनुरूपं भावनाविज्ञानं प्रायणकाल आक्षिपन्ति " सविज्ञानो भवति सविज्ञा-

---

देशाद्यविधानात्तदपेक्षावदहंग्रहोपास्तिष्वादेहपातादावृत्तेरविधानात्तदनपेक्षेत्याशङ्क्याऽऽह—आप्रायणादिति। व्यवहितेन संबन्धार्थं वृत्तं कीर्तयति—आवृत्तिरिति। संप्राप्ते संबन्धं वदन्विषयं विवेचयति—तत्रेति। सम्यग्ज्ञाने जातेऽपि मुक्त्यर्थमावृत्तिरामरणात्कार्येत्याशङ्क्याऽऽह—न हीति। नियोज्यस्याधिकारिणोऽभावान्मुक्तेश्च सम्यग्धीनान्तरीयकत्वादावृत्तिरनर्थिकेत्यर्थः। उक्तहेत्वभावादनुष्ठानस्योभयथादृष्टेरहंग्रहोपास्तिषु संशयमाह—यानीति। शास्त्रीयाहंग्रहोपासनेषु स्वतन्त्रफलहेतुषु यावज्जीवमनुष्ठानमितिचिन्तनात्पादादिसंगतिः। पूर्वपक्षे सर्वोपासनेष्वावृत्तेरविशेषः। सिद्धान्ते प्रकृतेषु विशेष इत्युपेत्य विमृश्य पूर्वपक्षयति—किं तावदिति। सर्वोपासनेष्वावृत्तौ विशेषो नेति प्राप्ते प्रकृतोपासनेष्वामरणादावृत्तिः कार्येति सिद्धान्तमाह—एवमिति। उपास्यापरोक्ष्ये दृष्टफले सिद्धे तद्द्वारा दृष्टफलस्यापि सिद्धेरवघातादिवदामरणादनुष्ठानमित्याह—अन्त्येति। अन्त्यप्रत्ययातिरेकेणैवोपासनानां फलप्राप्तियोगान्न तादर्थ्येनाऽऽवृत्तिरित्याशङ्क्याऽऽह—कर्माणीति। किमत्र प्रमाणं तदाह—सविज्ञान इति। विज्ञानेन भोक्तव्यफलविषयभावनामयेन सहितो म्रियमाणो भोक्ता सविज्ञानः। सविज्ञानं विज्ञानेन सहितं फलम्। यस्मिन्विषये चित्तमस्य स यच्चित्तस्तेन विषयेण हृद्यभिव्यक्तेन सह तेज[3] उदानस्तेजोदेवताकत्वादात्मा भोक्ता। म्रियमाणस्य भोक्तुर्ज्ञान-

---

१ क. 'त्मत्वोपप'। २ ङ. ञ. ° प्रतीतेः शा°। ३ ञ. तेनोदा'। ४ ख. 'क्ता सविज्ञानः। म्रि'।

नमेवान्ववक्रामति " [बृह० ४-४-२] " यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहाऽऽत्मना यथासंकल्पितं लोकं नयति " [प्र० ३-१०] इति चैवमादिश्रुतिभ्यः । तृणजलूकानिदर्शनाच्च । प्रत्ययास्त्वेते स्वरूपानुवृत्तिं मुक्त्वा किमन्यं प्रायणकालभावि भावनाविज्ञानमपेक्षेरन् । तस्माद्ये प्रतिपत्तव्यफलभावनात्मकाः प्रत्ययास्तेष्वेवाप्रायणादावृत्तिः। तथा च श्रुतिः " स यावत्क्रतुरयमस्माल्लोकात्प्रैति" [शत० १०-६-३-१] इति प्रयाणकालेऽपि प्रत्ययानुवृत्तिं दर्शयति । स्मृतिरपि—

" यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः "

[भ० गी० ८-६] इति, " प्रयाणकाले मनसाऽचलेन " [भ० गी० ८-१०] इति च । " सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येत " [छा० ३-१७-६] इति च मरणवेलायामपि कर्तव्यशेषं श्रावयति ॥ १२ ॥ (८)

वत्त्वे दृष्टान्तश्रुतिरपि प्रमाणमित्याह—तृणेति । यत्राप्रत्ययात्मकानामपि कर्मणामन्त्यप्रत्ययापेक्षेण फलजनकत्वं तत्र प्रत्ययात्मकानामुपासनानां किं वक्तव्यमित्यर्थः । तर्हि कर्मवददृष्टद्वाराऽन्त्यप्रत्ययापेक्षोपासनानां स्यान्नेत्याह—प्रत्ययास्त्विति । तेषां धारावाहिकतया दृष्टद्वारेणाऽऽक्षेपकत्वसंभवे नादृष्टकल्पनेति भावः । सर्वभावनानां स्वावान्तरजातीयनिरपेक्षतया भावनात्मकोपासनानां न भावनान्तरापेक्षकत्वं स्वरूपसंनिधानेनैव चादृष्टफलोपयोगितेति मत्वोपसंहरति—तस्मादिति । तत्रापि दृष्टमित्येतद्व्याचष्टे—तथाचेति । उपासकः सर्वनामार्थः । क्रतुः संकल्पविशेषः । अस्माल्लोकादभिमानतो गृहीतादेहादिति यावत् । स्मार्तदर्शनमाश्रित्यापि सूत्रावयवं योजयति—स्मृतिरिति । तत्रैव श्रौतदर्शनान्तरमाह—सोऽन्तेति । पूर्ववदुपासकः सर्वनाम्नोक्तः । अक्षितमस्यच्युतमसि प्राणसंशितमसीति मन्त्रत्रयं स्मरेदित्यनुष्ठेयं मरणकालेऽपि दर्शयन्ती श्रुतिर्विज्ञानावृत्तिं सूचयतीत्यर्थः ॥ १२ ॥ (८)

---

१ क. °जलायुका° । ङ. अ. °जलायूका° । २ क. ङ. ज. ञ.° पावृ° । ३ झ. °न्यत्प्रयाण° । ४ म. °काले भाव° । ५ ट. °ष्वाप्रयाणा° । ६ ङ. अ. °रस्मा° । ७ क. ° पि च प्र° । ८ क. °ति सोऽ° । ९ ङ. अ. °लायां क° । १० ट. °ति । आप्रयाणाधिकरणम् । त° । ११ क. ख. ठ. ङ. °क्षत्वाद्भाव° । १२ क. ठ. ङ. °राक्षेपक° । १३ क. ख. °व वाऽद° ।

(ज्ञानिनः पापलेपाभावः, अधि० ९)

तदधिगम उत्तरपूर्वाघयोरश्लेष-
विनाशौ तद्व्यपदेशात् ॥ १३ ॥ (९)

गतस्तृतीयशेषः । अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रतायते । ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते न क्षीयते वेति संशयः । किं तावत्प्राप्तम् । फलार्थत्वात्कर्मणः फलमदत्त्वा न संभाव्यते क्षयः । फलदायिनी ह्यस्य शक्तिः श्रुत्या समधिगता । यदि तदन्तरेणैव फलोपभोगमपवृज्येत श्रुतिः कदर्थिता स्यात् । स्मरन्ति च " न हि कर्म क्षीयते " [गौ० सू० १९-५] इति । नन्वेवं सति प्रायश्चित्तोपदेशोऽनर्थकः प्राप्नोति । नैष दोषः । प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्गृहदाहेष्ट्यादिवत्

यथोपास्तावन्तकाले कर्तव्यमस्ति न तथा ब्रह्मविद्यायां कर्तव्यं किंचिदप्यस्ति तदुत्पत्तिमात्रेणाशेषपापक्षयादित्याह—**तदधिगम इति** । साधनानुष्ठाने यत्नाधिक्यार्थं फलाध्यायेऽपि साधनसंबद्धमनुष्ठानक्रमं विचार्य फलाध्यायस्थां फलचिन्तामेवावतारयति—**गत इति** । दुरितमधिकृत्य तस्य फलावसानत्वप्रतीतेर्ज्ञानात्क्षयप्रतीतेश्च संशयमाह—**ब्रह्मेति** । तद्विपरीतफलं बन्धनसाधनमित्यर्थः । अत्र साक्षादेव श्रौतब्रह्मात्मधियो दुरितक्षयफलोक्त्या पादादिसंगतिः । पूर्वपक्षे दुरितफलभोगमपेक्ष्य ब्रह्मधियो मोक्षहेतुत्वम् । सिद्धान्ते स्वोत्पत्तिनान्तरीयकत्वेन तस्यास्तद्धेतुत्वमित्युपेत्य प्रश्नपूर्वकं पूर्वपक्षयति—**किं तावदिति** । फलनाश्यत्वाददृष्टस्य फलदानं विना नाशो नास्तीत्यर्थः । फलार्थत्वं कथमस्य सिद्धं तत्राऽऽह—**फलेति** । " ब्राह्मणो न हन्तव्यः " " न कलञ्जं भक्षयेत् " इत्यादिनिषेधानुपपत्त्या दुरितस्यानिष्टफलत्वं सिद्धमित्यर्थः । उक्तमेव स्फोरयति—**यदीति** । तदित्यनिष्टकर्मोक्तिः ।

" नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि "

इतिस्मृतेरपि फलभोगं विना न नाशो दुरितस्येत्याह—**स्मरन्तीति** । भोगादृते कर्म न क्षीयते चेत्प्रायश्चित्तविध्यानर्थक्यमिति शङ्कते—**नन्विति** । तद्विधीनां दोषनिर्हरणार्थत्वाभावान्नैवमित्याह—**नेति** । यथा यस्याऽऽहिताग्नेरग्निर्गृहान्दहेदिति प्राप्ते गृहदाहवत्याहिताग्नावधिकारिणि " अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत् " इति क्षामवतीष्टिर्विधीयते तथा पापसंबन्धिनि नरे प्राप्ते " ब्रह्महा द्वादशवार्षिकं चरेत् "

---

१ ब. प्रजायं । ट. प्रतीयं । २ ङ. ब. न वा क्षीयत इति । ३ ङ. ब. °गमुपमृद्येत । ४ ब. °वृङ्ज्येत । ५ ङ. ब. कर्माणि । ६ ङ. ब. क्षीयन्ते । ७ ट. °श्चित्तीनां । ८ क. ख. ठ. ङ. °वन्त्यका° । ९ ख. ठ. ङ. 'बन्धम' । १० ख. °न्धसा° । ठ. ङ. °न्धनावसानमि° ।

[तै० सं० २-२-२-५]। अपि च प्रायश्चित्तानां दोषसंयोगेन विधानाद्भवेदपि दोषक्षपणार्थता न त्वेवं ब्रह्मविद्यायां विधानमस्ति । नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्मक्षये तत्फलस्यावश्यभोक्तव्यत्वादनिर्मोक्षः स्यात् । नेत्युच्यते । देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भविष्यति । तस्मान्न ब्रह्माधिगमे दुरितनिवृत्तिरिति ।

एवं प्राप्ते ब्रूमः—"तदधिगमे" ब्रह्माधिगमे सति "उत्तरपूर्वयोरघयोरश्लेषविनाशौ" भवतः । उत्तरस्याश्लेषः पूर्वस्य विनाशः । कस्मात् । "तद्व्यपदेशात्" । तथा हि ब्रह्मविद्याप्रक्रियायां संभाव्यमानसंबन्धस्याऽऽगामिनो दुरितस्यानभिसंबन्धं विदुषो व्यपदिशति "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते" [छा० ४-१४-३] इति । तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति "तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" [छा० ५-२४-३] इति । अयमपरः कर्मक्षयव्यपदेशो भवति—

इत्यादिप्रायश्चित्तानि विधीयन्ते । तस्माद्ब्रह्महेत्यादिविशेषणमधिकारिव्यावृत्तिपरं न फलपरमित्यर्थः । गृहदाहेष्ट्यादिवदित्यत्राऽऽदिपदेन भिन्ने जुहोति स्कन्ने जुहोतीत्यादिनैमित्तिकग्रहणम् । युक्तं गृहदाहादेर्निष्पन्नत्वेन निष्पादयितुमशक्यत्वादधिकारिव्यावृत्त्यर्थत्वं दुरितनिवृत्तेस्तु कर्तुं योग्यत्वादिष्टसाधनत्वबोधी प्रायश्चित्तविधिस्तत्फलः स्यादित्याशङ्क्य प्रायश्चित्तानां दोषनिवृत्तिफलत्वमुपेत्य प्रकृते वैषम्यमाह—अपि चेति । मोक्षशास्त्रप्रामाण्यानुपपत्त्या विद्यया दुरितनिवृत्तिरेष्टव्येति शङ्कते—नन्विति । दुरितफलभोगानन्तरं शास्त्रप्रामाण्यादेव मोक्षसिद्धेर्न तच्छास्त्राविरोधोऽस्तीत्याह—नेतीति । ब्रह्मज्ञानस्य प्रायश्चित्तेभ्यो वैषम्ये दुरितानिवर्तकत्वेऽपि मोक्षशास्त्राविरोधे च फलितमाह—तस्मान्नेति ।

न ब्रह्मविद्या दुरितनिबर्हणहेतुरिति प्राप्तमनूद्य सिद्धान्तसूत्रमवतार्य प्रतिज्ञां व्याकरोति—एवमिति । विभागहेतुं प्रश्नपूर्वकमादत्ते—कस्मादिति । उत्तराश्लेषविषयत्वेन हेतुं व्याचष्टे—तथा हीति । निषिद्धानाचरणाद्व्यर्थं दुरिताश्लेषवचनमितिशङ्कानिरासार्थं विशिनष्टि—संभाव्यमानेति । पूर्वस्य कर्मणो नाशेऽपि हेतुं योजयति—तथेति । सगुणविद्यायामश्लेषविनाशवचनमुदाहृत्य निर्गुणविद्यायामुदाहरति—अयमिति ।

---

१ क. 'षप्रसङ्गेन । २ क. ङ. ज. ञ 'थाया वि' । ३ ज. ञ. ट. 'वश्यं भो' । ४ ङ. ञ. ब्रह्मविद्याधि' । ५ ङ. ञ. 'पूर्वाघ' । ६ ट. 'रप्यघ' । ७ ठ. ड. 'दाहे निष्प' । ८ क. ख. ङ. 'त्फलं स्या' । ९ ञ. ठ. 'शास्त्रवि' ।

(ज्ञानिनः पापलेपाभावः, अधि० ९)

" भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे "

[मुण्ड० २-२-८] इति । यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रं कदर्थितं स्यादिति । नैष दोषः । न हि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे विद्यत एव सा, सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः । शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियते न प्रतिबन्धाप्रतिबन्धयोरपि । "न हि कर्म क्षीयते" [गौत० १९-५] इत्येतदपि स्मरणमौत्सर्गिकं नै भोगादृते कर्म क्षीयते तदर्थत्वादिति । इष्यत एवं तु प्रायश्चित्तादिना तस्य क्षयः " सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद " [तै० सं०५-३-१२-२] इत्यादिश्रुतिस्मृतिभ्यः । यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि भविष्यन्तीति । तदसत् । दोषसंयोगेन चोद्यमानानामेषां दोषनिर्घातफलसंभवे फलान्तरकल्पनानुपपत्तेः ।

कर्माश्लेषस्यापि तत्क्षयवचनमुपलक्षणम् । एवं सिद्धान्तमुपपाद्य परोक्तमनुवदति—यदुक्तमिति । ज्ञानात्कर्मदाहादिपक्षे शास्त्रविरोधं प्रत्याह—नेत्यादिना । कर्मणो नास्ति फलदाने शक्तिरिति साधने वा शास्त्रविरोधः सत्यामेव तस्यां भोगं विना तन्निवृत्तिसाधने वेति विकल्प्याऽऽद्यं दूषयति—न हीति । द्वितीयं प्रत्याह—सा त्विति । कथं तर्हि शास्त्रविरोधसमाधिस्तत्राऽऽह—शक्तीति । यत्तु " नाभुक्तं क्षीयते कर्म " इत्यादिस्मृतेर्न भोगादृते कर्मक्षयोऽस्तीति तत्राऽऽह—न हीति । अपवादस्तर्हि केनोत्सर्गस्य स्यादिति तत्राऽऽह—इष्यत इति । आदिशब्देन पूर्वत्र प्रायश्चित्तवदत्र विद्योच्यते ।

" ज्ञानिनः सर्वपापानि शीर्यन्ते नात्र संशयः ।
क्रीडन्नपि न लिप्येत पापैर्नानाविधैरपि "

इत्याद्याः स्मृतयः । प्रायश्चित्तानां न पापक्षयहेतुत्वं गृहदाहेष्ट्यादिवन्नैमित्तिकत्वेन फलान्तरयोगादित्युक्तमनुवदति—यत्त्विति । यथा मलिनः स्नायादित्युक्ते स्नानफलं मलनिवृत्तिर्गम्यते तथा ब्रह्महा द्वादशवार्षिकं व्रतं चरेदित्युक्ते ब्रह्महत्यानिवृत्तिर्व्रतफलं प्रतीयते तेन दृष्टत्यागेनादृष्टकल्पना न युक्तेत्याह—तदसदिति ।

प्रायश्चित्तानां पापनिवृत्तिफलत्वेऽपि विद्याया न तथात्वं तद्वत्तन्निवृत्त्युद्देशेन तस्या

---

१ क. ङ. ञ. शास्त्रकं । २ क. °दर्थना स्या° । ङ. ञ. °दर्थनं स्या° । ३ ङ. ञ. न हि भो° । ४ ङ. ञ. °व प्रा° । ५ ङ. ञ. दुरितस्य । ६ ङ. ज. ञ. °निर्हनुतिर्फ° । ७ ठ. ड. °कं च° । ८ झ. ठ. ड. °त्यादिनि° ।

यत्पुनरेतदुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधानमस्तीति । अत्र ब्रूमः—सगुणासु तावद्विद्यासु विद्यत एव विधानम् । तासु च वाक्यशेष ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते तयोश्चाविवक्षाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति निश्चीयते । निर्गुणायां तु विद्यायां यद्यपि विधानं नास्ति तथाऽप्यकर्त्रात्मत्वबोधात्कर्मप्रदाहसिद्धिः । अश्लेष इति चाऽऽगामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति । अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात्कर्तृत्वं प्रतिपेद इव तथाऽपि विद्यासामर्थ्यान्मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रविलीयन्त इत्याह विनाश इति । पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्ता भोक्ता वाऽहमासं नेदानीं नापि भविष्यत्काल इति ब्रह्मविदवगच्छति । एवमेव च मोक्ष उपपद्यते । अन्यथा

विध्यभावादित्युक्तमनुद्रवति—यदिति । दोषक्षयोद्देशेन सगुणविद्यासु वा विध्यभावो निर्गुणविद्यायां वेति विकल्पयति—अत्रेति । प्रथमं प्राह—सगुणास्विति । तासामैश्वर्यफलत्वान्न पापक्षयोद्देशेन विधिरित्याशङ्क्याऽऽह—तास्विति । विधित्सितविद्यास्तुतिरेव पाप्मादिनिवृत्तिश्रुतिरित्याशङ्क्याऽऽह—तयोश्चेति । उभयसंयोगित्वेन विद्याविधिसंभवादित्यर्थः । पाप्मदाहादिश्रुतेः स्तुत्यर्थत्वाभावे फलितमाह—अत इति । द्वितीये विध्यभावमुपेत्य विद्यास्वभावादेव पापक्षयफलत्वमाह—निर्गुणायां त्विति । विमतमात्मन्यशेषदुरितनिवर्तकं दुरितकर्तृत्वादिबाधकत्वात्स्वप्नदुरितकर्तृत्वादिबाधकतया तत्कालीनदुरितबाधकजाग्रद्बोधवदिति भावः । सर्वत्रापि दुरितनिवर्तकस्य तुल्यत्वाद्दाहाश्लेषविभागोक्तिरयुक्तेत्याशङ्क्याश्लेषोक्तेर्गतिमाह—अश्लेष इति चेति । सर्वमपि व्यापारं कार्यकरणसंघाताश्रयं पश्यन्नविक्रियब्रह्मात्मदर्शी कर्तृत्वमेव स्वस्य न मन्यते । न च परकर्तृकेण पापेन लिप्यते स्वयमित्यर्थः । विद्योत्पत्तेरूर्ध्वं कर्तृत्वाभिमानाभावेऽपि प्राग्भावात्कथं कर्मनिवृत्तिरित्याशङ्क्य दाहोक्तिमुपपादयति—अतिक्रान्तेष्विति । विद्याधीनं कर्मनाशं विद्वदनुभवानुसारेण विवृणोति—पूर्वेति । मोक्षशास्त्रानुपपत्त्याऽपि विद्याधीना पापहानिरित्याह—एवमेवेति । योगप्रभावाद्युगपदनेकदेहनिर्माणेनापर्यायेण सर्वकर्मफलोपभोगे मुक्तिर्युक्तेत्याशङ्क्याऽऽह—अन्यथेति । कर्मणां नियतकाल-

---

१ क. ज. °पूर्विकै° । २ क. °मैदा° । ३ क. ट. °हप्रसि° । ४ ट. °धु य° । ५ ङ. ञ. प्रली° । ६ क. ङ. ज. ञ. °वैप्रसि° । ७ ङ. ञ. °त्वस्वरूपवि° । ८ क. ङ. ज. ञ. ट. °ष्यति का° । ९ क. ख. ठ. ड. °वमभ्युपे° । १० ख. °र्यकार° । ११ ठ. ड. °द्यानुभ° । १२ झ. °त्याह ।

(ज्ञानिनः पुण्यलेपाभावः, अधि० १०)

अनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात् । न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भवितुमर्हति । अनित्यत्वप्रसङ्गात् । परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य । तस्माद्ब्रह्माधिगमे दुरितक्षय इति स्थितम् ॥ १३ ॥ (९)

(ज्ञानिनः पुण्यलेपाभावः, अधि० १०)

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥ (१०)

पूर्वस्मिन्नधिकरणे बन्धहेतोरघस्य स्वाभाविकस्याश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ । धर्मस्य पुनः शास्त्रीयत्वाच्छास्त्रीयेण ज्ञानेनाविरोध इत्याशङ्क्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते । " इतरस्यापि " पुण्यस्य कर्मणः "एवम्" अघवत् "असंश्लेषो" विनाशश्च ज्ञानवतो भवतः । कुतः ।

विपाकत्वाद्युगपदुपभोगायोगादुपभोगस्यापि कर्मान्तरसंचयमन्तरेणासंभवात्कल्पशतातिक्रमकालभोग्यानामधुना भोक्तुमयुक्तत्वाद्दीर्घकालानां च परिमितकालभोगानुपपत्तेर्न विद्यातिरेकेण निःशेषकर्मनिवृत्तिरित्यर्थः । सत्स्वपि कर्मान्तरेषु मोक्षहेतुकर्मवशान्मोक्षमनुभूय कर्मान्तरफलानि पश्चाद्भोक्ष्यन्त इत्याशङ्क्याऽऽह–न चेति । दृष्टफलत्वाच्च विद्याया न तत्फलस्य कालान्तरापेक्षा येनोत्पन्नविद्योऽपि कर्मफलान्यनुभूय पश्चान्मुच्येतेत्याह–परोक्षेति । श्रुतिस्मृतिन्यायसिद्धमुपसंहरति—तस्मादिति ॥ १३ ॥ (९)

ज्ञानात्पापनिवृत्तिमुक्त्वा तस्मादेव पुण्यनिवृत्तिमतिदिशति—इतरस्यापीति । अधिकरणस्यापूर्वविषयतां वक्तुं वृत्तं कीर्तयति—पूर्वस्मिन्निति । पुण्यं कर्म विषयस्तत्किं ब्रह्मधिया न क्षीयते क्षीयते वेति पूर्ववत्कर्मणां फलान्तत्वप्रतीतेर्ज्ञानाद्दाहप्रतीतेश्च संशये पादादिसंगतिरतिदेशे पृथङ्न वाच्येति मन्वानोऽधिकां शङ्कामाह–धर्मस्येति । न सुकृतज्ञाने बाध्यबाधकभूते चोदनालक्षणत्वादग्निहोत्रदर्शपूर्णमासवत् । न च क्षीयन्ते चेत्यादिविरोधस्तस्य सामान्योपाधौ प्रवृत्तस्य सर्वे पाप्मान इतिविशेषानुसारेण पापकर्मणि संकोचात्पुण्यपापे विधूयेति पुण्यं फलोपभोगेन पापं ज्ञानेन विधूयेति नियमतो विद्यावतः सुकृताधीनः संसारः स्यादिति भावः । अधिकाशङ्कामनूद्य सिद्धान्तयति—इत्याशङ्क्येति । अतिदेशसूत्रपदानि व्याकरोति–इतरस्यापीति । शास्त्रीयत्वेन तयोर्विरोधो नास्तीत्युक्तमिति शङ्कते—कुत इति । अग्निहोत्रदर्शपूर्णमासयोरविरुद्धफलत्वान्न निवर्त्यनिवर्तकभावो न शास्त्रीयत्वादित्यभिप्रेत्य हेतोरप्रयोजकत्वमाह–

---

१ ट. °म् । ब्रह्माधिगमाधिकरणम् । इ° । २ झ. °ण्यक° । ३ ट. अश्लेष° । ४ ख. ड. पुण्यक° । ५ ख. °धिकाश° । ६ झ. °यते चे° । ७ क. फलभो° । ८ °पयोगे° । ९ क. °धिकां श° ।

(संचितयोरिवाऽऽरब्धपुण्यपापयोर्ज्ञानोदयसमये विनाशाभावः, अधि० ११)

तस्यापि स्वफलहेतुत्वेन ज्ञानफलप्रतिबन्धित्वप्रसङ्गात् । "उभे उ हैवैष एते तरति" [बृ०४-४-२२] इत्यादिश्रुतिषु च दुष्कृतवत्सुकृतस्यापि प्रणाशव्यपदेशात् । अकर्त्रात्मत्वबोधनिमित्तस्य च कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् "क्षीयन्ते चास्य कर्माणि" [मुण्ड० २-२-८] इति चाविशेषश्रुतेः । यत्रापि केवल एव पाप्मशब्दः पठ्यते तत्रापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यम् । ज्ञानापेक्षया निकृष्टफलत्वात् । अस्ति चैं श्रुतौ पुण्येऽपि पाप्मशब्दः "नैनं सेतुमहोरात्रे तरतः" [छा० ८-४-१] इत्यत्र सह दुष्कृतेन सुकृतमप्यनुक्रम्य सर्वे पाप्मानोऽतो निवर्तन्त इत्यविशेषेणैव प्रकृते पुण्ये पाप्मशब्दप्रयोगात् । "पाते तु" इति तुशब्दोऽवधारणार्थः । एवं धर्माधर्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यंभाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति ॥ १४ ॥ (१०)

(संचितयोरिवाऽऽरब्धपुण्यपापयोर्ज्ञानोदयसमये विनाशाभावः, अधि० ११)

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥ (११)

पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधा-

तस्यापीति । पापं दृष्टान्तयितुमपिशब्दः । कालात्ययापदिष्टत्वाच्च नानुमानमित्याह—उभे इति । विमतं तत्त्वधीनिवर्त्यं तद्विरुद्धत्वाद्दुरितवदिति प्रत्यनुमानविरोधाच्चायुक्तमनुमानमित्याह—अकर्त्रात्मेति । सामान्यश्रुतिविरोधाच्चानुमानासिद्धिरित्याह—क्षीयन्ते चेति । यत्तु सामान्यशास्त्रस्य सर्वे पाप्मान इतिविशेषश्रुत्या पाप्मकर्मणि संकोचः स्यादिति तत्राऽऽह—यत्रेति । पाप्मशब्दस्य निकृष्टफलकर्मविषयत्वादुत्कृष्टफलं कर्म कथं तेन गृह्यते तत्राऽऽह—ज्ञानेति । वृद्धप्रयोगाभावे कथमुपचारेणापि पाप्मशब्दः सुकृते स्यात्तत्राऽऽह—अस्तीति । तत्रापि पाप्मशब्दस्य सुकृतविषयत्वमसिद्धमित्याशङ्क्य प्रक्रममनुसृत्याऽऽह—सहेति । यत्तु पुण्यपापे विधूयेत्यत्र पुण्यं फलभोगेन पापं विज्ञानेन विधूयेति विभजनं तन्नाश्रुतकल्पनाहेत्वभावादिति मत्वा ज्ञानसामर्थ्यादशेषकर्मक्षये तदश्लेषे च फलितमर्थं सूत्रावयवमवतार्य व्याकुर्वन्नाह—पाते त्विति । एतेन फलमधिकरणयोरुक्तम् ॥ १४ ॥ (१०)

तत्त्वज्ञानेन सर्वकर्मणामौत्सर्गिको लयो व्याख्यातः । संप्रत्यारब्धकर्मविषये तदपवादं दर्शयति—अनारब्धेति । वृत्तं कीर्तयन्नधिकरणस्य विषयमाह—पूर्वयोरिति ।

---

१ ङ. ञ. °षु दुं । २ ङ. ज. ञ. °त्मबो° । ३ झ. दृश्यते । ४ ङ. ट. ज्ञानफलापे° । ५ ट. त । ६ ट. °ति । अतिदेशाधिकरणम् । अ° । ७ ख. ठ. ड. पापक° ८ क. ख. °नुस्मृत्याऽऽ° ।

(संचितयोरिवाऽऽरब्धपुण्यपापयोर्ज्ञानोदयसमये विनाशाभावः, अधि० ११)

रितः, स किमविशेषेणाऽऽरब्धकार्ययोरनारब्धकार्ययोश्च भवत्युत विशेषेणानारब्धकार्ययोरेवेति विचार्यते । तत्र " उभे उ हैवैष एते तरति " [बृ० ४-४-२२] इत्येवमादिश्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इति ।

एवं प्राप्ते प्रत्याह—"अनारब्धकार्ये एव तु " इति । अप्रवृत्तफले एवं " पूर्वे " जन्मान्तरसंचिते अस्मिन्नपि च जन्मनि प्राग्ज्ञानोत्पत्तेः संचिते सुकृतदुष्कृते ज्ञानाधिगमात्क्षीयेते न त्वारब्धकार्ये सामिभुक्तफले याभ्यामेतद्ब्रह्मज्ञानायतनं जन्म निर्मितम् । कुत एतत् " तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये " [छा० ६-१४-२] इति शरीरपातावधिकरणात्क्षेममप्राप्तेः । इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावाज्ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातमतीक्षां नाऽऽचक्षीत । ननु वस्तुबलेनैवायमकर्त्रात्मावबोधः कर्माणि क्षपयन्कथं कानिचित्क्षपयेत्कानिचिच्चोपेक्षेत । न हि समानेऽग्निबीज-

---

ज्ञानाधीनं कर्मक्षयं विषयीकृत्य क्षीयन्ते चेत्यविशेषश्रुतेस्तस्य तावदेव चिरमिति श्रुतेश्च संशयमाह—स किमिति । श्रौती ब्रह्मधीरप्रतिबद्धैव फलदेत्यभिधानात्पादादिसंगतिः । पूर्वपक्षे क्षेमप्राप्तेरवधिकरणासिद्धिः । सिद्धान्ते विदुषोऽपि प्रारब्धकर्मणा कंचित्कालमवस्थानात्तत्सिद्धिरित्यङ्गीकृत्य पूर्वाधिकरणन्यायेन पूर्वपक्षयति—तत्रेति ।

सिद्धान्तसूत्रमवतार्य व्याकरोति—एवमिति । सौत्रावधारणार्थमाह—न त्विति । अर्धभुक्तफले कर्मणी कार्यद्वारा विशिनष्टि—याभ्यामिति । विद्याशक्त्यनुगृहीताविशेषश्रुतेर्विद्वद्देहारम्भकयोरपि कर्मणोर्नाशः स्यादित्याक्षिपति—कुत इति । श्रुत्योत्तरमाह—तस्येति । कथमेतावता कर्मशेषसिद्धिस्तत्राऽऽह—इतरथेति । ज्ञानसमकालमेव सर्वकर्मक्षयान्मोक्षे ज्ञानमेव क्षेमप्राप्तेरवधिरिति न देहपातं तदवधिमभिदधीत । तथा च श्रुतावध्यन्तरकरणलिङ्गाज्ज्ञानादूर्ध्वमपि शरीरमनुवर्तमानं कर्मशेषं गमयति तदभावे तदनुवृत्तेरनुपपत्तेरित्यर्थः । विद्याया दृष्टसामर्थ्येन कर्मक्षयहेतुत्वान्न शास्त्रेण तन्निराकरणं दृष्टविरोधिनस्तस्य प्रावल्यवनश्रुतिवदप्रामाण्यादिति शङ्कते—नन्विति । दाहकसंनिध्यविशेषे दाहव्यवस्थासिद्धिरित्यत्र दृष्टान्तमाह—न हीति । तस्य तावदेव

---

१ ङ. प्राप्त इत्या° । २ क. 'व तु पू' । ३ ङ. 'ब्रह्माज्ञा' । ४ क. ङ. ज. ञ. ट. 'मोक्ष्ये " इ° । ५ क. 'त्रात्मत्वाव° । ङ. ञ. ट. 'त्रात्मबो° । ६ क. ख. 'धीनक° । ७ ठ. ड. °षे न दा° ।

संपर्के केषांचिद्बीजशक्तिः क्षीयते केषांचिन्न क्षीयत इति शक्यमङ्गीकर्तुमिति । उच्यते—न तावदनाश्रित्याऽऽरब्धकार्यं कर्माशयं ज्ञानोत्पत्तिरुपपद्यते । आश्रिते च तस्मिन्कुलालचक्रवत्प्रवृत्तवेगस्यान्तराले प्रतिबन्धासंभवाद्भवति वेगक्षयप्रतिपालनम् । अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति । बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत्संस्कारवशात्कंचित्कालमनुवर्तत एव । अपि च नैवात्र विवदितव्यं ब्रह्मविदा कंचित्कालं शरीरं ध्रियते न वा ध्रियत इति । कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं चापरेण प्रतिक्षेप्तुं शक्येत । श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरुच्यते । तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात्क्षय इति निर्णयः ॥ १९ ॥ (११)

चिरमिति विदुषो देहपातावधिकरणलिङ्गम् । उद्दालकादीनां तत्त्वविदामेव देहधारणविषयैः श्रुतिस्मृतिलिङ्गैस्तत्त्वविद्भिरपि गुरुभिः शिष्याणां संबन्धान्यथानुपपत्त्या चानुगृहीतं मन्त्रादिप्रतिबद्धस्याग्नेरदाहकत्ववज्ज्ञानस्य सर्वकर्मक्षये शक्तस्याप्यारब्धकर्मनिवृत्तौ प्रतिबन्धं कल्पयतीत्याह—उच्यत इति । किंच ज्ञानार्थं कर्म स्वयमेव देहमारभ्य ज्ञानं तस्मिन्करोति कर्मान्तरारब्धे वेति विकल्प्याऽऽद्यं दूषयति—नेति । न हि ज्ञानार्थस्य कर्मणो देहारम्भकत्वं कल्प्यं गौरवात्तेन कर्मान्तरारब्धे देहे ज्ञानोत्पत्तिरित्यर्थः । न द्वितीयस्तथा सति ज्ञानस्योपजीव्यकर्मबाधकत्वानुपपत्तेरित्याह—आश्रिते चेति । अकर्त्रात्मज्ञानं कर्मनिदानमज्ञानं निवर्तयत्युपादानाभावे च कथं कर्मानुवृत्तिस्तत्राऽऽह—अकर्त्रात्मेति । कर्माण्यपीति संबन्धः । सोपादानानि कर्माण्युच्छिन्नानि चेत्कथमारब्धकर्मानुवृत्तिस्तत्राऽऽह—बाधितमिति । स्मृतिहेतुत्वेऽपि संस्कारस्याविद्यावच्चैतन्यदोषत्वादपरोक्षभ्रमहेतुतेत्यभिप्रेत्य संस्कारवशादित्युक्तम् । विप्रतिपन्नान्प्रति जीवन्मुक्तिमुक्त्वा शिष्यान्प्रत्याह—अपि चेति । जीवन्मुक्तिः सप्तम्यर्थः । विवादायोगे हेतुमाह—कथं हीति । प्रमाणवत्त्वादपि जीवन्मुक्तिः स्वीकार्येत्याह—श्रुतीति । उक्तमुत्सर्गापवादमुपसंहरति—तस्मादिति ॥ १९ ॥ (११)

---

१ ज. °त्रात्मावबो° । २ क. ङ. ञ. °त्मत्वबो° । ३ ङ. ञ. °पि मि° । ४ ङ. ञ. °चन्द्रादिज्ञा° । ५ क. ङ. ज. झ. ञ. °विदः कं° । ६ ट. °यः । अनारब्धकार्याधिकरणम् । अ° । ७ ठ. ड. °त्तौ पाकवद्वैकल्यं प्र° । ८ ठ. ड. °न्धं वा क° । ९ झ. कर्मण्य° ।

(अग्निहोत्रादिनित्यकर्मणो विद्योपयोग्यंशस्याविनाशः, अधि० १२)

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

पुण्यस्याप्यश्लेषविनाशयोरघन्यायोऽतिदिष्टः[1], सोऽतिदेशः सर्वपुण्यविषय इत्याशङ्क्य प्रतिवक्ति—" अग्निहोत्रादि तु " इति । तुशब्द आशङ्कामपनुदति यन्नित्यं कर्म वैदिकमग्निहोत्रादि तत्तत्कार्यायैव भवति ज्ञानस्य यत्कार्यं तदेवास्यापि कार्यमित्यर्थः । कुतः, " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन " [बृ० ४-४-२२] इत्यादिदर्शनात् । ननु ज्ञानकर्मणोर्विलक्षणकार्यत्वात्कार्यैकत्वानुपपत्तिः । नैष दोषः । ज्वरमरणकार्ययोरपि दधिविषयोर्गुडमन्त्रसंयुक्तयोस्तृप्तिपुष्टिकार्यदर्शनात् । तद्वत्कर्मणोऽपि ज्ञानसंयुक्तस्य मोक्षकार्योपपत्तेः । नन्वनारभ्यो मोक्षः कथमस्य कर्मकार्यत्वमुच्यते । नैष दोषः ।

विद्याजन्यकर्मक्षयस्याऽऽरब्धकर्मस्वपवादमुक्त्वाऽनारब्धकर्मस्वपि केषुचित्तदपवादं दर्शयति—**अग्निहोत्रादीति** । वृत्तसंकीर्तनपूर्वकमधिकरणस्य तात्पर्यमाह—**पुण्यस्येति** । अग्निहोत्रादिनित्यनैमित्तिककर्माणि विषयस्तेषामितरवज्ज्ञानेनाश्लेषविनाशौ स्यातां न वेति साधारणश्रुतेर्विविदिषाश्रुतेश्च संशये सुकृतशब्दस्य सर्वपुण्यविषयत्वादग्निहोत्रादीनामपि पुण्यान्तरवद्विनाश्यत्वात्पङ्क्षालनन्यायोपातादारुरुक्षुणाऽपि तानि नानुष्ठेयानीति प्राप्तय्य सिद्धान्तयति—**इत्याशङ्क्येति** । अत्रं च ब्रह्मविद्यासामर्थ्यान्न नित्यनैमित्तिकनिवृत्तिस्तेषां तदुत्पत्त्यर्थत्वादित्यापवादिकी पादादिसंगतिः । पूर्वपक्षे लौकिकन्यायादारुरुक्षोरपि नित्याद्यननुष्ठानम् । सिद्धान्ते तदनवतारात्पूर्वं ज्ञानोत्पत्तेस्तदनुष्ठानप्राप्त्यमित्यभिप्रेत्य सूत्रं व्याचष्टे—**तुशब्द इति** । धीनाश्यानामपि कर्मणामनुष्ठानस्य विद्योत्पत्त्यर्थतया पङ्कप्रक्षालनन्यायानवकाशात्पूर्वं ज्ञानादनुष्ठेयान्यग्निहोत्रादीनीति सिद्धान्तप्रतिज्ञां विवृणोति—**यादीति** । अग्निहोत्राद्यनुष्ठानस्य विद्योत्पत्त्यर्थत्वे प्रमाणं पृच्छति—**कुत इति** । तत्र विविदिषावाक्यं प्रमाणयति—**तमेतामिति** । कर्मणां विद्योत्पत्त्यर्थत्वेऽपि न तयैककार्यतेति शङ्कते—**नन्विति** । परमतेन परिहरति—**नेत्यादिना** । स्वमतं दर्शयितुं शङ्कयति—**नन्विति** । स्वमतेन समाधत्ते—**नेत्यादिना** ।

---

१ ज. झ. ञ्यायो निर्दिष्टः । २ ङ. ञ. °वास्य का° । ३ क. °प्रापकत्वा° । ४ क. ङ. ञ. °कार्यत्वोपपत्तेः । ५ ठ. ड. °यादा° । ६ झ. °त्र ब्र° । ७ क. ख. °नत्वं वि° । ८ ठ. ड. °र्थत्वप्र° ।

आरादुपकारकत्वात्कर्मणः। ज्ञानस्यैव हि प्रापकं सत्कर्म प्रणाड्या मोक्षकारणमित्युपचर्यते। अत एव चातिक्रान्तविषयमेतत्कार्यैकत्वाभिधानम्। न हि ब्रह्मविद आगाम्यग्निहोत्रादि संभवति। अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात्। सगुणासु तु विद्यासु कर्तृत्वानतिवृत्तेः संभवत्यागाम्यप्यग्निहोत्रादि। तस्यापि निरभिसंधिनः कार्यान्तराभावाद्विद्यासंगत्युपपत्तिः ॥ १६ ॥

किंविषयं पुनरिदमश्लेषविनाशवचनं किंविषयं वाऽदो विनियोगवचनमेकेषां शाखिनाम् " तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम् " इति। अत उत्तरं पठति—

अतोऽन्याऽपि ह्येकेषामुभयोः ॥ १७ ॥ (१२)

" अतः " अग्निहोत्रादेर्नित्यात्कर्मणः " अन्याऽपि " ह्यस्ति साधुकृत्या या फलमभिसंधाय क्रियते तस्या एष विनियोग उक्तः " एकेषां " शाखिनाम् " सुहृदः साधुकृत्यामुपयन्ति " इति। तस्या एव चेदमघवदश्लेषविनाशनिरूपणमितरस्याप्येवमसंश्लेष इति। तथाजातीयकस्य काम्यस्य कर्मणो विद्यां प्रत्यनुपकारकत्वे संप्रतिपत्तिः " उभयोः " अपि जैमिनिबादरायणयोराचार्ययोः ॥ १७ ॥ (१२)

आरादुपकारकत्वं स्फोरयति—ज्ञानस्येति। किंविषयमिदं कार्यैकत्ववचनं तदाह—अत इति। यतो विद्याकाले परस्ताद्वा कर्म नास्ति प्रागेव तदस्तित्वमत एवेति यावत्। धीकाले परस्ताद्वा कर्मासत्त्वं स्फुटयति—न हीति। निर्गुणविद्याविषयत्वं सूत्रस्योपेत्य लाङ्गलभोजनयोर्जीवनहेतुतावद्धीकर्मणोः साक्षात्पारम्पर्याभ्यां मोक्षहेतुत्वमुक्तम्। संप्रति सगुणविद्याविषयत्वे सूत्रस्य सामञ्जस्यमभिप्रेत्याऽऽह—सगुणास्विति। तथाऽपि तस्य कुतो विद्यासंगतिस्तत्राऽऽह—तस्यापीति। सगुणविद्याफले नित्यकर्मणां साक्षादुपयोगाभिप्रायमिदं सूत्रमित्यर्थः ॥ १६ ॥

सूत्रान्तरमवतारयितुं पृच्छति—किमिति। काम्यकर्मविषयं वचनद्वयमिति सूत्रमवतारयति—अत इति। तदक्षराणि व्याकरोति—अत इत्यादिना। उक्तेऽर्थे दार्ढ्यार्थमाचार्यान्तरसंवादं दर्शयति—तथेति ॥ १७ ॥ (१२)

---

१ झ. ट. प्रणाड्या। २ ज. ट. °त्वानिवृ°। ३ क. °पत्तेः ॥ १६ ॥ किं°। ४ अ. °यं वा वेदवि°। ज. झ. °यं वा वि°। ५ ङ. ञ. ट. तथैवंजा°। ६ ट. °योः। अग्निहोत्राधिकरणम्। य°।

(सोपासनस्य निरुपासनस्य च नित्यकर्मणस्तारतम्येन विद्यासाधनत्वम्, अधि० १३)

यदेव विद्ययेति हि ॥ १८ ॥ (१३)

समधिगतमेतदनन्तराधिकरणे नित्यमग्निहोत्रादिकं कर्म मुमुक्षुणा मोक्षप्रयोजनोद्देशेन कृतमुपात्तदुरितक्षयहेतुद्वारेण सत्त्वशुद्धिकारणतां प्रतिपद्यमानं मोक्षप्रयोजनब्रह्माधिगमनिमित्तत्वेन ब्रह्मविद्यया सहैककार्यं भवतीति। तत्राग्निहोत्रादि कर्माङ्गत्वेऽपाश्रयविद्यासंयुक्तं केवलं चास्ति। "य एवं विद्वान्यजते" "य एवं विद्वाञ्जुहोति" "य एवं विद्वाञ्शंसति" "य एवं विद्वान्गायति" "तस्मादेवंविदमेव ब्रह्माणं कुर्वीत" [छा० ४-१७-१०] "तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद" [छा० १-१-१०] इत्यादिवचनेभ्यो विद्यासंयुक्तमस्ति केवलमप्यस्ति। तत्रेदं विचार्यते-किं विद्यासंयुक्तमेवाग्निहोत्रादिकं कर्म मुमुक्षोर्विद्याहेतुत्वेन तया सहैककार्यत्वं प्रतिपद्यते न केवलमुत विद्यासंयुक्तं केवलं चाविशेषेणेति। कुतः संशयः, "तमेतमात्मानं यज्ञेन विविदिषन्ति" [बृह० ४-४-२२] इति यज्ञादीनामविशेषेणाऽऽत्मवेदनाङ्गत्वेन श्रवणात्। विद्यासंयुक्तस्य चाग्निहोत्रादेर्विशिष्टत्वावगमात्। किं तावत्प्राप्तं, विद्यासंयुक्तमेव कर्माग्निहोत्राद्यात्मविद्याशेषत्वं प्रतिपद्यते न विद्याहीनम्। विद्योपेतस्य विशिष्टत्वावगमाद्विद्याविहीनात्। "यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वान्" [बृह० १-५-२] इत्यादिश्रुतिभ्यः।

पूर्वोक्ताग्निहोत्रादिष्वेवाङ्गावबद्धोपास्तिसाहित्यानियमं निरूपयति-यदेवेति। वृत्तं कीर्तयति—समधिगतमिति। विचारविषयं दर्शयति—तत्रेति। अङ्गसङ्गिविद्यासंयुक्तत्वे प्रमाणमाह—य एवमिति। नित्यमग्निहोत्रादिकर्म विषयीकृत्य संशयमाह—तत्रेदमिति। प्रश्नपूर्वकं संशयकारणमाह—कुत इति। श्रौतब्रह्मधीहेतुतया प्रकृतनित्यकर्मस्वङ्गाश्रितविद्यासंयोगानियमवादादत्र प्रासङ्गिकी पादादिसंगतिः। पूर्वपक्षे केवलकर्मणो मोक्षान्वयासिद्धिः। सिद्धान्ते तस्यापि पारम्पर्यात्तत्सिद्धिरिति मत्वा विमृश्य पूर्वपक्षमाह—किं तावदिति। अविशेषतो यज्ञेनेत्यादिश्रुतेरुभयस्यापि कर्मणो विद्याङ्गतेत्याशङ्क्य ब्राह्मणाय दद्यादित्युक्ते विदुषे न तद्धीनायेतिविशेषलाभवदिहापीत्याह—नेत्यादिना। विद्यासहितस्य कर्मणो वैशिष्ट्ये मानमाह—यदहरिति।

---

१ ङ. अ. हि ॥ १८ ॥ सुस°। २ ट. °जते। य°। ३ क. ङ. अ. °द्वानुद्गाय°। ४ ङ. अ. ट. °त नानेवंविदं ते°। ५ ङ. अ. °युक्तं के°। ६ ङ. अ. °द्याविहीं°। ७ ख. °तं संकी°। ८ ङ. °गादिनि°।

(सोपासनस्य निरुपासनस्य च नित्यकर्मणस्तारतम्येन विद्यासाधनत्वम्, अधि० १३)

" बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि "
[भ० गी० २-३९]
" दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय "
[भ० गी० २-४९] इत्यादिस्मृतिभ्यश्चेति ।

एवं प्राप्ते प्रतिपद्यते—"यदेव विद्ययेति हि"। सत्यमेतत् । विद्यासंयुक्तं कर्माग्निहोत्रादिकं विद्याविहीनात्कर्मणोऽग्निहोत्रादिशिष्टं विद्वानिव ब्राह्मणो विद्याविहीनाद्ब्राह्मणात् । तथाऽपि नात्यन्तमनपेक्षं विद्याविहीनं कर्माग्निहोत्रादिकम् । कस्मात् । " तमेतमात्मानं यज्ञेन विविदिषन्ति " [बृह० ४-४-२२] इत्यविशेषेणाग्निहोत्रादेर्विद्याहेतुत्वेन श्रुतत्वात् । ननु विद्यासंयुक्तस्याग्निहोत्रादेर्विद्याविहीनाद्विशिष्टत्वावगमाद्विद्याविहीनमग्निहोत्राद्यात्मविद्याहेतुत्वेनानपेक्षमेवेति युक्तम् । नैतदेवम् । विद्यासहायस्याग्निहोत्रादेर्विद्यानिमित्तेन सामर्थ्यातिशयेन योगादात्मज्ञानं प्रति कश्चित्कारणत्वातिशयो भविष्यति न तथा विद्याविहीनस्येति युक्तं कल्पयितुम् । न तु " यज्ञेन विविदिषन्ति " इत्यत्राविशेषेणाऽऽत्मज्ञानाङ्गत्वेन श्रुतस्याग्निहोत्रादेरनङ्गत्वं शक्यमभ्युपगन्तुम् । तथा हि श्रुतिः " यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति " [छान्दो० १-१-१०] इति विद्यासंयुक्तस्य कर्मणोऽग्निहोत्रादेर्वीर्यवत्तरत्वाभिधानेन स्वकार्ये प्रति कंचिदतिशयं ब्रुवाणा विद्याविहीनस्य तस्यैव तत्प्र-

---

श्रौतेऽर्थे स्मृतिमनुकूलयति—बुद्ध्येति ।

केवलस्याग्निहोत्रादेर्मोक्षहेतुत्वाभावान्मोक्षान्वयो नेति प्राप्तमनूद्य सिद्धान्तयति—**एवमिति**। किं विद्यायुक्तस्य कर्मणो विद्याहीनादन्तरङ्गत्वमुच्यते किंवा केवलं कर्म विद्याहेतुरेव नेति तत्राऽऽद्यमङ्गी करोति—**सत्यमिति** । द्वितीयं दूषयति—**तथाऽपीति** । तत्र प्रश्नपूर्वकं श्रुतिविरोधं हेतुमाह—**कस्मादिति** । उक्तमर्थमाक्षेपसमाधिभ्यां साधयति—**नन्वित्यादिना** । केवलस्य कर्मणो विद्यां प्रत्यनङ्गत्वमेव किं न स्यात्तत्राऽऽह—**न त्विति** । विविदिषन्ति यज्ञेनेत्यविशेषश्रुतमपि विद्यासहिते यज्ञादावुपसंहर्तव्यमित्याशङ्क्य श्रुत्या केवलस्यापि कर्मणो वीर्यवत्त्वाभ्यनुज्ञानान्नैवमिति सूत्रव्याख्यापूर्वकमाह—**तथा हीति** । वीर्यवत्त्वप्रतीतावपि कुतो विद्यासाधनत्वमित्याशङ्क्याकिंचित्करस्य वीर्य-

---

१ क. ट. °द्याहीं' । २ ङ. ञ. °त्रादेर्विशि° । ३ ट. 'द्याहीं' । ४ क. ङ. ज. ञ. विद्यारहितं । ५ ङ. ज. ञ. °त्यत्रावि° । ६ क. °द्याहीं' । ७ ङ. °श्चित्कर' । ८ ट. 'रणाति' । ९ क. ङ. ञ. ट. °त्यवि' । १० क. °द्याहीं' ।

(अधिकारिणां मुक्तिसद्भावः, अधि० १४)

योजनं प्रति वीर्यवत्त्वं दर्शयति । कर्मणश्च वीर्यवत्त्वं तद्यत्स्वमयोजनसाधनसहत्वम् । तस्माद्विद्यासंयुक्तं नित्यमग्निहोत्रादि विद्याविहीनं चोभयमपि मुमुक्षुणा मोक्षप्रयोजनोद्देशेनेह जन्मनि जन्मान्तरे च प्राग्ज्ञानोत्पत्तेः कृतं यत्तद्यथासामर्थ्यं ब्रह्माधिगमप्रतिबन्धकारणोपात्तदुरितक्षयहेतुत्वद्वारेण ब्रह्माधिगमकारणत्वं प्रतिपद्यमानं श्रवणमननश्रद्धातात्पर्याद्यन्तरङ्गकारणापेक्षं ब्रह्मविद्यया सहैककार्यं भवतीति स्थितम् ॥ १८ ॥ (१३)

(अधिकारिणां मुक्तिसद्भावः, अधि० १४)

भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥ (१४)

इति महर्षिव्यासप्रणीतब्रह्मसूत्रचतुर्थाध्यायस्य प्रथमः पादः ॥ १ ॥

अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात्क्षय उक्तः । " इतरे तु " आरब्धकार्ये पुण्यपापे उपभोगेन " क्षपयित्वा " ब्रह्म " संपद्यते " " तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये " [छा० ६-१४ २] इति " ब्रह्मैव सन्ब्रह्माप्येति "

वत्त्वायोगादित्याह—कर्मणश्चेति । कर्मणां पारम्पर्येण मोक्षान्वयं दर्शयितुमुपसंहरति—तस्मादिति । विधुरादेराश्रमकर्मस्वनधिकारात्तदीयं जप्यादि विद्यासाधनमित्यन्तरा चापीत्यत्रोक्तम् । इह तु विद्योपेतेषु कर्मसु शक्तस्य तत्त्यागेन केवलकर्मकारिणो न विद्या सेत्स्यतीत्याशङ्क्य समाहितमिति द्रष्टव्यम् ॥ १८ ॥ (१३)

अनारब्धकार्यमग्निहोत्रादि विद्यायुक्तं केवलं च तद्धेतुत्वान्न क्षीयते ज्ञानेनेत्युक्तम् । इदानीमारब्धकार्ययोः शुभाशुभयोर्ज्ञानादनिवृत्तयोर्निवृत्तिप्रकारमाह—भोगेनेति । निर्गुणब्रह्मविद्विषयः स किं देहपातादूर्ध्वमपि संसारवान्नेति तन्निमित्तभावाभावाभ्यां संदेहे पूर्वपक्षमग्रे दर्शयिष्यन्नादौ वृत्तानुवादेन सूत्रतात्पर्यमाह—अनारब्धेति । अत्र श्रौतब्रह्मविद्यावतो भोगेनाऽऽरब्धकर्मनिवृत्तौ ब्रह्मभावस्यावश्यंभावोक्त्या पादादिसंगतिः । पूर्वपक्षे ब्रह्मविदोऽपि न मुक्तिः । सिद्धान्ते तस्य साऽवश्यंभाविनी सत्यां सामग्र्यां कार्यध्रौव्यात् । अनारब्धकार्ये एवेत्यत्र नञाऽऽरब्धकर्मनिवृत्तेर्व्यावर्तितं तस्य फलं भोगेन क्षयलक्षणमधुना दर्शयतीत्युक्तम् । इदानीं निर्गुणब्रह्म विद्वानारब्ध-

---

१ ट. 'धकत्व' । २ ङ अ. 'तुद्वा' । ३ ङ. अ 'द्ध्यानता' । ४ ट. 'म् । अतिशयाधिकरणम् । भो' । ५ ठ. ड. 'र्शयमुप' । ६ क. ठ. ड. 'यं जाप्यां' । ७ झ. ठ. 'रा वाऽपी' । ८ क. ख. क्षीयेत' । ९ ख. 'विद्यावान्विष' । १० क. तत्र । ११ झ. न प्रार' । १२ ख. 'वृत्तिर्न्या' । १३ ख 'र्तिता त' । १४ क. 'विदार' ।

[बृह० ४-४-६] इति चैवमादिश्रुतिभ्यः । ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवृत्तमेवं पश्चादप्यनुवर्तेत । न । निमित्ताभावात् । उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं न च तादृशमत्र किंचिदस्ति । नन्वपरः कर्माशयोऽभिनवमुपभोगमारप्स्यते । न । तस्य दग्धबीजत्वात् । मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपात उपभोगान्तरमारभेत तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमित्यतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यं भवतीति ॥ १९ ॥ (१४)

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य प्रथमः पादः ॥ १ ॥

कर्मक्षयानन्तरमपि संसारी संसारसंबन्धयोग्यत्वात्पूर्वकालीनब्रह्म विद्वानिवेत्यनुमानेन पूर्वपक्षमाह—**नन्विति** । भोगनिमित्तकर्मवत्त्वमुपाधिरिति परिहरति—**नेत्यादिना** । तदेव स्फुटयति—**उपभोगेति** । तत्रेति प्राक्कालीनब्रह्मविदुक्तिः । देहपातोत्तरकालीनेऽपि ब्रह्मविदि भोगनिमित्तं किंचिद्भविष्यतीति साधनव्याप्तिमाशङ्क्याऽऽह—**न चेति** । अनारब्धं कर्म जन्मान्तरारम्भकमिति कुतः साधनाव्याप्तिरिति शङ्कते—**नन्विति** । तस्य ज्ञानेन प्रतिबद्धशक्तित्वान्नैवमित्याह—**न तस्येति** । किं तस्य बीजं तदाह—**मिथ्येति** । केन तर्हि तस्य दाहः स्यात्तद्दर्शयति—**तच्चेति** । अथ संपत्स्यत इत्यादिश्रुतिबाधनाद्बीजाभावस्य च विद्वदनुभवसिद्धत्वान्न पूर्वं कर्मानुमेयमिति भावः । प्रारब्धकर्मफलभोगादूर्ध्वं मोक्षेऽपि तत्कर्मजन्यानेकदेहसंभवात्तत्र च विद्याप्रमोषोपपत्तेस्तत्कृतकर्मणामश्लेषाभावेन मुक्त्यभावमाशङ्क्याधिकारिणां देहान्तरे ज्ञानाप्रमोषस्याऽऽगामिकत्वादस्मदादीनामथ संपत्स्य इति श्रुतिसिद्धत्वादारब्धभोगानन्तरं मुक्तिरवश्यंभाविनीत्यधिकरणार्थमुपसंहरति—**इत्यत इति** । साधनानुष्ठानक्रमो निर्गुणविद्याफलं चोक्तमिति पादार्थमुपसंहर्तुमितीत्युक्तम् ॥ १९ ॥ (१४)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचिते शारीरकभाष्यविभागे न्यायनिर्णये चतुर्थाध्यायस्य प्रथमः पादः ॥ १ ॥

---

१ ङ. ञ. 'रभते त' । २ क. 'ष्यंभावीति । ३ ङ. ञ. 'वति । ४ ट. 'ति । भोगाधिकरणम् ॥ १९ ॥ ५ क. ख. ठ. ड. 'त्वाभ्यां' । ६ ठ. ड. 'कदोषसं' । ७ क. ख. 'वे मुं' । ८ क. ख. 'नान्मोक्षस्याऽऽ' । ९ क. ख. 'तिप्रसि' । १० झ. ठ. ड. 'ति पदा' ।

अथ फलाख्यचतुर्थाध्यायस्य द्वितीयः पादः ।

म्रियमाणस्योत्क्रान्तिप्रकारप्रदर्शनम् ।

(वागादीनां मनसि वृत्तिप्रविलयो न स्वरूपेण, अधि० १)

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

अथापरासु विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन्प्रथमं तावद्यथाशास्त्रमुत्क्रान्तिक्रममन्वाचष्टे । समाना हि विद्वदविदुषोरुत्क्रान्तिरिति वक्ष्यति । अस्ति प्रायणविषया श्रुतिः " अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् " [छा० ६-८-६] इति । किमिह वाच एव वृत्तिमत्त्या मनसि संपत्तिरुच्यत उत वाग्वृत्तेरिति विशयः । तत्र वागेव तावन्मनसि संपद्यत इति प्राप्तम् । तथा हि श्रुतिरनुगृहीता भवति । इतरथा लक्षणा स्यात् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा । तस्माद्वाच एवायं मनसि प्रलय इति ।

पूर्वपादान्तिमाधिकरणे निर्गुणब्रह्मसंपत्तिरुक्ता संप्रति सगुणब्रह्मसंपत्तिं निरूपयिष्यन्नुत्क्रान्तौ वागादीनां मनसि वृत्तिलयं दर्शयति—वागिति । सगुणविद्याफलस्य ब्राह्मलौकिकस्यार्चिरादिगतिप्राप्यस्यानुत्क्रम्य प्राप्त्ययोगात्तदर्थमुत्क्रान्तिनिरूपणं व्यापिब्रह्मात्मभावे निर्गुणविद्याफले तन्निषेधार्थं चेत्यभिप्रेत्य पादस्याध्यायसंगतिमाह—अथेति । निर्गुणधीफलोक्त्यानन्तर्यमथशब्दार्थः । विदुषो नोत्क्रान्तिरत्रैव समवनीयन्त इति श्रुतेस्तत्किमुत्क्रान्तिचिन्तयेत्याशङ्क्याऽऽह—समानेति । विद्वानपरब्रह्मविदुक्तः । पादार्थं संक्षिप्याऽऽद्याधिकरणस्य विषयमाह—अस्तीति । प्रयतः प्रयाणं कुर्वत उच्चिक्रमिषोरिति यावत् । वाङ्मनसि संपद्यत इत्यत्र वाचमधिकृत्य करणव्युत्पत्त्या स्वरूपसंपत्तिं प्रतीतेर्भावव्युत्पत्त्या च स्ववृत्तिसंपत्तिवित्तेः संशयमाह—किमिहेति । श्रौतसगुणब्रह्मधीफलार्थगत्युपयुक्तोत्क्रान्त्येकदेशनिरूपणात्पादादिसंगतिः । पूर्वपक्षे कारणे कार्यलयनियमासिद्धिः । सिद्धान्ते लौकिकपरीक्षकाभीष्टनियमसिद्धिरिति मत्वा पूर्वपक्षयति—तत्रेति । तत्र वाक्शब्दश्रुतिं हेतुं करोति—तथा हीति । वृत्तिमद्वाचकशब्दस्य वृत्तिमात्रपरत्वे दोषमाह—इतरथेति । लक्षणाऽपि शब्दवृत्तित्वादविरुद्धेत्याशङ्क्याऽऽह—श्रुतीति । श्रुत्यनुसारिणमर्थमुपसंहरति—तस्मादिति ।

---

१ क. ङ. ज. ञ. 'ममाच' । २ ङ. ञ. विषयः । ३ ङ. ञ. प्रविल' । ४ ठ. ड. 'त्तिभानाद्भाव' । ५ झ. ठ. ड. हेतुं क' । ६ ख. 'त्वे बाधकमा' ।

(वागादीनां मनसि वृत्तिप्रविलयो न स्वरूपेण, अधि० १)

एवं प्राप्ते ब्रूमः—वाग्वृत्तिर्मनसि संपद्यत इति । कथं वाग्वृत्तिरिति व्याख्यायते यावता " वाङ्मनसि " इत्येवाऽऽचार्यः पठति । सत्यमेतत्[२] । पठिष्यति तु परस्तात् " अविभागो वचनात् " [ब्र० सू० ४-२-१६] इति, तस्मादत्र वृत्त्युपशममात्रं विवक्षतीति गम्यते । तत्त्वप्रलयविवक्षायां तु सर्वत्रैवाविभागसाम्यात्किं परत्रैव विशिष्याद्विभाग इति । तस्मादत्र वृत्त्युपसंहारविवक्षा[३] । वाग्वृत्तिः पूर्वमुपसंहियते मनोवृत्ताववस्थितायामित्यर्थः । कस्मात् । " दर्शनात् " । दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारो मनोवृत्तौ विद्यमानायाम् । न तु वाच एव वृत्तिमत्त्वा मनस्युपसंहारः केनचिदपि[४] द्रष्टुं शक्यते । ननु श्रुतिसामर्थ्याद्वाच एवायं मनस्यप्ययो युक्त इत्युक्तम् । नेत्याह । अतत्प्रकृतित्वात्[५] । यस्य हि यत उत्पत्तिस्तस्य तत्र प्रलयो न्याय्यो मृदीव शरावस्य । न च मनसो वागुत्पद्यत इति किंचन प्रमाणमस्ति । वृत्त्युद्भवाभिभवौ त्वप्रकृतिसमाश्रयावपि दृश्येते । पार्थिवेभ्यो हीन्धनेभ्यस्तैजसस्याग्नेर्वृत्तिरुद्भवत्यप्सु चोपशाम्यति ।

प्रकृतावेव विकारलय इति नियमाभावं प्राप्तमनूद्य सिद्धान्तसूत्रं पूरयित्वा पठति—एवमिति । अध्याहारमसहमानः शङ्कते—कथमिति । उत्तराधिकरणालोचनया विवक्षितमध्याहारं साधयति—सत्यमिति । वृत्तिमल्लयस्य वक्ष्यमाणत्वेऽपि प्रकृते किं ज्ञातं तदाह—तस्मादिति । विपक्षे दोषमाह—तत्त्वेति । तत्त्वस्य धर्मिणो वाचः प्रलयविवक्षायामिह तत्र चाविभागसाम्यात्परत्रैवाविभागविशेषणमयुक्तमित्यर्थः । विशेषणसामर्थ्यसिद्धमर्थमुपसंहरति—तस्मादिति । सूत्रस्याभीष्टमर्थं संक्षिपति—वागिति । सिद्धान्तहेतुं प्रश्नपूर्वकमवतार्य व्याचष्टे—कस्मादिति । वृत्तिमदुपसंहारेऽपि तुल्यं दर्शनमित्याशङ्क्य लौकिकमागमिकं वा तदिति विकल्प्याऽऽद्यं प्रत्याह—न त्विति । द्वितीयमालम्बते—नन्विति । आगमस्यापि दृष्टानुसारात्प्रकृतौ विकारलयोक्तिपरत्वाद्वाचश्च मनोविकारत्वाभावात्तत्र लयायोगाद्वृत्तिवृत्तिमतोरभेदधिया वाक्शब्दो वृत्तावेवेत्याह—नेत्याहेति । तदेव विवृणोति—यस्येति । वागपि तर्हि मनसो विकारोऽस्तु न मानाभावादित्याह—न चेति । वृत्तेरप्यतत्प्रकृतित्वात्कुतो मनसि लयस्तत्राऽऽह—वृत्तीति । दर्शनं विशदयति—पार्थिवेभ्य इति । श्रुतिलक्षणाविशये[१०] श्रुतिर्न्याय्येति ।

---

१ ङ. ञ. °त्येवमाचा°। २ क. °मेवम् । प° । ३ ङ. ज. ञ. ट. °वक्षितमिति । घ. °वक्ष्यती' । ४ ङ. ज. ञ. ट. °क्षायां वा° । ५ ङ. ञ. पूर्वमुप° । ६ ट. °चिद्द्रष्टुं । ७ ङ. ञ. लयो । ८ ख. °चनावि° । ९ ख. °मर्थ्यात्सिद्ध° । १० क. ख. °विषये ।

(मनसः प्राणे वृत्त्या प्रविलयः, अधि० २)

कथं तर्ह्यस्मिन्पक्षे शब्दो वाङ्मनसि संपद्यत इति । अत आह— " शब्दाच्च " इति । शब्दोऽप्यस्मत्पक्षेऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः ॥ १ ॥

अत एव च सर्वाण्यनु ॥ २ ॥ (१)

" तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः " [प्रश्न० ३-९] इत्यत्राविशेषेण सर्वेषामेवेन्द्रियाणां मनसि संपत्तिः श्रूयते । तत्रापि "अत एव" वाच इव चक्षुरादीनामपि सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात्तत्त्वप्रलयासंभवाच्छब्दोपपत्तेश्च वृत्तिद्वारेणैव सर्वाणीन्द्रियाणि मनोऽनुवर्तन्ते । सर्वेषां करणानां मनस्युपसंहाराविशेषे सति वाचः पृथग्ग्रहणं "वाङ्मनसि संपद्यते " [छा०६-८-६] इत्युदाहरणानुरोधेन ॥२॥ (१)

(मनसः प्राणे वृत्त्या प्रविलयः, अधि० २)

तन्मनः प्राण उत्तरात् ॥ ३ ॥ (२)

समधिगतमेतत् " वाङ्मनसि संपद्यते " [छा० ६-८-६] इत्यत्र वृत्तिसंपत्तिविवक्षेति । अथ यदुत्तरवाक्यम् " मनः प्राणे " [छा०६-८-६] इति, किमत्रापि वृत्तिसंपत्तिरेव

स्युक्तं स्मारयति—कथमिति । मुख्यार्थायोगादुपचारसिद्धिरिति सूत्रावयवमादाय व्याकरोति—अत इति ॥ १ ॥

वाचि दर्शितं न्यायं चक्षुरादिष्वतिदिशति—अत एवेति । यतः प्रकृतिविकारभावाभावान्न स्वरूपलयो वाचोऽपि तु वृत्तिलयोऽत एव सवृत्तिके मनसि सत्येव सर्वाणीन्द्रियाणि तदनुवर्तन्ते न तु तत्र स्वरूपेण लीयन्त इत्यर्थः । सूत्राक्षराणि व्याचष्टे—तस्मादिति । उत्क्रमणादूर्ध्वमिति यावत् । उपशान्तमौष्ण्यलिङ्गकं तेजोऽस्येति तथोक्तः । पुनर्भवं प्रतिपद्यत इति शेषः । तत्रापि सर्वाणीन्द्रियाणि वृत्तिद्वारेणैव मनोऽनुवर्तन्त इति संबन्धः । अत एवेत्युक्तं हेतुं सदृष्टान्तं स्पष्टयति—वाच इवेति । यद्यत्राविशेषेण सर्वेन्द्रियाणां मनसि वृत्त्युपसंहारो विवक्षितस्तर्हि किमित्याद्ये सूत्रे वाचः पृथग्ग्रहणं तत्राऽऽह—सर्वेषामिति ॥ २ ॥ (१)

इन्द्रियवृत्तिलयाधारस्य मनसो वृत्तिलयाधारं निरूपयति—तन्मन इति । वृत्तमनूद्याधिकरणस्य विषयमाह—समधिगतमिति । तस्मिन्नपि वाक्ये सवृत्तिकं मनोऽधिकृत्य व्युत्पत्तिद्वैविध्यसिद्धया संशयमाह—किमिति । पूर्ववाक्यं दृष्टान्तयितुमापि-

---

१ घ. ङ. ज. ञ. ठ. 'प्यस्मिन्पक्षे' । २ ट. 'न । वाङ्मनोधिकरणम् । त' । ३ ट 'थ तदु' । ४ क. ङ. ज. ञ. 'त्तरं वा' । ५ क. ख. ठ. ड. 'शितन्या' ।

विवक्ष्यत उत वृत्तिमत्संपत्तिरिति विचिकित्सायां वृत्तिमत्संपत्तिरेवात्रेति प्राप्तम् । श्रुत्यनुग्रहात्तत्प्रकृतिकत्वोपपत्तेश्च । तथा हि—"अन्नमयं हि सौम्य मन आपोमयः प्राणः"[छा०६-५-४] इत्यन्नयोनि मन आमनन्त्यब्योनिं च प्राणम् । आपश्चान्नमसृजन्तेति श्रुतिः [छा० ६-२-४] । अतश्च यन्मनः प्राणे प्रलीयतेऽन्नमेव तदप्सु प्रलीयतेऽद्भं हि मन आपश्च प्राणः प्रकृतिविकाराभेदादिति । एवं प्राप्ते ब्रूमः—तदप्यागृहीतबाह्येन्द्रियवृत्ति मनो वृत्तिद्वारेणैव प्राणे प्रलीयत इत्युत्तराद्वाक्यादवगन्तव्यम् । तथा हि सुषुप्तसोर्मुमूर्षोश्च प्राणवृत्तौ परिस्पन्दात्मिकायां मनोवृत्तीनामुपशमो दृश्यते। न च मनसः स्वरूपाप्ययः प्राणे संभवति अतत्प्रकृतित्वात् । ननु दर्शितं मनसः प्राणप्रकृतित्वम्। नैतत्सारम्। न हीदृशेन प्राणादिकेन तत्प्रकृतित्वेन मनः प्राणे संपत्तुमर्हति । एवमपि

शब्दः । अत्रापि पूर्ववत्पादादिसंगतिः । पूर्वपक्षे श्रुत्यर्थसिद्धिः । सिद्धान्ते तदयोगाल्लक्षणास्वीकरणमिति मन्वानो मनःशब्दश्रुत्या पूर्वपक्षयति—वृत्तीति । वाक्शब्दवन्मनःशब्दस्यौपचारिकत्वमाशङ्क्य बाधकाभावादत्र मुख्यार्थत्वमेवेत्याह—तदिति । प्राणप्रकृतिकत्वे मनसो न मानमित्याशङ्क्याऽऽह—तथा हीति । अन्नमनसोरप्प्राणयोश्च प्रकृतिविकृतिभावेऽपि कथं प्राणमनसोस्तथात्वं तत्राऽऽह—आपश्चेति । अबन्नयोः प्रकृतिविकृतिभावात्तत्कार्ययोरपि प्राणमनसोः प्रकृतितादात्म्यद्वारा प्रकृतिविकृतित्वसिद्धया प्राणे वृत्तिमतो मनसो लय इति फलितमाह—अतश्चेति । प्राणे लीयते मनः सवृत्तिकमिति प्राप्तमनूद्य सिद्धान्तसूत्रमवतार्य व्याकरोति—एवमिति । आगृहीताः सर्वतः स्वात्मन्युपसंहृता बाह्येन्द्रियाणां वृत्तयो येन तन्मनस्तथा । दर्शनादिति पूर्वोक्तयुक्तिमत्र हेतुत्वेन संगृह्णाति—तथा हीति । मनःशब्दश्रुत्या स्वरूपसंपत्तिरेवेति किं न स्यादित्याशङ्क्याऽऽह—न चेति । उक्तं स्मारयित्वा निरस्यति—नन्वित्यादिना । स्वकारणद्वारा विकारयोरन्योन्यं प्रकृतिविकारत्वे घटादेरपि शरावादिप्रकृतित्वप्रसक्तिरित्यसारत्वमेव साधयति—न हीति । प्राणादिककार्यकारणतोपगमेऽपि यो यस्य साक्षाद्विकारस्तत्रैव तस्य लयो युक्त इत्याह—एवमपीति । प्राणाकारपरिणतानामपां मनःसंस्थितान्नाकारेण परिणा-

---

१ ङ. ञ. °वक्षितोत । २ क. ङ. ज. ञ. ट. °तित्वो° । ३ क. सौम्य । ४ क. ज. °निं प्रा° । ५ क ङ. °दप्यगृ° । ६ ञ. °त्यात्मगृ° । ७ क. °स्पन्दनात्मि° । ८ ङ. ज. ञ. ट. °कायामवस्थितायां म° । ९ ङ. झ. प्रानादिकेन । ज. प्रणादिकेन । ञ. प्रणालिकेन । ट प्रनादिकेन । १० ख. °त्वे न म° । ११ ख. °सो मा° ।

(प्राणस्य जीवे लयानन्तरं पुनर्भूतेषु लयः, अधि० ३)

अग्ने मनः संपद्येताप्सु चान्नमप्स्वेव च प्राणः । न ह्येतस्मिन्नपि पक्षे प्राणभावपरिणताभ्योऽद्भ्यो मनो जायत इति किंचन प्रमाणमस्ति । तस्मान्न मनसः प्राणे स्वरूपाप्ययः । वृत्त्यप्ययेऽपि तु शब्दोऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादिति दर्शितम्[1] ॥ ३ ॥ (२)

(प्राणस्य जीवे लयानन्तरं पुनर्भूतेषु लयः, अधि० ३)

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

स्थितमेतद्यस्य यतो नोत्पत्तिस्तस्य तस्मिन्वृत्तिर्[3]लयो न स्वरूपप्रलय इति । इदमिदानीं प्राणस्तेजसीत्यत्र चिन्त्यते—किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः किंवा देहेन्द्रियपञ्जराध्यक्षे जीव इति । तत्र श्रुतेरनतिशङ्क्यत्वात्प्राणस्य तेजस्येव संपत्तिः स्यादश्रुतकल्पनाया अन्याय्यत्वादिति । एवं प्राप्ते प्रतिपद्यते—"सोऽध्यक्षे" इति । स प्रकृतः प्राणोऽध्यक्षेऽविद्याकर्मपूर्वप्रज्ञोपाधिके विज्ञानात्मन्यवतिष्ठते । तत्प्रधाना प्राणवृत्तिर्भवतीत्यर्थः । कुतः । "तदुपगमादिभ्यः" "एवमेवमात्मा-

---

मात्प्राणमनसोरपि साक्षात्प्रकृतिविकृतित्वमस्तीत्याशङ्क्याऽऽह—न ह्रीति । तयोः साक्षादप्रकृतिविकृतित्वे फलितमाह—तस्मादिति । कथं तर्हि मनःशब्दोपपत्तिरत्राऽऽह—वृत्तीति ॥ ३ ॥ (२)

यस्मिन्प्राणे मनसो वृत्तिलयस्तस्यापि वृत्तिलयाधारं निरूपयति—सोऽध्यक्ष इति । वक्ष्यमाणपूर्वपक्षोपयोगित्वेन वृत्तं कीर्तयति—स्थितमिति । संप्रति विषयोक्तिपूर्वकमुभयश्रुत्युपलब्धेः संशयमाह—इदमिति । पादादिसंगतयस्तु पूर्ववत् । फलभेदोऽपि तथेति स्वीकृत्य पूर्वपक्षयति—तत्रेति । प्राणस्य तेजःप्रकृतिकत्वाभावेऽपि तेजसि वृत्तिलयस्योक्तन्यायेन[6] शक्यशङ्क्यत्वात्तेजःशब्दस्य च भूतविशेषवाचिनो [7]जीवे प्रसिद्ध्यभावात्प्राणस्य जीवात्मन्युपगमनानुगमनावस्थानश्रुतीनां च तेजोद्वाराऽपि तस्मिन्नुपगमनादियोगादुपपत्तेस्तेजस्येव प्राणवृत्तिलय इत्यर्थः । सिद्धान्तसूत्रमादाय योजयति—एवमिति । परिशुद्धं चिद्धातुं व्यावर्तयति—अविद्येति । पूर्वोक्तन्यायेन स्वरूपलयं व्यवच्छिनत्ति—तदिति । प्रश्नपूर्वकं हेतूनवतारयति—कुत इति । तत्रोपगमनं श्रुतितो व्याकरोति—एवमिति । यथा राज्ञः प्रयाणाभिप्रायमात्रेण सर्वे

---

* विद्येत्येव च्छेदोयुक्तः, टीकायामपि विद्येत्येव प्रतीकं युक्तम् । तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेतिश्रुत्यनुरोधात् । रत्नप्रभाटीकानुसाराच्च ।

---

१ ज. ट. °व प्रा° । २ ठ. 'म् । मनोधिकरणम् । सो° । ३ क. ङ. ज. °तिप्रल° । ४ ट. इदा° । ५ ङ. °पठयते । ६ ठ. °येनाशङ्क्त्वा° । ङ. येनाशक्य° । ७ ठ. ङ. जीवप्र° ।

नमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति " [बृह० ४-३-३८] इति हि श्रुत्यन्तरमध्यक्षोपगामिनः सर्वान्प्राणानविशेषेण दर्शयति । विशेषेण च " तमुत्क्रामन्तं प्राणोऽनूत्क्रामति " [बृ० ४-४-२] इति पञ्चवृत्तेः प्राणस्याध्यक्षानुगामितां दर्शयति, तदनुवृत्तितां चेतरेषाम् " प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति " [बृ० ४-४-२] इति । " सविज्ञानो भवति " [बृ० ४-४-२] इति चाध्यक्षस्यान्तर्विज्ञानवत्त्वप्रदर्शनेन तस्मिन्नपीतकरणग्रामस्य प्राणस्यावस्थानं गमयति । ननु " प्राणस्तेजसि " [छा० ६-८ ६] इति श्रूयते कथं प्राणोऽध्यक्ष इत्यधिकारापः क्रियते । नैष दोषः । अध्यक्षप्रधानत्वादुत्क्रमणादिव्यवहारस्य श्रुत्यन्तरगतस्यापि[3] च विशेषस्यापेक्षणीयत्वात् ॥ ४ ॥

कथं तर्हि " प्राणस्तेजसि " इति श्रुतिरित्यत आह—

भूतेषु तच्छ्रुतेः ॥ ५ ॥

स प्राणसंपृक्तोऽध्यक्षस्तेजःसहचरितेषु " भूतेषु " देहबीजभूतेषु सूक्ष्मेष्ववतिष्ठत इत्यवगन्तव्यम्[6] । " प्राणस्तेजसि " इति

भृत्याः समागच्छन्त्येवमिति योजना । एतदिति क्रियाविशेषणम् । आदिशब्दगृहीतमनुगमनं श्रुत्या विशदयति—विशेषेणेति । आदिशब्दोपात्तमवस्थानमपि श्रुत्या व्याचष्टे—सविज्ञान इति । विज्ञायतेऽनेनेति विज्ञानं करणजातं तेन पञ्चवृत्तिप्राणसहितेन सह तिष्ठतीति यावत् । अव्यवधानेन तेजःप्राप्तिश्रुत्या विरोधं शङ्कते—नन्विति । उभयश्रुत्यनुग्रहाय जीवे प्रलीयते तेन सह प्राणस्य तेजसि लयः स्यादित्याह—नेत्यादिना ॥ ४ ॥

सूत्रान्तरमाकाङ्क्षापूर्वकमुत्थापयति—कथमिति । प्राणस्य जीवद्वारा तेजःसंपत्तिरिति सूत्रयोजनया दर्शयति—स इति । न च प्राणस्य तेजोद्वारा जीवसंपत्तिस्तेजसो भूतद्वयद्वारा परस्मिन्नेव संपत्तेरिष्टत्वात् । तेजोग्रहणेनोपलक्षितेषु भूतेषु जीवस्य प्राणेन सह लयः स्यादित्यभिप्रेत्याऽऽह—तेज इति । तेजःशब्देन भूतान्युपलक्षयितुं शक्यन्ते साहचर्यान्न जीवस्तदभावादतो न प्राणस्य जीवे लय इति शङ्कते—

---

१ ट. °ति च पं° । २ ट. °स्मिन्नापी° । ३ क. पि वि° । ४ अ. °तेष्वतः श्रुतेः । ५ ङ. अ. °संयुक्तो° । ६ क. °म् । तच्छ्रुतेः । प्रा° । ७ क. घ. ङ. ज. अ. ट. °सि " इत्यतः श्रु° । ८ क. ख. °मुपस्थाप° । ९ ङ. प्रलयः° । १० क. ख. °लक्षितुं ।

(प्राणस्य जीवे लयानन्तरं पुनर्भूतेषु लयः, अधि० ३)

श्रुतेः। ननु चेयं श्रुतिः प्राणस्य तेजसि स्थितिं दर्शयति न प्राणसंपृक्तस्याध्यक्षस्य। नैष दोषः। सोऽध्यक्ष इत्यध्यक्षस्याप्यन्तरालेऽप्युपसंख्यातत्वात्। योऽपि हि घ्नुघ्नान्मथुरां गत्वा मथुरायाः पाटलिपुत्रं व्रजति सोऽपि घ्नुघ्नात्पाटलिपुत्रं यातीति शक्यते वदितुम्। तस्मात्प्राणस्तेजसीति प्राणसंपृक्तस्याध्यक्षस्यैवैतत्तेजःसहचरितेषु भूतेष्ववस्थानम् ॥ ५ ॥

कथं तेजःसहचरितेषु भूतेष्वित्युच्यते यावतैकमेव तेजः श्रूयते प्राणस्तेजसीति। अत आह—

नैकस्मिन्दर्शयतो हि ॥ ६ ॥ (३)

"नैकस्मिन्" एव तेजसि शरीरान्तरेप्सावेलायां जीवोऽवतिष्ठते कार्यस्य शरीरस्यानेकात्मकत्वदर्शनात्। "दर्शयतश्च" एतमर्थं प्रश्नप्रतिवचने "आपः पुरुषवचसः" [छा० ५-३-३] इति। तद्व्याख्यातम् "त्र्यात्मकत्वात्तु भूयस्त्वात्" [ब्र०सू० ३-१-२] इत्यत्र। श्रुतिस्मृती चैतमर्थं दर्शयतः। श्रुतिः "पृथ्वीमय आपोमयो वायुमय आकाशमयस्तेजोमयः" [बृह० ४-४-५] इत्याद्या। स्मृतिरपि—

नन्विति। मानान्तरालोचनया जीवस्योपसंग्रहो न तेजःशब्देनेति परिहरति—नेत्यादिना। यदाऽपि प्राणोऽन्तराले जीवं प्राप्य पुनस्तेजः संपद्यते तदाऽपि प्राणस्तेजसीति श्रुतिरुपपन्नेत्येतद्दृष्टान्तेन साधयति—योऽपि हीति। श्रुत्यर्थमुक्तमुपसंहरति—तस्मादिति ॥ ५ ॥

सूत्रान्तरमवतारयितुं पृच्छति—कथमिति। लक्षणया भूतान्तराश्रयणमयुक्तं युक्त्यभावादिति भावः। युक्तिपरं सूत्रमवतारयति—अत इति। तत्र प्रतिज्ञां विभजते—नैकस्मिन्निति। स्थूलदेहस्य पञ्चात्मत्वदृष्टेस्तत्कारणं सूक्ष्मशरीरमपि पञ्चात्मकमनुमेयमित्युक्तेऽर्थे युक्तिमाह—कार्यस्येति। सूक्ष्मस्य पञ्चात्मकत्वे मानं ब्रुवाणः सूत्रावयवं व्याचष्टे—दर्शयतश्चेति। ननु देहान्तरप्रेप्सावेलायामद्भिरेव परिवेष्टितत्वं प्रश्नप्रतिवचनाभ्यामधिगम्यते न भूतसूक्ष्मपञ्चकपरिवेष्टितत्वं तत्राऽऽह—तादिति। सूत्रावयवस्यार्थान्तरमाह—श्रुतीति। अण्डयः सूक्ष्मा मीयन्त इति मात्राः प्राङ्मोक्षादविनाशिन्यो दशार्धानां पञ्चानां भूतानामित्यर्थः। जीवस्य भूताश्रयत्वं श्रुत्यन्तरविरुद्धमिति

---

१ ङ. ञ. 'संयुक्त'। २ ङ. ज. ञ. 'राल उप'। ३ ङ. ञ. 'संयुक्त'। ४ क. 'पृक्ताध्य'। ५ ट. 'रस्य प्रे'। ६ क. ङ. ज. ञ. ट. 'ति। एत'। ७ क. ङ. ज. ञ. 'पृथिवीम'। ८ ठ. ङ. जीवोप'।

"अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः।
ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः"

[मनुस्मृ० १-२७] इत्याद्या। ननु चोपसंहृतेषु वागादिषु करणेषु शरीरान्तरप्रेप्सावेलायाम् "क्वायं तदा पुरुषो भवति" [बृ० ३-२-१३] इत्युपक्रम्य श्रुत्यन्तरं कर्माश्रयतां निरूपयति "तौ ह यदूचतुः कर्म हैव तदूचतुः। अथ ह यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः" [बृ० ३-२-१३] इति। अत्रोच्यते— तत्र कर्मप्रयुक्तस्य ग्रहातिग्रहसंज्ञकस्येन्द्रियविषयात्मकस्य बन्धनस्य प्रवृत्तिरिति कर्माश्रयतोक्ता। इह पुनर्भूतोपादानादेहान्तरोत्पत्तिरिति भूताश्रयत्वमुक्तम्। प्रशंसाशब्दादपि तत्र प्राधान्यमात्रं कर्मणः प्रदर्शितं न त्वाश्रयान्तरं निवारितम्। तस्मादविरोधः॥ ६॥ (३)

(ज्ञान्यज्ञानिनोरुत्क्रान्तिसाम्यम्, अधि० ४)

समाना चाऽऽसृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७॥ (४)

सेयमुत्क्रान्तिः किं विद्वदविदुषोः समाना किं वा विशेषवतीति विशयानानां विशेषवतीति तावत्प्राप्तम्। भूताश्रयविशिष्टा ह्येषा पुनर्भवाय च भूतान्याश्रीयन्ते। न च विदुषः पुनर्भवः संभ-

---

शङ्कते—नन्विति। तौ याज्ञवल्क्यार्तभागौ। जीवाधारभूतकर्मणां बन्धप्रयोजकत्वेनाऽऽश्रयत्वं भूतानां देहोपादानत्वेनेत्यविरोधमाह—अत्रेति। कर्म हैवेत्यवधारणश्रुत्या वारितमाश्रयान्तरमित्याशङ्क्याऽऽह—प्रशंसेति। सोऽपि कर्मणां प्रकृष्टाश्रयत्वं वदन्निकृष्टाश्रयान्तरसत्त्वं सूचयतीत्यर्थः। कर्मणां भूतानां चाऽऽश्रयत्वसंभवे फलितमाह—तस्मादिति॥ ६॥ (३)

उक्तोत्क्रान्तेरपरविद्यान्वयमन्वाचष्टे—समाना चेति। उत्क्रान्तिर्विषयस्तत्र विद्ययाऽमृतमश्नुत इति श्रुतेरस्य सोम्य पुरुषस्येत्यविशेषश्रुतेश्च संशयमाह—सेयमिति। विशयानानां संदिहानानामित्यर्थः। श्रौतापरविद्यासु फलप्राप्त्युपयोगित्वेनोत्क्रान्त्यन्वयोक्त्या पादादिसंगतिः। पूर्वपक्षे विदुषो देहादनुत्क्रान्तस्य मोक्षसिद्धिः। सिद्धान्ते तस्यापीतरवत्तस्मादुत्क्रान्तेरप्रतिबन्धेन तत्सिद्धिरित्यङ्गीकृत्य विद्ययाऽमृतमश्नुत इति सगुणोपासकानामप्यमृतत्वफलावगमात्सगुणब्रह्मविदो नैवोत्क्रान्तिरिति पूर्वपक्षयति—विशेषेति। अविदुष एवोत्क्रान्तिरिति विशेषवत्त्वमेव दर्शयति—भूतेति। पूर्वपक्षमा-

---

१ ङ. ञ. ंति। तत्रो°। २ ट. °धः। अध्यक्षाधिकरणम्। सं°।

वति । अमृतत्वं हि विद्वानश्नुत इति स्थितिः । तस्मादविदुष एवैषोत्क्रान्तिः । ननु विद्याप्रकरणे समाम्नानाद्विदुष एवैषा भवेत् । न । स्वापादिवद्यथाप्राप्तानुकीर्तनात् । यथा हि " यत्रैतत्पुरुषः स्वपिति नामाशिशिषति नाम पिपासति नाम " [छान्दो० ६-८-१] इति च सर्वप्राणिसाधारणा एव स्वापादयोऽनुकीर्त्यन्ते विद्याप्रकरणेऽपि प्रतिपिपादयिषितवस्तुप्रतिपादनानुगुण्येन न तु विदुषो विशेषतो विधित्सयन्ते। एवमियमप्युत्क्रान्तिर्महाजनगतैवानुकीर्त्यते यस्यां परस्यां देवतायां पुरुषस्य प्रयतस्तेजः संपद्यते स आत्मा तत्त्वमसीत्येतत्प्रतिपादयितुम् । प्रतिषिद्धा चैषा विदुषः " न तस्य प्राणा उत्क्रामन्ति " [बृ० ४-४-६] इति । तस्मादविदुष एवैषेति । एवं प्राप्ते ब्रूमः— " समाना च " एषोत्क्रान्तिर्वाङ्मनसीत्याद्या विद्वदविदुषोः "आसृत्युपक्रमात्" भवितुमर्हति । अविशेषश्रवणात् । अविद्वान्देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहणमनुभवन्संसरति विद्वांस्तु ज्ञानप्रकाशितं मोक्षनाडीद्वारमाश्रयते । तदेतदासृत्युपक्रमादित्युक्तम् । नन्वमृतत्वं विदुषा प्राप्तव्यं न च तद्देशान्तरायत्तं तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वेति । अत्रो-

---

क्षिपति—नन्विति । वस्तुतत्त्वप्रतिपादनाय लोकसिद्धधर्माणामनूद्यमानत्वान्न प्रकरणं विद्वद्विषयमिति समाधत्ते—नेत्यादिना । दृष्टान्तं विवृणोति—यथेति । दार्ष्टान्तिकं विभजते—एवमिति । उत्क्रान्तेर्विद्वद्विषयत्वाभावे हेत्वन्तरमाह—प्रतिषिद्धेति । विशेषवत्त्वमुत्क्रान्तेरुक्तमुपसंहरति—तस्मादिति । सृतेर्मार्गस्योपक्रमादर्वाक्कर्मिणां सगुणोपासकानां च तुल्यैवोत्क्रान्तिरिति सिद्धान्तयति—एवमिति । अस्यं सोम्येत्याद्यविशेषश्रुतेर्विद्वदविदुषोः साधारणी चेदुत्क्रान्तिस्तर्हि तयोर्विशेषाभावाद्विद्यावैयर्थ्यं तत्राऽऽह—अविद्वानिति । अवाङ्नाडीभिरविद्वान्पितृलोकं लोकान्तरं वा स्वकर्मानुसारेण प्रतिपद्यते विद्वान्पुनर्मूर्धन्यया नाड्या ब्रह्मलोकमिति विशेषस्तयोरित्यर्थः । सृतिः सरणं देवयानो मार्गस्तदुपक्रमात्तुल्योत्क्रान्तिरित्युक्तेऽर्थे सूत्रावयवं पातयति—तदेतदिति । अवशिष्टसूत्रावयवव्यावर्त्यां शङ्कामाह—नन्विति । सूत्रावयवमुत्तरत्वेनावतार्य व्याकरोति—अत्रेति । मनसैतान्कामान्पश्यन्रमते स एकधा भवतीत्यादिश्रुतेरर्चिरादि-

---

१ ङ. ञ. श्रुतिः । २ क. ङ. ज. ञ. °षवन्तो वि° । ३ ङ. विधीयन्ते । ४ ट. °यमुत्का° । ५ क. ङ. ज. ञ. °सीति प्र° । ६ क. ज. ञ. ट. °षः । तस्मा° । ७ ङ. ज ञ. ट. °भवितुं संस° ८ ङ. ञ. मोक्षं ना° । ९ क. °स्य सौम्ये° ।

(तेजःप्रभृतीनां भूतानां परमात्मनि वृत्त्या लयः, अधि० ५)

च्यते—"अनुपोष्य" चेदमदग्ध्वाऽत्यन्तमविद्यादीन्क्लेशानपरविद्यासामर्थ्यादापेक्षिकममृतत्वं प्रेप्सते[1] संभवति तत्र मृत्युपक्रमो भूताश्रयत्वं च। न हि निराश्रयाणां प्राणानां[2] गतिरुपपद्यते। तस्माददोषः ॥ ७ ॥ (४)

(तेजःप्रभृतीनां भूतानां परमात्मनि वृत्त्या लयः, अधि० ५)

तदाऽपीतेः संसारव्यपदेशात् ॥ ८ ॥

"तेजः परस्यां देवतायाम्" [छा० ६-८-६] इत्यत्र प्रकरणसामर्थ्यात्तद्यथाप्रकृतं तेजः साध्यक्षं सप्राणं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां संपद्यत इत्येतदुक्तं भवति। कीदृशी पुनरियं संपत्तिः स्यादिति चिन्त्यते। तत्राऽऽत्यन्तिक एव तावत्स्वरूपप्रविलय इति प्राप्तम्। तत्प्रकृतित्वोपपत्तेः। सर्वस्य हि जनिमतो वस्तुजातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितम्[3]। तस्मादात्यन्तिकीयमविभागापत्तिरिति। एवं प्राप्ते ब्रूमः—"तत्" तेजआदि भूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतम् "आऽपीतेः" आ संसारमोक्षात्सम्यग्ज्ञाननिमित्तादवतिष्ठते,

"योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्"

मार्गगमनेन[4] सेन्द्रियस्य फलभोगप्रतिपादनादिन्द्रियाणां[5] च निराश्रयाणां गमनायोगाज्जीवस्यापि तदाश्रयभूताश्रयस्य गतिरवगतेत्याह[6]—न हीति। अपरविद्यास्वमृतत्वमापेक्षिकमिति स्थिते तत्रोत्क्रान्त्यन्वयो युक्त इत्युपसंहरति—तस्मादिति ॥ ७ ॥ (४)

उक्तोत्क्रान्तिकाले या सत्संपत्तिस्तत्स्वरूपं निरूपयति—तदाऽपीतेरिति। उदाहरणवाक्यस्यार्थोक्तिपूर्वकमधिकरणस्य विषयं दर्शयति—तेज इति। बीजभावावशेषां सत्संपत्तिं सिद्धवत्कृत्य विदुषोऽप्युत्क्रान्तिरुक्ता संप्रति संपत्तेरुभयथादृष्टेरात्यन्तिकी सत्संपत्तिरनात्यन्तिकी वेति संशयमाह—कीदृशीति। उत्क्रान्तिकालीनसत्संपत्तेः श्रुतायाः सावशेषत्वसाधनात्पादादिसंगतिः। पूर्वपक्षे देहादुत्क्रान्तस्यापुनरावृत्तिः सिद्धान्ते तस्यापि ज्ञानहीनस्य पुनरावृत्तिरिति विवक्षित्वा पूर्वपक्षयति—तत्रेति। पूर्वोक्तात्प्रकृतित्वहेतोरभावादिति हेतुमाह—तत्प्रकृतित्वेति। उपपत्तिमेव दर्शयति—सर्वस्येति। विमता सत्संपत्तिरात्यन्तिक्यनन्तकालीनसत्संपत्तित्वाद्ब्रह्मविदः सत्संपत्तिवदित्युपसंहरति—तस्मादिति। सिद्धान्तसूत्रमादाय व्याकुर्वन्नुक्तानुमानस्य श्रुतिविरोधमाह—एवमिति। उत्क्रान्तिकालीनसत्संपत्तेरात्यन्तिकत्वे दोषान्तरमाह—

---

१ क. ङ. ञ. प्रेप्स्यते। २ ज. ट. प्राणिनां। ३ ट. °तिष्ठित°। ४ क. °मार्गागः। ५ ञ. °मनस्येन्द्रि°। ६ क. ख. ञ. °तेरित्या°।

(तेजःप्रभृतीनां भूतानां परमात्मनि वृत्त्या लयः, अधि० ५)

[कठ० ५-७] इत्यादिसंसारव्यपदेशात् । अन्यथा हि सर्वः प्रायणसमय एवोपाधिप्रत्यस्तमयादत्यन्तं ब्रह्म संपद्येत । तत्र विधिशास्त्रमनर्थकं स्याद्विद्याशास्त्रं च । मिथ्याज्ञाननिमित्तश्च बन्धो न सम्यग्ज्ञानादृते विस्रंसितुमर्हति । तस्मात्तत्प्रकृतित्वेऽपि सुषुप्तिप्रलयवद्बीजभावावशेषैवैषा सत्संपत्तिरिति ॥ ८ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

तच्चेतरभूतसहितं तेजो जीवस्यास्माच्छरीरात्प्रवसत आश्रयभूतं स्वरूपतः प्रमाणतश्च सूक्ष्मं भवितुमर्हति । तथा हि नाडीनिष्क्रमणश्रवणादिभ्योऽस्य सौक्ष्म्यमुपलभ्यते । तत्र तनुत्वात्संचारोपपत्तिः । स्वच्छत्वाच्चाप्रतीघातोपपत्तिः । अत एवं च देहान्निर्गच्छत्पार्श्वस्थैर्नोपलभ्यते ॥ ९ ॥

नोपमर्दनातः ॥ १० ॥

अत एवं सूक्ष्मत्वान्नास्य स्थूलस्य शरीरस्योपमर्दन दाहादिनिमित्तेनेतरत्सूक्ष्मं शरीरमुपमृद्यते ॥ १० ॥

अन्यथेति । इष्टापत्तिमाशङ्क्य देहान्तरभोगाय कर्मविध्यनुपपत्तिरित्यनुमानस्य बाधकान्तरमाह—तत्रेति । ज्ञानविध्यनुपपत्त्याऽपि बाधितमनुमानमिति मत्वा ब्रूते—विद्येति । युक्तितोऽपि बाधितं तदित्याह—मिथ्येति । निदाननाशातिरेकेण निदानिनाशो नाऽऽत्यन्तिको युक्त इत्यर्थः । यत्तु तत्प्रकृतित्वोपपत्तेरिति तत्राऽऽह—तस्मादिति । श्रुतार्थापत्तियुक्तिविरोधस्तच्छब्दार्थः ॥ ८ ॥

ननु यद्या संसारविमोक्षात्तेजआदिभूतसूक्ष्ममुक्तलक्षणमवतिष्ठते किमिति तर्हि देहान्निर्गच्छदस्माभिर्नोपलभ्यते किमिति वा मूर्तान्तरैर्न प्रतिहन्यते तत्राऽऽह-सूक्ष्ममिति । स्वरूपसौक्ष्म्यसमुच्चयार्थश्चकार इत्यङ्गीकृत्य व्याचष्टे—तच्चेति । उपलब्धेरित्येतद्व्याकरोति—तथा हीति । परिमाणतः सौक्ष्म्याङ्गीकारे लाभं दर्शयति—तत्रेति । स्वरूपतस्तदङ्गीकारे लाभमाह—स्वच्छत्वादिति । उभयविधत्वादेवानुपलब्धिरपि सिद्धेत्याह—अत इति ॥ ९ ॥

सौक्ष्म्यकृतं लाभान्तरमाह—नोपमर्देनेति । तदेव विवृणोति—अत एवेति ॥१०॥

---

१ ज. °र्वैः प्रयाण° । २ ङ. ञ. °सुप्तिप्र° । ३ क. °मल° । ४ क. ङ. ज. ञ. °पत्तिः ॥८॥ सू° । ५ क. घ. ज. ञ. ट. °तः परिमा° । ६ ट. नाडिभिः क्रम° । ७ झ. ट. °प्रतिघा° । ८ ट. °व दे° । ९ क. ङ. ज. ञ. °च्छन्पार्श्व° । १० क. ङ. ज. ञ. °व च सू° । ११ ङ. ञ. ट. °लश° । १२ ङ. ञ. °त्सूक्ष्मश° । १३ क. ख. झ. ठ. °स्तस्माच्छ° ।

(देहादेव प्राणोत्क्रान्तेर्निषेधः, अधि० ६)

अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥ (५)

" अस्यैव च " सूक्ष्मस्य शरीरस्य " एष ऊष्मा " यमेतस्मिञ्छरीरे संस्पर्शेनोष्माणं विजानन्ति । तथा हि मृतावस्थायामवस्थितेऽपि देहे विद्यमानेष्वपि च रूपादिषु देहगुणेषु नोष्मोपलभ्यते जीवदवस्थायामेव तूपलभ्यत इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तंव्यपाश्रय एवैष ऊष्मेति । तथा च श्रुतिः " उष्ण एव जीविष्यञ्शीतो मरिष्यन् " [शत० ८-७-२-११] इति ॥ ११ ॥ (५)

(देहादेव प्राणोत्क्रान्तेर्निषेधः, अधि० ६)

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥

" अमृतत्वं चानुपोष्य " [सू० ४-२-७] इत्यतो विशेषणादात्यन्तिकेऽमृतत्वे गत्युत्क्रान्त्योरभावोऽभ्युपगतः । तत्रापि केनचित्कारणेनोत्क्रान्तिमाशङ्क्य प्रतिषेधति "अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो भवति न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति " [बृ० ४-४-६] इत्यतः परविद्याविषयात्प्रतिषेधान्न परब्रह्मविदो देहात्प्राणानामुत्क्रान्ति-

---

सूक्ष्मदेहसद्भावे मानमौष्ण्यलिङ्गकमनुमानमपीत्याह—अस्यैवेति । सूत्रं विवृण्वन्ननुमानमेव स्फोरयति—अस्येति । औष्ण्यस्य सूक्ष्मदेहे व्यभिचारमाशङ्क्योपपत्तेरिति योजयति—तथा हीति । अन्वयव्यतिरेकाभ्यां स्थूलशरीरातिरिक्तं स्वाश्रयमूष्मा गमयतीत्युक्तम् । इदानीमागमोऽपि सूक्ष्मदेहधर्मत्वमस्य सूचयतीत्याह—तथा चेति॥११॥(५)

उत्क्रान्तिकालीनसत्संपत्तेः सावशेषत्वमुक्तम् । संप्रत्युत्क्रान्तेर्निर्गुणब्रह्मवेदिष्वभावमाह—प्रतिषेधादिति । व्यवहितेन संबन्धं दर्शयन्नधिकरणस्य तात्पर्यमाह—अमृतत्वं चेति । परब्रह्मविदं विषयत्वेनोदाहरति—अथेति । मुक्तिप्रकरणोपक्रमार्थोऽथशब्दः । बाह्यविषयवैतृष्ण्यमकामत्वम् । आन्तरकामवासनाराहित्यं निष्कामत्वम् । प्राप्तपरमानन्दत्वमाप्तकामत्वम् । सर्वात्मैकत्वदर्शित्वमात्मकामत्वम् । उत्तरमुत्तरं पूर्वस्य पूर्वस्य निमित्तमेवमकामयमानो ब्रह्मविदत्र श्रुतोऽस्तीत्यर्थः । तस्य किमुत्क्रान्तिरस्ति किंवा नास्तीति पञ्चमीषष्ठीश्रुतिभ्यां संदेहे परब्रह्मविदो मुख्यामृतत्वे गत्युत्क्रान्त्यो-

---

१ ट. °तमस्मिं । २ ङ. ञ. 'स्मिञ्जीवच्छरी' । ३ क. घ. ङ. ज. ञ. ट. °नोष्मिमानं वि° । ४ क. विजानाति । ५ ज. °पि रू° । ६ ट. नोप° । ७ ट. 'ववद° । ८ ज. ट. °स्थायां तू° । ९ ज. 'भ्यतेऽत । १० ट. °क्तशरीरव्य' । ११ ङ. एवैष जी° । १२ ट. °ति । संसाराधिकरणम् । प्र° । १३ क. ङ. ज. ञ. °मो न । १४ क ख. 'देहव्य' । १५ ञ. °स्य नि° । १६ क. ख. °त्क्रान्तेर° ।

(देवादेव प्राणोत्क्रान्तेर्निषेधः, अधि० ६)

रस्तीति चेत्। नेत्युच्यते। यतः शारीरादात्मन एष उत्क्रान्तिप्रतिषेधः प्राणानां न शरीरात्। कथमवगम्यते, " न तस्मात्प्राणा उत्क्रामन्ति " [बृह० माध्य० ४-४८] इति शाखान्तरे पञ्चमीप्रयोगात्। संबन्धसामान्यविषया हि षष्ठी शाखान्तरगतया पञ्चम्या संबन्धविशेषे व्यवस्थाप्यते। " तस्मात् " इति च प्राधान्यादभ्युदयनिःश्रेयसाधिकृतो देही संबध्यते न देहः। न तस्मादुच्चिक्रमिषोर्जीवात्प्राणा अपक्रामन्ति सहैव तेन भवन्तीत्यर्थः ॥ १२ ॥

सप्राणस्य च प्रवसतो भवत्युत्क्रान्तिर्देहादिति। एवं प्राप्ते प्रत्युच्यते—

स्पष्टो ह्येकेषाम् ॥ १३ ॥

नैतदस्ति, यदुक्तं परब्रह्मविदोऽपि देहादस्त्युत्क्रान्तिरुत्क्रान्तिप्रतिषेधस्य देहापादानत्वादिति। यतो देहापादान एवोत्क्रान्तिप्रतिषेधः "एकेषां" समाम्नातॄणां स्पष्ट उपलभ्यते। तथा ह्यार्त-

---

रभावोक्तेरत्र प्रासङ्गिकी पादादिसंगतिः। पूर्वपक्षे निषेधस्यान्यविषयत्वाद्विदुषोऽविदुषश्चाविशेषः। सिद्धान्ते शाखाद्वयेऽपि देहापादानोत्क्रान्तिनिषेधाद्विशेषसिद्धिरित्यभिप्रेत्य सिद्धान्तिनो मतनिराकरणेन पूर्वपक्षी स्वमतमाह—**नेत्यादिना**। न तस्य प्राणा उत्क्रामन्तीति विदुषो देहादेवोत्क्रान्तिर्निषिध्यते न शारीरादिति शङ्कते—**कथमिति**। माध्यंदिनश्रुत्या प्रत्याह—**न तस्मादिति**। शारीरादुत्क्रान्तिनिषेधे का गतिः षष्ठीश्रुतेरित्याशङ्क्य पञ्चम्यन्तमाध्यंदिनश्रुत्या षष्ठ्यन्तकाण्वश्रुतिः संबन्धसामान्यविषयापादानरूपसंबन्धविशेषे व्यवस्थापनीयेत्याह—**संबन्धेति**। माध्यंदिनश्रुतावपि तस्मादिति शरीरमेव परामृश्यतामित्याशङ्क्याऽऽह—**तस्मादिति चेति**। कस्तर्हि वाक्यार्थः स्यादित्यपेक्षायामाह—**न तस्मादिति** ॥ १२ ॥

तथाऽपि प्रकृते किमायातमित्याशङ्क्य सप्राणस्य क्षेत्रज्ञस्य शरीरादुत्क्रान्तिः सिद्धेत्याह—**सप्राणस्येति**। परब्रह्मविदोऽपि गत्युत्क्रान्ती स्तामिति प्राप्तमनूद्य सिद्धान्तयति—**एवमिति**। सूत्रं हेतुत्वेन व्याख्यातुं बहिरेव प्रतिज्ञामाह—**नैतदिति**। तत्र हेतुतया सूत्रं योजयति—**यत इति**। उपलम्भमभिनयति— **तथा हीति**। उद-

---

[1] क. °ष्टी सा शा°। २ ट. °ति प्रा°। ३ ङ. ज. ञ. उत्क्रामन्ति। ४ ट. °न संभ°। ५ ज. झ. °स्य प्र°। ६ क. ङ. ज. ञ. °त्क्रान्तिः प्र°। ७ ठ. °था ह्यार्त°। ८ झ. °त्वादविदुषो विदुष°। ९ ख. °नत्वरू°।

भागप्रश्ने " यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो नेति " [बृ० ३-२-११] इत्यत्र " नेति होवाच याज्ञवल्क्यः " [बृ० ३-२-११] इत्युत्क्रान्तिपक्षं परिगृह्य न तर्ह्ययमनुत्क्रान्तेषु प्राणेषु मृत इत्यस्यामाशङ्कायामत्रैव समवनीयन्त इति प्रविलयं प्राणानां प्रतिज्ञाय तत्सिद्धये " स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते " [बृ० ३-२-११] इति सशब्दपरामृष्टस्य प्रकृतस्योत्क्रान्त्यवधेरुच्छ्वयनादीनि समामनन्ति। देहस्य चैतानि स्युर्न देहिनः । तत्सामान्यात् " न तस्मात्प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते " [बृह० माध्य० ४-४-८] इत्यत्राप्यभेदोपचारेण देहापादानस्यैवोत्क्रमणस्य प्रतिषेधः । यद्यपि प्राधान्यं देहिन इति व्याख्येयं येषां पञ्चमीपाठः । येषां तु षष्ठीपाठस्तेषां विद्वत्संबन्धिन्युत्क्रान्तिः प्रतिषिध्यत इति प्राप्तोत्क्रान्तिप्रतिषेधार्थत्वादस्य वाक्यस्य देहापादानैव सा प्रतिषिद्धा

स्मात्प्राणा उत्क्रामन्तीत्यत्रोत्क्रान्त्यवधिमत्त्वमस्मादित्युक्तं सशब्देन परामृश्योच्छ्वयनादिधर्मोक्तेर्यस्योच्छ्वयनाध्माने तस्यैवोत्क्रान्त्यवधित्वं देहस्येत्यर्थः । अथोच्छ्वयनादिधर्मजातं देहिनोऽस्तु तेन तस्यैवोत्क्रान्त्यवधित्वं नेत्याह—देहस्येति । काण्वश्रुतौ निषिध्यमानोत्क्रान्तेर्देहापादानत्वेऽपि माध्यंदिनश्रुतौ देहिन एव तदपादानत्वं तस्यैव प्राधान्यादित्याशङ्क्याऽऽह—तादिति । विद्याप्रकरणत्वसामान्याद्ब्रह्मविदो देहापादानोत्क्रान्तिनिषेधः शाखाद्वयेऽपि तुल्य इत्यर्थः । तच्छब्देन सर्वनाम्ना देहिनः प्रधानतया परामृष्टत्वात्कुतोऽत्र देहधीरित्याशङ्क्याऽऽह—अभेदेति । प्राधान्याद्देहिनस्तच्छब्दार्हत्वेऽपि देहदेहिनोरभेदोपचाराद्देहिपरामर्शिसर्वनाम्ना देहस्यैव परामर्शात्तस्मादेवोत्क्रान्तिरत्र निषिद्धेति पञ्चमीपाठे व्याख्येयमित्यर्थः । माध्यंदिनपाठस्य सिद्धान्तानुगुण्यमुक्त्वा काण्वपाठस्यापि तदानुगुण्यमाह—येषां त्विति। न तस्येत्यादावपादानापेक्षायां चक्षुष्टो वा मूर्ध्नो वेति देहांशानामुत्क्रान्त्यपादानत्वेन प्रकृतानामिह संबन्धात्प्राप्तोत्क्रान्तिनिषेधपरत्वाच्च वाक्यस्य न तस्य प्राणा देहांशेभ्यः सकाशादुत्क्रामन्तीतिवाक्यविपरिणामादन्यथा वाऽप्राप्तनिषेधापातात्संबन्धसामान्यार्थषष्ठ्याश्च प्राणेन रक्षन्प्राणमय इत्यादिकर्तृकरणोपाध्युपहितत्वप्रकृतसंबन्धविशेषपर्यवसानादन्यशाखास्थापादानसंबन्धविशेषापेक्षाभावात्तस्य करणोपाधिभूताः प्राणा देहावयवेभ्यो नोत्क्रामन्तीति वाक्यार्थः

---

१ ङ. म. 'यते तद' । २ घ. ङ. झ. ञ. 'त्प्राणा उत्क्राम' । ३ क. ग. 'होत्विनेति । ४ ङ. म. इत्युत्का' । ५ ङ. ञ. 'वलीय' । ६ ङ. म 'वलीय' । ७ क. ख. देहिनां । ८ क. ख. 'रामर्शात्कु' । ९ क. ठ. ड. 'था चाप्रा' ।

(देहादेव प्राणोत्क्रान्तेर्निषेधः, अधि० ६)

भवति देहादुत्क्रान्तिः प्राप्ता न देहिनः । अपि च "चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" [बृ० ४-४-२] इत्येवमविद्वद्विषयं समपञ्चमुत्क्रमणं संसारगमनं च दर्शयित्वा " इति नु कामयमानः " [बृ० ४-४-६] इत्युपसंहृत्याविद्वत्कथाम् " अथाकामयमानः " [बृ० ४-४-६] इति व्यपदिश्य विद्वांसं[२] यदि तद्विषयेऽप्युत्क्रान्तिमेव प्रापयेदसमञ्जस एव व्यपदेशः स्यात् । तस्मादविद्वद्विषये प्राप्तयोर्गत्युत्क्रान्त्योर्विद्वद्विषये प्रतिषेध इत्येवमेव व्याख्येयं व्यपदेशार्थवत्त्वाय । न च ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य प्रक्षीणकामकर्मण उत्क्रान्तिर्गतिर्वोपपद्यते निमित्ताभावात् । " अत्र ब्रह्म समश्नुते " [बृ० ४-४-८] इति चैवंजातीयकाः श्रुतयो गत्युत्क्रान्त्योरभावं सूचयन्ति ॥ १३ ॥

स्मर्यते च ॥ १४ ॥ (६)

स्मर्यतेऽपि च महाभारते[१२-२७०-२२]गत्युत्क्रान्त्योरभावः—

" सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः ।
देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः "

इति । ननु गतिरपि ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य स्मर्यते " शुकः किल वैयासकिर्मुमुक्षुरादित्यमण्डलमभिप्रतस्थे

स्यादित्यर्थः । इतश्च विद्वदुत्क्रान्तिनिषेधपरं वाक्यमित्याह—अपि चेति । व्यपदेशसामर्थ्यसिद्धमुपसंहरति—तस्मादिति । न केवलं मानाभावादेव गत्युत्क्रान्त्यभावः किंतु युक्त्यभावादपीत्याह—न चेति[६] । उपपत्त्यभावे हेतुमाह—निमित्तेति । गमनस्य कर्मकरणादिकारकासंभवादित्यर्थः । तयोः सत्त्वे मानं नास्तीत्युक्तं तदसत्त्वे मानमस्तीत्याह—अत्रेति ॥ १३ ॥

" नोत्क्रामन्ति मुनेः प्राणा व्यापी सर्वगतो हि सः ।
तेन व्याप्तमिदं सर्वं कुत उत्क्रम्य यास्यति "

इतिस्मृतेरपि ब्रह्मविदो नोत्क्रान्तिर्गतिर्वेत्याह—स्मर्यते चेति । सूत्रं व्याचष्टे—स्मर्यतेऽपीति । अपदस्य प्राप्यपदशून्यस्य ब्रह्मविदः पदैषिणो देवा अपि मार्गं मुह्यन्ति मार्गं न जानन्ति तदभावादिति योजना । स्मृत्यन्तरविरोधं शङ्कते—नन्विति ।

---

१ क. ज. °षये स° । ङ. ञ. °षयेषु स° २ झ. °दिशति वि° । ३ झ. °सं त° । ४ क. ज. ञ. °दः स्म° । ५ ख. °मर्थात्सिद्ध° । ६ ङ. °ति । तदुपपत्त्य° । ७ क. ख. ठ. ङ. °त्युक्त्वा त° ।

(तत्त्वज्ञानिनो वागादीनां परमात्मनि लयः, अधि० ७)

पित्रा चानुगम्याऽऽहूतो भो इति प्रतिशुश्राव " इति । न । सशरीरस्यैवायं योगबलेन विशिष्टदेशप्राप्तिपूर्वकः शरीरोत्सर्ग इति द्रष्टव्यम् । सर्वभूतदृश्यत्वाद्युपन्यासात् । न ह्यशरीरं गच्छन्तं सर्वभूतानि द्रष्टुं शक्नुयुः । तथा च तत्रैवोपसंहृतम्—

" शुकस्तु मारुताच्छीघ्रां गतिं कृत्वाऽन्तरिक्षगः ।
दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवत् "

इति । तस्मादभावः परब्रह्मविदो गत्युत्क्रान्त्योः । गतिश्रुतीनां तु विषयमुपरिष्टाद्व्याख्यास्यामः ॥ १४ ॥ (६)

(तत्त्वज्ञानिनो वागादीनां परमात्मनि लयः, अधि० ७)

तानि परे तथा ह्याह ॥ १५ ॥ (७)

तानि पुनः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनि प्रलीयन्ते । कस्मात् । तथा ह्याह श्रुतिः " एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषा-

---

अपरविद्याबलेनैषा गतिरित्याह—नेति । तत्र नियामकमाह—सर्वेति । आदिशब्देनानुगमनादि गृह्यते[२] । तथाऽपि कथं सशरीरस्य गतिस्तत्राऽऽह—न हीति । उक्तेऽर्थे वाक्यशेषमनुकूलयति—तथा चेति । स्मृत्यनुग्रहलब्धमर्थमुपसंहरति—तस्मादिति । तयोर्ध्वमायन्नमृतत्वमेति स एनान्ब्रह्म गमयतीत्यादिगतिश्रुतीनां तर्हि का गतिस्तत्राऽऽह—गतीति ॥ १४ ॥ (६)

परब्रह्मविदो ब्रह्मणि परस्मिन्प्राणानां प्रलयो दर्शितस्तदयुक्तं तेषां पृथिव्यादिषु लयश्रवणादित्याशङ्क्याऽऽह—तानीति । विद्वत्कलाप्रविलयो विषयः स किं पृथिव्यादिषु किंवा परस्मिन्नात्मनीति श्रुतिद्वयोपलब्धेः संदेहे श्रौतविद्याफलभूतकलाविलयो ब्रह्मण्येवेत्युक्त्या पादादिसंगतिः । पूर्वपक्षे प्रकृतावेव विकृतिलयसिद्धिः । सिद्धान्ते व्यवहारतस्तथात्वेऽपि तत्त्वतो ब्रह्मणि कलाविलयोपपत्तिरिति मन्वानः सिद्धान्तमाह—तानीति । उक्तार्थे प्रश्नपूर्वकं हेतुमाह—कस्मादिति । यथा नद्यः समुद्रं प्राप्य प्रलीयन्त[६] एवमेवास्य जीवस्य परितः समन्तात्सर्वतोऽनवच्छिन्नप्रत्यग्ब्रह्म द्रष्टुरिमाः स्वानुभवगम्याः प्राणश्रद्धाद्याः षोडशसंख्याकाः कलाः पुरुषायणास्तदाश्रयास्तमेव पुरुषं प्राप्य बाह्यविषयासङ्गत्यागेन तस्मिन्निष्ठाय विलयमासादयन्तीति

---

१ ट °मः । गत्युत्क्रान्तिप्रतिषेधाधिकरणम् । ता° । २ क. ख. झ. °ते । तेन त° । ३ क. ख. ठ. ड. एतान्ब्र° । ४ ख. झ. °लब्धे सं° । ५ क. ख. ठ. ड. उक्तेऽर्थे । ६ क. ख. लीयन्त ।

(तत्त्वविदो वागादीनां निःशेषेण परमात्मनि लयः, अधि० ८)

यणाः पुरुषं प्राप्यास्तं[1] गच्छन्ति " [प्रश्न० ६-५] इति । ननु " गताः कलाः पञ्चदश प्रतिष्ठाः " [मुण्ड० ३-२-७] इति विद्वद्विषयैवापरा श्रुतिः परस्मादात्मनोऽन्यत्रापि[2] कलानां प्रलयमाह स्म। न सा खलु व्यवहारापेक्षा पार्थिवाद्याः कलाः[3] पृथिव्यादीरेव स्वप्रकृतीरपियन्तीति । इतरा तु विद्वत्प्रतिपत्त्यपेक्षा कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव संपद्यत इति । तस्माददोषः[4] ॥ १५ ॥ (७)

(तत्त्वविदो वागादीनां निःशेषेण परमात्मनि लयः अधि० ८)

अविभागो वचनात् ॥ १६ ॥ (८)

स पुनर्विदुषः कलाप्रलयः किमितरेषामिव सावशेषो भवत्याहोस्विन्निरवशेष इति । तत्र प्रलयसामान्याच्छक्त्यवशेषतामपसक्तौ ब्रवीति—अविभागापत्तिरेवेति । कुतः । " वचनात् " । तथा हि कलाप्रलयमुक्त्वा वक्ति " भिद्येते चाऽऽसां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति " [प्रश्न० ६-५]

श्रुत्यर्थः । अस्याधिकरणस्य पूर्वपक्षमाह—नन्विति । मनःप्राणयोरेकीकरणेन कलानां पञ्चदशत्वं, प्रतिष्ठाशब्देन पृथिव्यादीनि तत्त्वानि कलाकारणान्युच्यन्ते । तथाच प्रकृतावेव विकारलय इतिन्यायानुगृहीतश्रुत्या भूतेषु विद्वत्कलाविलय इत्यर्थः । वस्तुस्थित्या परस्मिन्नात्मनि कलालयेऽपि व्यवहारदृष्ट्या पृथिव्यादिषु तदुक्तिरविरुद्धा तेषु विलीयतैः सह परस्मिन्नात्मनि कलानां विलयसिद्धेश्च श्रुतिद्वयमविरुद्धमित्याह—न सा खल्विति । विद्वदविद्वद्दृष्ट्या श्रुतिद्वये प्रवृत्ते फलितमाह—तस्मादिति ॥ १५ ॥ (७)

पृथिव्यादिद्वारा ब्रह्मण्युक्तस्य विद्वत्कलाविलयस्य निरवशेषत्वमाह—अविभाग इति । प्रकृतमेव विद्वत्कलाविलयमधिकृत्य लयस्योभयथादृष्ट्या संशयमाह—स पुनरिति । अत्र श्रौतधीफलभूतविद्वत्कलाविलयस्य निरवशेषत्वनिरूपणात्पादादिसंगतिः । पूर्वपक्षे मोक्षासिद्धिः । सिद्धान्ते तत्सिद्धिरित्युपेत्य पूर्वपक्षयति—तत्रेति । विदुषो ब्रह्मणि कलाविलयः सावशेषो ब्रह्मणि कलाविलयत्वादुत्क्रान्तिकालीनकलाविलयवदित्यर्थः । श्रुतियुक्तिविरुद्धमनुमानमिति सिद्धान्तयति—ब्रवीतीति । तत्र श्रुतिविरोधं प्रश्नद्वारा दर्शयति—कुत इति । नदीसमुद्रन्यायेन पुरुषे कला विलीयन्ते तासां च कलानां नामरूपे शक्त्यात्मके अपि भिद्येते विदीर्येते पुरुषमात्रमवशिष्यते स च विद्वानकलः कलाविरहितः सन्नमृतो भवति पूर्णरूपेण तिष्ठतीत्यर्थः । श्रुतिविरोधमनुमानस्यो-

---

१ क. °स्तं यन्ति । २ क. °रमात्मं । ३ झ. कलास्ताः पृ° । ४ ट. °षः । परे लयाधिकरणम् । अ° । ५ ङ. ञ. तासां ।

इति । अविद्यानिमित्तानां च कलानां न विद्यानिमित्ते प्रलये सावशेषत्वोपपत्तिः । तस्मादविभागं एवेति ॥ १६ ॥ (८)

(उपासकस्योत्क्रान्तेर्विशेषवत्त्वम्, अधि० ९)

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥ (९)

समाप्ता प्रासङ्गिकी परविद्यागता चिन्ता । संप्रति त्वपरविद्याविषयामेव चिन्तामनुवर्तयति । " समाना चाऽऽसृत्युपक्रमात् " [सू० ४-२-७] विद्वदविदुषोरुत्क्रान्तिरित्युक्तं, तामिदानीं सृत्युपक्रमं दर्शयति । तस्योपसंहृतवागादिकलापस्योच्चिक्रमिषतो विज्ञानात्मन ओक आयतनं हृदयम् " स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति " [बृह० ४-४-१] इति श्रुतेः । तदग्रप्रज्वलनपूर्विका चक्षुरादिस्थानापादाना चोत्क्रान्तिः श्रूयते " तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः " [बृ० ४-४-२] इति । सा किमनियमेन विद्वदविदुषोर्भवत्यथास्ति कश्चिद्विदुषो विशेषनि-

---

क्त्वा युक्तिविरोधमाह—अविद्येति । अनुमाननिरासफलमुपसंहरति—तस्मादिति ॥ १६ ॥ (८)

विद्वत्कलानां वचनादविभागापत्तिवदपरब्रह्मविदामपि चक्षुष्टो वा मूर्ध्नो वेत्यविशेषवचनाश्रया कयाचिन्नाड्या प्राणनिष्क्रमणमिति प्राप्ते प्रत्याह—तदोकोग्रज्वलनमिति । वृत्तानुवादपूर्वकमुत्तराधिकरणानां तात्पर्यमाह—समाप्तेति । संप्रत्यस्याधिकरणस्य वृत्तमनूद्य तात्पर्यमाह—समाना चेति । सूत्रभागव्याख्याद्वाराऽधिकरणस्य विषयमाह—तस्येति । हृदयमायतनमित्यत्र मानमाह—स इति । अस्तु हृदयं जीवस्याऽऽलम्बनं तथाऽपि किं स्यादित्याशङ्क्योक्तम्—तदग्रेति । अदृष्टाक्षिसं प्रतिपत्तव्यज्ञानं प्रद्योतः । चक्षुष्टो वेतिद्वारानियमश्रुतेस्तयोर्ध्वमायन्नमृतत्वमेतीतिविशेषश्रुतेश्च संशयमाह—सा किमिति । उपासकानुपासकयोरनियमेन येन केनचिद्वारे-

---

१ क. ङ. ज. ञ ट. 'षतोप' । २ क. ज. 'ग इति । ३ ट. 'गतर्चि' । ४ ज. 'त्युत्क्रमि' । ५ क. तदिदा' । ६ ङ. ञ. ठ. 'प्रज्व' । ७ ङ. ञ. 'लनं तत्पूर्वि' । ८ क. ङ. ज. ञ. 'मेनैव वि' । ९ ञ. 'श्चिदविदु' । १० ठ. ङ. 'ख्या नि' । ११ ञ. 'त्यधि' । १२ क. ख. 'त्र प्रमाणमाह । १३ ख. 'क्षिसप्र' ।

(उपासकस्योत्क्रान्तेर्विशेषवत्त्वम्, अधि० ९)

यम इति विचिकित्सायां श्रुत्यविशेषादनियमप्राप्तावाचष्टे । समानेऽपि हि विद्वदविदुषोर्हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारे च मूर्धस्थानादेव विद्वान्निष्क्रामति स्थानान्तरेभ्यस्त्वितरे । कुतः । " विद्यासामर्थ्यात् " । यदि विद्वानपीतरवद्यतः कुतश्चिद्देहदेशादुत्क्रामेन्नैवोत्कृष्टं लोकं लभेत । तत्रानर्थिकैव विद्या स्यात् । " तच्छेषगत्यनुस्मृतियोगाच्च " । विद्याशेषभूता च मूर्धन्यनाडीसंबद्धा गतिरनुशीलयितव्या विद्याविशेषेषु विहिता तामभ्यस्यंस्तैयैव प्रतिष्ठत इति युक्तम् । तस्माद्धृदयालयेन ब्रह्मणोपासितेनानुगृहीतस्तद्भावं समापन्नो विद्वान्मूर्धन्ययैव शतादतिरिक्तयैकशततम्या नाड्या निष्क्रामतीतराभिरितरे । तथा हि हार्दविद्यां प्रकृत्य समामनन्ति—

" शतं चैका च हृदयस्य नाड्य-
स्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्ङन्या उत्क्रमणे भवन्ति "

[छा० ८-६-६] इति ॥ १७ ॥ (९)

णोत्क्रान्तिरथ वोपासकानामस्ति द्वारनियम इति विमर्शार्थः । अत्र चापरब्रह्मविदां फलार्थोत्क्रान्तेर्द्वारनियमोक्त्या पादादिसंगतिः । पूर्वपक्षे ध्यानकृतातिशयशून्यत्वं सिद्धान्ते तत्कृतातिशयसिद्धिरिति सिद्धवत्कृत्य पूर्वपक्षमाह—श्रुतीति । चक्षुष्टो वेत्याद्यविशेषश्रुतेर्यतः कुतश्चिदङ्गादुत्क्रामतीति प्राप्तमनूद्य सिद्धान्तमाह—आचष्ट इति । तेन प्रद्योतेन प्रकाशितद्वारवत्त्वे चोत्क्रान्तेरिति शेषः । तस्य विदुषोऽविदुषश्चोत्क्रमिषोरोको हृदयमायतनं तस्याग्रज्वलनं प्रद्योतसंज्ञितमादौ भवति तेन प्रकाशितद्वारो विद्वानविद्वांश्चोत्क्रान्तो यद्यपीष्यते तथाऽपि तयोरुत्क्रान्त्यपादानव्यवस्थायां हेतुं पृच्छति—कुत इति । तत्र सौत्रं हेतुमवतार्य व्यतिरेकद्वारा विवृणोति—विद्येति । स्थानान्तरेभ्योऽपि निष्क्रामन्नुत्कृष्टं फलमाप्नुयादित्याशङ्क्य सूत्रावयवं व्याचष्टे—तच्छेषेति । स्थानान्तरेभ्यो निर्गच्छतामपि विशिष्टलोकासौ विशिष्टगतिचिन्तनविधानवैयर्थ्यं स्यादित्यर्थः । फलितोक्तिपरत्वेनावशिष्टं सूत्रभागं व्याचष्टे—तस्मादिति । उक्तव्यवस्थायां श्रुतिमाह—तथा हीति ॥ १७ ॥ (९)

---

१ क. ङ. ज. ञ. ट. °द्वारत्वे च । २ क. °त्कृष्टलो°। ३ ज. ट. °बन्धा ग°। ४ ट. °स्तथैव। ५ ङ. ञ. °णा समुपा°। ६ क. ङ. ञ. °द्भावमा°। ७ घ. °ताति°। ८ ङ. ञ. °तमया ना°। ९ ट. °ति । विद्यासामर्थ्याधिकरणम् । र°। १० क. ख. °त्क्रान्तौ य°। ११ क. °त्कृष्टफ°।

(निशायामपि मृतानां रश्मिप्राप्तिः, अधि० १०)

रश्म्यनुसारी ॥ १८ ॥

अस्ति[1] हार्दविद्या " अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म[2] " [छा० ८-१-१] इत्युपक्रम्य विहिता । तत्प्रक्रियायाम् " अथ या एता हृदयस्य नाड्यः " [छा० ८-६-१] इत्युपक्रम्य सप्रपञ्चं नाडीरश्मिसंबन्धमुक्त्वोक्तम् " अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथै[3]तैरेव रश्मिभिरूर्ध्वमाक्रमते " [छा० ८-६-५] इति । पुनश्चोक्तम्— " तयोर्ध्वमायन्नमृतत्वमेति " [छा० ८-६-६] इति । तस्माच्छताधिकया नाड्या निष्क्रामन् " रश्म्यनुसारी " इति गम्यते । तत्किमविशेषेणैवाहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वमाहोस्विदहन्येवेति संशये सत्यविशेषश्रवणादविशेषेणैव तावद्रश्म्यनुसारीति प्रतिज्ञायते॥१८॥

निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १९ ॥ (१०)

अस्त्यहनि नाडीरश्मिसंबन्ध इत्यहनि मृतस्य स्याद्रश्म्यनुसारित्वं[4] रात्रौ तु प्रेतस्य न स्यात्[5]। नाडीरश्मिसंबन्धविच्छेदादिति चेन्न । नाडीरश्मिसंबन्धस्य " यावद्देहभावित्वात् " । यावद्देह-

---

नाडीद्वारा निष्क्रान्तस्य यदिदं रश्म्यनुसारित्वं तन्निशायामपि तुल्यमि—त्याह **रश्मीति** । प्रकरणशोधनपूर्वकं विषयमाह—**अस्तीति** । प्रथमोऽथशब्दो दहरविद्योपक्रमार्थो द्वितीयो रश्मिनाडीसंबन्धप्रदर्शनप्रारम्भार्थस्तृतीयस्त्वारब्धकर्मवासनानन्तर्यार्थः । एतदिति क्रियाविशेषणम् । चतुर्थोऽथशब्दस्तदेत्यर्थः । यत्रेति कालस्योक्तत्वात्प्रकरणशुद्धिलब्धं निगमयति—**तस्मादिति** । मूर्धन्यनाड्या निर्गच्छतः सगुणब्रह्मविदो रश्म्यनुसारित्वं किमहन्येव किं वाऽहनि रात्रौ चेति रश्मिनाडीयोगस्य कालविशेषाश्रुते रात्रौ रश्म्यभावावगमाच्च संशयमाह—**तदिति** । अत्र चापरब्रह्मविदां फलाप्तये ब्रह्मनाड्या गच्छतां रश्म्यनुसारित्वस्याविशेषवादात्पादादिसंगतिः । पूर्वपक्षे रात्रौ प्रेतानामहरागमनमपेक्ष्य फलप्राप्तिः । सिद्धान्ते स यावत्क्षिप्येदित्यादिश्रुतेस्तदैव तत्प्राप्तिरित्युपेत्यं सिद्धान्तं प्रतिजानीते—**अविशेषेति** ॥ १८ ॥

सूत्रावयवेन पूर्वपक्षयित्वा तदवयवेन परिहरति—**निशीति** । तत्र पूर्वपक्षं विवृणोति—**अस्तीति** । सिद्धान्तमवतार्य व्याचष्टे—**नेत्यादिना** । शिरा नाड्यः ।

---

१ ङ. ज. ञ. ट. 'स्ति दहरोऽस्मिन्नन्तराकाश इति हा' । २ क. 'श्म दहरोऽस्मिन्नन्तराकाश इत्यु' । ३ ट. 'त्यथ तै' । ४ ङ. ज. ञ. ट. 'री निष्क्रामतीति । ५ झ. ट. 'त्रौ म्रि'। ६ ट. 'त्रौ प्रे' । ७ क. ख. 'त्यर्थे । य' । ८ क. ख. झ. ल 'सूत्रेण सि' ।

(निशायामपि मृतानां रश्मिप्राप्तिः, अधि० १०)

भावी हि शिराकिरणसंपर्कः " दर्शयति च " एतमर्थं श्रुतिः " अमुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः " [छा० ८-६-२] इति। निदाघसमये च निशास्वपि किरणानुवृत्तिरुपलभ्यते प्रतापादिकार्यदर्शनात्। स्तोकानुवृत्तेस्तु दुर्लक्ष्यत्वमृत्वन्तरेरज-नीषु शैशिरेष्विव दुर्दिनेषु। अहरेवैतद्रात्रौ दधातीति चैतदेव दर्शयति। यदि च रात्रौ प्रेतो विनैव रश्म्यनुसारेणोर्ध्वमाक्र-मेत रश्म्यनुसारानर्थक्यं भवेत्। न ह्येतद्विशिष्यार्धीयते यो दिवा प्रैति स रश्मीनपेक्ष्योर्ध्वमाक्रमते यस्तु रात्रौ सोऽनपेक्ष्यैवेति। अथ तु विद्वानपि रात्रिप्रायणापराधमात्रेण नोर्ध्वमाक्रमेत पाक्षिकफला विद्येत्यप्रवृत्तिरेव तस्यां स्यात्। मृत्युकालानियमात्। अथापि रात्रावुपरतोऽहरागमं प्रतीक्षेत। अहरागमेऽप्यस्य कदाचिदरश्मि-

---

नाडीरश्मिसंबन्धस्य यावद्देहभावित्वे प्रमाणोक्तिपरं सूत्रभागमादाय विभजते—दर्शय-तीति। प्रतायन्ते विस्तीर्यन्ते सृप्ता गताः। नाडीरश्मिसंबन्धस्य श्रौतत्वेऽपि कुतो यावद्देहभावित्वमित्याशङ्क्य युक्तिं दर्शयति—निदाघेति। चन्द्रगतप्रकाशान्यथानुप-पत्त्या रात्रावस्ति सूर्यरश्मिरिति वक्तुमादिपदम्। न हि चन्द्रमस एव प्रकाशस्त-स्याम्मयत्वात्तदयोगात्। तर्हि शिशिरादिष्वपि रात्रिषु किरणानुवृत्तिरुपलभ्येतेत्याश-ङ्क्याऽऽह—स्तोकेति। यद्रात्रौ तापो दृश्यते तदहरेव रात्रौ सविता दधातीति धारणाभिधानं स्तोकरश्म्यनुवृत्त्यभिप्रायमित्युक्तेऽर्थे श्रुत्यन्तरमाह—अहरेवेति। स यार्वत्क्षिप्येन्मनस्तावदादित्यं गच्छतीति नैरपेक्ष्यश्रुते रात्रौ प्रेतस्य न रश्म्यपेक्षेत्या-शङ्क्याऽऽह—यदीति। दिवामरणविषयमेतदित्याशङ्क्याऽऽह—न हीति। तर्हि रश्म्यनुसारित्वश्रुतेरर्थवत्त्वाय विदुषो रात्रौ प्रेतस्य फलसंबन्धो नास्ति तत्राऽऽह—अथ त्विति। नित्यवत्फलसंबन्धितया विद्याया विधानान्न पाक्षिकफलतेत्यर्थः। तर्हि विदुषो मरणमहन्येवेति नियमादुक्तदोषनिवृत्तिस्तत्राऽऽह—मृत्युकालेति। रात्रौ मृतस्यापि तर्हि सूर्योदयपर्यन्तप्रतीक्षा स्यात्तत्राऽऽह—अथापीति। आदिशब्देन गर्तादि गृह्यते। यावत्तावदुपबन्धेन नैरपेक्ष्यश्रुतिविरोधाच्च न प्रतीक्षाकल्पनेत्याह—

---

१ ट. °न्तरे रज°। २ ङ. ञ. ट. °त्रौ विद°। ३ ट. °ष्यामिधी°। ४ ङ. ज. ञ. °र्ध्वं आक्र°। ५ क. ङ. ज. ञ. °गममुदीक्षे°। ६ झ. ठ. ड. °त्रमा°। ७ क. ख. °श्यत एव त°। ८ क. ख. °वत्तर्हि क्षिप्ये°। ९ ठ. ड. °बन्धेन विद्या°।

(दक्षिणायनमृतोपासकस्य ज्ञानफलप्राप्तिः, अधि० ११)

संबन्धार्हं शरीरं स्यात्पावकादिसंपर्कात् । " स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति " [छा० ८-६-५] इति च श्रुतिरनुदीक्षां दर्शयति । तस्मात्तदविशेषेणैवेदं रात्रिंदिवं रश्म्यनुसारित्वम् ॥ १९ ॥ (१०)

(दक्षिणायनमृतोपासकस्य ज्ञानफलप्राप्तिः, अधि० ११)

अतश्चायनेऽपि दक्षिणे ॥ २० ॥

अत एव चोदीक्षानुपपत्तेरपाक्षिकफलत्वाच्च विद्याया अनियतकालत्वाच्च मृत्योर्दक्षिणायनेऽपि म्रियमाणो विद्वान्प्राप्नोत्येव विद्याफलम् । उत्तरायणमरणप्राशस्त्यप्रसिद्धेर्भीष्मस्य च प्रतीक्षादर्शनात् । " आपूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान् " [छा० ५-१०-१] इति च श्रुतेरपेक्षितव्यमुत्तरायणमितीमामाशङ्कामनेन सूत्रेणापनुदति । प्राशस्त्यप्रसिद्धिरविद्वद्विषया । भीष्मस्य प्रतिपालनमाचारप्रतिपालनार्थं पितृप्रसादल-

---

स यावदिति । अपरविद्याविदो रश्म्यनुसारित्वस्याविशेषमुपसंहरति—तस्मादिति ॥ १९ ॥ (१०)

पूर्वाभिरेव युक्तिभी रात्राविव दक्षिणायनेऽपि मृतस्य फलाप्तिरविशिष्टेत्याह—अतश्चेति । दक्षिणायने मृतो विद्वान्विषयः स किं विद्याफलं नाऽऽप्नोत्युताऽऽप्नोतीत्युत्तरायणमरणप्राशस्त्यप्रसिद्धेर्नित्यवत्फलसंबन्धेन विद्याया विधानाच्च संदेहे दक्षिणायनेऽपि मृतस्य ब्रह्मविदो विद्याफलमवश्यंभावीति साधनात्पादादिसंगतिः । पूर्वपक्षे दक्षिणायने मृतस्य फलाभावादुत्तरायणमरणार्थं प्रयतितव्यम् । सिद्धान्ते हेत्वसिद्धेस्तादृक्प्रयत्नो नातीव फलवानित्यभिप्रेत्य सिद्धान्तमाह—अत इति । पूर्वाधिकरणन्यायेन सिद्धान्तमुक्त्वा पूर्वपक्षमाह—उत्तरायणेति । श्रुतिस्मृतिप्रसिद्धिभ्यो दक्षिणायने मृतस्य विदुषो नास्ति फलाप्तिरिति पूर्वपक्षमनूद्य सिद्धान्तमाह—इतीमामिति । अपनोदप्रकारमाह—प्राशस्त्येति । यत्तु भीष्मस्य प्रतीक्षादर्शनादिति तत्राऽऽह—भीष्मस्येति । उत्तरायणमरणं प्रशस्तमित्यविदुषामभिज्ञाभिर्वचनरूपो व्यवहारस्तत्पालनद्वारा सदाचारे तान्प्रवर्तयितुं तस्य कालप्रतीक्षणमित्यर्थः । तत्प्रतिपालनस्य गत्यन्तरमाह—पितृप्रेति । उत्तरायणस्य मार्गपर्वत्वेनापेक्षणीयत्वं श्रुतमित्युक्तं तत्कुतो दक्षिणायने मृतो विद्वान्विद्या-

---

१ क. ङ. ज. ञ. °स्मादं । २ ट. °म् । रश्म्यधिकरणम् । अ° । ३ क. ङ. ञ. एवोदी° । ४ क. °पि च म्रि° । ५ ङ. ञ. °स्य तूत्तरायणप्र° । ६ क. ङ. ञ. रपरिपा° । ७ ठ. ड. °रविदो । ८ क. द्विभ्यां द° । ९ क. फलप्राप्ति° । १० ठ. ड. °ज्ञाव° ११ क. ख. ठ. ड. °वदन° ।

(दक्षिणायनमृतोपासकस्य ज्ञानफलप्राप्तिः, अधि ११)

व्यस्वच्छन्दमृत्युताख्यापनार्थं च । श्रुतेस्त्वर्थं वक्ष्यति " आतिवाहिकास्तल्लिङ्गात् " [ब्र० सू० ४-३-४] इति ॥ २० ॥

ननु च—

" यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ "

[भ० गी० ८-२३] इति कालप्राधान्येनोपक्रम्याहरादिकालविशेषः स्मृतावनावृत्तये नियतः कथं रात्रौ दक्षिणायने वा प्रयातोऽनावृत्तिं यायादिति । अत्रोच्यते—

योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥ २१ ॥ (११)

" योगिनः प्रति च " अयमहरादिकालविनियोगोऽनावृत्तये " स्मर्यते " । " स्मार्ते चैते " योगसांख्ये न श्रौते । अतो विषयभेदात्प्रमाणविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य श्रौतेषु विज्ञानेष्ववतारः । ननु—

" अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् "

[भ०गी०८-२४-२५] इति च श्रौतावेतौ[3] देवयानपितृयाणौ

फलमाप्नुयादित्याशङ्क्याऽऽह—श्रुतेस्त्विति । न हि कालवादिनी श्रुतिः किं त्वातिवाहिकदेवतार्थेत्यर्थः ॥ २० ॥

काल एवात्र प्राधान्येनोच्यते नाऽऽतिवाहिकी देवतेति स्मृतिमाश्रित्य शङ्कते—नन्विति । तदुत्तरत्वेन सूत्रमवतारयति—अत्रेति । स्मार्तमुपासनं प्रत्ययं कालभेदविनियोगः स्मार्तोऽभ्युपगम्यते प्रत्यासत्तेरिति व्याचष्टे—योगिन इति । योगी दहराद्युपासक एव किं न स्यात्तत्राऽऽह—स्मार्ते चेति । नित्यमग्निहोत्रादीश्वराराधनरूपेण यदनुष्ठीयते स योगः "अनाश्रितः कर्मफलम्" इत्यादिस्मृतेः । इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारणापूर्वकोऽकर्तृत्वानुभवः सांख्यमिति भेदः । श्रौतदहराद्युपास्तीनां स्मृत्यविषयत्वे फलितमाह—अत इति । श्रुतिस्मृत्योर्भिन्नार्थत्वं प्रत्यभिज्ञाविरुद्धमिति शङ्कते—नन्विति । कालभेदविधिपरत्वमङ्गीकृत्य विषयव्यवस्थोक्ता प्रत्य-

---

१ ङ ञ. 'ति प्रा' । २ क. वा प्रेष्यत्वना' । ज. वा मृतोऽना' । ३ ङ. ज. 'वेव दे' । ४ ट. 'यानौ प्र' । ५ क. 'श्रित्याऽऽश' ।

प्रत्यभिज्ञायेते स्मृतावपीति । उच्यते—" तं कालं वक्ष्यामि "
[भ० गी० ८-२३] इति स्मृतौ कालप्रतिज्ञानाद्विरोधमाशङ्क्य
परिहार उक्तः । यदा पुनः स्मृतावप्यग्न्याद्या देवता एवाऽऽ-
तिवाहिक्यो गृह्यन्ते तदा न कश्चिद्विरोध इति ॥ २१ ॥ (११)
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवतः कृतौ शारीरक-
मीमांसाभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः ॥ २ ॥

अथ चतुर्थाध्यायस्य तृतीयः पादः ।

सगुणब्रह्मविदो मृतस्योत्तरमार्गाभिगमनम् ।

(अर्चिरादिकस्य ब्रह्मलोकमार्गस्यैकत्वम् , अधि० १)

अर्चिरादिना तत्प्रथितेः ॥ १ ॥ (१)

आसृत्युपक्रमात्समानोत्क्रान्तिरित्युक्तम् । स्मृतिस्तु श्रुत्यन्तरे-

---

भिज्ञानेन कालाभिधानद्वारा देवतोक्तौ श्रुतिस्मृत्योरेकार्थत्वमेवेति कुतो विरोधशङ्के-
त्याह—उच्यत इति । तदेवं दक्षिणायने मृतस्यापि विदुषो विद्याफलमवश्यंभावी-
त्यधिकरणार्थमुपसंहर्तुमितीत्युक्तम् ॥ २१ ॥ (११)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदान-
न्दज्ञानविरचिते शारीरकभाष्यविभागे न्यायनिर्णये चतु-
र्थाध्यायस्य द्वितीयः पादः ॥ २ ॥

अपरविद्याफलाय देवयानं पन्थानमवतारयितुं तदङ्गभूतोत्क्रान्तिश्चिन्तिता । संप्र-
त्यङ्गिनं पन्थानमेव वक्तुं पादान्तरमारभ्यते । तत्र पूर्वाधिकरणे प्रायणकालानियमाद्वि-
द्याफलस्य चाऽऽवश्यकत्वात्प्रतीक्षणस्य चायुक्तेर्दक्षिणायनेऽपि मृतस्य विदुषो विद्या-
फलाप्तिरस्तीत्युक्तम् । प्रायणकालवत्प्रयतो गतिरनियतेत्याशङ्क्य परिहरति—अर्चि-
रादिनेति । वृत्तमनूद्य प्रकृतोत्तरमार्गमधिकरणस्य विषयत्वेनोदाहरति—आसृतीति ।

---

१ ङ. ञ. 'शङ्कयायं प' । २ क. ज. झ. ट. 'हिन्यो गृ' । ३ क. ख. 'न्तिरुक्ता । सं' ।
४ क. ख. 'ङ्गिनमेव प' । ५ क. ख. 'न्थानं वक्तुं ।

(अर्चिरादिकस्य ब्रह्मलोकमार्गस्यैकत्वम्, अधि० १)

ष्वनेकधा श्रूयते नाडीरश्मिसंबन्धेनैका " अथैतैरेव रश्मिभि-रूर्ध्व आक्रमते " [छा० ८-६-५] इति । अर्चिरादिकैका " तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः " [छा ५-१०-१] इति । " स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति " [कौषी० १-३] इत्यन्या । " यदा वै पुरुषोऽस्माल्लोका-त्प्रैति स वायुमागच्छति " [बृ० ५-१०-१] इत्यपरा । " सूर्यद्वारेण ते विरजाः प्रयान्ति " [मुण्ड० १-२-११] इति चापरा । तत्र संशयः—किं परस्परं भिन्ना एताः सृतयः किं वैकैवानेकविशेषणेति । तत्र प्राप्तं तावद्भिन्ना एताः सृतय इति । भिन्नप्रकरणत्वात् । भिन्नोपासनशेषत्वाच्च । अपि च " अथैतै-रेव रश्मिभिः " [छा० ८-६-५] इत्यवधारणमर्चिराद्यपेक्षा-यामुपरुध्येत । त्वरावचनं च पीड्येत " स यावत्क्षिप्येन्मनस्ता-वदादित्यं गच्छति " [छा० ८-६-५] इति । तस्मादन्योन्य-भिन्ना एवैते पन्थान इति ।

एवं प्राप्तेऽभिदध्महे—" अर्चिरादिना " इति । सर्वो ब्रह्म

श्रुत्यन्तरेषु भिन्नासु सृतिष्विति यावत् । संशयहेतुं श्रुतिविप्रतिपत्तिं वक्तुमनेकधेत्युक्तम् । अथेत्युक्रान्त्यानन्तर्योक्तिः । विरजा विरजसो रजःशब्दितब्रह्मलोकाप्तिविरोधिविधुरा इति यावत् । उक्तं देवयानं पन्थानमधिकृत्य श्रुतिविप्रतिपत्तिं सूचितां हेतूकृत्य संशयमाह—तत्रेति । अत्रापरविद्याफलाप्तिहेतुमार्गैक्योक्त्या पादादिसंगतिः । पूर्वपक्षे मार्गबहुत्वे विकल्पः सिद्धान्ते तदैक्ये विकल्पशङ्कैव नेत्यङ्गीकृत्य पूर्वपक्षयति—तत्रेति । सृतीनां मिथो भिन्नत्वे हेतुमाह—भिन्नेति । नानाप्रकरणस्थत्वेऽपि विद्याव-देकत्वं किं न स्यात्तत्राऽऽह—भिन्नेति । प्रतिप्रकरणं विद्याभेदाद्गतिभेदानामपि तद्गु-णत्वेन चिन्त्यानां गुणिभेदाद्भेदः स्यादित्यर्थः । गतिभेदे हेत्वन्तरमाह—अपि चेति । किंच वक्राध्वना गतिमपेक्ष्यावक्रेण गतिस्त्वरावती कल्प्यत एकत्वे तु किमपेक्ष्य त्वरा स्यात्तस्माद्गतिभेदसिद्धिरित्याह—त्वरेति । मार्गभेदे केनाध्वना ब्रह्मलोकाप्तिरित्याश-ङ्क्य समुच्चयायोगाद्ब्रीह्यादिवद्विकल्पः स्यादिति मत्वाऽऽह—तस्मादिति ।

उपास्तिभेदेषूपास्यब्रह्मैक्यवद्गुणभूतगत्यैक्यसिद्धेरर्चिरादिरेकैव गतिरित्याह—एव-मिति । तत्र प्रतिज्ञां विभजते—सर्व इति । नानाविधाध्वसु श्रुतेषु कारणमवधारणे

---

१ क. ट. °कविधा । २ क. ज. ट. 'र्चिरभि' । ३ ज. झ. ट. °स्परभि° । ४ क. ङ. ञ. ट. एवैताः । ५ ङ. ज. 'णस्थितत्वा° । ६ क. च संपी° । ७ क. ख. झ. °कविधे° । ८ ङ. °यानप° । ९ क. कल्पत ।

प्रेप्सुरर्चिरादिनैवाध्वना रंहतीति प्रतिजानीमहे । कुतः । "तत्प्रथितेः" । प्रथितो ह्येष मार्गः सर्वेषां विदुषाम् । तथा हि पञ्चाग्निविद्याप्रकरणे "ये चामी अरण्ये श्रद्धां सत्यमुपासते" [बृ० ६-२-१५] इति विद्यान्तरशीलिनामप्यर्चिरादिका स्मृतिः श्राव्यते । स्यादेतत् । यासु विद्यासु न काचिद्गतिरुच्यते तासु स्वयमर्चिरादिकोपतिष्ठतां, यासु त्वन्या श्राव्यते तासु किमित्यर्चिराद्याश्रयणमिति । अत्रोच्यते–भवेदेतदेवं, यद्यत्यन्ताभिन्ना एवैताः स्मृतयः स्युः । एकैव त्वेषा स्मृतिरनेकविशेषणा ब्रह्मलोकप्रापदनी क्वचित्केनचिद्विशेषणेनोपलक्षितेति वदामः । सर्वत्रैकदेशप्रत्यभिज्ञानादितरेतरविशेषणविशेष्यभावोपपत्तेः । प्रकरणभेदेऽपि हि विद्यैकत्वे भवतीतरेतरविशेषणोपसंहारवद्गतिविशेषणानामप्युपसंहारः । विद्याभेदेऽपि तु गत्येकदेशप्रत्यभिज्ञानाद्गन्तव्याभेदाच्च गत्यभेद एव । तथा हि "ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति" [बृ० ६-२-१५] "तस्मिन्वसंति शा-

---

वक्तव्यमिति पृच्छति—कुत इति । हेतुमवतार्य व्याचष्टे—तदिति । पञ्चाग्निविदामेव तेऽर्चिषमभिसंभवन्तीत्यर्चिरादिगतेः श्रुतत्वात्कुतः सर्वेषामिति विशेषणं तत्राऽऽह—तथा हीति । साधारणश्रुतेरश्रुतगतिकधीविषयत्वाद्विद्यान्तराणां स्वाधिकारस्थमतिनिरपेक्षाणां नार्चिरादिगतिसंगतिरिति शङ्कते—स्यादिति । एकत्वेऽपि पथोऽनेकपर्वयुक्तत्वयोगाद्गतेरेव न भेदो गौरवादित्याह—अत्रेति । एकदेशप्रत्यभिज्ञानादपि गतेरैक्यं सर्वत्रेत्याह—सर्वत्रेति । यत्तु भिन्नप्रकरणत्वाद्भिन्ना गतय इति तत्र प्रकरणभेदमात्रादेव गतिभेदो विद्याभेदाद्वा नाऽऽद्य इत्याह—प्रकरणेति । नं हि द्वितीय इत्याह—विद्येति । तद्भेदेऽपि वेद्यब्रह्मैक्यवदुपभूतगत्यैक्यमविरुद्धमित्यर्थः । गन्तव्याभेदं विवृणोति—तथा हीति । ते ब्रह्मविदो नानाभोगदेशभाजि ब्रह्मलोके परावतो ब्रह्मणो हिरण्यगर्भस्य पराः समाः प्रकृष्टान्संवत्सरान्वसन्ति यावदायुर्ब्रह्मणस्तावत्तत्र तिष्ठन्तीत्यर्थः । तस्मिन्निति ब्रह्मलोको गृह्यते । शाश्वतीः समा नित्यान्संवत्सरान्वसंतीति पूर्ववत् । ब्रह्मणो हिरण्यगर्भस्य या जितिः सर्वलोकजयो या च व्युष्टिर्व्याप्तिस्तां लभते

---

१ ङ. °सो मां । २ ङ. ज. ञ. तास्वेवेयं । ३ क. ङ. ञ. त्वन्याऽन्या । ४ ङ. ञ. किमर्चि° । ५ ज. ट. °प्रतिपादिनी । ञ. °प्रतिपाद° । ६ ज. °पि वि° । ७ ङ. ञ. तु । ८ ज. ञ. °पि ग° । ९ झ. °सन्ति शा° । १० ठ. ड. न द्वि° । ११ क. झ. ठ. ड. °सन्तीति । १२ ठ. ड. च व्युष्टि° ।

श्वतीः समाः " [बृ० ५-१०-१] " सा या ब्रह्मणो जितिर्या व्युष्टिस्तां जितिं जयति तां व्युष्टिं व्यश्नुते " [कौषी० १-७] " तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति [छा० ८-४-३] इति च तत्र तत्र तदेवैकं फलं ब्रह्मलोकप्राप्तिलक्षणं प्रदर्श्यते ।

यत्त्वेतैरेवेत्यवधारणमर्चिराद्याश्रयणे न स्यादिति । नैष दोषः । रश्मिप्राप्तिपरत्वादस्य । न ह्येक एव शब्दो रश्मींश्च प्रापयितुमर्हत्यर्चिरादींश्च व्यावर्तयितुम् । तस्माद्रश्मिसंबन्ध एवायमवधार्यत इति द्रष्टव्यम् । त्वरावचनं त्वर्चिराद्यपेक्षायामपि गन्तव्यान्तरापेक्षया क्षैप्र्यार्थत्वान्नोपरुध्यते । यथा निमिषमात्रेणात्राऽऽगम्यत इति । अपि च " अथैतयोः पथोर्न कतरेणचन " [छा० ५-१०-८] इति मार्गद्वयभ्रष्टानां कष्टं तृतीयं स्थानमाचक्षाणा पितृयाणव्यतिरिक्तमेकमेव देवयानमर्चिरादिपर्वाणं पन्थानं प्रथयति । भूयांस्यर्चिरादिस्मृतौ मार्गपर्वाण्यल्पी-

---

समानदेहतां प्राप्तः सन्नित्यर्थः । कस्यैतत्फलं तत्राऽऽह—तद्य इति । तत्तत्राधिकृतानां मध्ये ये केचिद्ब्रह्मचर्यादिसाधनेन ब्रह्मोपासते ते पुनरेतं ब्रह्मलोकं ब्रह्मणाऽधिष्ठितं लभन्त इत्यर्थः । उक्तश्रुतीनां तात्पर्यमाह—तत्र तत्रेति ।

परोक्तमनूद्य प्रत्याह—यत्त्विति । रात्रौ स्पष्टरश्म्यदृष्टेस्तदनुसारित्वाभावे तत्र मृतस्य प्राप्ते सोऽप्येतैरेव रश्मिभिरित्ययोगव्यवच्छेदार्थमवधारणं नान्ययोगव्यवच्छेदायेत्यर्थः । अन्ययोगव्यवच्छेदकत्वमपि वचनस्य किं न स्यादित्याशङ्क्याऽऽह—न हीति । एकस्य वाक्यस्याप्राप्तमार्गप्रापकत्वं तस्य निरपेक्षत्वप्रतिपादकत्वं चायुक्तं वाक्यभेदप्रसङ्गादित्यर्थः । उभयथार्थत्वायोगे फलितमाह—तस्मादिति । विधिसामर्थ्यप्राप्तमयोगव्यवच्छेदमेवकारोऽनुवदतीत्यर्थः । यत्तु त्वरावचनं पीडितं स्यादिति तत्राऽऽह—त्वरेति । अर्चिरादिमार्गस्यैक्येऽपि कुतश्चिदन्यतो गन्तव्यादनेनोपायेन सत्यलोकं झटिति गच्छतीति गन्तव्यभेदापेक्षया वचनं युक्तमित्यर्थः । देवयानमार्गैक्ये हेत्वन्तरमाह—अपि चेति । मार्गभेदे स्थानान्तरस्यापि योगात्तृतीयस्थानोक्तिर्न स्यादित्यर्थः । पितृयाणातिरिक्तमार्गैक्येऽपि किमित्यर्चिरादिनेति विशेषणमित्याशङ्क्याऽऽह—भूयांसीति ।

---

१ ट. समा या । २ ङ. अ. °र्या व्यष्टिं । ३ ट. जयन्ति । ४ ङ. अ. व्यष्टिं । ५ ट. °या क्षिप्रार्थं । ६ क. ज. निमेष° । ७ ज. °णाऽऽग° । ८ झ. °गत । ९ ट· °थोनैक° । १०क. °तीयस्था° । ११ ठ. °यानव्ये । १२ ङ. अ. °यांसि चार्चि° । १३ ट. ङ. तस्यानपे° ।

(संवत्सरादित्ययोर्मध्ये देवलोकवायुलोकौ संनिवेशयितव्यौ, अधि० २)

यांसि त्वन्यत्र । भूयसां चाऽऽनुगुण्येनाल्पीयसां नयनं न्याय्य-मित्यतोऽप्यर्चिरादिना तत्प्रथितेरित्युक्तम् ॥ १ ॥ (१)

(संवत्सरादित्ययोर्मध्ये देवलोकवायुलोकौ संनिवेशयितव्यौ, अधि० २)

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥ (२)

केन पुनः संनिवेशविशेषेण गतिविशेषणानामितरेतरविशेष-णविशेष्यभाव इति तदेतत्सुहृद्भूत्वाऽऽचार्यो ग्रथयति । " स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम् " [कौषी० १-३] इति कौषीतकिनां देवयानः पन्थाः पठ्यते । तत्रार्चिरग्निलोकशब्दौ तावदेकार्थौ ज्वलनवचनत्वादिति नात्र संनिवेशक्रमः क्वचिदन्वेष्यः । वायुस्त्वर्चिरादौ वर्त्मनि न श्रुतः

अल्पपर्वणा मार्गेण गन्तव्यप्राप्तिसंभवे बहुपर्वमार्गोपदेशो व्यर्थः स्यात्प्रेक्षावतस्तत्राप्रवृत्तेः । अतो भूयसां पर्वणामनुरोधेनाल्पीयसां तदनुप्रवेश एव युक्तो बहूनामनुग्रहस्य न्याय्यत्वादित्यर्थः । मार्गैक्ये जघन्यविकल्पशङ्काऽपि नेति वक्तुमपीत्युक्तम् ॥ १ ॥ (१)

सर्वत्रार्चिरादिमार्गपर्वप्रत्यभिज्ञानाद्वत्यैक्यमुक्तम् । संप्रत्येतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकमित्यत्रार्चिरात्मकाग्न्यानन्तर्यप्रत्यभिज्ञानादर्चिषोऽनन्तरं निवेशनीयो वायुरित्याशङ्क्याऽऽह—**वायुमिति** । इतरेतरविशेषणविशेष्यत्वेनोपसंहारोऽर्चिरादीनामुक्तः स कीदृश इति विचारयति—**केनेति** । मार्गपर्वणां विशेषणविशेष्यत्वे सिद्धे योग्यतया स्वयमेव संनिवेशविशेषसिद्धेरनर्थकं तन्निरूपणमित्याशङ्क्याऽऽह—**सुहृदिति** । संनिवेशविशेषणविशिष्टं विशेषणाविशेष्यत्वं तदेतदित्युक्तम्। संक्षेपतोऽधिकरणस्य तात्पर्यमुक्त्वा विषयमाह—**स इति** । तत्र प्रथमश्रुतमग्निलोकमतिक्रम्य किमिति वायोः संनिवेशो विचार्यते तत्राऽऽह—**तत्रेति** । असंदिग्धमंशमुक्त्वा संदिग्धमंशमाह—**वायुस्त्विति** । अर्चिषोऽनन्तरमग्निलोकं वायुलोकमिति पाठक्रमबलाद्वायुर्निवेशयितव्यः किंवा वक्ष्यमाणन्यायेन संवत्सरदेवलोकयोः परस्तादा-

---

१ क. °यसामानु° । २ ङ. ञ. °सां च न° । ३ ट. °मू । अर्चिराद्यधिकरणम् । वा° । ४ ङ. ञ. °शेषाणामि° । ५ ङ. ज. कौषित° । ६ क. ङ. ज. ञ. °मः क्वचिद° । ७ क. ङ. ञ. °न्वेष्टव्यः । वा° । ८ ञ. °रादिव° । ९ ङ. ञ. °र्त्मन्यश्रु° । १० ठ. ड. °मार्गे प° । ११ क. ख. ठ. ड. °च्छन्ति स । १२ क. ख. वायुसं° ।

(संवत्सरादित्ययोर्मध्ये देवलोकवायुलोकौ संनिवेशयितव्यौ, अधि० २)

कतमस्मिन्स्थाने[1] निवेशयितव्य इति । उच्यते—"तेऽर्चिषमेवाभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यम्" [छा० ५-१०-१] इत्यत्र संवत्सरात्पराञ्चमादित्यादर्वाञ्चं "वायुम्" अभिसंभवन्ति । कस्मात् । "अविशेषविशेषाभ्याम्" । तथा हि—"स वायुलोकम्" [कौ० १-३] इत्यत्राविशेषोपदिष्टस्य वायोः श्रुत्यन्तरे विशेषोपदेशो दृश्यते "यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं[3] तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति" [बृ० ५-१०-१] इति । एतस्मादादित्याद्वायोः पूर्वत्वदर्शनाद्विशेषाद्ब्दादित्ययोरन्तराले वायुर्निवेशयितव्यः ।

कस्मात्पुनरग्नेः परत्वदर्शनाद्विशेषादर्चिषोऽनन्तरं वायुर्न निवे-

---

दित्यस्य चार्वागिति संशयात्स एव विचारविषय इत्यर्थः । अत्र चापरविद्याफलार्थं मार्गपर्वणां संनिवेशविशेषचिन्तनात्पादादिसंगतिः । पूर्वपक्षे पाँठानुक्रमस्यानुसरणं सिद्धान्ते त्वर्थक्रमात्तस्य बाध्यतेति मन्वानो वायोरादित्यादव्यवहितपूर्वत्वेन संनिवेशं सिद्धान्तमाह—**उच्यत इति** । पाठक्रमादग्नेरनन्तरं निवेशनीयो वायुरिति शङ्कते—**कस्मादिति** । सूत्रपदेनोत्तरमाह—**अविशेषेति** । विशेषदर्शनस्यैव स्थानविशेषसंनिवेशहेतुत्वेऽपि वाँयोरर्चिरादिके पथि सामान्यप्राप्तावविशेषोक्तिरपि हेतुरिति मत्वा व्याचष्टे—**तथा हीति** । कौषीतकिश्रुतेर्वाजसनेयिश्रुतिः श्रुत्यन्तरम् । पुरुषो ध्याता लोको देहः । प्रैतीत्यत्र तदेति द्रष्टव्यं यदेत्युपक्रमात् । तस्मै प्राप्तायोपासकाय वायुस्तत्र स्वात्मनि विजिहीते द्वारं प्रयच्छतीति यावत् । वायुप्रत्तद्वारपरिमाणं दृष्टान्तेन स्पष्टयति—**यथेति** । विशेषोक्तिफलं निगमयति—**एतस्मादिति** ।

सिद्धान्तेनोपक्रम्य पूर्वपक्षमाह—**कस्मादिति** । पाठक्रमादर्चिषोऽनन्तरं निवेशनीयो वायुरित्यर्थः । वायुप्रत्तमार्गेणैवोर्ध्वमादित्यमाक्रमत इत्यूर्ध्वत्वश्रुतेर्दिग्वचनत्वेऽप्यर्थक्रमद्योतित्वात्तेनेति च वायुप्रत्तरथचक्रपरिमितावकाशस्योर्ध्वक्रमणं प्रति हेतुत्वसिद्धेर्वायोरपि तन्निमित्तत्वदृष्टेरूर्ध्वशब्दश्रुतिसिद्धार्थक्रमेण पाठक्रमो बाध्यत इत्याह—

---

१ क. ङ. ज. अ. 'ने संनि' । २ ङ. ज. अ. 'षमभि' । ३ अ. खण्डेन । ४ क. ख. ठ. ङ. पाठक्र' । ५ क. ठ. ङ. 'वेशे हे' । ६ झ. वायुर' । ७ क. ख. 'र्ध्वश्रु' ।

(संवत्सरादित्ययोर्मध्ये देवलोकवायुलोकौ संनिवेशयितव्यौ, अधि० २)

इयते । नैषोऽस्ति विशेष इति वदामः । ननूदाहृता श्रुतिः " स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकम् " [कौषी० १-३] इति । उच्यते—केवलोऽत्र पाठः पौर्वापर्येणावस्थितो नात्र क्रमवचनः कश्चिच्छब्दोऽस्ति । पदार्थोपदर्शनमात्रं त्वत्र क्रियत एतमेतं चाऽऽगच्छतीति । इतरत्र पुनर्वायुप्रत्तेन रथचक्रमात्रेण च्छिद्रेणोर्ध्वमाक्रम्याऽऽदित्यमागच्छतीत्यवगम्यते क्रमः । तस्मात्सूक्तमविशेषविशेषाभ्यामिति । वाजसनेयिनस्तु " मासेभ्यो देवलोकं देवलोकादादित्यम् " [बृ० ६-२-१५] इति समामनन्ति । तत्राऽऽदित्यानन्तर्याय देवलोकाद्वायुमभिसंभवेयुः । वायुमब्दादिति तु च्छन्दोगश्रुत्यपेक्षयोक्तम् । छान्दोग्यवाजसनेयकयोस्त्वेकत्र देवलोको न विद्यते परत्र संवत्सरः । तत्र श्रुतिद्वयप्रत्ययादुभयत्र ग्रथयितव्यौ । तत्रापि माससंबन्धात्संवत्सरः पूर्वः पश्चिमो देवलोक इति विवेक्तव्यम् ॥ २ ॥ (२)

नेत्यादिना । उक्तमेवार्थं विवृण्वन्नाशङ्कते—नन्विति । तत्र सिद्धान्ती स्वाभिप्रायमाह—उच्यत इति । तर्हि वाक्यस्य वैयर्थ्यं नेत्याह—पदार्थेति । स्वरूपविधिपरमेतद्वचनं न क्रमपरमित्यर्थः । वाजसनेयिश्रुतावपि क्रमवाचिशब्दो नास्तीत्याशङ्क्याऽऽह—इतरत्रेति । कौषीतकिवाक्योक्तस्य वायोश्छान्दोग्योपदिष्टार्चिरादिमार्गे निवेशमुक्तमुपसंहरति—तस्मादिति । वाजसनेयिनां संवत्सराश्रवणात्कथं वायुमब्दादिति सूत्रं तत्राऽऽह—वाजसनेयिनस्त्विति । तर्हि देवलोकाद्वायुलोकमिति वक्तव्यमित्याशङ्क्य च्छान्दोग्याभिप्रायेणैतदुक्तमित्याह—वायुमिति । क्रमस्तर्हि कः स्यादित्याशङ्क्योभयश्रुत्यालोचनया क्रमं दर्शयति—छान्दोग्येति । तर्हि कथमेकवाक्यत्वं तत्राऽऽह—तत्रेति । तर्हि देवलोकस्य प्राथम्यं संवत्सरस्य पाश्चात्यं किं न स्यात्तत्राऽऽह—तत्रापीति । संवत्सरस्य मासारभ्यत्वान्मासानन्तर्ये स्थिते देवलोकः संवत्सरस्य परस्ताद्भवत्यादित्यानन्तर्याय देवलोकादपि वायुरुपरिष्टाद्द्रष्टव्यः । सूत्रे तु संवत्सराद्देवलोकं प्राप्य वायुमभिसंभवतीति विवक्षितं वायुशब्दस्य देवलोकोपलक्षणार्थत्वात् । अतः श्रुतित्रयवशाद्देवलोकसहितवायोः संवत्सरादित्यान्तरालवर्तित्वमित्यर्थः ॥ २ ॥ (२)

---

१ ज. ट. ननु तत्रोदा° । २ क. ङ. ज. ञ. °लोक° । ३ क. °दार्थप्रद° । ४ ङ. ज. ञ. एतं चैतं च स ग° । ५ क. °तं च स ग° । ६ ङ. ञ. तु च्छान्दोग्यश्रु° । ७ ङ. ञ. ग्रथित° । ८ ठ. ड. 'तत्र क° । ९ क. ख. ठ. ड. °युमि° । १० क. ख. °रब्धत्वा° ।

(वरुणादीनां संनिवेशादर्चिरादिमार्गस्य व्यवस्थापितत्वम् , अधि० ३)

तडितोऽधि वरुणः संबन्धात् ॥ ३ ॥ (३)

" आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतम् " [छा० ५-१०-२] इत्यस्या विद्युत उपरिष्टात् " स वरुणलोकम् " [कौ० १-३] इत्ययं वरुणः संबध्यते। अस्ति हि संबन्धो विद्युद्वरुणयोः। यदा हि विशाला विद्युतस्तीव्रस्तनितनिर्घोषा जीमूतोदरेषु प्रनृत्यन्त्यथाऽऽपः प्रपतन्ति। " विद्योतते स्तनयति वर्षिष्यति वा " [छा० ७-११-१] इति च ब्राह्मणम्। अपां चाधिपतिर्वरुण इति श्रुतिस्मृतिप्रसिद्धिः। वरुणाच्चाधीन्द्रप्रजापती स्थानान्तराभावात्पाठसामर्थ्याच्च। आगन्तुकत्वादपि वरुणादी-

---

वायोः संनिवेशे दर्शिते तदन्तरपठितवरुणादिसंनिवेशं दर्शयति—**तडितोऽधि वरुण इति**। स वरुणलोकमित्यादिना श्रुतो वरुणादिर्विषयः स किमर्चिरादिमार्गपर्वत्वेन[1] न संबध्यते किंवा[2] संबध्यत इति तस्य तत्र संनिवेशस्थानासंभवसंभवाभ्यां संदेहे स वायुलोकं स वरुणलोकमिति वरुणादीनां पाठक्रमेण **वायोरूर्ध्वमादित्या**त्प्रागूर्ध्वश्रुतिसिद्धार्थक्रमविरोधेन निवेशासिद्धेर्विद्युतश्चोपरिष्टादमानवपुरुषस्यैव **नेतृ**त्वश्रवणाद्वरुणादीनामनुपयोगान्निवेशस्थानान्तराद्दृष्टेश्च तेषां मार्गपर्वत्वेन **संबन्धो** नास्तीति प्राप्ते सिद्धान्तमाह—**आदित्यादिति**। विद्युतोऽनन्तरं वरुणसंनिवेशे सूत्रोक्तं हेतुमाह—**अस्तीति**। तत्र लोकप्रसिद्धिमनुकूलयति—**यदेति**। विद्युद्वृष्टेर्दृष्टत्वात्कार्यकारणभावस्तयोरस्तीत्यर्थः। तत्रैव श्रुतिं संवादयति—**विद्योतत इति**। अपां विद्युद्योगेऽपि वरुणस्य किमायातं तदाह—**अपां चेति**। वायोरनन्तरमधीतस्यापि वरुणस्य विद्युदानन्तर्यवदिन्द्रप्रजापत्योर्वरुणानन्तरमधीतयोरपि स्थानान्तरं वाच्यमित्याशङ्क्याऽऽह—**वरुणाच्चेति**। तर्हि तयोर्मार्गपर्वत्वेन संगतिरेव मा भूदित्याशङ्क्याऽऽह—**पाठेति**। आगन्तूनामन्ते निवेश इतिन्यायाच्चासाधारणस्थानहीनानां वरुणादीनां तडिदानन्तर्यमुक्तमित्याह—**आगन्तुकत्वादिति**। यथा दर्शपूर्णमासिकविकृतौ[3] नक्षत्रेष्टौ सोऽत्र जुहोत्यग्नये स्वाहा कृत्तिकाभ्यः स्वाहेत्यादीनामुपहोमानां प्रधानशब्दगृहीतप्रकृतनारिष्टहोमान्ते प्रयोगो निरूपितस्तथाऽर्चिरादिमार्गेऽपि स्थानाभावेनाऽऽगन्तूनामन्ते निवेशः स्यादिति भावः। कथं विद्युतोऽन्यत्वं न हि

---

१ क. ज. झ. ट. °णादधी°। २ क. ख. °न सं°। ३ क. ख. °वा न सं°। ४ क. ख. °त्रोक्तहे°। ५ क. ङ. ञ. °दीनुपव°। ६ ठ. ड. °शैपौर्ण°।

नामन्त एव निवेशो वैशेषिकस्थानाभावाद्विद्युच्चान्त्याऽर्चिरादौ वर्त्मनि ॥ ३ ॥ (३)

(अर्चिरादीनामातिवाहिकत्वम्, अधि० ४)

आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

तेष्वेवार्चिरादिषु संशयः—किमेतानि मार्गचिह्नान्युत भोगभूमयोऽथ वाँ नेतारो गन्तॄणामिति । तत्र मार्गलक्षणभूता अर्चिरादय इति तावत्प्राप्तम् । तत्स्वरूपत्वादुपदेशस्य । यथा हि लोके कश्चिद्ग्रामं नगरं वा प्रतिष्ठासमानोऽनुशिष्यते गच्छेतस्त्वममुं गिरिं ततो न्यग्रोधं ततो नदीं ततो ग्रामं ततो नगरं वा प्राप्स्यसीत्येवमिहापि "अर्चिषोऽहरह्न आपूर्यमाणपक्षम्" [छा०५-१०-१] इत्याद्याह । अथ वा भोगभूमयँ इति प्राप्तम् । तथाहि—लोकशब्देनाग्न्यादीनर्नुबध्नाति "अग्निर्लोकमागच्छति" [कौषी० १-३] इत्यादि । लोकशब्दश्च प्राणिनां भोगायतनेषु भाष्यते "मनुष्यलोकः पितृलोको देवलोकः" [बृ० १-५-१६] इति

तदन्त्यत्ववाची शब्दोऽस्तीत्याशङ्क्य विद्युदनन्तरं पर्वान्तरस्यानुक्तेस्तदन्त्यत्वमित्याह—विद्युच्चेति । वरुणादीनामुपयोगस्त्वमानवेन सह नेतृत्वसंभवादिति वक्ष्यते । अत्र च विद्याफलार्थे पथि वरुणादीनां संनिवेशोक्त्या पादादिसंगतिः । पूर्वपक्षे वरुणादिपाठस्यादृष्टार्थत्वं सिद्धान्ते वरुणादीनां स्थानान्तराभावेऽप्यागन्तूनामन्ते निवेशात्पाठस्य दृष्टार्थतैवेति द्रष्टव्यम् ॥ ३ ॥ (३)

अर्चिरादीनां क्रमं निरूप्य स्वरूपं निरूपयति—आतिवाहिका इति । विषयोक्तिपूर्वकमुक्तिसाम्याल्लोकशब्दादतिनेतृत्वलिङ्गाच्च संशयमाह—तेष्वेवेति । अत्र च विद्याफलप्राप्त्यर्थमर्चिरादावध्वनि प्रवृत्तस्य विदुषो गमयितृत्वचिन्तनात्पादादिसंगतिः । पूर्वपक्षे निर्देशस्य लोकश्रुतेर्वा मुख्यत्वं सिद्धान्ते न्यायवल्लिङ्गस्येत्यङ्गीकृत्य पूर्वपक्षमाह—तत्रेति । उक्तेऽर्थे निर्देशसाम्यं हेतुमाह—तदिति । उक्तमेव हेतुं दृष्टान्तेन स्पष्टयति—यथेति । पूर्वपक्षान्तरमाह—अथ वेति । कथं लोकशब्दप्रयोगेऽप्यर्चिरादीनां भोगभूमित्वं तत्राऽऽह—लोकेति । मार्गपर्वणां भोगभूमित्वे श्रुतिमपि दर्शयति—

---

१ ट. °रादिव° । २ ङ. ञ. °हिकस्त° । ३ झ. तेष्वर्चि° । ४ ङ. वाऽतिनें° । ५ ङ. ञ. हि कश्चिल्लोके ग्रामं । ६ क. ङ. ज. ञ. °मं नं° ७ क. ङ. ञ. °य एता इ° । ८ क. ङ. ञ. °दीनुपर्व° ।

च। तथा च ब्राह्मणम्। "अहोरात्रेषु ते[1] लोकेषु सञ्जन्ते" [शत० १०-२-६-८] इत्यादि। तस्माच्चाऽऽतिवाहिका अर्चिरादयः। अचेतनत्वाद[2]प्येषामातिवाहिकत्वानुपपत्तिः। चेतना हि लोके राजनियुक्ताः पुरुषा दुर्गेषु मार्गेष्वतिवाह्यानतिवाहयन्तीति। एवं प्राप्ते ब्रूमः—"आतिवाहिकाः" एवैते भवितुमर्हन्ति। कुतः। "तल्लिङ्गात्"। तथा हि "चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स [3]एतान्ब्रह्म गमयति" [छा० ५-१०-२] इति सिद्धवद्गमयितृत्वं दर्शयति[4]। तद्वचनं तद्विषयमेवोपक्षीणमिति चेत्। न। प्राप्तमानवत्वनिवृत्तिपरत्वाद्विशेषणस्य। यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्ता[5]स्ते च मानवास्ततो युक्तं तन्निवृत्त्यर्थं पुरुषविशेषणममानव इति॥ ४॥

ननु[6] तल्लिङ्गमात्रमगमकं न्यायाभावात्। नैष दोषः।

उभयव्यामोहात्तत्सिद्धेः॥ ५॥

तथा चेति। अहोरात्रप्रभृतिषु लोकशब्दितेषु भोगायतनेषु ते कर्मिणो ज्ञानिनश्च सर्क्ति[7] भोगमनुभवन्तीति यावत्। पक्षद्वयेऽपि फलितमाह—तस्मादिति। अर्चिरादिशब्दानामचेतनेष्वग्न्यादिषु रूढत्वादपि न तेषामातिवाहिकतेत्याह—अचेतनत्वादिति। तदेव व्यतिरेकदृष्टान्तेन स्फोरयति—चेतना हीति। सिद्धान्तसूत्रमादाय प्रतिज्ञां विभजते—एवमिति। तत्र हेतुं प्रश्नपूर्वकमादाय व्याचष्टे—कुत इति। अमानवपुरुषस्य विद्युदादावातिवाहिकत्वदृष्टेरर्चिरादीनामापि तदुन्नेयमित्यर्थः। यावद्वचनं वाचनिकमिति न्यायान्न तेषामातिवाहिकत्वसाधकमेतादिति शङ्कते—तदिति। उभयपरत्वे वाक्यभेदः स्यादिति भावः। प्राप्तगमयितृमानवपुरुषानुवादेनाप्राप्तामानवत्ववादित्वाद्वाक्यस्योभयपरत्वेन वाक्यभेदप्रसङ्गात्पूर्वेषामपि मानवपुरुषतया गमयितृत्वं ग्राह्यमित्याह—नेति। उक्तमेव प्रपञ्चयति—यदीति॥ ४॥

लिङ्गस्यानुग्राहकन्यायाभावे गमकत्वासिद्धिरिति शङ्कते—नन्विति। न्यायोक्तिपरं सूत्रमवतारयति—नेति। चेतनस्य यत्नहीनस्योर्ध्वगतिश्चेतनान्तराधीनेति लौकिकन्यायेन यत्नहीनानां गन्तॄणां गमयितारोऽर्चिरादयश्चेतनाः स्युरिति सूत्रयो-

---

१ ङ. ञ. तेषु। २ क. ङ. ञ. 'प्येतेषां'। ३ ट. एनान्ब्र'। ४ ङ. ञ. 'ति। यावद्वचनं वाचनिकमितिन्यायात्तद्व'। ५ ट. 'य एवो'। ६ ज्ञ. 'स्ते मा'। ७ क. ङ. ज. ञ. ट. 'नु लिङ्गं'। ८ ज्ञ. भोगानुभवम'। ९ ठ. ड. स्फोटंय'।

ये तावदर्चिरादिमार्गगास्ते देहवियोगात्संपिण्डितकरणग्रामा इत्यस्वतन्त्रा अर्चिरादीनामप्यचेतनत्वादस्वातन्त्र्यमित्यतोऽर्चिराद्यभिमानिनश्चेतना देवताविशेषा अतियात्रायां नियुक्ता इति गम्यते । लोकेऽपि हि मत्तमूर्छितादयः संपिण्डितकरणाः परप्रयुक्तवर्त्मानो भवन्ति । अनवस्थितत्वादप्यर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः । न हि रात्रौ प्रेतस्याहःस्वरूपाभिसंभव उपपद्यते । न च प्रतिपालनमस्तीत्युक्तं पुरस्तात् । ध्रुवत्वाच्चु देवतात्मनां नायं दोषो भवति । अर्चिरादिशब्दता चैषामर्चिराद्यभिमानादुपपद्यते " अर्चिषोऽहः " [छा० ५-१०-१] इत्यादिनिर्देशस्त्वातिवाहिकत्वेऽपि न विरुध्यते । अर्चिषा हेतुनाऽहरभिसंभवति । अह्ना हेतुनाऽऽपूर्यमाणपक्षमिति । तथा च लोके प्रसिद्धेष्वप्यातिवाहिकेष्वेवंजातीयक उपदेशो दृश्यते । गच्छ त्वमितो बलवर्माणं ततो जयसिंहं ततः कृष्णगुप्तमिति ।

जनया ब्रूते—ये तावदिति। उभयोर्मार्गतद्वन्त्रैर्व्यामोहादज्ञत्वात्तत्सिद्धेर्गमयितृसिद्धेर्न न्यायहीनं लिङ्गमित्युक्त्वा न्यायमेव स्फुटयति—लोकेऽपीति । पूर्वपक्षद्वयायोगे हेत्वन्तरमाह—अनवस्थितत्वादिति । अहःशुक्लपक्षोत्तरायणानां कालान्तरेषु मार्गचिह्नत्वभोगभूमित्वे न संभाव्येते तदा तेषामभावादिति हेतुं साधयति—न हीति । तर्हि तदा गमनं प्रतीक्ष्य रात्र्यादौ प्रेतो गमिष्यति नेत्याह—न चेति । अनवस्थितत्वादिदोषादातिवाहिकत्वमपि कुतस्तेषामित्याशङ्क्याऽऽह—ध्रुवत्वादिति । अर्चिरादिशब्दानामचेतनेषु रूढेर्न तेषां देवतावाचितेत्याशङ्क्याऽऽह—अर्चिरादीति । न चाभिमतव्याहारादिदेहाभावे तद्देवतानामनवस्थानमिति वाच्यम् । ऐश्वर्ययोगात्तासामनेकविग्रहग्रहणयोगात् । अतो देवदत्तादिशब्दवदर्थतश्चेतनेषु मुख्यतेत्यर्थः । जाड्याद्बुद्ध इत्यादौ गुणवचनेषु जाड्यादिषु पञ्चमीदर्शनादर्चिरादीनां च गुणवचनत्वाभावाद्बहनं प्रत्यर्चिरादीनां हेतुत्वानवगमादर्चिष इत्यस्मादपादानत्वप्रतीतेर्नाऽऽतिवाहिकत्वसिद्धिरित्याशङ्क्याऽऽह—अर्चिष इति । तार्किकप्रक्रियासिद्धगुणत्वाभावेऽप्याश्रितत्वेन तत्सिद्धेर्हेतावेषा पञ्चमीत्यर्थः । उक्तेऽर्थे लौकिकव्यपदेशं दर्शयति—तथा चेति । इतश्चा-

---

१ ङ. ञ. °रणग्रामाः प° । २ ट. °क्षकत्वो° । ३ ङ. ञ. °त्युक्तमधस्ता° । ४ ङ. ज. ञ. ट. °त्वाद्देव° । ५ ङ. ञ. ट. °वन्ति । अ° । ६ ङ. ञ. लोकप्र° । ७ क. प्रेतोऽयं ग° । ८ ठ. ङ. °भव° । ९ ठ. ङ. °ह्यो° ।

(अर्चिरादीनामातिवाहिकत्वम्, अधि० ४)

अपि चोपक्रमे " तेऽर्चिरभिसंभवन्ति " [छा० ५-१०-१] इति संबन्धमात्रमुक्तं न संबन्धविशेषः कश्चित्। उपसंहारे तु " स एतान्ब्रह्म गमयति " [छा०५-१०-२] इति संबन्धविशेषोऽतिवाह्यातिवाहकत्वलक्षण उक्तस्तेन स एवोपक्रमेऽपीति निर्धार्यते। संपिण्डितकरणत्वादेव च गन्तॄणां न तत्रोपभोगसंभवः। लोकशब्दस्त्वनुपभुञ्जानेष्वपि गन्तृषु गमयितुं शक्यते। अन्येषां तल्लोकवासिनां भोगभूमित्वात्। अतोऽग्निस्वामिकं लोकं प्राप्तोऽग्निनाऽतिवाह्यते वायुस्वामिकं प्राप्तो वायुनेति योजयितव्यम् ॥ ५ ॥

कथं पुनरातिवाहिकत्वपक्षे वरुणादिषु तत्संभवः। विद्युतोऽधि वरुणादय उपक्षिप्ता विद्युतस्त्वनन्तरमा ब्रह्मप्राप्तेरमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतमिति। अत उत्तरं पठति—

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥ (४)

" ततो " विद्युदभिसंभवनादूर्ध्वं विद्युदनन्तरवर्तिनैवामानवेन पुरुषेण वरुणलोकादिष्वतिवाह्यमाना ब्रह्मलोकं गच्छन्तीत्यवगन्तव्यम्। तान्वैद्युतात्पुरुषोऽमानवः स एत्य ब्रह्मलोकं

र्चिरादिशब्दानां गमयितृविषयतेत्याह—अपि चेति। सामान्यवचने शब्दे विशेषापेक्षिणि दृष्टे विशेषशब्देन तत्सामान्यं नियन्तव्यमितिन्यायादतिवाह्यातिवाहकसंबन्धसिद्धिरिति हेत्वन्तरमेव स्फुटयति—उपक्रमेऽपीति। यत्तु भोगभूमित्वमर्चिरादीनामुक्तं तद्दूषयति—संपिण्डितेति। लोकशब्दाद्भोगभूमित्वमुक्तं प्रत्याह—लोकेति। गतॄणां भोक्तृत्वाभावेऽपि वाक्यं शक्यं नेतुमिति फलितमाह—अत इति ॥ ५ ॥

सूत्रान्तरमवतारयितुं शङ्कते—कथमिति। का पुनरनुपपत्तिस्तत्राऽऽह—विद्युतो हीति। आतिवाहकत्वमपि नियतं नेत्युक्ते प्रत्याह—अत इति। वरुणादिषु वचनादपवादमङ्गीकृत्य विभजते—तत इति। किं तर्हि तैरित्याशङ्क्याऽऽह—

---

१ ङ. ज. 'र्चिषमभि'। २ क. ट. एनान्ब्र'। ३ ट. 'वाहिकल'। ४ क. ङ. ज. ञ. 'कल'। ५ ङ. ञ. 'णग्रामत्वा'। ६ क. ङ. ज. ञ. ट. तत्र भो'। ७ झ. ट. 'नरति'। ८ झ. 'वाहक'। ९ क. ङ. ञ. 'तश्चान'। १० क. ङ. ज. ञ. 'तान्पुरु'। ११ क. ज. ट. 'नव ए'। १२ ङ. ञ. एतान्ब्रह्म'। १३ घ. 'लोकान्गम'। १४ क. स्फोरयति। १५ क. ख. ठ. ङ. 'क्रमे चेति। १६ क. ख. 'क्यं नेतुं शक्यमि'।

गमयतीति तस्यैव गमयितृत्वश्रुतेः । वरुणादयस्तु तस्यैवाप्रतिबन्धकरणेन साहाय्यानुष्ठानेन वा केनचिदनुग्राहका इत्यवगन्तव्यम् । तस्मात्साधूक्तमातिवाहिका देवतात्मानोऽर्चिरादय इति ॥ ६ ॥ (४)

(उत्तरमार्गेण कार्यब्रह्मगमनम्, अधि० ५)

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥

" स एनान्ब्रह्म गमयति " [छा० ५-१०-२] इत्यत्र विचिकित्स्यते—किं कार्यमपरं ब्रह्म गमयत्याहोस्वित्परमेवाविकृतं मुख्यं ब्रह्मेति । कुतः संशयः । ब्रह्मशब्दप्रयोगाद्गतिश्रुतेश्च । तत्र " कार्यमेव " सगुणमपरं ब्रह्मैनान्गमयत्यमानवः पुरुष इति बादरिराचार्यो मन्यते । कुतः । अस्य " गत्युपपत्तेः " । अस्यं कार्यब्रह्मणो गन्तव्यत्वमुपपद्यते प्रदेशवत्त्वात् । न तु परस्मिन्ब्रह्मणि गन्तृत्वं गन्तव्यत्वं गतिर्वाऽवकल्पते । सर्वगतत्वात्प्रत्यगात्मत्वाच्च गन्तृणाम् ॥ ७ ॥

विशेषितत्वाच्च ॥ ८ ॥

" ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो

वरुणादयस्त्विति । तेषां स्वयमवाहकत्वेऽपि तत्साहाय्यकरणेन तथात्वाद्युक्तमार्चिरादिशब्दानां गमयितृविषयत्वमित्युपसंहरति—तस्मादिति ॥ ६ ॥ (४)

गतिनिरूपणानन्तरं गन्तव्यं निरूपयति—कार्यमिति । ब्रह्म विषयीकृत्य संशयमाह—स इति । प्रश्नपूर्वकं तद्धेतुमाह—कुत इति । पूर्वपक्षस्याऽऽद्यो द्वितीयस्तूत्तरपक्षस्यानुगुणो हेतुः । प्रकृतया गत्या गन्तव्यस्य विद्याफलभूतस्य ब्रह्मणो निरूपणात्पादादिसंगतिः । पूर्वपक्षे परविदोऽपि गत्युत्क्रान्ती सिध्यतः । सिद्धान्ते ततोऽन्यस्यैव ते नियते स्यातामिति मन्वानः सूत्रं योजयन्नादौ सिद्धान्तमाह—तत्रेति । साधारणे ब्रह्मशब्दे कार्यविषयत्वं गतेरहेतुकमिति शङ्कते—कुत इति । हेतुमवतार्य व्याचष्टे—गतिरिति । सर्वगतत्वेऽपि प्रदेशान्तरवर्तिनस्तस्याऽऽकाशस्येव गन्तव्यत्वमाशङ्क्याऽऽह—प्रत्यगिति ॥ ७ ॥

कार्यब्रह्म गन्तव्यमित्यत्र हेत्वन्तरमाह—विशेषितेति । सूत्रं व्याचष्टे—ब्रह्मेति । बहूक्त्या गन्तव्यस्य विशेषितत्वेऽपि कथं परस्य गन्तव्यत्वनिरसनं तत्राऽऽह—

---

१ ज. ञ. एतान्ब्र° । २ क. ब्रह्म नयत्येनानमा° । ङ. ञ. ब्रह्म नयत्येतानमा° । ३ क. °तः । ग° । ४ क. ङ. ञ. °स्य हि का° । ५ क. ङ. ञ. °शत्वात् । ६ क. ख. ठ. ड. गतीति ।

वसन्ति" [बृ० ६-२१-५] इति च श्रुत्यन्तरे विशेषितत्वात्कार्यब्रह्मविषयैव गतिरिति गम्यते । न हि बहुवचनेन विशेषणं परस्मिन्ब्रह्मण्यवकल्पते । कार्ये त्ववस्थाभेदोपपत्तेः संभवति बहुवचनम् । लोकश्रुतिरपि विकारगोचरायामेव संनिवेशविशिष्टायां भोगभूमावाञ्जसी । गौणी त्वन्यत्र ब्रह्मैव लोक एष सम्राट् [बृह० ४-४-२३] इत्यादिषु । अधिकरणाधिकर्तव्यनिर्देशोऽपि परस्मिन्ब्रह्मण्यनाञ्जसः स्यात् । तस्मात्कार्यविषयमेवेदं नयनम् ॥ ८ ॥

ननु कार्यविषयेऽपि ब्रह्मशब्दो नोपपद्यते समन्वये हि समस्तस्य जगतो जन्मादिकारणं ब्रह्मेति स्थापितमिति । अत्रोच्यते—

सामीप्यात्तु तद्व्यपदेशः ॥ ९ ॥

तुशब्द आशङ्काव्यावृत्त्यर्थः । परब्रह्मसामीप्यादपरस्य ब्रह्मणस्तस्मिन्नपि ब्रह्मशब्दप्रयोगो न विरुध्यते । परमेव हि ब्रह्म विशुद्धोपाधिसंबन्धं क्वचित्कैश्चिद्विकारधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानमपरमिति स्थितिः ॥ ९ ॥

न हीति । ऐक्यात्कार्यस्यापि ब्रह्मणो बहूक्तिरयुक्तेत्याशङ्क्याऽऽह—कार्ये त्विति । चशब्दसूचितं युक्त्यन्तरमाह—लोकेति । परस्मिन्नपि क्वचिद्दृष्टा लोकश्रुतिरित्याशङ्क्याऽऽह—गौणीति । ब्रह्मलोकेष्वित्यधिकरणसप्तम्या ब्रह्मण्ययोगादपि कार्यविषयैव गतिरिति हेत्वन्तरमाह—अधिकरणेति । सूत्रोक्तहेतूनां फलितं निगमयति—तस्मादिति ॥ ८ ॥

ब्रह्मशब्दश्रुतिविरोधं शङ्कते—नन्विति । वृद्धव्यवहारे प्रयोगप्रत्ययाभ्यां ब्रह्मशब्दस्य परापरब्रह्मणोः शाब्दं मुख्यत्वं तुल्यमित्याशङ्क्यानवच्छिन्नतयाऽर्थतो मुख्यत्वं परस्यैवेत्याह—समस्तस्येति । सूत्रेण परिहरति—अत्रेति । मुख्यार्थायोगे यौगिकतयाऽपि ब्रह्मपदं नेयमिति मत्वा व्याचष्टे—तुशब्द इति । अविरोधं साधयति—परमेवेति । विशुद्धोपाधिसंबन्धं सात्त्विकोपाधिविशिष्टमिति यावत् ॥ ९ ॥

---

१ ङ. ञ. °ति श्रु° । २ ङ. ञ. °रित्यवग° । ३ ङ. ञ. °ह्मणि नाऽऽञ्ज° । ४ क. ञ. °मस्त° । ५ ट. °ये स° । ६ क. ङ. ञ. °स्य हि ज° । ७ क. ङ. ञ °ति प्रतिष्ठापि° । ८ झ. °स्य परब्र° । ९ ट. °व ब्र° । १० ङ. झ. ञ. ट. °बन्धात्क्वचि° । ११ ट, °चिद्वि° । १२ ठ.ड. °दृश्यलो° । १३ ठ, ड. शाब्दमु° । १४ झ. °धिमि° ।

ननु कार्यप्राप्तावनावृत्तिश्रवणं न घटते। न हि परस्माद्ब्रह्मणोऽन्यत्र क्वचिन्नित्यतां संभावयन्ति। दर्शयति च देवयानेन पथा प्रस्थितानामनावृत्तिम् " एतेन प्रतिपद्यमाना इमं मानवमावर्तं नाऽऽवर्तन्ते " [छा० ४-१५-६] इति " तेषामिह न पुनरावृत्तिरस्ति" [बृह० माध्य० ६-२-१८] "तयोर्ध्वमायन्नमृतत्वमेति " [छा०८-६-६ काठ० ६-१६] इति चेत्। अत्र ब्रूमः—

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ १० ॥

कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसम्यग्दर्शनाः सन्तः " तदध्यक्षेण " हिरण्यगर्भेण " सहातः परं " परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्त इति। इत्थं क्रममुक्तिरनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या। न ह्यर्चिरादिसैव गतिपूर्विका परमाप्तिः संभवतीत्युपपादितम् ॥ १० ॥

स्मृतेश्च ॥ ११ ॥

स्मृतिरप्येतमर्थमनुजानाति—

" ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् "

इति। तस्मात्कार्यब्रह्मविषया गतिः श्रूयत इति सिद्धान्तः ॥ ११ ॥

ब्रह्मशब्दस्य मुख्यार्थग्रहे बहुतरकार्यलिङ्गभङ्गवत्कार्यग्रहेऽपि तुल्याऽनावृत्तिश्रुत्यनुपपत्तिरिति शङ्कते—नन्विति। तत्र हेतुः—न हीति। मा भूदर्चिरादिना गच्छतामनावृत्तिर्ब्रह्मलोकप्राप्तिमात्रस्य श्रुतत्वादित्याशङ्क्याऽऽह—दर्शयतीति। क्रममुक्त्यभिप्रायमनावृत्तिश्रवणमिति सूत्रेण प्रत्याह—अत्रेति। सूत्राक्षराणि योजयति—कार्येति। साक्षादेव ब्रह्मप्राप्त्याऽनावृत्तिसिद्धौ किमिति परम्पराश्रयणं तत्राऽऽह—न हीति ॥ १० ॥

क्रममुक्तौ स्मृतिं प्रमाणयति—स्मृतेश्चेति। तामेवोदाहरति—स्मृतिरिति। प्रतिसंचरो महाप्रलयस्तस्मिन्प्राप्ते परस्य हिरण्यगर्भस्यान्तोऽधिकारावसानं तदा कृतात्मानः शुद्धधियो ब्रह्मलोकनिवासिनस्तत्रोत्पन्नसम्यग्धियः सर्वे ब्रह्मणा मुच्यमानेन सह परं पदं प्रविशन्तीति योजना। सिद्धान्तमुपसंहरति—तस्मादिति ॥ ११ ॥

---

१ ङ. ज. ञ. ट. °ख्यता संभवति। २ ज. झ. °तिपाद्य। ३ क. °त्तिस्तयो°। ४ ज. °ति चात्र। ५ क. ङ. ञ. चेत्यत्र। ६ ट. °न्तस्ते त.। ७ ङ. ञ परं। ८ ङ. ञ. °ऽस्यैव। ९ झ. °ख्याह।

(उत्तरमार्गेण कार्यब्रह्मगमनम्, अधि० ५)

कं[1] पुनः पूर्वपक्षमाशङ्क्यायं सिद्धान्तः प्रतिष्ठापितः " कार्यं बादरिः " [ब्र० सू० ४-३-७] इत्यादिनेति । स इदानीं सूत्रै-रेवोपपदर्श्यते[2]--

परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

जैमिनिस्त्वाचार्यः[3] " स एनान्ब्रह्म गमयति " [छा० ५-१०-२] इत्यत्र " परम् " एव ब्रह्म प्रापयतीति मन्यते । कुतः । 'मुख्यत्वात्" । परं हि ब्रह्म ब्रह्मशब्दस्य मुख्यमालम्बनं गौण-मपरं, मुख्यगौणयोश्च मुख्ये संप्रत्ययो भवति ॥ १२ ॥

दर्शनाच्च ॥ १३ ॥

" तयोर्ध्वमायन्नमृतत्वमेति " [छा० ८-६-६ काठ० ६-१६] इति[4] गतिपूर्वकममृतत्वं दर्शयति । अमृतत्वं च परस्मि-न्ब्रह्मण्युपपद्यते न कार्ये, विनाशित्वात्कार्यस्य । " अथ यत्रा-न्यत्पश्यति तदल्पं तन्मर्त्यम् " [छा० ७-२४-१] इति[5] प्रव-च्चनात्परविषयैव चैषा[6] गतिः कठवल्लीषु पठ्यते । न हि तत्र विद्यान्तरप्रक्रमोऽस्ति " अन्यत्र धर्मादन्यत्राधर्मात् " [काठ० २-१४] इति परस्यैव ब्रह्मणः प्रक्रान्तत्वात्[7] ॥ १३ ॥

उत्तरसूत्राण्याकाङ्क्षापूर्वकमवतारयति—कमिति । ब्रह्मशब्दस्य मुख्यार्थत्वमाश्रित्य परस्यैव ब्रह्मणो गन्तव्यत्वमाह—परमिति । तत्र प्रतिज्ञां विभजते—जैमिनिस्त्विति । युक्तियुक्तस्यैव ग्राह्यत्वाद्वृक्तगौरवमकिंचित्करमिति शङ्कते—कुत इति । सौत्रं हेतु-माह—मुख्यत्वादिति । गौणस्यापि मुख्यवद्ब्रह्मशब्दालम्बनत्वमिष्टमविशेषादित्याश-ङ्क्याऽऽह—मुख्येति ॥ १२ ॥

इतश्च मुख्यमेव ब्रह्म गन्तव्यमित्याह—दर्शनाच्चेति । दर्शनं विभजते—तयेति । आपेक्षिकं तत्पक्षान्तरेऽपि स्यादित्याशङ्क्य मुख्यसंभवे नैवमित्याह—अमृतत्वं चेति । कार्यस्य नाशित्वे मानमाह—अथेति । परस्मिन्न युक्ता गतिरित्युक्तमित्याशङ्क्याऽऽह—परेति । कथमेतज्ज्ञातमित्याशङ्क्य प्रकरणसामर्थ्यादित्याह—न हीति ॥ १३ ॥

---

१ ङ. अ. कः । २ ट. °रेव प्र° । ३ क. ज. अ. °निर्ह्याचा° । झ. °निराचा° । ४ ङ. ज. अ. एतान्ब्र° । ५ क. ङ. अ. °ति व° । ६ क. °षाऽवग° । ७ ट. °त्वादिति ॥ १३ ॥ न । ८ ख. झ. युक्त° । ९ ठ. ङ. °नादिति ।

न च कार्ये प्रतिपत्त्यभिसंधिः ॥ १४ ॥ (५)

" अपि च " प्रजापतेः सभां वेश्म प्रपद्ये " [छा० ८-१४-१] इति नायं कार्यविषयः " प्रतिपत्त्यभिसंधिः " " नाम-रूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म " [छा० ८-१४-१] इति कार्यविलक्षणस्य परस्यैव ब्रह्मणः प्रकृतत्वात् । " यशोऽहं भवामि ब्राह्मणानाम् " [छा० ८-१४-१] इति च सर्वात्मत्वेनोपक्रमणात् । " न तस्य प्रतिमाऽस्ति यस्य नाम महद्यशः " [श्वेता० ४-१९] इति च परस्यैव ब्रह्मणो यशोनामत्वप्रसिद्धेः । सा चेयं वेश्मप्रतिपत्तिर्गतिपूर्विका हार्दविद्यायामुदिता " तदप-राजिता पूर्ब्रह्मणः प्रभुर्विमितं हिरण्मयम् " [छा० ८-५-३] इत्यत्र । पदैरपि च गत्यर्थत्वान्मार्गापेक्षताऽवसीयते । तस्मात्प-रब्रह्मविषया गतिश्रुतय इति पक्षान्तरम् । तावेतौ द्वौ पक्षावाचार्येण सूत्रितौ, गत्युपपत्त्यादिभिरेको मुख्यत्वादिभिरपरः । तत्र

ब्रह्मश्रुतेरमृतत्वश्रुतिलिङ्गात्तयोर्ध्वमायान्नितिप्रकरणाच्च परविषया गतिरित्युक्तम् । संप्रति प्रजापतेः सभां वेश्म प्रपद्ये प्राप्नुयामिति मरणकाले यः प्रतिपत्त्यभिसंधिः प्राप्ति-संकल्पः स कार्यगोचर इति तस्यैव गन्तव्यतेत्याशङ्क्याऽऽह—न चेति । तद्विवृणो-ति—अपि चेति । परस्यैव गन्तव्यत्वे हेत्वन्तरमाह—यशोऽहमिति । आत्मा यशः-शब्दार्थः । ब्राह्मणानामहमात्मा भवामि यशो राज्ञां यशो विशामिति सर्वात्मत्वोक्ते-रपि न परिच्छिन्नकार्यापत्तिरित्यर्थः । यशःशब्देन विश्रुतत्वमुक्तं नाऽऽत्मेत्याशङ्क्याऽऽ-ह—नेति । अस्त्वधिकाराद्ब्रह्मविषयैव वेश्मप्रतिपत्त्यादिसंकल्पना तथाऽपि कथं सा गतिपूर्विका वेश्मप्रतिपत्तेः स्तुतिमात्रत्वादित्याशङ्क्याऽऽह—सा चेति । तत्तत्र ब्रह्म-लोके केनापि ब्रह्मचर्यादिहीनेन न पराजितेत्यपराजिता पूरस्य ब्रह्मणो हिरण्यगर्भस्य तेनैव प्रभुणा निर्मितं हिरण्मयं वेश्म चास्ति तत्प्रत्यते विद्वानिति दहरविद्यायां गतिपू-र्विका वेश्मप्रतिपत्तिरुक्ता तेन परब्रह्मण्यपि वेश्मप्रतिपत्तिसाम्याद्गतिपूर्वकत्वं तस्याः सिध्य-तीत्यर्थः । किंच पद गताविति स्मृतेरपि वेश्मप्रतिपत्तेर्मार्गापेक्षा भातीत्याह—पदैरिति । पूर्वपक्षमुपसंहरति—तस्मादिति । परं जैमिनिरित्यादिसिद्धान्तसूत्राण्युत्तरसूत्रत्वा-त्पूर्वाणि पूर्वपक्षसूत्राणीत्याशङ्क्य व्यवस्थार्थं पातनिकां करोति—ताविति । तथाऽपि कथं व्यवस्थेत्याशङ्क्याऽऽह—तत्रेति । द्वितीये पक्षे ब्रह्मशब्दस्य मुख्यार्थ-

---

१ ज. झ. प्रत्यभि° । २ ट. °तस्यैव । ३ ट. °ति सं° । ४ क. °त्मत्वानुक्रं° । ५ ङ. ज. ञ. ट. °क्रमात् । ६ ट. °का दहरवि° । ७ झ. °विमतं । ८ ठ. ड. °नामा° । ९ क. ख. °णा विनि° ।

(उत्तरमार्गेण कार्यब्रह्मगमनम्, अधि० ५)

गत्युपपत्त्यादयः प्रभवन्ति मुख्यत्वादीनाभासयितुं न तु मुख्यत्वादयो गत्युपपत्त्यादीनित्याद्य एव सिद्धान्तो व्याख्यातो द्वितीयः[1] पूर्वपक्षः। न चासत्यपि संभवे मुख्यस्यैवार्थस्य ग्रहणमिति कश्चिदाज्ञापयिता विद्यते। परविद्याप्रकरणेऽपि च तत्स्तुत्यर्थं विद्यान्तराश्रयगत्यनुकीर्तनमुपपद्यते " विष्वङ्ङन्या उत्क्रमणे भवन्ति " [छा० ८·६·६] इतिवत्। " प्रजापतेः सभां वेश्म प्रपद्ये[2] " [छा० ८·१४·१] इति तु पूर्ववाक्यविच्छेदेन कार्येऽपि प्रतिपत्त्यभिसंधिर्न[3] विरुध्यते। सगुणेऽपि च ब्रह्मणि[4] सर्वात्मत्वसंकीर्तनं " सर्वकर्मा सर्वकामः " [छा० ३·१४·२] इत्यादिवदेवकल्पते[5]। तस्मादपरविषया एव गतिश्रुतयः।

केचित्पुनः पूर्वाणि पूर्वपक्षसूत्राणि भवन्त्युत्तराणि सिद्धान्तसूत्राणीत्येतां व्यवस्थामनुरुध्यमानाः परविषया एव गतिश्रुतीः प्रतिष्ठापयन्ति, तदनुपपन्नं गन्तव्यत्वानुपपत्तेर्ब्रह्मणः। यत्सर्वगतं सर्वान्तरं सर्वात्मकं च परं ब्रह्म "आकाशवत्सर्वगतश्च नित्यः" "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः" [बृ० ३·४·१] "आत्मैवेदं सर्वम्" [छा० ७·२५·२] "ब्रह्मैवेदं विश्वमिदं वरिष्ठम्[6]" [मुण्ड० २·२·११] इत्यादिश्रुतिनिर्धारितविशेषं,

---

लाभात्तस्यैवोत्तरपक्षत्वमित्याशङ्क्याऽऽह—न हीति। यत्तु प्रकरणसामर्थ्यात्परविषयत्वं गतेरिति तत्राऽऽह—परेति। यथा ब्रह्मनाडीगतिप्रशंसार्थं नाड्यन्तराणि विद्यासंसर्गशून्यान्येव तत्प्रकरणेऽनुकीर्त्यन्ते तथा दहरादिविद्याश्रयगतिनिमित्तफलानुकीर्तनं परविद्याधिकारेऽपि युज्यते तस्या गतिराहित्येऽपि तत्पूर्वकफलस्य तयैव सिद्धेर्महतीयं विद्या निरतिशयैश्वर्यहेतुत्वादिति स्तुतिप्रकर्षसंभवादित्यर्थः। यत्तु कार्ये प्रतिपत्त्यभिसंधिर्नास्तीति तत्राऽऽह—प्रजेति। श्रुतिवाक्याभ्यां प्रकरणं हेयमिति भावः। यत्तु सर्वात्मत्वानुक्रमणात्परविषयत्वं प्रतिपत्त्यभिसंधेरिति तत्राऽऽह—सगुणेऽपीति। प्रशंसार्थमुपास्त्यर्थं वा तदनुक्रमणमित्यर्थः। परविषयगत्ययोगे फलितमाह—तस्मादिति।

पक्षान्तरमनुभाष्य दूषयति—केचिदित्यादिना। ब्रह्मणो गन्तव्यत्वानुपपत्तिमुपपादयति—यदिति। यदुक्तविशेषणं परब्रह्म तस्य कदाचिदपि न गन्तव्यतेति संबन्धः। तस्य सर्वगतत्वे मानमाह—आकाशवदिति। सर्वान्तरत्वेऽपि श्रुतिमाह—यदिति। सर्वात्मकत्वेऽपि श्रुतिमाह—आत्मैवेति। अनुपपत्तिमेव स्फोरयति—

---

१ ङ. ञ °तीयस्तु पूं। २ ङ. ञ. प्रतिप°। ३ ङ. ञ. °पि ब्र°। ४ ङ. ञ. °णि च सं°। ५ ङ. ञ. °वत्कल्प°। ६ क. °पत्तिः। ग°। ७ ङ. ञ. °विश्वं व°। ८ ठ. ङ. परं ब्र°।

तस्य गन्तव्यता न कदाचिदप्युपपद्यते । न हि गतमेव गम्यते । अन्यो ह्यन्यद्गच्छतीति प्रसिद्धं लोके । ननु लोके गतस्यापि गन्तव्यता देशान्तराविशिष्टा दृष्टा । यथा पृथिवीस्थ एव पृथिवीं देशान्तरद्वारेण गच्छति । तथाऽनन्यत्वेऽपि बालस्य कालान्तराविशिष्टं वार्धक्यं स्वात्मभूतमेव गन्तव्यं दृष्टं तद्वद्ब्रह्मणोऽपि सर्वशक्त्युपेतत्वात्कथंचिद्गन्तव्यता स्यादिति । न । प्रतिषिद्धसर्वविशेषत्वाद्ब्रह्मणः । " निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् " [श्वेता० ६-१९] " अस्थूलमनण्वहस्वमदीर्घम् " [बृ० ३-८-८] " सबाह्याभ्यन्तरो ह्यजः " [मुण्ड० २-१-२] " स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म " [बृ० ४-४-२५] " स एष नेति नेत्यात्मा " [बृ० ३-९-२६] इत्यादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादिविशेषयोगः परमात्मनि कल्पयितुं शक्यते । येन भूप्रदेशवयोवस्थान्यायेनास्य गन्तव्यता

न हीति । गतेरकिंचित्करत्वादित्यर्थः । प्राप्ते प्राप्तिफला गतिरयुक्तेत्येतद्व्यतिरेकेण स्फुटयति—अन्यो हीति । स्वरूपेण प्राप्तस्यापि ब्रह्मणो विकारापत्तितया गन्तव्यतासिद्धिरिति दृष्टान्तेन शङ्कते—नन्विति । सर्वगतस्यायुक्ता गन्तव्यतेत्युक्तं प्रत्याह—तथेति । अनन्यत्वं साधनसाध्यत्वं विना प्राप्तत्वम् । यत्तु प्रत्यगात्मत्वाद्ब्रह्मणो न गन्तव्यतेति तत्राऽऽह—स्वात्मेति । एकस्यैव ब्रह्मणो गन्तृगन्तव्यता सिध्यतीत्यत्र हेतुमाह—सर्वेति । तथाऽपि ग्रामादिवन्न गन्तव्यतेत्याशङ्क्याऽऽह—कथंचिदिति । वैषम्यं दर्शयन्नाह—नेत्यादिना । ब्रह्मणो निर्विशेषत्वे मानमाह—निष्कलमित्यादिना । " अनादिमत्परं ब्रह्म " इत्याद्या स्मृतिः । न्यायस्तु विशेषाणां तद्दृष्टिनिविष्टत्वेन दृश्यत्वासिद्धिरंशतः स्वदृश्यत्वापातान्न च तद्दृश्यत्वं विना तत्सिद्धिर्जडत्वात्स्वतःसिद्धत्वे चाऽऽत्मानतिरेकात्तस्मात्तस्य निर्विशेषतेति । देशकालादीत्यादिशब्देनावस्थावयवादि गृह्यते । निर्विशेषत्वे फलितमाह—येनेति । येन सविशेषत्वेन भूप्रदेशादिदृष्टान्तेन

---

१ क. °चिदुप° । २ ङ. ज. ञ. गम्येत । ३ ज. °न्योऽन्य° । ४ ङ. ञ. ट. °शिष्टस्य दृ° । ज. °शिष्टे दृ° । ५ ट. °शिष्टस्य वा° । ६ क. ज. ट. वार्धकं । ७ ठ. °षगत्वा° । ८ ङ. ञ. °मजमदी° । ९ ङ. ज. ञ. ट. °त्यादि° । १० क. ञ. °त्मन । कं° । ११ ठ. ङ. °रेकतः स्फु° । १२ क. ख. ठ. ङ. °त्वे तद्दृश्य° । १३ क. ख. °शतश्च दृ° ।

स्यात् । भूवयसोस्तु प्रदेशावस्थादिविशेषयोगादुपपद्यते देशकालविशिष्टा गन्तव्यता ।

जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मण इति चेत् । न । विशेषनिराकरणश्रुतीनामनन्यार्थत्वात् । उत्पत्त्यादिश्रुतीनामपि समानमनन्यार्थत्वमिति चेत् । न । तासामेकत्वप्रतिपादनपरत्वात् । मृदादिदृष्टान्तैर्हि सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयच्छास्त्रं नोत्पत्त्यादिपरं भवितुमर्हति । कस्मात्पुनरुत्पत्त्यादिश्रुतीनां विशेषनिराकरणश्रुतिशेषत्वं न पुनरितरशेषत्वमितरासामिति । उच्यते--विशेषनिराकरणश्रुतीनां निराकाङ्क्षार्थत्वात् । न ह्यात्मन एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः काचिदाकाङ्क्षोपजायते पुरुषार्थसमाप्तिबुद्ध्युपपत्तेः । " तत्र को मोहः कः शोक एकत्वमनुपश्यतः " [ईशा०७] " अभयं वै जनक प्राप्तोऽसि " [बृ०४-२-४] "विद्वान्न बिभेति कुतश्चन। एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवम् " [तैत्ति० २-९-१] इत्यादिश्रुतिभ्यः । तथैव च विदुषां तुष्ट्यनुभवादिदर्शनात्। विकारानृताभिसंध्यपवादाच्च " मृत्योः स मृत्युमाप्नोति य इह नानेव

ब्रह्मणो गन्तव्यता न तथा तस्य सविशेषतेति योजना । दृष्टान्तेऽपि कथं गतस्यैव गन्तव्यतेत्याशङ्क्याऽऽह–भूवयसोस्त्विति । अवस्थादीत्यादिना वयवपरिणामादिग्रहः ।

सर्वशक्तित्वाद्युक्तं ब्रह्मणो विशेषवत्त्वेन गन्तव्यत्वमित्युक्तं स्मारयति—जगदिति । अपरिणामिनोऽकारकत्वात्तत्कारणत्वाय परिणामित्वं कार्यप्रतियोगिशक्तिमत्त्वं चास्तीति कुतो गन्तव्यत्वासिद्धिरित्यर्थः । विशेषनिराकरणस्य निःशेषशोकादिनिरासफलत्वादुत्पत्त्यादिविधानस्य चाफलत्वात्फलवत्संनिधावफलं तदङ्गमितिन्यायान्न ब्रह्मणः सविशेषतेति दूषयति—नेत्यादिना । उक्तमेवार्थं चोद्यसमाधिभ्यां विवृण्वन्नादौ चोद्यं दर्शयति—उत्पत्त्यादीति । तासामनन्यार्थत्वमसिद्धमित्याह—नेति । एकत्वपरत्वमुपपादयति—मृदादीति । शेषशेषित्वे नियामकाभावमादाय शङ्कते—कस्मादिति । नियामकं दर्शयति—उच्यत इति । फलवत्तया नैराकाङ्क्ष्यं स्फोरयति—न हीति । एकत्वज्ञाने सर्वाकाङ्क्षाशान्तिरित्यत्र श्रुतीराह—तत्रेत्यादिना । श्रौते विद्याफले विद्वदनुभवमनुकूलयति–तथैवेति । द्वैतस्य निन्द्यमानत्वादपि न प्रतिपाद्यतेत्याह–विकारेति ।

---

१ क. 'त्वशु' । २ ङ- 'यः कदाचि' । ग. यः कञ्चिदा' । ३ क. ङ. थ. 'दुध्युत्पत्तेः । ४ क. ट. 'रवमित्या' । ५ ट. 'व वि' । ६ क. ख. 'थं त' । ७ ठ. ङ. 'व्यतासि' ।

पश्यति " [कठ० ४-१०] इति । अतो न विशेषनिराकरण-श्रुतीनामन्यशेषत्वमवगन्तुं शक्यम् । नैवमुत्पत्त्यादिश्रुतीनां निराकाङ्क्षार्थत्वप्रतिपादनसामर्थ्यमस्ति । प्रत्यक्षं तु तासामन्यार्थत्वं समनुगम्यते । तथा हि—" तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यति " [छा० ६-८-३] इत्युपन्यस्योदर्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति—" यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म " [तै० ३-१-१] इति च । एवमुत्पत्त्यादिश्रुतीनामैकात्म्यावगमपरत्वान्नानेकशक्तियोगो ब्रह्मणः । अतश्च गन्तव्यत्वानुपपत्तिः । " न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति " [बृ० ४-४-६] इति च परस्मिन्ब्रह्मणि गतिं निवारयति । तद्व्याख्यातम् " स्पष्टो ह्येकेषाम् " [ब्र० सू० ४-२-१३] इत्यत्र ।

गतिकल्पनायां च गन्ता जीवो गन्तव्यस्य ब्रह्मणोऽवयवो विकारोऽन्यो वा ततः स्यात् । अत्यन्ततादात्म्ये गमनानुपपत्तेः । यद्येवं

विशेषनिषेधश्रुतीनां निराकाङ्क्षज्ञानोत्पादकत्वे फलितमाह—अतो नेति । तुल्यमुत्पत्त्यादिश्रुतीनामपि तथाविधधीजनकत्वमित्याशङ्क्याऽऽह—नैवमिति । न केवलं युक्तिमात्रेणोत्पत्त्यादिश्रुतीनामन्यार्थत्वं किंतु श्रुतिसामर्थ्यादपीत्याह—प्रत्यक्षं त्विति । तत्र च्छन्दोगश्रुत्या तासामन्यार्थत्वं स्फुटयति—तथा हीति । तत्रेति मूलकारणोक्तिः । एतच्छुङ्गं जगदात्मकं कार्यमुत्पतितमुत्पन्नमिति यावत् । तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छेति सत एवोत्तरत्र कार्यलिङ्गेन ज्ञेयत्वोक्तेस्तत्तेजोऽसृजतेत्यादिश्रुतीनां तच्छेषत्वं सिद्धमित्यर्थः । तैत्तिरीयश्रुत्याऽपि जन्मादिश्रुतीनामैक्यधीशेषत्वमाह—यत इति । तासामन्यपरत्वे फलितमाह—एवमिति । ब्रह्मणोऽनेकशक्तिमत्त्वाभावेऽपि न परविषया गतिरित्यत्र किमायातं तदाह—अतश्चेति । इतश्च परविषये न गतिरित्याह—न तस्येति । न तस्मादिति माध्यंदिनश्रुत्या निषेधश्रुतेरन्यार्थत्वमाशङ्क्योक्तं स्मारयति—तदिति ।

गन्तव्यरूपालोचनया गतिरयुक्तेत्युक्तम् । अधुना गन्तृरूपालोचनयाऽपि सा न युक्तेति वक्तुं विकल्पयति—गतीति । अन्यानन्यत्वमाश्रित्याऽऽद्यौ विकल्पावत्यन्तभेदमाश्रित्यान्त्य इति भेदः । आत्यन्तिकमनन्यत्वं किमिति न विकल्प्यते तत्राऽऽह—अत्यन्तेति । कल्पत्रयेऽपि दोषजिज्ञासया पृच्छति—यदीति । पक्षत्रयेऽपि दोषमाह—

---

१ ट. °इक्षाप्र° । २ क. ज्ञ. 'र्थप्र' । ३ क. 'ति वा' । ४ ज्ञ. °रो वाऽन्यो । ५ ठ. ड. साऽयुं ।

ततः किं स्यात् । अत उच्यते—यद्येकदेशस्तेनैकदेशिनो नित्यप्राप्तत्वान्न पुनर्ब्रह्मगमनमुपपद्यते । एकदेशैकदेशित्वकल्पना च ब्रह्मण्यनुपपन्ना निरवयवत्वप्रसिद्धेः । विकारपक्षेऽप्येतत्तुल्यं विकारेणापि विकारिणो नित्यप्राप्तत्वात् । न हि घटो मृदात्मतां परित्यज्यावतिष्ठते परित्यागे[२] वाऽभावप्राप्तेः । विकारावयवपक्षयोश्च तद्वतः स्थिरत्वाद्ब्रह्मणः संसारगमनमप्यनवकॢप्तम् । अथान्य एव जीवो ब्रह्मणः । सोऽणुर्व्यापी मध्यमपरिमाणो वा भवितुमर्हति, व्यापित्वे गमनानुपपत्तिः । मध्यमपरिमाणत्वे चानित्यत्वप्रसङ्गः । अणुत्वे[३] कृत्स्नशरीरवेदनानुपपत्तिः । प्रतिषिद्धे चाणुत्वमध्यमपरिमाणत्वे विस्तरेण पुरस्तात् । परस्माच्चान्यत्वे जीवस्य "तत्त्वमसि" [छा० ६-८-७] इत्यादिशास्त्रबाधप्रसङ्गः । विकारावयवपक्षयोरपि समानोऽयं दोषः । विकारावयवयोस्तद्वतोऽनन्यत्वाददोष इति चेत् । न । मुख्यैकत्वानुपपत्तेः । सर्वेषु चैतेषु[६] पक्षेष्वनिर्मोक्षप्रसङ्गः ।

उच्यत इति । आद्यमनूद्य प्रत्याह—यदीति । प्रथमपक्षस्योत्थानमेव नास्तीत्याह—एकदेशेति । उक्तदोषसाम्याद्द्वितीयं निराह—विकारेति । नित्यप्राप्तत्वं दृष्टान्तेन स्पष्टयति—न हीति । विपक्षे दोषमाह—परित्यागे वेति । पक्षद्वयेऽपि दोषान्तरमाह—विकारेति । ब्रह्म सविकारं सावयवं चेष्टं तस्य सह विकारैरवयवैश्च निश्चलत्वात्कुतो जीवानां संसारगमनरूपं चलनं न हि स्थिरात्मनामस्थिरत्वं युक्तमन्यानन्यत्वं च विरुद्धत्वान्नोपगन्तुं शक्यमित्यर्थः । तृतीयमनुवदति—अथेति । तं त्रेधा विकल्प्य दूषयति—सोऽणुरित्यादिना । अनित्यत्वप्रसङ्गो घटादिषु तथादृष्टेरिति शेषः । पक्षद्वयानुपपत्तिं तर्कपादे वियत्पादे चोक्तां स्मारयति—प्रतिषिद्धे चेति । अन्यत्वपक्षे श्रुतिविरोधं दोषान्तरमाह—परस्माच्चेति । पूर्वोक्तेऽपि पक्षद्वये श्रुतिविरोधस्य तुल्यत्वमाह—विकारेति । तयोस्तद्वतोऽन्यत्ववदनन्यत्वस्यापि भावान्नेति शङ्कते—विकारेति । भेदाभेदयोर्विरोधिनोरेकत्रायोगाद्बुद्धिव्यपदेशभेदाद्विकारावयवयोस्तद्वतो भेदे सत्ययुतसिद्धत्वादुपचारेणाभेदोक्तिरित्यमुख्यं जीवस्य ब्रह्मैक्यं स्यादित्याह—नेति । किं च पक्षत्रयेऽपि संसारित्वस्य तात्त्विकत्वात्तस्याऽऽत्यन्तिकनाशे जीवरूपनाशादयुक्तं पक्षत्रयमपीत्याह—सर्वेष्विति । संसारित्वे निवृ-

---

१ क. स्यादिति । उ°। ङ. ञ. स्यात् । उ° । २ क. ङ. ज. ञ. °गेऽभा° । ट. °गे चाभा° । ३ क. ज. °णुत्वेऽपि च कृ° । ङ. ञ. °णुत्वेऽपि कृ° । ४ क. °मस्यादि° । ५ ङ. ञ. °मानो दो° । ६ क. ज. चैषु । ७ ख. °श्चलित्वा° । ८ क. ख. °स्तत्त्वतो ।

संसार्यात्मत्वानिवृत्तेः । निवृत्तौ वा स्वरूपनाशप्रसङ्गः । ब्रह्मात्मत्वानभ्युपगमाच्च ।

यत्तु कैश्चिज्जल्प्यते नित्यानि नैमित्तिकानि कर्माण्यनुष्ठीयन्ते प्रत्यवायानुत्पत्तये काम्यानि प्रतिषिद्धानि च परिहियन्ते स्वर्गनरकानवाप्तये सांप्रतदेहोपभोग्यानि च कर्माण्युपभोगेनैव क्षेप्यन्त इत्यतो वर्तमानदेहपातादूर्ध्वं देहान्तरप्रतिसंधानकारणाभावात्स्वरूपावस्थानलक्षणं कैवल्यं विनाऽपि ब्रह्मात्मतयैवंवृत्तस्य सेत्स्यतीति । तदसत् । प्रमाणाभावात् । न ह्येतच्छास्त्रेण केनचित्प्रतिपादितं मोक्षार्थीत्थं समाचरेदिति । स्वमनीषया त्वेतत्तर्कितं यस्मात्कर्मनिमित्तः संसारस्तस्मान्निमित्ताभावान्न भविष्यतीति । न चैतत्तर्कयितुं शक्यते, निमित्ताभावस्य दुर्ज्ञानत्वात् । बहूनि हि कर्माणि जात्यन्तरसंचितानीष्टानिष्टविपाकान्येकैकस्य जन्तोः संभाव्यन्ते । तेषां विरुद्धफलानां युगपदुपभोगासंभवात्कानिचिल्लब्धावसराणीदं जन्म निर्मिमते कानिचित्तु देशकालनिमित्तप्रतीक्षाण्यासत इत्यतस्तेषामवशिष्टानां सांप्रतेनोपभोगेन क्षपणासंभवान्न यथावर्णितचरितस्यापि वर्तमानदेहपाते देहान्तरनिमित्ताभावः शक्यते निश्चेतुम् । कर्मशेषसद्भावसिद्धिश्च "तद्य

त्तेऽपि सिद्धान्तवन्न जीवरूपनाशप्रसक्तिरित्याशङ्क्याऽऽह—ब्रह्मेति ।

संसारस्य कर्मनिमित्तत्वात्तदभावेऽभावान्मुक्तिरनायाससिद्धेति मतं दर्शयति—यत्त्विति । देहान्तरप्रतिसंधानं तेन संबन्धस्तद्ग्रहणमिति यावत् । एवंवृत्तस्य नित्याद्यनुष्ठानवतो वर्णितचरितस्य मुमुक्षोरित्यर्थः । किं शास्त्रादेव मुच्यते किंवा तर्कादिति विकल्प्याऽऽद्यं प्रत्याह—तदसदिति । प्रमाणाभावं प्रकटयति—न हीति । द्वितीयमनुवदति—स्वेति । स्वोत्प्रेक्षितमपि युक्तत्वादेष्टव्यमिति पक्षं प्रत्याह—न चेति । निमित्ताभावस्य दुर्ज्ञानत्वं प्रपञ्चयति—बहूनीति । सर्वाण्येव तानि मुमुक्षुदेहे भोगेन क्षपितानीत्याशङ्क्याऽऽह—तेषामिति । अनुपभुक्तकर्मणां देहान्तरसंभवान्नित्याद्यनुष्ठानवतोऽपि तत्त्वज्ञानं विना नास्ति मोक्षाशेति फलितमाह—इत्यत इति । ऐकभविकत्वात्कर्माशयस्य वर्तमानभोगेन क्षपणसंभवान्मोक्षसिद्धिरित्याशङ्क्य कृतात्ययेऽनुशयवानित्यत्रैकभविकत्वं दूषितमिति मत्वाऽऽह—कर्मेति ।

---

१ क. °त्वानतिवृ° । ट. °त्वानुवृ° । २ क. ङ. ज. ञ. °मात् । य° । ३ ङ. ञ. ट. नित्यनै° । ४ क. ज. °नि च क° । ५ झ. क्षिप्यन्त । ६ क. ज. °नीषिकया । ७ झ. न च त° । ८ ङ. ज. ञ. ट. °नि क° । ९ क. °णि जन्मान्त° । १० क. ख. °र्मणा दे° ।

इह रमणीयचरणाः" [छा०५-१०-७] "ततः शेषेण" [गौत० सू० ११-२९] इत्यादिश्रुतिस्मृतिभ्यः।

स्यादेतत्। नित्यनैमित्तिकानि तेषां क्षेपकाणि भविष्यन्तीति। तन्न, विरोधाभावात्। सति हि विरोधे क्षेप्यक्षेपकभावो भवति, न च जन्मान्तरसंचितानां सुकृतानां नित्यनैमित्तिकैरस्ति विरोधः। शुद्धिरूपत्वाविशेषात्। दुरितानां त्वशुद्धिरूपत्वात्सति विरोधे भवतु क्षेपणं, न तु तावता देहान्तरनिमित्ताभावसिद्धिः। सुकृतनिमित्तत्वोपपत्तेः। दुश्चरितस्याप्यशेषक्षपणानवगमात्। न च नित्यनैमित्तिकानुष्ठानात्प्रत्यवायानुत्पत्तिमात्रं न पुनः फलान्तरोत्पत्तिरिति प्रमाणमस्ति फलान्तरस्याप्यनुनिष्पादिनः संभवात्। स्मरति ह्यापस्तम्बः-"तद्यथाऽऽम्र फलार्थे निर्मि(मि)ते छायागंन्धावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते" [धर्मसू० १-७-२०-३] इति। न चासति सम्यग्दर्शने सर्वात्मना काम्यप्रतिषिद्धवर्जनं जन्मप्रायणान्तराले केनचित्प्रतिज्ञातुं शक्यम्। सुनिपुणानामपि सूक्ष्मापराधदर्शनात्। संशयितव्यं तु भवति

अनारब्धफलानामपि कर्मणां नित्यनैमित्तिकेभ्यो निवृत्तेरुक्तचरितस्य मुक्तिरिति शङ्कते—स्यादेतदिति। किं तानि सुकृतानामपि क्षेपकाण्याहो दुरितानामेवेति विकल्प्याऽऽद्यं निरस्यति—नेत्यादिना। तेषां सुकृतविरोधित्वे काम्यकर्मोपदेशवैयर्थ्यं तेषामपि तैर्विनाशादिति मन्वानो विरोधं विवृणोति—सतीति। द्वितीयमङ्गी करोति—दुरितानां त्विति। तर्हि तन्निबर्हणे तावतैव देहान्तराभावान्मुक्तेरैक्यधीवैयर्थ्यं नेत्याह—न त्विति। केवलसुकृतारब्धं शरीरं नास्त्यप्रियस्यापि दुरितफलस्य तत्र दर्शनादित्याशङ्क्याऽऽह—दुश्चरितस्येति। किंच मुमुक्षुभिरनुष्ठितनित्यनैमित्तिकवशादपि देहान्तरसंभवान्नोक्तचरितस्य मुक्त्याशाऽस्तीत्याह—न चेति। तेषामानुषङ्गिकफलत्वं संभावितमपि न प्रमितमित्याशङ्क्याऽऽह—स्मरतीति। निमित्त(त) आरोपिते सतीति यावत्। किंच काम्यनिषिद्धकर्मशेषवशादपि देहान्तरसिद्धेर्नोक्तचरितस्य मुक्तिरित्याह—न चेति। अस्मदादीनां स्थूलधियां सम्यग्धियं विना सर्वात्मना काम्याद्यवर्जनेऽपि ज्ञानादशेषकाम्यादिवर्जनासिद्धिरित्याशङ्क्याऽऽह—सुनिपुणानामिति। प्रमादो भवत्येवेत्यनियमान्नो जन्मान्तरमित्याशङ्क्याऽऽह—संशयितव्यमिति। निमित्तसद्भावेऽपि

---

१ ट. °धे क्षप्य°। २ ङ. च. °ति हि वि°। ३ ङ.ञ क्षेपणं। ४ज. दुरित°। ५ क. °षक्षेप°। ६ ट. °स्यानु°। ७ ज. ट. °म्रे निर्मिते फ°। झ. °म्रे निर्मित्ते फ°। ८ ज. झ. ट °र्थे छा°। ९ क. निमित्ते छा°। १० क. °गन्ध इत्यनू°। ११ ज. च चर्य°। १२ ज. ट. °व्यं भ। १३ ठ. ड. °पि क्षप°। १४ झ. ट. °नां चेति। १५ क. °रब्धश° १६ क. ख. दुरि°।

तथाऽपि निमित्ताभावस्य दुर्ज्ञानत्वमेव । न चानभ्युपगम्यमाने ज्ञानगम्ये ब्रह्मात्मत्वे कर्तृत्वभोक्तृत्वस्वभावस्याऽऽत्मनः कैवल्यमाकाङ्क्षितुं शक्यम् । अग्न्यौष्ण्यवत्स्वभावस्यापरिहार्यत्वात्।

स्यादेतत् । कर्तृत्वभोक्तृत्वकार्यमनर्थो न तच्छक्तिस्तेन शक्त्यवस्थानेऽपि कार्यपरिहारादुपपन्नो मोक्ष इति । तच्च न । शक्तिसद्भावे कार्यप्रसवस्य दुर्निवारत्वात् । अथापि स्यान्न केवला शक्तिः कार्यमारभतेऽनपेक्ष्यान्यानि निमित्तानि । अत एकाकिनी सा स्थिताऽपि नापराध्यतीति । तच्च न । निमित्तानामपि शक्तिलक्षणेन संबन्धेन नित्यसंबद्धत्वात् । तस्मात्कर्तृत्वभोक्तृत्वस्वभावे सत्यात्मन्यसत्यां विद्यागम्यायां ब्रह्मात्मतायां न कथं चन मोक्षं प्रत्याशाऽस्ति । श्रुतिश्च " नान्यः पन्था विद्यतेऽयनाय " [श्वेता० ३-८] इति ज्ञानादन्यं मोक्षमार्गं वारयति ।

परस्मादनन्यत्वेऽपि जीवस्य संव्यवहारलोपप्रसङ्गः । प्रत्यक्षादि-

---

निश्चयाभावे जन्मान्तरमनिश्चितमसिद्धमेव स्यादित्याशङ्क्याऽऽह—तथाऽपीति । तस्य दुर्ज्ञानत्वे जन्मान्तराभावस्यापि तथात्वात्त्वत्पक्षासिद्धिरित्यर्थः । किं चाऽऽत्मनि कर्तृत्वादि स्वाभाविकमारोपितं वाऽऽद्येऽपि तत्कार्यं तच्छक्तिर्वा स्वभावः । प्रथमे तस्मिन्निवृत्ते स्थिते वा मुक्तिर्नाऽऽद्यः स्वभावस्य निवर्तयितुमशक्यत्वात् । न द्वितीयो व्याघातादित्याह—न चेति ।

द्वितीयं शङ्कते—स्यादिति । किं शक्तेरस्ति कार्यारम्भकत्वमुत न । आद्येऽपि सा निरपेक्षा कार्यमारभते सापेक्षा वा नाऽऽद्य इत्याह—तच्च नेति । कल्पान्तरमुत्थापयति—अथापीति । अदृष्टादिनिमित्ताभावादुपभोगलक्षणोऽनर्थो नास्तीत्यर्थः । कर्तृत्वभोक्तृत्वयोर्निमित्तसंबन्धस्याऽऽत्मनोऽदृष्टादिनिमित्तैः संबन्धस्य च शक्तिद्वारा सदातनत्वात्कदाचित्तस्या भोगारम्भकत्वसंभवान्न मुक्तिरित्याह—तच्चेति । सा चेत्कार्यं नाऽऽरभते तर्हि तस्या असत्त्वमेव कार्यैकगम्यत्वादिति मत्वा शक्तेर्वा कार्यस्य वा स्वाभाविकत्वनिरासमुपसंहरति—तस्मादिति । आत्मनि कर्तृत्वादेरारोपितत्वे ज्ञानादेव तन्निवृत्तेर्न कर्मसाध्या मुक्तिरित्युपेत्य ज्ञानमात्रायत्ता सेत्यत्र मानमाह—श्रुतिश्चेति।

प्रासङ्गिके परमते पराकृते मोक्षसिद्धये जीवस्य ब्रह्मात्मत्वोपगमेऽपि तुल्याऽनुपपत्तिरिति शङ्कते—परस्मादिति । तत्त्वज्ञानात्प्रागूर्ध्वं वा व्यवहाराभावो नाऽऽद्यः स्वप्नवदु-

---

१ क. 'त्वभा' । २ ज. 'काङ्क्षयितुं' । ३ ज. 'कर्तृत्वं का' । ४ ज. न शक्तिः । तद्धा' । ५ ट. 'वार्यत्वा' । ६ ज. तथाऽपि । ७ क. 'स्थिता ना' । ८ क. ज. 'बन्धात् । ९ ज. 'मोक्षप्र' । १० ज. ञ. ट. 'स्य सर्वव्य' । ११ ञ. 'त्वात्तत्प' ।

प्रमाणाप्रवृत्तेरिति चेत् । न । प्राक्प्रबोधात्स्वप्नव्यवहारवत्तदुपपत्तेः । शास्त्रं च " यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति " [बृ० २-४-१४; ४-५-१५] इत्यादिनाऽप्रबुद्धविषये प्रत्यक्षादिव्यवहारमुक्त्वा पुनः प्रबुद्धविषये " यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् " [बृ० २-४-१४; ४-५-१५] इत्यादिना तदभावं दर्शयति । तदेवं परब्रह्मविदो गन्तव्यादिविज्ञानस्य बाधितत्वान्न कथंचन गतिरुपपादयितुं शक्या ।

किंविषयाः पुनर्गतिश्रुतय इति, उच्यते—सगुणविद्याविषया भविष्यन्ति । तथा हि-क्वचित्पञ्चाग्निविद्यां प्रकृत्य गतिरुच्यते क्वचित्पर्यङ्कविद्यां क्वचिद्वैश्वानरविद्याम् । यत्रापि ब्रह्म प्रकृत्य गतिरुच्यते यथा " प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म " [छा० ४-१०-५] इति, " अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म " [छा० ८-१-१] इति च, तत्रापि वामनीत्वादिभिः सत्यकामादिभिश्च गुणैः सगुणस्यैवोपास्यत्वात्संभवति गतिः । न क्वचित्परब्रह्मविषया गतिः श्राव्यते यथा गतिप्रतिषेधः श्रावितः " न तस्य प्राणा उत्क्रामन्ति " [बृ० ४-४-६] इति । " ब्रह्मविदाप्नोति परम् " [तै० २-१-१] इत्यादिषु तु सत्यप्याप्नोतेर्गत्यर्थत्वे वर्णितेन न्यायेन देशान्तर-

---

पपत्तेरित्याह—न प्रागिति । तत्रैव शास्त्रानुमतिमाह—शास्त्रं चेति । अप्रबुद्धविषय इति च्छेदः । द्वितीये प्रसङ्गस्येष्टतां शास्त्रावेष्टम्भेनाऽऽचष्टे—पुनरिति । प्रासङ्गिकं परिहृत्य प्रकृतं निगमयति—तदेवमिति ।

परमतं निराकृत्य पूर्वोक्तं स्वमतं प्रश्नपूर्वकं विवृणोति—किमित्यादिना । गतिश्रुतीनां सगुणधीविषयत्वं विशदयति—तथा हीति । ब्रह्म प्रकृत्यापि गतेरुक्तेस्तस्या युक्तं परविषयत्वमित्याशङ्क्याऽऽह—यत्रापीति । सगुणविद्याविषये गतिश्रुतिमुक्त्वा परविद्याविषये तदभावमाह—नेति । ब्रह्मत्वाविशेषात्तत्रापि गतिरेषैवेत्याशङ्क्याऽऽह—यथेति । आप्नोतेर्गत्यर्थत्वात्परविद्याधिकारेऽपि गतिश्रुतिरस्तीत्याशङ्क्याऽऽह—ब्रह्मविदिति । ब्रह्मणः सर्वगतत्वं सर्वान्तरत्वं सर्वात्मत्वमित्यादिवर्णितो न्यायः ।

---

१ क. ज. ञ. ट. °वृत्तिरि° । २ ट. प्राग्बोधा° । ३ क. °प्यन्तीति । त° । ४ ञ. °ति त° । ५ क. ञ. °पि च वा° । ६ क. °कामत्वादि° । ७ ञ. °ते तथथा । ८ ञ. °षेधोऽश्रा° । ९ ठ. ड. °ऋादाच° । १० क. °स्तस्यां यु° । ११ क. ख. °कारे ग° ।

प्राप्त्यसंभवात्स्वरूपप्रतिपत्तिरेवेयमविद्याध्यारोपितनामरूपप्रविलयापेक्षयाऽभिधीयते " ब्रह्मैव सन्ब्रह्माप्येति " [बृ० ४-४-६] इत्यादिवदिति द्रष्टव्यम्। अपि च परविषया गतिर्व्याख्यायमाना प्ररोचनाय वा स्यादनुचिन्तनाय वा। तत्र प्ररोचनं तावद्ब्रह्मविदो न गत्युक्त्या क्रियते। स्वसंवेद्येनैवाव्यवहितेन विद्यासमर्पितेन स्वास्थ्येन तत्सिद्धेः। न च नित्यसिद्धनिःश्रेयसनिवेदनस्यासाध्यफलस्य विज्ञानस्य गत्यनुचिन्तने काचिदपेक्षोपपद्यते। तस्मादपरविषया गतिः। तत्र परापरब्रह्मविवेकानवधारणेनापरस्मिन्ब्रह्मणि वर्तमाना गतिश्रुतयः परस्मिन्ब्रह्मण्यारोप्यन्ते।

किं द्वे ब्रह्मणी परमपरं चेति। बाढम्, " एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः" [प्रश्न० ५-२] इत्यादिदर्शनात्। किं पुनः परं ब्रह्म किमपरमिति। उच्यते—यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधादस्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत्परम्। तदेव यत्र नामरूपादिविशेषेण केनचिद्विशिष्टमुपासनायोपदिश्यते " मनोमयः प्राणशरीरो भारूपः " [छा० ३-१४-२-मैत्रे०२-६] इत्यादिशब्दैस्तदपरम्। नन्वेवमद्वितीयश्रुतिरुपरुध्येत। न। अविद्याकृतनामरूपोपाधिकतया परिहृतत्वात्। तस्य

आप्नोतिस्तर्हि परविषये कथमित्याशङ्क्याऽऽह—स्वरूपेति। इतश्च परविषये नास्ति गतिरित्याह—अपि चेति। तदेव दर्शयितुं विकल्पयति—परेति। प्ररोचनपक्षं प्रत्याह—तत्रेति। स्वसंवेद्यत्वे हेतुमाह—अव्यवहितेनेति। स्वापादिव्यावृत्त्यर्थं विशिनष्टि—विद्येति। अनुचिन्तनपक्षं प्रतिक्षिपति—न चेति। पक्षद्वयनिरासफलं दर्शयति—तस्मादिति। कथं तर्हि केषांचिदाचार्याणां परविषयत्वोपगमो गतेरित्याशङ्क्य सूक्ष्मदृष्टिशून्यत्वादित्याह—तत्रेति।

अपसिद्धान्तं शङ्कते—किमिति। सोपाधिकनिरुपाधिकत्वेन ब्रह्मणो भेदश्रुतिवैरूप्यात्तेन नापराद्धान्तापत्तिरित्याह—बाढमिति। परापरविभागं प्रश्नपूर्वकं विशदयति—किमित्यादिना। उक्तमेवापसिद्धान्तपरिहारं चोद्यद्वारा स्फोरयति—नन्वित्यादिना। परापरविभागस्य मिथ्यात्वे किं स्यादित्याशङ्क्यापरब्रह्मणो गन्तव्यत्वार्थं तदुपास्तिफलमाह—तस्येति। अपरब्रह्मोपासनस्योक्तफलत्वेऽपि कथं तद्विषये गतिरित्याश-

---

१ अ. °पप्रश्नप्र°। २ अ. 'दि च द्र'। ३ अ. °दप्यपे'। ४ क. अ. °षयैव ग°। ५ अ. °णि प्रव°। ६ क. अ. बाढं द्वे। ए°। ७ क. अ. 'षेधेनास्थू'। ८ अ. °ब्रह्म व्यप°। ९ झ. °शेषणेन के°। १० अ. °न्वेवं सत्यद्वि°। ११ ज. ट. °रुध्यते। न। १२ ज. अ. ट. °स्य त्वप°। १३ ख. स्फोटय°। १४ झ. °शङ्कय प°।

चापरब्रह्मोपासनस्य तत्संनिधौ श्रूयमाणम् " स यदि पितृलोककामो भवति " [छा० ८-२-१] इत्यादि जगदैश्वर्यलक्षणं संसारगोचरमेव फलं भवति । अनिर्वर्तितत्वादविद्यायाः । तस्य च देशविशेषावबद्धत्वात्तत्प्राप्त्यर्थं गमनमविरुद्धम् । सर्वगतत्वेऽपि चाऽऽत्मन आकाशस्येव घटादिगमने बुद्ध्याद्युपाधिगमने गमनप्रसिद्धिरित्यवादिष्म " तद्गुणसारत्वात् " [ब्र० सू० २-३-२९] इत्यत्र । तस्मात् "कार्यं बादरिः" [ब्र० सू० ४-३-७] इत्येष एव स्थितः पक्षः । "परं जैमिनिः" [ब्र० सू० ४-३-१२] इति तु पक्षान्तरप्रतिभानमात्रप्रदर्शनं प्रज्ञाविकासनायेति द्रष्टव्यम् ॥ १४ ॥ (५)

(प्रतीकोपासकानां ब्रह्मलोकाप्रापणम्, अधि० ६)

अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात्तत्क्रतुश्च ॥ १५ ॥

स्थितमेतत्कार्यविषया गतिर्न परविषयेति । इदमिदानीं संदिह्यते—किं सर्वान्विकारालम्बनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकमुत कांश्चिदेवेति । किं तावत्प्राप्तं, सर्वेषामेवैषां

क्त्याऽऽह—तस्य चेति । तस्य गन्तव्यत्वेऽपि गन्तृत्वमात्मनो विभुत्वादयुक्तमित्याशङ्क्याऽऽह—सर्वेति । अनिर्वचनीया गतिरनिर्वचनीयसगुणब्रह्मविषयैवोचितेति भावः । परविषये गत्यभावादपरविषये तदुपपत्तेरस्मदुक्तैव पूर्वोत्तरपक्षव्यवस्थेत्युपसंहरति—तस्मादिति ॥ १४ ॥ (५)

गन्तव्यविशेषोक्त्यनन्तरं गन्तृविशेषोक्त्यर्थमाह—अप्रतीकालम्बनानिति । संबन्धं वक्तुं वृत्तं कीर्तयति—स्थितमिति । अमानवपुरुषं विषयीकृत्याविशेषश्रुतेस्तत्क्रतुत्वेनागमनभानाच्च संशयमाह—इदमिति । विद्याफलार्थे देवयाने पथि गन्तृविशेषोक्त्या पादादिसंगतिः । पूर्वपक्षे सर्वेषूपासनेष्वनियमन्यायाद्विकारालम्बनेषु विशेषासिद्धिः । सिद्धान्ते प्रतीकोपासनातिरिक्तेषु तत्क्रतुन्यायाद्विशेषसिद्धिरिति मत्वा विमृश्य पूर्वपक्षयति—किं तावदिति । परस्माद्ब्रह्मणोऽन्यत्रेति कार्यब्रह्मोक्तिः । तत्र

---

१ ट. °क्षणसं° । २ ज. ट. °त्वात्प्रा° । ३ न. च । ४ अ. °तिपादन° । ५ ट. °भामा° । ६ ट. °त्रद° । ७ क. ख. °त्वेन ग° । ८ क. ख. °मनाभावाच्च । ९ ठ. ड. °यानपथे ग° ।

विदुषामन्यत्र परस्माद्ब्रह्मणो गतिः स्यात्। तथा हि—"अनियमः सर्वासाम्" [सू० ३ ३-३१] इत्यत्राविशेषेणैवैषा विद्यान्तरेष्ववतारितेति। एवं प्राप्ते प्रत्याह—"अप्रतीकालम्बनान्" इति। प्रतीकालम्बनान्वर्जयित्वा सर्वानन्यान्विकारालम्बनान्नयति ब्रह्मलोकमिति "बादरायणः" आचार्यो मन्यते। न ह्येवमुभयथाभावाभ्युपगमे कश्चिद्दोषोऽस्ति, अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपासनेषूपपत्तेः। तत्क्रतुश्चास्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः। यो हि ब्रह्मक्रतुः स ब्राह्ममैश्वर्यमासीदेदिति श्लिष्यते "तं यथा यथोपासते तदेव भवति" इति श्रुतेः। न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य। नन्वब्रह्मक्रतुरपि ब्रह्म गच्छतीति श्रूयते यथा पञ्चाग्निविद्यायाम् "स एनान्ब्रह्म गमयति" [छा० ५-१०-२]

गुणोपसंहारेस्थानियमाधिकरणन्यायं हेतुत्वेन स्मारयति—तथा हीति। प्रतीकालम्बनानामपि पितृयाणतृतीयस्थानासंबन्धित्वात्प्रतीकविशेषणत्वेन ब्रह्मणोऽपि तैर्ध्यातत्वाद्ये वै के चेत्यादिवाक्येन च तेषां ग्रहादेतान्ब्रह्म गमयतीत्येतच्छब्देन तेषामपि परामर्शसिद्धेर्विद्यान्तरेषु च गतेरवतारितत्वादविशेषेणामानवः पुरुष एतान्सर्वानेव विकारालम्बनान्ब्रह्मलोकं नयतीति प्राप्तमित्यर्थः। पूर्वपक्षमनुभाष्य सिद्धान्तप्रतिज्ञामवतार्य व्याकरोति—एवमिति। आश्रयान्तरप्रत्ययस्याऽऽश्रयान्तरे क्षेपो हि प्रतीको यथा नाम ब्रह्मेत्यादौ नामादिषु ब्रह्माश्रयस्य प्रत्ययस्य प्रक्षेपः। तदालम्बनाः प्रतीकालम्बनास्तान्विहाय विकारालम्बनान्सगुणविद्यावतः सर्वानिति यावत्। यत्त्वनियमन्यायादविशेषेण सर्वेषां विकारालम्बनानामेषा गतिरिति तद्दूषयन्नुभयथाऽदोषादित्येतद्व्याचष्टे—न हीति। प्रतीकालम्बनान्न नयतीति विकारालम्बनांस्तु नयतीत्युभयथात्वोपगमे सत्यनियमः सर्वासामिति न्यायस्य न कश्चिद्दोषः सर्वशब्दस्य प्रतीकालम्बनातिरिक्तविषयत्वसिद्धेरित्यर्थः। तत्क्रतुश्चेति पदं पदान्तराध्याहारेण व्याकरोति—तत्क्रतुरिति। तस्य हेतुत्वं साधयति—यो हीति। तत्र मानमाह—तमिति। प्रतीकालम्बनैरपि तद्विशेषणत्वेन ब्रह्म ध्यातमित्युक्तमित्याशङ्क्याऽऽह—न त्विति। ब्रह्मदृष्ट्या नामादीनामेव प्रतीकानां प्राधान्येनानुचिन्तनान्न प्रतीकालम्बनानां ब्रह्मक्रतुत्वमित्यर्थः। तत्क्रतुस्तद्भवतीति न्यायस्य व्यभिचारं शङ्कते—नन्विति। न्यायस्यौत्सर्गिकत्वेऽपि

---

१ ज. ट. °मे क्वचिद्दो°। २ म. °वन्तीति। ३ ग. °तुमानपि। ४ ठ. ड. °रस्यानि°। ५ ठ. ड. °रुषः सर्वा°। ६ ख. ठ. ड. °यतीति। ७ क. ख. ठ. ड. °सर्वेषामि। ८ क. ख. छ. ठ° °त्क्रतुस्त्विति। ९ ख. ठ. ड. °तमाश°। १० क. ञ. °नां ध्यानेना°।

इति । भवतु यत्रैवमाहत्यवाद[1] उपलभ्यते, तदभावे त्वौत्सर्गिकेण तत्क्रतुन्यायेन ब्रह्मक्रतूनामेव तत्प्राप्तिर्नेतरेषामिति गम्यते[2]॥ १५॥

विशेषं च दर्शयति ॥ १६ ॥ (६)

नामादिषु प्रतीकोपासनेषु पूर्वस्मात्पूर्वस्मात्फलविशेषमुत्तरस्मिन्नुत्तरस्मिन्नुपासने दर्शयति "यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति" [छा० ७-१-५] "वाग्वाव नाम्नो भूयसी" [छा० ७-२-१] "यावद्वाचो गतं तत्रास्य यथाकामचारो भवति" [छा० ७-२-२] "मनो वाव वाचो भूयः" [छा० ७-३-१] इत्यादिना । स चायं फलविशेषः प्रतीकतन्त्रत्वादुपासनानामुपपद्यते । ब्रह्मतन्त्रत्वे तु ब्रह्मणोऽविशिष्टत्वात्कथं फलविशेषः स्यात् । तस्मान्न प्रतीकालम्बनानामितरैस्तुल्यफलत्वमिति ॥ १६ ॥ (६)

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशंकरभगवत्पादकृतौ
श्रीमच्छारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य
तृतीयः पादः ॥ ३ ॥

विशेषवचनादपवादस्तत्रा[3]ऽऽह—भवत्विति । आहत्यवादः साक्षादपवादकः॥ १५ ॥

इतोऽपि प्रतीकोपासनानां न ब्रह्मगतिरित्याह—विशेषं चेति । उत्कर्षापकर्षवत्त्वात्फलस्य प्रतीकोपासनानां नैकरूपब्रह्मक्रतुत्वं तत्प्राप्तिर्वा हेतूपचयापचयातिरेकेण फले तदयोगादिति व्याचष्टे—नामादिष्विति । फलविशेषोपलम्भेऽपि किमित्युपासनानां प्रतीकतन्त्रत्वं तत्राऽऽह—स चेति । प्रतीकानामुत्कर्षनिकर्षवत्त्वादित्यर्थः । विपक्षे फलविशेषदृष्टेरश्लिष्टत्वमाह—ब्रह्मेति । प्रतीकालम्बनातिरिक्तानां विकारालम्बनानां ब्रह्मलोकगतिरिति स्थिते फलितमुपसंहरति—तस्मादिति ॥ १६ ॥ (६)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचिते शारीरकभाष्यविभागे न्यायनिर्णये चतुर्थाध्यायस्य तृतीयः पादः ॥ ३ ॥

---

१ क. ज. मन्यते । २ ज. झ. ट. °वतीति । ३ ज. ट. °वतीति । ४ क. ख. ड. °इतत्रेत्याह । ५ ख. °हत्यापवा° ।

अथ चतुर्थाध्याये चतुर्थः पादः ।

(निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तेः सगुणब्रह्मविदश्च ब्रह्मलोकस्थितेर्निरूपणम् ।)

(मुक्तिरूपस्य वस्तुनः पुरातनत्वम्, अधि० १)

संपद्याऽऽविर्भावः स्वेन शब्दात् ॥ १ ॥

" एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते [छा०८-१२-३] इति श्रूयते । तत्र संशयः—किं देवलोकाद्युपभोगस्थानेष्विवाऽऽगन्तुकेन केनचिद्विशेषेणाभिनिष्पद्यत आहोस्विदात्ममात्रेणेति । किं तावत्प्राप्तम् । स्थानान्तरेष्विवाऽऽगन्तुकेन केनचिद्रूपेणाभिनिष्पत्तिः स्यात् । मोक्षस्यापि फलत्वप्रसिद्धेः । अभिनिष्पद्यत इति चोत्पत्तिपर्यायत्वात् । स्वरूपमात्रेण चेदभिनिष्पत्तिः पूर्वास्वप्यवस्थासु स्वरूपानपायाद्विभाव्येत । तस्माद्विशेषेण केनचिदभिनिष्पद्यत

आद्ये पादे निर्गुणविद्याफलैकदेशो[3] बन्धनिवृत्तिरुक्ता । द्वितीये सगुणनिर्गुणफलाशिशेषत्वेन[4] तद्विदोरुत्क्रान्त्यनुत्क्रान्ती चिन्तिते । तृतीये सगुणविद्याफलोपयोगितया गतिगन्तव्यगन्तृविशेषा निरूपिताः । संप्रति चतुर्थे पादे परविद्याफलैकदेशो ब्रह्मभावाविर्भावः सगुणविद्याफलं च सर्वेश्वरतुल्यभोगत्वमवधारयिष्यते । तत्रापरविद्याप्राप्यमुक्त्वा परविद्याप्राप्यमाह—**संपद्येति** । निर्गुणविद्याफलमुदाहर्तुं तद्विषयवाक्यमुदाहरति—**एवमेवेति** । स्वशब्दस्य स्वकीयवाचित्वेनाऽऽगन्तुकत्वमानात्स्वरूपवचनत्वेनानागन्तुकत्वबुद्धेश्च संशयमाह—**तत्रेति** । अत्र च निर्गुणब्रह्मविद्याफलस्य ब्रह्मभावाविर्भावस्य नित्यसिद्धत्वोक्त्या पादादिसंगतिः । पूर्वपक्षे मोक्षस्य स्वर्गादेरविशेषः । सिद्धान्ते तस्य ततो विशेषोऽस्तीति गृहीत्वा विमृश्य पूर्वपक्षमाह—**किमिति** । विमतमागन्तुकं फलत्वात्स्वर्गवदिति मत्वा हेतुमाह—**मोक्षस्येति** । अभिनिष्पत्तिशब्दादपि प्रागभूतस्य निष्पत्तिः सिध्यतीति हेत्वन्तरमाह—**अभिनिष्पद्यत इति** । सिद्धान्तेऽपि स्यादभिनिष्पत्तिरौपचारिकीत्याशङ्क्याऽऽह—**स्वरूपेति**[5] । उक्तानुमानादभिनिष्पत्तिशब्दाच्च सिद्धमर्थं निगमयति—**तस्मादिति** । मुक्तेरागन्तुकत्वमनूद्य सिद्धा-

---

१ ङ. ञ. संपाद्यां । २ ज. ञ. 'स्वव' । ३ क. ख. झ. 'देशा ब' । ४ ङ. 'सिबशेन । ५ ठ. ड. 'ति । अनु' ।

(मुक्तिरूपस्य वस्तुनः पुरातनत्वम्, अधि० १)

इति। एवं प्राप्ते ब्रूमः—केवलेनैवाऽऽत्मनाऽऽविर्भवति न धर्मान्तरेणेति। कुतः, स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दात्। अन्यथा हि स्वशब्देनेति विशेषणमनवक्लृप्तं स्यात्। नन्वात्मीयाभिप्रायः स्वशब्दो भविष्यति। न। तस्यावचनीयत्वात्। येनैव हि केनचिद्रूपेणाभिनिष्पद्यते तस्यैवाऽऽत्मीयत्वोपपत्तेः स्वेनेति विशेषणमनर्थकं स्यात्। आत्मवचनतायां त्वर्थवत्केवलेनैवाऽऽत्मरूपेणाभिनिष्पद्यते नाऽऽगन्तुकेनापररूपेणापीति ॥ १ ॥

कः पुनर्विशेषः पूर्वावस्थास्विह च स्वरूपानपायसाम्ये सतीत्यत आह—

मुक्तः प्रतिज्ञानात् ॥ २ ॥

योऽत्राभिनिष्पद्यत इत्युक्तः स सर्वबन्धविनिर्मुक्तः शुद्धेनैवाऽऽत्मनाऽवतिष्ठते। पूर्वत्र त्वन्धो भवत्यपि रोदितीव विनाशमेवापीतो भवतीति चावस्थात्रयकलुषितेनाऽऽत्मनेत्ययं विशेषः। कथं पुनरवगम्यते "मुक्तः" अयमिदानीं भवतीति "प्रतिज्ञानात्" इत्याह। तथा हि "एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" [छा० ८-९-३।८-१०-४।८-११-३] इत्यवस्थात्रयदोषन्तयति—एवमिति। उक्तेऽनुमाने जीवति कथमनागन्तुकत्वं मुक्तेरित्याह—कुत इति। विशेषणश्रुतिवाध्यमनुमानमित्याह—स्वेनेति। परं ब्रह्म ज्योतिःशब्दितमुपसंपद्य साक्षादनुभूय तेनैव स्वेन रूपेणाऽऽविर्भावोऽवस्थानमित्यनङ्गीकुर्वन्तं प्रत्याह—अन्यथेति। विधान्तरेण स्वशब्दस्यार्थवत्त्वं शङ्कते—नन्विति। अज्ञातज्ञापकत्वे संभवत्यनुवादकत्वायोगान्नैवमित्याह—न तस्येति। तदेवावचनीयत्वं साधयति—येनेति। परपक्षे विशेषणानर्थक्यमुक्त्वा स्वपक्षे तदर्थवत्त्वमाह—आत्मेति। अर्थवत्त्वं स्फुटयति—केवलेनेति ॥ १ ॥

सूत्रान्तरमाकाङ्क्षाद्वाराऽवतारयति—कः पुनरिति। सूत्रस्थं मुक्तशब्दं योजयति—योऽत्रेति। पूर्वत्रापि वस्तुतोऽस्यैवंभूतत्वान्न विशेषसिद्धिरित्याशङ्क्यावस्थात्रयेऽपि यथाक्रमं व्यावहारिकरूपेणासदृशत्वमाह—पूर्वत्रेति। जागरिते पुत्रादावहंममाभिमानादन्धवत्परवशो भवति स्वप्ने तन्नाशदृष्ट्या वासनामयं रोदनाद्यनुभवति सुषुप्ते विशेषज्ञानशून्यश्चिद्धातुरज्ञानमात्रपरवशस्तिष्ठतीत्यवस्थात्रयेण बन्धापरनाम्ना कालुष्येण दूषितं यदात्मरूपं तेनाऽऽत्मा संसारदशायामवतिष्ठते मोक्षे तु निर्मृष्टनिखिलदुःखानुषङ्गप्रद्योतमानपरिशुद्धपरमानन्दरूपेणेति विशेष इत्यर्थः। सूत्रावयवं शङ्कापूर्वकमादत्ते—कथमिति। प्रतिज्ञातमेव प्रकटयति—तथा हीति। प्रकृतोपयोगिप्रति-

---

१ क. ज. ञ. ट. °ब्देन वि°। २ ञ. °यत्वापत्ते°। ३ क. °र्वास्व°। ४ ञ. स पूर्व°। ५ ञ. °र्वत्रान्धो। ६ ख. उक्तानु°। ७ क. परत्र°। ८ झ. °व स्वरू°। ९ क. ख. ठ. ड. °णान्याद्°। १० क. ख. झ. °नाऽऽत्मना सं°।

विहीनमात्मानं व्याख्येयत्वेन प्रतिज्ञाय "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" [छा० ८-१२-१] इति चोपन्यस्य "स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः" [छा० ८-१२-३] इति चोपसंहरति । तथाऽऽख्यायिकोपक्रमेऽपि "य आत्माऽपहतपाप्मा" [छा० ८-७-१] इत्यादि मुक्तात्मविषयमेव प्रतिज्ञानम् । फलत्वं[1]प्रसिद्धिरपि मोक्षस्य बन्धनिवृत्तिमात्रापेक्षा नापूर्वोपजननापेक्षा । यदप्यभिनिष्पद्यत[2] इत्युत्पत्तिपर्यायत्वं तदपि पूर्वावस्थापेक्षं यथा रोगनिवृत्तावरोगोऽभिनिष्पद्यत इति तद्वत् । तस्माददोषः ॥ २ ॥

आत्मा प्रकरणात् ॥ ३ ॥ (१)

कथं पुनर्मुक्त इत्युच्यते यावता "परं ज्योतिरुपसंपद्य" [छा० ८-१२-३] इति कार्यगोचरमेवैनं श्रावयति । ज्योतिःशब्दस्य भौतिके[3] ज्योतिषि रूढत्वात् । न चानतिवृत्तौ विकारविषयात्कश्चिन्मुक्तो भवितुमर्हति । विकारस्याऽऽर्तत्वप्रसिद्धेरिति । नैष दोषः । यत आत्मैवात्र ज्योतिःशब्देनाऽऽवेद्यते प्रकरणात् "य आत्माऽपहतपाप्मा विजरो विमृत्युः" [छा० ८-७-१] इति । प्रकृते परस्मिन्नात्मनि नाकस्माद्भौतिकं ज्योतिः शक्यं ग्रहीतुम् । प्रकृतहानाप्रकृतप्रक्रियाप्रस-

---

ज्ञान्तरमाह—तथेति । फलत्वादागन्तुकत्वं मुक्तेरुक्तं तत्राऽऽह—फलत्वेति । शब्दसामर्थ्यात्तदागन्तुकत्वमुक्तमनूद्य दूषयति—यदपीति । हेतोरन्यथासिद्धत्वे शब्दस्य चौपचारिकत्वे मुक्तेरनागन्तुकत्वं युक्तमित्युपसंहरति—तस्मादिति ॥ २ ॥

ज्योतिरुपसंपन्नस्य मुक्तत्वायोगमाशङ्क्य परिहरति—आत्मेति । सूत्रव्यावर्त्यमाह—कथमिति । कार्यगोचरत्वे हेतुमाह—ज्योतिःशब्दस्येति । ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति पौर्वापर्यश्रुतेर्मुक्तेरन्या ज्योतिःसंपत्तिरित्याशङ्क्य तदुपसंपद्यत इत्युक्त्वा स्वेनाभिनिष्पत्तिरित्यश्रवणादध्याहारे च तदुपसंपद्येत्युक्तिवैयर्थ्याज्ज्योतिषो भूतत्वेन कार्यत्वादत्यागे कुतो मुक्तिरित्याह—न चेति । विकारगोचरस्यापि मुक्तत्वमाशङ्क्याथ यदरूपं तन्मर्त्यमित्यादिश्रुतिमाश्रित्याऽऽह—विकारस्येति । चोद्योत्तरत्वेन सूत्रं योजयति—नेत्यादिना । प्रकरणमेव दर्शयति—य आत्मेति ।

---

१ ब. °त्वसि° । २ क. ज. ञ. °न्धनिनि° । ३ क. ज. ञ. °जना° । ४ ब्र. ट. यद्यप्य° । ५ क. ट. °रोगो नि° । ६ ञ. °तिकज्यो° । ७ क. ञ. °श्चिद्विमुक्तो । ८ ज. ञ. °हान्यप्र° । ९ क. ख. ठ. ड. °क्तं प्रत्याह ।

(मुक्तस्य ब्रह्मणोऽभिन्नत्वम्, अधि० २)

ङ्गात्। ज्योतिःशब्दस्त्वात्मन्यपि दृश्यते " तदेवा ज्योतिषां ज्योतिः " [बृ० ४-४-१६] इति। प्रपञ्चितं चैतत् " ज्योतिर्दर्शनात् " [ब्र० सू० १-३-४०] इत्यत्र ॥ ३ ॥ (१)

(मुक्तस्य ब्रह्मणोऽभिन्नत्वम्, अधि० २)।

अविभागेन दृष्टत्वात् ॥ ४ ॥ (२)

" परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते " [छा० ८-१२-३] यः स किं परस्मादात्मनः पृथगेव भवत्युताविभागेनैवावतिष्ठत इति वीक्षायाम्[1] " स तत्र पर्येति " इत्यधिकरणाधिकर्तव्यनिर्देशात् " ज्योतिरुपसंपद्य " [छा० ८-१२-३] इति च कर्तृकर्मनिर्देशाद्भेदेनैवावस्थानमिति यस्य मतिस्तं व्युत्पादयत्यविभक्त एव परेणाऽऽत्मना मुक्तोऽवतिष्ठते। कुतः। दृष्टत्वात्। तथा हि " तत्त्वमसि " [छा० ६-८-७] " अहं ब्रह्मास्मि " [बृ० १-४-१०] " यत्र नान्यत्पश्यति " [छा० ७-२४-१] " न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् " [बृ० ४-३-२३] इत्येवमादीनि वाक्यान्यविभागेनैव परमात्मानं दर्शयन्ति। यथादर्शनमेव च फलं युक्तं तत्क्रतुन्यायात्। " यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति। एवं मुनेर्विजानत आत्मा भवति गौतम " [कठ० ४-१५] इति चैवमादीनि मुक्तस्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्श-

---

अकस्मात्प्रकरणविच्छेदं विनेति यावत्। प्रकरणादपि प्रयोगाभावे कथमात्मार्थो ज्योतिःशब्दस्तत्राऽऽह—ज्योतिःशब्द इति। अत्रापेक्षितं न्यायं पूर्वोक्तं सूचयन्पुनरुक्तिं प्रत्याह—प्रपञ्चितं चेति ॥ ३ ॥ (१)

विदुषः स्वरूपेऽवस्थितस्यापि वैशेषिकादिवद्ब्रह्मणोऽन्यत्वमाशङ्क्याऽऽह—अविभागेनेति। विषयोक्तिपूर्वकं वादिविप्रतिपत्तेः संशयमाह—परमिति। अत्र मुक्तस्य ब्रह्मणोऽत्यन्ताभेदवादात्पादादिसंगतिः। पूर्वपक्षे जीवेश्वरयोरात्यन्तिकमन्यत्वम्। सिद्धान्ते तयोरात्यन्तिकमभिन्नत्वमङ्गीकृत्य पूर्वपक्षयति—इति[3] वीक्षायामिति। सिद्धान्तसूत्रमवतार्य व्याचष्टे—इति यस्येति। दृष्टत्वमेव स्फुटयति—तथा हीति। परमात्मन्यैक्येन दृष्टत्वे फलितमाह—यथेति। फलावस्थावादिवाक्येष्वविभागस्य दृष्टत्वादपि मुक्तस्य परस्मादात्यन्तिकमैक्यमिति व्याख्यान्तरमाह—यथेति। उक्तभेदनि-

---

१ ज. ट. विचिकित्सायाम्। २ क. ख. ठ, ड. 'क्षितन्या'। ३ ज्ञ. 'ति विचिकित्सायां'। ४ ख. परात्मैक्ये'। ५ क. ख. ठ. ड. 'क्तस्य भे'।

(मुक्तस्वरूपभूतस्य ब्रह्मणो युगपत्सविशेषत्वनिर्विशेषत्वे, अधि० ३)

यन्ति । नदीसमुद्रादिनिदर्शनानि च । भेदनिर्देशस्त्वभेदेऽप्युपचर्यते " स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि " [छा० ७-२४-१] इति " आत्मरतिरात्मक्रीडः " [छा० ७-२५-२] इति चैवमादिदर्शनात् ॥ ४ ॥ (२)

(मुक्तस्वरूपभूतस्य ब्रह्मणो युगपत्सविशेषत्वनिर्विशेषत्वे, अधि० ३)

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

स्थितमेतत् " स्वेन रूपेण " [छा० ८-३-४] इत्यत्राऽऽत्ममात्ररूपेणाभिनिष्पद्यते नाऽऽगन्तुकेनापररूपेणेति । अधुना तु तद्विशेषबुभुत्सायामभिधीयते स्वमस्य रूपं ब्राह्ममपहतपाप्मत्वादिसत्यसंकल्पत्वावसानं तथा सर्वज्ञत्वं सर्वेश्वरत्वं च तेन स्वरूपेणाभिनिष्पद्यत इति जैमिनिराचार्यो मन्यते । कुतः । " उपन्यासादिभ्यः " तथात्वावगमात् । तथा हि " य आत्माऽपहतपाप्मा " [छा० ८-७-१] इत्यादिना " सत्यकामः सत्यसंकल्पः " [छा० ८-७-१] इत्येवमन्तेनोपन्यासेनैवमात्मकतामात्मनो बोधयति । तथा " स तत्र पर्येति जक्षत्क्रीडन्रममाणः " [छा० ८-१२-३] इत्यैश्वर्यरूपमावेदयति " तस्य सर्वेषु लोकेषु कामचारो भवति " [छा० ७-२५-२] इति

र्देशस्य तर्हि का गतिस्तत्राऽऽह—भेदेति । उपचारो गतिरित्यत्र तथाऽन्यत्र दृष्टत्वं हेतुमाह—स इति ॥ ४ ॥ (२)

ब्रह्मात्मतां प्राप्तस्यापि जीवस्य सप्रपञ्चत्वं चोदयति—ब्राह्मेणेति । वृत्तं कीर्तयति—स्थितमिति । विषयसंशयौ दर्शयति—अधुनेति । येन च ब्रह्मरूपेण मुक्तस्यावस्थानं तत्किं सप्रपञ्चमेव किंवा निष्प्रपञ्चमेवाथ वोभयरूपमिति विप्रतिपत्तेः संशये ब्रह्मणो मुक्तोपसृप्यस्य दृष्टिद्वयमाश्रित्योभयरूपत्वोक्त्या पादादिसंगतिः । पूर्वपक्षे सप्रपञ्चत्वश्रुतीनां वा निष्प्रपञ्चत्वश्रुतीनां वा मुख्यार्थत्वसिद्धिः । सिद्धान्ते द्विविधश्रुतीनां दृष्टिद्वयावष्टम्भान्मुख्यार्थत्वोपपत्तिरित्युपेत्य पूर्वपक्षयति—अभिधीयत इति । उपन्यासेन ब्रह्मणः सप्रपञ्चत्वसिद्धिं विवृणोति—तथा हीति । उपन्यासो नामोद्देशः स चान्यत्र ज्ञातस्यान्यविधानायानुवादः । आदिशब्दार्थविधिं दर्शयति—तथेति ।

---

१ ब्र. °त्मगतिं । २ अ. °त्रस्वरूं । ३ क. °न्तुनाऽप° । ४ क. °ना त° । ५ क. ज. °न रूं । अ. ट. °न स्वेन रूं । ६ अ. एष । ७ ट. °त्यसं° । ८ ठ. ड. °न ब्रं° । ९ ब्र. °स्य सृष्टिं° । १० क. ख. ब्र. °पत्तेरि° ।

च । सर्वज्ञः सर्वेश्वर इत्यादिव्यपदेशाश्चैवमुपपन्ना भविष्यन्तीति ॥ ५ ॥

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

यद्यप्यपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यन्ते तथाऽपि शब्दविकल्पजा एवैते । पाप्मादिनिवृत्तिमात्रं हि तत्र गम्यते । चैतन्यमेव त्वस्याऽऽत्मनः स्वरूपमिति " तन्मात्रेण " स्वरूपेणाभिनिष्पत्तिर्युक्ता । तथा च श्रुतिः "एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव " [बृ० ४-५-१३] इत्येवंजातीयकाऽनुगृहीता भविष्यति । सत्यकामत्वादयस्तु यद्यपि वस्तुस्वरूपेणैव धर्मा उच्यन्ते सत्याः कामा अस्येति, तथाऽप्युपाधिसंबन्धाधीनत्वात्तेषां न चैतन्यवत्स्वरूपत्वसंभवः । अनेकाकारत्वप्रतिषेधात् । प्रतिषिद्धं हि ब्रह्मणोऽनेकाकारत्वम् " न स्थानतोऽपि परस्योभयलिङ्गम् " [ब्र० सू० ३-२-११] इत्यत्र । अत एवं च जक्षणादिसंकीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थमात्मरतिरित्यादिवत् । न हि मुख्यान्येव रतिक्रीडामिथुनान्यात्मनिमित्तानि शक्यन्ते वर्णयितुं द्वितीयविष-

---

अज्ञातज्ञापनं विधिः । आदिशब्देनोक्तं व्यपदेशमाह—सर्वज्ञ इति । विध्यन्तररहितत्वेनानुद्देश्यस्याप्रतिपाद्यत्वेनाविधेयस्य च सिद्धवदभिधानं व्यपदेशः ॥ ५ ॥

पूर्वपक्षान्तरमाह—चितितन्मात्रेणेति । उपन्यासादिना नानारसत्वे दर्शिते कथंचिदेकरसत्वमित्याशङ्क्याऽऽह—यद्यपीति । कथं विकल्पमात्रत्वमित्याशङ्क्य काल्पनिकत्वात्पाप्मादेस्तन्निवृत्तिरूपाणां तेषामपि राहोः शिर इतिवत्काल्पनिकत्वमेवेत्याह—पाप्मादीति । किं तर्हि तस्य वास्तवरूपं तदाह—चैतन्यमिति । तत्र मानमाह—तथा चेति । सत्यकामत्वादीनामपहतपाप्मत्वादिवन्नेतुमशक्यत्वात्कुतो ब्रह्मणश्चैतन्यमात्रतेत्याशङ्क्याऽऽह—सत्येति । उपाधीनामपि तदभेदाद्वास्तवमेव धर्मत्वमित्याशङ्क्याऽऽह—अनेकेति । उपन्यासस्येव विधिव्यपदेशयोर्गतिमाह—अत इति । अनेकाकारत्वस्य निषिद्धत्वादेवेति यावत । दृष्टान्तेऽपि मुख्यत्वमाशङ्क्योक्तम्—न हीति ।

---

१ ज. ट. 'पाप्मेत्याद' । २ क. 'त्रेणा' । ३ ट. स्वस्वरू' । ४ अ. 'न इत्ये' । ५ ज. 'कामाद' । ६ ब. 'पसं' । ७ क. ज. ट. 'व ज' । ८ क. 'ब्देनैवोक्तं । ख. ठ. ड. 'ब्देनैवोक्तव्यं' । ९ ठ. ड. 'स्तवं रू' ।

(आर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तस्योपासकस्य भोग्यवस्तूनां सृष्टौ मानससंकल्पस्यैव हेतुत्वम्, अधि० ४)

यैत्वात्तेषाम् । तस्मान्निरस्तोशषप्रपञ्चेन प्रसन्नेनाव्यपदेश्येन बोधात्मनाऽभिनिष्पद्यत इत्यौडुलोमिराचार्यो मन्यते ॥ ६ ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः॥७॥(३)

एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेऽपि व्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरोधं बादरायण आचार्यो मन्यते ॥ ७ ॥ (३)

(आर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तस्योपासकस्य भोग्यवस्तूनां सृष्टौ मानससंकल्पस्यैव हेतुत्वम्, अधि० ४)

संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

हार्दविद्यायां श्रूयते—"स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति" [छा० ८-२-१] इत्यादि । तत्र संशयः—किं संकल्प एव केवलः पित्रादिसमुत्थाने हेतुरुत निमित्तान्तरसहित इति । तत्र सत्यपि संकल्पादेवेति श्रवणे लोकवन्निमित्तान्तरापेक्षता युक्ता । यथा लोकेऽस्मदादीनां संकल्पाद्गमनादिभ्यश्च हेतुभ्यः पित्रादिसंपत्तिर्भवत्येवं मुक्तस्यापि स्यात् । एवं दृष्टविपरीतं न कल्पितं भविष्यति ।

उपन्यासादीनामन्यथासिद्धत्वे श्रुतिसिद्धमर्थमुपसंहरति—तस्मादिति ॥ ६ ॥

सिद्धान्तयति—एवमपीति । चिन्मात्रस्यापि सतो ब्रह्मणस्तत्त्वातत्त्वविभागाद्विधात्वसिद्धिरिति सूत्रार्थं विवृणोति—एवमित्यादिना ॥ ७ ॥ (३)

पूर्वाधिकरणेषु परविद्याफलमभिधायापरविद्याफलं प्रपञ्चयितुमधुनोपक्रमते—संकल्पादिति । विषयं वक्तुं वाक्यमुदाहरति—हार्देति । एवकारस्यायोगान्ययोगव्यवच्छेदसाधारणतया संकल्पं विषयीकृत्य संशयमाह—तत्रेति । अत्र च सगुणब्रह्मविदो ब्रह्मभूतस्य विभूतिनिर्माणसाधननिरूपणात्पादादिसंगतिः । पूर्वपक्षे लोकवृत्तानुसारि चरणं सिद्धान्ते श्रुतिवृत्तानुसारि चरणमित्यभिप्रेत्यावधारणश्रुत्या संकल्पस्य निरपेक्षत्वसिद्ध्या पूर्वपक्षानुत्थानमाशङ्क्याऽऽह—तत्रेति । लोकवदित्युक्तं विवृणोति—यथेति । मुक्तस्य पित्रादिभोगहेतुसंपत्तिः संकल्पातिरिक्तयत्नादिसापेक्षा भोगहेतुसंपत्तित्वादस्मदादिभोगहेतुसंपत्तिवदिति मत्वा दार्ष्टान्तिकमाह—एवमिति । अनुमानफलमाह—एवं दृष्टेति । लोकवृत्तानुसारेण श्रुतेरर्थवत्त्वसिद्धावेव तद्विपरीतं न कल्प्य-

---

१ क. 'यविषयत्वा'। २ क. ज. ट. च । ३ ट. केवलं । ४ ब. °पेक्षा यु' । ५ ट. 'घ्यतीति । ६ ठ. ड. °तं च न ।

(अर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तस्योपासकस्य भोग्यवस्तूनां सृष्टौ
मानससंकल्पस्यैव हेतुत्वम्, अधि० ४)

संकल्पादेवेति तु राज्ञ इव संकल्पितार्थसिद्धिकरीं साधनान्तरसामग्रीं सुलभामपेक्ष्योच्यते । न च संकल्पमात्रसमुत्थानाः पित्रादयो मनोरथविजृम्भितवच्चञ्चलत्वात्पुष्कलं भोगं समर्पयितुं पर्याप्ताः स्युरिति । एवं प्राप्ते ब्रूमः—" संकल्पादेव तु " केवलात्पित्रादिसमुत्थानमिति । कुतः । " तच्छ्रुतेः " । " संकल्पादेवास्य पितरः समुत्तिष्ठन्ति " [छा० ८-२-१] इत्यादिका हि श्रुतिर्निमित्तान्तरापेक्षायां पीड्येत । निमित्तान्तरमपि तु यदि संकल्पानुविधार्य्येव[1] स्याद्भवतु न तु प्रयत्नान्तरसंपाद्यं निमित्तान्तरमितीष्यते[3] । प्राक्संपत्तेर्वन्ध्यसंकल्पत्वप्रसङ्गात्[4] । न च श्रौत्यवगम्येऽर्थे लोकवदिति सामान्यतो दृष्टं क्रमते । संकल्पबलादेव चैषां यावत्प्रयोजनं स्थैर्योपपत्तिः । प्राकृतसंकल्पविलक्षणत्वान्मुक्तसंकल्पस्य ॥ ८ ॥

मिह त्ववधारणस्य तदनुसरणे सत्यर्थवत्त्वमेव न स्यादित्याशङ्क्याऽऽह—संकल्पादिति । पित्रादेः संकल्पमात्रजन्यत्वे मनोरथविजृम्भितस्त्रीपुत्रादिवदर्थक्रियासामर्थ्याभावादपि संकल्पातिरिक्तसाधनापेक्षा वक्तव्येत्याह—न चेति । मनोरथनिर्मितादपि हर्षादिकार्यं दृष्टमित्याशङ्क्य ज्ञानमात्रसाध्यकार्यसत्त्वेऽपि ज्ञेयवस्तुसाध्यं कार्यं तत्र नास्तीत्याह—पुष्कलमिति । संकल्पस्य यत्नादिसापेक्षस्यैव पित्रादिनिर्माणहेतुतेत्येतदनूद्य सिद्धान्तसूत्रमवतार्य व्याकरोति—एवमिति । संकल्पस्य यत्नसापेक्षत्वेऽनुमानस्योक्तत्वान्न तस्य केवलस्य पित्राद्युद्भवहेतुतेति शङ्कते—कुत इति । श्रुतिविरुद्धतया कालात्ययापदिष्टमनुमानमित्याह—तच्छ्रुतेरिति । किंच निमित्तान्तरमपि संकल्पायत्तं वा यत्नान्तरसाध्यं वा तत्राऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—निमित्तान्तरमिति । तस्य यत्नाद्यपेक्षस्य संकल्पापेक्षया विलम्बितोत्पत्तिकत्वात्प्राक्तदुत्पत्तेर्विदुषो मोघसंकल्पत्वं स्यात्ततश्च द्वितीयस्यायुक्ततेत्याह—प्रागिति । यत्तु लोकवन्निमित्तान्तरापेक्षेति तत्राऽऽह—न चेति । यदपि मनोरथविजृम्भितवदतिचञ्चलत्वान्न भोगसाधनत्वं संकल्पप्रसूतानां पित्रादीनामिति तत्राऽऽह—संकल्पेति । अस्मदादिसंकल्पितेष्वदृष्टं स्थैर्यं कथं मुक्तसंकल्पितेषु कल्प्यते तत्राऽऽह—प्राकृतेति ॥ ८ ॥

---

१ क. ज. अ. °र्याप्नुयुरि° । २ ट. °ध्येवं स्या° । ३ क. ज. °मिष्य° । ४ क. ज. प्राक्तत्संप° । ५ क. ज. म. श्रुतिग° । ६ क. ठ. ड. °स्त्रीवस्त्रादि° । ७ ख. ठ. ड. °त्तित्वा° ।

(एकस्यापि पुरुषस्य देहभावाभावयोरैच्छिकत्वम्, अधि० ५)

अत एव चानन्याधिपतिः ॥ ९ ॥ (४)

" अत एव च " अवन्ध्यसंकल्पत्वात् " अनन्याधिपतिः " विद्वान्भवति नास्यान्योऽधिपतिर्भवतीत्यर्थः । न हि प्राकृतोऽपि संकल्पयन्नन्यस्वामिकत्वमात्मनः सत्यां गतौ संकल्पयति । श्रुतिश्चैतद्दर्शयति " अथ य इहाऽऽत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति " [छा० ८-१-६] इति ॥ ९ ॥ (४)

(एकस्यापि पुरुषस्य देहभावाभावयोरैच्छिकत्वम्, अधि० ५)

अभावं बादरिराह ह्येवम् ॥ १० ॥

" संकल्पादेवास्य पितरः समुत्तिष्ठन्ति " [छा० ८-२-१] इत्यतः श्रुतेर्मनस्तावत्संकल्पसाधनं सिद्धम् । शरीरेन्द्रियाणि पुनः प्राप्तैश्वर्यस्य विदुषः सन्ति नवा सन्तीति समीक्ष्यते ।

विदुषः सत्यसंकल्पत्वे लाभान्तरमाह—अत इति । उपासितुरीश्वराधीनो भोगो न संकल्पमात्राद्भवितुमलमित्याशङ्क्य सूत्रं व्याकरोति—अत एवेति । सत्यसंकल्पत्वेऽपि कथमीश्वराधीनत्वं विदुषो नेष्यते तत्राऽऽह—न हीति । ईश्वरप्रसादाद्भोगः स्यादित्यपि प्रार्थयमानो जनो दृश्यत इत्याशङ्क्याऽऽह—सत्यामिति । विदुषोऽनन्याधीनमैश्वर्यमस्तीत्यत्र मानमाह—श्रुतिश्चेति । विद्यानुवादद्वारा तत्फलोक्त्यारम्भार्थोऽथशब्दः ॥९॥ (४)

विदुषो ब्रह्मीभूतस्य सप्रपञ्चत्वनिष्प्रपञ्चत्वयोर्व्यवहारिकतात्त्विकैकताभ्यां व्यवस्थामुक्त्वा संकल्पातिरिक्तसाधनभावाभावयोरेकोपाधावापाततो विरोधाल्लोकसिद्धपदपदार्थापेक्षायाः श्रुतेर्लौकिकादनुमानाद्बाध इति पूर्वपक्षयित्वा पदपदार्थधीमात्रेण श्रुतेरपेक्षायामपि वाक्यार्थबोधने तदभावाद्विमतो यत्नाद्यनपेक्षसंकल्पजन्यो योगजन्यसामर्थ्यदृष्टत्वादगस्त्यकृतसमुद्रपानवदित्यनुमानानुगृहीतश्रुत्या बाधितत्वादनुमानस्य संकल्पमात्रसिद्ध्या विदुषो भोगहेतुसिद्धिरित्युक्तम् । संप्रत्यवधारणादन्ययोगव्यवच्छेदेन संकल्पस्यैव पित्रादिसाधनत्ववदिहापि मनसेतिविशेषणस्यान्ययोगव्यवच्छेदकत्वेनावधारणार्थत्वाद्विदुषो देहाद्यभाव इति पूर्वपक्षयति—अभावमिति । मनसः सद्भावोऽपि किमिति विदुषो न विचार्यते तत्राऽऽह—संकल्पादेवेति । शरीरेन्द्रियाणि विषयस्तानि किं विद्यावतो मुक्तस्य सन्ति किंवा न सन्त्याहो सन्ति च न सन्ति चेतिवादिविप्रतिपत्तेः संशयमाह—शरीरेति । अत्र सगुणब्रह्मविदः संकल्पादेव देहादिभावाभावयोरुक्त्या ब्रह्मधीफलवि-

---

१ क °स्याधि° । २ ट. °न्ति" इत्यादिश्रु° । ३ क. ज. म. न स° । ४ ठ. ड. °कत्वाभ्यां । ५ क. झ. °रिक्तं सा° । ६ ठ. ड. °क्षायां श्रु° । ७ ठ. ड. पदा° । ८ ठ. मनःस° । ९ क. झ. °दिप्र° ।

(एकस्यापि पुरुषस्य देहभावाभावयोरिच्छिकत्वम्, अधि० ५)

तत्र "बादरिः" तावदाचार्यः शरीरस्येन्द्रियाणां चाभावं महीयमानस्य विदुषो मन्यते। कस्मात्। एवं ह्याहाऽऽम्नायः—"मनसैतान्कामान्पश्यन्रमते" [छा० ८-१२-५] "य एते ब्रह्मलोके" [छा० ८-१३-१] इति। यदि मनसा शरीरेन्द्रियैश्च विहरेत मनसेति विशेषणं न स्यात्। तस्माद्भावः शरीरेन्द्रियाणां मोक्षे ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

"जैमिनिः" त्वाचार्यो मनोवच्छरीरस्यापि सेन्द्रियस्य भावं मुक्तं प्रति मन्यते। यतः "स एकधा भवति त्रिधा भवति" [छा० ७-२६-२] इत्यादिनाऽनेकधाभावविकल्पमामनन्ति। न ह्यनेकविधता विना शरीरभेदेनाऽऽङ्गसी स्यात्। यद्यपि निर्गुणायां भूमविद्यायामयमनेकधाभावविकल्पः पठ्यते तथाऽपि विद्यमानमेवेदं सगुणावस्थायामैश्वर्यं भूमविद्यास्तुतये संकीर्त्यत इत्यतः सगुणविद्याफलभावेनोपतिष्ठत इति ॥ ११ ॥

भूतेरुक्तेरस्ति पादादिसंगतिः। पूर्वपक्षे विशेषणश्रुतेरनेकधाभावश्रुतेर्वा मुख्यार्थत्वसिद्धिः। सिद्धान्ते द्वयोरपि श्रुत्योर्विदुषः सत्यसंकल्पत्वादेव मुख्यार्थत्वोपपत्तिरित्यङ्गीकृत्य पूर्वपक्षसूत्रं योजयति—तत्रेति। सत्यामपि विप्रतिपत्तावभावनियमासिद्धिरिति शङ्कते—कस्मादिति। विशेषणश्रुत्या परिहरति—एवं हीति। पक्षान्तरेऽपि विशेषणमयोगव्यवच्छेदकत्वेन युक्तमित्याशङ्क्याऽऽह—यदीति। अन्ययोगव्यवच्छेदाय मनसेतिविशेषणाद्व्यागेन पश्यतीत्यादाविवेतरव्यावृत्तिर्गम्यते। अयोगव्यवच्छेदे तु न तथा विशेषणमर्थवदित्यर्थः। विशेषणफलमुपसंहरति—तस्मादिति ॥ १० ॥

पूर्वपक्षान्तरमाह—भावमिति। सूत्राक्षराणि योजयति—जैमिनिस्त्विति। विकल्पाननं मनोभेदादेव किं न स्यादित्याशङ्क्याऽऽह—न हीति। देहभेदाभावे मनोभेदस्यापि दुर्मणत्वान्न तद्भेदकृतं विकल्पाननमित्यर्थः। निर्गुणविद्याधिकारे पाठाद्विकल्पाननं स्तुतिरेवेत्याशङ्क्याऽऽह—यद्यपीति। देहे प्रियादिभोगहीने निर्गुणज्ञाने स्तुतित्वेनानेकधात्वस्यान्वयेऽपि विशिष्टभोगसंसर्गयोग्ये दहराद्युपासने फलत्वेनान्वय इत्यर्थः। न च मनसेति विशेषणमन्ययोगव्यावर्तकं देहादि व्यवच्छिनत्तीति युक्तं चैत्रो धनुर्धर इतिवदयोगव्यवच्छेदेनापि तद्योगादिति भावः ॥ ११ ॥

---

१ ट. ह्याम्रा'। २ अ. 'ते ब्र'। ३ अ. ट. 'रेन्मन'। ४ अ. 'निराचा'। ५ अ. 'भावे वि'। ६ ठ. ड. सत्यां वि'। ७ ठ. ड. 'थ्यु'।

उच्यते—

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

"बादरायणः" पुनराचार्यः "अतः" एवोभयलिङ्गश्रुतिदर्शनादुभयविधत्वं साधु मन्यते, यदा सशरीरतां संकल्पयति तदा सशरीरो भवति, यदा त्वशरीरतां तदाऽशरीर इति। सत्यसंकल्पत्वात्संकल्पवैचित्र्याच्च। "द्वादशाहवत्"। यथा द्वादशाहः सत्रमहीनश्च भवति। उभयलिङ्गश्रुतिदर्शनादेवमिदमपीति ॥१२॥

तन्वभावे संध्यवदुपपत्तेः ॥ १३ ॥

सिद्धान्तयति—उच्यत इति। सूत्रं व्याचष्टे—बादरायण इति। मनसेतिविशेषणसामर्थ्यादेकधा भवति त्रिधा भवतीत्यादिविकल्पामननसामर्थ्याच्चेत्यतःशब्दार्थं स्फुटयति—उभयेति। सशरीरत्वमशरीरत्वं चैकस्यैव विरुद्धमित्याशङ्क्य कालभेदादविरोधं दर्शयति—यदा त्विति। इतिशब्दस्योभयविधत्वमिति पूर्वेण संबन्धः। विदुषः संकल्पानुसारि कार्यमित्यत्र हेतुमाह—सत्येति। कार्यवैचित्र्ये हेतुः—संकल्पेति। धनुर्धरत्वादि हि विशेषणं पाक्षिकप्राप्तविशेषपदयोगव्यवच्छेदकं युक्तं न हि चैत्रो धनुर्दधान एवावतिष्ठते। प्रकृते तु मनसैतानित्यादौ कामभोगेषु मनसो नित्यप्राप्तत्वात्तदनुवादेनान्ययोगनिवृत्त्यर्थतेत्याशङ्क्य दृष्टान्तमवतार्य व्याचष्टे—द्वादशाहवदिति। तस्य बहुकर्तृकतया सत्रत्वे नियतकर्तृकतयाऽहीनत्वे च हेतुमाह—उभयेति। द्वादशाहो हि यजमानबहुत्वादासनोपदेशाच्च सत्रं य एवं विद्वांसः सत्रमुपयन्तीत्युपायनचोदनादर्शनात्सप्तदशावराश्चतुर्विंशतिपरमाः सत्रमासीरन्नित्यासनचोदनायाश्च द्वादशाहाधिकारे दृष्टत्वादासनोपायनचोदनयोरन्यतरत्वस्य सत्रलक्षणत्वाद्द्वादशाहेन प्रजाकामं याजयेदितियजतिचोदनादर्शनान्नियतकर्तृकत्वावगमाच्च द्विरात्रवदहीनत्वं चास्य गम्यते। तथेदमपि विदुषः सशरीरत्वमशरीरत्वं च द्विविधश्रुतिसिद्धं विचित्रसंकल्पनिबन्धनमविरुद्धमित्यर्थः ॥ १२ ॥

विदुषो देहाद्यसत्त्वमयुक्तं भोगाभावप्रसङ्गादित्याशङ्क्याऽऽह—तन्वभाव इति। स्वप्ने देहाभावेऽपि तत्र संनिकर्षस्य ज्ञानहेतुतां मनःस्थितिमात्रहेतुत्वेनान्यथासिद्धत्वाद्योगिनश्च विद्यासामर्थ्यादेव मनोवस्थानादिति मत्वाऽऽह—संध्यवदिति। सूत्रा-

---

१ अ. ट. °यश्रु°। २ ज. ट. °तिलिङ्गद°। ३ क. °रीर इति य°। ४ अ. यदि। ५ क. °दा त्वश°। ६ ज. ट. °यश्रु°। ७ ज. ट. °तिलिङ्गद°। ८ अ. °पद्यते। य°। ९ ड. °वती°। १० क. कार्ये वै°। ११ ख. °चित्र्यहे°। १२ झ. °क्षिकीं प्राप्ति वि°। १३ ख. नित्यं प्रा°, १४ झ. °शावारा°, १५ ठ. ड. °पि न तत्संनि°। १६ क. ख. झ. °तामवस्थि°।

(सर्वेषां देहानां सात्मकत्वम्, अधि० ६)

यदा[1] तनोः सेन्द्रियस्य शरीरस्याभावस्तदा यथा संध्ये स्थाने शरीरेन्द्रियविषयेष्वविद्यमानेष्वप्युपलब्धिमात्रा एव पित्रादिकामा भवन्त्येवं मोक्षेऽपि स्युरेवं[2] ह्येतदुपपद्यते ॥ १३ ॥

भावे जाग्रद्वत् ॥ १४ ॥ (५)

भावे पुनस्तनोर्यथा जागरिते विद्यमाना एव पित्रादिकामा भवन्त्येवं मुक्तस्याप्युपपद्यते[3] ॥ १४ ॥ (५)

(सर्वेषां देहानां सात्मकत्वम्, अधि० ६)

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

" भावं जैमिनिर्विकल्पामननात् " [ब्र० सू० ४ ४-११] इत्यत्र सशरीरत्वं मुक्तस्योक्तम् । तत्र त्रिधाभावादिष्वनेकशरीरसर्गे किं निरात्मकानि शरीराणि दारुयन्त्रवत्सृज्यन्ते[4] किंवा सात्मकान्यस्मदादिशरीरवदिति भवति वीक्षा । तत्र चाऽऽत्ममनसोर्भेदानुपपत्तेरेकेन शरीरेण योगादितराणि[5] शरीराणि निरात्मकानीति । एवं प्राप्ते प्रतिपद्यते-"प्रदीपवदावेशः" इति । यथा

क्षराणि व्याकरोति—यदेत्यादिना । विदुषो देहादेरभावे मनसेतिविशेषणोपपत्तिं हेतू करोति—एवं हीति ॥ १३ ॥

तर्हि देहाद्युपादानमनर्थकं तत्राऽऽह—भाव इति । पुष्कलभोगसिद्ध्यर्थं देहाद्यादानमिति मन्वानः सूत्रं योजयति—भावे पुनरिति ॥ १४ ॥ (५)

संकल्पाधीनमनेकदेहनिर्माणमफलं निरात्मकेषु देहभेदेषु भोगायोगादित्याशङ्क्याऽऽह—प्रदीपवदिति । वृत्तानुवादपूर्वकं मुक्तस्योक्तानि सांकल्पिकानि शरीराणि विषयीकृत्योभयथोपलब्धेः संदेहमाह—भावमिति । तत्रेति मुक्तोक्तिः । मुक्तस्यापरविद्याफलभूतस्य सांकल्पिकेषु प्रवेशप्रकारोक्त्या पादादिसंगतिः । पूर्वपक्षे भोक्तुरेकत्वादेकत्रैव भोगसिद्धिः । सिद्धान्ते भोक्तुरैक्येऽपि स्वेच्छया तस्यानेकत्र भोगोपपत्तिरिति मत्वा पूर्वपक्षयति—तत्रेति । आत्मनो विभुत्वेऽपि मनस्येव चैतन्यव्यक्तेस्तदवच्छेदकैककदेहावस्थितस्य देहान्तरावेशायोगादन्तःकरणान्तरोपादानेऽपि तस्यानाद्यन्तःकरणान्तरावच्छिन्नस्य पुनरागन्तुकान्तःकरणावच्छेदासंभवात्संभवे च जीवभेदाद्भोगाननुसंधानप्रसङ्गादेकस्मादितराणि निरात्मकानीति प्राप्तमित्यर्थः । पूर्वपक्षमनूद्य सिद्धान्तसूत्रमवतारयति—एवमिति । तत्र दृष्टान्तं व्याचष्टे—यथेति । दीपादीनां भिन्नत्वेऽपि दीपत्व-

---

१ ज. ट. °दा तु त° । अ. °दा तु से° । २ अ. °वं त° । ३ क. अ. °द्यन्ते । प्र° । ४ अ. तत्राऽऽत्म° । ५ क. ज. अ. ट. °णि नि° । ६ ख. मत्वा सू° ।

प्रदीप एकोऽनेकप्रदीपभावमापद्यते विकारशक्तियोगात् । एवमेकोऽपि सन्विद्वानैश्वर्ययोगादनेकभावमापद्य सर्वाणि शरीराण्याविशति । कुतः । " तथा हि दर्शयति " शास्त्रमेकस्यानेकभावम् " स एकधा भवति त्रिधा[1] भवति पञ्चधा सप्तधा[2] नवधा " [छा० ७.२६.२] इत्यादि । नैतद्दारुयन्त्रोपमाभ्युपगमेऽवकल्पते, नापि जीवान्तरावेशे । न च निरात्मकानां शरीराणां प्रवृत्तिः संभवति । यैश्चात्ममनसोर्भेदानुपपत्तेरनेकशरीरयोगासंभव इति । नैष दोषः । एकमनोनुवर्तीनि[3] समनस्कान्येवापराणि शरीराणि सत्यसंकल्पत्वात्सृक्ष्यति । सृष्टेषु[4] च तेषूपाधिभेदादात्मनोऽपि भेदेनाधिष्ठातृत्वं योक्ष्यते । एषैव च योगशास्त्रेषु योगिनामनेकशरीरयोगप्रक्रिया ॥ १५ ॥

स्यैकत्वमेकवर्तिवर्तिदीपेषूपचर्यभिन्नवर्तिवर्तिनां दीपानां भिन्नतेति दृष्टान्तमुक्त्वा दार्ष्टान्तिकभावेशशब्दितं दर्शयति—**एवमिति** । तत्र हेतुत्वेनावशिष्टं सूत्रावयवं व्याचष्टे—**तथा हीति** । यथा दारुयन्त्रं चैतन्यशून्यमपि चेतनेच्छामनुरुध्यते तथा निर्माणशरीराणि सेन्द्रियाणीति कस्मान्नाभ्युपगम्यते तेन निरात्मकत्वमेव शरीरान्तराणामित्याशङ्क्याऽऽह—**नैतदिति** । यन्त्रवाहकस्य हि यन्त्राणि भिन्नानि निर्माय वाहयतोऽपि नानात्वेन व्यपदेशाभावाद्विदुषश्च तथा व्यपदेशात्तत्तद्देहोपाध्यवच्छेदो भातीत्यर्थः । तर्हि निर्माणदेहेष्वात्मान्तराणि सृजति विद्वानित्याशङ्क्याऽऽह—**नापीति** । जीवान्तरावेशोऽपि नैतदवकल्पत इति संबन्धः । एकस्यानेकधाभावश्रुतिविरोधादननुसंधानप्रसङ्गाच्चेत्यर्थः । शरीरान्तराणां निरात्मकत्वाभावे हेत्वन्तरमाह—**न चेति** । आत्मानधिष्ठितानामचेतनानां प्रवृत्त्ययोगाद्भोगाभावप्रसङ्गाच्च शरीरान्तरेषु न निरात्मकत्वमित्यर्थः। पूर्वपक्षबीजमनुभाषते—**यत्त्विति** । स्वतन्त्रानादिमनोभेदे सत्येव जीवभेदादेकमनःसंकल्पसमुत्थानात्तदायत्तानां मनसां भेदेऽपि जीवभेदाभावात्तत्तदुपाधिव्यक्तचैतन्यो विद्वानैश्वर्यभागित्युपगमे न किंचिदवद्यमिति परिहरति—**नेत्यादिना** । एकमनोनुवर्तनमेकाभिप्रायाविरोधित्वम् । उक्तेऽर्थे योगशास्त्रसंमतिमाह—**एषैवेति** । निर्माणचित्तान्यस्मितामात्रं प्रवृत्तिभेदप्रयोजकं चित्तमेकमनेकेषामित्यादिनैषैव प्रक्रियोक्तेत्यर्थः ॥ १९ ॥

---

१ ज. °धा स° । ट. °धा प° । २ अ. °तधा " इ° । ३ ट. यश्चाऽऽत्म° । ४ अ. °नुवृत्तीनि । ५ क. °षु चैते° । ६ ठ. °तिदी° । ७ ख. °तिनां । ८ क. ख. झ. °म्यन्ते ते° । ९ ख. झ. °न यथा व्य° । १० ठ. ड. °त्थानं तदा° ।

(सर्वेषां देहानां सात्मकत्वम्, अधि० ६)

कथं पुनर्मुक्तस्यानेकशरीरावेशादिलक्षणमैश्वर्यमभ्युपगम्यते, यावता " तत्केन कं विजानीयात् " [बृ० ४-५-१५] " न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् " [बृ० ४-३-३०] " सलिल एको द्रष्टाऽद्वैतो भवति[1] " [बृ० ४-३-३२] इति चैवंजातीयका श्रुतिर्विशेषविज्ञानं वारयतीत्यत उत्तरं पठति—

स्वाप्ययसंपत्त्योरन्यतरापेक्षमा-
विष्कृतं हि ॥ १६ ॥ (६)

स्वाप्ययः सुषुप्तम् " स्वमपीतो भवति[2] तस्मादेनं स्वपितीत्याचक्षते " [छा० ६-८-१] इति श्रुतेः । संपत्तिः कैवल्यम् " ब्रह्मैव सन्ब्रह्माप्येति " [बृ० ४-४-६] इति श्रुतेः । तयोरन्यतरामवस्थामपेक्ष्यैतद्विशेषसंज्ञाभाववचनम् । क्वचित्सुषुप्तावस्थामपेक्ष्योच्यते क्वचित्कैवल्यावस्थाम् । कथमवगम्यते, यतस्तत्रैवैतदधिकारवशादाविष्कृतम्[3] " एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञाऽस्तीति[4] " [बृ० २-४-१२] " यत्र त्वस्य सर्वमात्मैवाभूत् " [बृ० २-४-१४] " यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति " [बृ० ४-३-१९] इत्यादिश्रुतिभ्यः । सगुणविद्याविपाकस्थानं त्वेतत्स्वर्गादिवदवस्थान्तरं यत्रैतदैश्वर्यमुपवर्ण्यते । तस्माददोषः ॥ १६ ॥ (६)

मुक्तस्य यथोक्तमैश्वर्यं विशेषज्ञाननिषेधकश्रुतिविरुद्धमिति शङ्कते—कथमिति । शङ्कोत्तरत्वेन सूत्रमवतारयति—अत इति । प्रतिज्ञां व्याचष्टे—स्वाप्यय इति । उक्तमेव व्यक्तीकर्तुं विभजते—क्वचिदिति । तत्केन कमित्यादिकं वाक्यं क्वचिदित्युच्यते द्वितीयस्तु क्वचिच्छब्दः सलिलादिवाक्यगोचरः । हेतुभागमाकाङ्क्षाद्वारा व्याकरोति—कथमित्यादिना । तत्रेत्युक्तवाक्यप्रकरणोक्तिः । तदधिकारः सुषुप्तिमोक्षयोरन्यतरस्य प्रकरणम् । तत्र समुत्थानवाक्यं यत्र सुप्तवाक्यं स्वापाधिकारविषयम् । यत्र त्वस्येति मोक्षाधिकारविषयमिति भेदः । विशेषज्ञानाभावाभिधानं सुप्तिमुक्त्योरन्यतराभिप्रायेणेत्युक्तम् । इदानीमैश्वर्याभिधानस्य सगुणविद्याविषयत्वेन भिन्नगोचरत्वान्न विरोधाशङ्केत्याह—सगुणेति । कथं तर्हि सगुणविद्याफले मुक्तिशब्दप्रवृत्तिरित्याशङ्क्य संध्यायां दिवाशब्दवत्प्रत्यासत्तिमात्रेणेति मत्वाऽऽह—तस्मादिति ॥ १६ ॥ (६)

---

१ ग. ट. 'ति " इत्येवं' । २ झ. 'वतीति । ३ ग. 'त्रैव त' । ४ क. ज. ञ. ट. 'ज्ञाऽस्ति । य' ।

(ब्रह्मलोकगतानामुपासकानां जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यसिद्धिः, अधि० ७)

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

ये सगुणब्रह्मोपासनात्सहैव मनसेश्वरसायुज्यं व्रजन्ति[1] किं तेषां निरवग्रहमैश्वर्यं भवत्याहोस्वित्सावग्रहमिति संशयः। किं तावत्प्राप्तम्। निरङ्कुशमेवैषामैश्वर्यं भवितुमर्हति, "आप्नोति स्वाराज्यम्" [तैत्ति० १-६-२] "सर्वेऽस्मै देवा बलिमावहन्ति" [तै० १-५-३] "तेषां सर्वेषु लोकेषु कामचारो भवति" [छा० ७-२५-२; ८-१-६] इत्यादिश्रुतिभ्य इति। एवं प्राप्ते पठति—"जगद्व्यापारवर्जम्" इति। जगदुत्पत्त्यादिव्यापारं वर्जयित्वाऽन्यदणिमाद्यात्मकमैश्वर्यं मुक्तानां भवितुमर्हति, जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य। कुतः। तस्य तत्र प्रकृतत्वादसंनिहितत्वाच्चेतरेषाम्। पर एव हीश्वरो जगद्व्यापारेऽधिकृतः। तमेव प्रकृत्योत्पत्त्याद्युपदेशात्। नित्यशब्दनिबन्धन-

---

मनोदेहसर्गादावुत्सर्गतो यदैश्वर्यमुपासितुरुक्तं तस्य जगत्सर्गेऽप्रमाणादपवादं दर्शयति—**जगदिति**। अपरब्रह्मणा[2] सायुज्यं गतानामैश्वर्यं विषयीकृत्य तस्योभयथादृष्ट्या संशयमाह—**ये सगुणेति**। सगुणब्रह्मविद्याफलभूतैश्वर्यस्य निरतिशयत्वनिवारणात्पादादिसंगतिः। पूर्वपक्षे विद्वद्दैश्वर्यस्य निरङ्कुशत्वादीश्वरभेदादनेकमत्या जगदुत्पत्त्यादिव्यवस्थासिद्धिः। सिद्धान्ते तद्भेदाभावात्परमेश्वराधीनतया जगदुदयादिव्यवस्थोपपत्तिरित्यभिप्रेत्य प्रश्नपूर्वकं पूर्वपक्षयति[3]—**किं तावदिति**। श्रुतीनां श्रुतार्थग्रहेण पूर्वपक्षयित्वा सिद्धान्तयति—**एवमिति**। तत्र प्रतिज्ञां विभजते—**जगदिति**। तत्र हेतुद्वयं प्रश्नपूर्वकमाह—**कुत इति**। ईश्वरस्य नित्यसिद्धस्यैव जगदुत्पत्त्यादिव्यापार इत्यत्र प्रकरणादिति हेतुं विवृणोति[4]—**पर इति**। प्रलयादुत्थानकाले सर्वस्य जगतो यः कर्ता तस्यैव स्थित्यादावपि कर्तृत्वोक्तेरन्यस्य चाऽऽदिसर्गे कर्तृत्वाभावादीश्वरस्यैव जगद्व्यापारे संनिधिरित्याह—**तमेवेति**। किंच परस्यैव नित्यत्वेन स्वहेत्वनपेक्षणस्य बलप्रशक्तित्वाज्जगत्सर्जनं प्रति कल्प्यसामर्थ्यत्वाच्च विदुषामीश्वरविषयैव जगत्सृष्टिरेष्टव्या। किंच पौर्वापर्यालोचनायामीश्वरस्यैव जगत्सर्गः शब्दाद्गम्यते। जन्मादिसूत्रमारभ्य चैतदुपपादितम्। ततो द्वितीयप्रतिज्ञा सिद्धैवेत्याह—**नित्येति**। ईश्वरस्य

---

१ ज. ट. 'न्ति ते'। २ ट. 'पाराधि'। ३ ट. ड. 'ह्मणः सा'। ४ ठ. ड. 'रित्युपेत्य'। ५ क. ख. ग. प्रकृतत्वादि'।

(ब्रह्मलोकगतानामुपासकानां जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यसिद्धिः, अधि० ७)

त्वाच्च । तदन्वेषणविजिज्ञासनपूर्वकं त्वितरेषामणिमाद्यैश्वर्यं श्रूयते । तेनासंनिहितास्ते जगद्व्यापारे । समनस्कत्वादेव चैतेषामनेकमत्ये कस्यचित्स्थित्यभिप्रायः कस्यचित्संहाराभिप्राय इत्येवं विरोधोऽपि कदाचित्स्यात् । अथ कस्यचित्संकल्पमन्वन्यस्य संकल्प इत्यविरोधः समर्थ्येत ततः परमेश्वरोकूततन्त्रत्वमेवेतरेषामिति व्यवतिष्ठते ॥ १७ ॥

प्रत्यक्षोपदेशादिति चेन्नाऽऽधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

अथ यदुक्तम् " आप्नोति स्वाराज्यम् " [तै० १-६-२] इत्यादिप्रत्यक्षोपदेशान्निरवग्रहमैश्वर्यं विदुषां न्याय्यमिति तत्परिहर्तव्यम् । अत्रोच्यते—नायं दोषः । " आधिकारिकमण्डलस्थोक्तेः " । आधिकारिको यः सवितृमण्डलादिषु विशेषायतनेष्ववस्थितः पर ईश्वरस्तदायत्तैवेयं स्वाराज्यप्राप्तिरुच्यते । यत्कारणमनन्तरम् " आप्नोति मनसस्पतिम् " [तै० १-६-२]

जगद्व्यापारे संनिधिमुक्त्वा विदुषां तत्रासंनिधिमाद्यप्रतिज्ञासिद्ध्यर्थं समर्थयते—तदन्वेषणेति । श्रूयते तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादाविति शेषः । सृष्ट्युत्तरभाविनामुपासकानां सृष्टिकाले सत्त्वाभावात्पूर्वकल्पसिद्धानां प्रलयकाले मुक्तत्वान्न स्रष्टृत्वादि तेषां श्लिष्टमित्यर्थः । इतश्च विदुषां न निरङ्कुशैश्वर्यमित्याह—समनस्कत्वादिति । किं विदुषां समप्रधानत्वमाहो गुणप्रधानत्वम् । आद्ये समप्रधानानां नियमेनैकमत्यादर्शनादेकस्य सिसृक्षायामपरस्य संजिहीर्षासंभवादपर्यायमेव सर्गसंहारौ स्याताम् । अपरथा द्वयोरपि नेश्वरत्वं कार्यविघातादित्यर्थः । द्वितीयमनुभाष्य दूषयति—अथेत्यादिना । एकाभिप्रायानुवर्तितायामन्येषामागन्तुकैश्वर्याणामगृह्यमाणविशेषतया कस्यचित्प्राधान्यायोगादनागन्तुकैश्वर्यपरमेश्वरवर्तित्वमितरेषामेषितव्यमित्यर्थः ॥ १७ ॥

पूर्वपक्षबीजमनूद्य दूषयति—प्रत्यक्षेति । अनुवादभागं व्याकरोति—अथेति । परिहारमवतारयति—अत्रेति । नञर्थमुक्त्वा हेतुमवतार्य व्याचष्टे—नेत्यादिना । अधिकारे नियोजयत्यादित्यादीनित्याधिकारिकस्तत्र हेतुमाह—यदिति । यस्मात्कार-

---

१ अ. °वैकमित° । २ क. अ °षामादिमदैश्व° । ३ क. ज. अ. चैषा° । ४ ट. °मनेकत्वे कस्य° । ५ अ. °राहृत° । ट. °राभिप्रायत° । ६ ट. विदुषो । ७ अ. °नेषु व्यव° । ८ अ. °रमेश्व° । ९ ठ. ड. °नां च प्र° । १० ठ. ड. °मनुभाष्य दू° ।

इत्याह । यो हि सर्वमनसां पतिः पूर्वसिद्ध ईश्वरस्तं प्राप्नोतीत्येतदुक्तं भवति । तदनुसारेणैव चानन्तरम् " वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवति " [तै० १-६-२] इत्याह । एवमन्यत्रापि यथासंभवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यं योजयितव्यम् ॥ १८ ॥

विकारावर्तिं च तथा हि स्थितिमाह ॥ १९ ॥

" विकारावर्ति " अपि च नित्यमुक्तं पारमेश्वरं रूपं न केवलं विकारमात्रगोचरं सवितृमण्डलाद्यधिष्ठानम् । तथा ह्यस्य द्विरूपां स्थितिमाहाऽऽम्नायः—

" तावानस्य महिमा ततो ज्यायांश्च पूरुषः ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि "
[छा० ३-१२-६] इत्येवमादिः । न च तन्निर्विकाररूपमितरालम्बनाः प्राप्नुवन्तीति शक्यं वक्तुमतत्कृतुत्वात्तेषाम् ।

णात्स्वाराज्यप्राप्त्यनन्तरमाहाऽऽप्नोति मनसस्पतिमिति । यदि पूर्वमेव निरङ्कुशं स्वाराज्यमुक्तं तर्हि पश्चादीश्वरप्राप्तिवचनं न स्यात्तस्माद्भोगे स्वाराज्यं न तु जगतः स्रष्टृत्वादित्यर्थः । विवक्षितार्थसिद्धये वाक्यार्थं कथयति—यो हीति । विदुषामीश्वराधीनमैश्वर्यं स्वाराज्यमित्यत्र वाक्यशेषमनुकूलयति—तदनुसारेणेति । परमेश्वराधीनमणिमादिलक्षणमैश्वर्यं विदुषां स्वाराज्यं न तु जगतः स्रष्टृत्वादीत्युक्तमर्थं तेषां सर्वेषु लोकेष्वित्यादिवाक्येषु संचारयति—एवमिति ॥ १८ ॥

निरतिशयैश्वर्यवदीश्वरोपासकास्तदात्मतां प्राप्ताः सातिशयैश्वर्यवन्तो भवन्तीत्ययुक्तं तदात्मत्वविरोधादित्याशङ्क्य ब्रह्मैक्येऽपि सगुणप्राप्तानां निर्गुणप्राप्त्यभाववदेतदप्युक्तमिति वक्तुं ब्रह्मणो द्वैरूप्यमाह—विकारावर्तीति । तत्र प्रतिज्ञांविभागं व्याचष्टे—विकारेति । चकारसूचितमर्थमाह—नेति । हेतुभागं व्याचष्टे—तथा हीति । तत्र प्रथमतृतीयपादाभ्यां विकारवर्ति रूपमुच्यते, द्वितीयचतुर्थपादाभ्यां विकारावर्ति ब्रह्मणो रूपमुक्तमिति भेदः । अस्तु ब्रह्मणो विकारावर्ति रूपं तथाऽपि किं स्यात्तत्राऽऽह—न चेति । वस्तुतस्तथात्वेऽपि यथोपासनमेव तत्प्राप्तिरुपासनं च

---

१ ज. झ. °प्रीत्यै° । २ अ. °रेण चा° । ३ ट. °न्तरं वाक्यम् " वा° । ४ ट. °मेवैषा° । ५ ट. °वलवि° । ६ अ. पुरुषः । ७ क. अ. °कारं रू° । ८ ठ. ड. °क्ये स° । ९ ठ. ड. °शाभा° ।

(ब्रह्मलोकगतानामुपासकानां जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यसिद्धिः, अधि० ७)

अतश्च यथैव द्विरूपे परमेश्वरे निर्गुणं[1] रूपमनवाप्य सगुण एवाव-तिष्ठन्त[2] एवं सगुणेऽपि निरवग्रहमैश्वर्यमनवाप्य[3] सावग्रह एवाव-तिष्ठन्त[4] इति द्रष्टव्यम् ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

" दर्शयतश्च " विकारावर्तित्वं परस्य ज्योतिषः श्रुतिस्मृती। " न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः " [कठ० ५-१५। श्वेता० ६-१४। मुण्ड०२-२-१०] इति।

" न तद्भासयते सूर्यो न शशाङ्को न पावकः "

[भ० गी० १५-६] इति च। तदेवं विकारावर्तित्वं पर-स्य ज्योतिषः प्रसिद्धमित्यभिप्रायः ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

इतश्च न निरङ्कुशं विकारालम्बनानामैश्वर्यं यस्माद्भोगमात्र-मेवैषामनादिसिद्धेनेश्वरेण समानमिति श्रूयते " तमाहाऽऽपो वै

विध्यधीनं निरवग्रहमहत्त्वादिधर्मस्य चोपास्त्यगोचरत्वादनुपासितस्याप्राप्तिरिति फलि-तमाह—अतश्चेति ॥ १९ ॥

विकारावर्ति रूपमस्तीत्यत्रैव श्रुतिस्मृती प्रमाणयति—दर्शयतश्चेति। प्रसिद्धे प्रत्यक्षानुमाने प्रत्याचक्षाणः सूत्राक्षराणि योजयति—दर्शयतश्चेत्यादिना। उक्तेऽर्थे सुलभानि श्रुतिस्मृतिवचनानीति मन्वानो वाक्यार्थमाह—तदेवमिति ॥ २० ॥

अपरब्रह्मविदां विश्वस्रष्टृत्वाद्यभावे हेत्वन्तरमाह—भोगमात्रेति। न केवलं स्वाराज्यस्य परमेश्वरायत्ततया विदुषां जगद्व्यापाररहित्यं किंतु तेन भोगमात्रेण साम्योक्तिर्लिङ्गादपीत्यर्थः। चकारार्थमाह—इतश्चेति। हेत्वन्तरमेवावशिष्टसूत्राक्षरयो-जनया स्पष्टयति—यस्मादिति। तं ब्रह्मलोकगतमुपासकं हिरण्यगर्भः स्वसमीपमुपा-गतं सानुनयमाह मया खल्वाप एवामृतमद्यो मीयन्ते दृश्यन्ते भुज्यन्ते तवाप्यसाव-मृतरूपोदकलक्षणो लोको भोग्यो यथासुखं भुज्यतामित्याह—तमाहेति। उपासक-

---

१ ट. °र्गुणरू°। २ ज. °ष्ठत ए° ३ क. °ग्रहं जगदैश्व°। ४ ज. °ष्ठत इ°। ५ क. ज. ञ. °मेषा°।

(ब्रह्मलोकगतानामुपासकानां जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगभोक्षयोस्तेषां स्वातन्त्र्यसिद्धेः, अधि० ७)

खलु मीयन्ते लोकोऽसौ " इति " स यथैतां देवतां सर्वाणि भूतान्यवन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्ति " [बृह० १-५-२०] "तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति" [बृ० १-५-२३] इत्यादिभेदव्यपदेशलिङ्गेभ्यः ॥ २१ ॥

नन्वेवं सति सातिशयत्वादन्तवत्त्वमैश्वर्यस्य स्यात्ततश्चैषामावृत्तिः प्रसज्येतेत्यत उत्तरं भगवान्बादरायण आचार्यः पठति—

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥ (७)

नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन पथा ये ब्रह्मलोकं शास्त्रोक्तविशेषणं गच्छन्ति यस्मिन्नरश्च[1] ह वै प्यश्वार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि यस्मिन्नैरं मदीयं

स्योपास्यदेवतया भोगमात्रसाम्ये श्रुत्यन्तरमाह—स यथेति । सशब्दो दृष्टान्तपरः । अवन्ति भजन्ते । तत्रैव वाक्यान्तरमाह—तेनेति । उशब्दोऽप्यर्थः सलोकतामपीति संबध्यते । प्रकृतेनोपासनेनोपास्याया देवतायाः सायुज्यं[2] तेन समानदेहतां समानलोकतां च भावनाविशेषादाप्नोतीत्यर्थः ॥ २१ ॥

विदुषां निरङ्कुशैश्वर्याभावे दोषमाशङ्कते—नन्विति । सह परमेश्वरस्यैश्वर्येणातिशयेन वर्तत इति सातिशयं विदुषामैश्वर्यं तथा च परमेश्वराधीनत्वाल्लौकिकैश्वर्यवत्कार्यं[3] कार्यत्वाच्चान्तवदित्यर्थः । विद्वद्दैश्वर्यस्यान्तवत्त्वे का क्षतिरित्याशङ्क्य विदुषां मुक्तता न स्यादित्याह—ततश्चेति । एतदुत्तरत्वेनोत्तरसूत्रं सूत्रकारं पूजयन्नवतारयति—अत इति । भगवानित्यनेन सर्वज्ञत्वादिसंपात्तिरुक्ता । आचार्यशब्देन शास्त्रार्थबहुलीकरणं सदाचारे शिष्याणां स्थापनं स्वयं तदाचरणं चेत्यत्र नैपुण्यमुक्तमिति भेदः । यत्तु सातिशयत्वेन कार्यत्वं ततश्चान्तवत्त्वमित्यनुमानं तत्र किमैश्वर्यस्यान्तवत्त्वमात्रं साध्यं किंवा मुक्त्यभावो विदुषामिति विकल्प्याऽऽद्ये सिद्धसाध्यत्वं मत्वा द्वितीये क्रममुक्तिवादिश्रुतिविरोधमाह—अनावृत्तिरिति । सूत्रस्थं प्रतिज्ञापदं व्याचष्टे—नाडीति । अर्चिरादिपदोक्तदेवयानं पन्थानं स्मारयितुं विशेषणद्वयम् । ये ब्रह्मलोकं गच्छन्ति ते तं प्राप्य भुक्तभोगास्ततो नाऽऽवर्तन्त इति संबन्धः । कानि तानि शास्त्रोक्तानि विशेषणानीत्युक्ते यथाशास्त्रं तान्यनुक्रामति—यस्मिन्निति । इतो लोकात्पृथिवीशब्दिताच्तृतीयस्यां दिवि यो ब्रह्मलोकस्तस्मिन्नरण्यसंज्ञौ द्वावर्णवावित्यर्थः । तस्मिन्नेवान्नमयं हर्षकरं च सरोऽस्तीत्याह—यस्मिन्नैरमिति । सोमसवन इत्यत्र सोमशब्दोऽमृतव-

---

१ ज. °श्च ण्य°। २ ठ. ड. °ज्यं स°। ३ क. ञ. °त्कार्यत्वा°। ४ ठ. ड. °पुणमु°। ५ क. ञ. °थिव्यादिश°।

(ब्रह्मलोकगतानामुपासकानां जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यसिद्धिः, अधि० ७)

सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता[1] पूर्ब्रह्मणो यस्मिंश्च प्रभुर्विमितं हिरण्मयं वेश्म [छा० ८-५३] यश्चानेकधा मन्त्रार्थवादादिप्रदेशेषु प्रपञ्च्यते[2] ते तं प्राप्य न चन्द्रलोकादिव[3] भुक्तभोगा आवर्तन्ते । कुतः । " तयोर्ध्वमायन्नमृतत्वमेति " [छा० ८-६-६ । कठ०६-१६] "तेषां न पुनरावृत्तिः " [बृ० ६-२-१५] " एतेन प्रतिपद्यमाना इमं मानवमावर्तं नाऽऽवर्तन्ते " [छा० ४-१५-५] " ब्रह्मलोकमभिसंपद्यन्ते[4] " [छा० ८-१५-१] " न च[5] पुनरावर्तते " [छा० ८-१५-१] इत्यादिशब्देभ्यः[6] । अन्तवत्त्वेऽपि त्वैश्वर्यस्य यथाऽनावृत्तिस्तथा वर्णितम् " कार्यात्यये तदध्यक्षेण सहातः परम् " [ब्र० सू० ४-३-१०] इत्यत्र । सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिः । तदाश्रयणेनैव हि सगुणशरणा-

---

चनः । कर्मज्ञानशून्यानां दुर्प्रापत्वमपराजितत्वम् । ब्रह्मणो हिरण्यगर्भस्येति यावत् । प्रभुशब्दोऽपि हिरण्यगर्भमेवाधिकरोति । उक्तविशेषणवति ब्रह्मलोके मानमाह—**यश्चेति** । चन्द्रलोकादिवेति वैधर्म्योदाहरणम् । प्रतिज्ञामेवं व्याख्यायं मोक्षहेतुमाकाङ्क्षापूर्वकं व्याख्याति—**कुत इत्यादिना** । ननु दर्शितानामनावृत्तिश्रुतीनामर्थवादैत्वादविरोधेऽप्रामाण्यमिति[11] नानुमानापबाधने सामर्थ्यमिममिहेति च विशेषणात्कल्पान्तरे भवत्यावृत्तिरिति तत्राऽऽह—**अन्तवत्त्वेऽपीति** । ये तावदूर्ध्वरेतसः स्वाश्रमधर्ममात्रनिष्ठा ब्रह्मचर्येण ब्रह्मलोकमधिरूढास्तेषामन्तरेण विद्यां बन्धध्वंसासिद्धेरस्त्येवाऽऽवृत्तिः । ये तु सगुणोपासकास्तेषामैश्वर्यस्य कल्पमात्रस्थायित्वेऽपि क्रममुक्तिविवक्षयाऽनावृत्तिरविरुद्धेत्यर्थः । सगुणब्रह्मविदामेवानावृत्तिरत्र प्रतिपाद्यते न निर्गुणब्रह्मविदां तत्र को हेतुरित्याशङ्क्य तेषामावृत्तिशङ्काभावादित्याह—**सम्यगिति** । सगुणब्रह्मविदामपि ब्रह्मलोकगतानां[12] तत्रोत्पन्नसम्यग्दर्शनप्रसादादेव मुक्तिरिति स्थिते सम्यग्दर्शिनामनावृत्तिः सुतरां सिध्यतीति कैमुतिकन्यायमाह—**तदाश्रयणेनेति** । उपासकानामीश्वरायत्तमैश्वर्यं न निरतिशयमित्यधिकरणार्थमुपसंहर्तुमितीत्युक्तम् । सूत्राभ्यासस्य प्रयोजन-

---

१ क. ज्ञ. °ता पुरी ब्रह्म° । २ क. ञ. °ते तं ते प्रा° । ३ ज्ञ. ट. °वद्भुक्त° । ञ. °वद्वियुक्त° । ४ म. ट. °द्यते° " न । ५ ज. ट. स । ६ ट. इतिश° । ७ ज. °णपरायणा° । ८ क. °प्राप्यत्वं । ९ क. ख. ठ, ड. °य हे° । १० क. ज्ञ. 'दवि' । ११ ठ. °विशेषेऽप्रा° । १२ ठ. ड. °लोकं ग° ।

(ब्रह्मलोकगतानामुपासकानां जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगभोक्षयोस्तेषां स्वातन्त्र्यसिद्धिः, अधि० ७)

नामप्यनावृत्तिसिद्धिरिति । " अनावृत्तिः शब्दादनावृत्तिः शब्दात् " इति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥२२॥ (७)

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादकृतौ चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥

माह—अनावृत्तिः शब्दादिति । यत्राध्यायपरिसमाप्तिरेव तत्र पदस्यैवाभ्यासो दृष्टः प्रकृते सूत्रस्यैवाभ्यासाच्चतुर्लक्षणस्य वेदान्तमीमांसाशास्त्रस्य समन्वयाविरोधसाधनफलानां साकल्येनोक्तत्वाद्वक्तव्यानवशेषात्परिसमापनमुचितमिति भावः ॥ २२ ॥ (७)

व्याख्याऽसंख्यातर्कककचचयरयस्तदुस्तर्कशङ्का
शङ्काव्याजप्रकारप्रसरणसमतावस्तुतत्त्वं श्रयन्ती ॥
शुद्धानन्दाङ्घ्रियुग्मस्मृतिभरनिभृतप्रौढगाढोक्तिरूढाऽऽ-
नन्दज्ञानप्रणीता जगति मुदमियं सद्धियां संविधत्ताम् ॥ १ ॥
सन्त्येव बहुलानीह व्याख्यानानि महाधियाम् ॥
व्याख्या तथाऽपि सौख्येन व्याख्यानाय मया कृता ॥ २ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृते श्रीमच्छारीरकमीमांसाभाष्यविभागे न्यायनिर्णये चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥

॥ समाप्तामिदं ब्रह्ममीमांसाशास्त्रं सटीकशांकरभाष्ययुतम् ॥

॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

---

१ ज. ट. °न्दात् " । २ ब. दर्शयति ।

*

श्रीमद्द्वैपायनप्रणीतब्रह्मसूत्राणां वर्णानुक्रमपत्रकम् ।

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
अंशो नानाव्यपदेशादन्यथा चापि दाशकि-तवादित्वमधीयत एके	२	३	४३	२	८०
अकरणत्वाच्च न दोषस्तथाहि दर्शयति	२	४	११	२	११७
अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्या-मौपसदवत्तदुक्तम्	३	३	३३	२	३३०
अक्षरमम्बरान्तधृतेः	१	३	१०	१	२५२
अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्	४	१	१६	२	४९३
अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्	३	१	४	२	१४१
अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्	३	३	५५	२	३७५
अङ्गित्वानुपपत्तेश्च	२	२	८	१	५२७
अङ्गेषु यथाश्रयभावः	३	३	६१	२	३८७
अचलत्वं चापेक्ष्य	४	१	९	२	४८१
अणवश्च	२	४	७	२	११०
अणुश्च	२	४	१३	२	१२०
अत एव च नित्यत्वम्	१	३	२९	१	३०६
अत एव च सर्वाण्यनु	४	२	२	२	५०१
अत एव चाग्नीन्धनाद्यनपेक्षा	३	४	२५	२	४१९
अत एव चानन्याधिपतिः	४	४	९	२	५६०
अत एव चोपमा सूर्यकादिवत्....	३	२	१८	२	२११
अत एव न देवता भूतं च	१	२	२७	१	२२७
अत एव प्राणः....	१	१	२३	१	१४२
अतः प्रबोधोऽस्मात्	३	२	८	२	१९६
अतश्चायनेऽपि दक्षिणे	४	२	२०	२	५२०
अतस्त्वितरज्यायो लिङ्गाच्च	३	४	३९	२	४३४
अतिदेशाच्च	३	३	४६	२	३६२
अतोऽनन्तेन तथाहि लिङ्गम्	३	२	२६	२	२३०
अतोऽन्याऽपि ह्येकेषामुभयोः	४	१	१७	२	४९४

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
अत्ता चराचरग्रहणात्	१	२	९	१	१८४
अथातो ब्रह्मजिज्ञासा	१	१	१	१	१९
अदृश्यत्वादिगुणको धर्मोक्तेः	१	२	२१	१	२१०
अदृष्टानियमात्	२	३	५१	२	९२
अधिकं तु भेदनिर्देशात्	२	१	२२	१	४८६
अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्	३	४	८	२	३९७
अधिष्ठानानुपपत्तेश्च	२	२	३९	१	६०५
अध्ययनमात्रवतः	३	४	१२	२	४०१
अनभिभवं च दर्शयति	३	४	३५	२	४३२
अनवस्थितेरसंभवाच्च नेतरः	१	२	१७	१	२०२
अनारब्धकार्ये एव तु तदवधेः	४	१	१५	२	४९०
अनाविष्कुर्वन्नन्वयात्	३	४	५०	२	४४७
अनावृत्तिः शब्दादनावृत्तिः शब्दात्	४	४	२२	२	५७०
अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम्	३	३	३१	२	३२२
अनिष्टादिकारिणामपि च श्रुतम्	३	१	१२	२	१६०
अनुकृतेस्तस्य च	१	३	२२	१	२८२
अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्	२	३	४८	२	८७
अनुपपत्तेस्तु न शारीरः	१	२	३	१	१७८
अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववदृष्टश्च तदुक्तम्	३	३	५०	२	३६५
अनुष्ठेयं बादरायणः साम्यश्रुतेः	३	४	१९	२	४०७
अनुस्मृतेर्बादरिः	१	२	३०	१	२३०
अनुस्मृतेश्च	२	२	२५	१	५७२
अनेन सर्वगतत्वमायामशब्दादिभ्यः	३	२	३७	२	२४०
अन्तर उपपत्तेः	१	२	१३	१	१९५
अन्तरा चापि तु तद्दृष्टेः	३	४	३६	२	४३२
अन्तरा भूतग्रामवत्स्वात्मनः	३	३	३५	२	३३५
अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नावि-शेषात्	२	३	१५	२	३४
अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्	१	२	१८	१	२०३
अन्तवत्त्वमसर्वज्ञता वा	२	२	४१	१	६०७
अन्तस्तद्धर्मोपदेशात्	१	१	२०	१	१३२

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः	२	२	३६	१	६००
अन्यत्राभावाच्च न तृणादिवत्	२	२	५	१	५२२
अन्यथात्वं शब्दादिति चेन्नाविशेषात्	३	३	६	२	२५८
अन्यथानुमितौ च ज्ञशक्तिवियोगात्	२	२	९	१	५२७
अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्	३	३	३६	२	३३६
अन्यभावव्यावृत्तेश्च	१	३	१२	१	२५९
अन्याधिष्ठितेषु पूर्ववदभिलापात्	३	१	२२	२	१७१
अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके	१	४	१८	१	३२३
अन्यार्थश्च परामर्शः	१	३	२०	१	२८०
अन्वयादिति चेत्स्यादवधारणात्	३	३	१७	२	२८२
अपरिग्रहाच्चात्यन्तमनपेक्षा	२	२	१७	१	५५१
अपि च सप्त	३	१	१५	२	१६२
अपि च स्मर्यते	१	३	२३	१	२८५
,, ,, ...	२	३	४५	२	८३
,, ,, ...	३	४	३०	२	४२७
,, ,, ...	३	४	३७	२	४३३
अपि चैवमेके	३	२	१३	२	२०७
अपि संराधने प्रत्यक्षानुमानाभ्याम्	३	२	२४	२	२२९
अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्	२	१	८	१	४४३
प्रतीकालम्बनान्नयतीति बादरायण उभयथाऽ- दोषात्तत्क्रतुश्च	४	३	१५	२	५४९
अबाधाच्च	२	४	२९	२	४२७
अभावं बादरिराह ह्येवम्	४	४	१०	२	५६०
अभिध्योपदेशाच्च	१	४	२४	१	४१०
अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्	२	१	५	१	४३५
अभिव्यक्तेरित्याश्मरथ्यः	१	२	२९	१	२३०
अभिसंध्यादिष्वपि चैवम्	२	३	५२	२	९३
अभ्युपगमेऽप्यर्थाभावात्	२	२	६	१	५२४
अम्बुवदग्रहणात्तु न तथात्वम्	३	२	१९	२	२१२
अरूपवदेव हि तत्प्रधानत्वात्	३	२	१४	२	२०८
अर्चिरादिना तत्प्रथितेः	४	३	१	२	५२२

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वा-देवं व्योमवच्च	१	२	७	१	१८१
अल्पश्रुतेरिति चेत्तदुक्तम्	१	३	२१	१	२८१
अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि	२	३	२४	२	५०
अवस्थितेरिति काशकृत्स्नः	१	४	२२	१	३९९
अविभागेन दृष्टत्वात्	४	४	४	२	५५५
अविभागो वचनात्	४	२	१६	२	५१५
अविरोधश्चन्दनवत्	२	३	२३	२	५०
अशुद्धमिति चेन्न शब्दात्	३	१	२५	२	१७४
अश्मादिवच्च तदनुपपत्तिः	२	१	२३	१	४८८
अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः	३	१	६	२	१४५
असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा	२	२	२१	१	५६७
असदिति चेन्न प्रतिषेधमात्रत्वात्	२	१	७	१	४४१
असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्	२	१	१७	१	४७४
असंततेश्चाव्यतिकरः	२	३	४९	२	८९
असंभवस्तु सतोऽनुपपत्तेः	२	३	९	२	२२
असार्वत्रिकी	३	४	१०	२	४००
अस्ति तु	२	३	२	२	३
अस्मिन्नस्य च तद्योगं शास्ति	१	१	१९	१	१२३
अस्यैव चोपपत्तेरेष ऊष्मा	४	२	२१	२	५१०

आ.

आकाशस्तल्लिङ्गात्	१	१	२२	१	१३८
आकाशे चाविशेषात्	२	२	२४	१	५७०
आकाशोऽर्थान्तरत्वादिव्यपदेशात् .... —	१	३	४१	१	३३७
आचारदर्शनात्	३	४	३	२	३९५
आतिवाहिकास्तल्लिङ्गात्	४	३	४	२	५३०
आत्मकृतेः परिणामात्	१	४	२६	१	४११
आत्मगृहीतिरितरवदुत्तरात्	३	३	१६	२	२७९
आत्मनि चैवं विचित्राश्च हि	२	१	२८	१	४९८
आत्मशब्दाच्च	३	३	५५	२	२७८

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
आत्मा प्रकरणात्	४	४	३	२	५५४
आत्मेति तूपगच्छन्ति ग्राहयन्ति च	४	१	३	२	४६५
आदरादलोपः	३	३	४०	२	३४४
आदित्यादिमतयश्चाङ्ग उपपत्तेः	४	१	६	२	४७४
आध्यानाय प्रयोजनाभावात्	३	३	१४	२	२७६
आनन्दमयोऽभ्यासात्	१	१	१२	१	११५
आनन्दादयः प्रधानस्य	३	३	११	२	२७३
आनर्थक्यमिति चेन्न तदपेक्षत्वात्	३	१	१०	२	१५८
आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त-गृहीतेर्दर्शयति च	१	४	१	१	३४३
आपः	२	३	११	२	२७
आप्रायणात्तत्रापि हि दृष्टम्	४	१	१२	२	४८३
आभास एव च	२	३	५०	२	९०
आमनन्ति चैनमस्मिन्	१	२	३२	१	२३२
आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते	३	४	४५	२	४४२
आवृत्तिरसकृदुपदेशात्	४	१	१	२	४५७
आसीनः संभवात्	४	१	७	२	४७९
आह च तन्मात्रम्	३	२	१६	२	२१०
इ.					
इतरपरामर्शात्स इति चेन्नासंभवात्	१	३	१८	१	२६९
इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः	२	१	२१	१	४८४
इतरस्याप्येवमसंश्लेषः पाते तु	४	१	१४	२	४८९
इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्	२	२	१९	१	५६२
इतरे त्वर्थसामान्यात्	३	३	१३	२	२७५
इतरेषां चानुपलब्धेः	२	१	२	१	४२६
इयदामननात्	३	३	३४	२	३३३
ई.					
ईक्षतिकर्मव्यपदेशात्सः	१	३	१३	१	२५५
ईक्षतेर्नाशब्दम्	१	१	५	१	९२

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
उ.					
उत्क्रमिष्यत एवंभावादित्यौडुलोमिः	१	४	२१	१	३९९
उत्क्रान्तिगत्यागतीनाम्	२	३	१९	२	४६
उत्तराच्चेदाविर्भूतस्वरूपस्तु	१	३	१९	१	२७०
उत्तरोत्पादे च पूर्वनिरोधात्	२	२	२०	१	५६५
उत्पत्त्यसंभवात्	२	२	४२	१	६०९
उदासीनानामपि चैवं सिद्धिः	२	२	२७	१	५७८
उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्	१	१	२७	१	१५९
उपादानात्	२	३	३५	२	६५
उपपत्तेश्च	३	२	३५	२	२३८
उपपद्यते चाप्युपलभ्यते च	२	१	३६	१	५०८
उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्	३	३	३०	२	३२१
उपपूर्वमपि त्वेके भावमशनवत्त्वदुक्तम्	३	४	४२	२	४३७
उपमर्दं च	३	४	१६	२	४०३
उपलब्धिवदनियमः	२	३	३७	२	६६
उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि	२	१	२४	१	४८८
उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च	३	३	५	२	२५७
उपस्थितेऽतस्तद्वचनात्	३	३	४१	२	३४७
उभयथा च दोषात्	२	२	१६	१	५५०
,, ,, ...	२	२	२३	१	५६९
उभयथाऽपि न कर्मातस्तदभावः	२	२	१२	१	५४०
उभयव्यपदेशात्त्वहिकुण्डलवत्	३	२	२७	२	२३१
उभयव्यामोहात्तत्सिद्धेः....	४	३	५	२	५३१
ऊ.					
ऊर्ध्वरेतःसु च शब्दे हि....	३	४	१७	२	४०४
ए.					
एक आत्मनः शरीरे भावात्	३	३	५३	२	३७०
एतेन मातरिश्वा व्याख्यातः	२	३	८	२	२०
एतेन योगः प्रत्युक्तः	२	१	३	१	४२७
एतेन शिष्टापरिग्रहा अपि व्याख्याताः....	२	१	१२	१	४५३

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
एतेन सर्वे व्याख्याता व्याख्याताः	१	४	२८	१	४१३
एवं चाऽऽत्मा कात्स्न्र्यम्	२	२	३४	१	५९७
एषं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थाव- धृतेः	३	४	५२	२	४५३
एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः	४	४	७	२	५५८
ऐ.					
ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्	३	४	५१	२	४४९
क.					
कम्पनात्	१	३	३९	१	३३१
करणवच्चेन्न भोगादिभ्यः	२	२	४०	१	६०६
कर्ता शास्त्रार्थवत्त्वात्	२	३	३३	२	६४
कर्मकर्तृव्यपदेशाच्च	१	२	४	१	१७९
कल्पनोपदेशाच्च मध्वादिवदविरोधः	१	४	१०	१	३६९
कामकारेण चैके	३	४	१५	२	४०२
कामाच्च नानुमानापेक्षा	१	१	१८	१	१२२
कामादीतरत्र तत्र चाऽऽयतनादिभ्यः	३	३	३९	२	३४२
काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्	३	३	६०	२	३८६
कारणत्वेन चाऽऽकाशादिषु यथाव्यपदिष्टोक्तेः	१	४	१४	१	३७९
कार्यं बादरिरस्य गत्युपपत्तेः	४	३	७	२	५३४
कार्याख्यानादपूर्वम्	३	३	१८	२	२८७
कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्	४	३	१०	२	५३६
कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः	२	३	४२	२	७८
कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च	३	१	८	२	१४९
कृत्स्नभावात्तु गृहिणोपसंहारः	३	४	४८	२	४४६
कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा	२	१	२६	१	४९२
क्षणिकत्वाच्च	२	२	३१	१	५९०
क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्....	१	३	३५	१	१२७
ग.					
गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च	१	३	१५	१	२६६

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
गतिसामान्यात्	१	१	१०	१	१०९
गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः....	३	३	२९	२	३२०
गुणसाधारण्यश्रुतेश्च	३	३	६४	२	३८८
गुणाद्वा लोकवत्....	२	३	२५	२	५१
गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्	१	२	११	१	१८६
गौणश्चेन्नाऽऽत्मशब्दात्	१	१	६	१	९९
गौण्यसंभवात्	२	३	३	२	४
,, ...	२	४	२	२	९९

च.

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः	२	४	१०	२	११६
चमसवदविशेषात्	१	४	८	१	३६५
चरणादिति चेन्नोपलक्षणार्थेति काष्णाजिनिः	३	१	९	२	१५७
चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भाव-भावित्वात्	२	३	१६	२	३६
चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः	४	४	६	२	५५७

छ.

छन्दत उभयाविरोधात्	३	३	२८	२	३२०
छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथाहि दर्शनम्	१	१	२५	१	१५४

ज.

जगद्वाचित्वात्	१	४	१६	१	३८७
जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च	४	४	१७	२	५६६
जन्माद्यस्य यतः....	१	१	२	१	३१
जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम्	१	४	१७	१	३९२
जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादा-श्रितत्वादिह तद्योगात्	१	१	३१	१	१६६
ज्ञेयत्वावचनाच्च	१	४	४	१	३५६
ज्ञोऽत एव	२	३	१८	२	४३
ज्योतिराद्यधिष्ठानं तु तदामननात्	२	४	१४	२	१२१

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
ज्योतिरुपक्रमा तु तथा ह्यधीयत एके	१	४	९	१	३६७
ज्योतिर्दर्शनात्	१	३	४०	१	३३९
ज्योतिश्चरणाभिधानात्	१	१	२४	१	१४७
ज्योतिषि भावाच्च	१	३	३२	१	३१४
ज्योतिषैकेषामसत्यन्ने	१	४	१३	१	३७८

त.

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्	२	४	१७	२	१२९
तच्छ्रुतेः	३	४	४	२	३९९
तडितोऽधि वरुणः संबन्धात्	४	३	३	२	५२९
तत्तु समन्वयात्	१	१	४	१	४७
तत्पूर्वकत्वाद्वाचः....	२	४	४	२	१०२
तत्प्राक्श्रुतेश्च	२	४	३	२	१०१
तत्रापि च तद्व्यापारादविरोधः	३	१	१६	२	१६३
तथा च दर्शयति....	२	३	२७	२	५४
तथा चैकवाक्यतोपबन्धात्	५	४	२४	२	४१९
तथाऽन्यप्रतिषेधात्	३	२	३६	२	२३९
तथा प्राणाः	२	४	१	२	९५
तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्	४	१	१३	२	४८५
तदधीनत्वादर्थवत्....	१	४	३	१	३५२
तदनन्यत्वमारम्भणशब्दादिभ्यः....	२	१	१४	१	४५७
तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्	३	१	१	२	१३५
तदभावनिर्धारणे च प्रवृत्तेः	१	३	२७	१	३२९
तदभावो नाडीषु तच्छ्रुतेरात्मनि च....	३	२	७	२	१८९
तदभिध्यानादेव तु तल्लिङ्गात्सः....	२	३	१३	२	३०
तदव्यक्तमाह हि....	३	२	२३	२	२२८
तदाऽपीतेः संसारव्यपदेशात्	४	२	८	२	५०८
तदुपर्यपि बादरायणः संभवात्....	१	३	२६	१	२९०
तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया	४	२	१७	२	५१६

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
तन्तुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्	२	३	२९	२	५४
तन्मूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपा- भावेभ्यः	३	४	४०	२	४३४
तद्वतो विधानात्	३	४	६	२	३९६
तद्धेतुव्यपदेशाच्च	१	१	१४	१	११९
तन्निर्धारणानियमस्तद्दृष्टेः पृथग्व्यप्रतिबन्धः फलम्	३	३	४२	२	३४९
तन्निष्ठस्य मोक्षोपदेशात्	१	१	७	१	१०१
तन्मनः प्राण उत्तरात्	४	२	३	२	५०१
तन्वभावे संध्यवदुपपत्तेः....	४	४	११	२	५६२
तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यवि- मोक्षप्रसङ्गः	२	१	११	१	४४९
तस्य च नित्यत्वात्	२	४	१६	२	१२४
तानि परे तथा ह्याह	४	२	१५	२	५१४
तुल्यं तु दर्शनम्....	३	४	९	२	३९९
तृतीयशब्दावरोधः संशोकजस्य....	३	१	२१	२	१६६
तेजोऽतस्तथा ह्याह	२	३	१०	२	२४
त्रयाणामेव चैवमुपन्यासः प्रश्नश्च....	१	४	६	१	३५८
त्र्यात्मकत्वात्तु भूयस्त्वात्	३	१	२	२	१४०

द.

दर्शनाच्च	३	१	२०	२	१६६
,, ...	३	२	२१	२	२१३
,, ...	३	३	४८	२	३६३
,, ...	३	३	६६	२	३९०
,, ...	४	३	१३	२	५३७
दर्शयतश्चैवं प्रत्यक्षानुमाने....	४	४	२०	२	५६९
दर्शयति च	३	३	४	२	२५६
,, ...	३	३	२२	२	२९७
दर्शयति चाथो अपि स्मर्यते	३	२	१७	२	२१०
दहर उत्तरेभ्यः	१	३	१४	१	२५९
दृश्यते तु....	२	१	६	१	४३७

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
देवादिवदपि लोके	२	१	२५	१	४९०
देहयोगाद्वा सोऽपि	३	४	६	२	१८७
द्युभ्वाद्यायतनं स्वशब्दात्	१	३	१	१	२३४
द्वादशाहवदुभयविधं बादरायणोऽतः	४	४	१२	२	५६२

ध.

धर्मं जैमिनिरत एव	३	२	४०	२	२४३
धर्मोपपत्तेश्च	१	३	९	१	२५१
धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः	१	३	१६	१	२६७
ध्यानाच्च	४	१	८	२	४८०

न.

न कर्माविभागादिति चेन्नानादित्वात्	२	१	३५	१	५०७
न च कर्तुः करणम्	२	२	४३	१	६११
न च कार्ये प्रतिपत्त्यभिसंधिः	४	३	१४	२	५३८
न च पर्यायादप्यविरोधो विकारादिभ्यः	२	२	३५	१	५९८
न च स्मार्तमतद्धर्माभिलापात्	१	२	१९	१	२०६
न चाऽऽधिकारिकमपि पतनानुमानात्तदयोगात्	३	४	४१	२	४३६
न तु दृष्टान्तभावात्	२	१	९	१	४४४
न तृतीये तथोपलब्धेः	३	१	१८	२	१६५
न प्रतीके न हि सः	४	१	४	२	४६९
न प्रयोजनवत्त्वात्	२	१	३२	१	५०३
न भावोऽनुपलब्धेः	२	२	३०	१	५८८
न भेदादिति चेन्न प्रत्येकमतद्वचनात्	३	२	१२	२	२०६
न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्	१	१	२९	१	१६३
न वा तत्सहभावाश्रुतेः	३	३	६५	२	३८९
न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्	३	३	७	२	२६०
न वायुक्रिये पृथगुपदेशात्	२	४	९	२	११३
न वा विशेषात्	३	३	२१	२	२९६
न वियदश्रुतेः	२	३	१	२	१
न विलक्षणत्वादस्य तथात्वं च शब्दात्	२	१	४	१	४३०

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च	१	४	११	१	३७०
न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः....	३	३	५१	२	३६८
न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि	३	२	११	२	२०४
नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्	२	३	२१	२	४८
नातिचिरेण विशेषात्	३	१	२३	२	१६९
नाऽऽत्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः	२	३	१७	२	३८
नाना शब्दादिभेदात्	३	३	५८	२	३८२
नानुमानमतच्छब्दात्	१	३	३	१	२४०
नाभाव उपलब्धेः	२	२	२८	१	५७८
नाविशेषात्	३	४	१३	२	४०२
नासतोऽदृष्टत्वात्....	२	२	२६	१	५७५
नित्यमेव च भावात्	२	२	१४	१	५४६
नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा	२	३	३२	२	६२
नियमाच्च	३	४	७	२	३९६
निर्मातारं चैके पुत्रादयश्च	३	२	२	२	१७९
निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च	४	२	१९	२	५१८
नेतरोऽनुपपत्तेः	१	१	१६	१	१२१
नैकस्मिन्दर्शयतो हि	४	२	६	२	५०५
नैकस्मिन्नसंभवात्	२	२	३३	१	५९२
नोपमर्देनातः	४	२	१०	२	५०९

प.

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते	२	४	१२	२	११८
पटवच्च	२	१	१९	१	४८३
पत्यादिशब्देभ्यः....	१	३	४३	१	३४२
पत्युरसामञ्जस्यात्	२	२	३७	१	६०१
पयोम्बुवच्चेत्तत्रापि	२	२	३	१	५२०
परं जैमिनिर्मुख्यत्वात्	४	३	१२	२	५३७
परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः	३	२	३१	२	२३३

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
परात्तु तच्छ्रुतेः	२	३	४१	२	७५
पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ	३	२	९	२	१८६
परामर्शं जैमिनिरचोदना चापवदति हि	३	४	१८	२	४०५
परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः	३	३	५२	२	३६९
पारिप्लवार्था इति चेन्न विशेषितत्वात्	३	४	२३	२	४१७
पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्	२	३	३१	२	६१
पुरुषविद्यायामिव चेतरेषामनाम्नानात्	३	३	२४	२	३००
पुरुषार्थोऽतः शब्दादिति बादरायणः	३	४	१	२	३९१
पुरुषाश्मवदिति चेत्तथाऽपि	२	२	७	१	५२५
पूर्वं तु बादरायणो हेतुव्यपदेशात्	३	२	४१	२	२४४
पूर्ववद्वा	३	२	२९	२	२३२
पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत्	३	३	४५	२	३६०
पृथगुपदेशात्	२	३	२८	२	५४
पृथिव्यधिकाररूपशब्दान्तरेभ्यः	२	३	१२	२	२८
प्रकरणाच्च	१	२	१०	१	१८६
प्रकरणात्	१	३	६	१	२४२
प्रकाशवच्चावैयर्थ्यात्	३	२	१५	२	२०९
प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्	३	२	२५	२	२३०
प्रकाशादिवन्नैवं परः	२	३	४६	२	८४
प्रकाशाश्रयवद्वा तेजस्त्वात्	३	२	२८	२	२३२
प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्	१	४	२३	१	४०६
प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः	३	२	२२	२	२२२
प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः	१	४	२०	१	३९८
प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः	२	३	६	२	९
प्रतिषेधाच्च	३	२	३०	२	२३२
प्रतिषेधादिति चेन्न शारीरात्	४	२	१२	२	५१०
प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्	२	२	२२	१	५६८
प्रत्यक्षोपदेशादिति चेन्नाऽऽधिकारिकमण्डलस्थोक्तेः	४	४	१८	२	५६७
प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः	३	१	५	२	१४२
प्रदानवदेव तदुक्तम्	३	३	४३	२	३५३

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
प्रदीपवदादेशस्तथा हि दर्शयति	४	४	१५	२	५६१
प्रदेशादिति चेन्नान्तर्भावात्	२	३	५३	२	९३
प्रवृत्तेश्च	२	२	२	१	५१७
प्रसिद्धेश्च	१	३	१७	१	२६९
प्राणगतेश्च	३	१	६	२	१४१
प्राणवता शब्दात्	२	४	१५	२	१२३
प्राणभृच्च	१	३	४	१	२४१
प्राणस्तथाऽनुगमात्	१	१	२८	१	१६०
प्राणादयो वाक्यशेषात्	१	४	१२	१	३७६
प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे	३	३	१२	२	२७४

फ.

फलमत उपपत्तेः	३	२	३८	२	२४१

ब.

बहिस्तूभयथाऽपि स्मृतेराचाराच्च	३	४	४३	२	४४०
बुद्ध्यर्थः पादवत्	३	२	३३	२	२३७
ब्रह्मदृष्टिरुत्कर्षात्	४	१	५	२	४७०
ब्राह्मेण जैमिनिरुपन्यासादिभ्यः	४	४	५	२	५५६

भ.

भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति	३	१	७	२	१४७
भावं जैमिनिर्विकल्पामननात्	४	४	११	२	५६१
भावं तु बादरायणोऽस्ति हि	१	३	३३	१	३१६
भावशब्दाच्च	३	४	२२	२	४१६
भावे चोपलब्धेः	२	१	१५	१	४७१
भावे जाग्रद्वत्	४	४	१४	२	५६३
भूतादिपादव्यपदेशोपपत्तेश्चैवम्	१	१	२६	१	१५७
भूतेषु तच्छ्रुतेः	४	२	५	२	५०४
भूमा संप्रसादादध्युपदेशात्	१	३	८	१	२४४
भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति	३	३	५७	२	३७९
भेदव्यपदेशाच्च	१	१	१७	१	१२१

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
भेदव्यपदेशाच्चान्यः	१	१	२१	१	१३७
भेदव्यपदेशात्	१	३	५	१	२४१
भेदश्रुतेः	२	४	१८	२	१२७
भेदानेति चेन्नैकस्यामपि....	३	३	२	२	२५२
भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्	२	१	१३	१	४५४
भोगमात्रसाम्यलिङ्गाच्च	४	४	२१	२	५६९
भोगेन त्वितरे क्षपयित्वा संपद्यते	४	१	१९	२	४२७

म.

मध्वादिष्वसंभवादनधिकारं जैमिनिः	१	३	३१	१	३१३
मन्त्रवर्णाच्च	२	३	४४	२	८२
मन्त्रादिवद्वाऽविरोधः	३	३	५६	२	३७७
महदीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्	२	२	११	१	५३९
महद्वच्च	१	४	७	१	३६४
मांसादि भौमं यथाशब्दमितरयोश्च	४	४	२१	२	१३३
मान्त्रवर्णिकमेव च गीयते....	१	१	१५	१	१२०
मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्....	३	२	३	२	१८०
मुक्तः प्रतिज्ञानात्	४	४	२	२	५५३
मुक्तोपसृप्यव्यपदेशात्	१	३	२	१	२३८
मुग्धेऽर्धसंपत्तिः परिशेषात्	३	२	१०	२	२००
मौनवदितरेषामप्युपदेशात्	२	४	४९	२	४४७

य.

यत्रैकाग्रता तत्राविशेषात्....	४	१	११	२	४८१
यथा च तक्षोभयथा	२	३	४०	२	६८
यथा च प्राणादि	२	१	२०	१	४८३
यदेव विद्ययेति हि	४	१	१८	२	४९५
यावदधिकारमवस्थितिराधिकारिकाणाम्	३	३	३२	२	३२५
यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्....	३	३	३०	२	५९
यावद्विकारं तु विभागो लोकवत्	२	३	७	२	१४
युक्तेः शब्दान्तराच्च	२	१	१८	१	४७९
योगिनः प्रति च स्मर्यते स्मार्ते चैते	४	२	२१	२	५२१

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
योनिश्च हि गीयते	१	४	२७	१	४१
योनेः शरीरम्	३	१	२७	२	१७
र.					
रचनानुपपत्तेश्च नानुमानम्	२	२	१	१	५१
रश्म्यनुसारी	४	२	१८	२	५१
रूपादिमत्त्वाच्च विपर्ययो दर्शनात्	२	२	१५	१	५४
रूपोपन्यासाच्च	१	२	२३	१	२१
रेतःसिग्योगोऽथ....	३	१	२६	२	१७
ल.					
लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि	३	३	४४	२	३५
लिङ्गाच्च	४	१	२	२	४५
लोकवत्तु लीलाकैवल्यम्	२	१	३३	१	५०
व.					
वदतीति चेन्न प्राज्ञो हि प्रकरणात्	१	४	५	१	३५
वाक्यान्वयात्	१	४	१९	१	३९
वाङ्मनसि दर्शनाच्छब्दाच्च	४	२	१	२	४९
वायुमब्दादविशेषविशेषाभ्याम्	४	३	२	२	५२
विकरणत्वान्नेति चेत्तदुक्तम्	२	१	३१	१	५०
विकल्पोऽविशिष्टफलत्वात्	३	३	५९	२	३८
विकारावर्ति च तथा हि स्थितिमाह	४	४	१९	२	५६
विकारशब्दान्नेति चेन्न प्राचुर्यात्	१	१	१३	१	११
विज्ञानादिभावे वा तदप्रतिषेधः	२	२	४४	१	६१
विद्याकर्मणोरिति तु प्रकृतत्वात्....	३	१	१७	२	१६
विद्यैव तु निर्धारणात्	३	३	४७	२	३६
विधिर्वा धारणवत्	३	४	२०	२	४०
विपर्ययेण तु क्रमोऽत उपपद्यते च	२	३	१४	२	३
विप्रतिषेधाच्च	२	२	४५	१	६१
विप्रतिषेधाच्चासमञ्जसम्....	२	२	१०	१	५१
विभागः शतवत्....	२	४	११	२	४०

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्	१	३	२७	१	२९२
विवक्षितगुणोपपत्तेश्च	१	२	२	१	१७६
विशेषं च दर्शयति	४	३	१६	२	५५१
विशेषणभेदव्यपदेशाभ्यां च नेतरौ	१	२	२२	१	२१६
विशेषणाच्च	१	२	१२	१	१९१
विशेषानुग्रहश्च	३	४	३८	२	४३३
विशेषितत्वाच्च	४	३	८	२	५३४
विहारोपदेशात्	२	३	३४	२	६५
विहितत्वाच्चाऽऽश्रमकर्मापि	३	४	३२	२	४२८
वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेव	३	२	२७	२	२१२
वेधाद्यर्थभेदात्	३	३	२५	२	३०३
वैद्युतेनैव ततस्तच्छ्रुतेः	४	३	६	२	५३३
वैधर्म्याच्च न स्वप्नादिवत्	२	२	२९	१	५८७
वैलक्षण्याच्च	२	४	१९	२	१२७
वैशेष्यात्तु तद्वादस्तद्वादः....	२	४	२२	२	१३४
वैश्वानरः साधारणशब्दविशेषात्	१	२	२४	१	२२०
वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति	२	१	३४	१	५०५
व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत्	३	३	५४	२	३७२
व्यतिरेकानवस्थितेश्चानपेक्षत्वात्	२	२	४	१	५२२
व्यतिरेको गन्धवत्	२	३	२६	२	५२
व्यतिहारो विशिंषन्ति हीतरवत्	३	३	३७	२	३३७
व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः	२	३	३६	२	६५
व्याप्तेश्च समञ्जसम्	३	३	९	२	२६६

श.

शक्तिविपर्ययात्	२	३	३८	२	६७
शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्....	१	३	२८	१	२९५
शब्दविशेषात्	१	२	५	१	१७९
शब्दश्चातोऽकामकारे	३	४	३१	२	४२७
शब्दाच्च	२	३	४	२	६

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते	१	२	२६	१	२२४
शब्दादेव प्रमितः....	१	३	२४	१	२८६
शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्	३	४	२७	२	४२२
शारीरश्चोभयेऽपि हि भेदेनैनमधीयते	१	२	२०	१	२०८
शास्त्रदृष्ट्या तूपदेशो वामदेववत्....	१	१	३०	१	१६५
शास्त्रयोनित्वात्	१	१	३	१	४१
शिष्टेश्च	३	३	६२	२	३८८
शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि....	१	३	३४	१	३२१
शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः....	३	४	२	२	३९२
श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च	१	३	३८	१	३३०
श्रुतत्वाच्च....	१	१	११	१	११०
,, ...	३	२	३९	२	२४२
श्रुतेश्च	३	४	४६	२	४४२
श्रुतेस्तु शब्दमूलत्वात्	२	१	२७	१	४९४
श्रुतोपनिषत्कगत्यभिधानाच्च	१	२	१६	१	२००
श्रुत्यादिबलीयस्त्वाच्च न बाधः....	३	३	४९	२	३६३
श्रेष्ठश्च	२	४	८	२	१११

स.

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि	३	३	८	२	२६५
संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्	२	४	२०	२	१२९
संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्	३	१	१३	२	१६१
संस्कारपरामर्शात्तदभावाभिलापाच्च	१	३	३६	१	३२८
स एव तु कर्मानुस्मृतिशब्दविधिभ्यः	३	२	९	२	१९७
संकल्पादेव तु तच्छ्रुतेः	४	४	८	२	५५८
सत्त्वाच्चावरस्य	२	१	१६	१	४७३
संध्ये सृष्टिराह हि	३	२	१	२	१७७
सप्त गतेर्विशेषितत्वाच्च	२	४	५	२	१०३
समन्वारम्भणात्	३	४	५	२	३९६

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
समवायाभ्युपगमाच्च साम्यादनवस्थितेः	२	२	१३	१	५४५
समाकर्षात्	१	४	१५	१	३८५
समाध्यभावाच्च	२	३	३९	२	६८
समान एवं चाभेदात्	३	३	१९	२	२९२
समाननामरूपत्वाच्चाऽऽवृत्तावप्यविरोधो दर्शनात्स्मृतेश्च	१	३	३०	१	३०७
समाना चाऽऽसृत्युपक्रमादमृतत्वं चानुपोष्य	४	२	७	२	५०६
समाहारात्	३	३	३६	२	३८८
समुदाय उभयहेतुकेऽपि तदप्राप्तिः	२	२	१८	१	५५९
संपत्तेरिति जैमिनिस्तथा हि दर्शयति	१	२	३	१	२३१
संपद्याऽऽविर्भावः स्वेनशब्दात्....	४	४	१	२	५५२
संबन्धादेवमन्यत्रापि	३	३	२०	२	२९४
संबन्धानुपपत्तेश्च	२	२	३८	१	६०४
संभृतिद्युव्याप्त्यापि चातः	३	३	२३	२	२९८
संभोगप्राप्तिरिति चेन्न वैशेष्यात्....	१	२	८	१	१८२
सर्वत्र प्रसिद्धोपदेशात्	१	२	१	१	१७३
सर्वथाऽनुपपत्तेश्च....	२	२	३२	१	५९१
सर्वथाऽपि त एवोभयलिङ्गात्	३	४	३४	२	४३०
सर्वधर्मोपपत्तेश्च	२	१	३७	१	५१०
सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्	३	३	१	२	२४५
सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्	३	४	२८	२	४२४
सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्....	३	४	२६	२	४२०
सर्वाभेदादन्यत्रेमे	३	३	१०	२	२७०
सर्वोपेता च तद्दर्शनात्	२	१	३०	१	५००
सहकारित्वेन च....	३	४	३३	२	४२९
सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्	३	४	४७	२	४४३
साक्षाच्चोभयाम्नानात्	१	४	२५	१	४१०
साक्षादप्यविरोधं जैमिनिः	१	२	२८	१	२२८
सा च प्रशासनात्	१	३	११	१	२५४
साभाव्यापत्तिरुपपत्तेः	३	१	२२	२	१६७

(सूत्राणि।)	अ०	पा०	सू०	भा०	पृ०
सामान्यात्तु	२	२	३२	२	२३५
सामीप्यात्तु तद्व्यपदेशः	४	३	९	२	५३५
सांपराये तर्तव्याभावात्तथा ह्यन्ये	३	३	२७	२	३१८
सुकृतदुष्कृते एवेति तु बादरिः	३	१	११	२	१५९
सुखविशिष्टाभिधानादेव च	१	२	१५	१	१९८
सुषुप्त्युत्क्रान्त्योर्भेदेन	१	३	४२	१	३३९
सूक्ष्मं तु तदर्हत्वात्	१	४	२	१	३५१
सूक्ष्मं प्रमाणतश्च तथोपलब्धेः	४	२	९	२	५०९
सूचकश्च हि श्रुतेराचक्षते च तद्विदः	३	२	४	२	१८३
सैव हि सत्यादयः	३	३	३८	२	३३९
सोऽध्यक्षे तदुपगमादिभ्यः	४	२	४	२	५०
स्तुतयेऽनुमतिर्वा	३	४	१४	२	४०२
स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्....	३	४	२१	२	४१४
स्थानविशेषात्प्रकाशादिवत्	३	२	३४	२	२३८
स्थानादिव्यपदेशाच्च	१	२	१४	१	१९७
स्थित्यदनाभ्यां च	१	३	७	१	२४२
स्पष्टो ह्येकेषाम्	४	२	१३	२	५११
स्मरन्ति च	२	३	४७	२	८६
,, ...	३	२	१४	२	१६२
,, ...	४	१	१०	२	४८१
स्मर्यते च....	४	२	१४	२	५१३
स्मर्यतेऽपि च लोके	३	१	१९	२	१६६
स्मर्यमाणमनुमानं स्यादिति	१	२	२५	१	२२३
स्मृतेश्च	१	२	६	१	१८०
,, ...	४	३	११	२	५३६
स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनव-काशदोषप्रसङ्गात्	२	१	१	१	४१७
स्याच्चैकस्य ब्रह्मशब्दवत्....	२	३	९	२	७
स्वपक्षदोषाच्च	२	१	१०	१	४४७
,, ...	२	१	२९	१	४९८
स्वशब्दोन्मानाभ्यां च	२	३	२२	२	४९

(सूत्राणि ।)	अ०	पा०	सू०	भा०	पृ०
स्वात्मना चोत्तरयोः	२	३	२०	२	४७
स्वायस्य तथात्वेन हि समाचारेऽधिकाराच्च सवच्च तन्नियमः	३	३	३	२	२५४
स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि	४	४	१६	२	५६५
स्वाप्ययात्	१	१	९	१	१०७
स्वामिनः फलश्रुतेरित्यात्रेयः	३	४	४४	२	४४०
ह.					
हस्तादयस्तु स्थितेऽतो नैवम्	२	४	६	२	१०५
हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगान-वत्तदुक्तम्	३	३	२६	२	३११
हृद्यपेक्षया तु मनुष्याधिकारत्वात्	१	३	२५	१	२८८
हेयत्वावचनाच्च	१	१	८	१	१०६